238

श्रीरस्तु

श्रीभगवत् प्रणीता

मोक्षसौधसोपानभूता

श्रीमद्भगवद्गीता

"विचित्रशतावधानी" "विद्वन्मणि" "सलक्षणवर्णक्रम धनपाठि" "महाभागवत"
"मतत्रय भगवद्गीतोपन्यास विद्वान्" इत्याद्यनेक बिरुदालंकृत बालेगडे
पण्डित टि. लक्ष्मणाचार्य प्रणीतया, मतत्रय भाष्यार्थ प्रकाशिकया

श्रीभगवद्गीतोपन्यासदर्पणाख्यया

व्याख्यया संबलिता

तत् पौत्रेण

बालेगडे. लि. ना. रघूत्तमाचार्येण

प्रकाशीकृता

चेन्नपुर्यां डिक्सन् मुद्राक्षरशालायां मुद्रिताविजयतेतमाम्

प्रथमोभागः

श्रीशके १८४६ रक्ताक्षिनामसंवत्सरे

मूल्यं रूप्यकपंचकं] *All Rights Reserved.* [प्रेषणव्ययः पथक्

अस्य पुस्तकस्य सर्वोप्यधिकाराः राजकीयनियमानुरोधेन प्रकटयिता स्वायत्तीकृताः ॥

॥ श्रीः ॥

॥ श्रीगुरुभ्योनमः ॥

238

अथ

श्रीभगवद्गीतोपन्यासदर्पणाख्यव्याख्यासहितायाः

श्रीमद्भगवद्गीतायाः

प्रथमोऽध्यायः

श्रीश्रीशचरणांभोजमभिवन्द्य यथामति ॥

वितन्यते श्रीभगवद्गीतोपन्यासदर्पणः ॥

वैशंपायनः

जनमेजय महाराज सम्यगवधानेन शृणु

श्रीभगवद्गीतापर्वमर्म

तत्र कौरवपाण्डवसेनयोरुभयोर्महते युद्धाय संनद्धयोः भगवान् वेदव्यासः १ मातुर्दोषाद्बहिरिव २ पुत्रदोषादन्तरप्यंधतामुपगतं पुत्रवात्सल्यात् पुत्रनाशशङ्कया विषीदन्तं स्वपुत्रं धृतराष्ट्रमभ्युपेत्य राजन् पुत्रास्ते भाविनि संग्रामे नियतं विनंक्ष्यन्ति॥ यदि ते संग्रामं द्रष्टुमिच्छासि तर्हि तदर्शनाय चक्षुस्ते ददानीत्युक्त्वा नाहं द्रष्टुमिच्छामि किंतु श्रोतुमिच्छामि श्रावय युद्धमशेषेण इति तेन प्रार्थितः स्वशिष्यं धृतराष्ट्रसारथिं गवल्गणसुतं सञ्जयं समाहूय तस्मै युद्धविषये सार्वज्ञमनुगृह्य कथयास्मै युद्धमखिलमादित आरभ्येति तमादिश्य स्वावासमगमत् ॥ उक्तं हि ते मया ॥ 'ततः

१. धृतराष्ट्रजननी अंबिका विचित्रवीर्यभार्या भगवता वेदव्यासेन सङ्गमे न्यमीलयदक्षिणी तेन दोषेण तस्याः सुतो धृतराष्ट्रश्चक्षुषांऽधो बभूव ॥ २. विवेकिनामग्रेसरोऽपि अपत्यपुत्रवात्सल्यादन्तर्विवेकदृष्टिरहितोऽभूत् ॥ अत्र, 'मातुर्दोषादिव बहिरगादंतरप्येषतामगम् ॥ इति श्लोकोऽनुसन्धेयः ॥

पूर्वापरे सैन्ये समीक्ष्य भगवानृषिः॥ सर्ववेदविदां श्रेष्ठो व्यासः सत्यवतीसुतः ॥ भविष्यति रणे घोरे भरतानां पितामहः॥ प्रत्यक्षदर्शी भगवान् भूतभव्यभविष्यवित् ॥ वैचित्रवीर्यं राजानं रहस्थमिदमब्रवीत् ॥ शोचन्तमार्तं ध्यायन्तं पुत्राणामनयं तदा ॥ राजन् परीतकालास्ते पुत्राश्चान्ये च पार्थिवाः॥ ते हिंसन्तीव संग्रामे समासाद्येतरेतरम्॥ तेषु कालपरीतेषु विनश्यत्स्वेव भारत॥ कालपर्यायमाज्ञाय मा स्म शोके मनः कृथाः॥ यदि चेच्छसि संग्रामं द्रष्टुमेनं विशांपते ॥ चक्षुर्ददानि ते पुत्र युद्धमेतन्निशामय ॥ न रोचये ज्ञातिवधं द्रष्टुं ब्रह्मर्षिसत्तम ॥ युद्धमेतदशेषेण श्रृणुयां तव तेजसा ॥ तस्मिन्नेच्छति द्रष्टुं सङ्ग्रामं श्रोतुमिच्छति ॥ वराणामीश्वरो व्यासः संजयाय वरं ददौ ॥ एष ते संजयो राजन् युद्धमेतद्वदिष्यति ॥ एतस्य सर्वं संग्रामे न परोक्षं भविष्यति॥ प्रकाशं वाऽप्रकाशं वा दिवा वा यदि वा निशि ॥ मनसा चिन्तितमपि सर्वं वेत्स्यति संजयः ॥ नैनं शस्त्राणि भेत्स्यन्ति नैनं बाधिष्यते श्रमः ॥ गावल्गणिरयं जीवन् युद्धादस्माद्विमोक्ष्यते ॥ एवमुक्त्वा ययौ व्यासो धृतराष्ट्राय धीमते'॥ इति ॥ गते तस्मिन् संजयः सङ्गररङ्गमेत्य पार्थाय गीतां कथयतः कृष्णस्य मुखात् गीतां साक्षाच्छ्रुत्वा वेदव्यासानुग्रहलब्धदिव्यज्ञानेन करतलामलकीभूतविविधविचित्रयुद्धसङ्गताखिलोदन्तः सङ्गररङ्गादेत्य युद्धमेव ध्यायते धृतराष्ट्राय युद्धमादित आरभ्य कथयन् दुर्योधनादयः एकादशाक्षौहिणीमितेन सैन्येन साहाय्यकसमाचरणाय समुपागतैः राजभी राजपुत्रैश्च संयुताः युद्धाय संनद्धाः कुरुक्षेत्रममजन् इत्यकथयत् ॥ उक्तं हि मया ॥ 'अथ गावल्गणिर्विद्वान् संयुगादेत्य भारत ॥ प्रत्यक्षदर्शी सर्वस्य भूतभव्यभविष्यतः॥ ध्यायते धृतराष्ट्राय समुपेत्यैवमब्रवी'दिति ॥ श्रुतवांश्चतद्वचनं धृतराष्ट्रः पुत्रवात्सल्येन स्वपुत्राणां विना युद्धं राज्यलाभमाशंसमानः तथा शङ्कमानश्च गूढाशयस्संजयम प्राक्षीत् ॥

धृतराष्ट्र उवाच ॥

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ॥
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय ॥ १ ॥

धर्मक्षेत्र इति॥ सम्यक् जयतीति सञ्जयः हे सञ्जय योधुं इच्छवः युयुत्सवः धर्मस्य क्षेत्रं स्थानं धर्मप्रधानं क्षेत्रं इति धर्मप्रदं क्षेत्रं इति वा धर्मक्षेत्रम् ॥ धर्मक्षयात् त्रायत

इति धर्मस्य क्षेत्रमिव इति वा धर्मक्षेत्रम् ॥ धर्मस्य धारकत्वात्धर्मशब्दवाच्यस्य भगवतः क्षेत्रं निवासस्थानं इति वा धर्मक्षेत्रं ॥ तादृशे कुरोः राज्ञः क्षेत्रं कुरुक्षेत्रं तस्मिन् समवेताः सङ्गताः मम इमे मामकाः दुर्योधनादयः पाण्डवाश्चैव किं अकुर्वत ॥ १ ॥

कुरुक्षेत्रे मिलिताः मदीयाः दुर्योधनादयः पाण्डवाश्च किं अकुर्वन् ॥ युद्धाय संनद्धाः कुरुक्षेत्रमभजन्निति त्वयुक्तं मया ॥ युद्धाय कुरुक्षेत्रगता स्तत्र युद्धमेव खलु कुर्युः ॥ तत्प्रकारजिज्ञासया कथमकुर्वतेति प्रष्टव्ये १ किमकुर्वतेति प्रश्नो न युक्त इति चेत् ॥ क्षत्रियत्वात् दायादभावाच्च योद्धुमिच्छवोऽभूवन् ॥ यदि युद्धाय किमप्यन्यदेव स्थलं गतवन्तः स्युः । तर्हि ते तत्र मिथोऽयुध्यंतैवेति निश्चीयेत ॥ कुरुक्षेत्रं हि गतास्ते अतो मे संशयः किं यथाऽभिलाषितं युद्धमकुर्वन् उत युद्धान्निवृत्ताः सन्धिमकुर्वन्निति ॥ कुतोऽयं संशय इति चेत् ॥ तादृशं हि तत् कुरुक्षेत्रम् ॥ कीदृशमिति चेत् ॥ धर्मस्य क्षेत्रं स्वसंस्पर्शमात्रेण धर्मतत्फलप्रदत्वेन धर्मस्थानम् ॥ किंच धर्मे कदाऽप्यप्रवृत्तोऽपि कुरुक्षेत्रं गतश्चेत् तस्य धर्मे बुद्धिरुदेति अतो धर्मवुत्थ्युत्पादकत्वेन धर्मस्य स्थानम् ॥ किंच धर्मस्य अनुष्ठेयस्य अनुष्ठानोचितं सिद्धिप्रदं स्थानम् ॥ किंच क्षात्रियधर्मस्य समराध्वरस्य समुचितं स्थानम् ॥ किंच धर्मस्य क्षयो नाशोऽधर्मः तस्मात् तं त्याजयित्वा धर्ममार्गे प्रवर्तनेन त्रायते स्वाश्रितं अतो धर्मक्षेत्रम् ॥ किंच धर्मस्य क्षेत्रमेवेदं कुरुक्षेत्रं अनुष्ठितं स्वल्पमपि धर्मं स्वास्मिन्नुप्तं बीजं गुणवत् क्षेत्रमिव बहुलीकृत्य फलमिदं ददाति अतो धर्मस्य क्षेत्रतुल्यम् ॥ किंच एतादृशमहामहिमवत्वात् धारकत्वेन धर्मस्य भगवतो विशेषसंनिधानस्थानम् ॥ कुरुक्षेत्रं हि तत् कौरवाणां पाण्डवानां स्वकुलकूटस्थकुरुमहाराजसंबन्धसूचकतन्नामसाहित्येन परममाननार्हं हि तत्क्षेत्रम् ॥ अस्मत्कुलकूटस्थः कुरुमहाराजः कुरुक्षेत्रे वर्णाश्रमोचितानि विहितानि महितानि कर्माण्यकार्षीत् ॥ अतो हि तन्नामोपपदमभूत्तत्क्षेत्रम् ॥ कुरुक्षेत्रं अत एव धर्मक्षेत्रं धर्मक्षेत्रं अत एव कुरुक्षेत्रम् ॥ तादृशे तस्मिन् क्षेत्रे हि मिलि-

---

१. कर्तृगामिनि क्रियाफले विहितेन आत्मनेपदेन स्वस्वप्रयोजनार्थं किं कृतवन्त इति सूच्यते ॥

ताः १ मामकाः २ पाण्डवाश्चैव ॥ अतः युयुत्सवोऽपि धर्मक्षेत्रे कुरुक्षेत्रे समवेतत्वात् उक्तमहामहिममहितस्य नावेशेषगुणेन विहाय युद्धबुद्धिं मिथः कृतसन्धयः स्युरिति मे समुन्मिषति शङ्का ॥ अतः किमकुर्वन्निति ममायं प्रश्नः ॥ हे सञ्जय ब्रूहि ॥ त्वं तु अन्तः शत्रून् कामक्रोधादीन् जितवानसि ॥ अतो यथार्थमेव त्वया वाच्यम् ॥ न तु मन्मनस्तोषाय किमपि ॥ यदि क्षेत्रमहिम्ना पूर्वमेव धार्मिकाः पाण्डवा माऽस्तु युद्धमिति युद्धान्निवृत्य यथागतं यत्र कुत्रापि गच्छेयुः ॥ तर्हि मामकैः विनैव युद्धमुपलब्धमखिलं राज्यमिति महदिदं हर्षस्थानम् ॥ यदि पापिनोऽपि मामकाः क्षेत्रमहिम्ना माऽस्तु युद्धमिति युद्धान्निवृत्य पाण्डवेभ्यो विभज्य राज्यार्धं दद्युः ॥ तर्हि विनष्टप्रायास्ते इति महदिदं शोकस्थानम् ॥ अतः पृच्छामि इति सञ्जयं धृतराष्ट्र उवाच ॥ न केवलं मामकानां पाण्डवानां चैव युद्धवृत्तं त्वया वाच्यम् ॥ किंतु ३ मामकानां संबन्धिनो ये भीष्मद्रोणकृपाश्वत्थामकर्णसौमदत्तिजयद्रथभगदत्तप्रभृतयः ये च पाण्डवानां संबन्धिनो वासुदेवसात्यकिधृष्टद्युम्नविराटद्रुपदप्रभृतयः तेषामपि युद्धवृत्तं त्वया वाच्यम् ॥ अतो यथावदखिलं ४ कथय ॥ १ ॥

---

१. पाण्डवानां पृथक् निर्देशात्तेषु ममकाराभावप्रदर्शनेन तेषु द्वेषो व्यज्यते ॥ २. च एव इति निपातसमुदायः समुच्चयार्थकः ॥ चकारः समुच्चयार्थकः एवकारस्तु अनेकेषां राज्ञां तत्र समवायेऽपि वर्गद्वयमेवाभूत् ॥ नान्यस्तृतीयो वर्ग इत्यवधारणार्थ इति वा ॥ ३. इदं चकारेण लक्षणया वा ॥ मम इमे मामकाः पाण्डोरिमे पाण्डवाः इति विवक्षणेन वा लभ्यते ॥ विवक्षणीयं चेदम् ॥ अन्यथा सञ्जयस्य भीष्मादिसर्ववीरवृत्तकथनमपृष्टप्रतिवचनं स्यात् ॥ ४. अत्र, मङ्गलाचरणाभावादमाङ्गलिकमिदमिति न मन्तव्यम् ॥ मङ्गलाचरणे हि आशीर्नमस्क्रियावस्तुनिर्देशान्यतमेन तेन प्रारिप्सितग्रन्थपरिसमाप्त्यादिकमेव जायेत न तु उपायोपेयबोधनम् ॥ धर्मशब्दप्रयोगेण तु उपेयो भगवान् उपायो निवृत्तिकर्मशब्दितो धर्मश्चेत्युभयं उक्तं भवति ॥ परमप्राप्यस्य भगवतो नामसङ्कीर्तनादन्यत्किमस्ति मङ्गलं नाम ॥ अतः इदमेव मङ्गलाचरणं अतः परममाङ्गलिकमिदम् ॥ किंच आदौ धर्मशब्दप्रयोगेण शास्त्रेऽस्मिन् धर्मो भगवान् तत्प्राप्को निवृत्तिधर्मश्चेत्युभयं प्राधान्येन प्रतिपाद्यं इति सूच्यते ॥ किंच धर्माणां क्षेत्रे कुरूणां नरकदानेन हिंसकानां दोषाणां क्षेत्रे शरीरे समवेताः मिथो युयुत्सवः दुरिन्द्रियवृत्तयः सदिन्द्रियवृत्तयश्च किं कुर्वन्तीति प्रश्नः ॥ दुरिन्द्रियवृत्तयः सदिन्द्रियवृत्तीरधः पातयितुमुद्युञ्जते ॥ भगवद्भागवताश्रयणेन सदिन्द्रियवृत्तयो दुरिन्द्रियवृत्तीर्नाशयित्वा स्वाश्रयं सकलभोगभोगिनं कुर्वन्तीत्यादि यं यथार्थव्यञ्जनपरिपाटी यथायथमूहनीया ॥

जनमेजयः ॥ एवं धृताराष्ट्रेण पृष्टः सञ्जयः किमाह धृतराष्ट्रम् ॥ ब्रूत ॥

वैशंपायनः ॥ एवं पृष्टः सञ्जयः त्वत्पुत्राः परमपापत्वात् परमपवित्रकुरुक्षेत्र-महिम्ना न युद्धान्निवृत्ताः ॥ पाण्डवास्तु युद्धस्य स्वधर्मत्वबुध्या भगवदाशयानुरोधेन च न युद्धान्निवृत्ताः ॥ किंतु उभयेऽपि युद्ध एव प्रावर्तिषत ॥ युद्धे च पाण्डवा व्यजयन्त ॥ त्वत्पुत्राः पराऽभूवन् इति कथयिष्यन् युद्धारंभात् पूर्वतनवृत्तांतमाह ॥

॥ सञ्जय उवाच ॥

दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा ॥
आचार्यमुपसङ्गम्य राजा वचनमब्रवीत् ॥ २ ॥

दृष्ट्वेति ॥ राजा दुर्योधनस्तु तदा व्यूढं व्यूहशः स्थापितं पाण्डवानां अनीकं सैन्यं पाण्डवानीकं दृष्ट्वा आचार्यं गुरुं द्रोणं उपसंगम्य सविनयमुपसृत्य वचनं अब्रवीत् ॥ २ ॥

न पापाः तावकाः पापाशयतया युद्धान्निवृत्ताः ॥ किन्तु उभयेऽपि युद्ध एव प्रावर्तिषत ॥ तत्र युद्धारंभात्पूर्वतनं त्वत्पुत्ररत्नवृत्तं शृणु ॥ पाण्डवेषु चिरतरप्रवासेन प्रजाः जातविरागाः चिरतरानुवृत्या जातानुरागाश्चास्मासु ॥ अतः पाण्डवानां सेनासंभारसंभरणमशक्यम् ॥ अतस्ते सहायहीनाः पञ्चैव सङ्गररङ्गमागच्छेयुः ॥ ततस्ते विनैवायासं मशकानिर्विशेषं शक्याः पराभावयितुमिति मन्वानोऽवर्तत तावत्-कानामादिमो राजा दुर्योधनः ॥ स च समररङ्गे सेनापतिना द्रुपदपुत्रेण धृष्टद्युम्नेन व्यूहशः स्थापितं पाण्डवानां सैन्यमवलोक्य यदीमे सह सेनया युद्धायागच्छेयुरिति पूर्वमेव मम भ्रातं स्यात् तर्हि मया नैव युद्धे प्रवृत्तं स्यात् ॥ प्रवृत्तश्चास्मि युद्धे ॥ आगतश्चास्मि सहाखिलपरीवारो युद्धाय ॥ विमेमीदानीं पाण्डवसैन्यदर्शनेन किं कर्तव्यमिति धैर्यभ्रंशरूपं अवस्था १ विशेषं प्राप्तः भयेन विषीदन् भीष्मो जरठत्वात् पाण्डवपक्षपातित्वाच्च पाण्डवैरन्तरेणायासमभिभूतः स्यात् ॥ अतोऽयं अप्रमादेन रक्षणीय इति क्वाप्यासन्नतमे पुंसि स्वीयं व्यसनं विवक्षुः धनुर्वेदाचार्यतया परममान्यं

---

१. तुशब्दार्थोऽयम् ॥

ब्राह्मणतया निग्रहानुग्रहकरणचणं द्रोणं हन्तायमास्माकीनोऽपि भूत्वा अस्मद्विपक्षान् पाण्डवान् तत्सेनापतिं धृष्टद्युम्नं च धनुर्विद्यापारगानकरोत् न तथाऽस्मान् इति सरोषं साकूतमालोक्य तस्मिन् विवक्षुः भीत्या तमनादृत्य स्वाभ्याशं स्वयमेव सप्रश्रयं तत्सविधमाप्य स्वाशयावेदकं वचनमवादीत् ॥ व्यूहशः स्थापितस्य सैन्यस्य दर्शनादेवाबिभेत् ॥ किमुत ततस्तत्र युद्धाय विभज्य स्थापितस्य तस्य॥ पाण्डवसैन्यस्य दर्शनादेवाविभेत् किमुत पाण्डवानाम् ॥ १ वचनमेवाब्रवीत् न तु कश्चिदप्यर्थम् ॥ अवचनमिति च्छेदे राजभावविरुद्धं अगौरवावहं वचनमब्रवीत् ॥ आवयोः संवादे वत्सो दुर्योधन इति वक्तव्ये राजा दुर्योधन इत्युक्तिः कुत इति चेत् ॥ यदि दुर्योधन आत्मानं वत्सं अस्मांश्च मान्यान्मन्यमान आस्माकीनं वचनमाद्रियेत तर्हि नैवं युद्धमारब्धं स्यात् ॥ किन्तु राजानं आत्मानं मत्वा अस्मान् तृणाय मनुते ॥ अतोऽयमनर्थोच्छेदः इति सूचयितुं राजेत्युक्तम् ॥ २ इति धृतराष्ट्रं सञ्जय उवाच ॥ २ ॥

धृतराष्ट्रः ॥ मम पुत्रो दुर्योधनः किं वचनमब्रवीत् ॥ तद्वद ॥

सञ्जयः ॥ दुर्योधनेनोक्तं वचनं ब्रवीमि ॥ अवधारय तदवधानेन ॥

दुर्योधनः ॥ पश्यैतां पाण्डुपुत्राणामाचार्य महतीं चमूम् ॥

व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ॥

पश्येति ॥ हे आचार्य द्रुपदस्य पुत्रः द्रुपदपुत्रः तेन द्रुपदपुत्रेण धीः बुद्धिः अस्यास्तीति धीमान् तेन धीमता तव शिष्येण धृष्टद्युम्नेन व्यूढां व्यूहशः स्थापितां एतां पुरोवर्तिनीं महतीं पाण्डोः पुत्राः पाण्डुपुत्राः तेषां चमूम् सेनां पश्य ॥ ३ ॥

अहो महादिदमन्याय्यं अद्भुतं च हन्त मदीयोऽपि भूत्वा त्वं मम दायादान् अत एव मद्विरोधिनोऽर्जुनादीन् एतादृशानकरोः अतस्त्वं ३ पाण्डवानामाचार्योऽसि

---

१. संक्षिप्तबह्वर्थत्वादिमुक्तविशिष्टं वचनमब्रवीत् इति वचनमेवाब्रवीत् न तु कश्चिदप्यर्थमिति वा सूचयितुं वचनमब्रवीदित्युक्तम् ॥ अन्यथा अब्रवीदित्येवालम् ॥ २. अत्र तुशब्दस्य एवकारार्थत्वमभ्युपेत्य तस्य दृष्ट्वैव पाण्डवानीकमेव व्यूढमेव दुर्योधन एव तदैव आचार्यमेव उपसङ्गम्यैव राजैव वचनमेव अब्रवीदेवेति प्रतिपदं योजनेन यथायथमर्थविशेषा ऊहनीयाः॥ एवमन्यत्राप्यूह्यम् ॥ ३पाण्डुपुत्राणामाचार्येति योजनेन सूचितोऽयमर्थः ॥

न त्वस्माकम् ॥ द्रुपदेन राज्ञा याजोपयाजपरमानुग्रहात्त्वां हन्तुमुत्पादितोऽयं पाण्डवचमूपतिर्धृष्टद्युम्नः त्वया शिष्यत्वेन स्वीकृत्य धीमत्तामादितः॥ अहो ते बुद्धिमांद्यम् ॥ सञ्जिहीर्षितस्यापि तव सकाशात् स विद्यामग्रहीष्ट ॥ त्वं तु तेन वञ्चितः ॥ तथाऽपि आचार्यत्वात् त्वमेव शरणीकरणीयोऽसि ॥ तव शिष्येण अत एव धीमता धीमता अतस्तव शिष्येण द्रुपदस्य पुत्रेण धृष्टद्युम्नेन सेनापतिना व्यूहशः स्थापितां पुरोवर्तिनीं पाण्डुपुत्राणां महतीं सेनां १ पश्य ॥ किमिमे पितृव्यस्य पाण्डोः पुत्राः न किन्तु तस्य २ क्षेत्रे पुरुषांतरैरुत्पादिताः कथं ज्येष्ठस्य धृतराष्ट्रस्य औरसपुत्रानस्मानुपेक्ष्य कनिष्ठस्य क्षेत्रजपुत्रेषु एषु तवैतावान् पक्षपातः ॥ तव शिष्येण धृष्टद्युम्नेन व्यूढां चमूं दृष्ट्वा अहं बिभेमि ॥ अस्तु का गतिः प्रकृतमनुसरामः ॥ ३ ॥

द्रोणः ॥ किमत्र द्रष्टव्यम् ॥ वर्ततां नाम द्रुपदपुत्र एको वीरः तं यः कश्चिदास्माकीनो हनिष्यति कुतो बिभेषि ॥

दुर्योधनः ॥ अत्र शूरा महेष्वासाः भीमार्जुनसमा युधि ॥
युयुधानो विराटश्च द्रुपदश्च महारथः ॥ ४ ॥

धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान् ॥
पुरुजित्कुन्तिभोजश्च शैब्यश्च नरपुङ्गवः ॥ ५ ॥

युधामन्युश्च विक्रांत उत्तमौजाश्च वीर्यवान् ॥
सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ॥ ६ ॥

अत्रेति ॥ इष्वः बाणाः अस्यन्ते क्षिप्यन्ते अनेनेति इष्वासः धनुः महान् इष्वासः येषां ते महेष्वासाः भीमश्च अर्जुनश्च भीमार्जुनौ ताभ्यां समाः सदृशाः भीमार्जुनसमाः युधि शूराः अत्र पाण्डवसेनायां सन्ति ॥ महारथः युयुधानः सात्यकिः विराटश्च द्रुपदश्च वीर्यं अस्यास्तीति वीर्यवान् धृष्टकेतुः चेकितानः काश्यः राजा काशिराजश्च

---

१. हर्षशोकभयविस्मयादिषु पश्य शृणु इति क्रियाया एव प्रथममुक्तिर्लोके दृष्टा ॥ अतः पश्य इत्यस्य प्रथममुक्तिः ॥ पश्येत्यस्य एतामित्यादिषु अन्वयकल्पनाद्विच्छित्तिविशेषा ऊह्याः ॥ आदुर्योधनवचनसमाप्ति पश्येत्यस्य प्रतिवाक्यमन्वयो बोध्यः ॥ २. पाण्डुपुत्राणामिति साकूतवचनस्याशयोऽयम् ॥

नराणां पुङ्गवः श्रेष्ठः नरपुङ्गवः पुरुजित् कुन्तिभोजश्च शैब्यः शिबिवंशजः स च विक्रान्तः विक्रमवान् युधामन्युश्च वीर्यं अस्यास्तीति वीर्यवान् उत्तमौजाश्च सुभद्राया अपत्यं सौभद्रः अभिमन्युः द्रौपद्याः अपत्यानि द्रौपदेयाश्च एते सप्तदश सन्ति ॥ सर्वे महारथा एव सर्व एव महारथाः इति वा ॥ ४ ॥ ५ ॥ ६ ॥

इमानेवैकं दृष्ट्वा नाहं बिभेमि ॥ किन्तु अत्र पाण्डवसेनायां महाधनुरादिसाधनसंपन्नाः युद्धे भीमार्जुनाभ्यां तुल्याः सप्तदश शूराः वर्तन्ते ॥ ते के इति चेत् ॥ युयुधानः सात्यकिः विराटश्च द्रुपदश्च महारथाः एते ॥ धृष्टकेतुः चेकितानः १काशिराजश्च वीर्यवन्तः एते ॥ पुरुजित् कुन्तिभोजः कुन्तीपिता च शैब्यश्च नरपुङ्गवाः एते ॥ विक्रमवान् युधामन्युः वीर्यवान् उत्तमौजाश्च पाञ्चालौ एतौ सौभद्रः परमात्मनः कृष्णस्य भागिनेतया महनीयतमः अभिमन्युः द्रौपदीपुत्राश्च क्रमाद्युधिष्ठिरादिभ्यो जाताः प्रतिविन्ध्यसुतसोमश्रुतकर्मशतानीकश्रुतसेननामानः पञ्च च एते सप्तदश वर्तन्ते ॥ चशब्दादन्ये घटोत्कचप्रभृतयो वा ॥ सर्व एव महारथाः सर्वे महारथा एव॥ महारथादिलक्षणमुक्तमभियुक्तैः॥ 'एको दशसहस्राणि योधयेद्यस्तु धन्विनाम्॥ शस्त्रशास्त्रप्रवीणश्च महारथ इति स्मृतः ॥ अमितान् योधयेद्यस्तु संप्रोक्तोऽतिरथस्तु सः ॥ रथस्त्वेकेन योद्धा स्यात् तन्न्यूनोऽर्धरथः स्मृतः' ॥ इति ॥ नेमे अस्मिन् युद्धे इव युद्धान्तरे त्वया त्वादृशैर्वा श्लाघिता इति चेत् ॥ अस्मिन् युद्धे भीमार्जुनाभ्यां समाः मा श्रीः तद्यूकाः भीमः शत्रूणां अर्जुनः येन सः अर्जुनस्य अनितरसाधारणमुत्कर्षमादधानो २ वासुदेवः तेन कृष्णेन सश्रीकाः ॥ किं मम पुरतः एतान् श्लाघसे किं न मां श्लाघनीयं मन्यसे इति चेत् शूर आमहेष्वास आभीम अर्जुन समाः इति छेदः॥ हे शूर नितरां महता धनुषा युक्त शत्रूणां अतिशयेन भीकर तथाऽपि विशुद्धकर्मकारिन् आचार्य युधि समाः परस्परं तुल्याः युयुधानादयः सन्ति ॥ अतोऽहं बिभेमि ॥ ४ ॥ ५ ॥ ६ ॥

---

१. काशीराजश्चेति पाठान्तरम् ॥ काशिः काशी इति पर्यायौ ॥ २. अत एव वक्ष्यते ॥ पाण्डवानां धनञ्जयः' इति भगवता (१०. ३७) ॥

द्रोणः ॥ न जानासि त्वं त्वत्पक्षवर्तिनो मदादीन् शूरान् तद्वतान् अनितरसाधारणान् विशेषांश्च ॥ अतः परपक्षगतानेतान् दृष्ट्वा बिभेषि ॥

दुर्योधनः ॥ अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम ॥
नायका मम सैन्यस्य संज्ञार्थं तान् ब्रवीमि ते ॥ ७ ॥

भवान् भीष्मश्च कर्णश्च कृपश्च समितिंजयः ॥
अश्वत्थामा विकर्णश्च सौमदत्तिस्तथैवच ॥ ८ ॥

अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः ॥
नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः ॥ ९ ॥

अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम् ॥
पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम् ॥ १० ॥

अस्माकमिति॥ द्विजानां द्विजेषु वा उत्तमः द्विजोत्तमः हे द्विजोत्तम द्रोण अस्माकं संबन्धिनस्तु तुशब्दोविशेषमूचकः ॥ ये विशिष्टाः श्रेष्ठाः अतः मम सैन्यस्य नायकाः तान् ते तुभ्यं संज्ञार्थै इदं संज्ञार्थं ज्ञापनार्थं ब्रवीमि तान् त्वं निबोध शृणु जानीहि वा ॥७॥

भवानिति ॥ भवान् त्वं भीष्मश्च कर्णश्च समितिं युद्धं जयतीति समितिञ्जयः कृपः अश्वत्थामा च विकर्णश्च सोमदत्तस्य अपत्यं सौमदत्तिः भूरिश्रवाः जयद्रथः ॥ 'सौमदत्तिस्तथैव च' इति पाठान्तरम् ॥ ८ ॥

अन्येचेति ॥ अन्ये बहवः शूराश्च वर्तन्ते ॥ ते मह्यं इदं मदर्थं तस्मिन् मदर्थे त्यक्तं जीवितं प्राणः यैस्ते त्यक्तजीविताः नाना नानाविधानि शस्त्राणि च प्रहरणानि च शस्त्रप्रहरणानि येषां ते नानाशस्त्रप्रहरणाः सर्वे ते युद्धे विशारदाः समर्थाः युद्धविशारदाः ॥ ९ ॥

---

१. 'सौमत्तिर्जयद्रथः इति पाठान्तरम् ॥

अपर्याप्तमिति ॥ भीष्मेण अभि सम्यक् रक्षितं भीष्माभिरक्षितं अस्माकं बलं सैन्यं कर्तृ तत् कर्म पाण्डवसैन्यं प्रति न पर्याप्तं समर्थम् अपर्याप्तं ॥ भीमेन भीमसेनेन अभिरक्षितं एतेषां पाण्डवानां बलं तु कर्तृ इदं कर्म अस्मत्सैन्यं प्रति पर्याप्तम्॥१०॥

यूयं च अहं च वयं अस्माक संबन्धिनो ये श्रेष्ठाः शूराः ॥ अत एव मम सैन्यस्य नायकाः एवं कर्तव्यं एवं योद्धव्यं एवं गन्तव्यं एवमागन्तव्यम् इति नियमनाधिकारं प्रापिताः तान् तदूतान् १ विशेषांश्च सम्यगहं जानामि ॥ तान् तुभ्यं अहं जानाम्येवाहमेतान् एतदीयान् विशेषांश्चेति ज्ञापनार्थं ब्रवीमि तान् त्वं निबोध शृणु जानात्येवायमिति २ जानीहि इति वा ॥ क्षत्रियतेजोऽपेक्षया ब्राह्मणतेजसो ३ बलवत्त्वात् ब्राह्मणतेजसा तेजिष्ठो भवानेव गतिर्मम ॥ ब्राह्मणोत्तमत्वात् त्वं मामनुग्रहीतुमर्होऽसि ॥ ७ ॥

ते के इति चेत् भवान् महावीरस्य द्रोणस्य पुरतः वीरजनगणनप्रसक्तौ अन्यस्य प्रथमं निर्देशोऽनुचितः इति स एव प्रथमतो निर्दिष्टः ॥ धनुर्विद्याविशारदः ब्राह्मणतेजसा तेजिष्ठश्च त्वमेकः ॥ भीष्मश्च आजानब्रह्मचारी पितुः शन्तनोर्लब्धस्वच्छन्दमरणवरः पितामह एकः॥ कर्णश्च २इन्द्राल्लब्धया अमोघया शक्त्या अर्जुनं हन्तुं समर्थः कर्णश्चैकः॥ कृपः भवतः श्यालः अश्वत्थामा त्वत्पुत्रः ब्राह्मणत्वात् श्यालत्वात् पुत्रत्वा-

१. विशेषसूचनार्थोऽयम् ॥ २. प्रियशिष्यपाण्डवतत्सेनातच्चमूपतिदर्शनजनितामन्दानन्दपारवश्यात् स्वपक्षगतवीरान् विस्मृतवान् स्याः' अतः संज्ञार्थं स्मरणार्थं तानहं ब्रवीमि ॥ श्रुत्वा जानीहीति सूच्यते ॥ ३. 'न बलं क्षत्रियस्याहुः ब्राह्मणो बलवत्तरः ॥ ब्रह्मन् ब्रह्मबलं दिव्यं क्षात्राच्च बलवत्तरं' इति ॥ रामा. बा. ५४ सर्गश्लोकः 'धिग्बलं क्षत्रियबलं ब्रह्मतेजोबलं बल' मिति रामा बा. ५६ सर्गश्लोकश्चानुसन्धेयः ॥ ४. अत्र, 'तवार्थमेतं प्रार्थितेऽपि शब्दे ममाऽऽर्य मेत्यर्थिजनेषु दानम्॥ निषेधरूपे निदधाति मार्गे पदं कथं वा भवदीयजिह्वा' ॥ १ ॥ बाल्लामनाप्तेन वनौकसेन सहासवोदातृजनस्य यान्ति ॥ तदद्य शक्रार्चनया धृतासोः भावी वधो मे परमो हि लाभः ॥ २ ॥ यद्गेहप्रतिद्वारभूतलशिला चिन्तामणिः कल्पकाः यस्यारामवृतिद्रुमाश्च सुरभिः सा होमधेनुः पुनः ॥ तादृग्याचति चेदुपेत्य मघवा रोषूर्य तत्कामनां त्रैलोक्यस्थवदान्यसंसदुपरि स्यामेष मे निश्चयः ॥ ३ ॥ इति श्लोकाः 'यः कामयेत दानकामा मे प्रजाः स्युरित्यसौ वा आदित्योऽर्यमा यः खलु वैददाति सोऽर्यमा' इति (तै. सं. २. ३. ४) श्रुतिश्च अनुसन्धेयाः ॥

च भवतस्तुल्यौ द्वाविमौ [1]सर्वेषु युद्धेषु जयशीलौ॥ विकर्णो मम भ्राता नीतिकुशलो-ऽयमेकः ॥ सोमदत्तस्य राज्ञः पुत्रः भूरिश्रवाः शिवाल्लब्धजयवरोऽयमेकः ॥ जयद्रथः मम भगिन्याः दुश्शलायाः पतिः सिन्धुराजः शिवाल्लब्धपाण्डवजयवरोऽय-मेकः ॥ ८ ॥

अन्ये बहवः शूराश्च वर्तन्ते शल्यकृतवर्मभगदत्तप्रभृतयः ते तु मदर्थे मन्निमित्तं त्यक्तजीविताः प्राणत्यागे कृतनिश्चयाः ॥ 'एष्यत्तु निश्चितं यत्तदतीतत्वेन भण्यत-इति न्यायः ॥ मयि स्नेहातिशयेन युद्धे प्राणानपि त्यक्तुं कृतनिश्चयाः ॥ नानाविधा-नि शस्त्राणि खड्गादीनि प्रहरणानि च गदादीनि एषां सन्ति ॥ युद्धोपकरणपौष्कल्य-मप्येषामस्ति ॥ सर्वेऽप्येते युद्धे समर्थाः इतरविलक्षणयुद्धसामर्थ्यमप्येतेषामस्ति ॥ एतादृशाः भवदादयो वीरा मदीये सैन्ये वर्तन्ते ॥ ९ ॥

अतः भीष्मेण सेनापतिना सम्यक् रक्षितं अस्माकं [2] बलं प्रति [3]तत् पाण्डव-सैन्यं अपर्याप्तं असमर्थम् ॥ [4]इदं अस्मत्सैन्यं तु भीमेन अभिरक्षितं एतेषां पाण्डवानां बलं [5]प्रति पर्याप्तं समर्थम् ॥ तुशब्दो विशेषसूचकः ॥ भीष्मः अभिरक्षितः यस्मै यद्धननार्थं तत् पाण्डवानां बलं अस्माकं विषये अपर्याप्तं असमर्थम् ॥ भीमः अभिर-क्षितः यस्मै यद्धननार्थं तत् इदं अस्माकं बलं तु एतेषां विषये पर्याप्तं समर्थमिति वा ॥ भीष्मोपलक्षितभवदादिवीराभिरक्षितत्वादस्मत्सैन्यस्य ममैव जयः स्यात् ॥ पाण्डव-सैन्यस्य भीमादिवीररक्षितत्वेऽपि न पाण्डवानां जयः स्यात् ॥ इत्यहं जानाम्येव ॥ अत एव भवदादिभिर्वारितोऽपि युद्धे प्रावर्तिषि॥ प्रवृत्तश्चाहमिदानीं पाण्डवसैन्यस्थ-प्रवीरजनदर्शनेन नाहं तान् जयेयं त एव मां जयेयुरिति बिभेमि ॥ अनुग्रहणीयो-रक्षणीयश्चाहं भवतेति सविनयमिदमावेदये ॥ १० ॥

द्रोणः ॥ यद्येवं भवान् मदादीन् वीरान् तद्गतान् विशेषांश्च सम्यगज्ञास्यत् ॥ तर्हि पाण्डवसैन्यदर्शनादेव नाभेष्यत् ॥ बिभेति च भवान् कुतः वद ॥

१. सामितिंजयइत्यस्य मध्यममणिन्यायेन पूर्वोत्राभ्यामन्वयः ॥ कर्णात्पश्चात् परिगणनेन क्रोपः स्यादिति मत्वा द्वयोरनयोः सामितिंजय इति विशेषणंदत्तम् ॥ २. द्वितीयान्तम् ॥ ३. प्रथमा-न्तम् ॥ ४. प्रथमान्तम् ॥ ५. द्वितीयान्तम् ॥

दुर्योधनः ॥ १ अस्माकं संबन्धिनो ये वीराः मम सैन्यस्य नायकाः कृताः तान् तद्गतान् २ दोषरूपविशेषांश्चाहं जानामि ॥ इदानीं तदनुसन्धानादहं बिभेमि ॥ यान् यद्गतविशेषांश्चानुसन्धाय बिभेमि तान् ज्ञापयामि शृणु ॥ ब्राह्मणत्वात् त्वं निमंत्रणार्होऽसि न तु युद्धार्होऽसि ॥ ७ ॥

भवान् ब्राह्मणत्वेन युद्धानर्हः पाण्डवेषु गूढपक्षपाती स्वपुत्राद्श्वत्थाम्नोऽपि धनञ्जयमधिकं कृतवान् गुरुभक्तया लब्धधनुर्विद्यावैशारद्यस्य पार्थमप्यतिशयानस्य इदानीं मम सहायभूतस्य एकलव्यस्य दक्षिणहस्तांगुष्ठं गुरुदक्षिणात्वेन गृहीत्वा तं वञ्चनया पार्थात् न्यूनीकृतवान् भवानेकः ॥ भीष्मश्च ३ 'सर्वांस्त्वन्यान् हनिष्यामि पार्थिवान् भरतर्षभ ॥ यान् समेष्यामि समरे न तु कुन्तीसुतान् नृप '॥ इति पाण्डवानामहिंसनं प्रतिज्ञायैव सेनाधिपत्यमभ्युपगतवान् सेनापतिः पितामहो जरठो भीष्मश्चैकः॥ कर्णश्च परशुरामेण त्वं न क्षत्रियसंस्कारैस्संस्कृतः अतस्ते नाहं शस्त्रविद्यामुपदेशयमिति प्रथमं प्रत्यादिष्टवता पश्चाद्वञ्चनामज्ञात्वा शस्त्रास्त्रविद्यामुपदिष्टवता अन्ततो वञ्चनां तां ज्ञातवता मयोपदिष्टं शस्त्रास्त्रमखिलं समये विस्मृतं सत् न प्रतिभातु इति शप्तः कर्णश्चैकः ॥ कृपश्च समितिंजयोऽपि ब्राह्मणस्त्वत्पक्षपाती त्वत्पथानुयायी तव स्यालः कृपाचार्यश्चैकः ॥ अश्वत्थामा समितिंजयोऽपि त्वया वञ्चनया पार्थात् न्यूनीकृतस्त्वत्पुत्रः एकः॥ विकर्णश्च नीतिनिरततया प्रतिकलमस्मदीयदोषोद्घाटनेन सततहृदयारुन्तुदो मम भ्राता विकर्णश्चैकः ॥ सौमदत्तिः सोमदत्तराजसुतः शिवाद्वरग्रहणकाले उत्सेकादनुपचरितेन तेन युद्धे करुणमवस्थान्तरं ते भविष्यतीति शप्तः भूरिश्रवाश्चैकः ॥ विनाऽर्जुनमन्यान् पाण्डवान् जयेति शिवाल्लब्धवरः अतोऽर्जुनं जेतुमसमर्थः भगिनीपतिः जयद्रथश्चैकः ॥ ८ ॥

अन्ये च वर्तन्ते ते च बहवश्चेत् शूराः न तु प्रत्येकं ते तु युद्धे परान् जित्वा मां रक्षितुं नागताः किंतु मदर्थं युध्वा युद्धे प्राणांस्त्यक्तुमेवागताः ॥ यदि पाण्डवानां पाण्डवबन्धोश्च वयं विरोधिनो न भवेम॥ अतो युद्धे तव साहाय्यकमाचरितुं नागच्छेम इति तैः प्रतिषिद्धं स्यात् ॥ तर्हि युद्धमेव नारब्धं स्यात् न ते तथा प्रत्यषेधन्

---

१. 'अस्माक 'मित्यादिचतुःश्लोक्या आवृत्त्या दूषणपरमर्थान्तरम् ॥ २. तुशब्दार्थोऽयम् ॥ ३. भार. उद्यो १७२ अ ॥

किंतु सद्य एव समागताः किमर्थमिति चेत् मम अर्थो १ निवृत्तिः तस्मिन् तन्निमित्तं मन्नाशायागताः॥ सर्वे अयुद्धेति च्छेदः ॥ युद्धे असमर्थाः अतः नानाशस्त्रप्रहरणाः॥ कुशलानां नाधिकसामग्र्यपेक्षा इमे तु अकुशलाः अतः अधिकसामग्र्यपेक्षा एषां ॥ नानाशस्त्रप्रहरणाः तथाऽपि अयुद्धविशारदाः एकमप्यस्त्रं शस्त्रं वा यथावत् प्रयोक्तुं न जानन्ति ॥ राजत्वाद्राजपुत्रत्वाच्च २ सकलविधकुसुमशरसमरचतुराः एतादृश दोषरूपविशेषवन्तो भवदादयो मदीयसैन्ये वर्तन्ते इति इदानीमहमनुसन्दधामि ॥९॥

भवदादिधीराणां ईदृशदोषदुष्टत्वात् भीष्माभिरक्षितमपि अस्माक १ बलं २ तत् पाण्डवसैन्यं प्रति अपर्याप्तं असमर्थम् ॥ भीमाभिरक्षितं एतेषां पाण्डवानां बलं तु इदं अस्माकं बलं प्रति पर्याप्तं समर्थमिति निश्चिनोमि ॥ अतो बिभेमि ॥ पाण्डवाः असहायाः दीना योद्धुमागच्छेयुः अतः तज्जयः सुकरो मम इति धैर्यावष्टंभकाले भवदादिषु विद्यमानान् गुणरूपान् उक्तान् विशेषान् अनुसन्धाय द्रोणभीष्मादिप्रवीरत-मभुजबलावष्टंभेन युद्धे प्रवृत्तस्य मम जयो नियत इति निश्चित्य युद्धे प्रावर्त्तिषि ॥ ससहायानां सप्ताक्षौहिणीमितसेनासमेतानां पार्थसारथिना भगवता वासुदेवेन सन्धुक्षितसकलप्रतिपक्षिपक्षशिक्षणदक्षधैर्याणां पाण्डवानां तत्सेनायाः तच्चमूपतेश्च दर्शनेनकथमहमीदृशानेतान् जयेयं इति धैर्यभ्रंशान्मनोऽवसादकाले भवदादिषु विद्यमा-नान् दोषरूपान् उक्तान् विशेषान् अनुसन्धाय भीतभीतोऽहं भवन्तमुपागमम् ॥ रक्षणी-योऽहं भवता इत्यभ्यर्थये ॥ पाण्डवसेनापतेर्धृष्टद्युम्नस्य राज्ञो युधिष्ठिरस्य त्रैलोक्यै-कवीरस्यार्जुनस्य सर्वकार्यनिर्वहणधुरीणस्य श्रीकृष्णस्य च सत्त्वेन तान् विहाय भीष्म-स्य प्रतिनिर्देश्यतया भीमस्योक्तिः कुत इति चेत्॥ मम भयावहप्रतिज्ञाकर्तृत्वेन भीष्म-साम्यात् भीमस्योक्तिः ॥ भीष्मो 'न तु कुन्तीसुता 'निति पाण्डवाहिंसनं प्रतिजज्ञे ॥ प्रतिजज्ञे च भीमः सर्वकौरववधम् ॥ अत ईदृशप्रतिज्ञाकारिभीष्माभिरक्षितत्वादस्म-त्सैन्यस्य तदपर्याप्तम् ॥ तादृशप्रतिज्ञाकारिभीमाभिरक्षितत्वात्पाण्डवसैन्यस्य तत्पर्या-प्तं इति निश्चित्य भयादहमुपागमं भवन्तम् ॥ १० ॥

---

१. 'अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु' ॥ इत्यमरः ॥ २. सर्वे इत्यर्थ इति विवक्षणादिदम् ॥ इः मन्मथः ॥

द्रोणः ॥ अस्तु इदानीं अस्माभिः किं कार्यं तद्वद ॥

दुर्योधनः ॥ अयनेषु च सर्वेषु यथाभागमवस्थिताः ॥
भीष्ममेवाभिरक्षन्तु भवन्तः सर्व एव हि ॥ ११ ॥

अयनेष्विति ॥ हि यस्मादेवं तस्मात् भवन्तः सर्वे एव सर्वेषु अयनेषु व्यूह-प्रवेशमार्गेषु च एव भागं अनतिक्रम्य यथाभागं अवस्थिताः सम्यक् स्थिताः सन्तः भीष्म-मेव अभि अभितः सर्वतः रक्षन्तु ॥ ११ ॥

भवदादिषु विद्यमानान् गुणरूपान् विशेषाननुसन्धाय सङ्गरोद्योगकरणावसरे-भवदादिप्रवीरतमाधिष्ठितमस्मद्बलं पर्याप्तमित्यभात् ॥ संप्रति पाण्डवतत्सैन्यतत्प-तिदर्शनसमुपजातसाध्वसादवसन्नचेतसः अत एव भवदादिषु विद्यमानान् दोष-रूपान् विशेषानेवानुसन्दधानस्य मम बलमस्मदीयमपर्याप्तं तदीयं तु बलं पर्याप्तं इति प्रतिभाति ॥ अतः भवन्तः सर्वे एव तत्तदाकारविरचितसैन्यव्यूहप्रवेशमार्गेषु सर्वेषु सेनापतिना परिकल्पितं स्वीयं भागमनतिक्रम्य परेषां व्यूहप्रवेशमार्गेषु यथा प्रवेशो न स्यात् तथा कुर्वन्तोऽप्रमादेन स्थिताः सन्तः भीष्ममेव सर्वतः सर्वथा रक्षन्तु ॥ यान् गुणरूपान् विशेषान् अनुसन्धाय युद्धे प्रावर्तिषि तानेव गुणान् प्रकाशयन्तः यथाभागमवस्थाय युद्धस्य सम्यक्करणेन मम मनसः सन्तोषमापादयन्तः भवन्तः सेनापतिं भीष्मं सर्वतः सर्वथा रक्षन्तु ॥ प्रतिज्ञातपाण्डवाहननः पितामहो भीष्मः स्वहननाय पाण्डवेषु तदीयेषु च नानोपायानाचरत्स्वपि तत्प्रतीकारमकुर्वाणः तैस्त-दीयैश्च हिंस्येत ॥ ततश्चासहमानो हिंसां स्वच्छन्दमरणोऽपि मृतिमीप्सेत् ॥ अतः यथा तैरयं न हिंस्येत तथा रक्षतैनमप्रमत्ता यूयमिति सविनयमावेदये इति राजा वचनमब्रवीदिति संबन्धः ॥ ११ ॥

धृतराष्ट्रः ॥ ततः किमासीत् ॥ वद ॥

सञ्जयः ॥ तस्य सञ्जनयन् हर्षं कुरुवृत्धः पितामहः ॥
सिंहनादं विनद्योच्चैः शङ्खं दध्मौ प्रतापवान् ॥ १२ ॥

तस्येति ॥ कुरूणां कुरुषु वा वृत्धः कुरुवृत्धः प्रतापः अस्यास्तीति प्रतापवान्

पितामहः भीष्मः तस्य दुर्योधनस्य हर्षं तोषं सञ्जनयन् सम्यक् जनयितुं उच्चैः गम्भीरं सिंहस्य नादः सिंहनादः तं सिंहनादं विनद्य कृत्वा शङ्खं दध्मौ पूरयामास ॥ ११ ॥

कुरुवृद्धत्वात् प्रतापवत्वात् पितामहत्वाच्च सेनाधिपत्यं प्रापितो भीष्मः, जरठः पाण्डवपक्षपाती चायं भीष्मः किं करिष्यति ममेत्यालोच्य बिभेतीदानीं दुर्योधन इति ज्ञात्वा जरठोऽपि यथाप्रतिज्ञं अन्तरेण पाण्डवान् सर्वानन्यान् हन्यां इति सूचयन् तस्य दुर्योधनस्य सन्तोषं जनयितुं गम्भीरं सिंहनादं कृत्वा १ सिंहवद्विनद्य वा शङ्खं दध्मौ॥ सिंहनादेन शङ्खपूरणेन च दुर्योधनस्य पराजुद्य साध्वसं हर्षमुत्पादयामास ॥ १२ ॥

ततः शंखाश्च भेर्यश्च पणवानकगोमुखाः ॥
सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत् ॥ १३ ॥

तत इति ॥ ततः तदनन्तरं शङ्खाः भेर्यश्च पणवश्च आनकश्च गोमुखश्च पणवानकगोमुखाः वाद्यविशेषाः सहसैव युगपदेव अभ्यहन्यन्त ताडिताः वादिताः सः तज्जनितः शब्दः तुमुलः व्याप्तः भयङ्करो वा अभवत् ॥ १३ ॥

भीष्मस्य सिंहनादकरणशंखपूरणाभ्यामनन्तरं तदीयसङ्केतानुसारेण त्वत्सुतसेनासमवेतसैनिकैः शंखभेरीपणवानकगोमुखनामानो वाद्यविशेषाः युगपदेव वादिताः॥ शङ्खाः पूरिताः भेर्यादीनि वाद्यानि वादितानि ॥ शंखादिवादनजनितः शब्दः तुमुलः सर्वत्र व्याप्तः भयङ्करो वा अभवत् ॥ पाण्डवेषु गांभीर्यात् स्तिमिततया महानदीप्रवाहवदवस्थितेषु कौरवाः काननानदीप्रवाहवत् महान्तमाडंबरमकार्षुः ॥ १३ ॥

धृतराष्ट्रः ॥ अस्त्वेतत् पाण्डवसैन्ये किं वृत्तम् तद्वद ॥

सञ्जयः ॥ ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ ॥
माधवः पाण्डवश्चैव दिव्यौ शङ्खौ प्रदध्मतुः ॥ १४ ॥

तत इति ॥ तत इति ॥ ततः अनन्तरम् श्वेतैः हयैः अश्वैः युक्ते महति स्यन्दने रथे स्थितौ मा लक्ष्मीः तस्याः धवः माधवः कृष्णः पाण्डवः अर्जुनश्चैव दिव्यौ विलक्षणौ शंखौ प्र सम्यक् दध्मतुः पूरयामासतुः ॥ १४ ॥

---

१. सिंहनादमिति णमुलन्तम् ॥ सिंह इव विनद्येत्यर्थः ॥

कौरवसैन्यकोलाहलोपरमानन्तरं श्वेतैः हयैः युक्ते उन्नते महनीये रथे स्थितौ कृष्णः अर्जुनश्चैव दिव्यौ शंखौ सम्यक् पूरयामासतुः॥ अहो भाग्यमर्जुनस्य यदयं सारथिः मधुनामकयादवकुलोत्पन्नः कृष्णः १लक्ष्मीपतिः २स्वयं सर्वेश्वरः ईश्वरान्तररहितश्च एतत्सूचनायैव माधव इत्युक्तम्॥ सारथितया रथस्य पुरोभागे स्थितत्वेन द्वयोर्मध्ये अभ्यर्हितत्वेन च माधवः प्रथममुक्तः॥ कोऽसौ पाण्डव इति चेत् पञ्चानां पाण्डवत्वाविशेषेऽपि अत्र पाण्डवोऽर्जुन एव॥ माधवः पाण्डवश्चेति कृष्णासाहित्येनोक्तेः॥ कृष्णसाहित्यमप्य येषां पाण्डवानां कुतो न स्यात् ॥ ३ 'मम प्राणा हि पाण्डवाः" इति ह्युक्तं कृष्णेन इति चेत् स्यन्दने स्थितौ शंखौ प्रदध्मतुः इत्युक्तया सारथेरर्थभावः प्रतीयते ॥ न ह्यर्जुनस्येवान्यस्य पाण्डवस्य सारथिरभूत्कृष्णः॥ अतः अत्र पाण्डवोऽर्जुन एव॥ वक्ष्यते चानुपदं 'देवदत्तं धनञ्जयः' इति'॥ यस्मिन् रथे उपविश्यागतौ तस्मिन् रथे ४स्थितावेव शंखौ दध्मतुः ॥ न तु त्वत्पुत्रवत् साध्वसेन रथादवतीर्य यङ्कमपि शरणमभजताम् ॥ नैताभ्यां पूरितौ शंखौ साधारणौ अपितु दिव्यौ ॥ पूरणमपि नेतरसाधारणं किंतु इतरसर्वविलक्षणम् ॥ महाराज सम्यगवधारयेदम् ॥ किमयं रथो भगवतः उत पार्थस्य इति चेत् नायं भगवतो रथः तद्रथाश्वानां चित्रवर्णत्वप्रसित्यैः ॥ अयं तु रथः श्वेतैः हयैः युक्तः ५अतः कृशानुना दत्तः नन्दिघोषाख्योऽर्जुनरथः ॥ अत्रेममपरं च कमपि विशेषमवधेहि ॥ सङ्कल्पमात्रेण कृत्स्नं जगत् संहारकाले संहरतो भगवतः कृष्णस्य कुरूणां पाण्डवानां च युद्धप्रवृत्तिमुत्पाद्य तन्मुखेन भूभारपरिहरणकरणेच्छा विडंबनमात्रमेव ॥ वस्तुतस्तु उपवेश्य रथे पार्थं सारथीभूय भगवतः कुरुक्षेत्रागमनं, लोकोद्धारार्थं कृत्वा हृदयेऽवस्थापितस्य गीताशास्त्रस्य समये पार्थं व्याजीकृत्य लोकोद्धारार्थमुपदेशायैव ॥ ततः श्वेतैः शुद्धैः अपौरुषेयनित्यतया निर्दोषैः हयैः हयगताविति धातुः ॥ गत्यर्थाः ज्ञानार्थाः ॥ ज्ञानसाधनैः चतुर्भिः वेदैः युक्ते तदर्थप्रतिपादके महति सर्वेभ्यः पौरुषेयग्रन्थेभ्यः उत्तमे स्यन्दने स्यन्दू प्रस्रवणे इति धातुः ॥ प्रस्रवणं गतिविशेषः ॥ ज्ञानसाधने गीताशास्त्रे गुरुशिष्यभावेन स्थितौ कृष्णः अर्जुनश्चैव दिव्यौ शंखौ आकृतिसाम्यात् लक्षणया प्रणवौ तदर्थाविति यावत् ॥ प्र

---

१. मा लक्ष्मीः तस्याः पतिः ॥ २. मा न विद्यते धवः ईश्वरो यस्य सः ॥ ३. भार. उ. ६१. ४. स्थितावेवेत्यन्वयादिदम् ॥ ५. वक्ष्यते च कर्णपर्वणि ॥ 'कृशानुदत्तं च रथं च धिक्ते'॥ इति (७१)॥

सम्यक् दध्मतुः ॥ प्रश्नोत्तराभ्यां प्रकाशयामासतुः ॥ कावेनाविति चेत् श्वेतैः शुद्धैः हयैः इन्द्रियैः १ 'इन्द्रियाणि हयानाहुः' इति श्रुतिः ॥ युक्ते महति ऐहिकामुष्मिकसकलसुखसाधनत्वात् महनीये स्यन्दने देहे २ 'शरीरं रथमेव तु' इति श्रुतिः ॥ स्थितौ मुख्यामुख्यक्षेत्रज्ञतया वर्तमानौ वक्ष्यते च ॥ ३ 'क्षेत्रज्ञं चापि मां विद्धि' इति ॥ माधवः परमात्मा पाण्डवः उत्तमजीवः पांडुशब्दः शुद्धपर्यायः ॥ एतौ दिव्यौ शंखौ प्रदध्मतुः उत्करीत्या प्रणवार्थौ उपदेशतद्ग्रहणाभ्यां प्रकाशयामासतुः॥ तावेव नरनारायणावेतौ ॥ १४ ॥

धृतराष्ट्रः ॥ कृष्णार्जुनौ किंनामानौ शङ्खौ प्रदध्मतुः ॥

सञ्जयः ॥ पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः ॥ १४॥ ॥

पाञ्चजन्यमिति ॥ हृषीकाणां इन्द्रियाणां ईशः हृषीकेशः कृष्णः पञ्चजने भवः पाञ्चजन्यः तं दध्मौ॥ धनञ्जयतीति धनञ्जयः पार्थः देवैः दत्तं देवदत्तं दध्मौ ॥ १४॥ ॥

माधवपदेनोक्तः कृष्णः हृष्यन्ति हर्षयन्ति वा हृषीकाणि इन्द्रियाणि तेषां ईशः इति ४ सृष्ट्यादिरूपया क्रीडया हृष्यतीति हृषीकः स चासौ ईशश्च इति वा हृषीकेशः स. पाञ्चजन्यनामानं शंखं दध्मौ ॥ ५ धनं जयतीति धनञ्जयः पार्थः देवदत्तनामानं शङ्खं दध्मौ ॥ कृष्णशङ्खः समुद्रे तिमिरूपेण संचरमाणस्य पञ्चजनासुरस्य मृतगुरुपुत्रानयनाय समुद्रं गतेन कृष्णेन हतस्य अस्थना निर्मितः ॥ अतः ६ पाञ्चजन्यनामा ॥ पार्थशङ्खस्तु निवातकवचादिहननाय देवैरनुगृह्य स्वर्गे ७ दत्तः पार्थाय ॥ अतो देवदत्तनामा ॥ अत्र हृषीकेशपदेन श्रीकृष्णस्य प्रेरणसामर्थ्यं धनञ्जय-

---

१. का ३. ४. २. का. ३ ३. २. १३. ३. ४ अत्र, 'क्रीडया हृष्यति व्यक्तं ईशः सन् सृष्टिरूपया ॥ हृषीकत्वं तथेशत्वं देवस्यास्य ततः स्फुटम्'॥ इत्यहिर्बुध्न्यसंहितावचनमनुसन्धेयम् ॥ ५. 'सर्वान् जनपदान् जित्वा वित्तमादाय केवलम् ॥ धनस्य मध्ये तिष्ठामि तेनाहुर्मां धनञ्जयम्' ॥ इति सार. वि. ४३. श्लोकोऽनुसन्धेयः ॥ ६. पञ्चजने भवः पाञ्चजन्यः इति निरुक्तिः ॥ 'बहिर्देवपञ्चजनेभ्यश्चेति वक्तव्यं' इति वार्तिकात् ञ्यः ॥ 'स तु पञ्जनं हत्वा शङ्खं लेभे जनार्दनः॥ यः स देवमनुष्येषु पाञ्चजन्य इति स्मृतः'॥इति हरिवंशे विष्णुपर्वणि. (३३ अ) श्लोकोऽनुसन्धेयः॥'इत्युक्तोऽन्तर्जलं गत्वा हत्वा पञ्चजनं च तम् ॥ कृष्णो जग्राह तस्यास्थिप्रभवं शङ्खमुत्तमं' ॥ इति श्रीविष्णुपुराणे ५ अंशे अ. २१ श्लोकश्च ॥ ७. 'प्रदीयमानं देवैस्तं देवदत्तं बलोद्धवम्॥ प्रत्यगृह्णं जयायैनं स्तूयमानस्तदाऽनरैः' ॥ इति भार वनपर्व. १७०. अ. श्लोकोऽनुसन्धेयः ॥

पदेन पार्थस्य श्रीकृष्णप्रेरणानुगुणयुद्धकरण सामर्थ्यं च सूच्यते ॥ सकलप्राणिसकलेन्द्रियमनःप्रेरकः जगज्जन्मस्थेमप्रलयरचनाचातुरीधुरीणः उपनिषदेकवेद्यः लक्ष्मीपतिः स्वयं सर्वेश्वरः ईश्वरान्तररहितश्च परमात्मा श्रीकृष्णः सौहार्देन वात्सल्यात् सारथिरभूदर्जुनस्येत्यहो धन्यताऽर्जुनस्य ॥ १४॥ ॥

धृतराष्ट्रः ॥ किं कृष्णार्जुनौ द्वावेव शंखौ दध्मतुः उत तदीया इतरेऽपि ॥

सञ्जयः ॥ पौण्ड्रं दध्मौ महाशंखं भीमकर्मा वृकोदरः ॥ १५ ॥

पौण्ड्रमिति ॥ भीमानि भयङ्कराणि कर्माणि यस्य स भीमकर्मा ॥ वृकः उदरे यस्य सः वृकस्य उदरमिव उदरं यस्य सः इति वा वृकोदरः भीमः पौण्ड्रं तन्नामानं महांश्चासौ शंखश्च महाशंख तं दध्मौ ॥ १५ ॥

भीमादयोऽपि शंखान् दध्मुः ॥ तत्र भीमस्य शंखः शत्रूणां खण्डनात् १ पौण्ड्रनामा महान् ॥ कुतोऽस्य शंखो महानिति चेत् २ वृकः सर्वभक्षकः ३ वृकनामा जाठराग्निरस्योदरे तिष्ठति ॥ अतोऽत्यन्नभक्षणाद्बलिष्ठः ॥ अतः वृक इव स्थूलोदरः ॥ अत एव कर्माण्यस्य हिडिंबबकवधादीनि भयङ्कराणि ॥ तादृशो भीमः पौण्ड्र नाम महान्तं शंखं दध्मौ ॥ १५ ॥

अनन्तविजय राजा कुन्तीपुत्रा युधिष्ठिरः ॥
नकुलः सहदेवश्च सुघोषमणिपुष्पकौ ॥ १६ ॥

अनन्तेति ॥ कुन्त्याः पुत्रः कुन्तीपुत्रः युधि स्थिरः युधिष्ठिरः राजा धर्मात्मजः न विद्यते अन्तः यस्य सः अनन्तः विजयो येन सः अनन्तविजयः तं तन्नामानं शंखं दध्मौ ॥ नकुलः सहदेवश्च शोभनो घोषो यस्य स सुघोषः मणयः पुष्पाणीव यस्मिन् सः मणिपुष्पकः सुघोषश्च मणिपुष्पकश्च सुघोषमणिपुष्पकौ तन्नामानौ शंखौ दध्मतुः ॥ १६ ॥

१. पुडि खण्डने इति धातुः ॥ २ द्वे. अत्र, 'अङ्गुष्टमात्रं जठरे प्रतिष्ठितं जाज्वल्यमानं मम जातवेदसम् ॥ नित्यं हितं विश्वदहं च वित्त तं विश्वेशचेता इति सोऽब्रवीत्तदा' ॥ इति श्रीमदाचार्यविषयः श्लोकोऽनुसन्धेयः ॥ ३. 'भक्तिर्ज्ञानं सवैराग्यं प्रज्ञा मेधा धृतिः स्थितिः॥ योगः प्राणो बलं चैव वृकोदर इति स्मृतः॥ एतद्दशात्मको वायुः तस्माद्भीमस्तदात्मकः' ॥ इति गीतामृततरङ्गिण्याम् ॥

कुन्तीपुत्रो राजा युधिष्ठिरः अनन्तविजयनामानं शंखं दध्मौ ॥ युधिष्ठिरस्य परमधार्मिकत्वात् तेन पूर्यमाणः शंखो नियमेन महान्तं विजयमावहति अतोऽनन्तविजयनामा सः ॥ नकुलः सहदेवश्च सुघोषमणिपुष्पकनामानौ शंखौ दध्मतुः॥ नकुलः सौन्दर्यप्रधानत्वात् रूपानुरूपं सुस्वरं ध्मायति शंखम् ॥ अतः सुघोषनामा नकुलस्य शंखः ॥ सहदेवस्तु पञ्चस्वचरत्वेन वस्तुसांष्ठवप्रियत्वात् अग्रे पुष्पस्तबकवदधोलंबमानमणिमञ्जरीविभूषितं शंखं ध्मायति ॥ अतः मणिपुष्पकनामा सहदेवस्य शङ्खः ॥ कुन्त्यां धर्मादुत्पन्नत्वेन स्वयं साक्षात्धर्मांशत्वेन च परमधार्मिकः परमकारुणिकः परमसृदुतरस्वभावः स्वयमजातशत्रुः युधिष्ठिरः कथं भीष्मद्रोणादिपरमपूज्यतमाधिष्ठितसेनाभ्यमित्रीणनानिर्वहणपूर्वकं कृष्णार्जुनप्रोत्साहनाय शंखं दध्मौ इति चेत् हन्त तादृशोऽपि सः युधि स्थिरोऽभूत् ॥ वनवासाय प्रस्थितानां पाण्डवानां व्यतीतेषु त्रयोदशसु मासेषु वनवासक्लेशमसहमानेषु द्रौपदीभीमार्जुनादिषु मासस्य संवत्सरप्रतिनिधितां मत्वा वनवासाज्ञातवासाभ्यां यापनीयानि त्रयोदश वर्षाणि यापितप्रायाणीति निश्चित्य 'अस्माभिरुषिताः सम्यग्वने मासास्त्रयोदश ॥ परिमाणेन तान् पश्य तावतः परिवत्सरान् ॥ अस्ति मासः प्रतिनिधिः यथा प्राहुर्मनीषिणः ॥ पूतिका इव सोमस्य तथेदं क्रियतामिति' ॥ इति (भार. वन. पर्व. हठवादे) उक्तरीत्या पञ्चैवेदानीमेव हास्तिनपुरं कुर्याम च कौरवैर्युत्थं प्राप्नुयाम चाकण्टकं राज्यं अनुभवेम च सुखमतिशयितं इति नानागमार्थोपन्यासपूर्वकमर्थयमानेषु तदीयनिर्बन्धेन व्यतियान्तु त्रयोदश समाः चतुर्दशे हायने अवश्यमेव भवद्भिलषितमाचरत न लेशतोऽपि तदा वः प्रतिबध्नीयां इति द्यूतवने कृतप्रतिज्ञतया कुन्तीपुत्रत्वेन सत्यसन्धतया च तदानीं वनवास इव इदानीं युधि स्थिरप्रतिज्ञोऽभूत् ॥ अत एव शङ्खं दध्मौ ॥ अहो सत्यैकशरणता तस्य ॥ राजा हि सः ॥ तस्य राजत्वात् तदभ्युपगम एव कृष्णार्जुनभीमादीनां युद्धकथाप्रसक्तिः अन्यथा तु न॥ अत एव शङ्खं दध्मौ ॥ इतरसर्वशङ्खेभ्यो वैलक्षण्यसूचनाय पाञ्चजन्यादिशङ्खानां नामनिर्देशः कृतः ॥ १६ ॥

धृतराष्ट्रः ॥ किं कृष्णः पाण्डवाश्चैव शङ्खान् दध्मुः उत तदीया इतरेऽपि ॥

सञ्जयः ॥ काश्यश्च परमेष्वासः शिखण्डी च महारथः ॥
धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः ॥ १७ ॥

द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते ॥
सौभद्रश्च महाबाहुः शंखान् दध्मुः पृथक् पृथक् ॥ १८ ॥

काश्यश्चेति ॥ मह्याः पतिः महीपतिः हे महीपते परमः इष्वासः धनु यस्य सः परमेष्वासः काश्यां भवः काश्यः काशिराजः स च महारथः शिखण्डी च ॥ धृष्टद्युम्नः विराटश्च न पराजितः अपराजितः न जितः अजितः अपरैः अजितः अपराजितः इति वा सात्यकस्य अपत्यं सात्यकिः स च ॥ द्रुपदः द्रौपद्याः अपत्यानि द्रौपदेयाः ते च महान्तौ बाहू यस्य सः महाबाहुः सुभद्रायाः अपत्यं सौभद्रः अभिमन्युः स च एते सर्वशः सर्वे पृथक् पृथक् प्रत्येकं शंखान् दध्मुः ॥ १७ ॥ १८ ॥

१ त्वमिदानीं पृथिवीपतिरसि ॥ अन्यायेन पाण्डवानामपि भागमपहृत्य अखिल पृथिवीपतिर्जातोऽसि ॥ विनङ्क्ष्यन्ति च त्वदीया नियतं युध्ये ॥ गमिष्यति पृथिवीपतित्वं तव ॥ इदमेवं संबोधनं अद्यैव न तु युध्यानन्तरम् ॥ परमेष्वासः काशिराजश्च महारथः शिखण्डी च अपराजितः धृष्टद्युम्नः विराटश्च सात्यकिश्च द्रुपदः द्रौपद्याः पुत्राः पञ्च प्रतिविन्ध्यादयश्च महाबाहुः अभिमन्युश्च चशब्दादन्येऽपि इत्येते २ सर्वेऽपि ३ पृथक् पृथक् शंखान् दध्मुः ॥ १७ ॥ १८ ॥

धृतराष्ट्रः ॥ पाण्डवानां तदीयानां च शंखघोषेण मदीयानां किं जातम् ॥ वद ॥

सञ्जयः ॥ स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत् ॥
नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन् ॥ १९ ॥

स घोष इति ॥ तुमुलः व्याप्तः भयङ्करो वा सः घोषः नभः अन्तरिक्षं च पृथिवीं

१. पृथिवीपते इति संबोधनस्याशयोऽयम् ॥ एवमुत्तरत्रापि ॥ २. सर्वशः इत्यस्यार्थः ॥ केचन शङ्खान् दध्मुः केचन न तथाऽपि छत्रिन्यायेन शङ्खान् दध्मुः इति इति शङ्काऽपाकरणाय सर्वश इत्युक्तम् ॥ स्वस्वपराक्रमातिशयप्रकाशनाय क्रमाद्दध्मुरिति सूचनाय पृथक् पृथक् इत्युक्तम् ॥ अत एव एतत्प्रतिनिर्देश्यतया तत्र (१३) सहसैवेत्युक्तम् ॥ स घोषः पृथक् पृथक् धार्तराष्ट्राणां हृदयानि व्यदारयदित्युत्तरश्लोकेनैकवाक्यता वा ॥ एकैकशंखध्वनिरेव धार्तराष्ट्रहृदयभेदायालमिति भावः ॥

भूमिं चैव वि विशेषेण अनुनादयन् प्रतिध्वनिना नादयुक्तं कुर्वन् सन् धृतराष्ट्रस्य अपत्या. नि धार्तराष्ट्राः तेषां हृदयानि मनांसि वक्षस्स्थलानि वा विशेषेण अदारयत् ॥ १९ ॥

सः पाण्डवतदीयशंखघोषः १त्वदीयानां हृदयानि व्यदारयत् ॥ कीदृशः स इति चेत् ॥ तुमुलः व्याप्तः भयङ्करो वा अतः नभश्च पृथिवीं चैव विशेषेण प्रतिध्वनिना मुखरयन् ॥ अतएव धार्तराष्ट्राणां हृदयानि मनांसि व्यदारयत् ॥ दारणजन्यदुःखमनीनयत् ॥ हृदयानि वक्षस्स्थलानि व्यदारयत् ॥ अयः पातयित्वा वक्षसां विदारणेन यादृशी व्यथा जायेत तादृशीं व्यथामापादयामास ॥ पाण्डवानां तदीयानां च शंखघोषं श्रुत्वा त्वदीया दुर्योधनादयः कथं वयमेभिर्युध्येमहि कथङ्कारं वाऽस्माकं जयो घटेत भवेम च वयं पराभूता एव मृताश्च अतोऽस्माकं कुलं अद्यैव नष्टं इति मेनिरे ॥ किं पाण्डवानां तदीयानां च शंखघोषं श्रुत्वा धार्तराष्ट्राणामिव धार्तराष्ट्राणां शंखादिघोषं श्रुत्वा पाण्डवानामपि व्यथोदपद्यत इति चेत् धार्तराष्ट्राणां दुर्योधनादीनां धृतराष्ट्रसंबन्धिनां भीष्मादीनां च सः 'तस्य सञ्जनयन् हर्षं'मित्यादिना 'स शब्दस्तुमुलोऽभवत्' इत्यन्तेन उक्तः घोषः अधार्तराष्ट्राणां धार्तराष्ट्रविरोधिनां पाण्डवानां तदीयानां च हृदयानि व्यदारयदिति काकुः ॥ २ न व्यदारयदित्यर्थः ॥ पाण्डवानां शंखघोषः धार्तराष्ट्राणां तत्सदृशानामसतां असुराणां च हृदयानि व्यदारयत् ॥ अधार्तराष्ट्राणां तद्भिन्नानां सतां भीष्मादीनां सुराणां च हृदयानि न व्यदारयत्॥ ३ दुर्योधनादीनां तत्पक्षपातिनामसतामसुराणां च व्यथां सतां भीष्मद्रोणादीनां ब्रह्मेन्द्रादीनां देवानां च महान्तम् हर्षं चोत्पादयामास ॥ १९ ॥

१. त्वदीयानामिति वक्तव्ये धार्तराष्ट्राणामित्युक्तिः धृतराष्ट्रे स्वस्य कोपमूचनाय ॥ बहुवचनेन त्वत्पुत्रेषु तदा न कोऽपि धीरोऽवर्तत इति व्यज्यते ॥ २ तत्र 'स शब्दस्तुमुलोऽभव'दिति केवलमुक्त्वा अत्र 'स घोषो धार्तराष्ट्राणां हृदयानि व्यदारय' दित्युक्त्या अर्थसिद्धोऽप्ययमर्थः 'घोषोऽयं' इत्यनुक्त्वा 'स घोषः' इति विप्रकृष्टपूर्वोक्तपरामर्शितच्छब्दप्रयोगेण 'घोषः स धार्तराष्ट्राणां' इति वक्तव्ये 'स घोषोऽधार्तराष्ट्राणा'मित्यकारप्रश्लेषौपयिकप्रयोगेण च शब्दारूढो वाच्योऽपि भवतीत्यहो प्रौढिमा शब्दप्रयोगस्य ॥ ३. अयमर्थः 'देवा अर्जुनतोऽभवन्' 'असुराः कर्णतोऽभवन्' इति तत्तत्पक्षपातवचनानुरोधात् अधार्तराष्ट्राणामित्यकारप्रश्लेषौपयिकप्रयोगानुरोधाच्च कल्पितः ॥ शब्दार्थप्रौढिम्ना अर्थान्तरव्यञ्जनं हि महान्तत्कर्षः प्रयोगस्य ॥ एवं तत्रतत्र शब्दार्थप्रौढिवशादर्थान्तरव्यंजनमूह्यम् ॥

धृतराष्ट्रः ॥ उभयसैन्यकोलाहलापरमानन्तरं किमासीत् ॥

सञ्जयः ॥ अथ व्यवस्थितान् दृष्ट्वा धार्तराष्ट्रान् कपिध्वजः ॥

प्रवृत्ते शस्त्रसंपाते धनुरुद्यम्य पाण्डवः ॥ २० ॥

हृषीकेशं तदा वाक्यमिदमाह महीपते ॥ २०॥ ॥

अथेति ॥ हे महीपते अथ अनन्तरं कपिः हनुमान् ध्वजे यस्य सः कपिध्वजः पाण्डोः अपत्यं पाण्डवः पार्थः वि विशेषेण अवस्थिताः व्यवस्थिताः तान् धार्तराष्ट्रान् दृष्ट्वा धनुः उद्यम्य शस्त्राणां संपातः शस्त्रसंपातः तस्मिन् शस्त्राणां संपातो यस्मिन् तत् शस्त्रसंपातं युद्धं तस्मिन्वा प्रवृत्ते सति तदा हृषीकेशं कृष्णं इदं वाक्यं आह॥२०॥२०॥॥

लोकोत्धारार्थं कृत्वा हृदयेऽवस्थापितस्य गीताशास्त्रस्य समये पार्थं व्याजीकृत्य लोकात्धारार्थमुपदेशाय श्रीकृष्णस्य पार्थेन सह कुरुक्षेत्रागमन इति 'ततः श्वेतैर्हयैः' इत्यत्र व्यञ्जनया सूचितं हि मया ॥ न हि नरांशादिन्द्रांशात् पैतृष्वसेयात् भगिनीपतित्वेन जामातृतामुपगतात् १ परमभक्तात् परममित्रात् पाण्डुसुताद् पार्थादृते भगवतः कृष्णस्य सकाशात् गीताशास्त्रोपदेशमाप्तुमर्हति कश्चिदन्यः ॥ स च पार्थः 'अतिपरिचयादवज्ञा सन्ततगमनादनादरो भवति ॥ मलये भिल्लपुरन्ध्री चन्दनतरुकाष्ठामिन्धनं कुरुते' इति न्यायेन २ सावज्ञतया न मम शिष्यतामुपगच्छेत् ॥ न च शिष्यभावावलंबनमन्तरेण युक्तः कर्तुमुपदेशः ॥ अतः शिष्योऽस्मि भोः उपदिश मे तत्वमिति यदा प्रार्थयते तदाऽस्मै गीताशास्त्रमुपदेष्टव्यम् ॥ न हि वैराग्यभाग्योदयादृते शिष्यतामुपेत्य तत्वोपदेशमर्थयेत ॥ न च शोकविषादव्याकुलतामन्तरेण वैराग्यं जायतेति ॥ शोकविषादौ च न प्रियविप्रयोगदुःखदर्शनात् तदनुसन्धानाद्वा विना संभवतः ॥ अत एतं पार्थं बन्धुजनवियोगजदुःखानुसन्धानसञ्जातशोकविषादमूलकवैराग्यभाग्यवन्तमाधाय तेन शिष्यतामुपेत्यतत्वोपदेशमर्थयमानायास्मै गीताशास्त्रमुपदेष्टव्यमिति तादृशं समयं प्रतीक्षमाणोऽवर्तत भगवान्

१. वक्ष्यते च ॥ 'भक्तोऽसि मे सखा चे'ति (४. ३.) ॥ २. वक्ष्यति च पार्थः 'हरेति मत्वा प्रसभं इत्यादि' 'देव सोढु'मित्यन्तं (११. ४१. ४२. ४३. ४४.)

वासुदेवः ॥ सति चैवं वनवासाज्ञातवासनिर्वहणानन्तरं उपेत्य भगवति विराटनगरीं निर्वर्त्य चोत्तराकल्याणमहोत्सवं समये पुनरागमिष्यामि इत्युक्त्वा यथागतं गते साहाय्यकमभ्यर्थयितुं सुयोधनधनञ्जयौ द्वारवतीमेत्य भगवता कृष्णेन कुमाराणां कदंबेन केन चिदंशेन स्वेनापि केनचिदंशेन पारपूरितमनोरथा स्वावासमुपागमताम् ॥ ततो भगवान् माधव उपेत्य पाण्डवान् सन्धिकरणव्याजेन युद्धमेव दृढीकृत्य समये गीताशास्त्रोपदेशसौकर्याय पार्थेन सामानाधिकरण्यं संपादयितुं तद्रथेऽवस्थानाय सारथ्यकरणमुररीकृत्य सह तेन तदीयैश्च कुरुक्षेत्रमेत्य पाञ्चजन्यशंखपूरणेन शंखपूरणप्रेरणेन च युद्धोत्साहमभिवर्ध्य. युद्धारंभात्पूर्वं बंधुदर्शनान्मोहमुत्पाद्य तेन च शोकविषादावुत्पाद्य तेषामपाकरणाय गीताशास्त्रमुपदिश्य तेन च विगतमोहशोकविषादमाधाय तादृशेन पार्थेन युद्धनिर्वर्तने श्रुतगीताशास्त्राः सम्यक् ज्ञानमाप्य तेन विधूतमोहशोकविषादा भूत्वा वर्णाश्रमोचितविहितकर्मानुष्ठानेन शुद्धया बुद्ध्या ज्ञानद्वारा मोक्षमाप्नुवन्तीति ज्ञात्वा बहवो गीताशास्त्रश्रोतारो भवेयुः ततश्च गीताशास्त्रस्य सर्वत्र सम्यक् प्रचारेण लोकोद्धारः स्यात् इत्यालोच्य युद्धारंभात्पूर्वमेव गीताशास्त्रमुपदिदिक्षुः उपदेशग्रहणयोग्यतोत्पादनाय मोहशोकविषादानुत्पिपादयिषुः हृषीकेशत्वात्स्वस्य स्वीयया प्रेरणाशक्त्या युद्धायोपागतबन्धुजनदिदृक्षामुत्पादयामास ॥ प्रेरितश्चैवं हरिणा सद्यएव युद्धाडंबरे प्रवर्तयितव्ये तमप्रवर्त्य सारथितयाऽवस्थितं भगवन्तं उभयसैन्यस्थितबन्धुजनदर्शनाय रथमिमं किंचित्पुरतो नीत्वा द्वयोः सेनयोर्मध्ये स्थापयेत्याह पार्थः ॥ लोके तावत् व्यवहारविमर्शस्थानेषु वादिप्रतिवादिनोर्मध्ये कस्यचिदुभयोर्वा असौकर्यानुरोधेन अवध्यन्तरकल्पनं दृश्यते ॥ तद्वत् मदीयानां स्वस्य वा असौकर्यानुरोधेन नार्जुनो युद्धाडंबरं प्रावर्तयत् इति किं न स्यात् इति चेत् उभयसैन्यकोलाहलोपरमानन्तरं त्वदीयाः भीष्मादयश्च सम्यक् युद्धसज्जाधृतयाऽवस्थिताः अतस्तेषां असौकर्यानुरोधान्न प्रावर्तयदिति वक्तुं न शक्यम् ॥ पार्थस्तु तादृशान् तावकान् दृष्ट्वा धनुरुदयच्छत् ॥ उद्यम्य च तदवनम्य सज्जीकृत्य शरमपि तत्र [१] सन्धायसमनह्यत ॥ कुतस्तस्य तादृशं धैर्यं इति चेत् परमशूरस्य त्वदनुजस्य पाण्डोः पुत्रः खलु सः ॥ किंच

१. अत एव 'विसृज्य सशरं चापं' इति वक्ष्यते (१. ४७.)

सारथितया पुरः स्थितेन भगवता उपरि ध्वजेऽवस्थितेन[1] हनुमता च सन्धुक्ष्यमाणतत्पक्षाशिक्षणदक्षधैर्यः ॥ अतः स्वस्य असौकर्यानुरोधेन न प्रावर्तयदित्यपि न वक्तुं युक्तम् ॥ किंतु भगवतः प्रेरणादेव न प्रावर्तयदिति वक्तव्यम् ॥ अतो भगवत्प्रेरणया शस्त्राणां तदुपलक्षितानामस्त्राणां बाणानां च सम्यक् पाते तद्युक्ते युद्धे वा प्रवृत्ते अस्यवधानेन प्रवर्तयितव्ये युद्धाङ्गस्य शंखपूरणादेरारब्धत्वेन युद्धे आरब्धे इति वा युद्धोद्योगं विहाय युद्धोद्यमकरणकाले हृषीकेशत्वात्सर्वप्राणिसकलेन्द्रियप्रेरकं भगवन्तं हरिं वक्ष्यमाण वाक्यमाह ॥ महीपते सम्यगवधेहीदम् ॥ आवास्यन्तीम इमे युद्धाय योत्स्यन्ते च मया स्यादेभिरेभिरिति ज्ञातसकलोदन्तः गाण्डीवसज्यीकरणपूर्वकशरसन्धानपर्यन्तं प्रवृत्तः प्रवीरतमः पार्थः कुतः प्रवर्तयितव्यं सङ्गरोद्यमं विहाय योत्स्यमागतजनजिज्ञासावानभूदिति चेत् न स स्वयं तथा जातः किंतु सकलेन्द्रियप्रेरकश्रीकृष्णप्रेरणया ॥ अन्यादृशी हि प्रेरणाशक्तिस्तस्य ॥ तस्य तथा प्रेरणा च विषादमर्जुनस्यापाद्य तदपनोदनाय तत्त्वमुपदिश्य तेन लोकोद्धारकरणाय ॥ २० ॥ २०॥ ॥

धृतराष्ट्रः ॥ किं तद्वाक्यम् ॥ वद ॥

सञ्जयः ॥ सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत ॥ २१ ॥

सेनयोरिति ॥ न विद्यते च्युतं यस्य सः अच्युतः हे अच्युत कृष्ण उभयोः द्वयोः सेनयोः मध्ये मे रथं स्थापय ॥ २१ ॥

उभयोः सेनयोर्मध्ये मे रथं स्थापय ॥ यतस्त्वमच्युतोऽपि आश्रितवात्सल्यान्मम सारथिरभूः ॥ न विद्यते च्युतं च्युतिः स्वपदात् देशकालगुणेभ्यश्च यस्य सः तादृशोऽसि त्वम् ॥ अत् विष्णोः च्युतः तदवतारभूतः तादृशस्त्वमसि ॥ न विद्यते च्युतं च्युतिः यस्मात् यं प्राप्य सः अनपायानित्यपदप्रदः तादृशस्त्वमसि ॥ न विद्यते च्युतं च्युतिः येन संनिहितेन सः स्वसन्निधानमात्रेण जयप्रदः तादृशोऽसि त्वम् ॥ न विद्यते च्युतं च्युतिः सारथिकर्मणि यस्य सः यथेष्टं स्थापने प्रेरणे च समर्थः तादृशस्त्वमसि ॥ अतो नेदं तवाशक्यम् ॥ अत एवैवमुच्यते मध्ये स्थापयेति ॥ २१ ॥

१. हरिर्युवंनृप्रहवतः किमसाध्यं इति भावः ॥

कृष्णः ॥ किमर्थं मध्ये रथस्थापनम् ॥ वृहि ॥

अर्जुनः ॥ यावदेतान्निरीक्षेऽहं योत्स्युकामानवस्थितान् ॥
कैर्मया सह योत्स्यव्यं अस्मिन् रणसमुद्यमे ॥ २२ ॥

यावदिति ॥ अहं अस्मिन् रणस्य समुद्यमः रणसमुद्यमः तस्मिन् कैः सह मया योत्स्यव्यं मया सह कैः योत्स्यव्यं इति ज्ञातुं योत्स्युं कामः येषां ते योत्स्युकामाः तान् अवस्थितान् व्यवस्थितान् एतान् यावत् निरीक्षे निरीक्षिष्ये ॥ २२ ॥

योत्स्युमिच्छयाऽवस्थितान् एतान् अहं १ निरीक्षिष्ये ॥ किमर्थं निरीक्षितव्यम् इति चेत् कैः सह मया योत्स्यव्यं मया सह कैः योत्स्यव्यं इति ज्ञातुं निरीक्षितव्यम् ॥ कैः सह मया योत्स्यव्यं कैः सह मया अ योत्स्यव्यं इति ज्ञातुं इति वा ॥ मया अ सह इति च्छेदः ॥ के योत्स्यव्याः २ के पूज्यतया युध्यात्परिहर्तव्याः इति ज्ञातुं इति वा ॥ कैः सहायभूतैः पार्ष्णिग्राहचक्ररक्षादिभिस्सहितेन मया अन्यैर्योत्स्यव्यं इति ज्ञातुं इति वा ॥ यावत् निरीक्षे तावत् स्थापयेति वा ॥ यावति देशे स्थित्वा निरीक्षे तावति देशे स्थापय ॥ यावन्तं कालं निरीक्षे तावन्तं कालं स्थापय ॥ इत्यर्थः ॥ यदि कैः शत्रुभिः सह मया योत्स्यव्यं इत्येवार्थो विवक्षितः तर्हि उभयोः सेनयोर्मध्ये रथं स्थापयेत्युक्तिरयुक्ता स्यात् ॥ स्वावस्थानस्थल एव स्थित्वा पुरोऽवस्थितानां शत्रूणां दर्शनसंभवात्॥ पुरः स्थितानां परकीयानां पृष्ठतः स्थितानां स्वकीयानां च दर्शनार्थं किल मध्ये रथं स्थापयेत्याह ॥ अतः कैः परकीयैः सह मया योत्स्यव्यं कैः स्वकीयैस्सह सहितेन मया योत्स्यव्यं इत्युभयमपि ३ विवक्षणीयम् ॥ २२ ॥

कृष्णः ॥ सेनयोरुभयोर्मध्ये रथं स्थापयिष्यामि ॥ किमर्थं त्वरसे ॥

१. निरीक्षे इत्यस्य यावत्पदमहिम्ना निरीक्षिष्ये इत्यर्थः॥ 'यावद्युक्तानिपातयोर्लट्॥ इति (३. ३. ४.) सूत्रम् ॥ २. वक्ष्यते च ॥ 'आचार्याः पितरः (१. ३४.) ॥ 'धार्तराष्ट्रान् सबान्धवान्' (१. ३७.)॥ 'कथं भीष्ममहं सङ्ख्ये द्रोणं च' (२. ४.) ॥ 'गुरूनहत्वा' (२. ५.)॥ इत्यादि ॥ ३. वक्ष्यते च॥ 'सेनयोरुभयोरपि ॥ तान् समीक्ष्य स कौन्तेयः सर्वान् बन्धूनवस्थितान्' (१. २७.) इति ॥

अर्जुनः ॥ योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः ॥
धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः ॥ २३ ॥

योत्स्यमानानिति ॥ ये एते दुष्टा बुद्धिः यस्य सः दुर्बुद्धिः तस्य दुर्बुद्धेः धृतराष्ट्रस्यापत्यं धार्तराष्ट्रः तस्य धार्तराष्ट्रस्य दुर्योधनस्य युद्धे कर्तुमिच्छवः चिकीर्षवः प्रियं चिकीर्षवः प्रियचिकीर्षवः सन्तः अत्र परसेनायां समागताः योत्स्यमानान् युद्धं करिष्यतः तान् अहं अवेक्षे अवेक्षिष्ये ॥ २३ ॥

ये एते दुर्बुद्धेः धार्तराष्ट्रस्य दुर्योधनस्य युद्धे प्रियं चिकीर्षवः सन्तः अत्र परसेनायां समागताः ये एते तस्य युद्धे १अप्रियं चिकीर्षवः सन्तः अत्र अस्मत्सेनायां समागताः योत्स्यमानान् अव्यवहितोत्तरकाले युद्धं करिष्यतः तान् एतान् उभयोः सेनयोः स्थितान् २परकीयान् स्वकीयांश्च अवेक्षिष्ये॥ उक्तरीत्या ज्ञातुं अवेक्षिष्ये ॥ ये समागताः तान् योत्स्यमानान् अवेक्षे पश्यामि ॥ अव्यवहितोत्तरकाले युद्धारंभं कुर्युरिति भाति इत्यर्थः ॥ जाते युद्धारंभे तदनन्तरं अवेक्षणे किं कर्तुं शक्यम् ॥ प्रागेवावेक्षणे यैर्योद्धव्यं तैर्योद्धुं यैर्न योद्धव्यं तान् युद्धात्परिहर्तुं च शक्यम् ॥ अतोऽहं त्वरे ॥ किं पूज्यानवेक्ष्य युद्धात्परिहरणीयास्ते योद्धुमुपागतत्वेन संहरणीया एव हि ते इति चेत् दुर्योधने दाक्षिण्यात् तस्य प्रियं कर्तुमागताः नास्मासु द्वेषस्तेषां अतोऽवेक्षणीया एव ते ॥ दुर्योधन एव दुर्बुद्धिः न तु ते दुर्बुद्धयः ॥ दुर्योधनस्य दुर्बुद्धित्वेन एतावतोऽनर्थस्योद्भेदः ॥ एवमवेक्षणार्थं मध्ये रथं स्थापय इति भगवन्तमाह पार्थः ॥ २३ ॥

धृतराष्ट्रः ॥ एवमुक्तो भगवान् किमयं साधारणसारथिबुद्ध्या एवमेवं कुर्वीति प्रेरयति स्मकुप्यत् ॥ उत तस्मिन् वत्सलतया यथोक्तमकरोत् ॥ वद मे सञ्जय ॥

१. युद्धे प्रियेत्यत्र युद्धे अप्रियेति च्छेदादिदं॥ २. पूर्वश्लोकः योद्धुमागतस्वीयविषयः॥ कैः सहितेन मया योद्धव्यं इत्येव तत्र विवक्षा ॥ उत्तरश्लोकस्तु योद्धुमुपागतपरकीयविषयः ॥ 'युद्धे प्रिये' त्यत्र युद्धे प्रियेत्येव च्छेदः ॥ इति केचित् ॥

सञ्जय उवाच ॥

एवमुक्तो हृषीकेशो गुडाकेशेन भारत ॥
सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम् ॥ २४ ॥

भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम् ॥
उवाच पार्थ पश्यैतान् समवेतान् कुरूनिति ॥ २५ ॥

एवमिति ॥ हे भारत धृतराष्ट्र गुडाका निद्रा तस्या ईशः गुडाकेशः अर्जुनः तेन एवं उक्तः हृषीकेशः कृष्णः उभयोः सेनयोर्मध्ये रथानां रथेषु वा उत्तमः रथोत्तमः तं स्थापयित्वा भीष्मश्च द्रोणश्च भीष्मद्रोणौ तयोः प्रमुखं समक्षं भीष्मद्रोणप्रमुखं तस्मिन् भीष्मद्रोणप्रमुखतः सर्वेषां महीं क्षियन्ति मह्यां क्षयन्ति वा महीक्षितः राजानः तेषां महीक्षितां च प्रमुखतः हे पार्थ समवेतान् सङ्गतान् एतान् कुरून् कुरून् प्रति समवेतान् एतान् अस्मदीयांश्च पश्य इति उवाच ॥ २४ ॥ २५ ॥

हे शकुन्तलापुत्रभरतचक्रवर्तिकुलोत्पन्न धृतराष्ट्र तादृशस्य तव नैवमपवित्रे पुत्रे वात्सल्यात्परमपवित्रेषु पाण्डुपुत्रेषु द्वेष उचितः ॥ शृणु तेषु भगवतो वात्सल्यातिशयम् ॥ गुडाकेशः अर्जुनः गुडवत् रुक्षाः स्निग्धाश्च आ समन्तात् केशाः यस्य सः इति गुडाका निद्रा उपलक्षणया तन्द्रादिदोषान्तराणि च तस्याः ईशः इति गुडाका निद्रा अविद्या तस्या ईशः इति गुडः ब्रह्माण्डगोलः तं अकति अन्तर्बहिश्च व्याप्नोतीति गुडवत् मधुरः सन् अकति भक्तान् प्राप्नोतीति वा गुडाकः शिवः सः ईशो यस्य सः इति गुडा अङ्गुष्ठतर्जनीयोगरूपा मुद्रा तत्परिमिताः केशाः यस्य सः इति च निरुक्तिः ॥ तेन प्रशस्तकेशहस्तेन दोषगन्धाविधुरेण धूताविद्येन तपोविशेषाधिगतमहादेवप्रसादेन अर्जुनेन एवमुक्तः हृषीकेशः उक्तरीत्या सर्वप्राणिसकलेन्द्रियप्रेरकः कृष्णः भीष्मद्रोणयोः प्रमुखतः प्रमुखे समक्षे सर्वेषां राज्ञां च [1]प्रमुखतः उभयोः सेनयोर्मध्ये रथोत्तमं स्थापयित्वा भीष्मद्रोणप्रमुखतः इतरेषां सर्वेषां च राज्ञां समक्षे हे पार्थ युद्धार्थं सङ्गतान् एतान् कुरून् कुरून् प्रति समवेतान् एतान् अस्मदीयांश्च पश्य इति उवाच॥ प्रमुखत इति षष्ठ्यर्थे तसिल्प्रत्ययः ॥ [2]भीष्मद्रोणादीनामित्यर्थः ॥ अनादरे

---

१. प्रमुखत इत्येकदेशस्यानुवृत्तिः ॥ २. भीष्मद्रोणौप्रमुखे आदौ येषां इति विग्रहः ॥

षष्ठीयम्॥ भीष्मद्रोणादीन् शूरान् सर्वान् राज्ञश्च अनादृत्य मध्ये रथं स्थापयित्वा निर्भय उवाच इति वा ॥ भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षितां ॥ इत्यर्धस्य देहलीदीपन्यायेन उभयत्रान्वयः ॥ अर्जुनः अङ्गः अतः भगवन्तं पामरसारथिनिर्विशेषमेवमयं कुर्विति प्रेरयति यदि ज्ञाता स्यात् तर्हि नैवं प्रेरयेत् इति चेत् सः गुडाकेशः धूताविद्यः तथापि स्वतत्कालेन्द्रियप्रेरकश्रीकृष्णप्रेरणया तथोवाच अतो नायं दोषस्तस्य॥ भगवानपि स्वप्रेरणया पार्थेन नियोजितः न तु पारतन्त्र्येण अतो नायं दोषस्तस्य ॥ हृषीकेशत्वात्सर्वप्राणिसकलेन्द्रियप्रेरकस्य भगवतः पार्थरथयोजितहयमनोनियमनं कियत् ॥ अतः यथाऽभिलषितं मध्ये रथं स्थापयित्वा ददृक्षतान् पश्येत्याह पार्थ वासुदेवः ॥ २४ ॥ २५ ॥

धृतराष्ट्रः ॥ पश्येत्युक्तोऽर्जुनः किमकार्षीत् ॥ वद ॥

सञ्जयः ॥ तत्रापश्यत् स्थितान् पार्थः पितॄनथ पितामहान् ॥

आचार्यान् मातुलान् भ्रातॄन् पुत्रान् पौत्रान् सखींस्तथा॥२६॥
श्वशुरान् सुहृदश्चैव सेनयोरुभयोरपि ॥ २६॥ ॥

तत्रेति ॥ अथ अनन्तरं पृथा कुन्ती तस्याः अपत्यं पार्थः अर्जुनः तत्र तयोः उभयोः द्वयोः सेनयोरपि स्थितान् पितॄन् पितॄणां पितरः पितामहाः तान् आचार्यान् मातुः भ्रातरः मातुलाः तान् भ्रातॄन् पुत्रान् पुत्राणां पुत्राः पौत्राः तान् तथा सखीन् मित्राणि श्वशुरान् सुहृदः अनिमित्तस्नेहवन्तः तान् चैव अपश्यत् ॥ २६ ॥ २६॥ ॥

कृष्णवचनश्रवणानन्तरं भगवतः पितृष्वसुः पृथायाः कुन्त्याः पुत्रत्वेन भगवता उक्तरीत्या अनुगृह्यमाणः अर्जुनः तत्र स्थितानपश्यत् ॥ कुत्र स्थितान् कानपश्यत् इति चेत् तत्रेत्यस्य विवरणं उभयोः सेनयोरपीति ॥ तत्र तयोः उभयोः सेनयोरिति वा ॥ तत्र तेषु समवेतेषु कुरुषु कुरून् प्रति समवेतेषु स्वकीयेषु च स्थितान् इति वा ॥ तत्र पक्षद्वये इति वा ॥ उभयोः सेनयोरपीत्येतस्य तु उभयोः सेनयोरपि अवस्थितान् इत्युत्तरेणान्वयः ॥ पितुः पाण्डोस्तत्सम्बन्धात्पितॄनिति कथम् ॥ एकः खलु पिताऽस्यात् कथं पितॄनिति बहुवचनम् ॥ इति चेत् पितृत्वतुल्यस्य पितृव्यत्वादेरत्र विव-

क्षणात् पितृनित्युपपद्यते ॥ एवं पितामहान् इत्यत्रापि ॥ आचार्यानित्यादौ आचार्यत्वादिकं तत्तुल्यत्वं ऋत्युभयं ग्राह्यम् ॥ सखायः मित्राणि सुहृदस्तु अनिमित्तस्नेहवन्तः ॥ उभयोः सेनयोरपि स्थितान् पित्रादीनपश्यत् ॥ २६ ॥ २६॥ ॥

सञ्जयः ॥ तान् समीक्ष्य स कौन्तेयः सर्वान् बन्धूनवस्थितान् ॥२७॥
कृपया परयाऽऽविष्टो विषीदन्निदमब्रवीत् ॥ २७॥ ॥

तानिति ॥ कुंत्याः पुत्रः कौन्तेयः सः अर्जुनः अवस्थितान् तान् सर्वान् बन्धून् समीक्ष्य परया अतिशयितया कृपया आविष्टः सन् विषीदन् विषादं प्राप्नुवन् सन् इदं अब्रवीत् ॥ २७ ॥ २७॥ ॥

उभयोः सेनयोरपि युद्धसन्नद्धतया स्थितान् तान् सर्वान् बन्धून् समीक्ष्य स पार्थः अपरिहार्यया कृपया आविष्टोऽभूत् ॥ कृपा परदुःखासहिष्णुत्वम् ॥ अतएव विषादं प्राप्तः ॥ विषादो नाम मोहनिमित्तकशोकजन्य[1] मनोदौर्बल्यं यस्मिन् सति सर्वव्यापारोपरमो भवति ॥ विषीदन् सन् वक्ष्यमाणं वचनमब्रवीत् ॥ कृपया व्याप्तः युक्तः इत्यनुक्त्वा आविष्ट इत्युक्त्या भूतप्रेतपिशाचाद्यावेशयुक्त इव विवशः किमपि किमपि असंबद्धमब्रवीदिति सूच्यते ॥ कृपामाविष्ट इत्यनुक्त्वा कृपया कर्त्र्या आविष्ट इत्युक्त्या शत्रुषु नन्वेबन्धिषु च कृपः न युक्तेति जानन्तमपि तं पिशाचिकेव कृपा बलात्कारेण प्राविशदिति सूच्यते ॥ परममृदुस्वभावायाः कुन्त्याः पुत्रत्वादर्शनमात्रेण कृपाविष्टोऽभूत् ॥ कृपया अपरया इति छेदः ॥ स्वसैन्ये पुराऽपि कृपाऽभूत् तस्मिन् समये तु परसैन्येऽपि अपरा कृपाऽभूत् ॥ तया आविष्टः सन् अतः विषीदन् सन्[2] इदमब्रवीदिति वा ॥ २७ ॥ २७॥ ॥

धृतराष्ट्रः ॥ किं तद्वचनं वद ॥

सञ्जयः ॥ दृष्ट्वेमान् स्वजनान् कृष्ण युयुत्सून् समुपस्थितान् ॥ २८ ॥

१. अत एव वक्ष्यते ॥ 'क्षुद्रं हृदयदौर्बल्य' (२. ३.) मिति ॥ २. विषीदन्नब्रवीदिति विषादवचनयोः समकालतोक्त्या वचनकाले सगद्गदकंठत्वाश्रुपातादिविषादकार्यसद्भावः सूच्यते ॥

सीदन्ति मम गात्राणि मुखं च परिशुष्यति ॥
वेपथुश्च शरीरे मे रोमहर्षश्च जायते ॥ २९ ॥

गाण्डीवं स्रंसते हस्तात् त्वक् चैव परिदह्यते ॥
न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ॥ ३० ॥

दृष्ट्वेति ॥ कर्षनीति कृष्णः हे कृष्ण योद्धुं इच्छवः युयुत्सवः । तान् युयुत्सून् सं सम्यक् उप समीपे स्थिताः उपस्थिताः तान् इमान् स्वे च ते जनाश्च स्वजनाः तान् स्वजनान् बन्धून् दृष्ट्वा मम गात्राणि सीदन्ति दुर्बलीभवन्ति मुखं च परिशुष्यति मे शरीरे वेपथुः कंपश्च रोम्णां हर्षः रोमहर्षः रोमाञ्चः स च जायते ॥ हस्तात् गाण्डीवं स्रंसते त्वक् परि सम्यक् परितो वा दह्यते चैव अवस्थातुं च अपि न शक्नोमि मे मनः भ्रमतीव च ॥ २८ ॥ २९ ॥ ३० ॥

हे कृष्ण योद्धुं इच्छया युत्वसन्नद्धतया आगत्य पुरतः समीपेऽवस्थितान् इमान् सर्वान् बन्धून् दृष्ट्वा स्थितस्य मम करचरणाद्यवयवाः विशीर्यन्ते दुर्बलीभवन्ति मुखं च नितरां शुष्यति ॥ मम शरीरे कंपश्च जायते रोमाञ्चश्च जायते ॥ हस्तात् [१] गाण्डीवं धनुः स्रंसते त्वक् नितरां दह्यते चैव ॥ अवस्थातुमपि न शक्नोमि ॥ कुत इति चेत् मम मनः भ्रमतीव ॥ इव शब्दो वाक्यालङ्कारे ॥ भ्रमात्मकविपरीतज्ञानयुक्तम् भवति ॥ किमपि किमप्यसंबद्धं मम मनसि स्फुरति ॥ भ्रमणं परिभ्रमणं तत्करोतीव ॥ भ्रमणकर्तृ इवेति यावत् ॥ परिभ्रमत्कुलालचक्रादौ क्षिप्तः पदार्थ इव नैकोऽपि विषयः क्षणमपि मे मनस्यवतिष्ठते ॥ भ्रमत् इति शतृप्रत्ययान्तं ॥ सप्तमी ॥ भ्रमति कुलालचक्रादौ क्षिप्तं वस्त्विव तत् नैकस्मिन्नपि विषये क्षणमप्यवतिष्ठते॥ २ त्वं तु पूर्णानन्दं परब्रह्मासि ॥ अतो दुःखापरिज्ञानादेव युद्धे प्रवर्तयसि ॥ ३ पुण्यं पापं

---

१. गाण्डीवशब्दो ह्रस्वमध्यो दीर्घमध्यश्च ॥ 'गाण्डीवमेतेन मुहुर्विकृष्टं ह्रस्वं च दीर्घं च बभूव युद्धे ॥ तुलामिवर्णेन तदाऽधिरोढुं स्वनामधेयस्थितिशालिनेव' ॥ इति श्लोकोऽनुसन्धेयः ॥
२. 'कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः ॥ विष्णुस्तद्भावयोगाच्च कृष्णो भवति सात्वतः' ॥ इति (भार. उ. ६९. अ.) वचनमनुसन्धेयम् ॥ ३. 'यतः कर्षसि देवेश नियम्य सकलं जगत् ॥ अतो वदन्ति मुनयः कृष्णं त्वां ब्रह्मवादिनः' ॥ इति कूर्मपुराणवचनमनुसन्धेयम् ॥

च कारयित्वा स्वर्गं नरकं च प्रति तत्कर्तॄन् कर्षसि अतः कृष्णोऽसि ॥ भीष्मादिहनने पापमवश्यं स्यात् ॥ कृतपापांश्च त्वं नरकान् प्रति कर्षसि ॥ न युक्तं तव प्रवर्त्य युध्ये तेन पापमापाद्य तत्फलानुभवाय नरकान् प्रति मम कर्षणम्॥ अप्राकृतातिरुचिर १कृष्णवर्णवत्त्वाच्च कृष्णोऽसि ॥ परमसौन्दर्यराशेः तव सारथ्येन शरीरायासजननमनुचितम् ॥ २ भक्तजनदुःखकर्षणाच्च कृष्णोऽसि ॥ भक्तजनदुःखासहिष्णोस्तवदुःखजनके कार्ये मम प्रेरणमनुचितम् ॥ युत्थाय युद्धाङ्गणमागतान् बन्धून्दृष्ट्वा भावितन्नाशपर्यालोचनया मोहशोकविषादव्याकुलचेतसो मे माऽस्तु युध्यकथा ॥ अनु जानीहि मामवरुह्यसदनगमनाय ॥ २८ ॥ २९ ॥ ३० ॥

कृष्णः ॥ किमस्थाने तवेदमवस्थान्तरं धैर्यमवलंब्य युध्वा श्रेयो लभस्व ॥

अर्जुनः ॥ निमित्तानि च पश्यामि विपरीतानि केशव ॥ ३०॥ ॥

निमित्तानीति ॥ हे केशव कृष्ण विपरीतानि निमित्तानि शकुनानि पश्यामि च ॥ ३०॥ ॥

अशुभसूचकापशकुनानि पश्यामि च ॥ दुर्निमित्तदर्शनसञ्जातभाव्यशुभसंभावनया युध्ये अवश्यं कुलनाशो भवेदिति बिभेमि ॥ ३ परमप्रशस्तकेशोपलक्षितसर्वावयवोऽसि ॥ प्रशस्ताः केशाः अस्य सन्तीति केशवः इति निरुक्तिः ॥ परमसुन्दरस्य ते दुर्निमित्ताकुलतया परमभयानके युध्यरङ्गे विनैव स्वस्वकीयप्रयोजनं अवस्थानमनुचितम् ॥ लक्ष्मीब्रह्मरुद्रादिप्रवर्तकोऽसि ॥ कश्च ईः लक्ष्मीः सा च ईशश्च केशाः लक्ष्मीब्रह्मरुद्राः तान् वर्तयति प्रवर्तयति इति केशव इति निरुक्तिः ॥ स्वयं सुखरूपः भक्तानां सुखप्रदश्चासि ॥ कानां सुखानां ईशं श्रेष्ठं केशं तत् वहति प्रापयति च केशवः इति निरुक्तिः ॥ प्रशस्तकेशशब्दितमत्स्यकूर्माद्यनेकांशोऽसि ॥ प्रशस्ताः केशाः अस्य सन्तीति केशवः इति निरुक्तिः ॥ समुद्रशायित्वात् केशवोऽसि ॥ कानां

१. 'अप्राकृतातिरुचिरमेचकः कृष्ण ईरितः'॥ इति सहस्रनामभाष्ये॥ २. 'कर्षणाद्भक्तदुःखानां कृष्णं त्वां कवयो विदुः' ॥ इति कूर्मपुराणवचनमनुसन्धेयम् ॥ ३. 'प्रशस्तनीलकेशत्वात् केशवः परिकीर्तितः' इति सहस्रनामभाष्ये ॥

जलानां ईशः केशः समुद्रः केशे वर्तते इति केशवः इति निरुक्तिः ॥ उक्तरीत्या लक्ष्मीब्रह्मरुद्रादिप्रवर्तकस्य सुखरूपस्य सुखप्रदस्य मत्स्यकूर्माद्यैरनेकैरवतारैरुद्धृतसकललोकशल्यस्य महोदधिशयस्य परमात्मनस्तव दुर्योधनाद्यशिष्टदुष्टक्षयजनितनिरवशेषनिरसनेन भूभारपरिहरणं अनायाससाध्यम् ॥ कुतस्त्वदं मां निबध्नासि ॥३०॥ ॥

कृष्णः ॥ किं करिष्यन्तीमान्यपशकुनानि लभ्यते च युद्धे नियतं श्रेयः दुर्निमित्तोदयफलानुभवस्तु शत्रूणां भविष्यति इति धीरेण मन्तव्यम् ॥ कुत एवं विषीदसि ॥

अर्जुनः ॥ न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे ॥ ३१ ॥

न चेति ॥ आहवे युद्धे स्वश्चासौ जनश्चेति वा स्वस्य जनः इति वा स्वजनः तं हत्वा श्रेयः प्रयोजनं नानुपश्यामि च ॥ ३१ ॥

लभ्यते च युद्धे नियतं श्रेयः इति मन्तव्यमेव धीरेण ॥ शत्रूणां हननाच्छ्रेयो लभ्येत ॥ समवेताश्चास्मिन् युद्धे सर्वे बन्धवः बंधूनां हननं तु दुःखापकीर्त्योर्हेतुः ॥ अतो युद्धे स्वजनं हत्वा प्रयोजनं नानुपश्यामि च ॥ विचारय सम्यगमुं विषयम् ॥ ततः प्रयोजनं ज्ञायेत ॥ इति चेत् अनु विचारणात्पश्चादपि न पश्यामि ॥ ३१ ॥

कृष्णः ॥ श्रेयो नानुपश्यामीति कथमिदमुच्यते ॥ न च जयोनिरर्थकः ॥ राज्यसुखकीर्तिरूपप्रयोजनसद्भावात् ॥ वद ॥

अर्जुनः ॥ न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च ॥
किं नो राज्येन गोविन्द किं भोगैर्जीवितेन वा ॥ ३२ ॥

नेति ॥ हे कृष्ण विजयं न काङ्क्षे ॥ राज्यं च न काङ्क्षे ॥ सुखानि च न काङ्क्षे ॥ हे गोविन्द कृष्ण नः अस्माकं राज्येन किं ॥ भुज्यते सुखं एभिरिति भोगाः सुखसाधनानि तैः किं ॥ जीवितेन प्राणधारणेन वा किं ॥ ३२ ॥

निरर्थकत्वाज्जयं न कांक्षे ॥ न च राज्यसुखादीनि प्रयोजनानि ॥ मम तेषु कांक्षाया अभावात् ॥ यो हि यत् कांक्षति तत् तस्य प्रयोजनम् ॥ यदि जयं न कांक्षसि तर्हि 'अर्जुनः फल्गुनो जिष्णुः किरीटी श्वेतवाहनः ॥ बीभत्सुर्विजयः कृष्णः सव्यसाची धनञ्जयः' ॥ इति (भार. वि ४३. अ) त्वया परिगणितेषु त्वन्नामसु 'नाजित्वा विनिवर्तामि तेन मां विजयं विदुः' इति त्वया निरुक्तं विजय इति नाम तवापगच्छेत्

इति चेत् १ विजय इति नाम च न कांक्षे ॥ जयहेतुकं राज्यं च तत्प्रयोजनानि सुखानि च न कांक्षे ॥ हे २ कृष्ण न मां त्वम् निर्बधान ॥ राज्यं न कांक्षे इति कुत उच्यते ॥ स्पृहणीयं हि तत् इति चेत् नः अस्माकं राज्येन किं प्रयोजनम् ॥ सुखसाधनभूतपदार्थलाभः प्रयोजनमिति चेत् किं भोगैः ॥ भुज्यते सुखमेभिरिति व्युत्पत्त्या भोगाः सुखसाधनानि तैः किं प्रयोजनम् ॥ तदनुभवजनितसुखमेव प्रयोजनमिति चेत् सुखे कांक्षाऽभावात् न तत् प्रयोजनम् ॥ सुखानि च न कांक्षे इति ह्युक्तं मया ॥ सुखसाधनतत्साध्यसुखयोरनपेक्षायां कथं जीवितुं शक्यं इति चेत् जीवितेन वा किं प्रयोजनम् ॥ अन्यायेन जीवनापेक्षया मरणं वरम् ॥ तव केवलमेवमाशयः स्यात् युधिष्ठिरभीमनकुलसहदेवास्तु युयुत्सयाऽवतिष्ठन्ते ॥ अतः कथं तव युद्धान्निवृत्तिमनुमन्येय ॥ इति चेत् अहमिव युद्धान्निवृत्तिं तेऽप्यभ्युपगच्छेयुः ॥ न पञ्चानामस्माकमभिप्रायो भिद्येत ॥ अत एव नः इति बहुवचनम् ॥ एवं वयं अस्मान् अस्माभिः इत्यादावप्यूह्यम् ॥ गाः ज्ञानगभस्तीन् विन्दति प्राप्नोतीति गोभिः वेदैः वेद्यते ज्ञायते इति वा गाः वेदान् विन्दति लभते जानाति इति वा गाः वेदवाचः विन्दति प्रतिपादकत्वेन प्राप्नोतीति वा गां नष्टां भूमिं वराहरूपेण विन्दति लभते इति वा गवा वाचा विं विष्णुं ददातीति वा गोरूपान् अविरूपान् असुरान् द्यति खण्डयतीति वा गोविन्दोऽसि॥ एतादृशमहामाहात्म्योपेतं त्वां सर्वात्मना संश्रितस्य मम न राज्यादिनिहीनप्रयोजनेषु ३ कांक्षोदेति ॥ बहिरेव वदसि अन्तस्तु स्पृहणीयेषु राज्यादिषु कांक्षा स्यादेवेति चेत् सर्वप्राणिसर्वेन्द्रियमनोवृत्तिसाक्षितया गोविन्दोसि ॥ गाः इन्द्रियाणि अधिष्ठानतया विन्दतीति व्युत्पत्तिः ॥ अतो जानास्येव ममाशयं त्वम् ॥ अतो युद्धान्निवृत्तिमनुमन्यस्व ॥ ३२ ॥

कृष्णः ॥ राज्यादीनां स्पृहणीयत्वेऽपि तेषु कांक्षाभावात् न तानि प्रयोजनानि इति त्वयाऽभिहितम् ॥ कांक्षणीयेषु कांक्षाऽभावस्य को हेतुः ॥ ब्रूहि ॥

१. अर्थपरस्यापि विजयपदस्य शब्दपरत्वं विवक्षया प्रयोगप्रौढिवशादवगन्तव्यम् ॥ विजयत्वं इति भावप्रधानं वा ॥ विजयशब्दप्रवृत्तिनिमित्तस्य विजयस्यापगमे तत्प्रवृत्तिनिमित्तकविजयशब्दोऽप्यपगच्छेत् इत्यर्थलब्धं वेदम् ॥ २. उक्तार्थं (२८) ॥ ३. वक्ष्यते च 'कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुं' इति ॥ अत्र, सद्यस्त्यजन्ति वरद त्वयि बद्धभावाः पैतामहादिषु पदेष्वपि भावबन्धम् ॥ कस्मै स्वदेत सुखसञ्चरणोत्सुकाय कारागृहे कनकशृङ्खलयाऽपि बन्धः'॥ इति श्लोकोऽनुसन्धेयः ॥

अर्जुनः ॥ येषामर्थे कांक्षितं नो राज्यं भोगाः सुखानि च ॥
त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च ॥३३॥

येषामिति ॥ येषां अर्थे निमित्ते नः अस्माकं राज्यं भोगाः सुखानि च इत्येतत् कांक्षितं ते इमे प्राणान धनानि च त्यक्त्वा युद्धे अवस्थिताः ॥ ३३ ॥

लोके सुखसाधनानि स्वयं केवलं सुखमनुभवितुं न कांक्ष्यन्ते ॥ किंतु पुत्रपौत्रमित्रबन्धुवर्गादिभिस्सह सुखमनुभवितुम् ॥ इति प्रसिद्धम् ॥ येषां अर्थे निमित्ते राज्यं भोगाः सुखानि च इत्येतत् अस्माकं [१] कांक्षितम् ॥ ते इमे प्राणान् त्यक्त्वा धनानि च-त्यक्त्वा तत्त्यागपर्यन्तं निश्चयं कृत्वा युद्धे अवस्थिताः ॥ कृते च युद्धे नियतमेव मरिष्यन्ति ॥ तानन्तरेण सुखसाधनानुभवो न सुखं साधयेत् ॥ प्रत्युत दुःखमेव साध-येत् ॥ अतो राज्यादिकं सुखं च नकांक्षे ॥ ३३ ॥

कृष्णः ॥ येषामर्थे राज्यादिकांक्षा त इमे मर्तुमवस्थिताः इत्युक्तं के ते ब्रूहि ॥

अर्जुनः ॥ आचार्याः पितरः पुत्राः तथैव च पितामहाः ॥
मातुलाः श्वशुराः पौत्राः स्यालाः संबन्धिनस्तथा ॥ ३४ ॥

आचार्या इति ॥ आचार्याः पितरः पुत्राः तथा पितामहाश्चैव मातुलाः श्वशुराः स्यालाः पत्नीभ्रातरः तथा नानाविधसंबन्धान्तरवन्तः ॥ ३४ ॥

आचार्यादयः ते इमे इति पूर्वेणान्वयः ॥ ३४ ॥

कृष्णः ॥ यदि त्वं कृपावेशेन युद्धादुपरमसे तर्हि निवृत्तं युद्धात्त्वां एते निह-न्युः ॥ तवैव एतेषां कृपाऽनुदयात् ॥ अतो युध्यस्व युद्धे चैतान् जहि किं ब्रवीषि ॥

अर्जुनः ॥ एतन्न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन ॥
अपि त्रैलोक्यराज्यस्य हेतोः किन्नु महीकृते ॥ ३५ ॥

१. राज्यं कांक्षितं भोगाः कांक्षिताः सुखानि च कांक्षितानि ॥ कांक्षितं च कांक्षिताश्च कांक्षितानि च कांक्षितं इति वा ॥

एतानिति ॥ मधुं सूदयतीति मधुसूदनः हे मधुसूदन कृष्ण त्रयो लोकाः त्रैलोक्यं त्रैलोक्यं च तत् राज्यं च इति वा राज्ञः भावः राज्यं त्रैलोक्यस्य राज्यं इति वा त्रैलोक्यराज्यं तस्य हेतोरपि घ्नतोऽपि एतान् हन्तुं नेच्छामि ॥ महाः भूमेः कृते महीकृते एतान् हन्तुं इच्छामि किन्नु ॥ ३५ ॥

त्वदुक्तरीत्या युध्यान्निवृत्तं मां १हन्युरेव हन्ति चेत् घ्नन्तु घ्नतोऽपि एतान् अहं २हन्तुं नेच्छामि ॥ महतः चतुस्समुद्रान्तमहीराज्याख्यप्रयोजनस्य सत्वात्कर्तव्यमेव त्वया युध्यमिति चेत् त्रैलोक्यराज्यस्य हेतोरपि हन्तुं नेच्छामि ॥ ३ त्रैलोक्यराज्यापेक्षया अत्यल्पकेवलमहीमात्रनिमित्तं हन्तुमिच्छामि किन्नु ॥ हन्तुं नैवेच्छामि ॥ ४ मधुं तन्नामानं असुरं सूदयति हन्ति इति मधु विद्वज्जनानामिन्द्रियं सूदयति आत्मनि प्रापयति इति वा मधु सुखं सुखलेशोपेतं ससारं सूदयति इति वा मधुसदनोऽसि ॥ सूदः पाचकः मधुसूदः स्वादुपाचकः तं भीमसेनं नयति प्रेरयतीति मधुसूदनोऽसि॥ मा मां निर्बंधान भीमसेनं युध्ये प्रवर्त्य तेन कार्यं निर्वह शत्रूसूदनशीलत्वात्त्वं मां युध्ये प्रेरयासि॥ स्वस्मिन् मनःप्रवर्तनेन संसारनाशनशीलस्य तव संसारे प्रवर्तनमनुचितम् ॥ भीमसेनोपलक्षितसर्वपाण्डवसुखापादनशीलस्य तव बन्धुनाशेन महादुःखहेतौ समितौ तेषां प्रवर्तनमनुचितम् ॥ वेदापहारिमधुनामकदैत्यसंहर्तृत्वेन वैदिकमार्गप्रवर्तकस्य तव अवैदिके वेदविरुद्धे आचार्यहननादौ प्रेरणमनुचितम् ॥ अतो मामनुजानीहि युध्यान्निवृत्य गमनाय ॥ ३५ ॥

कृष्णः ॥ 'अपि त्रैलोक्यराज्यस्य हेतोः किन्नु महीकृते'॥ इति कथमुच्यते ॥ राज्यादिलाभे ऐहिकं सुखमनुभवितुं शक्यम् ॥ राज्यादिलाभस्तु युद्धेनैव ॥ अत ऐहिकसुखानुभवाय युध्यस्व ॥ 'न च राज्यं सुखानि च' इत्युक्तं हि मया इति चेत् अनिषिद्धन्याय्यसुखाननुभवे आत्मद्रोही खलु स्याः ॥ 'अनिषिद्धसुखत्यागी पशुरेव न संशय ॥ इति हि वदन्ति ॥ किंच आविवाहात् स्वसुर्मम सुभद्रायाः

---

१. वक्ष्यते च ॥ यद्यप्येते न पश्यन्ति लोभोपहतचेतसः' ॥ इति ॥ २. 'यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः ॥ धार्तराष्ट्रा रणे हन्युः तन्मेक्षेमतरंभवेत्' ॥ इति वक्ष्यते॥ ३. अवाप्यभूमावसपत्नमृद्धं राज्यं सुराणामपिचाधिपत्यं' ॥ इति वक्ष्यते ॥ ४. मध्वाख्यमसुरं हन्ति सूरीणां करणं च वा ॥ उपसंहरति स्वस्मिन् मधुसूदन इष्यते'॥ इति सहस्रनामसु निरुक्तिः ॥

न त्वया सुखगन्धोऽपि ॥ अतस्तया सह विविधभोगानुभवेन ऐहिकसुखावाप्तये तत्प्रतिभूतराज्यादिप्रापकं युद्धमाचर ॥

अर्जुनः ॥ निहत्य धार्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन ॥ ३५॥ ॥

निहत्येति ॥ हे जनार्दन कृष्ण धार्तराष्ट्रान् निहत्य नः अस्माकं का प्रीतिः किं ऐहिकसुखं स्यात् ॥ ३५॥ ॥

धृतराष्ट्रस्य पुत्राः दुर्योधनादयः धृतराष्ट्रसंबन्धिनो भीष्मद्रोणादयश्च धार्तराष्ट्राः ते हि युद्धे हन्तव्याः तैस्सह सुखानुभवार्थं राज्यादिलाभाय हि युद्धं कार्यं ॥ ते च युद्धे मरणोन्मुखा अवस्थिताः॥ उक्तमेवेदं मया 'तइमेऽवस्थिता' इति ॥ तान्निहत्य अस्माकं किमैहिकसुखं स्यात् ॥ न किमपि ॥ युद्धेन राज्यादिलाभे लभ्येरन् किल गृहारामवसनवाहनभूषणादीनि सुखसाधनानि लब्धैस्तैः सुखमवश्यं स्यादेवेति चेत् आचार्यादिनाशेन दुर्योधनादिबन्धुनाशेन च समुपजातेन बलवता दुःखेन प्रतिबन्धान्न सुखमुत्पद्येत ॥ दुर्योधनादिबन्धूनां दुष्टत्वेन तद्वधात्कथं दुःखोत्पत्तिः इति चेत् दौष्ट्यानुसन्धानेन दुष्टबन्धुजनमरणस्य तदानीमीप्सितत्वेऽपि संबन्धगुणाद्यनुसन्धानेन पश्चाद्दुःखहेतुत्वानुभवाद्दुःखोत्पत्तिवचनं युक्तम् ॥ अशोचन् किल विभीषणसुग्रीवादयो रावणवाल्यादिदुष्टबन्धुजनमरणेन तदीयदौष्ट्यानुसन्धानेन तन्मृतिं कांक्षमाणाः तदर्थं विविधं प्रयतमाना अपि तदीयगुणाद्यनुसन्धानेन ॥ अतः कृतेऽपि युद्धे ऐहिकसुखस्य उक्तरीत्या असंभवान्न तदर्थं युद्धं कुर्या ॥ तर्हि दुर्योधनादिदुष्टजनविनाशः कथं स्यादिति चेत् त्वं जनार्दनोऽसि अतः त्वमेवैतान् संहर ॥ १ जननमरणादिरहितस्य भक्तजनसंसारदुःखनिरसनशीलस्य २ सदसज्जनानां सदसद्गतिप्रापकस्य ३ ब्रह्मादिभिर्याच्यमानस्य ४ स्वसंकल्पमात्रेण सकललोकसंहरणशीलस्य परमात्मनस्तव भूभारायमाणदुर्योधनाद्यसज्जनसंहरणं कियत् ॥ अतस्त्वमेवेमान् दुष्टान् संहर ॥ मा मां निर्बधान ॥ इति त्वामहं याचे ॥ ३५॥ ॥

कृष्णः ॥ माऽस्तु युद्धादैहिकं सुखं भविष्यत्येव नियतमामुष्मिकं सुखं अतः पारत्रिकसुखार्थं युध्यस्व ॥

---

१ न जायत इति जनः अर्दयतीत्यर्दनः जनश्चासौ अर्दनश्च जनार्दनः । २ जनान् अर्दयति प्रापयतीति जनार्दनः॥ ३.जनैः अर्द्यते याच्यते इति जनार्दनः॥ ४.जनान् अर्दयति संहरतीति जनार्दनः॥

अर्जुनः ॥ पापमेवाश्रयेदस्मान् हत्वैतानाततायिनः ॥ ३६ ॥
तस्मान्नार्हा वयं हन्तुं धार्तराष्ट्रान् सबान्धवान् ॥ ३६॥ ॥

पापमेवेति ॥ आततायिनः एतान् हत्वा स्थितान् अस्मान् पापमेवाश्रयेत् ॥ तस्मात् वयं बान्धवैः सहिताः सबान्धवाः तान् धार्तराष्ट्रान् हन्तुं नार्हाः ॥ ३६ ॥ ३६॥ ॥

[1]आततायिनः अस्मान् हन्तुमुद्यतान् एतान् धार्तराष्ट्रान् हत्वा अस्मान् पापमेवाश्रयेत् न तु पुण्यम् ॥ पापं आश्रयेदेव ॥ न तत्र संशयः ॥ पापग्रस्तानां तु पारत्रिकसुखं दूरतोऽपास्तं प्रत्युत पारत्रिकं दुःखं नियतम् ॥ आततायिनः हत्वा अस्मान् पापमाश्रयेदिति न वक्तुं युक्तम् ॥ 'अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः ॥ क्षेत्रदारापहारी च षडेते आततायिनः ॥ आततायिनमायान्तं हन्यादेवाविचारयन् ॥ नाततायिवधे दोषो हन्तुर्भवति कश्चन' ॥ इति मनुस्मृतौ आततायिवधाभ्यनुज्ञानात् ॥ इति चेत् आततायिवधाभ्यनुज्ञानं आचार्यादिव्यतिरिक्तविषयं अतः आततायित्वेऽपि भीष्मद्रोणादयो न हन्तव्याः ॥ यद्यपि दुर्योधनादयः आततायित्वेन हन्तव्याः तथाऽपि तदन्यानाततायिबन्धुजनसाहित्यात्तत्धनने बन्धुजनहननस्यापि प्रसक्त्या आततायिनोऽपि दुर्योधनादयो न हन्तव्याः ॥ तस्मात् सबान्धवान् धार्तराष्ट्रान् दुर्योधनादीन् भीष्मादींश्च हन्तुं वयं नार्हाः ॥ आततायिनां सहायीभूय अस्मान् हन्तुमुद्यततया आततायिबन्धवोऽप्याततायिन एव ॥ अतः बन्धुसहिता अपि दुर्योधनादयो हन्तव्या एव ॥ अग्निदत्वादिषु षट्सु दोषेषु अन्यतमेन एकेन दोषेण युक्ता अपि आततायित्वात् हन्तव्या किमुत षड्भिरप्येतैरुक्तैर्दोषैर्युक्ता इमे इति चेत् आततायिवधो मन्वादिभिरभ्यनुज्ञायते न तु विधीयते ॥ यस्याकरणे प्रत्यवायः तद्विधायकं शास्त्रं धर्मशास्त्रं यस्याकरणे न प्रत्यवायः किंतु करणे अभ्युच्चयः तद्विधायकं शास्त्रमर्थशास्त्रम ॥ अतः 'न हिंस्यात्सर्वाभूतानी' ति शास्त्रं धर्मशास्त्रं आततायिनं हन्यादिति शास्त्रं तु अर्थशास्त्रम ॥ अर्थशास्त्रधर्मशास्त्रयोर्विरोधे अर्थशास्त्रात्धर्मशास्त्रं बलवत् ॥ अर्थशास्त्रं तु प्रयोजनार्थत्वाद्बलम ॥ 'अर्थशास्त्रात्तु बलवत् धर्मशास्त्रमिति स्थितिः' ॥ इति याज्ञ-

---

१. आततं अधिकं यथा तथा अयंते हन्तुं प्रवर्तन्ते इति आततं अधिकं पापं यन्ति प्राप्नुवन्ति इति आतं प्रयमानं अतं नयन्ते जिघांसया गच्छन्ति इति वा आततायिनः ॥ आततायाः 'अग्निदो गरद' इत्यादिनोक्ताः षड्विधा दोषाः एषां सन्तीति आततायिनः इति शङ्करानन्दीये ॥

वल्क्यस्मरणात् ॥ न हि लोके परं हिंसितवानिव स्वं हन्तुमुपागतं आततायिनं अहतवान् तेन दोषेण दण्डयते ॥ अतः आततायिनं हन्यादिति शास्त्रमर्थशास्त्रत्वा-स्नानुरुन्धीय ॥ अनुरुन्धीय च 'न हिं स्यात्' 'न हन्यात्' इत्यादि धर्मशास्त्रम् ॥ अत. अर्थशास्त्रानुरोधेन आततायिनोऽपि दुर्योधनादीन् न हन्यां ॥ आततायिवधा-भ्यनुज्ञानस्य आचार्यातिव्यदिरिक्तविषयतया भीष्मद्रोणादीनामाततायित्वेऽप्यहन्तव्य-त्वात् दुर्योधनादीना अनाततायिबन्धुजनसाहित्येन आततायिवधाभ्यनुज्ञानशास्त्रस्य अर्थशास्त्रतया दुर्बलस्य प्रबलेन 'न हन्यात्' 'न हिंस्यात्' इत्यादिधर्मशास्त्रेण बाधितस्य दुर्योधनादिहननाप्रवर्तकत्वेन च तेषामप्यहन्तव्यत्वात् युध्ये च तेषां हनसं-भवात् अहन्तव्यानां तेषां हनने च पापावश्यंभावात् कृतपापानां च परलोके सुखाप्रा-प्तिदुःखप्राप्त्योर्नियतत्वात् नाहं पारत्रिकसुखार्थं युध्येय ॥ एतान् धार्तराष्ट्रान् हत्वा आततायिनः आततायित्वं प्राप्तान् अस्मान् पापं आश्रयेदेव ॥ यदि महोपकारिणः पूज्यान् भीष्मादीन् उत्करीत्या अहन्तव्यान् दुर्योधनादींश्च वयं हन्याम तर्हि वयमात-तायिनः स्याम तादृशांश्चास्मान् पापमाश्रयेदेव ॥ तस्माद्वयं धार्तराष्ट्रान् हन्तुं नार्हाः ॥ इति, निरपराधान् युध्यान्निवृत्तान् अस्मान् हन्वा आततायित्वं प्राप्तान् एतान् धार्तरा-ष्ट्रानेव पापमाश्रयेत् आश्रयतु ॥ एतएवास्मद्वधेन पापिनो भूत्वा नश्यन्तु न तु वय-मेतद्वधेन नश्यामः ॥ तस्मात् एते अस्मान् हन्तुमर्हाः ॥ वयं तु एतान् हन्तुं नार्हाः ॥ इति च योजनायां नोक्तशङ्कावकाशः विमृशेदम् ॥ ३६ ॥ ३६॥ ॥

कृष्णः ॥ राज्यादिलाभादैहिकसुखस्य स्वधर्मानुष्ठानात्पारत्रिकसुखस्य च संभवात् कथं ऐहिकं पारत्रिकं च सुखं नेत्युच्यते ॥ वद ॥

अर्जुनः ॥ स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ॥ ३७ ॥

स्वजनामिति ॥ हे माधव कृष्ण स्वश्चासौ जनश्च स्वस्य जनो वा स्वजनः तं हत्वा सुखं एषां अस्तीति सुखिनः सुखवन्तः कथं स्याम भवेम ॥३७॥

स्वजनव्यतिरिक्तशत्रुवधेन राज्यादिलाभा दैहिकसुखं स्यात्॥ हन्तव्यशत्रुहनना-त्पारत्रिकसुखं स्यात् ॥ हन्तव्यानां स्वजनत्वात् आततायित्वेऽपि उत्करीत्या बन्धनाम-हन्तव्यत्वात् अनाततायित्वे सुतरामहन्तव्यत्वात् न सुखमैहिकं नाप्यामुष्मिकं सुखम् ॥ अतः स्वजनं हत्वा कथं उभयविधसुखवन्तः स्याम ॥ लोके पुराणादिषु च प्रसिद्धमे-

तत् मधुनामकयादवकंशप्रसूतोऽसि ॥ यादवानां हननं तव हितं स्याद्वा मा परविद्या तद्विषयत्वेन तत्प्रवर्तकत्वेन तत्फलप्रदत्वेन च तत्पतित्वान्माधवोऽसि॥ अतस्तत्साधने समीचीने कर्मणि मम प्रेरणमुचितम्॥ लक्ष्मीपतिरसि ॥ अतः सङ्कल्पमात्रेण विनैव युत्थादिकं सर्वसाम्राज्यलक्ष्मीवितरणसमर्थस्य तव परमाल्पमहीराज्यमात्रप्रापणाय बन्धुजनहनने प्रवर्तनमनुचितम्॥ अतो मामनुजानीहि विहाय युत्थोद्योगं गमनाय॥३७॥

कृष्णः ॥ किं त्वमेवमात्मानं पण्डितं मन्यमानः किमपि किमप्यसंबन्धं भाषसे॥ सन्ति च परपक्षे शास्त्रार्थवेत्तारो दुर्योधनादयः महानुभावा भीष्मद्रोणादयश्च ॥ न किं ते शास्त्रार्थं जानन्ति यदि त्वयोच्यमानं शास्त्राभिमतम् स्यात् तर्हि त्वमिव तेऽपि न कुतो युत्थान्निवर्तन्ते॥ अतो युत्थकरणस्य तैरङ्गीकृतत्वात् त्वयोच्यमानमिदमसङ्गतं॥ किं ब्रवीषि ॥

अर्जुनः ॥ यद्यप्येते न पश्यन्ति लोभोपहतचेतसः ॥
कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम् ॥ ३८ ॥

यद्यपीति ॥ एते दुर्योधनादयः भीष्मादयश्च कुलस्य क्षयः कुलक्षयः तेन कृतः कुलक्षयकृतः तं दोषं मित्राणां द्रोहः मित्रद्रोहः तस्मिन् मित्रद्रोहे पातकं पापं च पश्यन्ति यद्यपि जानन्त्येव ॥ लोभेन उपहतं लोभोपहतं चेतः मनः येषां ते लोभेन उपहतः लोभोपहतः तस्मिन् चेतः येषां ते तादृशाः सन्तः कुलक्षयकृतं दोषं मित्रद्रोहे पातकं च न पश्यन्ति नानुसन्दधते ॥ ३८ ॥

एते दुर्योधनादयः भीष्मादयश्च युत्थेन संभाव्यमानं कुलनाशकृतं दोषं मित्रद्रोहे पातकं च जानन्त्येव ॥ तथाऽपि इदानीं दुर्योधनादयः लोभेन राज्याभिलाषेण भीष्मादयस्तु लोभेन दुर्योधनस्य राज्यलाभो यथास्यात्तथा करणीयं इत्याभिलाषेणविदूषितमनसः सन्तः तदुभयं[1] नानुसन्दधते ॥ भीष्मादयः लोभेन उपहतो दुर्योधनः तस्मिन् चेतः येषां ते तादृशाः इति वा ॥ अतः एते न युत्थान्निवर्तन्ते ॥ ३८ ॥

कृष्णः ॥ दुर्योधनादय इव तदीया इव च यूयं भवदीयाश्च लोभोपहतचेतस एव ॥ यूयं लोभेन उपहतं चेतः येषां ते तादृशाः ॥ भवदीयास्तु लोभेन उपहताः

१. वक्ष्यते च ॥ 'संमोहात्स्मृति विभ्रमः' ॥ इति (२. ६३.)

पाण्डवाः तेषु चेतः येषां ते तादृशाः ॥ अन्यथा माऽस्तु युद्धमिति प्रागेव प्रतिषिद्धं स्यात् ॥ लोभोपहतचेतस्त्वेन युद्धे प्रवृत्य किमेवमकाण्डे प्रलपसि ॥ ब्रूहि ॥

अर्जुनः ॥ कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुम् ॥
कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन ॥ ३९ ॥

कथमिति ॥ हे जनार्दन कृष्ण कुलस्य क्षयः कुलक्षयः तेन कृतः कुलक्षयकृतः तं दोषं प्र सम्यक् पश्यन्तो जानंतः प्रपश्यन्तः तैः अस्माभिः अस्मात् पापात् निवर्तितुं कथं न ज्ञेयम् ॥ ३९ ॥

१ कुलक्षयकृतं दोषं सम्यक् पश्यामो वयं सम्यक् जानद्भिः त्वां सर्वदा सर्वथा संश्रितैरस्माभिः अस्मात् युद्धरूपात् पापात् निवर्तितव्यम् हि । कथं निवर्तितुं न ज्ञेयम् ॥ आलोच्य निवर्तितुं प्रयतनीयमिति यावत् ॥ यद्येवं तर्हि कुतो प्रावर्तिढं इति चेत् त्वदुक्तरीत्या वयमस्मदीयाश्च लोभोपहतचेतसः अत एव २ युद्धे प्रावर्तिष्महि ॥ तथाऽपि न कुलनाशपर्यन्तमस्माभिस्तैरिवाविवेकेन स्थातव्यम् ॥ तथासति ३ त्वच्चरणैकशरणानां अस्माकं अस्मदीयानां च त्वच्चरणविमुखेभ्यस्तेभ्यस्तदीयेभ्यश्च को विशेषः ॥ अतः युद्धान्निवर्तितव्यमेव ॥ सर्वप्राणिसाधारणेन लोभेन युद्धेप्रवृत्तानामप्यस्माकं त्वत्सन्निधानमाहिम्ना त्वदनुग्रहमहिम्ना च बुद्धिः शुध्यति॥ अतो दोषमनुसन्दध्मः ॥ अतो युद्धान्निवर्तन माशास्महे ॥ ४ भक्तजनानां अपुनर्भवं साधयतस्तव त्वच्चरणैकशरणानामस्माकं नरकसाधने नानायोनिषु पुनःपुनर्जननसाधने च युद्धे प्रवर्तनं अनुचितम् ॥ अतो दयस्व ॥ ३९ ॥

कृष्णः ॥ कोऽसौ कुलक्षयकृतो दोषः ॥ यमेते नानुसन्दधते॥ अनुसन्धध्वं च यूयम् ॥ तं विविच्य ब्रूहि ॥

अर्जुनः ॥ कुलक्षये प्रणश्यन्ति कुलधर्मास्सनातनाः ॥
धर्मे नष्टे कुलं कृत्स्नमधर्मोऽभिभवत्युत ॥ ४० ॥

१. उपलक्षणया मित्रद्रोहे पातकञ्च ॥ २. इदं निवर्तितमित्यनेन लभ्यते ॥ ३. अस्माभिरिति गौरवसूचकबहुवचनादिदम् ॥ ४. जनं जननं अर्दयति नाशयतीति जनार्दनः इति निरुच्यमानजनार्दनपदलब्धमिदम् ॥

अधर्माभिभवात्कृष्ण प्रदुष्यन्ति कुलस्त्रियः ॥
स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसंकरः ॥ ४१ ॥

सङ्करो नरकायैव कुलघ्नानां कुलस्य च ॥
पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः ॥ ४२ ॥

दोषैरेतैः कुलघ्नानां वर्णसङ्करकारकैः ॥
उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः ॥ ४३ ॥

उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन ॥
नरके नियतं वासो भवतीत्यनुशुश्रुम ॥ ४४ ॥

कुलक्षय इति ॥ कुलस्य क्षयः कुलक्षयः तस्मिन् कुलक्षये सति सना चिरं भवाः सनातनाः कुलस्य धर्माः कुलधर्माः प्र अधिकं नश्यन्ति नाशं प्राप्नुवन्ति ॥ धर्मे नष्टे नाशं प्राप्ते सति कृत्स्नं सर्वं उत अपि कुलं कृत्स्नं कुलमपि इति वा धर्मस्याभावः अधर्मः न धर्मः अधर्मः स च अभिभवति आक्रम्य निन्दितं करोति ॥ ४० ॥

अधर्मेति ॥ हे कृष्ण अधर्मेण अभिभवः अधर्माभिभवः तस्मात् कुलस्य स्त्रियः कुलस्त्रियः प्र अधिकं दुष्यन्ति दोषयुक्ता भवन्ति॥ हे वार्ष्णेय वृष्णयो यादवाः तत्कुलोद्भव कृष्ण स्त्रीषु दुष्टासु सतीषु वर्णस्य जातेः सङ्करः जात्यन्तरमेलनं जायते ॥ ४१ ॥

सङ्कर इति॥ सङ्करः, कुलस्य कुलं घ्नन्तीति कुलघ्नाः तेषां च नरकाय भवत्येव॥ एषां कुलस्य कुलघ्नानां च पितरः पिण्डश्च उदकं च पिण्डोदके पिण्डोदकयोः क्रिया पिण्डोदकक्रिया लुप्ता पिण्डोदकक्रिया येषां ते लुप्तपिण्डोदकक्रियाः सन्तः पतन्ति ॥ हि प्रसिद्धम् ॥ ४२ ॥

दोषैरिति ॥ वर्णस्य सङ्करः वर्णसङ्करः तस्य कारकाः वर्णसङ्करकारकाः तैः एतैः कुलं घ्नन्तीति कुलघ्नाः तेषां कलघ्नानां दोषैः शश्वत् चिरकालं भवाः शाश्वताः जातेः धर्माः जातिधर्माः कलस्य धर्माः कुलधर्माश्च उत्साद्यन्ते नाश्यन्ते ॥ ४३ ॥

उत्सन्नेति ॥ हे जनार्दन कृष्ण उत्सन्नाः कुलधर्मा यैः ते उत्सन्नाः कुलधर्माः येषां ते च उत्सन्नकुलधर्माः तेषां उत्सन्नकुलधर्माणां मनुष्याणा नरके वासः नियतं नियमेन भवति ॥ इति अनुशुश्रुम श्रुतवन्तः ॥ ४४ ॥

प्रायशोऽत्राखिलजगतीतलनिवासिनो राजानो राजपुत्राश्च युत्धार्थमागता वर्तन्ते ॥ यदि युत्धं क्रियेत तर्हि युत्धे सर्वेऽपि म्रियेरन् ॥ मृतेषु च तेषु तत्तत्कुले प्रवर्तकानां नियामकानां चाभावात् परंपराप्राप्ताः कुलधर्माः नश्येयुः ॥ तदा अधर्मे प्रवर्तेरन्नखिलाः पुमांसः स्त्रियश्च तत्तत्कुलस्थाः ॥ इति सुमहाननर्थोद्भेदः ॥ कुत इति चेत् तत्तत्कुलनियामकानां युत्धे नाशे सति तत्तत्कुलं क्षीयते ॥ कुलक्षये सति परंपराप्राप्ताः कुलधर्माः निश्शेषं नश्यन्ति॥ कुलधर्मे नाशं प्राप्ते [1]कृत्स्नमपि तत्कुलं अधर्मः धर्माभावः धर्मविरुत्धं पापं च अभिभवति स्वयमुत्पद्य कुलमाक्रम्य गर्हितं करोति ॥ अत उक्तरीत्या अनर्थोद्भेदः ॥ ४० ॥

यदि सनातनं कुलधर्मं विहाय पापे प्रवर्तेरन् तर्हि तत्तत्कुलस्थाः स्त्रियः अधिकं दुष्येयुः ॥ कुत इति चेत् अधर्मेण कुलस्याभिभवे स्त्रियो बलवता दोषेण युक्ता भवन्ति ॥ स्त्रीणां बलवान् दोषो व्यभिचारः ॥ लोके हि स्त्रियः श्वशुरात् पत्युः देवरादिभ्यः परिजनाच्च भिया तदुपरोधेन च व्यभिचारौपयिकोचितदेशकालालाभेन चैव साध्व्यो दृश्यन्ते ॥ अतः यद्युपरोधकाः श्वशुरादयो न स्युः तर्हि स्त्रियो निर्निरोधं व्यभिचारे प्रवर्तेरन् ॥ [2]निसर्गश्चायं स्त्रीणां ॥ कथमुच्यते निसर्गश्चायं स्त्रीणां इति इति चेत् प्रायः स्त्रीणामेवंविधत्वादेवमुक्तम् ॥ अत एव दृश्यमानस्य पितुः अयं पिता वा न वा इति संशयग्रस्तत्वात् निषेकुः पितुर्निश्चेतुमशक्यत्वात् वयं यजामह इत्यर्थे [3]'ये यजामहे' इति श्रुतिः॥ [4]योऽहमस्मि स सन् यजे॥ यस्यास्मि न तमन्तरेमि ॥ इति च ॥ दुष्यन्ति चेत् दुष्यन्तु का हानिस्तेन इति चेत् स्त्रीषु दुष्टासु सतीषु ब्राह्म-

१. उतशब्दोऽप्यर्थे ॥ कुलक्षय एव प्रणश्यन्त्येव कुलधर्मा एव नष्ट एव अधर्म एव अभिभवत्येव इति एवार्थकस्य तस्य तत्रतत्रान्वयो वा ॥ २. अत्र 'अनर्थित्वान्मनुष्याणां भयात्परिजनस्य च ॥ मयादायाममर्यादाः स्त्रियस्तिष्ठन्ति भर्तृषु ॥ अलाभात्पुरुषाणां हि भयात्परिजनस्य च ॥ वधबन्धभयाच्चापि स्वयं गुप्ता भवन्ति ताः' इति (भार अनु. ३८ अ.) श्लोकावनुसन्धेयौ ॥ ३. तै सं. १. ६. ११. ॥ ४. तै. ब्रा. ३. ७. ५. ॥

णादि वर्णानां परस्परं मेलनं जायेत ॥ कुत इति चेत् लोके स्त्रीणां व्यभिचारदोषेण वर्णसङ्करो जायते ॥ अतः सङ्करो जायेत ॥ स्वैरं प्रवृत्तानां स्त्रीणां व्यभिचारे जाति-भेदनियमाभावात् स्त्रीपुंसजातिव्यत्यासेन ब्राह्मणादिजातेः क्षत्रियजातेश्च मिथः साङ्कर्यं जायेत ॥ अशनिपातोऽयं क्षत्रियजाते· यदेवं जात्यन्तरसाङ्कर्येणस्वयमशुद्धं भवति ॥ त्वं वृष्णिकुलजातोऽसि यदि त्वदीये कुले सङ्करो जायेत तर्हि तत्किं त्वं सहेथाः ॥ कुरूणां वृष्णीनां च परस्परं संबन्धितया कुरुकुलसाङ्कर्यं वृष्णिकुलजातस्य तव किमिष्टं स्यात् ॥ जायतां नामैवं वर्णसङ्कर· ॥ व्यभिचारे प्रवृत्तानां स्त्रीणां का हानिस्तेन इति चेत् सर्वसाक्षित्वेन सर्वं जानन् त्वं तदीयपापकर्मानुसारेण नरके पातयेः ॥ पुण्यपापे सदसतां ज्ञात्वा तदनुसारेण स्वर्गनरकौ प्रति तेषामाकर्षणात् कृष्णोऽसि ॥ कर्षणशक्तिमत्वाद्युध्ये प्रवृत्तानामस्माकं यूयादपकर्षणं कुरु ॥ ४१ ॥

॥यतां नाम वर्णसङ्करः यस्मिन् कुले स जातः तस्य कुलस्य हि स बाधकः किं तेन युष्माक इति चेत् वर्णसङ्करो जातः कुलस्यैव कुलघ्नानां च नरकाय भवत्येव ॥ प्रवर्ततां नाम युद्धं कुलक्षयकारिणि युद्धे प्रवृत्य कुलघ्ना भूत्वा नरके पतथ चेत् पतत कुलं तत् पततिं चेत् पततु इति चेत् न केवलं कुलस्य कुलघ्नानामेव च नरक-पातः किंतु तत्पितृणामेतत्पितृणामपि ॥ कुलघ्नानां कुलस्थानां च पितरोऽपि लुप्तपिण्डोदकक्रियाः सन्तः पतन्ति ॥ पिण्डोदकयोः क्रिया च तेषां लुप्यते ॥ कुलपितृणां कर्तुरभावात् तल्लोप ॥ कुलघ्नपितृणां तु कर्तृसत्वेऽपि कर्तृणां कुलघ्नतया पतितत्वेन पिण्डोदकक्रियाकरणानर्हत्वात् तल्लोपः इति विवेकः ॥ प्राप्तेत्थमिदं पुराणादौ ॥ अतः पितृणां पातभयाद्युध्यादुपरम्यते ॥ ४२ ॥

न केवलमेतावदेव किंतु वर्णसङ्करस्य हेतुभूतैः कुलघ्नानाम् एतैः उक्तैः दोषैः कुलनाशनधर्मनाशनाधर्मप्रवर्तनादिभिः चिरकालभवाः वर्णप्रयुक्ताः साधारण-धर्माः तत्तद्वंशतत्तद्गृहसाधारणधर्माः ततदाश्रमधर्माश्च नाश्यन्ते ॥ ४३ ॥

येषां कुलधर्मा जातिधर्माश्च नाशिताः यैस्ते नाशिताः तेषां कुलस्थानां कुलघ्नानां च मनुष्याणां रौरवादौ नरके वासः नियमेन भवति ॥ किमहो नरके नियतं वासो

भवतीति विहाय सांध्वसमसंशयमुच्यते किं त्वं सर्वज्ञः इति चेत् इत्यनुशुश्रुम ॥ किमहं जाने मन्दबुद्धिः ॥ भवादृशानां महतां मुखाच्छ्रुतोऽयमर्थः ॥ उक्तानर्थपरंपरैव कुलक्षयकृतो दोषः ॥ एतमेते नानुसन्दधते ॥ अनुसन्दध्महे च वयम् ॥ अतोऽस्माभिर्युत्थान्निवर्तितव्यम् ॥ अतः सर्वैः स्वस्वकार्यनिर्वर्तनाय याच्यमानं त्वामहं याचे ॥ मयि सति कथं तव नरकपातः संभवेदिति चेत् त्वमेव हि शास्ता पापिनो जनान् नरकयातनाभिरर्दयसि ॥ अतो नरकपातभिया माऽस्तु युत्थमिति त्वामहमर्थयामि ॥ ४४ ॥

कृष्णः ॥ लोभोपहतचेतस्कतया त इव वयमपि युत्धे प्रावर्तिष्महि ॥ तथाऽपि त्वदीयतया आन्तमगत्वा निवर्तनमुचितमित्युक्तं त्वया ॥ महदिदमद्भुतं मम भाति ॥ यद्येवं तर्हि विनैव युत्धकथां वर्तितव्यं शान्तिपथे ॥ प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरं इति हि न्यायः ॥ युत्धचिकीर्षया समाक्षौहिणीमितां सेनां मेलयित्वा मामप्यानीय मां सारथीकृत्य स्वयमपि रथी भूत्वा शंखपूरणादिना युत्धचिकीर्षां प्रकाश्य सहसा युत्धान्निवृत्त्यर्थनमनुचितम ॥ पूर्वापरविरुत्धं हीदम् ॥ अतो महदद्भुतम् ॥ किं ब्रवीषि ॥

अर्जुनः ॥ अहो बत महत्पापं कर्तुं व्यवसिता वयम् ॥
यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः ॥ ४५ ॥

अहो इति ॥ यत् यस्मात् राज्यस्य सुखं राज्यसुखं तस्मिन् लोभः राज्यसुखलोभः तेन वयं स्वस्य जनः स्वश्चासौ जनश्च वा स्वजनः तं हन्तुं उद्यताः उद्यमं कृतवन्तः ॥ तस्मात् महत् पापं कर्तुं व्यवसिताः निश्चितवन्तः॥ अहो आश्चर्यम बत कष्टम् ॥४५॥

राज्यसुखलोभेन स्वजनं हंतुं प्रवृत्ता वयम् ॥ अतः महत्पापं कर्तुं कृतनिश्चयाः वयम् आश्चर्यमिदम् ॥ अस्माभिः वयं इति बहुवचननिर्देशसूचितत्वदीयतातिशयरूपविशेषवतामप्यस्माकं एतावत्पर्यन्तमीदृशी प्रवृत्तिरुदितेति ममाप्याश्चर्यमुत्पद्यते ॥ किमहो ममाद्भुतं भातीति मयोक्ते ममाप्यद्भुतं भातीति परिहसासि माम् ॥ कारणं हि युत्धप्रवृतौ वाच्यं त्वया इति चेत् बत कष्टम् ॥ कष्टकालत्वात् त्वदीयानामप्यस्माकं तदानीं द्यूत इवेदानीं युत्धे प्रवृत्तिरुदपद्यत ॥ त्वं किं कुर्याः अस्मदीयकालकर्मानु-

सारेण त्वं प्रेरयसि ॥ न ते तावता दोषगन्धोऽपि ॥ न हि ते स्वः परः इति १ भेदबुद्धिः ॥ ४६ ॥

कृष्णः ॥ २ 'एतान्न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन' ॥ इति तव युद्धान्निवृत्तिरुक्ता ॥ ३ 'यद्यप्येते न पश्यन्ति लोभोपहतचेतसः' ॥ इति प्रतिपक्षाणां युद्धादनिवृत्तिरुक्ता ॥ सति चैवं निवृत्ते युद्धात् त्वां युद्धादनिवृत्तास्ते हन्युः किं करोषि ॥

अर्जुनः ॥ यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः ॥
धार्तराष्ट्रा रणे हन्युः तन्मे क्षेमतरं भवेत् ॥ ४६ ॥

यदीति ॥ धृतराष्ट्रस्य अपत्यानि संबन्धिनश्च धार्तराष्ट्राः शस्त्रं पाणौ येषां ते शस्त्रपाणयः सन्तः न विद्यते प्रतीकारो यस्य सः अप्रतीकारः तं अप्रतीकारं न विद्यन्ते शस्त्राणि यस्य सः अशस्त्रः तं अशस्त्रम् ॥ मां रणे हन्युर्यदि तत् मे मम अत्यन्तं क्षेमं क्षेमतरं भवेत् ॥ ४६ ॥

प्रतीकारमकुर्वाणं त्यक्तशस्त्रं मां धार्तराष्ट्राः शस्त्रपाणयः सन्तो यदि युद्धे हन्युः तर्हि घ्नंतु न तेन मम हानिः ॥ किंतु तत् तथा हननं मे क्षेमतरं भवेत् ॥ बन्धुनाशजन्यपापस्य तज्जन्यदुःखस्य चाभावात् ४ शत्रुभिर्युद्धे शस्त्रैर्हतस्य परलोकस्मरणेन सद्गतिसंभवाच्च अत्यन्तहितं हि तत् ॥ अतएव तदिष्टं मम ॥ युद्धा कांश्चित् हत्वा मरणं क्षेमं तत् परहिंसादोषसहितत्वादवरम् ॥ अकृत्वैव युद्धं मरणं परहिंसा दोषसस्यशाभावात् क्षेमतरम् ॥ अतस्तन्नितरां वरम् ॥ कुलनाशनादिपातकराहित्येन

१ अतएव वक्ष्यते ॥ 'ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् ॥ मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः' ॥ इति (४. ११) 'न वै स्वपक्षोऽस्य विपक्ष एव वा' इति (भाग. ४. ११.)॥ 'नह्यस्यातिप्रियः कश्चित् नाप्रियः स्वः परोऽपि वा' ॥ इति (भाग. ६. १६.) ॥ २. १. ३५. ३. १. ३७ ४. अत्र, 'तस्य शस्त्राणि यावन्ति त्वचं भिन्दन्ति संयुगे ॥ तावतः सोऽश्नुते लोकान् सर्वकामदुहोऽक्षयान् ॥ यदस्य रुधिरं गात्रादाहवे संप्रवर्तते ॥ सह तेनैव पापेन सर्वपापैः प्रमुच्यते' इति, 'अविक्षतेन देहेन प्रलयं योऽधिगच्छति ॥ क्षत्रियो नास्य तत्कर्म प्रशंसन्ति पुराविदः' ॥ इति, तीक्ष्णैः शस्त्रैरभिक्लिष्टः क्षत्रियो मृत्युमर्हति' ॥ इति च (भार. शां ९७.) 'शस्त्रपूता दिवं गताः' इति तत्रैव (२९.) श्लोका अनुसन्धेयाः ॥

पूर्वकृतपुण्यक्षत्यभावः क्षेमः क्षेमस्तु स्थितरक्षणं' इति हि स्मरन्ति ॥ परलोकगति-सद्भावात्तु स क्षेमतरः ॥ अशस्त्रभिर्मरणं शत्रुभिर्गृहादौ मरणं रणे भयादिना मरणं चाश्रेयस्करम् ॥ शत्रभिः रणे शस्त्रैः मरणं तु निश्रेयसकरम् ॥ अतो हन्ति चेत् घ्नन्तु ॥ इतीदं विषीदन्नब्रवीदिति १पूर्वेण संबन्धः॥ ४७ ॥

धृतराष्ट्रः ॥ कुरुक्षेत्रे समवताः किमकुर्वतेति पृष्टस्त्व उभयसेनासमवत-सकलकौरवपाण्डवतदीययोधविविधयुद्धाडंबरं अर्जुनस्य विषादं चोक्तवानसि ॥ ततः किमासीत् ॥ वद ॥

सञ्जय उवाच ॥

एवमुक्त्वार्जुनः सङ्ख्ये रथोपस्थ उपाविशत् ॥
विसृज्य सशरं चापं शोकसंविग्नमानसः ॥ ४७ ॥

एवमिति ॥ अर्जुन सङ्ख्ये युद्धे एवं उक्त्वा शोकेन संविग्नं भीतं चलितं वा मानसं यस्य सः शोकसंविग्नमानसः शरेण सह वर्तत इति सशरः तं सशरं चापं विसृज्य रथस्य उपस्थः मध्यप्रदेशः रथोपस्थः तस्मिन् रथोपस्थे उपाविशत् उपविष्टो ऽभूत ॥ ४७ ॥

अर्जुनः ॥ उक्त्वेत्या भगवन्तमुक्त्वा, यदि हस्ते सशरः चापः स्यान् यदि चाहं रथे सारथेः समीपे उपविष्टः स्यां तर्हि कृष्णोऽयं पुनःपुनः मां युध्यस्व युध्यस्वेति युद्धे प्रेरयेत् पुनःपुनः प्रेरणे मम युद्धे प्रवृत्तिरुत्पद्येत तच्च ममानिष्टं अत एवं कार्यं इत्यालोच्य सशरं चापं त्यक्त्वा शोकेन भीतचेताः कंपितमानसश्च अत्यर्थंचलितयुद्धाध्यवसायश्च सन रथस्य मध्यदेशे उपाविशत् ॥ सारथिं प्रति समये वक्तव्यं वक्तुम् परसैन्यं तदाडंबरं च द्रष्टुं सारथेः समीपे उपविष्टोऽयमर्जुनः तत् रथिनः स्थानं विहाय विवाहादावुत्सवे रथमारोपितो जामातेव रथस्य मध्यदेशे उपाविष्टो ऽभूत ॥ इति धृतराष्ट्रं सञ्जय उवाच ॥ ४७ ॥

---

१. १ २८.

इति [1]श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे कृष्णार्जुनसंवादे अर्जुनविषादयोगोनाम प्रथमोऽध्यायः ॥ १ ॥ ओं तत् सत् ॥

इतीति॥ श्रीः अस्यास्तीति श्रीमान् श्रीमांश्चासौ भगवांश्च श्रीमद्भगवान् श्रीमद्भगवता गीतासु ललितैः महितैः इष्टैः पुष्टैः शब्दैः उपदिष्टासु उपनिषत्सु तद्रूपे ब्रह्मणः परब्रह्मणः विद्या ब्रह्मविद्या तस्यां ब्रह्मविद्यारूपे योगानां कर्मयोगादीनां शास्त्रं विधायकं योगशास्त्रं तस्मिन् योगशास्त्रे कृष्णश्च अर्जुनश्च कृष्णार्जुनौ तयोः संवादः प्रश्नोत्तररूपो वादः कृष्णार्जुनसंवादः तस्मिन् कृष्णार्जुनसंवादे तद्रूपे अस्मिन् गीताशास्त्रे विषादस्य योगः संबन्धः विषादयोगः अर्जुनस्य विषादयोगः यस्मिन्सः अर्जुनविषादयोगः इति नाम प्रसिद्धः प्रथमः अध्यायः इति समाप्तः ॥

इति श्रीमद्भगवद्गीतोपन्यासदर्पणे लक्ष्मणाचार्यविरचिते अर्जुनविषादयोगाध्यायार्थप्रदर्शकः प्रथमः प्रतिबिंबः ॥ १ ॥ ओं तत् सत् ॥

---

१ भगवद्गीतामूलभूतोपनिषदां आनन्त्याद्बहुवचनम् ॥

॥ श्रीगुरुभ्योनमः ॥

॥ अथ द्वितीयोध्यायः ॥

धृतराष्ट्रः ॥ [१] 'सीदन्ति मम गात्राणी'त्यादिना उक्तविधया परमशोकाकुलतां पार्थस्य दृष्ट्वा किं श्रीकृष्णो माऽस्तु युध्यमिति युध्यादुपरममेवान्वमोदत उत विविधमुपन्यस्य समाधाय चार्जुनं युध्ये प्रावर्तयत् ॥ वद ॥

[२] **सञ्जय उवाच ॥**

तं तथा कृपयाऽऽविष्टमश्रुपूर्णाकुलेक्षणम् ॥
विषीदन्तमिदं वाक्यमुवाच मधुसूदनः ॥ १ ॥

तमिति ॥ मधुसूदनः कृष्णः, तथा कृपया आविष्टं अश्रुभिः नेत्रजलैः पूर्णे अश्रुपूर्णे च ते आकुले च अश्रुपूर्णाकुले ईक्षणे लोचने यस्य सः अश्रुपूर्णाकुलेक्षणः तं विषीदन्तं तं अर्जुनं इदं वाक्यं उवाच ॥ १ ॥

श्रीकृष्णप्रेरणया पार्थोयुध्यान्निवृत्तिं कुर्वाणः सशरं चापं त्यक्त्वा रथोपस्थे उपाविशत् ॥ कृष्णस्तु भूभारपरिहारार्थमवतीर्णत्वेन तामननुमोदमानः तं युध्ये प्रवर्तयितुं किमप्युवाच ॥ कुतो रथोपस्थे उपाविशदिति चेत् तथा कृपया आविष्टः कृपया तथा आविष्ट इति वा अत एव विषादं प्राप्तः अत एव रथोपस्थे उपविष्टः ॥ उपविश्य च तत्र रोदिति ॥ अश्रुभिः पूरितत्वात्तस्याक्षिणी आकुले जाते ॥ यदि युध्यं क्रियेत तर्हि नियतं म्रियेरन्निमे भीष्मद्रोणादयः अत एतानेकदा सम्यगापादमस्तकं दृग्भ्यामवलोकयेयमिति तान् द्रष्टुं प्रवृत्तोऽर्जुनः न शक्नोति द्रष्टुम् कुत इति चेत् तस्याक्षिणी अश्रुभिः पूर्णत्वात् स्वग्राह्यरूपग्रहणासमर्थे जाते अतो द्रष्टुं न शक्यते ॥ कुतस्तथा ॥ विषीदति हि सः ॥ विषीदति कुतः ॥ तथा कृपया आविष्टः ॥ यथा

१. १. २९. २. यद्यपि 'एवमुक्त्वे'ति पूर्वाध्यायांतिमश्लोकोक्तसञ्जयवाक्यस्य वाक्यान्तरेणाविच्छेदादिदमनावश्यकम् ॥ तथाऽपि अध्यायान्तरप्रारंभादन्यवाक्यत्वशङ्काऽपनोदायेदमिति बोध्यम् ॥

भूहस्तादिसंज्ञाभिर्युद्धे प्रवर्तयितुं न शक्यः किंतु विविधमान्तमुपन्यस्यैव १तथा कृपया आविष्टः ॥ अत एव वचनमुवाच ॥ विषीदन्तमुवाचेति वर्तमाननिर्देशेन २ 'विषीदन्निदमब्रवी 'दित्युपक्षिप्तो विषादो नापगतः किंतु इदानीमपि वर्तते इति विषादानुवृत्तिस्सूच्यते ॥ कुतः कृष्णो युद्धान्निवृत्तिमर्जुनस्य नान्वमोदतेति चेत् मधुसूदनो हि सः मधुमुखसकलदुष्टनिरसनशीलत्वाद्दुष्टजननिरसनार्थं युद्धे तं प्रवर्तयितुमुवाच ॥ दुर्योधनादीनां स्वकीयत्वात्कथं तन्नाशने प्रवृत्तिः इति चेत् मधुसूदनो हि सः ॥ भूभारपरिहाराय स्वकीयमपि मधुनामकयादवकुलोत्पन्नानां वृन्दं संहरिष्यन् सः भूभारायमाणानां दुर्योधनादीनां स्थितिं किमनुमन्येत ॥ 'अश्रुपूर्णाकुलेक्षणं' इत्यत्र अश्रपूर्णाकुले अक्षणं इति छेदः ॥ अश्रपूर्णे अतः आकुले कलुषे रथोपस्थे विषीदन्तं अक्षणं न विद्यते क्षणः हर्षः यस्य तं निरानन्दं तं इति वा ॥ अनेन यथा रथोपस्थोऽश्रुभिः पूर्णः कलुषः स्यात् तथाऽश्रूणि प्रवहन्तीति धारावाहित्वमश्रूणां प्रतीयते ॥ तेन च विषादातिशयः सूच्यते ॥ अक्षणमित्यनेन चिरकालाभिलषितस्य युद्धस्य प्रारंभात् सङ्कल्पमात्रेण सकलप्रपञ्चनिग्रहानुग्रहशक्तस्य श्रीकृष्णस्य सारथ्यकरणोररीकरणाच्च नितरां सन्तोषयुद्धे तदभावानुभवादहो महिमा मोहस्येति सूच्यते ॥ उदैदर्जुनस्यापि कृपा ॥ करुणावरुणालयस्य भगवतः कृष्णस्य कृपा कुतो नोदैत् इति चेत् अकृपया इति छेदः॥ अर्जुनः, कृपायाः पात्रापात्रविवेकराहित्येन कृपाऽनर्हेषु कृपां कुर्वन् विषीदति ॥ श्रीकृष्णस्तु सर्वज्ञत्वात् कृपाया अनर्हा इमे इति निश्चित्य अकृपया कृपाऽभावेन संहारयितुमरीन् तत्पक्षपातिनश्च वक्ष्यमाणमुवाच । मोहावेशपरवशतयाऽयंरोदिति गच्छतु जालमः किं ममेति कृष्णः कुतो नार्जुनमुपैक्षिष्ट इति चेत् तथा आविष्टं तं कृपया उवाच ॥ स्वकीयकृपापात्रत्वादुपेक्षामकृत्वा तमुत्थर्तुमुवाच ॥ अकृपया अकृपार्थं इत्यर्थः ॥ अध्ययनेन वसतीति वत् ॥ कृपानर्हेषु जातां अर्जुनस्य कृपां व्यपोहितुमुवाच ॥ यदि सर्वात्मना युद्धादुपरमेत तर्हि स्वधर्महानात् भगवत्कृपापात्रं न स्यात् अतः स्वधर्मं युद्धमनुष्ठाप्य ३ भगवत्कृपापात्रतामापादयितुमुवाच ॥ इत्या-

१. तथा कृपया इत्येकं पदम् ॥ तादृश्या कृपया इत्यर्थः॥ इति केचित् ॥ २ १. २८. ३. अस्य भगवतः कृपा अकृपा तस्यै तां उत्पादयितुं इत्यर्थः ॥ 'क्रियार्थोपपदस्य कर्मणि स्थानिनः '॥ इति (२. ३. १४.) सूत्रेण तुमुन्प्रत्ययान्तक्रियायाः कर्मणि चतुर्थी ॥

दिकमूह्यम् ॥ अत्र तथाशब्दस्य तथा कृपया तथा आविष्टं तथा अश्रुपूर्णाकुलेक्षणं तथा विषीदन्तं तथा वाक्यं तथा उवाचेत्यन्वयभेदकल्पनादनेके विशेषा ऊह्याः ॥ १ ॥

कृष्णः ॥ कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् ॥
अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन ॥ २ ॥

कुत इति ॥ हे अर्जुन आर्यैः जुष्टं सेवितं आर्यजुष्टं न आर्यजुष्टं न आर्याः अनार्याः तैः जुष्टं च अनार्यजुष्टं स्वर्गाय हितं न स्वर्गः अस्वर्गः नरकः तस्मै इदं च अस्वर्ग्यं कीर्तिं करोतीति कीर्तिकरं न कीर्तिकरं अकीर्तिं करोतीति च अकीर्तिकरं एतादृशं कश्मलं मोहः कुतः कस्मात् विषमे सङ्कटे त्वा त्वां समुपस्थितं अतिशयेन प्राप्तम् ॥ २ ॥

कुतो हेतोस्त्वायमसमये सङ्कटे मोहः प्राप्तः ॥ नेदं युक्तं तव॥ मोक्षेच्छातः इति चेत् अनार्यजुष्टं आर्यैः[1] मुमुक्षुभिरसेवितं अनार्यैः सेवितं चेदम् । स्वर्गेच्छातः इति चेत् अस्वर्ग्यमिदं स्वर्गायेदं स्वर्ग्यं स्वर्गसाधनं न भवतीदम् ॥ न स्वर्गः अस्वर्गः स्वर्गविरुद्धो नरकः तस्मै इदं नरकप्रापकं चेदम् ॥ कीर्तीच्छातः इति चेत् अकीर्तिकरमिदं कीर्तिकरं नेदं किंतु अकीर्तिकरं च ॥ अस्वर्ग्यमिति अप्रत्यक्षबाधः अकीर्तिकरमिति प्रत्यक्षबाधः ॥ यद्यय अकरणीये करणीयतावुद्धिरूपः करणीये अकरणीयतावुद्धिरूपः अनात्मीये आत्मीयतावुद्धिरूपश्च मोहः युद्धारंभात्पूर्वमेव प्राप्तः स्यात् तर्हि वरं तव चायमसमये मोहः प्राप्तः ॥ अतो न युक्तः ॥ युद्धान्निवृत्तिरूपनिमित्तं कर्मकरणे 'पृथिव्यां चतुरन्तायां वर्णो मे दुर्लभः समः ॥ करोमि कर्म शुक्लं च तेन मामर्जुनं विदुः' ॥ इति(भार. वि. ४३ । त्वयोक्तं अर्जुनशब्दप्रवृत्तिनिमित्तं व्याहन्येत॥ ततः परमप्रसित्थमर्जुननाम तवापगच्छेत् ॥ महादिदमनिष्टम् ॥ परमशुद्धकर्मकारित्वात्ध्यर्जुनोऽसि॥ अत्र अर्जुनेति परमप्रसित्थतमतया संभावितत्व[2]मुक्त्वा अकीर्तिकरमित्युक्तया जायतां नामाकीर्तिः का हानिरिति न वक्तुं युक्तं संभावितस्य पुंसो मरणादप्यपकीर्तेरतिशयितदुःखावहत्वात् इति सूच्यते ॥ 'संभावितस्य पुंसो मरणादतिरिच्यते किलाकीर्तिः' इति हि वदन्ति ॥ २ ॥

१. आरात् दूरं याता बुद्धिः येषां ते आर्याः ज्ञानिनः २. वक्ष्यते च ॥ 'संभावितस्य चाकीर्तिर्मरणादतिरिच्यते' ॥ इति (१. ३४.) ॥

अर्जुनः ॥ उक्तरूपः अहंममेत्याद्यभिनिवेशरूपो मोहो विदुषामप्यपरिहार्यः भवदीयया बलवत्या मायया ॥ किं कार्यम् ॥ वद ॥

कृष्णः ॥ क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते ॥
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप ॥ ३ ॥

क्लैब्यमिति ॥ हे पार्थ क्लीबस्य भावः क्लैब्यं मा स्म गमः ॥ मा प्राप्नुहि ॥ एतत् त्वयि नोपपद्यते न युज्यते ॥ परान् शत्रून् तापयति इति परन्तपः हे परन्तप अर्जुन क्षुद्रं अल्पं दुर्बलस्य भावः दौर्बल्यं हृदयस्य दौर्बल्यं हृदयदौर्बल्यं तत् त्यक्त्वा उत्तिष्ठ ॥ ३ ॥

हे पार्थ त्वदुक्तरीत्या भवतु नामापरिहार्यो मोहः तथाऽपि विवेकेन तस्य दूरीकरणे प्रयतितव्यम् तत्कार्यभूतकार्पण्यादिदोषागमवकाशदानं तु सुतरामयुक्तम् ॥ त्वं क्लीबस्य नपुंसकस्य रीतिमाश्रितोऽसि ॥ क्लीबोऽधीरः क्लैब्यं अधैर्यं । तच्च मनोदौर्बल्यरूपं तदाश्रितोऽसि ॥ तत् त्वं मा स्म गमः ॥ एतत् क्लैब्याश्रयणं विदितराजधर्ममर्मणो प्रार्थितकर्मणो त्वयि न युज्यते ॥ मा एतत् इति छेदः ॥ त्वं मा पुरुषः पुरुषधर्मं धैर्यं आश्रितः सन् क्लैब्यं मा स्म गमः एतत् क्लैब्यानाश्रयणं त्वयि उपपद्यते ॥ गमः इत्यन्तर्णीतण्यर्थात् गमयेत्यर्थः ॥ क्लैब्यं मा गमय ॥ एतत् मम क्लीबताऽऽपादनं त्वयि नोपपद्यते ॥ यदि त्वं मया बोधितोऽपि युद्धं नाङ्गीकुर्याः तर्हि स्वपक्ष्याः परपक्ष्याश्च हन्तहन्त महतीयं कृष्णस्य क्लीबता यदर्जुनं बहुशो बोधयित्वाऽपि युद्धे प्रवर्तयितुं नाशकत् इति मयि क्लीबतामारोपयेयुः ता च क्लीबतां मा प्रापय ॥ नपुंसकत्वापरपर्यायक्लैब्यपदप्रयोगेण स्वर्गलोके उर्वशीशापलब्धं नपुंसकत्वं विराटनगरे वर्षमेकमनुभूय परित्यज्य तत् तुमुलरावरणीये युद्धे प्रवृत्य पुनरज्ञातवास इव तस्य क्लैब्यस्यापरीकरणं न यत्कं सूचयति वा तस्मै क्लैब्याय इति सूचयत ॥ यदि तूष्णीं युद्धात् उपरमसि मम वचनस्य कस्य वा नापलपनेन तव क्लैब्यं न नाशयितुं किंतु विवेकेन नपुंसकस्य दूरीकरणोचितम्॥ पृथग्जनबलादाहृतेन स्वजनवधजनितः तदपरिहार्यतामूलश्च त्वं तादृशस्य तव इत्थंक्लैब्याश्रयणमयुक्तम् ॥ त्वं यदयमनूत्तादृशमद्भुतमन्यायं च ॥ तर्हि किं कर्तव्यं मया ब्रूहि इति चेत् क्षुद्रं अल्पं अनीश्वराणादिकं विवेकेन दूरीकरणं च ननादौर्बल्यं क्लैब्यस्य-

ब्दितं त्यक्त्वा उत्तिष्ठ ॥ कुतः तत् त्यक्त्वा उत्थातव्यं इति चेत् 'अनार्यजुष्टमस्वर्ग्य-मकीर्तिकरमर्जुन'॥ इति पूर्वश्लोकोत्तरार्धमिहापि संबध्यते॥ तत् अनार्यजुष्टं अस्वर्ग्यं अकीर्तिकरं च अतः हे अर्जुन तत् त्यक्त्वा उत्तिष्ठ ॥ यस्मादेवं तस्मात् तत् त्वयि नोपपद्यते अतः त्वं तत् त्यक्त्वा उत्तिष्ठ इति वा ॥ उत्थानं उद्यमः ॥ युध्यसन्नत्थो भव भूभारपरिहारार्थमवतीर्णत्वात्तव भूभारपरिहारहेतोर्युद्धादुपरमोऽनिष्ट एव स्यात् अतः प्रवर्ततां नाम युध्यम् युध्यन्तां नाम भीमादयः बन्धुविनाशनिश्चयजनितशोकजेन विषादेन रुदन्तं मामनुजानीहि विहाय युध्यं सदनगमनाय इति चेत् तथा कर्तुं न युक्तम् कुतः इति चेत् त्वं परन्तपोऽसि ॥ किरातयुद्धेन निवातकवचयुद्धेन उत्तरगोग्रहणयुद्धेन च बहुशः परीक्षितपराक्रमे त्वय्येवायं भूभारपरिहारभारः समाहितः त्वय्युपरते युद्धमुपरतं अतस्त्वमुत्तिष्ठ॥ त्वमेवैतान् संहरेति वक्तुं न युक्तम् कौरवैस्सह मम युद्धप्रसक्तेरभावात् ॥ अतस्त्वयैवेमे युद्धे हन्तव्याः॥ युध्यसन्नत्थो भवेत्युक्तम् युध्यसन्नत्थेन मया किं कर्तव्यम् इति चेत् 'परं तप' परं तप इति च्छेदः ॥ परं १ दुर्योधनादीन् शत्रून् तप तापय ॥ युद्धमधर्मः कुतोऽधर्मे मां प्रेरयसि इति चेत् युद्धसमये परं परब्रह्मभूतं मां तप २स्मर ॥ मां स्मरन् तत्कर्म ब्रह्मणि ३ मय्याधाय युध्यस्व ॥ तथा कृतं कर्म न ४ बन्धाय किंतु ज्ञानद्वारा ५ मोक्षाय भवति ॥ ३ ॥

धृतराष्ट्रः ॥ एवं भगवता बोधितोऽर्जुनः किमकार्षीत् वद ॥

सञ्जयः ॥ अनाततायिस्वजनसमुदायसाहित्येन दुर्योधनादीनामहन्तव्यतया सर्वात्मना युद्धादुपरमस्य प्राशस्त्यमुक्तवान् त्यक्तवांश्च सशरं चापं विषीदन्नर्जुनः कृष्णेनैवं बोधितः भीष्मद्रोणादिपूज्यतमव्यतिरिक्तैः सर्वैर्युद्धमभ्युपेत्य भीष्मद्रोणादिभिर्युद्धमधर्मं मन्वानो भगवन्तमाह ॥

१. समुदायैकत्वविवक्षणादेकवचनम् ॥ २. वक्ष्यते च ॥ 'मामनुस्मर युध्य च' (८. ७.) इति ॥ ३. ब्रह्मण्याधाय कर्माणीति (५. १०. 'मयि सर्वाणि कर्माणी'ति (३. ३०) च वक्ष्यते ॥ ४ 'यस्य नाहं कृतो भावो बुद्धिर्यस्य न लिप्यते॥ हत्वाऽपि स इमान् लोकान् न हन्ति न निबध्यते' ॥ इति (१८. १७.) ॥ वक्ष्यते ॥ ५ 'असक्तो ह्याचरन् कर्म परमाप्नोति पूरुषः' ॥ (३. १९.) ॥ स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः' ॥ (१८ ४६)॥ 'ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः ॥ श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः' ॥ (३. ३१.) इत्यादि वक्ष्यते ॥

अर्जुन उवाच

कथं भीष्ममहं सङ्ख्ये द्रोणं च मधुसूदन ॥
इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन ॥ ४ ॥

कथमिति ॥ मधुं सूदयतीति मधुसूदनः अरीन् सूदयतीत्यरिसूदनः हे मधुसूदन अरिसूदन कृष्ण पूजायाः अर्हौ पूजार्हौ भीष्मं द्रोणं च अहं सङ्ख्ये युद्धे इषुभिः बाणैः कथं प्रतियोत्स्यामि प्रहरिष्यामि तौ प्रति प्रतियुद्धं करिष्यामि वा ॥ ४ ॥

त्वद्वचनाद्युद्धमभ्युपगच्छामि किंतु भीष्मद्रोणादिभिर्गुरुभिरहं युध्येय ॥ कुत इति चेत् १ ते हि पुष्पैः पूजार्हाः पूजार्हौ भीष्मं द्रोणं च युद्धे कथं प्रतियोत्स्यामि प्रहरिष्यामि ॥ तौ प्रति कथं प्रतियुद्धं करिष्यामि इति वा॥ गुरुत्वमहानुभावत्वादिना पूजार्हौ पितामहत्वधनुर्विद्याचार्यत्वाभ्यां तु सुतरां पूजार्हौ ॥ पुष्पैः पूजार्हाणां पूजाकरणमुचितं तदकरणमेवानुचितं किमुत मर्मभेदकैर्बाणैः प्रतियोधनम् ॥ 'गुरुं त्वंकृत्य हुंकृत्य नरो नरकमश्नुते' इत्यादिना गुरुषु निष्ठुरवाङ्मात्रमप्यनर्थावहं किमुत मर्मघातिभिर्बाणैः प्राणहरणम् ॥ भीष्ममित्यनेन स्वपितुः शन्तनोर्दाशराजकन्यायां योजनगन्धेः परिणयेन महामनस्सन्तोषादनाय माऽस्तु मम राज्ये सन्ततिरेकदा मम कलहायेत राज्यार्थमतः पाणिपीडनमेव मम माऽस्त्विति दारुणां प्रतिज्ञां कृत्वा भयङ्करप्रतिज्ञाश्रवणजनिताश्चर्यैर्देवैः २ भीष्मेति कृतनामधेयो महामहिमा महात्मा हि स इति सूचितम्॥ द्रोणमित्यनेन घृताचीदर्शनात् स्कन्नस्य भरद्वाजरेतसो द्रोणाख्यपात्रामत्रे धृतस्य ३ परिणामत्वादयोनिजो भरद्वाजपुत्रो महात्मा स इति सूचितम् ॥ अहमित्यनेन भीष्मेण पितामहेन अन्नपानादिना वर्धितो द्रोणाचार्येण धनुर्निगमपारदृश्वना तस्य परां काष्ठामवापितो विदितधर्मागममर्मा महाकुलीनोऽहं कथं तादृशौ तावेव

१. उपलक्षणया कृपाचार्यप्रभृतीनां ग्रहणम् ॥ २. 'ततोऽन्तरिक्षेऽप्सरसो देवाः सर्षिगणास्तदा ॥ अभ्यवर्षन्त कुसुमैर्भीष्मभीष्मेति चाब्रुवन्' ॥ इति (भार आदि. १००) वचनमनुसन्धेयम् ॥ ३. 'ददर्शाप्सरसं साक्षात् घृताचीमाप्लुतामृषिः ॥ तत्र संसक्तमनसो भरद्वाजस्य धीमतः ॥ तस्य रेतश्च चस्कन्द तद्दृषिर्द्रोण आदधे ॥ ततः समभवद्द्रोणः' इति (भार आदि १३०) वचनमनुसन्धेयम्॥

प्रतियोत्स्ये इति सूचितम् ॥ त्वं मधुसूदनोऽसि अतो दुष्टनिग्रहे मां प्रेरयसि ॥ सत्यं कर्तव्यं मयेव त्वयाऽपि प्रतिपक्षिपक्षशिक्षणं इति चेत् अरिसूदनः खल्वसि ॥ अरीणां मध्वादीनां हि संहर्ता त्वं न तु पूज्यानां सान्दीपन्यादीनाम् ॥ अतो ममाचार्यहननादौ प्रेरणं तवानुचितम्॥ कुतः सान्दीपन्यादीनां युद्धे हननप्रसक्तिरिति चेत् यदि द्रोणादय इव सान्दीपन्यादयो युद्धे परिपन्थिपथानुयायिनो युध्यसन्नत्था भवेयुः तर्हि त्वं किं तान् गुरव इति परित्यजेः उत संहरेः॥ अरीन् भक्तानां कामादीन् शत्रून् सूदयसि॥ भक्तजनकामादिदोषसूदनस्य तव दुष्टे आचार्यहननादौ मम प्रेरणमनुचितम् ॥ इति वा ॥ मधुसूदनस्त्वं कथमिति चेत् १ अरिणा चक्रेण अरीन् सूदयसि ॥ इति वा ॥ अलमेवं द्विःसंबोधनस्य गतिकल्पनेन ॥ समानार्थकयोः द्वयोः संबोधनपदयोः प्रयोगेण पार्थस्य पूर्वापरपरामर्शवैकल्यं सूच्यते ॥ तेन शोकमोहव्याकुलतायामतिशयः सूच्यते ॥ अतो २ न पुनरुक्तिदोषः ॥ किंतु शोकाकुलतायामतिशयसूचकतया प्रकृतार्थपुष्टिहेतुत्वाद्गुणः ॥ इति वा ॥ अतो न सङ्ख्ये गुरुभिर्युध्येय ॥ यदि गुरवो युद्धान्निवर्तेरन् तर्हि तदन्यैरमान्यैर्युद्धं करिष्यामि ॥ ४ ॥

कृष्णः ॥ भीष्मद्रोणोपलक्षितान् पूज्यतमानहत्वा हन्तव्यानां दुर्योधनादीनां हननं न शक्यम् ॥ तदकरणे च राज्याद्यप्राप्तेः कथं शरीरयात्रानिर्वाहो भवतां स्यात् अतो युध्यस्व भीष्मद्रोणादिभिर्गुरुभिरपि ॥ १ किं नो राज्येन गोविन्द किं भोगैर्जीवितेन वा ॥ इति शरीरयात्रानिर्वाहो माऽस्तु ममेत्येकमेव हि मया इति चेत् दुर्लभस्य चिरकालिकपुण्यलभ्यस्य ऐहिकामुष्मिकसकलश्रेयस्साधनस्य मानुषदेहस्य परमप्रशस्यतया तद्यात्रानिर्वाहो माऽस्तु इत्युक्तिरयुक्ता हि तव॥ अतः शरीरयात्रानिर्वाहार्थं युध्यस्व भीष्मादिभिरपि ॥

१ अरीणि अस्य सन्तीत्यर्थे चक्रम् ॥ २ सुभ्रूशब्दे संबोधने सुभ्रूः इति रूपं व्यवस्थाप्य तत्र कथं तर्हि 'हापितः कुक्षिं हे सुभ्रु' इति भट्टिः इति भट्टिक[illegible]मार्शङ्क्य प्रमाद एवायमिति वदन् अत भट्टोजिदीक्षितवाक्ये प्रगाद एवायमिति प्रतीकृत्य[illegible] प्रमादः कवेः [illegible] वन्हनशा[illegible]न्तापतप्तस्य रामस्य ॥ स च रामस्य प्रमादः [illegible] वन्हनशा[illegible]र्थहेतुत्वात्कथं न गुणः ॥ इत व्याख्यातं शब्देन्दुशेखरकृता मर्मज्ञसज्जनावमोदनम् ॥ तद्वदत्र पार्थस्य प्रमादः प्रकृतार्थपोषकत्वाद्गुणः इति बोध्यम् ॥

अर्जुन.॥ गुरूनहत्वा हि महानुभावान् श्रेयो भोक्तुं भैक्षमपीह लोके ॥ ४॥

गुरुनिति ॥ महान् अनभावः प्रभावः तेजो वा येषां ते महानुभावाः तान् गुरून अहत्वा इह लोके भिक्षाणां समूह भैक्षं तथाः इदं वा भैक्षं तदपि भोक्तुं श्रेयः प्रशस्यतरम् हि प्रसिद्धम ॥ ४॥ ॥

एतस्य शरीरस्य निर्वाहार्थं महानुभावान् गुरून् अहत्वा भैक्षं भिक्षाणां समूहः भिक्षया लब्धं वा भोक्तुं अस्मिन् लोके परमप्रशस्तम्॥ यद्यपि राज्ञां निषिद्धं तथापि तद्धोक्तुमुचितम् ॥ प्रबलदोषावहगुरुहननापेक्षया अनारोग्यावहत्वादस्य ॥ प्रसिद्धत्व मिदम ॥ अतो न प्रतियोत्स्यामि ॥ 'अकृत्वा परसन्तापं अगत्वा खलमन्दिरम् ॥ अक्लेशयित्वा चात्मानं यदल्पमपि तद्बहु' ॥ इति हि वदन्ति ॥ हिमहानुभावान् इत्येकं पदम्॥ हिमं हन्तीति हिमहः सूर्यः अग्निर्वा तस्य तेज इव तेजो येषां ते हिमहानुभावाः तादृशान् इति वा ॥ इह लोके इत्यनेन भैक्षाशनादकीर्तिरिह लोके जायतां नाम परलोके तु न काऽपि हानिरिति सूच्यते ॥ इह लोके एतच्छरीरानिमित्तं इत्यनेन विनाशिनोऽस्य परमजुगुप्सितस्य शरीरस्य कृते को विवेकी गुरुहननादिरूपं महत् पापं कुर्यात्॥ 'सर्वाशुचिनिधानस्य कृतघ्नस्य विनाशिनः ॥ शरीरकस्यापि कृते मूढाः पापानि कुर्वते' ॥ इति हि वदन्ति ॥ गुरहननादना राज्यादेर्लाभेऽपि न राज्यादिभोगस्थिरं संभवति देहस्य परमनश्वरत्वात् ॥ यावद्देहस्तिष्ठति तावत्तस्य रक्षणं तु भिक्षान्नेनापि सुकरम् ॥ अतोऽस्य देहस्य रक्षणार्थं गुरुहननादिरूपं महत् पापं न कुर्या इति सूचितम ॥ भीष्मादीनां गुरुत्वेऽपि तद्धननं कर्तुं युक्तं ? 'गुरारप्यवलिप्तस्य कार्याकार्यमजानतः ॥ उत्पथं प्रतिपन्नस्य कार्यं भवति शासनम्' ॥ इत्युक्तेः इति चेत् महानुभावानां हिमहानुभावानां अवलिप्तत्वकार्याकार्यविवेकशून्यत्वादिक्षुद्रदोषसंश्लेषो न संभवति तादृशानां तेषां अतितेजस्वित्वात् अवलिप्तत्वादिकं सदपि न दोषाय॥ २'तेजीयसां न दोषाय' इति हि वदन्ति ॥ इति वा ॥ अतो भीष्मद्रोणादिभिर्गुरुभिर्नाहं युध्येय ॥ ४॥ ॥

कृष्णः ॥ भिक्षान्नाशनेन शरीरयात्रानिर्वाहमात्रं स्यात् ॥ अनुभवितव्यं त्वै-

---

१. (भार. आदि. १५३.) २. (भाग. १०. ३३.)

हिकं सुखम् ॥ 'अनिष्टस्यसुखत्यागी पशुरेव न संशयः' ॥ इति हि वदन्ति ॥ अतः ऐहिकसुखानुभवार्थं युध्यस्व ॥ ९ 'निहत्य धार्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन' ॥ इति, युध्यादैहिकसुखसाधनराज्यादिभोगलाभेऽपि आचार्यादिनाशेन बन्धुजनविनाशेन च समुपजातेन बलवता दुःखेनोपरोधादैहिकसुखस्यासंभव उक्तः इति चेत् युध्याव्यवहितोत्तरकाले प्रत्यग्रदुःखेनैहिकसुखस्योपरोधेऽपि कतिपयदिवसविगमे मृतजनविस्मरणसंभवेन दुःखस्य शिथिलीभावसंभवादुचितसामग्रीसंपूर्त्या प्रतिबन्धकनिवृत्त्या च ऐहिकसुखोदयो दुर्निवारः ॥ अतस्तदनुभवाय युध्यस्व गुरुभिरपि भीष्मादिभिः॥ किं ब्रवीषि ॥

अर्जुनः॥ हत्वार्थकामांस्तु गुरूनिहैव भुञ्जीय भोगान् रुधिरप्रदिग्धान्॥९॥

हत्वेति ॥ अर्थं कामयन्ते इत्यर्थकामाः तान् गुरून् हत्वा तु रुधिरेण रक्तेन प्र सम्यक् धिग्धान् लिप्तान् भोगान् इहैव भुञ्जीय कथं भुञ्जीय इति वा ॥ ९ ॥

कतिपयदिवसविगमे मृतजनविस्मरणसंभवात्प्रतिबन्धकनिवृत्त्या ऐहिकसुखोदयो दुर्निवारः इत्युक्तम् ॥ तत् सामान्यबन्धुजनविषयम् ॥ युध्येऽस्मिन् मरिष्यन्तो भीष्मद्रोणादयस्तु महानुभावाः ॥ नैषां विनाशादुदितं दुःखं पुरुषायुषेणापि शैथिल्यमाप्नुयात् ॥ किंतु सदा प्रत्यग्रमिवैव स्यात् ॥ अतस्तदुपरोधेन सुखं नोत्पद्येत ॥ भोगानामनुभवे कथं सुखं नोत्पद्येत इति चेत् अनुभव एव न संभवति ॥ अर्थं कामयमानान् गुरून् हत्वा तु रुधिरसदृशजुगुप्सितदोषैर्नितरां व्याप्तान् भोगान् सुखहेतुभूतान् इहैव स्थितान् पदार्थान् भुञ्जीय २ भुञ्जीय वा ३ कथं भुञ्जीयेति वा ॥ गर्हितमेतत् ॥ अतः अननुभवात्सुखं नोत्पद्येत ॥ अतस्तदर्थं न युध्येय ॥ कथञ्चिदनुभवसंभवेऽपि भोगान् इहैव लोके भुञ्जीय ॥ तेषु नैकोऽपि लोकान्तरं गच्छन्तं अनुगच्छति॥ रुधिरप्रदिग्धानेव भुञ्जीय न तु शुद्धान् ॥ रुधिरेण रक्तेन प्र अधिकं दिग्धान् लिप्तान् लक्षणया तत्सदृशान् अत्यन्तजुगुप्सितानेव भुञ्जीय ॥ तान् हत्वा शस्त्रास्त्रविक्षततदीयशरीरस्रवदसृगुपलिप्तानेव भोगान् भुञ्जीय ॥ हत्वा गुरून् महतः अर्थाश्च

१. १. ३५. २. संप्रश्ने लिङ् ॥ ३. 'कथं भीष्ममहंसङ्ख्ये' इत्यतः कथमित्यस्य अनुवृत्तिरिति भावः ॥

कामाश्च अर्थकामाः तदात्मकानेव भोगान् भुञ्जीय ॥ न तु धर्मं मोक्षं वा गुरून् हत्वा अर्थकामात्मकान् भोगानेव भुञ्जीय ॥ गुरून् हत्वा इहैव तदीयभवनशयनवाहनादिष्वेव स्थित्वा भोगान् भुञ्जीय ॥ तच्च प्रतिकलं तत्स्मारकतया दुःखजनकम् ॥ गुरून् हत्वा रुधिरप्रदिग्धान् रक्ताद्यशुद्धपरमजुगुप्सितवस्तुमयान् नरकभोगान् इहैव भुञ्जीय ॥ 'अत्युत्कटैः पुण्यपापैः इहैव फलमश्नुते' ॥ इति हि स्मरन्ति ॥ गुरुवधेन लभ्या भोगाः यद्यपि गुरवः महनीयाः गुरूंस्तु गुरूनपि रुधिरप्रदिग्धांस्तान् कथं भुञ्जीय ॥ अर्थलोभेन विक्रीतात्मनां तेषां कथं गुरुत्वं इति चेत् अर्थकामानपि गुरून् हत्वा इति वा ॥ अर्थकामत्वेऽपि गुरुत्वं नापगच्छति अर्थान् धर्मादिपुरुषार्थान् शिष्येभ्यः कामयन्ति बोधयन्तीत्यर्थकामाः तत्त्वोपदेष्टारः तत्त्वोपदेष्टार एते अर्थकामा अपि गुरव एव ॥ एतत्सूचनार्थमेव पुनर्गुरुपदप्रयोगः ॥ अतस्तान् हत्वा कथं भुञ्जीय ॥ अर्थकामानित्यनेन यद्येते गुरवो भीष्मादयो युद्धान्निवर्तेरन् तर्हि दुर्योधनादीनाततायिनो हत्वा लब्ध्वा च राज्यादिकं ऐहिकं सुखमनुभवेम न चैवं लोभोपहतचेतस्त्वादेते युद्धान्न निवर्तेरन् ततश्चास्माभिरेते हन्येरन् हतवतां च भीष्मादीनस्माकं परमसुखसाधनराज्यादिलाभेऽपि नैहिकं सुखं प्रत्युत राज्यादेरस्मद्धतभीष्मादिस्मारकतया दुःखजनकत्वेन दुःखमेवेति सूचितम् ॥ यद्येते निष्कामाः तर्हि तदीयभोगहरणं कर्तुं युक्तं सकामानामेषां भोगहरणं क्षुधितानामोदनहरणवदतिगर्हितं ॥ अतः कथं भुञ्जीय ॥ तुशब्दो विशेषार्थकः अप्यर्थकः एवार्थकश्च ॥ गुरूनहत्वेति प्रथमपादः हत्वाऽर्थकामानित्युत्तरार्धं च एकं वाक्यं श्रेयोभोक्तुमिति द्वितीयपादोऽपरं वाक्यम्॥ गुरून् अ हत्वा इति च्छेदः॥ हे अ परमात्मन् कृष्ण महानुभावान् गुरून् हत्वा गुरून् अर्थकामात्मकान् भोगान् हत्वाऽपि प्राप्यापि (हन हिंसागत्योः इति धातुः) तान् इहैव न तु परत्र रुधिरप्रदिग्धान् दोषदूषितानेव न तु शुद्धान् भुञ्जीय॥ तस्मान्न प्रतियोत्स्यामि ॥ तर्हि शरीरयात्रानिर्वाहः कथं इति चेत् श्रेयोभोक्तुंभैक्षमपीहलोके ॥ वाक्यमध्ये वाक्यान्तरप्रवेशस्तु कुतो न प्रतियोत्स्यामीति ब्रूषे इति कृष्णेन पृष्टे गुरूनहत्वेत्यर्जुनेन तत्कारणे वक्तुमारभ्यमाणे अनाकर्ण्यैव तद्वचनं समग्रं किमसंबद्धं कारणं वक्तुमारभसे यदि केनाप्यसंबन्धेन कारणेन न प्रतियुध्यसे तर्हि शरीरयात्रानिर्वाहासंभवः इति कृष्णेनोच्यमाने सद्यएव तदसंभव १ शङ्काऽपनोदाय इति बोध्यम् ॥ इत्यपि

---

१. 'उपमानोपमेयत्वं यदेकस्यैव वस्तुनः ॥ इन्दुरिन्दुरिव श्रीमानित्यादौ तदनन्वयः' ॥ इत्यत्र असंभवशङ्कापरिहाराय मध्ये इन्दुरिन्दुरिवेतिवाक्यान्तरप्रवेशवत ॥

व्याख्यानमूह्यम् ॥ शरीरयात्रानिर्वाहस्य अन्यथाऽपि संभवात् न तदर्थं गुरून् प्रति प्रतियोधनमभ्युपगच्छेयम् ॥ ५ ॥

कृष्णः ॥ कथं न प्रतियोत्स्यामीत्युच्यते ॥ युध्यकरणाकरणयोर्मध्ये युध्यकरणस्य [१] ज्यायस्त्वात् ॥ भैक्षं भोक्तुं श्रेयः इति कथमुच्यते भिक्षाऽशनराज्याद्यनुभवयोर्मध्ये राज्याद्यनुभवस्य ज्यायस्त्वात् ॥ अतो युध्यकरणेन राज्यादिसंपादनमेव श्रेयः ॥ अतो युध्यस्व गुरुभिरपि ॥ किं ब्रवीषि ॥

अर्जुनः॥ न चैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुः॥
यानेव हत्वा न जिजीविषामस्तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः ॥६॥

न चेति ॥ नः अस्माकं कतरत् किं गरीयः अतिशयेन गुरु प्रशस्ततरम ॥ एतत् न च विद्मः नैव जानीमः ॥ यद्वा किं वा वयं जयेम यदि वा किं वा नः अस्मान् ते जयेयुः ॥ यान् हत्वा नैव जिजीविषामः जीवितुं इच्छामः ते धृतराष्ट्रस्य इमे धार्तराष्ट्राः भीष्मद्रोणादयः प्रमुखे संमुखे अवस्थिताः ॥ ६ ॥

युध्यकरणतदकरणयोर्मध्ये किं श्रेयः भिक्षान्नाशनराज्याद्यनुभवयोर्मध्ये किं श्रेयः एतत् नैव जानीमः ॥ धर्मैकशरणैरस्माभिरेतदवश्यं विचार्य ज्ञातव्यम् ॥ किं गुरुहननतज्जनितायशःप्रभृतिदोषगन्धविधुरत्वात् भिक्षाशनं श्रेयः उत स्वधर्मत्वाद्युध्यकरणं तेन राज्यादिसंपादनं च श्रेयः आहोस्वित् भैक्षं परधर्मत्वान्निषिध्यं, युध्यं तेन राज्यादिसंपादनं च गुरुहननादिदोषदुष्टं भैक्षं हिंसादिदोषराहित्याच्छ्रेयः युध्यं च स्वधर्मत्वाच्छ्रेयः इत्युभयोः साम्यं इतीदं अल्पज्ञः मोहावेशपरवशतया सम्मूढचेताश्चाहं न जाने सर्वज्ञेन कदाप्यनुपहतस्वभावेन त्वया वक्तव्यम् ॥ अतस्त्वामिदमहं याचे ॥ युयुत्सया मां सारथीकृत्य कुरुक्षेत्रमेत्य शङ्खपूरणादिना [२] 'अहो बत महत्पापं कर्तुं व्यवसिता वयम् ॥ यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः' ॥ इत्युक्तरीत्या गुरुवधरूपमहापापकरणोद्यमं च प्रकाश्य किमकाण्डे युध्यकरणतदकरणयोः भिक्षाशनयुध्यकरणयोस्तारतम्यं पृच्छसि ॥ अलम-

१. वक्ष्यते च ॥ [२] 'कर्म ज्यायो ह्यकर्मणः' ॥ (३. ८.) इति ॥ २ १. ४५.

नेन विचारेण॥ युध्यस्व गुरुभिरप्यैहिकसुखानुभवाय॥ युध्वादैहिकसुखस्यासंभव उक्तः इति चेत् उक्तरीत्या युध्वादुपलब्धानां भोगानां कथंचिदनुभवे ऐहिकसुखोदयो दुर्निवारः इति चेत् किं वा वयं जयेम किंवा अस्मान् ते जयेयुः अस्माकं जयो वा तेषां जयो वा एतच्च न विद्मः॥ जयनिश्चये भवतु धर्मोऽधर्मो वा कर्तव्यमेव युध्वमैहिकसुखलब्धये इत्यभ्युपगच्छेम स एव न सति चैवं कुधं युध्वे प्रवर्तेमहि ॥ अतस्तदपि त्वया वक्तव्यम् ॥ युध्वे जयो न नियतः ॥ 'युध्वे जयपराजयौ' इति हि वदन्ति ॥ अत एषां जयः इति निश्चित्य वक्तुं न शक्यते ॥ तथाऽपि प्रवीरेण क्षत्रियेण अहमेव जयेयं इति महतोत्साहेन युध्वे प्रवर्तितव्यं न जये संशयः कार्यः इति चेत् अस्त्वस्माकमेव जयः प्राप्तोऽपि स जयः पराजयादप्यधिकदुःखावहः ॥ कुत इति चेत् धृतराष्ट्रसंबन्धिनो भीष्मद्रोणादीन् हत्वा जीवितुमेव नेच्छामः किमुत सुखमनुभवितुं॥ त इमे भीष्मद्रोणादयो युध्वसन्नद्धतया संमुख अवस्थिताः ॥ एवशब्दस्य यानेवेति हत्वैवेति नैवेति जिजीविषाम एवेति न एवेति अवस्थिता एवेति प्रमुख एवेति धृतराष्ट्रसंबन्धेन दुर्योधनस्य प्रियं चिकीर्षवः सन्त एवेति प्रत्येकमन्वयेन विशेषा ऊह्याः ॥ यद्यत्र भीष्मादयो न स्युः यदिवा प्रमुखे न स्युः तर्हि तदन्यैर्युध्वा जित्वा लब्ध्वा च भोगानैहिकसुखमनुभवितुं शक्यम् ॥ प्रमुख एव स्थितत्वेन प्रथम तत्यजन न प्रसङ्गात् पुरुषायुषेणाप्यपरिहार्यदुःखोत्पादकतया पराजयादप्यबलीयान् जयः ॥ धार्तराष्ट्राः सन्तोऽवस्थिताः इत्यनेन नैतेषामस्मासु प्रद्वेषः तथाऽपि दुर्योधनार्थमेव युध्वाय सन्नद्धाः प्रमुखेऽवस्थिताः इति सूच्यते ॥ उक्तं चेदं मया १ 'धार्तराष्ट्रस्य दुर्बुद्धेः युध्वे प्रियचिकीर्षवः'॥ इति ॥ जयानिश्चयात् सत्यपि जये तस्य पराजयादप्यधिकदुःखावहत्वेन चिरेणाप्यैहिकसुखानुदयात् अवश्यरक्षणीयकतिपयदिवसस्थायिशरीरयात्रानिर्वाहमात्रस्य भैक्षाशनेनाप्यन्यथोपपत्तेश्च भिक्षाऽशनं श्रेयः इत्युक्तं मया॥ अतो न गुरुभिर्युध्येय ॥ ६ ॥

कृष्णः ॥ त्वं विदितसकलवेदनीयः पण्डितमौलिमणिरपि भूत्वा कथं न चैतद्विद्मः त्वमेव ब्रूहीति ब्रवीषि ॥ स्वयमेवालोच्य सारासारविवेचनं कृत्वा सारमुपादत्स्व ॥

अर्जुनः ॥ कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसंमूढचेताः ॥
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्॥७॥

कार्पण्येति ॥ कृपणस्य दीनस्य भावः कार्पण्यं तद्रूपो दोषः कार्पण्यदोषः तेन उपहतः स्वभावः यस्य सः कार्पण्यदोषोपहतस्वभावः धर्मे संमूढं धर्मसंमूढ चेतः मनः यस्य सः धर्मसंमूढचेताः अहं त्वां पृच्छामि ॥ यत् श्रेयः प्रशस्ततमं स्यात् भवात तत् निश्चितं यथा तथा मे मह्यं ब्रूहि ॥ अहं ते शिष्यः प्रपन्नं शरणागतं मां शाधि शिक्षय ॥ ७ ॥

कार्पण्यं एतान् हत्वा कथं जीविष्याम इति बन्धुजनविनाशनिश्चयजनितशोकेन दैन्यं तद्रूपो यो दोषः तेन, कार्पण्यं दैन्यं दोषः कुलनाशनादिकृतः ताभ्यां वा उपहतः नष्टः स्वभावः पाण्डित्यशौर्यधैर्यौदार्यगांभीर्यादिलक्षणः यस्य सः तथा तादृशः अतएव धर्मे समूढं किं भिक्षाशनं धर्मः उत युद्धं इति सन्दिहानं भिक्षाशनमेव धर्मः युद्धं त्वधर्मः इति विपरीतज्ञानयुक्तं च चेतः मनः यस्य सः तथा तादृशश्चाहं त्वां पृच्छामि ॥ किमिति इति चेत् ॥ युद्धकरणतदकरणयोः भिक्षाशनयुद्धकरणयोश्च मध्ये यत् श्रेयः इति वेदपुराणादिषु निश्चितं स्यात् [1]अस्ति तत् मे मह्यं ब्रूहि इति पृच्छामि ॥ अतः यत् श्रेय इति निश्चितमस्ति तत् त्वं मे ब्रूहि ॥ उभयोर्मध्ये यत् मम श्रेयः श्रेष्ठं स्यात् भवति मम श्रेयः पुण्यं कीर्त्यादिकं वा यत् येन स्यात् भवेत् तत् मे निश्चितं यथा तथा अज्ञस्यालपबुद्धेर्मम निश्चयज्ञानं यथा उत्पद्येत तथा ब्रूहि ॥ यदि संशय-विपर्ययौ स्यातां तर्हि कमपि संशयच्छेददक्षं विचक्षणं विलक्षणं गुरुमुपसृत्य तदु-पदशन तौ दूरीकुरु ॥ कुतः सखायं मां निर्बध्नासि इति चेत् अह ते शिष्यो भूत्वा पृच्छामि ॥ शिष्या अपि केचन पण्डितमात्मानं मन्यमानाः इदं कथं इद कथं इति गुरून परीक्षितुं पृच्छेयुः त्व तादृशश्चेत कथमहं ते धर्मतत्वमुपदिशेयं इति चेत त्वां प्रति पपत्तिशब्दितां शरणागतिं कुर्वाणं मां शाधि ॥ नाहं तादृशः शिष्यः किंतु

१. स्यात इति तिङन्तप्रतिरूपकमव्ययम् ॥

तत्त्वबुभुत्सया शरणागतं सच्छिष्यं मां मत्वा यत् श्रेयः स्यात् तत् निश्चितं यथा-तथा उक्त्वा इदं कुरु इदं मा कुरु इत्यनुशासनं कुरु ॥ न तु सखायं मत्वा परिहासं कुरु ॥ नापि असच्छिष्य मत्वा अन्यथा ब्रूहि १ 'ब्रूयः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत' ॥ इति हि वदन्ति॥ यद्यप्यहं पण्डितः तथाऽपि शोकमोहदैन्यावेशेन कर्तव्याकर्तव्यविवेकमूढः सारासारविवेचनशक्तिविधुरश्चाभूवं अतस्त्वां पृच्छामि त्वं तु शरणागतं सच्छिष्यं मां मत्वा मां शाधि ॥ शासनीयो हि शिष्यः॥ अतः इति त्वामहमर्थये ॥ उक्तयोरुभयोर्मध्ये यच्छ्रेयः तदहमुपदिशामि अलं वा ते तन्मात्रोपदेशेन इति चेत् कार्पण्यं आत्मानात्मपरमात्मज्ञानाभावेन ब्रह्मज्ञानाभावः २ 'यो वा एतदक्षरं गार्ग्यविदित्वाऽस्माल्लोकात्प्रैति स कृपणः' इति श्रुतिः ॥ तद्रूपो दोषः तेन, तेन यो दोषः मदीया एते हन्यन्ते चेमे मया हतेष्वेतेषु किं मम जीवितेन इत्यादिमोहलक्षणः तेन वा उपहतो दूषितः स्वस्य भावः चित्तं युध्योद्योगलक्षणः क्षत्रियस्वभावो वा यस्य सः तथा तादृशः अत एव धर्मं धारकत्वाद्धर्मशब्दवाच्ये परब्रह्मणि संमूढं संशयविपर्ययादियुक्तं चेतः यस्य सः तादृशश्चाहं त्वां पृच्छामि ॥ किमिति इति चेत् निश्चितं महर्षिभिः श्रुत्यादिभिर्नीतं ३ ऐकान्तिकं ४ आत्यन्तिकं च श्रेयः परमप्रशस्यं मोक्षाख्यं पदं यत् येन स्यात् तत् मोक्षजनकं ब्रह्मज्ञानं मे ब्रूहि इति पृच्छामि अतः निश्चितं श्रेयः येन स्यात् तत् ब्रह्मज्ञानं मे ब्रूहि ॥ 'नाशिष्याय नापुत्राय ब्रूया'दिति निषेधात् कथं वक्तुं शक्यं इति चेत् शिष्यस्तेऽहं त्वां प्रपन्नं मां शाधि ॥ ५ कार्पण्यदोषेण उक्तविधेन उपहतः नष्टः विस्मृतः स्वस्य प्रत्यगात्मनः भावः परब्रह्मत्वलक्षणः स्वभावः यस्य सः तथा धर्मे स्वरूपप्रकाशके ज्ञानात्मके संमूढं अप्रविष्टं चेतः यस्य सः तथा तादृशश्चाहं त्वां पृच्छामि ॥ त्वं परमश्रेयःसाधनं सकलशोकविध्वंसनं च ब्रह्मज्ञानमुपदिश ॥ इति च ॥ न केवलं तन्मात्रोपदेशेन मे श्रेयः स्यात् आत्मानात्मपरमात्मज्ञानाभावात्खल्वहमेवं शोचामि अतः आत्मानात्मपरमात्मतत्त्वज्ञानमप्युपदिश्य मामनुगृहाण ॥ इति प्रार्थये परमादरेण भगवन्तं भवन्तम् ॥ ७ ॥

१. भाग. १ १ २. बृ. ४. ८. १०. ३. साधनानुष्ठानानन्तरमवश्यंभावित्व ऐकान्तिकत्वं ॥ ४. जातस्य अविनाशः आत्यन्तिकत्वं ॥ ५. अ.॥

कृष्णः ॥ कार्पण्यदोषोपहतस्वभावत्वेन धर्मसंमूढचेतस्त्वादहं त्वां पृच्छामि इत्युक्तं त्वया तथाऽपि बन्धुजनविनाशनिश्चयजनितशोकं तदपनोदोपायावष्टंभेन दूरीकृत्य त्वमेव युध्यकरणतदकरणयोः भिक्षान्नाशनयुध्यकरणयोर्वा मध्ये इदं श्रेयः इदं न श्रेयः इति समालोड्य शास्त्रज्ञानं निश्चिनु ॥ शोकापनोदोपायः कः इति चेत् युध्वात्संपत्स्यमानराज्यादिभोगानुभवजन्यसुखमनुसन्धेहि तेन शोकापनोदो भविष्यति ततः कार्पण्यदोषापगमात् स्वभावलाभसंभवेन सारासारविवेचनशक्तिः समुज्जृंभते ततश्च योत्स्यसे ॥ किंच शोकापनोदाय तत्वज्ञानमुपदिशेत्यभ्यर्थितं त्वया शोकापनोदाय किमप्यन्यदेवान्विष्यतां किं तत्वोपदेशप्रार्थनया॥ किमस्ति वस्तु शोकापनोदकं इति चेत् युध्वादुपनतराज्यादिभोगानुभवजन्यसुखमपनुदेच्छोकम् ॥ तदर्थं युध्यस्व ॥ ऐहिकसुखासंभव उक्तो हि मया इति चेत् तत्संभवं साधितं मया स्मर ॥ अन्ततः अननुभवात्सुखासंभवः कथंचिदनुभवेऽपि दुष्टानिष्टविषयानुभवात्तदसंभवश्च कथं भुञ्जीय रुधिरप्रदिग्धानेव भुञ्जीय इत्यावेदितो हि मया इति चेत् विषयाणामिन्द्रियाणां च संबन्धसौलभ्यात् विषयाणां अनितरसाधारणपरमदुर्लभात्मभ्यत्वादिपर्यालोचने अनिष्टत्वापगमाच्च सुखोत्पत्तिरपरिहार्या॥ अतः पर्यालोच्येदं युध्याय यतस्व ॥ तेन च राज्यादिकं लभ्येत ॥ तेन च सुखं लभ्येत॥ तेन च शोकापनोदो भविष्यति ॥ अतः किं तदर्थं तत्वोपदेशार्थनेन॥ ब्रूहि॥

अर्जुनः ॥ न हि प्रपश्यामि ममापनुद्याद्यच्छोकमुच्छोषणमिन्द्रियाणाम्॥
अवाप्य भूमावसपत्नमृद्धं राज्यं सुराणामपि चाधिपत्यम्॥८॥

नहीति॥ भूमौ न विद्यन्ते सपत्नाः शत्रवः यस्मिन् तत् असपत्नं ऋद्धं समृद्धं राज्यं सुराणां देवानां अधिपतेर्भावः आधिपत्यं इन्द्रपदं सुराणां सेन्द्राणां आधिपत्यं ब्रह्मपदं वा प्राप्य स्थितस्यापि मम इन्द्रियाणां उत् अधिकं शोषयति शक्तिह्रासं करोतीति उच्छोषणं शोकं यत् अपनुद्यात् परिहरेत् तत् अहं न प्रपश्यामि हि यस्मात् तस्मात् त्वां पृच्छामीति पूर्वेणान्वयः ॥ ८ ॥

केनाप्युपायेन शोकापनोदो यदि जायेत तर्हि स्वभावलाभेन सारासारविवेचनमहं कुर्यां ॥ शोकापनोदोपायं कमप्यहं न पश्यामि ॥ युध्वादुपनतभोगानुभवजनितसु-

खानुसन्धानमेवशोकापनोदकोपाय इति चेत् यदि तत्सुखमिष्टं स्यात् तर्हि तदनुसन्धानं शोकापनोदोपायः स्यात न हि मम तदिष्टम् ॥ यदि गुरुहननादिना स्वर्गलोकाधिपत्यं सत्यलोकाधिपत्यं च लभ्येयातां तर्हि ते अपि ममानिष्टे किमुत परमाल्पमहीराज्यमात्रम् ॥ अस्तुनाम शोकः तेन सुखोत्पत्तिप्रतिबन्धः कथम् ॥ इन्द्रियैर्विषयाणामनुभवे सुखमुत्पद्येतैव ॥ अनुभवस्यासंभवः कथंचिदनुभवेऽपि विषयाणामनिष्टत्वात्सुखस्यानुदयश्च उक्तो मया इति चेत् विषयेन्द्रियसंबन्धसौलभ्यात् विषयगौरवपर्यालोचनेन अनिष्टत्वापगमाच्च सुखोदयो दुर्वारः इति मयाऽप्युक्तम् इति चेत् विषयैः संबध्यान्यपीन्द्रियाणि न ताननुभावितुं शक्नुवन्ति ॥ शोकेन तेषां विषयग्रहणशक्तेर्नाशात् ॥ न हि भर्जनेन नाशितशक्तिकानि बीजानि अङ्कुरमुत्पादयितुं शक्नुवन्ति ॥ भूमौ निष्कण्टकं समृद्धं राज्यं सुराणामाधिपत्यं च प्राप्यापि स्थितस्य मम इन्द्रियाणां स्वकार्यजननशक्तिनाशकं शोकं यदपनुद्यात् शोकापनोदकं तत् अहं सम्यगालोच्यापि न पश्यामि ॥ अतः शोकेन स्वभावोपहत्या संमूढचेतस्त्वादहं त्वां पृच्छामि ॥ १ ब्रह्मपदस्य इन्द्रपदस्य सार्वभौमपदस्य च सर्वेन्द्रियमनोबुद्धिशक्तिह्रासकरांवाचित्रांविविधसांसारिकदुःखनिश्शेषनिरसनशक्त्यभावात् तदर्थं ब्रह्मज्ञानोपदेशमर्थयामि ॥ ब्रह्मज्ञानमेव २ सकलदुःखनिवृत्तिहेतुः ॥ ३ सोऽहं भगवो मन्त्रविदेवास्मि नात्मवित् श्रुतं ह्येव मे भगवद्दृशेभ्य स्तरतिशोकमात्मविदिति सोऽहं भगवश्शोचामि तं मा भगवान् शोकस्य पारं तारयतु ' इति श्रुतिः ॥ अतो दयया युद्धकरणाकरणयोः युद्धकरणभिक्षाऽशनयोश्च मध्ये यच्छ्रेयः तदुपदेशपूर्वकं ब्रह्मज्ञानं मह्यमुपदिश ॥ ८ ॥

धृतराष्ट्रः ॥ एवमुक्त्वा पार्थः किमकरोत् वद मे सञ्जय ॥

सञ्जय उवाच ॥

एवमुक्त्वा हृषीकेशं गुडाकेशः परन्तपः ॥
न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह ॥ ९ ॥

---

१. अत्र 'सद्यस्त्यजन्ति' इति श्लोकोऽनुसन्धेयः ॥ २. वक्ष्यते च ॥ प्रसादे सर्वदुःखानां हानिरस्योपजायते ॥ प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥ (२. ६५.) इति ३. छां. ७. १. ३.

एवमिति ॥ परन्तपः गुडाकेशः हृषीकेशं गोविन्दं कृष्णं एवं इति उक्त्वा न योत्स्ये इति उक्त्वा तूष्णीं बभूव ह आश्चर्यमिदम् ॥ ९ ॥

शत्रुतापनसमर्थोऽपि ज्ञातृत्वात् विदितधर्माधर्ममर्मोऽपि पार्थः, हृषीकेशत्वात्सर्वप्राणिसकलेन्द्रियप्रेरकश्रीकृष्णप्रेरणया तमेवमुक्त्वा न योत्स्यामीति पुनरुक्त्वा तूष्णीं बभूव ॥ आश्चर्यमिदं यदर्जुनोऽप्येवमासीदिति चेत् ह आश्चर्यमेवेदम् ॥ तादृशी भगवतः प्रेरणाशक्तिः ॥ अर्जुनेत्याहूतोऽपि, पुनरपि युद्धे मां प्रेरयेदिति मत्वा निरुत्तरोऽभवत् अहो महिमा कृष्णस्य॥ अत्र हृषीकेशपदेन भगवतः सर्वज्ञत्वसकलेन्द्रियप्रेरकत्वादमहामोहमवत्वादर्जुनविषादनिरसनसामर्थ्यं सकलोपनिषदर्थसारार्थगर्भितगीतार्थग्रहणाय तन्मनोबुध्योः समुत्तेजनसामर्थ्यं यच्छोकमुच्छोषणमिन्द्रियाणा[1]मित्युक्तेन्द्रियक्षोभशमनसामर्थ्यं च सूच्यते॥ गोविन्दपदेन सर्वज्ञत्वात् अर्जुनस्य नानाहेतूपजनितविविधदुःखापनोदकादिव्यसुवाक्यप्रयोग ४ कुशलता ५भूभारपरिहारायावतीर्णत्वाद्विविधमुपन्यस्य कथमप्यर्जुनो युद्धे प्रवर्तायितव्य इत्यभिनिविष्टता च सूच्यते॥९॥

धृतराष्ट्रः ॥ न योत्स्ये इति गोविन्दमुक्त्वा तूष्णींभूतमर्जुनं दृष्ट्वा श्रीकृष्णः किमकार्षीत् ॥ वद ॥

सञ्जयः ॥ तमुवाच हृषीकेशः प्रहसन्निव भारत ॥
सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः ॥ १० ॥

तमिति ॥ हे भारत धृतराष्ट्र उभयोः सेनयोः मध्ये विषीदन्तं तं अर्जुनं हृषीकेशः कृष्णः प्रहसन्निव इदं वचः उवाच ॥ १० ॥

उभयोः सेनयोर्मध्ये स्थित्वा विषादन्तं तं पार्थं प्रति श्रीकृष्णः प्रहसन्निव वक्ष्यमाणं वचनमुवाच ॥ वक्ष्यमाणं वचनं तु गीतारूपं भरतकुलोत्पन्नत्वात् भार्यां ब्रह्मविद्यायां रतत्वाच्च त्वं तच्छ्रवणयोग्योऽसि ॥ अतः श्रावयामि तदखिलम् ॥ शृणु ॥ मध्ये स्थित्वा उभयोः सेनयोर्विषये विषीदन्तं इति वा ॥ कीदृशः सन्

१. गां वाचं वेदं विन्दति इति, गां वाक्यम् विन्दति जानातीति २. गां भूमिं विन्दति भारपरिहारेण रक्षतीति निरुक्तिः ॥

उवाच इति चेत् प्रहसन् सन् उवाच मत्प्रेरणादयं विषीदन् शिष्यो भूत्वा तत्वोपदेशमर्थयते इत्यन्तस्तोषेण मन्दहासं कुर्वन् सन् उवाच ॥ इवशब्दो वाक्यालङ्कारे ॥ अनुचितावरणप्रकाशनेन लज्जोत्पादनं प्रहासः लज्जा च दुःखात्मिका स च प्रहासशब्दितः परिहासः द्विषद्विषय एव मुख्यः अर्जुनविषये तु गौणः इति सूचयितुमिवशब्दः इति वा ॥ शोकाकुलतया शिष्यस्तेऽहमिति शिष्यभावमङ्गीकृतवानप्ययं अतिपरिचयादवज्ञया न मयोच्यमानमादरेण शृणुयात् अवजानीयाच्च मां अतः संनिहितबन्धुत्वस्नेहसंबन्धानुगुणं परिहासं कुर्वतेव मया वक्तुमारभ्य तत्प्रसक्तानुप्रसक्तया विवाक्षितसकलतत्वार्थोपदेशः कर्तव्यः इत्यालोच्य परिहासं कुर्वन्निव इदं वचनमुवाच इति वा ॥ तत्र १'अशोच्यानन्वशोचस्त्वं मिति परिहासः ॥ २'न त्वेवाहं' इत्यारभ्य ३ मोक्षयिष्यामि मा शुचः' इत्यन्तमुपदेशः॥ प्रहसन् पुरुष इव प्रसन्नवदनः सन्नुवाच इति वा ॥ परिहासवाक्यानि ब्रुवन् पुरुषो यथा अनालोचयन्नेव निर्निरोधमालपति तथा सर्वज्ञत्वादनालोचयन्नेव बुद्धिश्रममन्तरेण निर्निरोधं जह्नुकन्याप्रवाहवदविच्छिन्नधारमुवाच इति वा ॥ अत्र हृषीकेश इत्यनेन गुडाकेशतया विदितसकलतत्वस्यापि पार्थस्य शिष्यस्तेऽहं धर्मसंमूढचेताः पृच्छामि निश्चितं ब्रूहि इति तत्वोपदेशप्रार्थना इन्द्रियप्रेरकश्रीकृष्णेन कारिता इति, विनैवोपदेशमिन्द्रियाधीशत्वादिन्द्रियक्षोभशमनद्वारा इन्द्रियाणां सम्यगवस्थापने शक्तोऽपि श्रीकृष्णः पार्थं व्याजीकृत्य सकललोकोपकारकरणाय वक्ष्यमाणतत्वोपदेशे प्रावर्तत इति च व्यज्यते॥ सेनयोरुभयोर्मध्ये विषीदन्तमित्यनेन नायमुपेक्षाकालः इति सूच्यते ॥ १० ॥

वक्ष्यमाणं वचनमुवाच तच्च वचनं गीतारूपं इत्युक्तम् ॥ यदि 'अशोच्यानन्वशोचः' इत्यारभ्य भगवतोक्तं 'मोक्षयिष्यामि मा शुचः' इत्यन्तं वचनमेव भगवद्गीताख्यात् तर्हि प्रथमोऽध्यायः द्वितीयेऽध्याये आदितो दशश्लोकी मोक्षयिष्यामि मा शुचः' इत्यस्यानन्तरं विद्यमानो ग्रन्थश्च न गीतेत्यापतितमिति चेत् सत्यं तथाऽपि प्रथमाध्यायस्य द्वितीयेऽध्याये उक्तदशश्लोक्याश्च पूर्वाङ्गत्वेन अष्टादशे ४' इदं ते नातपस्काय' इत्यादेः ग्रन्थशेषस्य उत्तराङ्गत्वेन च गीतात्वेनैव

१. २. ११. २. २ १२ ३. १८. ६६. ४. १८. ६७.

व्यपदेशः ॥ अतएव 'धर्मक्षेत्रे' इत्यादिः १ 'रथोपस्थ उपाविशत्' इत्यन्तो ग्रन्थो गीतायाः प्रथमोऽध्यायः ॥ २ 'तं तथा' इत्यादिः ३ 'विषीदन्तमिदं वचः' इत्यन्ता दशश्लोकी च द्वितीयाध्यायान्तर्गता 'इदं ते नातपस्काय' इत्यादिः ४ 'ध्रुवा नीतिर्मतिर्मम' इत्यन्ता द्वादशश्लोकी अष्टादशाध्यायान्तर्गता ॥ लोके देवस्य पीठं छत्रादिकं च पूर्वोत्तराङ्गत्वेन देवत्वेनैव व्यवहियते ॥ आराध्यते च देवेन सह नीराजनपरिक्रमणप्रणमनादिभिरुपचारैरिति प्रसिद्धम् ॥ अस्तु तावदेवं किं प्रयोजनमस्या पीठिकायाः इति चेत् पार्थं व्याजीकृत्य लोकोद्धारार्थमवतारिताध्यात्मशास्त्रावतरणक्रमबोधनार्थमियं पीठिका ॥ अध्यात्मशास्त्रावतरणक्रमश्चत्थं ज्ञेयः ॥ तथा हि ॥ ५ परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात् इत्याद्युक्तरीत्या विषयेषु निर्विण्णस्यैव अध्यात्मशास्त्रशब्दितवेदान्तशास्त्रे अधिकारः ॥ स च निर्वेदो विषयेषु दोषदर्शनमन्तरेण न संभवति ॥ दोषदर्शनं च विषयैः शोकोपनिपाते सत्येव संभवति॥ मनःप्रसादहेतुभूतदेशविशेषादिसेवनं च तत्रोपायः ॥ जाते च निर्वेदे विविधोपन्यासैरात्मनिर्वेदो गुरुसन्निधौ निवेद्यः ॥ किमर्थमेवं निर्विद्यसे अनुभवन् विषयान् सुखमनुभव इति परीक्षार्थं गुरुणा विषयेषु प्रवर्तितोऽपि लेशतोऽपि तेषु प्रवृत्तिमलभमानो विषयेषु स्वीयमपरिहार्यं निर्वेदं प्रकाश्य तत्त्वमुपदिशेति सविनयमभ्यर्थनां गुरोः कुर्यात् ॥ तदनन्तरं सुप्रसन्नेन गुरुणा तत्त्वोपदेशः कार्यः ॥ इति सूचयितुं पार्थः श्रीकृष्णेन परमपावनं कुरुक्षेत्रमानीतः॥ तत्र कामक्रोधाद्यभिभवजनितस्वजनगुरुजनहननादिदोषदर्शनेन विषयेषु विरक्तोऽभूत् तां च विरक्तिं ६ 'सीदन्ति मम गात्राणी'त्यादिना प्राकाशयत् ॥ तत्र ७ 'न च श्रेयोऽनुपश्यामी'त्यनेन नित्यानित्यवस्तुविवेकं ८ 'न कांक्षे विजयं कृष्ण' त्यैहिकफलविरागं ९ 'अपि त्रैलोक्यराज्यस्ये'त्यामुष्मिकफलविरागं १० 'नरके नियतं वासः' इत्यात्मानात्मविवेकं ११ 'किं नो राज्येने'ति शमं 'किं भोगैः' इति दमं १२ 'यद्यप्येते न पश्यन्ती'ति निर्लोभतां १३ 'यदि मामप्रतीकारं' इति तितिक्षां च प्रादर्शयत् ॥ १४ 'कुतस्त्वे'त्यादिना कृष्णेन परीक्षार्थं पुनर्विषयेषु प्रवर्तितः तथाऽपि न लेशेनापि विषयेषु प्रवृत्तिं लभमानः १५ 'श्रेयो भोक्तुं भैक्षमपीह लोके' इति स्वीयमपरिहार्यं निर्वेदं प्रकाश्य

१. १. ४७. २. २. १. ३. २ १०. ४. १८. ७८ ५ मुं. २. १२. ६. १. २९. ७. १. ३१. ८. १. ३२. ९ १. ३५ १०. १. ४४. ११. १. ३२. १२. १ ३८. १३. १. ४६. १८. २ २. १५. २. ५.

१ 'कार्पण्यदोषे'त्यादिना, २ 'तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं' ॥ ३ 'भृगुर्वै वारुणिः ॥ वरुणं पितरमुपससार' । इति गुरूपसदनश्रुत्यर्थप्रदर्शनपूर्वकं जिज्ञासितं तत्त्वमादरेण पप्रच्छ ॥ ततः कृष्णेन सांसारिकदुःखशमनाय किमप्यन्यदन्विष्यतां किमुपदेशेनेति पुनः परीक्षार्थमुक्तोऽर्जुनः कस्याप्यन्यस्य दुःखशमनसामर्थ्यं नास्तीति ४ 'न हि प्रपश्यामी'त्यनेनोक्त्वा इहामुत्र भोगविरागकाष्ठां प्रदर्श्य परतत्त्वजिज्ञासाकाष्ठां स्वनिष्ठां प्राचीकशत् । पुनः कृष्णेन परीक्षार्थं विषयेषु प्रवर्तितोऽर्जुनः 'न योत्स्ये' इत्युक्त्वा तूष्णींभावावलम्बनेन स्वीयां निर्वेदस्य परमां काष्ठां प्रादर्शयत् ॥ ततः कृष्णस्तादृशमर्जुनं प्रति अध्यात्मशास्त्रमुपादिदेश ॥ परमकारुणिकतया सकललोकोत्धाराय व्याजीकृत्यार्जुनं परतत्त्व 'मशोच्या'नित्यादिना बोधयिष्यन् गुरुशिष्ययोक्तरीत्याशास्त्रावतरणक्रमं सप्तपञ्चाशता श्लोकैः पीठिकारूपैः सूचयित्वा हृषीकेशत्वादर्जुनं प्रक्षोभ्य तेन प्रार्थितः सुप्रसन्नः सन् गीतामुपदिदेश॥ विवक्षितप्रमेयभेदाद्ध्यायभेदः॥ उक्तदशश्लोक्याः उपोद्घातरूपत्वादुपोद्घातरूपप्रथमाध्यायान्ते निवेश उचितः इति चेत् सत्यं अर्जुनविषादरूपतदपनोदरूपार्थभेदविवक्षया महर्षिरुक्तदशश्लोकीं अर्जुनविषादापनोदकं द्वितीयेऽध्याये अर्जुनविषादयोगाव्यवधानेन आदौ न्यवीविशत् ॥ इति बोध्यम् ॥

धृतराष्ट्रः ॥ उभयोः सेनयोः महते युद्धाय सन्नद्धयोः कथं गीतोपदेशस्यावसरः ॥१॥ कथं वा रथे स्थित्वा शङ्खं चाध्माय ज्यामारोप्य शरं च सन्धाय युद्धे प्रवृत्तोऽर्जुनः प्रक्रान्तं युद्धं प्रविहाय तत्त्वोपदेशाधिगमे प्रावर्तत ॥२॥ कथं वा कृष्णस्तादृशे समये प्रवृत्त एव युद्धे बलात्कारेण स्वीयचातुर्येण वा प्रवृत्तिमनुत्पादयन् उपदेश समय इव गीतोपदेशे प्रावर्तिष्ट ॥३॥ कथंकारं वा रूक्षा विपक्षाः सपक्षाश्च परस्पर क्रोधान्धतया क्षणविलंबमप्यसहमानाः यावद्गीतोपदेशसमाप्ति युद्धमनारभ्य तूष्णीमतिष्ठन् ॥ ४ ॥ कथं वा विचित्रविविधबह्वर्थगर्भितायाः श्रीभगवद्गीतायाः परमरूक्षे तस्मिन् समये परिमित एव काले उपदेशनं ग्रहणं वा कृष्णार्जुनयोः सुशकम् ॥५॥ कथं

१ २. ७. २. मं. २. १२ ३. तै. ३. १. ४. २. ८.

वा ईदृशस्य भगवद्गीतारूपस्याध्यात्मशास्त्रस्य सारथ्यकरणयुद्धकरणोचितवेषभूषितयोः कृष्णार्जुनयोः स्थित्वा रथे उपदेशनं ग्रहणं वा युक्तं स्यात् ॥ ६ ॥ कथं वा अर्जुनोत्थाराय वा अर्जुनं व्याजीकृत्य लोकोत्थाराय वा अर्जुनाय गीताशास्त्रमुपदेष्टुं प्रवृत्तः अन्यस्मिन्नेव कस्मिंश्चन सुसमये समुचितदेशे समुचितासने स्वयमुपविश्य तमपि यथावदुपवेश्य नोपादिक्षत् ॥ ७ ॥ कथं वा युद्धाय पार्थं कुरुक्षेत्रे प्रवेश्य तं युद्धे प्रवर्त्य मोहावेशपरवशतया युद्धादुपरममर्थयन्तं 'सीदन्ति मम गात्राणी'त्यादिना स्वीयं विषादं निवेदयन्तं सशरं चापं त्यक्तवन्तं तं पुनः प्रोत्साह्य युद्धे प्रवर्त्य भैक्षाशनेन शरीरयात्रानिर्वाहनिश्चयपूर्वकं युद्धकरणतदकरणयोः भैक्षाशनयुद्धकरणयोश्च मध्ये यच्छ्रेयः तन्मे ब्रूहीति पृष्ट्वा ततो 'न योत्स्ये' इत्युक्त्वा तूष्णींभावावलंबनेन सर्वात्मना युद्धादुपरतं तं प्रति कृष्णस्य 'अशोच्यानन्वशोचस्त्वं' इत्यध्यात्मशास्त्रोपदेशो युज्येत॥ न हि स्वनैव युद्ध प्रवर्तित अकस्मादुपरतं भूयोऽपि स्वनैव युद्धे प्रोत्साहितं अर्जुनं प्रति विविधमुपन्यस्य स्वाभिलषिते युद्धे प्रवर्तयितव्ये प्रत्युत तद्विरुद्धसर्वनिर्वेदावहवेदान्तशास्त्रोपदेशो युक्तः स्यात् ॥ ८ ॥ कथं वा सर्वज्ञशिरोमणेः कृष्णस्य प्रकृतविरुद्धोपदेशः सङ्गच्छेत ॥ ९॥ कथं वा अर्जुनेनापृष्टस्य अध्यात्मतत्वस्य महता प्रबन्धेनोपदेशो जायतीति ॥ 'नापृष्टः कस्यचिद्ब्रूया'दिति निषेधात् ॥ १० ॥ तस्मादियं श्रीभगवद्गीता कुरुक्षेत्रे कुरुपाण्डव युद्धारंभे श्रीकृष्णनार्जुनायोपदिष्टत्यश्रद्धेयमतदिं नास्तिकाः प्रमाणरहितकुयुक्तिमात्र शरणाः प्रत्यवतिष्ठन्ते ॥

सज्जनयः ॥ आस्तिकास्त्वेवं समादधते॥ श्रीकृष्णेनार्जुनाय गीताया उपदेशस्तावदावश्यकः ॥ द्वापरान्तेऽवतीर्णत्वेन कंससंहारादियावदवतारकार्यनिर्वहणानन्तरं आगमिष्यत्कलौ माभूत्सर्वात्मनाज्ञानादिलोप इति कृत्वाऽध्यात्मशास्त्रं कस्मैचन सच्छिष्याय परमाप्ततमाय उपदेशावश्यंभावात्॥ न हि पार्थादन्यः कृष्णस्याऽऽप्ततमः॥ न हि ब्रह्मसूत्रादेरिव वेदव्यासेनैव प्रणयनमस्त्विति वाच्यम् ॥ तस्य तादर्थ्येन ज्ञानकार्यार्थमवतीर्णत्वात्तत्प्रणयनापेक्षया तादर्थ्येन बलकार्यार्थमवतीर्णेन श्रीकृष्णेन प्रणयनस्यैव सर्वसाधारण्येन विश्वासजननसौकर्यात् ॥ तादर्थ्येन गुरुशिष्यभावावलंबनेन युद्धसमयान्यसमये गीताया उपदेशस्य न प्रसक्तिः ॥ क्षत्रियत्वेन बलकार्यार्थमवती

र्णत्वेन समानवयस्कत्वेन मातुलेयत्वेन सखित्वेन अत्यन्तबन्धुत्वेन च गुरुशिष्यभावावलंबनसौलभ्याभावात् ॥ एतेन सप्तमी कक्ष्या प्रत्युक्ता ॥ अत एव क्षत्रियत्वाद्यनुसारेण महति युद्धे प्रवर्त्य हृषीकेशत्वात्स्वयं तं प्रक्षोभ्य अध्यात्मतत्वोपदेशग्रहणयोग्यतामापाद्य स्वयमुपदिदेश ॥ अनेन आद्यास्तिस्रः कक्ष्या निरस्ताः ॥ धृष्टद्युम्नो हि पाण्डवसैन्यसेनापतिः स च सेनापतिः सन्नपि श्रीकृष्णस्य भ्रुकुटिभटकल्पः ॥ कृष्णो हि पाण्डवानां सर्वस्वम् ॥ अतएव कौरवसेनाकोलाहलोक्तयवसरे '१ तस्य सञ्जनयन् हर्षं ' इति प्रथमोक्तस्य भीष्मस्य प्रतिनिर्देश्यतया पाण्डवसैन्यकोलाहलोक्तयवसरे धृष्टद्युम्नस्य प्रथमं निर्देशे कर्तव्येऽपि श्रीकृष्ण एव प्रथमं निर्दिष्टः ॥ २ ' माधवः पाण्डवश्चैति ३ ' पाञ्चजन्यं हृषीकेशः ' इति च ॥ पाण्डवसैन्यं च सेनापतेः धृष्टद्युम्नस्य निर्देशमन्तरेण न युद्धे प्रवर्तेत ॥ सेनापतिर्धृष्टद्युम्नस्तु विना श्रीकृष्णस्य प्रेरणां न सैन्यमादिशेत् ॥ कौरवसैन्यं तु कौरवसेनापतेर्भीष्मस्य निर्देशमन्तरेण न युद्धे प्रवर्तेत ॥ स च भीष्मः परमास्तिकतया पाण्डवपक्षपातितया श्रीकृष्णचरणैकशरणतया च तत्त्वमुपदिशति पार्थाय श्रीकृष्णे तदुपरोधेन न सैन्यं युद्धायाऽऽदिशेत् ॥ किं बहुना हृषीकेशत्वात्सर्वप्राणिसकलेन्द्रियप्रेरकस्य श्रीकृष्णस्य प्रेरणामन्तरेण न चतुर्मुखोऽपि स्पन्दितुमलं किमुत कौरवाः पाण्डवास्तदीयाश्च॥ अतो यावदुपदेशसमाप्ति न कोऽपि कस्मिन्नपि युद्धकर्मणि प्रावर्तत ॥ एतेन चतुर्थी कक्ष्या निराकृता ॥ यदनुग्रहलेशेन मन्दोऽपि बृहस्पतेः समो भवति एडमूकोऽपि वाग्मी भवति सा सरस्वती, यदीयपरमानुग्रहलेशेन ब्रह्मादयो देवाः तत्तत्पदानि लभन्तेस्म सा श्रीरपि यदीयचरणरज उपास्ते ॥ यच्चरणसेवाबलेन हनूमानतिगंभीरमप्यपांनिधिमतरत् ॥ पपौ च कुभसंभवः॥ बबन्धुश्च कपयः ॥ समन्थुश्चासुरैस्सह सुराः ॥ यश्च सङ्कल्पमात्रेण सकलजगदुदयस्थितिविलयानियमनज्ञानाज्ञानबन्धमोक्षानातनोति ॥ तस्य सर्वज्ञशिखामणेः अघटितघटनापटीयसो विष्टरश्रवसो हृषीकेशतया सकलेन्द्रियप्रेरकस्य श्रीकृष्णस्य परिमित एव काले श्रीगीताशास्त्रस्य ततोऽधिकस्य वाऽन्यस्य प्रणयनमुपदेशनं च, पार्थस्य तदनुग्रहादुपदेशग्रहणं च न चित्रम् ॥ एतेन पञ्चमी

१. १. १२. २. १ १४. ३. १. १५.

कक्ष्या प्रत्याख्याता ॥ वक्तृश्रोतृप्रसक्तीनामानुकूल्ये सति भवितव्यमेव वेदान्तशास्त्रोपदेशादिना ॥ तदानीं नायमवसरो वेदान्तशास्त्रश्रवणादेः तदुचितदेशवेषाऽऽसनादेरभावादिति नालोचनीयम ॥ देशवेषादेर्मनःप्रसादैकफलत्वेन सति मनःप्रसादे तदनपेक्षणात ॥ स्मरन्ति च ॥ १ 'तमेव देशं सेवेत तं कालं तामवस्थितिम् ॥ तानेव भोगान् भुञ्जीत मनो यत्र प्रसीदति ॥ न हि देशादिभिः कश्चिद्विशेषः समुदीरितः॥ मनःप्रसादनार्थं हि देशकालादिचिन्तना'॥ इति॥ यद्येवं तर्हि उपदेशादौ गुरुशिष्ययोरुक्तस्य नियमस्य वैयर्थ्यापत्तिः इति चेत् नियमपूर्वकानुष्ठानस्य महाफलार्थत्वादतिशयितफलार्थत्वेन सार्थक्यं नियमोपदेशस्य ॥ अनेन षष्ठी कक्ष्या निराकृता ॥ युध्यकरणतदकरणयोर्वा भैक्षाशनयुध्यकरणयोर्वा मध्ये यच्छ्रेयः तन्मे ब्रूहीति पृष्टेन श्रीकृष्णेन तदेव वक्तव्यम नाध्यात्मशास्त्रम् तस्य तेनापृष्टत्वात् 'नापृष्टः कस्य चिद्ब्रूयादिति निषेधात् इति चेत् 'यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे' इति सामान्यतः प्रश्नकरणेन युध्यकरणस्येवाध्यात्मतत्वस्यापि उपदेशौचित्यात्तदुपदेशः ॥ किंच सर्वस्याप्यसारानित्यतया परमश्रेयस्त्वमुपादिशेति अध्यात्मतत्वविषयोऽपि प्रश्नः पार्थस्याभिमतः ॥ अर्थस्तूक्तस्तथा तस्य श्लोकस्य ॥ किंच अपृष्टोऽप्यर्थः पुत्राय शिष्याय च पित्रा गुरुणा परमानुग्रहेणोपदेष्टव्य एव॥ २'ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत' इति हि स्मरन्ति ॥ 'नापृष्टः कस्यचिद्ब्रूया' दिति निषेधस्तु पुत्रशिष्यादिव्यतिरिक्तविषयः ॥ एतेन दशमी कक्ष्या निराकृता ॥ प्रकृतं युध्ये प्रवर्तनं विहाय कुतोऽध्यात्मतत्वमुपादिशदिति चेत् ३ 'तस्माद्युध्यस्व भारत'॥ इति, ४'धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते'॥ इति, ५ 'तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः' ॥ इति, ६ 'ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि'॥ इति, ७ 'निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः' ॥ इति, ८ 'उत्तिष्ठोत्तिष्ठ भारत' ॥ इति, ९ 'तस्मात्सर्वेषु कालेषु मामनुस्मर युध्य च' ॥ इति, १० तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून् भुङ्क्ष्व राज्यं समृद्धं'॥ इति ११ 'युध्यस्व जेतासि रणे सपत्नान्'॥

१. वाराहे ॥ २. भाग. १ १. ३ २ १८. ४. २ ३१. ५. २. ३७ ६ २. ३८. ७. ३. ३०. ८. ४. ४२. ९. ८. ७. १०, ११. ३३. ११. ११. ३४.

इति च तत्र तत्र बहुषु स्थलेषु प्रकृते युद्ध एव प्रवर्तनेन न प्रकृतासंगतिः ॥ यद्येवं तर्हि अस्य शास्त्रस्य युद्धे प्रवर्तनपरत्वेन अध्यात्मशास्त्रता न स्यात् ॥ ततश्च उपादेयता न स्यात् इति चेत् प्रत्यध्यायमध्यात्मतत्वप्रतिपादनपरत्वं स्पष्टमवगम्यत एव ॥ अध्यात्मतत्वप्रतिपादनपरत्वेनास्य शास्त्रस्य युद्धे प्रवर्तनमत्रानुचितमिति चेत् स्वधर्मतया निवृत्तिकर्मतया भगवत्सेवारूपतया चानुष्ठितस्य युद्धस्य मोक्षधर्मत्वेन तत्र प्रवर्तन अध्यात्मशास्त्रभावमर्हति ॥ नितरां निर्विण्णस्यार्जुनस्य महता प्रबन्धेन मोक्षशास्त्रमुपदिश्य तदन्तरङ्गसाधनतया युद्धकरणोपदेश एव युद्धे प्रवर्तनं सुकरम् ॥ अत एवमुपदेशः ॥ एतेन अष्टमी नवमी च कक्ष्या समर्हिता ॥ तस्मादियं श्रीभगवद्गीता कुरुक्षेत्रे कुरुपाण्डवयुद्धारंभे श्रीकृष्णेनार्जुनायोपदिष्टेति श्रद्धेयमेव नात्र संशयः कार्यः ॥ वक्ष्यते च ॥ [1] 'संशयात्मा विनश्यती'ति ॥ इत्यलं पल्लवितेन ॥

यत्प्रमाणं तदेवोपादेयम्॥ अत उपादेयतायै प्रामाण्यमवश्यकम् ॥ सदपि तत् गृहीतमेव प्रवृत्तिं जनयेत् नागृहीतम्॥ अतस्तत्सूचनमवश्यकं कथं तत्सूचनमिति चेत् वक्तृश्रोतृप्रसङ्गानामानुकूल्ये सति प्राप्तिमूलकत्वात्प्रामाण्यं भवति ॥ तेषामानुकूल्यसूचने प्रामाण्यमपि सूचितं भवति ॥ कथं तेषामानुकूल्यसूचनमिति चेत् गीतायाः पीठिकारूपैः उक्तैः सप्तपंचाशता श्लोकैः वक्ष्यमाणस्य गीताशास्त्रस्यास्य वक्ता करुणावरुणालयो नीलनीरदसमकायो निखिलकल्याणसुगुणगणनिकायो नित्यनिरस्ताशेषहेयो निरुपमनिजप्रभावेयो निर्धूतमायो निरस्तापायो नित्यसुखापायो निखिलनिगमगेयो निखिलशब्दाभिधेयो देवकीतनयो भगवान् वासुदेवः॥ श्रोता च पैतृष्वसेयत्वेन भगवतः परमप्रेमास्पदतया परममान्यो धनुष्मतामग्रसरो लोकैकवीरः पाण्डुनन्दनः पार्थः ॥ प्रसङ्गशब्दितः समयस्तु प्राणसंशयावहत्वात्परिहासानर्हः ॥ इति वक्तृश्रोतृप्रसक्तीनां प्रतिपादने तेषामानुकूल्यस्य प्रसिद्धत्वात्प्रमाणतमिदं गीताशास्त्रमिति प्रतिपादितं भवति॥ अतः सार्थकमिदं पीठिकारूपं प्रकरणमिति बोध्यम्॥

किं पार्थाय कृष्णेन गीतारूपाः श्लोका उपदिष्टाः उत गीतार्था एव कृष्णेनोपदिष्टाः तत्प्रतिपादकश्लोकाः व्यासेन विरचिताः वद मे तत्त्वं सञ्जय इति चेत् अत्र केचित्, गीतास्थाः सर्वेऽप्यर्थाः कुरुपाण्डवयुद्धप्रारंभसमये तत्तदर्थावबोधकैर्वाक्यैः श्रीकृष्णेनार्जुनायोप-

---

१ ४. ४०.

दिष्टाः पठनपाठनग्रहणधारणसौकर्याय पुनः भगवता बादरायणेन तत्तदर्थावबोधकाः श्लोकाः विरचय्य मध्येमहाभारतं भीष्मपर्वणि योजिताः ॥ न हि श्लोकानामिव वाक्यानां ग्रहणं धारणं वा सुकरम् ॥ अत एव तं धर्मं भगवता यथोपदिष्टं वेदव्यासः सर्वज्ञो भगवान् गीताख्यैः सप्तभिः श्लोकशतैरुपनिबबन्ध इत्युक्तं १ अभियुक्तैः ॥ 'वासुदेवार्जुनसंवादरूपां गीतामुपनिबबन्ध '॥ २ इत्यन्यैरपि ॥ संवादं रूपयति प्रतिपादयतीति संवादरूपा तां इति तट्टीकायाम् ॥ इति मन्यन्ते ॥ ३ अन्येतु तत्तदर्थप्रतिपादकाः श्लोका एव भगवता श्रीकृष्णेनार्जुनायोपदिष्टाः ग्रथिताश्च भारते बादरायणेन ॥ वाक्यानां निर्माणं सुकरं श्लोकानां निर्माणं तु न सुकरं कालस्तु अतितरामल्पीयान् सति चैवं श्लोकनिर्माणं कथं तदा कृष्णस्य घटते स्म इति चेत् उक्तरीत्या अघटितघटनापटीयसः प्रभोः श्रीकृष्णस्य निमेषकालमात्रे श्लोककोटिनिर्माणसंभवे न बाधकाभावात् न तदनुपपत्तिः ॥ किमर्थं श्लोकान्विरचय्योपदेशः इति चेत् अर्जुनं व्याजीकृत्य लोकोपकारार्थमुपदेश इति सित्थान्तः ॥ श्लोकरूपतयोपदेश एव ग्रहणधारणसौकर्यसंभवेन लोकोपकारः सुकरः ॥ अत एव कृष्णावतारमुखेन गीतायां ४ अवतरणमुक्तम् ॥ तत्र च प्रायशः श्रीकृष्णमुखनिस्सृतानेव श्लोकान् व्यलिखत् ॥ कांश्चित्तत्सङ्गतये स्वयं व्यरचयत् ॥ उक्तं च भगवता बादरायणेन ॥ 'गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः ॥ या स्वयं पद्मनाभस्य मुखपद्माद्विनिस्सृता '॥ इति ॥ पद्मनाभशब्दोक्तो वेदव्यास एवेति कुतो न स्यात् ॥ तथासति तत्सकलस्य भारतस्य भागवतस्य पुराणान्तराणां च वेदव्यासमुखनिस्सृतत्वाविशेषात्तेभ्यो गीतायास्तेन हेतुना विशेषोक्त्यनुपपत्त्या पद्मनाभेऽत्र कृष्ण एव ॥ दृश्यते च वेदव्यासरचितत्वेन संप्रतिपन्नेभ्यो भारतभागवतादिभ्योऽस्या गीतायाः शैलीभेदः ॥ किंचिदधिकप्रथमाध्यायशैलीसाम्यं तु तस्य गीतोपोद्घातरूपत्वेन गीतान्तर्भावादुपपन्नम्॥ अतएव हि कृष्णो गीताचार्य इति व्यपदिश्यते न तु गीतार्थाचार्य इति ॥ इदानीं तत्रतत्र पठनपाठनादिना सैवरुपास्यमाना श्लोकरूपा संहितैव गीतेति ह्याविवादम्॥ किंच उपदेशस्य वाक्यरूपत्वे तथैव व्यासो भारते ग्रथनीयात् ॥ श्लोकात्मके भारते वाक्यग्रथनमनुपपन्नमिति चेत् भारते भागवतादौ च बहुषु स्थलेषु वाक्यरूपाणामध्यायानामुपलंभेन तथावचनमनुचितं ॥ एवं सति अन्यत्रापि तत्तद्वाक्यानुवादस्थले तत्तद्वाक्यमेव लेखनीयं स्यात् इति चेत् लाघवात्तत्तद-

१. अद्वैतभाष्ये २. द्वैतभाष्ये ३. विशिष्टाद्वैतिनः ४. विशिष्टाद्वैतभाष्ये

र्थकश्लोकैरन्यत्रोक्तेः प्रकृते तु यथावदवगाहनाय तथैवानुवाद उचित इति विशेषोपपत्तेः ॥ तस्मात् श्लोका एव कृष्णेनोपदिष्टा इति भाति ॥ इत्याहुः ॥

अपरे तु॥ श्रीकृष्ण इव वेदव्यासोऽपि भगवतो नारायणस्यावतारः ॥ १ कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्रभुं' इते हि वदन्ति॥ सति चैवं सन्तु गीताश्लोकाः श्रीकृष्णेन वेदव्यासेन वा कृताः ॥ उभयथाऽपि सर्वज्ञभगवत्प्रणीतत्वसत्वेन विवक्षितसर्वातिशायिमहामहिमलाभात् ॥ किंच वेदव्यासस्य विशिष्य ज्ञानकार्यार्थमवतीर्णत्वात्तत्प्रणीतत्वे गीताया नितरामतिशयसिद्धिः ॥ अतएव २ कैश्चिद्व्यासावतारमुखेन गीता अवतारिता ॥ भगवदवतारद्वयानुगृहीतत्वेन सुतरां प्रामाण्यसिद्धिश्च भवति ॥ अतएव हि ३ कैश्चिदुक्तावतारद्वयमुखेन गीता अवतारिता ॥ श्रीकृष्णस्य गीताचार्य इति व्यपदेशस्तु तदर्थानां प्रथमोपदेष्टृत्वादुपपन्नः ॥ शैलीभेदस्तु गीतायाः सर्वातिशायिमोक्षशास्त्रत्वेन सर्वेषां स्पृहणीयतया मन्दतमानुग्रहार्थः ॥ तस्मान्नात्र विवादो युक्त इत्याहुः ॥ तस्मात् श्रीकृष्णेनार्जुनायोपदिष्टा श्रीभगवदवतारद्वयानुगृहीता सकलपुमर्थसाधनभूता श्रीभगवद्गीता मोक्षोपायतया सर्वैश्रेयोऽर्थिभिरादरणीयेति सिद्धम् ॥ स्यादनया परमं मङ्गळम् ॥

---

१. भार. आदि १ ॥ २. आनन्दतीर्थैः ॥ ३. अद्वैतिभिः ॥

॥ अथ श्रीमद्भगवद्गीता प्रारभ्यते ॥

धृतराष्ट्रः ॥ हृषीकेशः पार्थं प्रति तन्मोह १ परिहाराय इदं गीतारूपं वचनमुवाचेत्युक्तम् ॥ किं तद्वचनम् ॥ ब्रूहि ॥

सञ्जयः ॥ अशोच्यानित्यादिकं उपदेशात्मकं वचनं

श्री भगवानुवाच ॥

अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ॥
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ॥ ११ ॥

अशोच्यानिति ॥ त्वं शोचितुं अर्हाः शोच्याः न शोच्याः अशोच्याः तान् प्रति अन्वशोचः अनुशोचितवानसि ॥ प्रज्ञया वादाः वचनानि प्रज्ञावादाः तान् भाषसे च ॥ पण्डा विलक्षणा बुद्धिः एषामस्तीति पण्डिताः गताः असवः प्राणाः येभ्यः ते गतासवः मृताः तान न गतासवः अगतासवः जीवन्तः तांश्च प्रति नानुशोचन्ति ॥ ११ ॥

हे अर्जुन त्वं मूढोऽसि ॥ कोऽयमस्थाने तव मोहः ॥ अत एव ह्युक्तं मया ॥ २ 'कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् ' इत्यादि ॥ कुत इति चेत् ॥ त्वं यान्

१. अर्जुनस्य द्वौ मोहौ ॥ तत्रैकः अनात्मनि अनात्मीये अशोच्ये आत्मत्वाऽऽत्मीयत्वशोच्यत्वप्रतिभासरूपः सर्वप्राणिसाधारणः ॥ अपरस्तु युद्धाख्ये स्वधर्मे हिंसादिदोषबाहुल्यादधर्मत्वप्रतिभासरूपः अस्थानकरुणादिदोषनिमित्तकोऽसाधारणः ॥ तत्राद्यस्य 'नत्वेवाहं'मित्यादिभिरेकोनविंशत्या श्लोकैर्निरासः ॥ द्वितीयस्य तु 'स्वधर्ममपि चावेक्ष्य ' २. ३१.) इत्यादिभिरष्टाभिः श्लोकैः इति विवेकः ॥

२ १. २.

भीष्मादीन् प्रति १ 'येषामर्थे कांक्षितं नो राज्यं भोगाः सुखानि च' ॥ २ 'कथं भीष्ममहं संख्ये' ३ 'यानेव हत्वा न जिजीविषामः' इत्याद्युक्तरीत्या शोचसि ते अशोच्याः शोचितुमनर्हाः ॥ तान् प्रति न त्वया शोकः कार्यः ॥ करोषि च शोकम् ॥ अतस्त्वं मूढोऽसि॥ अशोच्यान् अन्वशोच इत्युच्यते ॥ केचिदशोच्याः शोचन्ति ताननुसृत्य त्वमपि शोचसीति ह्यर्थः स्यात् ॥ न च तदुक्तम् ॥ न मया शोचतः कांश्चिदशोच्याननुसृत्य शोच्यते इति चेत् प्रतीत्यध्याहृत्य अशोच्यान् प्रति त्वमन्वशोच इति मयोच्यत इति गृहाण॥ अनुना शोकस्य चिरानुवृत्तिः सूच्यते ॥ अशोच्यान् अनु लक्षीकृत्य उद्दिश्य त्वमशोच इत्यर्थग्रहणे नैवावकाशश्चोद्यस्य ॥ अशोच इति कथं भूतार्थकस्य लङः प्रयोगः ४ 'पार्थ पश्यैतान् समवेतान् कुरू' निति त्वयोक्तोऽहं सर्वान् बन्धून् समीक्ष्य मदीया इमे सर्वेऽपि नियतं युद्धे प्रक्षीयन्तीति यं शोकमाप्य तेन उपहतस्वभावः सन् ५ 'दृष्ट्वेमान् स्वजनान् कृष्ण' त्यादिकं वचनमवोचं स शोको नाद्याप्युपरतः इदानीमपि ६ शोचन् खलु वर्तेऽहम इति चेत् अशोच इति ङन्तं ७ शोचसीति लङन्ततया विपरिणम्यताम् सतिचैवं न चोद्यावकाशः ॥ अद्यतने जातस्यापि शोकस्य अनद्यतने जातस्य चिरानुवृत्तस्यैव विविधविचित्रानेकदुःखकार्यकरणादसह्यत्वं सूचयितुं अनद्यतनभूतार्थकलङः प्रयोगः ॥ अशोच्यान् प्रति शोचतां मूढत्वे पुत्रान् प्रति शोचितवान् वासिष्ठोऽपि मूढः स्यात् इति चेत् प्रज्ञावादांश्च भाषसे॥ न केवलं अज्ञवदशोच्यान् प्रत्यनुशोचनम् ॥ किंतु अज्ञवद्भाषणं च ॥ नातः परं अनुचितमस्तीति चशब्देन सूच्यते॥ यानि वचनानि तानि च स्वबुद्धिमात्रपरिकल्पितानि अप्रामाणिकानि सतामसंमतानि प्राज्ञानां विरुद्धानि वचनानि तानि च भाषसे ॥ वासिष्ठादयोऽप्यशोच्यान् प्रत्यशोचन् ॥ तथाऽपि तेन न तेषां मौढ्यमापादयितुं शक्यम् ॥ कुत इति चेत् ॥ सतामसंमतानि वचनानि भाषमाणा नाशोचन् किंतु यान् प्रति अहं शोचामि ते अशोच्याः तान् प्रति शोककरणमनुचितमिति जानन् अशोच्यान् प्रति शोककरणमनुचितमिति ज्ञापयंश्चाहं बलवत्या दुर्जयया भगवतो मायया शोचामि अहो मायायाः शक्तिरन्यादृशीति वदन्तः तथा बोधयन्तश्च शोचन् ॥ शोचन्ति चैवमेव तादृशा इतरेऽपि ॥ त्वं तु ८ 'यद्यप्येते न

१. १. ३३. २. २. ४. ३ २ ६. ४. १. २५. ५. १. २८. ६. अत एव पूर्वश्लोके 'सेनयोरुभयोर्मध्ये विषीदन्त'मित्युक्तम् ॥ ७. तेन पूर्वश्लोकस्थेन विषीन्तमित्यनेन न विरोधः ॥ ८. १. ३८.

पश्यन्ति ' १ कथं न ज्ञेयमस्माभिः ' २ ' नरके नियतं वासो भवति ' ३ ' श्रेयो भोक्तुं भैक्षमपीह लोके ' इत्याद्युक्तरीत्या शोककरणमुचितमिति प्रदर्शयन्नेव प्राज्ञवद-प्राज्ञवादानेवाभाषथाः अतस्त्वं मूढः ॥ न तु तथा वदन्तो महान्तः ॥ प्रज्ञया वादाः प्रज्ञायाः वादाः प्रकर्षेण जानन्तीति प्रज्ञाः तेषां प्राज्ञानां अवादाः विरुद्धवादाः ॥ अभ्भक्षन्यायेन स्वप्रज्ञामात्रहेतुकाः प्रमाणरहिता वादाः त्वदीयाः इमे वादाः ॥ माऽस्तु तेषां मौढ्यम् ॥ अशोच्यान् प्रत्यनुशोचनस्य शिष्टानुष्ठितत्वादनुष्ठान युक्त-मिति चेत् शिष्टैर्धर्मबुद्ध्या अनुष्ठितस्यैवानुष्ठेयत्वं न सर्वेषाम् ॥ अन्यथा शिष्टानु-ष्ठितनिष्ठीवनादेरप्यनुष्ठानापत्तेः ॥ अत एव ४ यद्यदाचरति श्रेष्ठः तत्तदेवेतरो जनः॥ स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ' इति वक्ष्यते ॥ प्रज्ञया प्रज्ञाया वा वादाः प्रज्ञानां आवादाः स्वबुद्धिशुद्धिपूर्वकाः सतां संमता प्राज्ञानां अविरुद्धाश्च वादाः तान् भाषसे ॥ तदेतत् मौढ्यं पाण्डित्यं चेत्युभयं विरुद्धम् ॥ अतस्त्वं प्राज्ञवत् भाषसे न तु जानासि ॥ शोकः सिद्धः प्रज्ञा तु वादमात्रस्था न सिद्धा ॥ वसिष्ठादयस्तु यथा भाषन्ते तथा जानते च इति वा ॥ न योत्स्ये इत्युक्त्वा तूष्णीं अवतिष्ठमानं मां प्रति कथं भाषसे इति वचनं युज्यते इति चेत् भाषसे इति लङन्तं ५ अभाषथा इति लङन्ततया विपरिणम्यताम् सति चैवं न चोद्यावकाशः ॥ भूतस्यापि भाषणस्य वर्तमानसामीप्याद्वा किमेवमसंबद्धं प्रलपतीति पुनःपुनर्विमृश्यमानतया वर्तमानतुल्य-त्वाद्वा वर्तमानार्थकलटः प्रयोगः ॥ अशोच्यान् प्रतीति प्रज्ञावादानिति च अनूद्य शोचनं भोषणं चोच्यते ॥ अयुक्तं चेदं असिद्धानुवादसिद्धबोधनरूपदोषापत्तेः ॥ उभयवादिसंप्रतिपन्नस्य सिद्धस्यानुवादः असिद्धस्य बोधनं च हि युक्तम् ॥ असिद्धस्य सिद्धवदनुवादे नेदं सिद्धमिति प्रतिवादी ब्रूयात् ॥ वादिप्रतिवादिनो-रन्यतरस्येदं क्षत्रादिकमित्यसिद्धिदशायां प्राड्विवाकेन त्वं वादिनः स्वमन्याये-नाक्रामसि इत्युक्ते प्रतिवादी नेदं वादिनःस्वमिति साधितं सति चैवं वादिनः स्वमिति कथं सिद्धवदनूद्यते इति ब्रवीति ॥ अतः सिद्धान् भीष्मादीन् अनूद्य असिद्धं शोच्यत्वं विधेयम् ॥ अतः कथमिदमिति चेत् यान् ते इत्यध्याहृत्य

१. १ ३९ २. १. ४४. ३. २ ५. ४. ३. २१. ५. तेन तूष्णीं बभूवेत्यनेन (२. ९.) न विरोधः ॥

यान् प्रति त्वमनुशोचसि ते अशोच्याः यान् वादान भाषसे ते प्रज्ञावादाः इति विभक्तिविपरिणामेन योजनायां असिद्धस्याशोच्यत्वस्य प्रज्ञावादत्वस्य च बोधनमुपपद्यते॥ अध्याहारविपरिणामौ विना यथाश्रुतेनैव उक्तदोषपरिहारो वरमिति चेत् चशब्द एवार्थे ॥ तस्य अशोच्यांश्च प्रज्ञावादांश्चेत्युभयत्रान्वयः ॥ अशोच्यानेव अन्वशोचः प्रज्ञावादानेव भाषसे इति तदर्थः ॥ अग्निमानेव हि धूमवानित्युक्ते यद्यग्निर्न स्यादत्र तर्हि धूमोऽपि न स्यात् अस्ति च धूमः तस्मादस्त्येवाग्निः इत्येवकारसाहित्येनोक्तस्य वह्नेर्विधेयत्ववत् अत्र एवकारार्थकचशब्दसाहित्येनोक्तस्य अशोच्यत्वस्य प्रज्ञावादत्वस्य च विधेयत्वं लभ्यते ॥ अतो नोक्तदोषः ॥ दोषमभ्युपेत्य परिहरणापेक्षया यथा अयं दोषो नापद्येत तथा व्याख्यानं वरम् ॥ 'प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम' ॥ इति न्यायात् ॥ इति चेत् अशोच्याः ननु अशोचः त्वं इति पदच्छेदः ॥ त्वं शोचसि ते अशोच्या ननु अशोच्याः खलु अशोच्यत्वं श्रुतियुक्त्यादिसिद्धं इति ननुना सूच्यते ॥ प्रज्ञा वादान् इति छेदः । वादान् भाषसे ते च प्रज्ञा एकवचनेन स्वप्रज्ञामात्रहेतुकाः हतुहेतुमतो १ रभेदेन व्यपदेशः शास्त्रादौ लोके च प्रसिद्धः ॥ त्वं शोचसि अतो मूढोऽसीत्युक्तम् ॥ पण्डितश्चेन्न शोचेद्वा ॥ मृतान् मरिष्यतश्च प्रति शोचंति हि लोके इति चेत् पण्डिताः पण्डा विलक्षणा आत्मानात्मपरमात्मविषया बुद्धिः तद्वन्तः गतासून् गतप्राणान् मृतान् २ 'मदर्थे त्यक्तजीविता इत्यत्रोक्तरीत्या 'एष्यत्तु निश्चितं यत्तदतीतत्वेन भण्यते' । इति न्यायेन गमिष्यत्प्राणान् मरिष्यतः अगतासून् अमृतान् ३ जीवतश्च प्रति नानुशोचन्ति ॥ जीवतः प्रति पण्डिता नानुशोचन्तीत्युक्ते अपण्डिताः जीवतः प्रति शोचन्तीति प्रतीयते ॥ न तद्युक्तं जीवतः प्रति अपण्डितानां शोकादर्शनात् इति चेत् अगतासूंश्च इत्यत्र चशब्द इवार्थे गतासून् अगतासूनिव न शोचन्ति इत्युच्यते ॥ अतो नोक्तदोषः ॥ अपण्डिताः मृतान् मरिष्यतश्च प्रति मृताः मरिष्यन्तीति शोचन्ति ॥ जीवतः प्रति तु कथमिमे तान् विना जीविष्यंति इति, कष्टमिमे असद्वृत्ता विनंक्ष्यन्ति इति च शोचन्ति ॥ पण्डितास्तु मृतान् मरिष्यतो जीवतश्च प्रति

१ हेतुहेतुमतोरभेदेन व्यपदेशं हेत्वलङ्कारमाहुरालङ्कारिकाः ॥ 'हेतुहेतुमतोरैक्यं हेतुं केचित्प्रचक्षते ॥ लक्ष्मीविलासा विदुषां कटाक्षा वेङ्कटप्रभोः' ॥ इति लक्षणं लक्ष्यं च ॥ २. १. ९. ३ अगतासून् गमिष्यत्प्राणान् इति केचित् ॥

न शोचन्तीति वा ॥ अविद्वांसो मृतान् मरिष्यतश्च प्रति शोचन्ति ॥ विद्वांसस्तु मृता नैवागमिष्यन्ति मरिष्यंतस्तु नियतं मरिष्यन्ति किं शोकेन कृत्यं अतो मा तान् प्रति शोकं कुरुत पश्यतेमान् जीवतोऽपत्यमित्रकलत्रादीन् कथमिमे जीविष्यन्ति इतः परं इति वा १ इमे पुत्रादयः मूढा दुर्वृत्ता इति वा जीवतः प्रति शोचन्ति ॥ पण्डाशब्दित-विलक्षणबुद्धियुक्तास्तु मृतान् मरिष्यतः जीवतश्च प्रति २ न शोचन्ति ॥ मृतानामपुनरावृत्तिनिश्चयात् मरिष्यतां मरणस्यापरिहार्यत्वनिश्चयात् जीवतां रक्षणार्थं सर्व प्राणियोगक्षेमनिर्वाहकस्य परमात्मनो विद्यमानत्वनिश्चयाच्च ॥ पण्डिता इत्युपरि-तनपर्वैकथनात् अविद्वांसः विद्वांसः पण्डिताः इति पर्वभेदोऽयं ज्ञायते ॥ त्वं तु ३ 'कथं भीष्म' मित्यादिना मरिष्यतः प्रति शोचसि ॥ ४ 'यानेव हत्वा न जिजीवि-षामः' इति जीवतः प्रति शोचसि ॥ अतस्त्वं मूढोऽसि ॥ देहान् आत्मनो वा प्रति शोकः क्रियत इति त्वया वक्तव्यं तानुभयान् प्रत्यपि शोको न कार्यः ॥ देहस्य सर्वथा नशिष्णुत्वात् आत्मनोनित्यत्वात् त्वदीयशोकविषयाणां भीष्मादीनां महानुभावत्वेन असद्वृत्तत्वाभावात् ॥ ५ गुरूनहत्वा हि महानुभावा' नितिं त्वयैव ह्युक्तम् ॥ नित्यत्वादात्मनो नाशाभावेन शोकहेतोरभावात् अशोच्यत्वम् । सर्वथा नङ्क्ष्यतां देहानां नाशस्यापरिहार्यत्वेन शोके प्रयोजनाभावादशोच्यत्वम् ॥ अतः पण्डिताः गतासून् देहान् अगतासून् तद्विज्ञानात्मनश्च प्रति नानुशोचंति ॥ त्वं तु 'कथं-भीष्म' मित्याद्युक्तरीत्या भीष्मादीन् प्रति शोचसि ॥ तत्र देहा आत्मेत्युभयमेव वर्तते न ताभ्यामन्यत्किमपि ॥ देहात्मानौ त्वशोच्यौ ॥ त्वं तु शोचसि ॥ अतो मूढोऽसि ॥ ११ ॥

१. 'कृत्वा पापान्यपि खलु मया पोषिताः शैशवे ये निद्राऽऽहारावपि विजहता शिक्षिता ये कलाम् ॥ प्रादुर्भूताः स्वयमिव हि ते प्राक्तनाद्दृष्टलब्धप्रज्ञोन्मेषा इव च तनया न स्मरन्त्यात्मनोऽपि' ॥ इत्ययं श्लोक उदाहर्तव्यः ॥ २. अ मिथ्यात्वनिश्चयात् ॥ न हि शुक्तिरजततत्त्वज्ञानेन रजतसर्पभ्रमाप-नयनानन्तरमपि तन्निमित्तकहर्षभयकंपादिकं संभवति ॥ नापि हि पित्तविकारवतः कदाचिद्गुडे तिक्तता प्रतिभासेऽपि पित्तदोषापगमेन गुडे मधुरत्वनिश्चयानन्तरमपि तिक्तार्थं गुडे प्रवृत्तिः संभवति ॥ तद्वत् आत्मस्वरूपज्ञानेन तदज्ञानेऽपनीते तत्कार्यभूतोऽशोच्ये शोच्यत्वभ्रमो नावतिष्ठते इति भावः ॥

३ २. ४. ४. २. ६. ५. २. ५

अर्जुनः ॥ अशोच्यान् प्रत्यनुशोचनात्त्वं मूढोसीत्युक्तम् ॥ कथमशोच्यास्ते ॥ युद्धस्य प्रारप्स्यमानत्वादासन्नविनाशाः शोच्या एव हि ते ॥ शोचन्ति ह्यासन्नविनाशान् प्रति लोके ॥ नित्यत्वादात्मनां सर्वथा नश्वरत्वाच्च देहानां अशोच्यता इत्युक्तमिति चेत् आत्मनां नित्यत्वं कथम् ॥ दृश्यते हि जनिर्मृतिश्चात्मनां ब्रूहि ॥

कृष्णः ॥ न त्वेवाहं जातु नाऽऽसं न त्वं नेमे जनाधिपाः ॥
न चैव न भविष्यामः सर्वे वयमतः परम् ॥ १२ ॥

नेति ॥ अहं तु जातु कदाचिदपि न आसं इति नैव त्वं न आसीः इति नैव इमे जनानां आधिपाः जनाधिपाः राजानः न आसन् इति नैव ॥ अहं आसमेव त्वं आसीरेव इमे आसन्नेव ॥ सर्वे वयं अतः अस्मात् कालात् परं भविष्यत्कालेऽपि न भविष्यामः इति च नैव ॥ अहं भविष्याम्येव त्वं भविष्यस्येव इमे भविष्यन्त्येव ॥ १२ ॥

यत् पूर्वं नासीत् यत इदानीं नास्ति यत् इतः परं न भविष्यति तानि त्रीण्यनित्यानि ॥ कथं भीष्ममित्यादिना त्वं यान् प्रति शोचसि इमे जनाधिपाः राजरूपाः आत्मानः नित्याः ॥ इमे नित्या इत्युक्ते अहं त्वं च कथमिति चेत् त्वमपि नित्यः अहमपि नित्यः ॥ कथमिति चेत् पूर्वमिदानीं इतः परं च विद्यमानत्वात् ॥ अहं पूर्वं जातु कदाचिदपि नाऽऽसमिति न किंतु आसमेव ॥ नात्र संशयः निश्चितमेवैतत् ॥ अत एव नाऽऽसमिति नेति द्विर्नञः प्रयोगः ॥ 'द्वौ नञौ प्रकृतमर्थं सातिशयं गमयतः' इति न्यायात् ॥ एवेति तु प्रमाणप्रसिद्ध्योतनाय॥ देहेभ्यः आत्मनां जीवेभ्यः स्वस्य च विशेषसूचनाय तुशब्दः ॥ त्वं पूर्वं नाऽऽसीरिति न॥ किंतु आसीरेव॥ इमे जनाधिपाः नाऽऽसन्निति न ॥ किंतु आसन्नेव ॥ अस्मात्कालात्परमपि अहं त्वं इमे वयं सर्वे न भविष्याम इति च नैव ॥ किंतु भविष्याम एव ॥ अहं इदानीमस्मि त्वमिदानीमसि इमे इदानीं संति इति वर्तमानकालसंबन्धस्तु स्फुटत्वान्नोक्तः एवं कालत्रयेऽपि विद्यमानत्वान्नित्या आत्मानः ॥ जन्ममृती तु देहस्यैव न त्वात्मनाम् ॥ अतो नाशाभावादशोच्याः ॥ 'कथं भीष्ममहं संख्ये' इति शोचन्तं त्वां प्रति 'नेमे जनाधिपा' इत्येव वक्तव्यम् ॥ तथाऽपि त्वत्प्रेमास्पदस्य मम मत्प्रेमास्पदस्य तव च युद्धे छेदभेदादिकं स्यात् इति शङ्काऽनुदयाय मम तव च नित्यत्वमुक्तम् ॥ जीवानां खलु नित्य-

एव स्तन्यपाने प्रवृत्तिदर्शनात् ॥ गजेंद्रादीनां पूर्वदेहानुस्मरणात् सुखदुःखादि-वैचित्र्यस्य निर्हेतुकत्वापत्त्या पूर्वजन्मपुण्यपापहेतुकत्वस्यैव वाच्यत्वाच्च उत्तरोत्तरदेहस्थस्यात्मनः पूर्वपूर्वदेहे अवस्थानसिद्धिः॥ देहांतरानुभाव्यफलकविविधविधिविधान प्रवृत्तिदर्शनादुत्तरोत्तरदेहानुसन्धानासिद्धिः ॥ तयाचोत्तरोत्तरदेहेषु पूर्वपूर्वदेहस्थितस्याऽऽत्मनोऽवस्थानासिद्धिः ॥ एवमात्मनामनादित्वादनन्तत्वाच्च नित्यत्वं यदात्मन्नामुक्तं तद्युक्तम् ॥ धीरः तत्र देहातिरिक्ताऽऽत्मविषये जीवानामनन्तत्वविषये च न मुह्यति ॥ त्वं तु मुह्यन् शोचसि ॥ अतस्त्वं मूढः ॥ त्वद्वादाश्च प्रज्ञावादाः ॥

अ॥ अर्जुनः॥ देहोऽन्यः आत्माऽन्यः इति देहादात्मानं पृथक्कृत्य आत्मनो नित्यत्वमाह मित्यादिना नित्यत्व साधितम् ॥ तत्कथं स्थूलोऽहं गौरोऽहं इत्यादिप्रतीत्या देह एवाऽऽत्मेति वक्तव्यत्वात् ॥ अस्तु वा देहादन्य एवाऽऽत्मा तथाऽपि तस्य नित्यत्वं कथम् ॥ जननमरणदर्शनात् जातो मृत इति व्यवहाराच्च ॥ वद ॥

कृष्णः ॥ देहिनः अस्मिन् देहे कौमारं यौवनं जरा यथा तथा देहान्तरप्राप्तिः ॥ यथा आत्मनः कौमाराद्यवस्थानाशे न नाशः यौवनाद्यवस्थांतरोत्पत्तौ च नोत्पत्तिः तथा पूर्वदेहनाशे न नाशः उत्तरदेहोत्पत्तौ च नोत्पत्तिः ॥ जन्ममरणे तु देहस्यैव न जीवस्य ॥ अतो नित्यवोक्तः देहादन्यत्वोक्तिश्च युक्ता ॥ एवं देहादन्यत्वे नित्यत्वे च सिद्धे स्थूलोऽहं गौरोऽहमित्यादिप्रतीतिव्यवहारौ जन्ममरणप्रतीतिव्यवहारौ च कथमिति चेत् प्रतीतिरियं भ्रान्तिः ॥ व्यवहारश्चायं भ्रान्तिमूलकः ॥ अथवा स्थूलोऽहमित्यादौ अहमित्यादः महेह इत्यादिरर्थः ॥ जन्ममरणे तु देहसंयोगवियोगौ तौ चात्मनः स्तः ॥ अतो न किंचिदप्यनुपपन्नम् ॥ तत्र एवंसति नित्यत्वे सति धीरः धीमान् न मुह्यति न शोचति ॥ आत्मनो नित्यत्वज्ञानवान् धीरः तत्र नाशे उत्पत्तौ च न मुह्यति मोहं विपरीतज्ञानं न प्राप्नोति॥ देहोत्पत्तिविनाशाभ्यां आत्मन उत्पत्तिं विनाशं च न जानाति ॥ धीरः तत्र आत्मनो नित्यत्वविषये न मुह्यति न भ्रमति ॥ त्वं तु मुह्यसि अतो मूढोऽसि ॥

तथा देहान्तरप्राप्तिरित्युक्त्या देहिनः अस्मिन् वर्तमाने देहे अवस्थाभेदवद्देहभेदेऽपि आत्मा एक एव न तस्य देहभेदाद्भेदः इत्युक्तं भवति ॥ तत्कथम् ॥ भिन्नयोर्देहयोरेक आत्मा कथं स्यात् इति चेत् कौमारं यौवनं जरा यथा तथा देहांतराणां अत्यन्तविलक्षणानां अन्येषां अनेकेषां स्वाप्नदेहानां

[1]सोमपादेरिव योगैश्वर्यकालपतदेहानां च प्राप्तेः ॥ अवस्थानां भेद इव अवस्थावतां देहानां भेदेऽपि नाऽऽत्मनो भेदः सोऽहमित्यादिप्रत्यभिज्ञाबलात् ॥ धीरः तत्र देहभेदादात्मभेदे विषये न मुह्यति ॥ उक्तरीत्या स्थूलशरीरादात्मनो भेदोऽस्तु ॥ लिंगशरीरात् कारणशरीराच्चात्मनो भेदः कथं इति चेत् देहिनः अस्मिन् देहे यथा कौमारं यौवनं जरा तथा देहान्तरप्राप्तिः ॥ कौमाराद्यवस्थाविशिष्टस्थूलदेहस्येव देहांतरस्य स्थूलाच्छरीरादन्यस्य लिङ्गशरीरस्य कारणशरीरस्य च प्राप्तिः यथा कौमाराद्यवस्थाभेदेन अनेकरूपात् स्थूलशरीरात् भिन्न आत्मा तथा कर्मभेदात्सुरनरतिर्यगाद्यवस्थाभेदेनानेकरूपात् लिङ्गशरीरात् कारणशरीराच्च भिन्न एवाऽऽत्मा ॥ तयोरपि ब्रह्मज्ञानादपगमश्रवणात् ॥ वक्ष्यते च ॥ [2]'कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः ॥ जन्मबन्धविनिर्मुक्ता पदं गच्छन्त्यनामयम्' इति ॥ स्थूलशरीराद्भिन्नत्वं [3]'वासांसीत्यत्र, सूक्ष्मकारणशरीराभ्यां भिन्नत्वं च [4]'अव्यक्तोऽयमचिन्त्योऽय'मित्यत्र वक्ष्यते ॥ सत्यम् ॥ एवमेवयं शास्त्रमर्यादा ॥ तयाऽपि मदीया [5]मे म्रियेरन् हन्ताचाहमेतेषां स्यामिति वध्यघातुकभावानुसन्धानेन शोचामीति चेत् ॥ देहिनः एकस्य तव अस्मिन् देहे यथा कौमारं यौवनं जरा तथा देहान्तरप्राप्तिः ॥ अन्तरशब्दो विशेषवचनः परिदृश्यमानानां भीष्मद्रोणादिसर्वदेहानां प्राप्तिः॥ एकस्मिन् देहे अवस्थानामिव अवस्थावतां भीष्मद्रोणादिसर्वदेहानां देवनरतिर्यगादिनानादेहभिन्नानां सर्वेषां देहानां च प्राप्तिः तव एकस्यैव ॥ त्वमेक एव सर्वेषु देहेषु आत्मासन्नास्से ॥ [6]'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा ॥ कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्चे'ति श्रुतिः ॥ तत्र एवंसति धीरः वेदशास्त्रपुराणाद्यवमर्शजनितात्मैकत्वनिश्चयज्ञानवान् तत्र आत्मैकत्वविषये न मुह्यति ॥ त्वं तु आत्मनः सर्वेषु देहेषु एकत्वमजानन् वध्यघातुकभेदानुसन्धानेन शोचसि ॥ अतो मूढोऽसि ॥ नित्यत्वविभुत्वयोः स्थापनादन्ये पक्षा निराकृता वेदितव्याः ॥ १३ ॥

---

१ 'एकस्तपस्व्यहमथांभसि मत्स्यमज्ञात् पञ्चाशताऽऽसमृतं पञ्चसहस्रसर्गः ॥ नान्तं व्रजाम्युभयकृत्यमनोरथानां मायागुणैर्हृतमतींर्विषयेऽर्थभाव.' ॥ इति भाग (९. ६ ५३.) स्पष्टमेतत् श्रीविष्णुपुराणे ४ अंशे २ अध्याये ॥ २ २ ५१. ३ २. २२ ४ २. २५ ५ श्वे ६. ११.

अर्जुनः ॥ अशोच्यान् प्रति शोचन् त्वं मूढोऽसीत्युक्तम् ॥ शोकस्तावत् द्वेधा संभवति ॥ भीष्मद्रोणादीनां अहन्तव्यानां हानिः भविष्यति इति, तेषां हनने मम सुखहानिः तद्दर्शनस्पर्शनसल्लापादेः सुखहेतोरभावात् ॥ दुःखप्राप्तिश्च छेदभेदादि-विकृतदेहदर्शनादेः दुःखहेतोः सत्वात्॥ इति च॥ तत्राद्यः, अहन्तव्यानां हानिर्भविष्यतीति न त्वया शोकः कार्यः ॥ तेषां हानेरभावात् ॥ जीवस्य नाशाभावात् देहस्य सर्वथा नाशात् तन्नाशेऽपि प्रतिनिधिलाभसद्भावात् देहान्यजीवसिद्ध्या देहनाशे जीवनाशा-भावात् इति त्वदुक्त्या परिहृतः ॥ द्वितीयस्तु मां बाधते ॥ अतः शोच्या एव ते ॥ अतः अशोच्यान् प्रति शोचन् प्रज्ञावादान् भाषमाणश्च त्वं मूढ इति मां प्रति कथ-मुच्यते ॥ वद ॥

कृष्णः ॥ मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः ।
आगमापायिनोऽनित्यास्तांतितिक्षस्व भारत ॥ १४ ॥

मात्रेति ॥ हे कौन्तेय अर्जुन मीयन्ते ज्ञायन्ते इति मात्राः शब्दादयो विषयाः तासां स्पर्शाः इन्द्रियैः सह संबन्धाः मीयन्ते ज्ञायन्ते आभिः विषयाः इति मात्राः इन्द्रि-याणि तासां स्पर्शाः विषयैः सह संबन्धाः शीतं च उष्णं च सुखं च दुःखं च शीतोष्ण-सुखदुःखानि तानि ददतीति शीतोष्णसुखदुःखदाः तु एव तथाऽपि ते आगमः उत्पत्तिः अपायः नाशः आगमश्च अपायश्च आगमापायौ तौ एषां स्तः इति आगमापायिनः न नित्याः अनित्याः अतः तान मात्रास्पर्शान् तितिक्षस्व सहस्व ॥ १४ ॥

सुखहानिः दुःखप्राप्तिश्च इति यदुक्तं तत्सत्यम् ॥ तथाऽपि न त्वया शोकः कार्यः ॥ कुतः इति चेत् मात्राणां मीयंते ज्ञायन्ते इति मात्राः इन्द्रियग्राह्याः शब्द-स्पर्शरूपरसगन्धाख्या विषयाः तासां स्पर्शाः तत्तद्ग्राहकैः श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यै-रिन्द्रियैः संबन्धाः मीयन्ते ज्ञायन्ते आभिरिति मात्राः तत्तद्विषयविषयकज्ञानजनकानि इन्द्रियाणि तासां स्पर्शाः तत्तद्ग्राह्यैः विषयैः संबन्धाः इति वा मात्राः इन्द्रियाणि स्पृश्यन्ते ज्ञायन्ते इति स्पर्शाः विषयाः मात्रासहिताः स्पर्शाः इति वा मात्रास्पर्शाः ॥ विषयेन्द्रियसंबन्धा इति यावत् ॥ ते, मात्रा स्पर्शाः इति भिन्ने पदे ॥ मात्रा इति तृती-यान्तम् ॥ माता प्रमाता ज्ञाता जीवः तेन मात्रा जीवेन सह स्पर्शाः विषयाणां इन्द्रिय-

द्वारा संबन्धाः ते वा ॥ प्रथमं मीयन्ते ज्ञानेन्द्रियैः ज्ञायन्ते इति मात्राः पश्चात् कर्मेन्द्रियैः उपभोगाय स्पृश्यन्ते इति स्पर्शाः मात्राश्च ते स्पर्शाश्च मात्रास्पर्शाः कलत्रपुत्रमित्रादयः स्रक्चन्दनवनितादयश्च भोग्यपदार्थाः ते वा अनुभूयमानाः शीतोष्णसुखदुःखदाः ॥ शीतोष्णशब्दौ लक्षणया शब्दस्पर्शरूपरसगन्धरूपविषयबोधनद्वारा तदनुभवं बोधयतः ॥ शीतोष्णाभ्यां, विषयानुभवद्वारेत्यर्थः ॥ सुखं दुःखं वा ददतीति शीतोष्णसुखदुःखदाः तादृशा एव ॥ तु शब्द एवार्थे ॥ विषयेन्द्रियसंबन्धाः इष्टविषयानुभवद्वारा सुखप्रदाः अनिष्टविषयानुभवद्वारा दुःखप्रदाश्चैव ॥ विषयेभ्यः पृथक् शीतोष्णयोर्ग्रहणं तु अनुकूलं प्रतिकूलं वा अध्यात्ममुत्पाद्य तेन सुखं दुःखं वा ददति इत्यर्थबोधनाय ॥ शीतं उष्णं सुखं दुःखं च ददतीति तादृशा वा ॥ शीतोष्णेति सुखदुःखयोर्दृष्टान्तः ॥ सलिलसंयोगः शीतमिव आतपसंयोगः उष्णमिव च इष्टविषयसंयोगः सुखं अनिष्टविषसंयोगो दुःखं च ददाति ॥ ते भोग्यपदार्थाश्च शीतं उष्णं सुखं दुःखं च ददतीति तादृशाः ॥ यच्छीतप्रदं तत्सुखप्रदं इति शीतप्रदस्य सुखप्रदे यदुष्णप्रदं तद्दुःखप्रदं इति उष्णप्रदस्य दुःखप्रदे चान्तर्भावात्सुखदुःखाभ्यां पृथक् शीतोष्णयोर्ग्रहणं व्यर्थं इति चेत् देशकालव्यक्तिभेदेन वैपरीत्याच्छीतोष्णयोः सुखदुःखानियमो नास्ति। अतः पृथग्ग्रहणम् ॥ सुखदुःखेत्यत्र क्रमव्युत्क्रमयोरुभयोरपि विवक्षणादनुपपत्त्यभावेन पृथग्ग्रहणं व्यर्थमेवेति चेत् सुखदुःखाभ्यां पृथक् शीतोष्णयोर्ग्रहणं तु अनुकूलं प्रतिकूलं वा अध्यात्ममुत्पाद्य ताभ्यां सुखं दुःखं च ददतीति सूचनाय ॥ शीतोष्णाभ्यां सुखदुःखदाः इति वा ॥ शीतोष्णाविव सुखदुःखप्रदा इति विशिष्टस्य दृष्टान्तो वा ॥ शीतः उष्णश्च देशकालव्यक्तिभेदेन अनुकूलौ प्रतिकूलौ वा सन्तौ यथा सुखं दुःखं वा दत्तः तथा मात्रास्पर्शा अपि देशकालव्यक्तिभेदेन अनुकूलाः प्रतिकूला वा सन्तः सुखं दुःखं वा ददति ॥ तथाऽपि तान् तितिक्षस्व विफलीकुरु ॥ सहस्व इति वा ॥ उपेक्षस्व इति वा ॥ सुखदुःखप्रदाश्चेत् कथं तेषां तितिक्षणं संभवतीति चेत् ॥ तुशब्द एवार्थे ॥ मात्रास्पर्शास्तु मात्रास्पर्शा एव शीतोष्णसुखदुःखप्रदाः किं काकुस्वरेणेदं लभ्यते ॥ न किंतु इष्टेषु स्नेहरूपेण अनिष्टेषु द्वेषरूपेण अनात्मीयेषु आत्मीयताभ्रमरूपेण अनात्म-

नि देहादौ आत्मत्वभ्रमरूपेण अस्वतन्त्रे आत्मनि स्वतन्त्रत्वभ्रमरूपेण चाभिमानेन सहिता एव सुखदुःखप्रदाः ॥ त्वं तु विवेकादभिमानं परित्यज्य मात्रास्पर्शान् तितिक्षस्व ॥ यथा सुखदुःखदा न स्युः तथा कुरु ॥ अभिमानसहिता एव सुखदुःखप्रदा न केवला इति कथं ज्ञायते इति चेत् आगमापायिनः खलु ते ॥ आगमः उत्पत्तिः अपायः नाशः उत्पत्तिविनाशवन्तः कादाचित्काः अतः केवलाः ते न सुखदुःखप्रदाः ॥ इदं कथं, कादाचित्कैरपि मात्रास्पर्शैः तदानीं सुखदुःखानुभवदर्शनात् इति चेत् मात्रास्पर्शाः आगमापायिनः इति मात्रास्पर्शानां कादाचित्कत्वं नोच्यते ॥ प्रयोजनाभावात् ॥ किंतु मात्रास्पर्शानां यत् सुखदुःखप्रदत्वं तत् कादाचित्कं इत्युच्यते ॥ सविशेषणे विधिनिषेधौ विशेष्ये बाधाद्विशेषणमुपसंक्रामतः इति न्यायात् ॥ कदा सुखदुःखप्रदाः कदा तथा न इति चेत् अनुभवानुरोधेन जाग्रत्स्वप्नयोस्सुखदुःखप्रदाः सुप्तिमूर्च्छादौ तु तथा न ॥ तत्कुत इति चेत् जाग्रत्स्वप्नयोरभिमानसत्वात् सुखदुःखप्रदत्वं सुप्तिमूर्च्छादावभिमानाभावात्सुखदुःखप्रदत्वं न ॥ अतः अभिमानं परित्यज्य मात्रास्पर्शान् तितिक्षस्व ॥ अभिमानाभावात् सुप्तिमूर्च्छादौ सुखदुःखप्रदत्वं नास्तीति कुतः इति चेत् तदानीं विषयेन्द्रियसंबन्धे सत्यपि सुखं वा दुःखं वा नोत्पद्यते ॥ तत्र हेतुर्वाच्यः ॥ न तावद्विषयेन्द्रियसबन्ध एव नेति युक्तम् ॥ इतरेन्द्रियाणामुपरमेऽपि सर्वशरीरवर्तिनस्त्वगिन्द्रियस्यानुपरमात् ॥ यत्रकुत्रापि शयानस्यैव सुप्तिमूर्च्छादिदर्शनेन तत्तदधिष्ठानस्पर्शस्य त्वगिन्द्रियविषयस्यापि सत्याच्च त्वगिन्द्रियस्पर्शसंबन्धरूपविषयेन्द्रियसंबन्धस्यावर्जनीयत्वात्॥ त्वगिन्द्रियविषयस्य स्पर्शस्य सदा सत्वसूचनायैव तद्विशेषशीतोष्णग्रहणम् ॥ इन्द्रियमनसोः संबन्धो विषयानुभवे हेतुः ॥ 'आत्मा मनसा संयुज्यते मन इन्द्रियेण इन्द्रियमर्थेन ततः प्रत्यक्षं इति हि स्थितिः ॥ तदानीं त्वगिन्द्रियमनसोः संबन्धाभावादनुभव एव नास्तीति च न युक्तम् ॥ त्वगिन्द्रियस्य सर्वशरीरव्यापित्वेन मनसश्च शरीरे सत्वेन तयोः संबन्धस्य सर्वदा सत्वात् ॥ आत्ममनसोः संबन्धो नास्तीति च न युक्तम ॥ आत्ममनसोः संबन्धस्य सर्वदा सत्वात् ॥ आत्मनो मनसा मनसः इन्द्रियेण इन्द्रियस्य विषयेण च संबन्धसत्वेन तदानीमनुभवो जायते ॥ सुखदुःखप्रदत्वं च नास्ति ॥ अतस्तत्र अभिमानाभाव एव हेतुर्वाच्यः ॥ विषयेन्द्रियसंबन्धं अनु-

भवं चाभ्युपेत्य अनुभवाभावात्सुखदुःखप्रदत्वं नास्तीति कुतो वक्तव्यम् ॥ सुखदुःखहेतोः अनुभवस्य सुप्त्यादावभावात् सुखदुःखप्रदत्वं नेति कुतो न स्यात् इति चेत् सुप्त्यादावनुभवाभाव एव कुत इत्याक्षेपे अभिमानाभावादनुभवाभावः इति वक्तव्यतया अभिमानाभावात् सुखदुःखप्रदत्वं नेत्युच्यते ॥ अभिमानाभावादनुभवाभावः अनुभवाभावात्सुखदुःखप्रदत्वाभावः इति पर्यवसानम् ॥ अभिमानाभावेऽपि विषयेन्द्रियसंनिकर्षे विषयानुभवानुभवात् अभिमाने अनुभवः तदभावे न इति कथं वक्तुं शक्यमिति चेत् अभिमानाभावादनुभवाभाव इत्यत्र अनुभवशब्देन सुखदुःखहेतोः अपेक्षाबुद्धिशब्दितहानोपादानादिबुद्धिरूपानुभवो विवक्षितः॥ सच्च अभिमाननियतः॥ असत्यप्यभिमाने जाग्रत्स्वप्नयोरिव सुप्त्यादौ विषयेन्द्रियसंनिकर्षाज्जायमानोऽनुभवस्तु उपेक्षाबुद्धिरूपःन सुखदुःखयोर्हेतुः ॥ विवेकादभिमानत्यागेन विषयेन्द्रियसंनिकर्षेऽपि उक्तरूपस्य सुखदुःखहेतोः अपेक्षाबुद्धिरूपस्यानुभवस्योदयं निरुध्य मात्रास्पर्शानां तितिक्षणं शक्यं कर्तुम् ॥ अतस्त्वं अभिमानं परित्यज्य मात्रास्पर्शान् तितिक्षस्व ॥ जाग्रत्स्वप्नयोरभिमानसत्वे सुखदुःखहेतुरनुभवः तदभावे न सः अतः विवेकादभिमानं परित्यज्य मात्रास्पर्शान् तितिक्षस्व इति वक्तव्ये सुप्तिपर्यन्तमनुधावनं किमर्थम्॥ किंच सुप्ताविव विषयान् माऽनुभूः इति नेह विवक्षितम् ॥ किन्तु अनुभवन्नपि विषयान् अभिमानपरित्यागेन तस्यानुभवस्य सुखदुःखहेतुतां दूरीकृत्य अनुभूयमानास्ते विषयाः यथा सुखदुःखप्रदाः न स्युः तथा कुर्वित्येव विवक्षितम् ॥ अतः कथमिदमिति चेत् सुप्तौ मनसः [१] पुरीतति प्रवेशेन यथा ज्ञानसामान्याभावादनुभवाभावः तथा जाग्रत्यपि मनसः भगवति प्रवेशेन तदन्यविषयकज्ञानाभावादनुभवाभावं संपाद्य [२] 'प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नाऽऽन्तरं' इत्याद्युक्तरीत्या सुप्ताविव जाग्रत्यपि परमानन्दे स्थातव्यं इत्यपि विवक्षितम् ॥ किंच अभिमानं परित्यज्य तितिक्षस्वेत्युक्तया लब्धोदयायाः केन हेतुना अभिमानाभावः सुलभः इत्याकांक्षायाः पूरणार्थं सुप्तौ प्राज्ञनामकपरमात्मपरिष्वङ्गादिव जाग्रत्यपि परमात्मनि मनःप्रवेशनादभिमानाभावः सुलभ इति अभिमानत्यागोपायबोधनमपि चिकीर्षितम् ॥ अतः सुप्तिपर्यन्तमनुधावनमित्यलं अधिकजल्पनेन ॥ अस्त्वेवं मात्रास्पर्शानां सुखदुःखप्रदत्वस्य कादाचित्कत्वम् ॥ तथाऽपि अनित्यस्यापि गङ्गोदकादेः प्रवाहतो नित्यत्वदर्शनात् सुखदुः-

१. नाडीविशेषे॥ २. बृ. ६. ३. २१.

खप्रदत्वं प्रवाहतो नित्य इति स्यात् ॥ ततश्च अभिमानाभावदशायामपि तत्सद्भाव आवश्यकः स्यात् ॥ तथासति अभिमाने सति सुखदुःखप्रदत्वं तदभावे नेति वक्तुं मशक्य स्यात् ॥ अतः कथमिद इति चेत् मात्रास्पर्शाः अनित्याः सर्वथा अनित्या कथमनेनोक्तशंकापरिहारः इति चेत् सिद्धेसत्यारम्भो नियमाय इति न्यायात् · आगमापायिन इत्यनेन अनित्यत्वं सिद्धे पुनरनित्या इत्युक्तया अनित्यत्वस्यास्य सर्वथा अनित्यत्व एव पर्यवसानमित्यदोषः ॥ अतः सर्वमिदं विमृश्य मात्रास्पर्शान् विफली-कुरु ॥ अभिमानरहितकेवलमात्रास्पर्शानां सुखदुःखप्रदत्वाभावः सर्वानुभवसिद्धः ॥ न हि स्वापत्यापेक्षया परमसुन्दरस्यापि परकीयापत्यस्य दर्शनं सुखाय भवति॥ न हि चात्मीयजनापेक्षया गुणाधिकानामप्यन्येषां छेदभेदकार्श्यादिना विकृतस्य शरीरस्य दर्शनं दुःखाय भवति ॥ कथ तितिक्षितुं शक्यमिति चेत् 'धीरस्तत्र न मुह्यती'ति पूर्वश्लोकचतुर्थपादः काकाक्षिन्यायादस्मिन्नपि श्लोके संबध्यते ॥ धीरः मात्रास्पर्शविषये न मुह्यति ॥ तत्कृतहर्षविषादौ न प्राप्नोति॥ अतः त्वं धैर्येण अभिमानं परित्यज्य मात्रास्पर्शान् तितिक्षितुमर्हसि॥ उत्तरश्लोके धीरमित्युक्तयनुरोधात् धैर्येणेति शेषो वा॥ यद्यभिमानं परित्यज्य मात्रास्पर्शान् तितिक्षितुं शक्नोषि तर्हि भीष्मादिनाशे मम सुखहानिर्भविष्यतीति तव शोको न जायेत ॥ अभिमानेन हि सर्वं शोच्यं भवति ॥ अतः अशोच्या एव ते भवन्ति ॥ सतिचैवं अकृत्वाऽभिमानत्यागं अशोच्यानेव शोच्यान् मन्यमानस्त्वं मूढः त्वद्वादाः प्रज्ञावादाः ॥ देवतांशसंभूतस्य राजर्षिवंश्यस्य च तव एवमधैर्यादशोच्यान प्रत्यनुशोचनं प्रज्ञावादभाषणं चानुचितम् ॥

मात्रास्पर्शा सुखदुःखदा एव ॥ तथाऽपि तितिक्षस्व ॥ कुतः इति चेत् ते आगमापायिन मात्रास्पर्शानां आगमापायित्वरूपविशेषणदाने प्रयोजनाभावात् तत्प्रकृतार्थासाधकत्वाच्च सुखदुःखप्रदत्वस्य जाग्रत्स्वप्नयोरागमवन्तः सुप्तिमूर्च्छादावपायवन्तः अतः अनित्याः नित्य सुखदुःखरूपकार्यं एषां नास्ति ॥ अनित्यं सुखदुःखरूपकार्यं एषामस्तीति वा ॥ कुत एवमिति चेत् अभिमानाभावात् सुप्त्यादौ सुखदुःखप्रदत्वाभावः जाग्रत्स्वप्नयोरभिमानसत्वात् सुखदुःखप्रदत्वम् । अतः अभिमानत्यागेन तांस्तितिक्षस्व ॥ मात्रास्पर्शाः सुखदुःखदाः एव ॥ तथाऽपि तांस्तितिक्षस्व ॥ कुत इति चेत् आगमापायिनः अनित्याः आगमापायित्वादनित्याः यदि सर्वदा सुखदुःखप्रदाःस्युः तर्हि तितिक्षणमशक्यम् ॥ न च तथा ॥ कदाचित् केषांचित् सुखं दुःखं

वा जनयन्ति केषांचित् न ॥ दृश्यन्ते हि लोके अविवेकिनां सुखदुःखप्रदाः विवेकिनां पुनरनीदृशाः ॥ अतो विवेकालम्बनेन १ तांस्तितिक्षस्व ॥

मात्रास्पर्शाः सुखदुःखदा एव तथाऽपि तांस्तितिक्षस्व॥ कुत इति चेत् आगमापायिनः अतोऽनित्याः अतस्तितिक्षस्व ॥ सुखदुःखप्रदाः मात्रास्पर्शाः परस्सहस्राः व्यतीताः भविष्यन्ति च परस्सहस्राः ॥ सांत चैवं कुतस्तत्र हर्षः शोको वा ॥ अतो विमृश्य तांस्तितिक्षस्व ॥

अ ॥ अर्जुनः॥ भीष्मादिसर्वशरीरेषु त्वमेक एवाऽऽत्मा सन्नास्से इत्युक्तम् ॥ तत्कथम् ॥ शरीरभेदेन सुखदुःखादिभेदोपलंभात् ॥ ब्रूहि ॥

कृष्णः ॥ यद्यात्मनः सुखदुःखादिकं स्यात् तर्हि तद्भेदादात्मभेदो वक्तव्यः स्यात् ॥ न च तस्य सुखादिकम् ॥ किंतु मात्रास्पर्शाः आगमापायिनः इदं च षष्ठ्यंतम् उत्पत्तिविनाशशालिनः देहभेदेन भिन्नस्य अनात्मनः प्रकृतिपरिणामस्य अन्तःकरणस्यैव शीतोष्णसुखदुःखदाः ॥ नत्वात्मनः ॥ तेऽप्यनित्याः अनियतरूपाः नियमेन सुखस्य वा दुःखस्य वा अहेतवः ॥ देशकालव्यक्तिभेदेन वैपरीत्यात् ॥ अतः मात्रास्पर्शान् तत्कृतशीतोष्णसुखदुःखादींश्च तितिक्षस्व ॥ उपेक्षस्व ॥ सुखदुःखादिरहितं शुद्धमात्मानं सुखदुःखादिमन्तं मा ज्ञासीः अन्तःकरणधर्माणां सुखदुःखादीनां आत्मनि संबन्ध एव नास्ति ॥ आत्मनि सुखदुःखादिप्रतीतिस्तु तत्तदुपाधितादात्म्याध्यासमूला भ्रान्तिः ॥ अतो नानुपपत्तिः ॥ त्वं कौन्तेयत्वात् भारतत्वाच्च उभयकुलविशुद्धोऽसि ॥ तेन च अध्यात्मतत्वोपदेशयोग्यः अज्ञानायोग्यश्चासि ॥ मा तत्वानि भापयन्ती ब्रह्मविद्या तस्यां रतश्चासि ॥ अतएव हि त्वया 'यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे' इति प्रार्थितोऽहम् ॥ अतस्त्वया मात्रास्पर्शानां तितिक्षणं कार्यम् ॥ तितिक्षोरेव हि ब्रह्मविद्याऽधिकारः ॥ २ 'शान्तो दान्त उपरतस्तितिक्षुस्समाहितो भूत्वा आत्मन्येवाऽऽत्मानं पश्येत्' इति श्रुतिः ॥ पूर्वत्रोक्तमखिलमत्राप्यनुसन्धेयम् ॥

१. इति विनैव काकुस्वरं व्याख्यातुं शक्यम् ॥ २. मु १. २. १२.

वि ॥ अर्जुनः ॥ आत्मनां नित्यत्वात् देहस्य सर्वथा नाशाच्च न शोकः कार्यः इत्युक्तम् ॥ समर्थितं च नित्यत्वमात्मनाम् ॥ अस्तुनाम तत्तथा ॥ शस्त्रास्त्रपातशीतोष्णमृदुपरुषस्पर्शादिना तेषां मम च दुःखं भविष्यतीति शोचामि ॥ एवं शोचन्नहं कथं मूढः स्याम् ॥ वद ॥

कृष्णः ॥ मात्रास्पर्शाः विषयेन्द्रियसंबन्धाः शीतोष्णसुखदुःखदा एव ॥ १ शीतोष्णमृदुपरुषस्पर्शशस्त्रास्त्रपातादिरूपतया सुखदुःखप्रदा एव ॥ तथाऽपि तान् तितिक्षस्व ॥ क्षमस्व ॥ सुखप्रदानां तितिक्षणं नाम तेषु उपेक्षया अनुत्सेकः ॥ कुत इति चेत् युद्धे अवर्जनीयाः किल ते ॥ तुशब्दोऽवर्जनीयत्वरूपविशेषसूचकः ॥ यथा तपश्चर्यायां वातातऽऽतपहिमवर्षक्षुत्पिपासाऽऽदयः प्रधानतपःफलदृष्ट्या यावत्कर्मसमाप्ति क्षम्यन्ते ॥ यथा च यागे पशुहिंसा उपवासाऽऽदिना स्वपरपीडनं च इत्येवमादिकं यथा क्षम्यते ॥ तथा प्रकृते प्रधानचित्तशुद्धिज्ञानतत्फलमोक्षदृष्ट्या वर्णाश्रमोचितं विहिते युद्धे शस्त्रास्त्रपातादिभिः स्वपरपीडनं अवर्जनीयत्वाद्यावद्युद्ध समाप्ति क्षन्तव्यम् ॥ आगमापायिनः अतोऽनित्याः 'सिद्धे सत्यारम्भो नियमाये 'ति न्यायात् प्रवाहतोऽप्यनित्या. अवर्जनीयत्वात् आगमापायित्वात् सर्वथा अनित्यत्वाच्च मात्रास्पर्शान् धैर्यावलंबनेन तितिक्षस्व ॥ अधैर्येण शोचन् त्वं मूढोऽसि ॥ १४ ॥

अर्जुनः ॥ मम सुखहानिः दुःखप्राप्तिश्च भविष्यतीत्युक्ते अभिमानत्यागेन धैर्याद्यवलंबनेन च दुःखं परिहरेत्युक्तम् ॥ तन्न मे मनसे रोचते ॥ कुत इति चेत् दुःखप्रसञ्जकं युद्धं कृत्वा दुःखं संपाद्य अभिमानत्यागादिना तत्परिहरणापेक्षया दुःखजनकस्य युद्धस्याकरणमेव युक्तम् ॥ 'प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरं' ॥ इति न्यायात् ॥ किं ब्रवीषि ॥

कृष्णः ॥ यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ ।
समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ॥ १५ ॥

१. शीतोष्णादिकं तेषुतेषु वर्णाऽऽश्रमधर्मेषु यथासंभवं ग्राह्यम् ॥

यमिति ॥ पुरुषाणां पुरुषेषु वा ऋषभः पुरुषर्षभः हे पुरुषर्षभ अर्जुन धीरं दुःखं च सुखं च दुःखसुखे समे दुःखसुखे यस्य सः तं समदुःखसुखं यं पुरुषं आत्मानं एते मात्रास्पर्शाः न व्यथयंति न विकारयन्ति सः अमृतः मुक्तः तस्य भावः अमृतत्वं तस्मै अमृतत्वाय मोक्षाय कल्पते अर्हो भवति ॥ हि प्रसिद्धमिदं ॥ हि यस्मात् तस्मात् तितिक्षस्व इति वा ॥ १५ ॥

यद्यपि दुःखाभावो युद्धाकरणेनापि संभवति ॥ तथाऽपि अभिमानत्यागादिना भवन् दुःखाभाव एव संपादनीयः ॥ तस्य परमपुमर्थरूपमोक्षहेतुत्वात् ॥ हे पार्थ मात्रास्पर्शाः धीरं धैर्यवन्तं मनोदौर्बल्यरहितं सुखदुःखप्राप्तौ तत्कृतोत्सेकविषादयोः संस्तम्भकप्रयत्नवन्तम् अत एव समदुःखसुखं विषयसुखं मोक्षविरोधित्वात् दुःखवत् हेयं मन्यमानं च ॥ विषयसुखमेव गृह्यते ॥ मात्रास्पर्शसमभिव्याहारात् ॥ मोक्षसुखं तु न ग्राह्यम् ॥ तस्य परमस्पृहणीयतया हेयत्वाभावेन दुःखसाम्यानुपपत्तेः ॥ दुःखस्य प्रथममुपादानात् दुःखसमसुखं इत्यर्थः ॥ सुखसमदुःखं इति तु न वक्तव्यम् ॥ मात्रास्पर्शैरव्यथमानस्य सुखसमदुःखत्वानुपपत्तेः ॥ मात्रास्पर्शैर्व्यथमानो मूढो हि सांसारिकदुःखं सुखसमं मन्यते ॥ यं पुरुषं पूर्षु शरीरेषु शेते इति पुरुषः जीवः तं स्त्रियं पुमांसं वा न व्यथयन्ति न चालयन्ति ॥ अभिमानत्यागेन सुखदुःखकृताविकारं न प्रापयन्ति ॥ न व्यथयन्तीत्यस्य न दुःखयन्तीत्यर्थस्तु न वक्तव्यः ॥ पूर्वश्लोके अनभिमानिनो धीरस्य विवेकिनः मात्रास्पर्शाः सुखदुःखप्रदा न भवन्तीत्युक्त्वा अत्र दुःखप्रदा न भवन्तीत्युक्तिरसंगता हि स्यात् ॥ किंच मात्रास्पर्शैः यः दुःखरूपं विकारं प्राप्नोति स इव यः सुखरूपं विकारं प्राप्नोति सोऽपि मोक्षाय न कल्पते इति विवक्षितस्यार्थस्य सिद्धिरपि न स्यात् ॥ १ सः जीवः अमृतत्वाय अमृतो मुक्तः तस्य भावः मुक्तत्वं तस्मै मोक्षाय कल्पते अर्हो भवति ॥ बहुप्रमाणप्रमितोऽयमर्थः ॥ अतो-मात्रास्पर्शास्तितिक्षस्वेति पूर्वेणान्वयः ॥ अभिमानत्यागादिना भवन् दुःखाभाव एव मोक्षहेतुः ॥ अतः कृत्वा दुःखप्रसङ्गकं युद्धं प्राप्तं दुःखं अभिमानत्यागादिना दूरीकुरु ॥ लोकेऽपि कृत्वा अवश्यकर्तव्यं कर्म तत्कृतं सुखं दुःखं वा अभिमानत्यागादिना

१. ननु सः इत्येकवचनेन एतादृशस्यदौर्लभ्यमुच्यते ॥

सहते यः स खलु महते फलाय कल्पते दुःखमनेन भवेदिति विभ्यत् यः कर्तव्यं कर्म त्यजति सः फलाय न कल्पते प्रत्यवैति च अधः पात्यतेच ॥ वक्ष्यते च ॥[1] 'यः सर्वत्रानभिस्नेहः तत्तत्प्राप्य शुभाशुभम् नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता'॥ इति ॥ इदमेव पुरुषस्य पौरुषम् पुरुषपूर्णमन्यात् त्वमेव कर्तुं शक्तोऽसि ॥ पुरुषमित्यस्य पुमांसमित्यर्थस्तु न ॥ तत्रतत्र स्त्रीणामपि मोक्षश्रवणात् ॥ वक्ष्यते च ॥[2] 'मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः॥ स्त्रियो वैश्यास्तथा शूद्राः तेऽपि यान्ति परां गतिं' ॥ इति ॥ मात्रास्पर्शैरव्यथमानोऽमृतत्वाय कल्पत इत्युक्तौ सुप्तिमूर्च्छादौ मात्रास्पर्शैरव्यथमानाः सर्वेऽपि अमृतत्वाय कल्पेरन् इति चेत् एतदर्थमेव जीवमित्यनुक्त्वा पुरुषमित्युक्तम् ॥ पुरं देहं सरति गच्छति जानातीति व्युत्पत्त्या शरीरदर्शनवन्तं इति लभ्यते ॥ तेन जाग्रदवस्थायां शरीरादिज्ञानवान् यो न व्यथते स एवामृतत्वाय कल्पते ॥ मात्रास्पर्शैरव्यथाऽभावो मोक्षहेतुरित्युक्तं भवति ॥ तत्कथं[3] 'नान्यः पन्था अयनाय विद्यते' इति श्रुतिः॥ इति चेत् एतदर्थमपि पुरुषं इत्युक्तम्॥ पुरु पूर्णं ब्रह्म सरति गच्छति जानातीति व्युत्पत्त्या ब्रह्मज्ञानवन्तं इति लभ्यते ॥ तेन मात्रास्पर्शैरव्यथमानो ज्ञानी ज्ञानद्वारा मुक्तो भवति इति सिध्यति ॥ अतो नानुपपत्तिः॥ मुक्तेः प्राक् देहाद्यभिमानस्य निरवशेषं पारहर्तुमशक्यत्वात् अत्यन्तव्यथाऽभाव एवात्र विवक्षितः इति ज्ञातव्यम् ॥ १५ ॥

अ॥ अर्जुनः ॥ तितिक्षुरेव ब्रह्मविद्याऽधिकारी अनास्तितिक्षस्वेत्युक्तम् ॥ किं तितिक्षामात्रेण मोक्षः सिध्यति ॥ ब्रूहि ॥

कृष्णः॥ समदुःखसुखं धीरं धिया रममाणं यं पुरुषं एते मात्रास्पर्शाः न व्यथयन्ति ॥ सः नित्याऽऽत्मदर्शननिष्ठः शीतोष्णादिद्वन्द्वसहिष्णुः अमृतत्वाय मोक्षाय कल्पते ॥ समे ब्रह्मभावमापन्ने दुःखमुखे यस्य तं तादृशं धियं बुद्धिं विषयेभ्यो रातिं निगृह्णाति इति धीरः तं पुरुषं ब्रह्मविदं एते न व्यथयन्ति न बाधन्ते निष्ठातो न चालयन्ति॥ सः न विद्यते मृतं मरण उपलक्षणया जन्म च यस्मात् ज्ञातात् यद्ज्ञानादित्यर्थः ॥ तत्, न विद्यते जन्म मृतिश्च यस्मात् ल्यब्लोपनिमित्ता पञ्चमी यत् प्राप्य

१. २. ५७. २. ९. ३२. ३. तै आ. ३. १२.

तत्, स्वविषयकज्ञानेन मोक्षप्रदं स्वं प्राप्तानां पुनर्जनिं परिहरन् परं ब्रह्म अमृतम् ॥ १ एतदमृतमभयमेतद्ब्रह्म ' इति श्रुतिः ॥ तस्य भावः अमृतत्वं ब्रह्मत्वं तस्मै ब्रह्मत्वाय कल्पते ॥ प्रमाणप्रसिद्धमिदम् ॥ समदुःखसुखमिति शमदमादिसाधनसंपत्तिरुच्यते ॥ धीरमिति नित्यानित्यवस्तुविवेकः ॥ एतदुभयं वैराग्यादेरुपलक्षणम् ॥ तितिक्षुत्वं शमदमादिसामग्रीसहितं ज्ञानद्वारा मोक्षहेतुः अतः तितिक्षस्व ॥

अर्जुनः ॥ आगमापायिनः इत्यस्य षष्ठ्यन्ततामाश्रित्य अन्तःकरणस्यैव सुखदुःखाश्रयत्वमुक्तम् ॥ तथा च तस्यैव चेतनत्वं वाच्यम् ॥ न च तदुक्तम् ॥ भास्यभासकयोरेकत्वानुपपत्तेः ॥ अन्तःकरणं भास्यं आत्मा भासकः ॥ अतः आत्मा अन्यो वाच्यः ॥ तथा च अन्तःकरणस्य बन्धः आत्मनस्तु मोक्षः इति बन्धमोक्षयोः वैयधिकरण्यशङ्किताऽऽश्रयभेद आपद्यते ॥ न च तदुक्तम् ॥ यस्य बन्धः तस्य हि मोक्षः ॥ अतः कथमिदम् ॥ ब्रूहि ॥

कृष्णः ॥ समदुःखसुखं अनात्मभूतान्तःकरणधर्मतया समे दुःखसुखे यस्य तं तादृशम् ॥ २ ' एष नित्योमहिमा ब्राह्मणस्य ॥ न कर्मणा वर्धते नो कनीयान् ' ॥ इति श्रुतिः ॥ वृद्धिः सुखं कनीयस्त्वं दुःखम् ॥ धियं बुद्धिं ईरयति प्रेरयति इति धीरः तं बुद्धिप्रेरकं साक्षिणं यं पुरुषं सर्वासु पूर्षु शरीरेषु शेते इति पुरुषः तम् ॥ ३ स वा अयं पुरुषः सर्वासु पूर्षु पुरि वा शयः' इति श्रुतेः ॥ पूर्षु ' कर्मेन्द्रियाणि खलु पञ्च तथा पराणि ज्ञानेन्द्रियाणि मनआदि चतुष्टयं च॥ प्राणादिपञ्चकमथो वियदादिकं च कामश्च कर्म च तमः पुनरष्टमी पूः ॥ इत्युक्तासु अष्टासु शेते इति पुरुषः तं एते मात्रास्पर्शाः न व्यथयन्ति न विकारयन्ति ॥ परमार्थतो निर्विकारत्वात् ॥ सः ब्रह्मात्मैक्यज्ञानद्वारा मोक्षाय कल्पते॥ त्वं पुरुषेषु उत्तमोऽसि ॥ सर्वसहनपूर्वकं यः परविद्याऽधिकारमापद्यते स खलु पुरुषोत्तमः त्वं तादृशोऽसि ॥ अतस्तितिक्षस्व तान् ॥ पुरुषस्य स्वप्रकाशचैतन्यरूपस्याऽऽत्मनः ऋषभत्वं निर्विकारत्वेनोत्तमत्वं 'ऋष ज्ञाने' इति धातुः ॥ ऋषेण स्वरूपज्ञानेन भातीति ऋषभः ऋषभत्वं स्वप्रकाशज्ञानस्वरूपत्वं च जानन् पुरुषर्षभः पुरुषः ऋषभो यस्येति व्युत्पत्तिः ॥ त्वं तादृशोऽसि ॥ आत्मस्व-

---

१. छां. ४ १५ १. २. तै. का. ३. ९ ३. बृ. ४. ५. १८.

रूपमज्ञानेन शोचितवानसि ॥ मदुपदेशलब्धस्वस्वरूपज्ञानात् इतः परं न शोचिष्यसि ॥ १ तरति शोकमात्मवित्[1] इति श्रुतेः ॥ पुरुषमित्येकवचनेन जीववहुत्वपक्षो निराकृतः॥ अत्र सर्वसंसारधर्मविधुरस्याप्यात्मनः उपाधिवशात् तत्संसर्गभ्रमो बन्धः तस्य च सत्याऽऽत्मभूतस्वस्वरूपज्ञानादुपाधिनिवृत्त्या निवृत्तौ स्वत एव कैवल्यरूपो मोक्षः इति बन्धमोक्षयोः सामानाधिकरण्यरूपमाश्रयैक्यं सिध्यति ॥ अतो न काऽप्यनुपपत्तिः॥ विमृश्येदमखिलं तितिक्षस्व ॥

वि ॥ अर्जुन ॥ तितिक्षस्वेत्युक्तम् । क्व नु तितिक्षणं ऐहिकसुखहेतुः उत पारत्रिकसुखहेतुः आहोस्वित् अवर्जनीये॥ नाऽऽद्यः॥ तितिक्षणस्य दुःखरूपत्वात्॥न द्वितीयः ॥ आचार्यहननादिदोषहेतुत्वेन नरकाद्यनर्थहेतुत्वात् ॥ नापि तृतीयः ॥ युद्धादुपरमे शस्त्रपातादेरप्रसक्तेः ॥ अतः कुतस्तितिक्षणीयम् ॥ वद ॥

कृष्णः ॥ धीरं धिया रममाणं धैर्यवन्तं वा॥ अतः समदुःखसुखं दुःखं सुखसमं मन्यमानम् ॥ दुःखस्य प्रथममुपादानात् तस्यैव विशेष्यत्वमुचितम् ॥ यं पुरुषं एते मात्रास्पर्शाः शीतोष्णमृदुपरुषस्पर्शशस्त्रास्त्रपातादिरूपा न विकारयन्ति ॥ अवर्जनीयता निश्चयेन सुखसाधनतानिश्चयेन च प्रकृतकार्यान्न व्यावर्तयन्ति ॥ मात्रास्पर्शसामान्यस्य दुःखहेतुत्वात् न दुःखयन्तीत्यर्थो न वक्तव्यः ॥ स अमृतत्वाय मोक्षाय कल्पते ॥ मात्रास्पर्शानां तितिक्षणं युद्धहेतुत्वादैहिकसुखसाधनम् ॥ उचितविहितकर्मकरणप्रवृत्तिहेतुत्वात् पारत्रिकसुखसाधनम् ॥ युद्धस्य अवश्यकर्तव्यत्वादवर्जनीयं च ॥ अतः यथा आरोग्यकामः औषधादिसहनक्लेशम् धनार्थी समुद्रतरणादिक्लेशं सुखसाधनत्वादवर्जनीयत्वाच्च सुखं मन्यते । तथा निरतिशयनिर्दुःखमोक्षार्थी यः तत्साधनेषु वर्णाश्रमोचितेषु विहितेषु युद्धादिकर्मसु अवर्जनीयशस्त्रास्त्रपातादिजन्यशीतोष्णमृदुपरुषस्पर्शमूलकं स्वपरदुःखं सुखसाधनत्वात् सुखं मत्वा मात्रास्पर्शान् तितिक्षते ॥ स मोक्षाय कल्पते । य स इति परोक्षनिर्देशेन य एतादृशः स एव मोक्षाय कल्पते ॥ न तु त्वादृशो दुःखासहिष्णुः इति सूच्यते ॥ यद्येवमुपालेभे तात्पर्यं स्यात् तर्हि पुरुषर्षभेति प्रशंसा कथमिति चेत् विपरीतलक्षणया पुरुषर्षभेत्यस्य पुरुषाधमेत्यर्थे

---

१. छां ७. १. ३.

पर्यवसानम् ॥ दृश्यते हि लोके कुरूपे मन्मथोऽयमिति कृपणे कर्णोऽयमिति च प्रयोगः ॥ अतस्त्वं तितिक्षस्व ॥ अन्यथा साधनाननुष्ठानान्मोक्षाभावः स्वधर्मत्यागात्प्रत्यवायः अधैर्यादपकीर्तिश्च स्यात् ॥ अतो मात्रास्पर्शान् तितिक्षमाणः कृत्वा युद्धाख्यं कर्म तेन निरतिशयं श्रेयो लभस्व ॥ १५ ॥

द्वै॥ अर्जुनः॥ महानुभावानां भीष्मद्रोणादीनां हनने मम सुखहानिः दुःखप्राप्तिश्च स्यादिति मा शोकं कार्षीः ॥ अभिमानत्यागे सुखदुःखयोरभावात् इत्युक्तम् ॥ तथाऽपि तेषां हनने पापं नियतं स्यात् ॥ कृतपापानां नरके वासश्च नियतः॥ उक्तं च मया॥ १'पापमेवाश्रयेदस्मान्' इति ॥ २'अहो बत महत्पापं कर्तुं व्यवसिता वयं' इति ॥ ३'नरके नियतं वासो भवती'ति च॥ ततश्च मम परलोके दुःखं स्यात् इति मे शोकः तद्विषयास्ते कथमशोच्याः ॥ वद ॥

कृष्णः ॥ नासतो विद्यते भावो नाभावो विद्यते सतः ॥
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्वदर्शिभिः ॥ १६ ॥

नेति ॥ असतः भावः न विद्यते ॥ सतः अभावः न विद्यते ॥ अनयोः उभयोः अपि अन्तः निर्णयः तत्वं पश्यन्तीति तत्वदर्शिनः तैः तत्वदर्शिभिः तु एव दृष्टः॥ १६ ॥

सदसच्छब्दौ सत्कर्मासत्कर्मवाचकौ ॥ वक्ष्यते च ॥ ४'प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते' ॥ इति ॥ असतः सतः इति च पञ्चमी ॥ असतः असत्कर्मणः सकाशात् भावः पुण्यं सुखं वा न विद्यते ॥ तथा सतः सत्कर्मणः सकाशात् अभावः पापं दुःखं वा न विद्यते॥ विद्यते इत्यस्य द्विरुक्तिरुक्तार्थदाढर्याय॥ उक्तार्थे प्रमाणं किमिति चेत् अनयोः उभयोः असत्कर्मसत्कर्मणो ५रपि अन्तः सुखदुःखहेतुत्वाभावनिश्चयः ॥ वस्तुयाथात्म्यतत्वज्ञै ६रेव दृष्टः ॥ दृष्ट एवेति वा॥ अन्यदर्शनस्य अन्यं प्रति अप्रत्ययकत्वात् कथमिदमिति चेत् तैः स्वयं ज्ञात्वा उपदेशपरंपरारूपः संप्रदायः प्रवर्तितः ॥

१. १. ३६. २. १. ४५. ३. १. ४८. ४. १७ २६. ५. इतरेतरसमुच्चये अपिशब्दः मौढ्यहेतुसमुच्चये वा ॥ ६. तुशब्द एवार्थे ॥

तत्त्वज्ञानां वचनं उक्तार्थे प्रमाणम् ॥ युद्धं चेदं दुष्टनिग्रहशिष्टपरिपालनरूपमदवतार-कार्यनिर्वाहकतया मत्प्रीतिहेतुत्वाद्युक्तम् १ कर्म ॥ सति चैवं कथमनेन पापं तेन च नरकदुःखं स्यात् ॥ न स्यादेव ॥ वक्ष्यते च ॥ 'न हि कल्याणकृत्कश्चित् दुर्गतिं तात गच्छति' ॥ इति ॥ किंतु परमधर्मत्वेन पुण्यं तेन च स्वर्गो मोक्षो वा स्यात् ॥ अतः परलोके दुःखं स्यादिति शोको न त्वया कार्यः ॥ तथा च शोकाविषयत्वादशोच्या एव ते ॥ तान् प्रति शोचनं मूढ एव ॥ त्वद्वादाश्च प्रज्ञावादा एव ॥ वक्ष्यते च ॥ २ 'धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते' ॥ इति ॥ ३ अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि ॥ ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ॥ इति ॥ ४ 'तस्माद्युद्धाय युज्यस्व नैवं पापमवाप्स्यसि' ॥ इति च ॥

५ 'नत्वेवाहं जातु नासं' इत्यत्र प्रथमयोजनायां ईश्वरस्य तवापि स्वपक्षकोटावनुप्रवेशाद्दृष्टान्ताभावः ॥ तथाच कथमनुमानेन नित्यत्वसिद्धिः इति चेत् असतः प्रकृतेः अभावः न विद्यते ॥ सतः परब्रह्मणश्च अभावः न विद्यते ॥ उभयत्र अभावः इति छेदः ॥ अनयोः उभयोः ७ प्रकृतिपरब्रह्मणोः अन्तः तत्त्वदर्शिभिः दृष्टः ॥ दृष्टान्तद्वयप्रदर्शनं अनुमानदार्ढ्यार्थम् ॥ यथा असतः प्रकृतेः अभावः न विद्यते तथा सतः परब्रह्मणः मम अभावः न विद्यते ॥ उभयोरित्यादि पूर्ववत् ॥ तत्र प्रथमयोजनायां तवापि नित्यतायाः साधितत्वात् पुनरत्र नित्यत्वसाधनं किमर्थमिति चेत् द्वितीययोजनायां दृष्टान्तीकृते मयि नित्यत्वस्य प्रमाणप्रमितत्वसूचनार्थमत्र मम नित्यत्वसाधनम् ॥ यथा सतः ब्रह्मणः अभावो न विद्यते तथा असतः प्रकृतेः अभावः न विद्यते ॥ पूर्वयोजने दृष्टान्तीकृतायां प्रकृतौ नित्यत्वस्य प्रमाणप्रमितत्वसूचनार्थमनया योजनया प्रकृतेर्नित्यत्वसाधनम् ॥ वक्ष्यते च ब्रह्मणो नित्यत्वम् ८ अजोऽपि सन्नव्ययात्मा' इति ॥ ९ 'यो मामजमनादिं च' इति ॥ १० 'यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति' ॥ इति च ॥ 'नत्वेवाहं जातु नासं' इतिश्लोकोक्तार्थाऽऽक्षेपेणास्य श्लोकस्य-प्रवृत्तिपक्षे तदनन्तरमवायं श्लोकः करणीयः स्यात् इति चेत् प्रस्तुतं परिसमाप्य

१. अत्र, 'तत्कर्म हरितोषं यत् सा विद्या तन्मतिर्यया' ॥ इति (भाग. १ २.) वचनमनुसन्धेयम्॥ २. २. ३१. ३. २. ३३. ४. २. ३८. ५. २. १२ ६. यत्र किमपि साध्यते सः पक्षः॥ ७. अत्र 'प्रकृतिः पुरुषश्चैव नित्यौ कालश्च सत्तम'॥ इति विष्णुपुराणवचनमनुसन्धेयम् ॥ ८. ४. ६. ९. १० ३. १०. ८. २०.

सिंहावलोकनन्यायेन व्यवहिताऽऽकर्षणस्य ग्रन्थस्वभावसिद्धत्वात्॥ किंच 'अशोच्या' नित्यादिपञ्चश्लोक्या एकार्थपरत्वेन एकवाक्यतया दूरानुधावनाभावात् ॥ जीवानां नाशाभावात् देहानां सर्वथा नाशसद्भावात् देहनाशेऽपि प्रतिनिधिलाभस्य विद्यमानत्वात् देहान्यजीवसिद्ध्या देहनाशेऽपि जीवनाशाभावात् अभिमानत्यागेन मात्रास्पर्शानां विफलीकरणसंभवात् तथा विफलीकरणस्य मोक्षसाधनत्वाच्च न तान् प्रति शोकः कार्यः ॥ तानशोचंश्च त्वं मूढः त्वद्वादाश्च प्रज्ञावादाः इत्येकवाक्यतायाः स्पष्टमवगमात् ॥ न ह्येकवाक्यतया बोधकेषु त्रिचतुरादिश्लोकेषु दूरान्वयो न दृष्टचरः ॥ दृश्यते चेयं रीतिः आदिकुलकान्त्यकुलकेषु काव्यादौ ॥

अत्वेवमात्मनां नित्यत्वानुमानस्य दृष्टान्तसद्भावाददुष्टत्वम् ॥ ततः किमिति चेत् ? असतः देहस्य सद्भावो न विद्यते ॥ सतः आत्मनः असद्भावो न विद्यते ॥ अनयोरुभयोः देहात्मनोः इत्यादिपूर्ववत्॥ 'नत्वेवाह' मित्युक्तरीत्या आत्मा नित्यः 'देहिनोऽस्मिन्यथे'त्युक्तरीत्या देहस्सर्वथा नश्वरः ॥ उक्तार्थे तत्वदर्शिनां पराशरादीनां वचनं प्रमाणम् ॥ देहस्य सद्भावः प्रत्यक्षतो दृश्यते ॥ आत्मनोऽसद्भावः २ असदेवेदमग्र आसी'दिति श्रुतावुच्यते ॥ अतः कथं देहस्य सद्भावो न विद्यते आत्मनोऽसद्भावो न विद्यते इत्युच्यते इति चेत् भावाभावशब्दाभ्यां अविनाशस्वभावाविनाशस्वभावौ विवक्षितौ ॥ देहस्य अविनाशस्वभावो न विद्यते आत्मनः विनाशस्वभावो न विद्यते इत्यर्थः ॥ अत उक्तं युक्तम् ॥ तस्मादुभयथाऽप्यशोच्या एव ते ॥ तान् प्रति कुतः शोचसि ॥ शोचन् त्वं मूढः प्रतिभासि मे ॥ इदमेवाक्तम् मया ॥ ' गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ' ॥ इत्युपक्रमे ॥

अ ॥ अर्जुनः ॥ तितिक्षुत्वस्य ब्रह्मविद्याऽधिकारत्वात् मात्रास्पर्शान् तितिक्षस्वेत्युक्तम् ॥ कथं तितिक्षणं कर्तुं शक्यम् ॥ सति शीतोष्णादौ सुखदुःखकारणे तद्भोगस्याऽवर्जनीयत्वेन दुःसहानां तेषां तितिक्षणस्याशक्यत्वात् कथंचिदत्यभिनिवेशेन सहने देहनाशादिर्महाननर्थ आपद्येत ॥ अतः कथमिदम् ॥ वद ॥

कृष्णः ॥ यदि शीतोष्णसुखदुःखादिकं जगत् सत्यं स्यात् तर्हि तत्तितिक्षणं

१. वि ॥ २. छां. ६. २. १.

कर्तुमशक्यम् ॥ न च तथा ॥ किंतु शुक्तिरजतादिवदसत्यं आत्मनि कल्पितम् ॥ ततश्च शुक्तिज्ञानेन रजतस्येव अविद्यया आत्मनि कल्पितस्य शीतोष्णसुखदुःखादेः सर्वस्य प्रपञ्चस्य आत्मज्ञानेन नाशोपपत्तेः तितिक्षणं कर्तुं शक्यं॥ अत उक्तं युक्तम्॥ असतः अविद्यमानस्य सत् देशतः कालतो वस्तुतश्चापरिच्छिन्नं ब्रह्म तद्भिन्नस्य वा नामरूपात्मकप्रपञ्चस्य भावः अस्तिता विद्यमानता देशादिभिरपरिच्छिन्नता नास्ति ॥ सतः सर्वत्र सदा विद्यमानस्य देशादिभिरपरिच्छिन्नस्य आत्मनः अभावः नास्तिता अविद्यमानता देशकालादिभिः परिच्छिन्नता नास्ति ॥ उभयोः प्रपञ्चपरब्रह्मणोः अन्तस्तु सत् सदेव असत असदेव इति नियम एव तस्य ब्रह्मणः भावः याथात्म्यं तद्दर्शिभिः दृष्टः ॥ तत्त्वदर्शिभिरेव दृष्टः । दृष्ट एव ॥ शीतोष्णसुखदुःखादयः शुक्तिरजतरज्जुसर्पादिवत् मिथ्याभूता एव । आत्मयाथात्म्यपरिज्ञानाभावादवभासन्ते सति तु तस्मिन्नात्मयाथात्म्यज्ञाने निवर्तन्ते इति ज्ञात्वा तेषां तितिक्षा कर्तुं शक्या ॥ १ 'सदेव सोम्येदमग्र आसीदिति' श्रुतिः॥ २ 'वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यं इति च ॥ कथञ्चिदित्याभिनिवेशेन सहनं देहनाशादिरापद्येत इत्युक्तमिति चेत् कुतो देहनाशाद्बिभेषि ॥ असतः देहस्य भावः अविनाशः न विद्यते ॥ सतः आत्मनः अभावः नाशः नास्ति ॥ सर्वथा विनश्यतो नाशान्न भेतव्यम् ॥ अतो धैर्येण मात्रास्पर्शान् तितिक्षस्व । शीतोष्णसुखदुःखादिसहनं द्वावुपायौ धैर्यं विवेकश्च तत्राद्यः पूर्वश्लोकेनोक्तः द्वितीयत्वेन श्लोकेनेति विवेकः ॥

कृष्णः ॥ पूर्वश्लोके मुक्तो भवतीत्युक्त्वा मोक्षाय योग्यो भवतीति कुत उक्तमिति चेत् असतः सन् ज्ञानी असन् अज्ञानी तस्य भावः मोक्षः न विद्यते ॥ नाभावः इत्येकं पदम् ॥ सतः ज्ञानिनः भावः मोक्षः अभावः मोक्षाभावः न अभावः नाभावः नियमेन मोक्षः विद्यते ॥ मोक्ष इत्यनुक्त्वा नाभाव इत्युक्त्या ३ मोक्षस्यावश्यंभाव उच्यते ॥ ४ 'अनियमः सर्वेषामविरोधाच्छब्दानुमानाभ्यां' इति सूत्रम् ॥

---

१. छां ६. २. १. २. छां. ६. १. ५. ३. 'ज्ञानान्मोक्षो भवत्येव सर्वाकार्यकृतोऽपि तु' ॥ इति ब्रह्माण्डपुराण वचनम् 'यस्य ज्ञानं तस्य मोक्षः इति नात्रविचारणा' ॥ इति आग्नेयपुराणवचनं चात्र सन्धेयम् ॥ ४. ३. ३. ३२.

वक्ष्यते च ॥ [१]'ज्ञानवान्मां प्रपद्यते' ॥ इति ॥ [२]'ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति'॥ इति ॥ [३]'तत्वतो ज्ञात्वा विशते तदनन्तर'मिति च ॥ उभयोः ज्ञान्यज्ञानिनोः इत्यादि पूर्ववत् ॥ अतः अमृतत्वाय कल्पत इत्युक्तम ॥ मात्रास्पर्शान् तितिक्षमाणो यः कर्तव्यं कर्म करोति सः ज्ञानवान् भूत्वा मुक्तो भवतीत्येव वक्तव्यम ॥ अतस्तथोक्तम् ॥ न हि प्रभुप्रसादाद्येकलभ्योद्योगः परीक्षायामुत्कर्षलाभमात्रेण लभ्यते॥ किंतु तेन तद्योग्योऽयमिति योग्यगणनायां गण्यते इति प्रसिद्धं हि लोके ॥

दुःखप्रसञ्जकं युद्धं कृत्वा तेन प्राप्तं दुःखं अभिमानत्यागादिना दूरीकृत्य दुःखाभावं संपादयेत्युक्तम् ॥ दुःखाभावसिद्ध्यर्थं दुःखं संपादनीयं किं ॥ दुःखस्यासंपादनेऽपि दुःखप्रसञ्जककार्याकरणेन दुःखाभावसिद्धेः ॥ अतः कथमिदम् ॥ वद ॥ इति चेत् [४]असतः अविद्यमानस्य अभावः न विद्यते ॥ [५]नासतः इत्येकं पदम् ॥ विद्यमानस्यैव [६]अभावो विद्यते ॥ उभयोः विद्यमानाविद्यमानयोः इत्यादि पूर्ववत् ॥ अभावः प्रतियोगिनियतः घटाभावादिवत् यस्याभावः तेन तत्पूर्वं विद्यमानेन भाव्यम् ॥ अत्र तु दुःखस्याभावः अतः तत्पूर्वं दुःखेन विद्यमानेन भाव्यम् ॥ अतः युद्धकरणेन दुःखं संपाद्य तस्याभावं संपादयेत्युक्तम् ॥

यस्याभाव इष्यते तत्पूर्वं तस्य संपादनं कार्यम् ॥ अतो दुःखाभावाय दुःखसंपादनं कार्यमित्युक्तम् ॥ हन्त तर्हि परमात्मनि उच्यमानस्य दोषाभावस्य सिद्ध्यर्थं तत्र दोषोऽभ्युपेय ॥ 'अविधवा भवे'ति सुवासिन्यामाशास्यमानस्य वैधव्याभावस्य सिद्ध्यर्थं तस्यां वैधव्यमभ्युपेयम् ॥ 'अरोगवान् भवे'ति नीरोगे पुंसि आशास्यमानस्य रोगाभावस्य सिद्ध्यर्थं तत्र रोगोभ्युपेयः ॥ इत्यापद्यते। अन्यत्र जीवादौ विद्यमाना दोषाः कथमस्मिन् संभवेयुः इति विधवासु दृश्यमानं वैधव्यमस्या नोपनमतु इति, रोगिषु दृश्यमानो रागः अस्य नोपनमतु इति, दोषादीनां परमात्मादिषु संबन्धप्रतिभासरूपबौद्धारोपेण तत्र अभावप्रतियोगिसंपादनं विनैव अभावसंपादनं सुलभमिति चेत् समं प्रकृतेऽपि इति चेत् असतः अज्ञानेनः अभावः 'यंहीति'श्लोकोक्तरीत्या अभिमानत्यागादिना भवन् दुःखाभावो न विद्यते ॥ नासतः इत्येकं पदम् ॥ नासतः

१. ७ १९. २. ४. ३९. ३ १८. ५५. ४ द्वितीयपादे असत इति छेदः॥ ५. न सत् असत् न असत् नासत् तस्य नासतः ॥ ६. प्रथमपादेऽपि अभाव इति छेदः ॥

१ज्ञानिन एव अभावः उक्तरूपो दुःखाभावः विद्यते ॥ उभयोः ज्ञान्यज्ञानिनोः इत्यादि पूर्ववत् ॥ प्रमत्तौ सत्यां दुःखप्रसङ्गकं कार्यं कृत्वा दुःखं संपाद्य विवेकेन तस्य दूरीकरणं ज्ञानिलक्षणम् ॥ वक्ष्यते च ॥ २'य: सर्वत्रानभिस्नेहः तत्तत्प्राप्य शुभाशुभम् ॥ नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता' ॥ इति ॥ अतस्तादृश एव दुःखाभाव एष्टव्यस्त्वया । अतः कर्तव्यमेव त्वया युद्धाख्यं कर्म ॥

अभिमानत्यागादिना मात्रास्पर्शान् तितिक्षमाणो युध्यस्वेत्युक्तम् ॥ भीष्मादिभिः सह कथं युध्येय ॥ उक्तं च मया ॥ ३'कथं भीष्ममहं सङ्ख्ये द्रोणं च' इत्यादि इति चेत् असतः देहस्य भाव सर्वदा स्थितिः न विद्यते ॥ सतः आत्मनः अभावः न विद्यते ॥ उभयोः देहात्मनोरित्यादि पूर्ववत् ॥ स्यादिदं युक्तम् ॥ यदि त्वयि युद्धादुपरते न ते सर्वथा म्रियेरन् न च तथा ॥ ४'मरिष्यन्त्येव ते॥ अतो देहनाशस्य अपरिहार्यत्वात् आत्मनो नाशाभावात् विवेकालबनेन मात्रास्पर्शान् तितिक्षमाणेन त्वया युद्धं कर्तव्यमेव ॥ वक्ष्यते च ॥ ५ जातस्य हि ध्रुवो मृत्युः इति ६'अन्तवन्त इमे देहा' इति ७'तत्र का परिदेवने' त्यादि च ॥ ८' अविनाशि तु तद्विद्धी'ति ९'नायं हन्ति न हन्यते' इति १०'हन्यमाने शरीरे' इत्यादि च ॥

कथञ्चिदत्यभिनिवेशेन शीतोष्णसुखदुःखादीनां सहने मम देहनाशादिरनर्थ आपद्येत ॥ अत कथं तितिक्षणं कर्तुं शक्यमिति चेत् असतः देहस्य सतः आत्मनः इत्यादि पूर्ववत् ।

देहान्यजीवाभावात् देहनाशाज्जीवनाशो भविष्यतीति शोचामीति चेत् असतः देहस्य सतः आत्मनः इत्यादि पूर्ववत् ॥ देहात्मभेदः ११'देहिनोऽस्मिन् यथादेहे' इति श्लोके कयाचन योजनया ज्ञानतदभावरूपयुक्तया साधितः ॥ अत्र तु नाशतदभावयुक्तया इति भेदः॥ अतो देहान्यजीवत्वसिद्ध्या देहनाशाज्जीवनाशो भविष्यतीति मा शोकं कार्षीः ॥

देहनाशे प्रतिनिधिलाभे प्रतिनिधिलाभादशोच्यत्वे देहात्मभेदे अभिमानत्यागादिना दुःखाभावे च स्पष्टमस्मिन् प्रत्यक्षादिकं प्रमाणम् ॥ न तु १२ नत्वेवे'त्युक्तजीव-

१. सन् ज्ञानी असन् अज्ञानी न असन नासन नियमेन ज्ञानी २. २ ५७. ३. २. ४. ४. अत्र 'मृत्युर्जन्मवतां वीर देहेन सह जायते ॥ अद्य वाऽब्दशतान्ते वा मृत्युर्वै प्राणिनां ध्रुवः'॥ (भाग. १०. १.) इत्यादिकमनुसन्धेयम् ॥ ५ २. २७. ६. २. १८. ७. २. २८. ८. २ १७. ९. २. १९. १०. २. २० ११. २. १३. १२ २ १२.

ब्रह्मानित्यतायां तथा इति चेत् असतः देहतो नश्वरस्य अल्पज्ञानाल्पशक्तिपारतन्त्र्यादिदोषदूषितस्य जीवस्य अभावः नाशः न विद्यते ॥ सतः स्वरूपतो देहतश्च अनश्वरस्य सर्वज्ञत्वसर्वशक्तित्वसर्वस्वतन्त्रत्वादिकल्याणगुणगणसंपत्समृद्धस्य परमात्मनः अभावो न विद्यते ॥ उभयोः जीवपरमात्मनोः इत्यादि पूर्ववत् ॥ जीवपरमात्मनोः नित्यत्वे तत्त्वदर्शिनामुपदेशपरंपरा तन्निबन्धग्रन्थवाक्यानि तन्मूलभूता वेदाश्च प्रमाणं अतो मा शङ्किष्ठाः ॥

प्रतिनिधिलाभसद्भावादशोच्या इत्युक्तम् ॥ प्रतिनिधिलाभसद्भावेऽपि देहनाशे तद्रूपद्रव्यनाशाच्छोक इति चेत् असतः नाशस्वभावस्य कार्यस्य भावः सर्वदा स्थितिः न विद्यते ॥ सतः अनाशस्वभावस्य कारणस्य अभावो न विद्यते ॥ उभयोः कार्यकारणयोरित्यादि पूर्ववत् ॥ देहरूपकार्यनाशेऽपि तदारंभकभूततत्कार्यरूपपदार्थानां नाशाभावात् शोको न कार्यः ॥ सन्निवेशविशेषविशिष्टमण्डपादिरूपकार्यनाशेऽपि संनिवेशविशेषात्मना मिलितानां तदारंभकाणां वेणुरज्जुशलाकापर्णादीनां अनाशान्न शोचन्ति हि लोके॥ वेण्वादीनां संनिवेशविशेषात्मना मेलने मण्डपइत्यादिनाम्ना केनचिद्विलक्षणरूपेण च युक्तस्य कार्यस्य उत्पत्तिः ॥ यस्मै कार्याय कार्यमुदपद्यत तत्कार्यानन्तरं तेषां पृथग्भावे तस्य कार्यस्य मण्डपादेर्नाशः ॥ तथा पृथिव्यादीनां भूतानां संनिवेशविशेषात्मना मेलने देहरूपकार्यस्योत्पत्तिः॥ तद्देहानुभाव्यकर्मफलानुभवानन्तरं पञ्चानां भूतानां पृथग्भावे देहरूपकार्यस्य नाशः ॥ कारणानामेकीभावः कार्योत्पत्तिः कारणानां पृथग्भावः कार्यनाशः ॥ अत एव मरणस्य पञ्चता इति नाम ॥ पञ्चानां भावः पञ्चता इति व्युत्पत्तिः ॥ पञ्चानामेकत्वं देहोत्पत्तिः ॥ एकस्य पञ्चत्वं मरणम् ॥ सतिचैवं शोकस्य का प्रसक्तिः ॥ वक्ष्यते च ॥ १ 'तत्र का परिदेवने 'ति ॥

अस्माकं जयनिश्चये मम युद्धे प्रवृत्तिः स्यात् ॥ न चासौ विद्यते ॥ उक्तं हि मया ॥ २ 'न चैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयु 'रिति ॥ अतः कथं युध्येय इति चेत् असतः समुदायैकवचनम् ॥ असतां दुर्योधनादीनां भावः सुखं तद्धेतुर्जयः न विद्यते ॥ सतः सतां त्वदादीनां पञ्चानां अभावः दुःखं तद्धेतुरपजयः

---

१. २. २८. २. २. ६.

न विद्यते ॥ उभयोः सज्जनासज्जनयोरित्यादि पूर्ववत् ॥ वक्ष्यते च ॥ १ 'अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ॥ तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥ इति॥ २ 'कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यती 'ति च ॥

किं मां युद्धं कुर्वीति निर्बध्नासि॥ विनैव युद्धं राज्यं दिशेति दुर्योधनं निर्बधान॥ तथा सति सर्वेषां क्षेमः स्यात् इति चेत् असतः दुर्योधनादेः भावः भक्तिः न विद्यते ॥ सतः त्वदादेः अभावः अभक्तिः न विद्यते ॥ उभयोः सदसतोरित्यादि पूर्ववत् ॥ न ते मद्वाक्यं शृणुयुः यूयं मद्वाक्यं शृणुयात अतस्त्वामेव निर्बध्नामि ॥

सर्वप्राणिसकलेन्द्रियमनोबुद्धिप्रेरकस्य हृषीकेशस्य भवतः स्वाभिलषितानुसारेण तेषां प्रेरणं कर्तुमशक्यं किं इति चेत् असतः दुर्योधनादेः विषये भावः तथाविधोऽभिप्रायः मम न विद्यते ॥ सतः त्वदादेः विषये अभावः तथाविधाभिप्रायाभावः मम न विद्यते ॥ उभयोः सदसतोरित्यादि पूर्ववत् ॥ दुर्योधनादीनामभक्तत्वात्तद्धननस्य त्वदादीनां भक्तत्वेन त्वदादिपरित्राणस्य च मदभिमतत्वेन एवमेव कुर्यामिति सङ्कल्पात् न तदन्यथाप्रेरणं क्रियते ॥ वक्ष्यते च ॥ ३ 'परित्राणाय साधूनां विनाशाय च दुष्कृताम् ॥ धर्मसंस्थापनार्थाय संभवामि युगेयुगे' ॥ इति ॥

युद्धरूपकर्मणा पापं नेत्यभिहितं तान्निश्चितमेव वा इति चेत् युद्धरूपकर्मणा असतः पापस्य भावः प्राप्तिः न विद्यते ॥ ४ 'नाभावइत्येकं पदम् ॥ सतः पुण्यस्य नाभावः प्राप्तिरेव विद्यते ॥ उभयोः पापपुण्ययोरित्यादि पूर्ववत् ॥

कुत इति चेत् असतः धर्मशास्त्रे अविद्यमानस्य भावः प्राप्तिः न विद्यते ॥ सतः धर्मशास्त्रे विद्यमानस्य नाभावः प्राप्तिरेव विद्यते ॥ उभयोः विद्यमानाविद्यमानयोरित्यादि पूर्ववत् ॥ धर्मशास्त्रेषु च क्षत्रियस्य युद्धाख्यसत्कर्मणा पुण्यमेव स्मर्यते॥ न तु पापम् ॥ अतः पापं तेन पारत्रिकदुःखं च नास्तीति निश्चितमेव ॥ वक्ष्यते च ॥ ५ 'धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते ' ॥ इति ॥ ६ 'स्वर्गद्वारमपावृत 'मिति ॥ ७ 'हित्वा पापमवाप्स्यसी 'ति ॥ ८ 'ततो युद्धाय युज्यस्व नैव पापमवाप्स्यती 'ति च ॥

---

१. ९. २२. २. ९. ३१. ३ ४ ८ ४. न भावः अभावः न अभावः नाभावः ॥ ५. २. ३१. ६. २. ३२ ७. २. ३३. ८. २ ३८.

लक्ष्मीपतित्वात् त्वं विनैव युद्धमस्मान् सुखय राज्यादिलंभनेन॥ सूचितं चेदम् १'स्वजनं हि कथं हत्वा सुखिनः स्याम माधवे'त्यत्र माधव इति संबोधयता मया इति चेत् त्वदभिप्रायानुसारेण युद्धाकरणे असतः दुर्योधनादीनां भावः स्थितिः सुखं वा न विद्यत इति २ न॥ किंतु विद्यत एव ॥ सतः सतां अभावः नाशः दुःखं वा न विद्यत इति न ॥ किंतु विद्यत एव ॥ यद्येवं तर्हि ममावतारो व्यर्थः स्यात् ॥ दुष्टनिग्रहशिष्टपरिपालनार्थं किल ममावतारः ॥ वक्ष्यते च ॥ ३'परित्राणाय साधूनां विनाशाय च दुष्कृता'मिति ॥

भारतान्तर्गता हीयं गीता॥ भारतं च महाप्रौढं काव्यम् ॥ काव्यस्य च शब्दार्थशक्तिभ्यामनेकार्थप्रतिपादकता महान् गुणः ॥ श्लोकार्धेनैव बह्वाक्षेपनिरसनं हि सुमहानुत्कर्षः ॥ अतः श्लोकोयमेकविंशतिधा योजितः ॥ एवं अत्र तत्र तत्र च योजनान्तराण्यप्यूह्यानि ॥ इत्यलमधिकजल्पनेन ॥ १६ ॥

अर्जुनः ॥ प्रकृतेः ब्रह्मणश्च नित्यतामुक्त्वा 'नत्वेवाह'मित्युक्तात्मानित्यतानुमाने दृष्टान्तप्रदर्शनं कृतम् ॥ केचित् प्रकृतेः नित्यतां नाभ्युपगच्छन्ति ॥ कैंचित् जीवान्यब्रह्मैव नेति वदन्ति ॥ अतः कथमिदं वद ॥

कृष्णः ॥ अविनाशितु तद्विद्धि येन सर्वमिदं ततम् ॥
विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति ॥ १७ ॥

अविनाशीति ॥ येन इदं सर्वं ततं व्याप्तं तत् विनाशः अस्यास्तीति विनाशि न विनाशि अविनाशि तु एव विद्धि ॥ न विद्यते व्ययः नाशः यस्य तत् अव्ययं तस्य अस्य विनाशं कर्तुं कश्चित् कोऽपि नार्हति ॥ १७ ॥

येन इदं सर्वं जगत् व्याप्तं यत् सर्वगतमिति यावत् ॥ तत् अविनाश्येव विद्धि नित्यमेव जानीहि ॥ वर्णाकाशादिकं नित्यं सर्वगतत्वात् ॥ यत् सर्वगतं तत् असति बाधके नित्यम् ॥ कालावयवानां क्षणादीनां सर्वगतत्वेऽपि कालावयवत्वरूपबाधकस-

१. १. ३७. २. नञ्द्वयस्य वाक्यद्वयेऽप्यन्वयः ॥ ३. ४. ८.

द्भावात् न नित्यत्वम्॥ एवं नित्यतयाऽवगतं वर्णाकाशादिकं 'नत्वेवे'त्युक्तात्मनित्यतानुमाने दृष्टान्तो भवति॥ अविनाशीति नाच्छीलिकणिनिप्रत्ययप्रयोगेण स्वाभाविकनाशो नास्तीत्युक्तं भवति ॥ स्वाभाविकनाशाभावेऽपि शापादिना बलवत्प्रयत्नादिना वा केनचिन्निमित्तेन नाश किं न स्यात् इति चेत् अव्ययस्यास्य विनाशं कश्चिदपि कर्तुं नार्हति ॥ न व्येतीत्यव्ययम ॥ ह्रासादिरूपविकाररहितं हि तत् ॥ यस्य ह्रासादिविकार एव नास्ति ॥ किमुवाच्यं तस्य नाशो नास्तीति ॥ वर्णादेर्नित्यत्वस्य पूर्वमनुक्तत्वात् अव्ययस्येत्यनुवादः कथम ॥ अविनाशीत्युक्तं नित्यत्वं अव्ययस्येत्यनूद्यते इति चेत् तत्र स्वाभाविकनाशाभाव एवोच्यते ॥ अव्वयत्वशब्दितनाशसामान्याभावो नोच्यते अतः कथमिदं इति चेत् ॥ अव्ययस्य अस्य इति पदद्वयं आवर्त्य प्रथमां ततया विपरिणमय्य इदं वर्णादिकं अव्यय विविधः अयः गतिः नाशः व्ययः न विद्यते व्ययः विविधनाशो यस्य तत् अव्ययं इति अव्ययत्वं विधाय तदनूद्य अव्ययत्वशब्दितनाशसामान्याभाववत्वेन नैमित्तिकनाशाभावो विधीयते ॥ अतो नानुपपत्तिः ॥

अस्तुनाम एवमात्मनो नित्यत्वादिकं तथाऽपि किमर्थं युद्धं कर्तव्यम् ॥ राज्याद्यर्थमिति चेत् ॥ १ 'न च राज्यं सुखानि च' ॥ २ 'अपि त्रैलोक्यराज्यस्य हेतोः किंनु महीकृते' ॥ ३ 'अवाप्य भूमावसपत्नमृद्धं राज्यं' इति राज्यादिषु कांक्षाऽभावः पूर्वमुक्तो हि मया इति चेत् 'सर्वकर्मसमाराध्यस्य भगवत आराधनाय युद्धरूपं कर्म त्वया कर्तव्यम् ॥ वक्ष्यते च ॥ ४ 'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः' ॥ इति ॥ मदादिना जीवेन चेतनत्वादिना स्वसमस्य भगवत आराधनं किमर्थं कर्तव्यमिति चेत् परमात्मनो विशेषसद्भावात् तदाराधनं कर्तव्यम् ॥ अत एव सत्यपि सादृश्ये अहं यथा त्वं तथा न इति, तत्रत्यतुशब्दसूचितं विशेषं पुरोधायाभिहितं 'नत्वेवाह'मित्यत्र ॥ स विशेषः क इति चेत् येन परब्रह्मणा सर्वमिदं जगत् व्याप्तं ५ यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा ॥ अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः' ॥ इति श्रुतिः ॥ इदं अस्मिन् जगति विद्यमानं सर्वं व्याप्तं इति वा ॥ इदं अस्मिन् जगति सर्वं यथा तथा सर्वैः प्रकारैः देशतः कालतो गुणतश्च व्याप्तिः कृता इति वा ॥ तत् परं ब्रह्म अविनाश्येव विद्धि ॥ अव्ययस्यास्य इत्यादि पूर्ववत् ॥

१. १. ३२ २. १ ३५. ३. २ ८. ४. १८ ४६. ५. ना. १३.

अव्ययत्वशब्दितसकलविघनाशाभावरूपविशेषसूचकस्तुशब्दः ॥ अनित्यत्वं देहनाशः दुःखप्राप्तिः अपूर्णता इति चत्वारो नाशाः ॥ सर्वेषामपि तेषां नाशानां अभावः परमात्मनि न जीवे ॥ अतः निरतिशयातिशयस्य परमात्मनः प्रसादाय तदाराधनं कर्तव्यमेव ॥ तच्च कर्मणा ज्ञानेन वा ॥ इदानीं तत्वज्ञानयोगेऽनधिकारात् कर्मणैव भगवानाराधनीयः ॥ अतस्तदाराधनाय युद्धाख्यं कर्म कुरु ॥

'नासतो विद्यते भावः' इति यदुक्तं देहस्य नश्वरत्वं 'नाभावो विद्यते सतः' इति यदुक्तं आत्मनो नित्यत्वं तदुभयं सम्यगुपपादय इति चेत् तत्र आत्मनो नित्यत्वं प्रथममुपपादयामि ॥ शृणु ॥ येन आत्मना [१] इदं परिदृश्यमानं सर्वविधं शरीरं व्याप्तं सर्वं व्याप्तं समग्रं यथा तथा व्याप्तं सर्वावयवेषु व्याप्तं अणुत्वादेकदेशे स्थितेनापि आत्मना स्वप्रभया समग्रं शरीरं व्याप्तम् ॥ यथा एकदेशे स्थितानामपि सूर्यचन्द्रप्रदीपादीनां प्रभया व्याप्तिः ॥ तथा आत्मनोऽपि प्रभया सर्वशरीरव्याप्तिः ॥ २ 'गुणाद्वाऽऽलोकवत्' ॥ इति सूत्रम् ॥ तत् आत्मरूपं वस्तु अविनाश्येव॥ विनाशमित्यादि ३ पूर्ववत् ॥ अतः 'नाभावो विद्यते सतः' इत्युक्तम् ॥

वि॥ अर्जुनः ॥ 'नाभावो विद्यते सतः' इति यदुक्तं तदुपपादय ॥

कृष्णः ॥ आत्मतत्वं अविनाश्येव विद्धि ॥ कुत इति चेत् येन आत्मतत्वेन इदं सर्वं अचेतनतत्वं ततं व्याप्तं वक्ष्यते च ॥ ४ 'यावत्सञ्जायते किंचित् सत्वं स्थावरजङ्गमम् ॥ क्षेत्रक्षेत्रज्ञसंयोगात् तद्विद्धि भरतर्षभ' ॥ इति ॥ तादृशं खलु तत् ॥ आत्मा अणुः इति सिद्धान्तः ॥ अणोरात्मनः कथं सर्वव्यापित्वं इति चेत् सर्वेभ्यस्तत्वेभ्यः परमसूक्ष्मत्वात् सर्वत्रानुप्रवेशविशेषयोग्य आत्मा ॥ परमसूक्ष्मत्वादिति नाशाभावे हेतुरुक्तो भवति ॥ सूक्ष्मत्वेऽप्यात्मनः कुतो न नाश इति चेत् अव्ययस्य निरतिशयसूक्ष्मत्वान्नाशानर्हस्य अस्य आत्मतत्वस्य विनाशं कश्चित् शस्त्रादिः कर्तुं

१. अ येन आत्मतत्वेन इदं सर्वं जगत् व्याप्तम् परब्रह्माभिन्नत्वात् ॥ २. २. ३. २६. ३. अव्ययस्य उपचयापचयरूपध्वंकाररहितस्य ॥ अ. कश्चित् कोऽपि वादिविशेषः ॥ देशः कालः पदार्थो वा ॥ आश्रयो वा विषयो वा इन्द्रियसन्निकर्षादिर्वा ॥ ईश्वरोऽपिवा ॥ ४. १३. २७.

नार्हति ॥ तदपेक्षया स्थूलत्वात् ॥ न हि स्थूलं सूक्ष्मं नाशयितुमीष्टे ॥ नाशकं हि वस्तु नाश्यं व्याप्य नाशयति ॥ यथा शस्त्रजलाग्निवाय्वादिकम् ॥ न हि स्थूलस्य सूक्ष्मव्यापनं संभवति ॥ अतः शस्त्रादेरात्मनाशकत्वं न संभवति ॥ अतः आत्मतत्वमविनाश्येव ॥ देहाद्विशेषसूचकस्तुशब्दः ॥ ईश्वरस्य [1]'अणोरणीयान् महतो महीया' नितिश्रुत्या आत्मनस्त्वादप्यणीयस्त्वेन आत्मतत्वव्यापनसंभवात् तेनाऽऽत्मनो नाशोऽस्तिवति चेत् ईश्वरस्य तादृशसङ्कल्पाभावादात्मानमीश्वरो न नाशयति ॥ अत आत्मतत्वमविनाश्येव ॥ इदमेवोक्तं 'नाभावो विद्यते सतः इति ॥ १७ ॥

द्वै॥ अर्जुनः॥ 'नत्वेवाहं' मित्यादिना जीवानां नित्यत्वमुक्तम् ॥ तन्न सङ्गच्छते॥ कुत इति चेत् ईश्वरो बिंबः जीवस्तत्प्रतिबिंबः देहस्तु उपाधिः ॥ उपाधेर्देहस्य नाशो 'देहिनोऽस्मिं' न्नित्यत्र उक्तः ॥ उपाधिनाशे प्रतिबिंबनाशो नियतः ॥ मुखं बिंबः दर्पणे परिदृश्यमानं तु तत्प्रतिबिंबः दर्पणमुपाधिः ॥ तत्र उपाधिभूतदर्पणनाशे प्रतिबिंबनाशो दृश्यते॥ तद्वदत्र उपाधिभूतदेहनाशे जीवनाशो न्याय्यः॥ अतः कथं नित्यत्वं जीवानां ॥ ब्रूहि ॥

कृष्णः ॥ अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः ॥
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत ॥ १८ ॥

अन्तवन्त इति ॥ प्रमातुं योग्यः प्रमेयः न प्रमेयः अप्रमेयः तस्य अप्रमेयस्य नाशः अस्यास्तीति नाशी न नाशी अनाशी तस्य अनाशिनः नित्यस्य शरीरं अस्यास्तीति शरीरी तस्य शरीरिणः इमे देहाः अन्तः नाशः एषां अस्तीति अन्तवन्तः उक्ताः ॥ हे भारत अर्जुन तस्मात् युध्यस्व ॥ १८ ॥

उपाधिभूतदेहनाशेऽपि आत्मा नित्य एव ॥ कुत इति चेत् नाशरहितस्वरूपदेहरूपोपाध्यन्तरं तस्य सर्वदा विद्यते॥ अतः आत्मा नित्य एव॥ प्रतिबिंबनाशः बिंबनाशेन उपाधिनाशेन बिंबोपाधिसान्निध्यनाशेन वा संभवति ॥ नचात्र बिंबनाशेन नाशप्र-

---

१. ना. १२.

सक्तिः ॥ बिंबस्य परमात्मत्वात् तस्य च नित्यत्वात् ॥ नापि उपाधिनाशेन नाशप्रसक्तिः ॥ स्वरूपदेहरूपोपाधेर्नाशरहितस्य सदा विद्यमानत्वात् ॥ नापिच बिंबोपाधिसन्निधिनाशेन नाशप्रसक्तिः॥ बिंबोपाधिसन्निधेरपि सदा विद्यमानत्वात् ॥ बिंबः ईश्वरः उपाधिः स्वरूपदेहः॥ उभावपि नित्यौ॥ ईश्वरस्य बिंबस्य सर्वगतत्वात् तस्य नित्योपाधिसंनिधिरवर्जनीयः ॥ अप्रमेयस्य प्रमा परिमितिः देशादिभिः परिच्छेदः तद्रहित - जीवस्याणुत्वेन देशतः परिछिन्नत्वात् लक्षणया अप्रमेयेश्वरसदृशस्य सर्वगतेश्वरप्रतिबिंबस्येति यावत् ॥ अत एव ' अनाशिनः बिंबोपाधिसंनिधिनाशप्रयुक्तनाशरहितस्य नित्यस्य बिंबनाशप्रयुक्तनाशरहितस्य शरीरिणः देहिनो जीवस्य इमे परिदृश्यमानाः स्थूलबाह्यदेहाः अन्तवन्तः नाशवन्तः ॥ ' देहिनोऽस्मि 'न्नित्यत्र उक्ताः ॥ इमे देहाः अन्तवन्त इत्युक्त्या नाशरहितदेहान्तरमस्तीति सूच्यते ॥ स्थूलदेहनाशेऽपि लिङ्गदेहसद्भावात् तस्य नाशेऽपि स्वरूपदेहसद्भावात् न जीवस्य नाशप्रसक्तिः ॥ न हि पुरतो दृश्यमानस्य दर्पणस्य नाशेऽपि तत्पृष्ठतः संश्लिष्टस्य दर्पणान्तरस्य सद्भावे प्रतिबिंबस्य नाशः संभवति ॥ अतो नित्य एवाऽऽत्मा॥ कथमपरिच्छिन्नस्य परमात्मनः प्रतिबिंबः संभवति परिच्छिन्नस्यैव प्रतिफलनसंभवात् ॥ इति चेत् नात्र प्रतिफलितरूपः प्रतिबिंबः किन्तु तदधीनत्वे सति तत्सरूपरूपः प्रतिबिंबः ॥ बिंबस्य स्वरूपस्थितिसत्ताप्रवृत्तिगुणकर्मचेष्टादिकं यथा बिंबाधीनं तथा जीवस्य स्वरूपस्थित्यादिकं सर्वं ईश्वराधीनं इति सूचयितुं बिंबप्रतिबिंबभावेन व्यपदेशः ॥ देहोऽन्तवानित्युक्तौ ईश्वरदेहोऽपि अन्तवानिति प्रतीयेत तद्व्यावृत्त्यर्थं शरीरिण इति ॥ शरीरिशब्दो[१] जीवे रूढः ॥ अन्यथा देहा इत्युक्तयैव देहिनो देहा इति लाभात् शरीरिण इति व्यर्थं स्यात् ॥ किमर्थं मां प्रति जीवानित्यत्वादिकं साध्यत इति चेत् तस्मात् जीवस्य नित्यत्वात् देहस्य सर्वथा नाशात् देहनाशेऽपि प्रतिनिधिलाभसद्भावात् अभिमानत्यागेन मात्रास्पर्शानां विफलीकरणसंभवात् शोकं संपाद्य विवेकेन तत्तितिक्षणस्यैव पुमर्थशिरोरत्नमोक्षहेतुत्वाच्च युद्धं कुरु ॥ महाक्षत्रियकुलप्रसूतत्वात् त्वया युद्धं कर्तव्यमेव ॥ भार्यां ब्रह्मविद्यायां रतत्वात् सर्वमिदमात्मपरमात्मतत्वरहस्यमनुसन्धेहि ॥

सत्यपि सादृश्ये परमात्मनो नाशसामान्याभावरूपविशेषसद्भावात् स्वकर्मणा तदाराधनं कर्तव्यम् ॥ अतः युद्धंकुर्वित्युक्तम् ॥ नाशसामान्याभावो जीवस्यापि यदि

१. ' जन्तुजन्युशरीरिण.' ॥ इत्यमरः ॥

स्यात् तर्हि ईश्वरादविशेषात्तदाराधनमकर्तव्यमेव स्यात् इति चेत् नित्यस्य स्वरूपतो नाशरहितस्य जीवस्य इमे देहाः अन्तवन्तः नाशवन्तः उपलक्षणया उत्पत्तिमन्तश्च उक्ताः ॥ इमे देहा इत्युक्त्वा देहानां उत्पत्तिविनाशौ प्रत्यक्षावेति सूच्यते ॥ उत्पत्ति विनाशवद्देहवतां जीवानां दुःखप्राप्तिरवर्जनीया ॥ कथमीदृशा जीवाः पूर्णाः स्युरित्यपूर्णता तेषाम् ॥ स्वरूपतो नाशरहितत्वादनित्यत्वरूपो नाशो नास्ति जीवस्य ॥ देहहानिदुःखप्राप्त्यपूर्णतारूपास्त्रयो नाशाः जीवस्य सन्ति ॥ ईश्वरस्तु अनाशी देहतोऽपि नाशरहितः देहहानिरूपनाशाभाववान् ॥ देहा अन्तवन्त इत्यस्य प्रतिनिर्देश्यतया अनाशिन इत्युक्तेः ॥ स्वरूपतो नाशाभावादनित्यत्वरूपनाशाभावस्तु कैमुत्यन्यायसिद्धः । अप्रमेयः इतिः कालतो गुणतश्च परिच्छेदरहितः अपूर्णत्वरूपनाशाभाववान् ॥ स्वरूपतो देहतश्च नाशरहितस्य देशतः कालतो गुणतश्च परिच्छेदरहितस्य दुःखप्राप्तिरूपनाशाभावोऽप्यवर्जनीयतया सिद्धः ॥ एवं ईश्वरश्चतुर्विधनाशरहितः ॥ जीवेश्वरयोरेवंभावः १'न जायते' इत्यत्र प्रमाणतः समर्थयिष्यते ॥ तस्मात् त्रिविधनाशवत्त्वेन जीवानामस्वातन्त्र्यादिदोषदुष्टत्वात् ईश्वरस्य सर्वविधनाशाभावेन स्वातन्त्र्यादिसर्वगुणगणपरिपूर्णत्वात् ततएव तस्य प्रसक्तये जीवैस्तत्पूजायाः कर्तव्यत्वात् फलाभिसन्धिराहित्येन कृतस्य वर्णाश्रमोचितविहितकर्मानुष्ठानस्यैव भगवत्पूजात्वात् अनाशिनः अप्रमेयस्य तस्य तत्पूजार्थं युध्यस्व ॥ त्वं तु क्षत्रियोऽसि ॥ क्षत्रियाणां युद्धमेव महान् धर्मः ॥ अतः कर्तव्यमेव त्वया युद्धम् ॥

'नासतो विद्यते भाव' इति यदुक्तं देहस्यानित्यत्वं तदुपपादय इति चेत् अप्रमेयस्य अप्रमेयभगवत्प्रतिबिम्बस्य अत एव अनाशिनः अतएव नित्यस्य जीवस्य इमे देहाः अन्तवन्तः २'देहिनोऽस्मि'न्नित्यत्र उक्ताः ॥ वक्ष्यन्ते च ॥ ३'अव्यक्तादीनिभूतानी'त्यादौ ॥ देहात्मतत्त्वोपदेशात् अहं ज्ञानी संवृत्तः नातः परं मां प्रति युध्यस्वेति वचनं तवोपपद्येत इति चेत् सर्वोऽप्ययमुपदेशः स्वधर्मभूतं युद्धमनुष्ठापयितुमेव ॥ न ज्ञानोपदेशेन स्वधर्माच्च्यावयितुम् ॥ न योत्स्ये इत्युक्त्वा तूष्णींभूतं त्वां

१. २. २०. २. २ १३. ३. २ २८.

स्वधर्मे युद्धे प्रवर्तयितुमेव हि 'अशोच्यानन्वशोचस्त्वं' इत्यादिना उपदेश आरब्धः ॥ तस्मात् युध्यस्व ॥ ज्ञानमात्रे प्रवर्तयितुमेवायमुपदेशः इति कुतो न स्यादिति चेत् भरतवंशोत्पन्नत्वेन महाक्षत्रियस्त्वं आधिकारिकजनकप्रियव्रतादिवत् कर्मयोगप्रधानोऽसि ॥ अतः युद्धाख्ये स्वधर्मे प्रवर्तयितुमेवायमुपदेशः ॥ वक्ष्यते च ॥ १'यदहंकारमाश्रित्ये'त्यादिना 'यथेच्छसितथाकुरु' इत्यन्तेन ॥

अ ॥ नासतो विद्यते भावः इत्युक्तं देहानामनित्यत्वं उपपाद्यते ॥ अप्रमेयस्य प्रत्यक्षादिप्रमाणैः प्रमातुमशक्यस्य शब्दप्रमाणवेद्यस्यापि २'यतोवाचोनिवर्तन्ते'इति श्रुत्या अवाच्यत्ववचनेन साक्षात् निर्देष्टुमशक्यत्वादप्रमेयत्वमात्मनो युक्तम् ॥ प्रमा परिमितिः देशतः कालतः वस्तुतश्च परिच्छेदरहितस्य वा ॥ सर्वदेशेषु विद्यमानत्वाद्देशतः, सर्वकालेषु विद्यमानत्वात् कालतः, सर्ववस्तुस्वरूपत्वात् वस्तुतश्च परिछेद आत्मनो नास्ति ॥ अत एव नित्यस्य विद्यमानस्यैवान्यथाभावरूपनाशरहितस्य अनाशिनः ३ अदर्शनरूपनाशरहितस्य ॥ लोके हि द्विविधो नाशो व्यवह्रियते ॥ भस्मीभावाददर्शनं गते व्याध्यादिना अन्यथा विकृते च देहे देहो नष्ट इति व्यवहरन्ति॥ तदुभयविधनाशरहितस्य शरीरिणः सर्वप्राणिशरीरोपाधिकस्य ॥ शरीररूपोपाधिना खलु परब्रह्म क्षेत्रज्ञतामश्नुते ॥ वक्ष्यते च ४'इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते॥ एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः' ॥ इति ॥ तादृशस्य जीवस्य इमे देहाः भीष्मद्रोणादिशब्दवाच्या देहाः अन्नमयप्राणमयमनोमयविज्ञानमयानंदमयनामानः पञ्च कोशा वा नाशवन्तः ज्ञानिभिः वेदादिभिर्वा उक्ताः ॥ 'दिहउपचये' इतिधातुनिष्पन्नदेहशब्दप्रयोगेण उपचयापचयशब्दितवृद्धिह्रासोपलक्षितसर्वविकारवत्त्वेन देहानामनित्यत्वमिति सूच्यते ॥ विकाराश्च वक्ष्यन्ते ॥ 'नजायत' इत्यत्र ॥ घटावच्छिन्नाकाशस्य अवच्छेदकाः घटाइव बहुभिर्वेषैर्नटतो नटस्य ते वेषा इव च देहावच्छिन्नस्य आत्मनो देहा अन्तवन्तः ॥ इमे ५ स्वप्नावस्थायामनुभूयमाना देहाः जाग्रदव-

१. १८. ५९. २. तै. २. ४. ३. अनाशिनः देशादितोऽपरिछिन्नस्य अतएव नित्यस्य नाशरहितस्य इति केचित् ॥ ४. १३, २. ५. अत्र, 'सुखं तत्प्रगतो येन स्वप्नदेहेन दिक्तटान् ॥ परिभ्रमसि हे राम स देहस्ते क्व संप्रति ?॥ इति वासिष्ठवचनमनुसन्धेयम् ॥

स्थायां अन्तवन्तः उक्ताः ॥ तद्वत् अज्ञानदशायां प्रतीयमानाः देहाः प्रबोधदशायां अन्तवन्तः उक्ता इति वा । इदमेवोक्तं 'नासतो विद्यते भाव' इति ॥ अत्र शरीरिणः इत्येकवचनेन देहा इति बहुवचनेन च इमे देहाः त्रैलोक्यवर्तिसर्वप्राणिसंबन्धिनः सर्वेऽपि देहाः नित्यस्य शरीरिणः एकस्यैवात्मनः उक्ताः इति योजनया एकजीववादापरपर्यायः आत्मैकत्ववादः साधितः ॥ १ एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा ॥ कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्चे'ति श्रुतिः॥ तस्मात् आत्मनो नित्यत्वात् देहादिप्रपंचस्यानित्यत्वात् मदीया इमे मरिष्यन्ति इति मोहजं शोकं त्यक्त्वा स्वधर्मं युद्धं कुरु ॥ महाक्षत्रियोऽसि ॥ ब्रह्मविद्यायां रतोऽसि॥ अध्यात्मज्ञानसंपन्नोऽप्यसि ॥ 'मात्रास्पर्शास्तु' इत्यत्र अहंकारममकारादीन् परित्यजेत्युक्तम् ॥ त्यक्ताहंकारममकारस्य युध्यस्वेति युद्धे प्रवर्तनं कथमिति चेत् ॥ त्यक्ताहंकारममकारः सन् स्वधर्मत्वबुध्या युद्धंकुर्वित्याशयः ॥ वक्ष्यते च ॥ २ 'मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा ॥ निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥ इति॥ ज्ञानकाण्डमिदम् अत्र युध्यस्वेति कर्मविधिरनुपपन्न इति चेत् ॥ युध्यस्वेत्यस्य कर्मविधौ न तात्पर्यम् ॥ तव स्वत एव युद्धे प्रवृत्तत्वेन युद्धविधेरनावश्यकत्वात् ॥ किंतु तत्त्वविचारेण शोकमोहरूपप्रतिबन्धकापनयनं कुर्विति शोकमोहापनयविधावेव तात्पर्यं इति वा ॥

ज्ञानिनामपि शरीररक्षणमावश्यकं अतः युद्धेन शरीरयात्रां कुर्विति शरीररक्षणविधिः॥ वक्ष्यते च॥ ३ 'शरीरयात्रापि च ते न प्रसिध्येदकर्मण' ॥ इति ॥ इति वा॥

वि॥ 'नासतो विद्यते भाव' इत्युक्तं देहस्यानित्यत्वमुपपादय इति चेत् अप्रमेयस्य आत्मा हि प्रमाता ज्ञाता न प्रमेयः ज्ञेयः प्रमातुरप्यात्मनः अहमिति प्रमाविषयत्वेन प्रमेयत्वात् कथमदमिति चेत् प्रमातृत्वप्रमेयत्वरूपोभयधर्मवत्वात् प्रमेयतैकस्वभाववर्तिन आत्मा ॥ अनात्मभूतं सर्वं प्रमेयतैकस्वभाववत् ॥ तादृशस्य अतः अनाशिनः नाशानर्हस्य अतः नित्यस्य आत्मनः इमे देहाः अन्तवन्तः ॥

१. श्वे. ६. ११. २. ३. ३०. ३. ३.

विनाशस्वभावाः ॥ १ 'मतुपा नित्ययोगबोधनात् ॥ सावयवत्वात् भूतसंघातरूपत्वेन कालतः शैथिल्यसंभवात् कर्मफलभोगार्थत्वाच्च नाश एव युक्तः ॥ अतः तादृशाः शास्त्रैरुक्ताः ॥ ईश्वरदेहव्यावृत्यर्थं २ इमे इति ॥ देहानामनित्यत्वं प्रत्यक्षसिद्धं तत्कुतः साध्यते इति चेत् ॥ देहात्मनोर्भेदस्थापनार्थं नित्यत्वसंभवशंकापाकरणार्थं वैराग्यजननाद्यनेकप्रयोजनार्थं च देहानित्यत्वसाधनम् ॥ तस्मात् देहस्य विनाशैकस्वभावत्वेन आत्मनश्चाविनाशैकस्वभावत्वेन तयोरुभयोरप्यशोच्यत्वात् स्वगतपरगतशस्त्रपातमृदुपरुषस्पर्शशीतोष्णसुखदुःखादीनां अवर्जनीयतावुत्या सहनसंभवात् युद्धाख्यनिवृत्तिकर्मणः मोक्षसाधनत्वाच्च युद्धाख्यं कर्माऽऽरभस्व ॥ भरतकुलप्रसूतमहाक्षत्रियस्य तव युद्धकर्म हि धर्मः ॥ १८ ॥

अर्जुनः ॥ एतावता प्रबन्धेन आत्मा नित्य इत्युक्तम् ॥ समर्थितं च ॥ अयमिममहन् अयमनेन हत इति लोके व्यवहारदर्शनात् कथमात्मनो नित्यत्वम् ॥ वद ॥

कृष्णः ॥ य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम् ॥
उभौ तौ न विजानीतो नायं हन्ति न हन्यते ॥ १९ ॥

य इति ॥ यः एनं हन्तारं वेत्ति जानाति ॥ यः एनं हतं मन्यते च ॥ तौ उभौ न विजानीतः ॥ अयं न हन्ति ॥ अयं न हन्यते ॥ १९ ॥

यः एनं जीवं कस्यचन हन्तारं वेत्ति यश्च एनं जीवं केनचित् हतं मन्यते तावुभौ न विजानीतः न सम्यग्ज्ञानिनौ भ्रान्तिमन्तौ ॥ हननकर्तृत्वप्रतीतिः हननकर्मत्वप्रतीतिश्च भ्रान्तिः ॥ कुतस्तज्ज्ञानस्य भ्रान्तित्वमिति चेत् ॥ अयं जीवः न हन्ति अयं जीवः न हन्यते ॥ आत्मनः हननकर्तृत्वं हननकर्मत्वं च नास्ति ॥ तस्मिन् तत्प्रतीतिर्भ्रान्तिः ॥ तदभाववति तत्प्रकारकज्ञानं भ्रान्तिरित्याभिधीयते ॥ जीवस्य हननकर्तृत्वाभावोक्त्या ईश्वरस्य तदस्तीति प्रतीयते ॥ तथा च ईश्वरस्य हन्तृत्वात् जीवस्य

१ 'भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने ॥ संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः॥'इति स्मरन्ति ॥ २. ज्ञानानन्दात्मकदिव्यमङ्गलविग्रहवत्त्वेन शरीरित्वमीश्वरस्यापीत्याशयः ॥

ईश्वरेण हन्यमानत्वाच्च जीवस्यानित्यत्वमापद्यत एव इति चेत् यः एनं ईश्वरं हन्तारं वेत्ति ॥ यः एनं जीवं तेनेश्वरेण हतं मन्यते तावुभौ न विजानीतः ॥ कुतः इति चेत् ॥ अयं ईश्वरो न हन्ति अयं जीवः ईश्वरेण न हन्यते ॥ प्रतिबिंबो जीवो नित्यः बिंबोपाधितत्संनिधीनां नित्यत्वात् ॥ जीवस्य हननं न संभवति नित्यत्वात् ॥ शरीरस्य हननं संभवति अनित्यत्वात् ॥ तत्कर्तृत्वं च जीवस्य न स्वातन्त्र्येण संभवति॥ संभवति चास्वातन्त्र्येण अस्वतन्त्रत्वात् ॥ संभवति चेश्वरस्य स्वातन्त्र्येण ॥ सर्वस्वतन्त्रत्वात् ॥ वक्ष्यते च १ 'मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन्'॥ इति॥ २ 'मया हतांस्त्वं जहि मा व्यथिष्ठाः' ॥ इति च ॥ अत्र हननं क्रियान्तराणां उपलक्षणम् ॥ तेन सर्वत्र जीवस्यास्वातन्त्र्यं ईश्वरस्य स्वातन्त्र्यं च उक्तं भवति ॥ सति चैवं या जीवस्य स्वातन्त्र्यप्रतीतिः या चानित्यत्वप्रतीतिः सा भ्रान्तिरेव ॥ यश्च हन्ति हतः इत्यादिव्यवहारः सोऽपि भ्रान्तिमूलकः ॥ ततश्च उक्तमात्मनो नित्यत्वं ईश्वरस्य स्वातन्त्र्यं जीवस्यास्वातन्त्र्यं च युक्तमेव ॥ भ्रान्तिमूलकव्यवहारस्याकिञ्चित्करत्वात् न तद्विरोधात्प्रामाणिकः शास्त्रार्थोऽन्यथयितव्यः ॥ किंतु प्रामाणिकशास्त्राविरोधात् व्यवहारोऽन्यथयितव्यः ॥ तस्य अर्थान्तरं वा कल्प्यम् ॥ किमर्थान्तरमिति चेत् देहं हन्ति देहो हतः इत्यर्थः ॥ हननं हिंसा ॥ अयं एतदीयदेहस्य हिंसामुत्पाद्य हिंस्यमानादेहादेनमात्मानं निष्कासयति ॥ अयमनेन देहान्निष्कासितः इति वा ॥ सुखदु खभोगायतनात् गृहात् निष्कासनमिव तादृशात् देहात् निष्कासनं महानपराधः ॥ अतएव तत्कारिणो बलवती शिक्षा ॥ जीवनित्यत्ववादेः पूर्वमुक्तत्वेऽपि अनित्यत्वादिज्ञानस्य भ्रान्तित्वं अनित्यत्वादिव्यवहारस्य तन्मूलकत्वं च वक्तुं तदुक्तिपूर्वकं जीवनित्यत्वादिकं उक्तम् ॥ अस्य भ्रान्तित्वाद्युक्तावेव तात्पर्यं न नित्यत्वाद्युक्तौ ॥ अतो न पुनरुक्तिः ॥ तथाऽपि पादत्रये उक्तस्य जीवनित्यत्वस्य तुरीयपादे उक्तया पुनरुक्तिः इति चेत् पादत्रयेण भ्रान्तित्वतन्मूलकत्वयोरुक्तौ कुतो भ्रान्त्यादित्वं कल्प्यत इत्याक्षेपे हननकर्तृत्वकर्मत्वाभाववति आत्मनि तज्ज्ञानं तदभाववति तत्प्रकारकज्ञानं जायते ॥ अतस्तज्ज्ञानादेर्भ्रान्तित्वादिकं कल्प्यते इत्येवं समाधानं वक्तुं पुनरात्मनो नित्यत्वोक्तिः ॥ अस्य कर्तृत्वकर्मत्वाभावप्रदर्शने तात्पर्यं न नित्यत्वाद्युक्तौ अतो नानुपपत्तिः ॥ यो जीवं हन्तारं वेत्ति यश्च ह-

१. ११. ३३. २ ११. १४.

तं मन्यते तावुभौ भ्रान्तौ इत्युक्तया न हन्ति न हन्यते इत्युक्तया च हननाभावस्यैव जीवे प्रतीतेः आत्मानित्यत्वज्ञानतद्व्यवहारयोः भ्रान्तित्वतन्मूलकत्वे एव प्रतीयेयातां आत्मस्वातन्त्र्यज्ञानतद्व्यवहारयोः भ्रांतित्वतन्मूलकत्वप्रतीतिः केन इति चेत् आत्मानित्यत्वज्ञानिनां समुदायविवक्षायामेकवचने व्यक्तिविवक्षायां बहुवचने प्रयोक्तव्ये तौ इति द्विवचनेन उभाविति तयोर्भेदप्रदर्शनेन च द्वौ समुदायौ विवक्षितौ ॥ आत्मानित्यत्वज्ञानिनां समुदाय एकः आत्मस्वातन्त्र्यज्ञानिनां समुदाय एकः ॥ आत्मनामनित्यत्वाभावस्येव आत्मनां स्वातन्त्र्याभावस्यापि पूर्वमुक्तेः ॥ अत उक्तविधया हन्तारं हन्ति इति पदद्वयेन स्वातन्त्र्यमुच्यते हतं हन्यते इति पदद्वयेन अनित्यत्वमुच्यते इति कृत्वा तज्ज्ञानिनां द्वयोः समुदाययोः भ्रान्तत्वमुच्यते ॥ अतो युक्तमेवोक्तम् 'उभौ तौ न विजानीत' इति ॥ तयोः भ्रान्तत्वं कुतः प्रमाणादुच्यत इति चेत् नेयं गीता मत्प्रेक्षेत्प्रेक्षितार्थाऽऽवेदिका ॥ किंतु निगममौलिनिर्णीतार्थाऽऽवेदिका ॥ निगममौलिभूता उपनिषदेव वक्ति ॥ १ 'हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम् ॥ उभौ तौ न विजानीतो नायं हन्ति न हन्यते'॥ इति ॥ स एव मन्त्रोऽत्र मूलप्रमाणानुसारिणी गीतेयमिति सूचयितुं वेदानधिकारिणामपि श्रवणादिसौकर्याय पूर्वार्धे कतिपयपदव्यत्यासादन्यथयित्वा मया ते अभिहितः ॥

अ॥ अर्जुनः॥ भीष्मद्रोणादिचेतनानां नाशाभावात् तद्देहानां सर्वथा नाशाच्च न तान् प्रति शोकः कार्यः इति त्वया अभिहितम्॥ उक्तविधया भीष्मादीनां शोकाविषयत्वेऽपि विनाशिष्यत्तत्तद्देहहननकर्तृत्वेन मम, तत्र प्रेरकत्वेन तव च पारत्रिकदुःखमवश्यं स्यात् इति मे शोकः॥ स चापरिहार्यः॥ शोकाविषये पातकं नास्ति इति न युक्तम ॥ द्वेष्यस्य ब्राह्मणस्य हनने शोकाभावेऽपि महतः पातकस्य नियतत्वात् ॥ तस्मात् 'तस्माद्युध्यस्व भारते' ति युद्धे प्रेरणमयुक्तम् ॥ वद ॥

कृष्णः ॥ यः एनं आत्मानं शरीरहनकर्तारं वेत्ति ॥ यश्च एनं आत्मानं हतं हननक्रियाकर्मीभूतं मन्यते तावुभौ न विजानीतः ॥ कुत इति चेत् ॥ अयं आत्मा न हन्ति हननक्रियायाः कर्ता न भवति ॥ न हन्यते हननक्रियायां कर्म च न भवति ॥ सर्वधर्मविधुरत्वादात्मनः ॥ नात्र शङ्का कार्या ॥ श्रुतिरेवैवं वक्ति ॥ 'हन्ता

---

१. क. उ. २. १९.

चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम् ॥ उभौ तौ न विजानीतो नायं हन्ति न हन्यते' ॥ इति ॥ मन्त्र एव कतिपयपदविशेषितस्तेऽभिहितः ॥ आत्मनः हनने कर्तृत्वकर्मत्वयोरभावेन तव भीष्मादिदेहहननकर्तृत्वस्य मम तत्र प्रेरकत्वस्य चाभावात् आवयोः पारत्रिकदुःखशङ्कयाऽपि न शोकः कार्यः ॥ अतः 'एतान्न हन्तुमिच्छामि घ्नतोऽपि' इत्यादिना तव हननकर्तृत्वोक्तिः भ्रान्तिमूला ॥ अतस्तस्माद्युध्यस्व भारते'ति मदुक्तं युक्तम् ॥ अत्र यः एनं हन्तारं हतं च वेत्तीत्येव पूर्त्तौ यो वेत्ति यश्च मन्यते इति पृथगुक्तिः, काव्यत्वात् १ अलङ्कारसंपादनाय वा ॥ यः तार्किकः कर्तृत्वं वेत्ति यश्च चार्वाकादिः कर्मत्वं मन्यते इति वादिभेदख्यापनाय वा ॥ धीरः कर्तृत्वं अधीरः कर्मत्वं इति धैर्याधैर्यावस्थाभेदसूचनाय वा कृतेति ज्ञातव्यम् ॥

वि॥ अर्जुनः॥ 'अविनाशित्वं' इति श्लोके शस्त्रादेरहन्तृत्वं आत्मनश्च हननायोग्यत्वमुक्तम् ॥ तत्कथम् ॥ दृश्यते हि युद्धादौ शस्त्रादिना आत्मनो हननम् ॥ अतः कथमिदम् ॥ वद ॥

कृष्ण॥ यः एनं जीवात्मानं प्रति हंतारङ्कमपि पदार्थं वेत्ति यश्च एनं आत्मानं शस्त्रादिना हतं च मन्यते तावुभौ न विजानीतः॥ कुत इति चेत्॥ अयं शस्त्रादिः एनं न हन्ति॥ २ अयं आत्मा शस्त्रादिना न हन्यते ॥ अतः युद्धे मदीयशस्त्रादिना आत्मनो नाशः स्यादिति मा व्यथिष्ठाः ॥ छेदनादिशक्तोऽपि त्वदीयः शस्त्रादिः नित्यत्वेन छेदाद्ययोग्ये आत्मनि न क्रमते ॥ नहि तत्कार्यशक्तमपि तदयोग्ये क्रमते ॥ प्रपञ्चयिष्यते चैतत् ३ 'नैनं छिन्दन्ती'त्यादौ॥ शस्त्रादिना आत्मा न हन्यते शस्त्रादिरात्मानं न हन्तीत्येव वक्तव्ये ४ शस्त्रादेर्हन्तृत्वं आत्मनो हननयोग्यत्वं च जानन् भ्रान्त इति किमर्थ-

---

१. 'उन्मीलन्ति कदंबानि स्फुटन्ति कुटजोद्गमाः' ॥ इत्यादाविव अर्थावृत्त्या अर्थावृत्तिदीपकालङ्कारः ॥ त्रिविधं दीपकावृत्तौ भवेदावृत्तिदीपकम्॥ इति चन्द्रालोके ॥ 'अर्थावृत्तेः पदावृत्तेरुभयावृत्तेरेव च' इति काव्यादर्शे ॥ यः एनं इत्यनयोरावृत्त्या उभयावृत्तिदीपकालङ्कारोऽपीत्येके ॥

२. अयमिति शब्दावृत्तिः॥ अर्थभेदात् ॥ ३. २. २३ ४. 'हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम् । उभौ तौ न विजानीतो नायं हन्ति न हन्यते ॥ इति (का. २ १९.) वाक्योपबृंहणरूपोऽयं श्लोकः तस्य मन्त्रस्य आत्मनो हन्तृत्वं जानन् भ्रान्त इत्यर्थ उक्तः 'कर्ता शास्त्रार्थवत्वा'दितिसूत्रभाष्ये भाष्यकारैः॥ अत्र च तैरेवशस्त्रादेर्हन्तृत्वं जानन् भ्रांत इत्यर्थेउच्यते ॥ अतः कथमिदं ॥ इति चेत् अत्र शस्त्रादेः कस्यापि हन्तृत्वं नेत्युच्यते तत्र आत्मनो हन्तृत्वं नेत्युच्यते इति सामान्यविशेषभावादविरोधः॥ तद्भाष्यानुसारेण आत्मनो हन्तृत्वनिषेधस्तु 'वेदाविनाशिन' मित्यत्र (२. ११.) वक्ष्यते ॥

मुच्यते इति चेत् विपर्ययज्ञाननिंदया प्रकृतार्थे दार्ढ्यमुत्पादयितुं तथोक्तम् ॥ तत्रतत्र आत्मनो हननव्यवहारो दृश्यते ॥ तस्य का गतिः शरीरहननपरतया गतिकल्पनं तु न युक्तम् ॥ शरीरहननस्थले हननव्यवहाराभावात् ॥ न हि लोके मातापित्रोः शरीरमग्निसात्कृतवन्तं पुत्रं पितृहा मातृहा इति व्यवहरन्ति ॥ वद ॥ इति चेत् जीवत आत्मनः शरीरवियोगकरणं मारणापरपर्यायं हननशब्देन विवक्षितम् ॥ एवं आत्मनो हननायोग्यत्वेऽपि देहवियोगकरणरूपहननयोग्यत्वात् युद्धे च तादृशहननस्य अवश्यं संभवात् तस्य च 'न हिंस्यात्सर्वाभूतानी'ति निषिद्धत्वात् युद्धमनुचितमेव इति चेत् क्षात्रियस्य युद्धं स्वधर्मः विहितहिंसा च न दोषाय ॥ १ 'अशुद्धमिति चेन्न शब्दा'दिति सूत्रम् ॥ 'न हिंस्या'दिति तु उत्सर्गापवादन्यायादविहितशरीरवियोगकरणरूपहिंसानिषेधकम् ॥ अतो नानुपपत्तिः ॥ किंच यागे क्रियमाणहिंसाया इव युद्धे क्रियमाणहिंसाया अपि हिते पर्यवसानात् हिंसात्वमेव नास्तीति २ 'स्वधर्म'मिति श्लोकोत्तरन्यासे वक्ष्यते ॥ १९ ॥

अर्जुनः ॥ यद्येवमात्मा नित्यः स्यात् तर्हि चैत्रो जातो मृत इति जन्ममरणव्यवहारः कथम् ॥ वद ॥

कृष्णः॥ न जायते म्रियते वा कदाचित् नायं भूत्वा भविता वा न भूयः ॥
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे॥२०॥

नेति ॥ अयं आत्मा कदाचिदपि न जायते न म्रियते वा च ॥ नायमित्यस्य उभयत्रान्वयः ॥ अयं न भूत्वा भूयः पुनः भविता न॥ भूत्वा भूयः पुनः न भविता वा च न ॥ अतः अजः जननरहितः नित्यः मरणरहितः शाश्वतः शश्वत् सदा भवनवान् ॥ अयं शरीरे हन्यमानेऽपि न हन्यते ॥ २० ॥

न जायते म्रियते वा कदाचिन्नायम् ॥ अयं जीवः कदाचिदपि न जायते ॥ कदाचिदपि न म्रियते च ॥ कुत इति चेत् अजः नित्यः शाश्वतः किलायं लक्षणया अजनित्यशाश्वतेश्वरप्रतिबिंब॥ अजः जन्महरितः नित्यः मरणरहितः शाश्वतः शश्वत्

---

१. ३. १. १७. २. २. ३१.

सदा ऐकरूप्येण वर्तमानः तादृशेश्वरप्रतिबिंबत्वान्न जायते न म्रियते च जीवस्य जननमरणव्यवहारो दृश्यते तस्य का गतिः ॥ नित्यसिद्धस्यापीश्वरज्ञानस्य कयाचन विवक्षया १ तदैक्षतेति तादात्विकभवनव्यवहारवत्, नित्यसिद्धस्यापि जीवस्य कयाचन विवक्षया तादात्विकभवनं व्यवह्रियते इति गतिकल्पनं तु न युक्तम् ॥ कुत इति चेत् भूत्वा भविता वा न भूयः ॥ अयं जीवः भूत्वा स्थित्वा २ भूयः पुनः भविता कयाचन विवक्षया तादात्विकभवनव्यवहारवांश्च न भवति ॥ वाशब्दो चशब्दार्थे ॥ स्वरूपेण स्थित्वा शरीरेण भवनस्य विद्यमानत्वात् ' भूत्वा भविता ने 'त्यस्य एवमेवार्थो वक्तव्यः ॥ तर्हि गतिकल्पनं कथमिति चेत् ॥ पुराणि शरीराणि अणति गच्छति प्राप्नोति इति पुराणः ॥ देहाद्देहान्तरप्राप्तिमत्वात् जीवस्य शरीरसंयोगवियोगावेव जन्मनाशौ तत्पर एव च तद्व्यवहारः ॥ यदि शरीरवियोगवान् स्यादात्मा तर्हि दर्पणनाशान्मुखप्रतिबिंबस्येव देहनाशादात्मनो नाशः स्यादिति चेत् अयं शरीरे हन्यमानेऽपि न हन्यते ॥ बाह्योपाधिनाशेऽपि स्वरूपदेहरूपनित्योपाधेस्सदा विद्यमानत्वादुपाधिनाशप्रयुक्तनाशो नास्त्यात्मन इत्युक्तमधस्तात् ॥ न म्रियते इत्युक्त्वा पुनः न हन्यते इत्युक्त्या पुनरुक्तिरिति चेत् उक्तशङ्कापरिहारार्थं उपसंहारार्थं च पुनरुक्तिरित्यदोषः ॥ जननमरणराहित्यस्य भगवत्प्रतिबिंबत्वस्य देहाद्देहान्तरगमनस्य शरीरनाशेऽप्यनाशस्य च पूर्वमुक्तत्वेन श्लोकोऽयं समग्र एव पुनरुक्तः इति चेत् नास्य श्लोकस्य उक्तार्थप्रतिपादने तात्पर्यम् ॥ किन्तु उक्तार्थे प्रमाणप्रदर्शने तात्पर्यम् ॥ प्रमाणं तु ३ 'नजायते म्रियते वा विपश्चिन् नायं कुतश्चित् न बभूव कश्चित् ॥ अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ' ॥ इति पूर्वश्लोकोदाहृतमन्त्राव्यवहितोत्तरो मन्त्रः ॥ स एव पूर्वार्धे कतिपयपदैर्व्यत्यासितः एतच्छ्लोकरूपेण प्रमाणतया तेऽभिहितः ॥ ईश्वरस्य सर्वविधनाशराहित्यात् स्वातन्त्र्यम् जीवस्य त्रिविधनाशवत्वादस्वातन्त्र्यं इत्युक्तम् ॥ तत्कथमिति चेत् ॥ नायमित्यत्र ना अयमिति छेदः ॥ अयं ना परमपुरुषः कदाचिदपि न जायते ॥ स्वरूपतो नोत्पद्यते ॥ किं जीववद्देहत उत्पद्यत इति चेत् भूत्वा भविता वा न भूयः ॥ भूत्वा स्वरूपेण स्थित्वा भूयः पुनः भविता न देहतो नोत्पद्यते च ॥ जीववद्देहतो नश्यति किं इति चेत् न म्रियते च॥ चशब्दार्थकवाशब्दात् नेति संबध्यते ॥ शरीरवियोगरूपमरणं न प्राप्नोति ॥ न म्रियते

१. छा. ६. २. ३. २. भूयः किंच इति वा ॥ ३. का. २. १८.

इति सामान्येन नाशाभावोक्तेरस्याः कुतो देहतोनाशाभावरूपनाशाभावपरता इति चेत् न म्रियते इति मरणं निषिध्यते ॥ मरणं च शरीरतो नाशः ॥ न नाशसामान्यम्॥ न हि घटादीनां नाशे घटादयो मृता इति व्यवहरन्ति ॥ किंतु घटादयो नष्टा इत्येव ॥ स्वरूपतो नाशाभावस्तु कैमुत्यन्यायसिद्धः ॥ स्वरूपतो नाशाभावादनित्यत्वरूपनाशाभावः देहतो नाशाभावाद्देहहानिरूपनाशाभावः उक्तोभयविधनाशाभाववतः दुःखप्राप्त्यपूर्णत्वरूपयोर्नाशयोरसंभवात्तयोरुभयोर्नाशयोरभावः । एवं सर्वविधनाशाभावादीश्वरस्य स्वातन्त्र्यं सिध्यति ॥ स्वरूपतो नित्यस्यापि जीवस्य देहतो जन्मनाशसत्वात् जन्मनाशवद्देहवतां च दुःखप्राप्तेरवर्जनीयत्वात् ईदृशानां पूर्णतायास्तेरेवाभावादपूर्णतायाश्चावर्जनीयत्वाच्च जीवस्य त्रिविधनाशवत्वादस्वातन्त्र्यं च सिध्यति ॥ जीवपक्षेऽपि न म्रियते इत्यस्य देहतो न नश्यतीत्यर्थः कुतो नोच्यते ॥ शरीरनाशो हि मरणार्थकमृङ्धातोर्मुख्योऽर्थः ॥ कुतः प्रसिद्धो मुख्योऽर्थः परित्यज्यते ॥ इति चेत् पुराण इति तस्य शरीरसंयोगवियोगरूपजन्ममरणयोरुक्तिरूपबाधकवशात् प्रत्यक्षबाधाच्च प्रसिद्धमुख्यार्थपरित्यागेन स्वरूपतो न नश्यतीत्येवार्थो वक्तव्यः॥ अवताररूपेण जन्ममरणयोर्विद्यमानत्वात्कथं न जायते न म्रियत इति इति चेत् अयं भूत्वा भविता वा न भूयः ॥ पूर्वं अवताररूपेण स्थित्वैव कदाचित् पुनः भविता जनदृग्विषयतया जात इति जननव्यवहारवान् भवति॥ अवतीर्य अवताररूपेण स्थित्वा कदाचित् जनदृग्विषयतया न भविता च मृत इति मरणव्यवहारवांश्च भवति ॥ अतः अयं ईश्वरः अजः नित्यः अतः शाश्वतः पुराणः अनादिः शरीरे १ 'यः पृथिव्यां तिष्ठ'न्नित्यादिश्रुतिभिः शरीरभूते सर्वस्मिन् जडवर्गे २ 'य आत्मनि तिष्ठन्निति' श्रुत्या शरीरभूते सर्वस्मिन् चेतनवर्गे हन्यमानेऽपि न हन्यते ॥ वक्ष्यते च ॥ ३ 'यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यती'ति॥ × विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यती'ति च ॥ उत्तरार्धं जीवविषयं वा ॥ एतादृशेश्वरप्रतिबिंबत्वात् जीवः अजः नित्यश्च ॥ एवं तर्हि ईश्वरादविशेषः इति चेत् पुराणः देहसंयोगवियोगरूपजन्ममरणवान् ॥ अयमेव ईश्वरादस्य विशेषः ॥ जीवत्वदशायां तथात्वेऽपि ब्रह्मत्वदशायां अविशेषः इति चेत् शाश्वतः सदा एकरूपः कदाऽप्यत्यक्त जीवत्वधर्मः ॥ जीवत्वस्य सर्वदा विद्यमानत्वेन जीवधर्मस्यास्वातन्त्र्यस्य संसारे मुक्तौ

१. बृ, ५. ७. १. २. बृ. ५. ७. १२ ३. ८. २०. ४. १३. २८.

च सत्वादस्त्येव स्वतन्त्रादीश्वरात् सर्वत्र सर्वदा विशेषः ॥ शरीरिणः शरीरनाशे नाशावश्यंभावात्कथं देहादेहान्तरप्राप्तिमत्वरूपपुराणत्वमिति चेत् शरीरे हन्यमानेऽपि न हन्यते ॥ उदाहृतमन्त्ररूपमूलप्रमाणश्रद्धावान् प्रामाणिकमेव मदुक्तमखिलम् ॥ अतः श्रद्धत्स्वेदमखिलम् ॥

अ ॥ अर्जुनः ॥ 'अविनाशि तु तद्विद्धी 'त्यत्र आत्मनो नित्यत्वे अव्ययस्येत्यनेन अविक्रियत्वरूपो हेतुरुक्तः ॥ के ते विकाराः कैर्विकारैराहित्यादात्मा नित्यः ॥ वद ॥

कृष्णः ॥ आत्मा कदाचिदपि न जायते ॥ कदाचिदपि न म्रियते च ॥ वा शब्दः चशब्दार्थे॥ तद्वलान्नञ उभयत्र संबन्धः॥ कुतो न जायत इति चेत् नायं भूत्वा भविता वा न भूयः॥ यो हि अभूत्वा भविता स खलु जायते इत्युच्यते॥ अयमात्मा न भूत्वा भूयः पुनः भविता न ॥ तस्मान्न जायते ॥ कुतो न म्रियत इति चेत् नायंभूत्वाभविता वा न भूयः ॥ यो हि भूत्वा न भविता स खलु म्रियते इत्युच्यते ॥ अयमात्मा भूत्वा भूयः न भविता च न ॥ वाशब्दश्चशब्दार्थे ॥ तस्मान्न म्रियते च ॥ नायमित्यस्य प्रथमपादेन संबन्धे अभविता इति छेदः ॥ न भूत्वा अभविता भविता न ॥ भूत्वा अभविता न ॥ इति व्याख्येयम् ॥ अतः अजः नित्यश्च ॥ अजः अतो न जायते ॥ नित्यः अतो न म्रियते ॥ इति वा ॥ ईदृशोऽप्यात्मा कालतोऽपक्षीयेत इति चेत् शाश्वतः शश्वत् सदा एकरूप एव भवतीति शाश्वतः ॥ कालतो नापक्षीयते ॥ नित्यत्वात स्वरूपतो नापक्षीयते ॥ निर्गुणत्वात् गुणतो नापक्षीयते ॥ नापक्षीयते चेत तर्हि वर्धते किं इति चेत् पुराणः ॥ पुराऽपि नवः ॥ यो हि काञ्चिदुपचयापचयावस्थां प्राप्य नवो भवति स खलु वर्धते ॥ आत्मा तु सर्वदा नवः अतो न वर्धते ॥ उपचयापचययोरभावेऽपि विपरिणमते किं इति चेत् ॥ शरीरे हन्यमानेऽपि न हन्यते ॥ न विपरिणमते ॥ न म्रियते इति तु नार्थः ॥ मरणाभावस्य 'न म्रियते' इत्यनेनोक्तेः ॥ जायते अस्ति वर्धते विपरिणमते अपक्षीयते नश्यति इति षट् विकाराः ॥ अत्र 'न जायत' इति प्रथमविकारस्य प्रतिषेधः ॥ जननानन्तरभाव्यस्तित्वस्य जन्मपूर्वकत्वेन जननाभावोक्त्या अस्तित्वाभावलाभात् 'न जायते' इत्यनेनैव द्वितीयस्यापि प्रतिषेधः ॥ 'पुराण' इति तृतीयस्य 'न हन्यत'

इति चतुर्थस्य 'शाश्वत' इति पञ्चमस्य 'न म्रियते' इति षष्ठस्य च प्रतिषेधः॥ 'न म्रियते' इति चतुर्थोऽपि प्रतिषिध्यते॥ 'न हन्यते' इति तु यस्मात्सर्वविकारशून्य आत्मा तस्माच्छरीरे हन्यमानेऽपि न हन्यते[१] इत्युपसंहारः॥ इति वा॥ नाय 'मित्यत्र अयमात्मा भूत्वा उत्पद्य भूयः पुनः भविता अस्तित्ववान् न किंतु सदाऽप्यस्तित्ववान् इति जननानन्तरभाव्यस्तित्वरूपस्य द्वितीयस्य 'नित्य' इति चतुर्थस्य च प्रतिषेधः॥ 'न हन्यते' इति तु तथाऽपि देहनाशादात्मनाशः स्यादिति भ्रमवारणाय॥ इति वा॥ 'नित्य' इति तृतीयस्य 'पुराण' इति चतुर्थस्य च प्रतिषेधः॥ भूत्वा भूयः अधिकं यथा तथा भविता न इति तृतीयस्य प्रतिषेधे 'नित्य' इति तत्र हेतुः॥ 'अज' इति द्वितीयाभावे हेतुः॥ 'न हन्यते' इति तु उपसंहारः॥ इति वा॥ एवं सर्वविकारशून्यत्वादात्मनः एनं हन्तारं हतं च मन्यमानौ न विजानीतः इति पूर्वेणान्वयः॥ अस्य सर्वस्यार्थस्य प्रामाणिकतासूचनाय कतिपयपदैर्व्यत्यासितः पूर्वश्लोकोदाहृतमन्त्राव्यवहितमन्त्र एव आत्मनो निर्विकारत्वप्रतिपादकत्वेन ते अभिहितः॥ २०॥

वि॥ अर्जुनः॥ 'अविनाशित्वि'ति विनाशित्वमात्मनो निराकृतम्॥ जन्यत्वादिकं तु किं तस्यास्ति उत न॥ ब्रूहि॥

कृष्णः॥ अत्र कदाचिदित्यनेन वर्तमानकालो न विवक्षितः॥ वर्तमानार्थकलकारेणैव तदुक्त्या वैयर्थ्यापातात्॥ नापि भूतकालः भविष्यत्कालो वा॥ वर्तमाननिर्देशानुपपत्तेः॥ किंतु कल्पाद्यन्तव्यतिरिक्तः समस्तः कालः कदाचिदित्यनेनोच्यते॥ वर्तमाननिर्देशस्तु वर्तमानतया अनुभवसूचनाय॥ तथा च अयमात्मा कदाचित् कल्पादिकल्पान्तव्यतिरिक्ते समस्ते काले न जायते न म्रियते च॥ वाशब्दश्चशब्दार्थे॥ तत्तत्काले तैस्तैस्तेषुतेषु देहेषु जायते म्रियते इति वर्तमानतया अनुभूयमानौ जन्मनाशौ देहधर्मत्वादात्मनो न स्तः॥ अत आत्मा अजो नित्यश्च॥ कल्पाद्यन्तव्यतिरिक्तकाले जन्मनाशयोरभावेऽपि कल्पादौ जन्मनः कल्पान्ते नाशस्य च विद्यमानत्वादात्मनोऽजत्वं नित्यत्वं च कथं इति चेत्॥ नायमात्मनामाप्रलयावस्थानवादो युक्तः॥ २'नायं भूत्वा भविता वा न भूयः' अयमात्मा कल्पादौ भूत्वा भूयः कल्पान्ते न भविता च न॥

१. शरीरे जायमानेऽपि न जायते इत्यपि बोध्यम्॥ २ अद्वैतमतानुयायिनि ब्रह्मानन्दगिर्याख्याने व्याख्याने आभूतसंप्लवाषस्थाध्यात्मवादं निराकरोति इत्यवतार्य एवं व्याख्यातम्॥

वाशब्दश्चार्थे ॥ भूयो वा कल्पान्तेऽपि इत्यपिशब्दार्थो वा ॥ कल्पादिकल्पान्तयोरुपलभ्यमानौ जन्मनाशौ परमपुरुषशरीरान्निस्सरणतत्प्रवेशरूपावेवेति न तदानीमपि जीवस्य जन्मनाशौ स्तः ॥ अतः अजः नित्यश्च ॥ जन्मनाशयोरभावेऽपि परिणामी स्यादिति चेत् शाश्वतः शश्वत् भवः सदा एकरूपः न तु कदाचन कयाऽपि विधया विपरिणमते ॥ अवयवाप्यायनेन नवीकरणसंभवात् कथं शाश्वतत्वं इति चेत् पुराणः पुराऽपि नवः सर्वदाऽपि नवः ॥ निरवयवत्वादवयवाप्यायनेन नवीकरणासंभवात् सर्वदाऽपि नव इव प्रकाशते ॥ पुरातनोऽपि नव इति वा॥ नवशब्दोऽत्र आश्चर्यार्थकः इति वा ॥ वक्ष्यते च ॥ १ 'आश्चर्यवत्पश्यति कश्चिदेनं' इत्यादि॥ अतः शरीरे हन्यमानेऽपि न हन्यते ॥ पूर्वश्लोकोदाहृतमन्त्राव्यवहितो मन्त्र एव कतिपयपदैर्व्यत्यासितः आत्मनोऽजन्यत्वादिप्रतिपादकतया ते अभिहितः मदुक्तार्थस्य प्रामाणिकतासूचनाय ॥ २० ॥

अर्जुनः ॥ आत्मन अनित्यत्वं स्वातन्त्र्यं च जानन् भ्रांत इत्युक्तम्॥ तादृशभ्रांत्युत्पत्तेः को हेतुः ॥ ब्रूहि ॥

कृष्णः ॥ वेदाविनाशिनं नित्यं य एनमजमव्ययम् ॥
कथं स पुरुषः पार्थ कं घातयति हन्ति कम् ॥ २१ ॥

वेदेति ॥ हे पार्थ यः एनं जीवं ईश्वरं च विनाशः अस्यास्तीति विनाशी न विनाशी अविनाशी तं अविनाशिनं न जायते इत्यजः तं अजं न व्येतीति वा न विद्यते व्ययः यस्य इति वा अव्ययः तं अव्ययं नित्यं च वेद वेत्ति सः पुरुषः कं घातयति कं हन्ति कथं घातयति कथं हन्ति ॥ २१ ॥

उपनिषदादिनिर्णीतजीवेश्वरस्वरूपयाथात्म्यज्ञानाभावात् तादृशी भ्रान्तिर्जायते॥ सति जीवेश्वरस्वरूपयाथात्म्यज्ञाने तादृशी भ्रान्तिर्न जायेत ॥ यः एनं जीवं अविनाशिनं विवेकापाधितत्संनिधिनाशादिनिमित्तकनैमित्तिकनाशरहितं नित्यं स्वाभाविकनाशरहितम् अजं जननरहितम् अव्ययम् निर्विकारं च नित्यं नाशरहितं अविना-

१. २. २९.

शिनं दोषरहितं दोषयुक्ते नष्टशब्दप्रयोगात् इति वा ॥ अनेन यथा भीष्मादिचेतनानां नित्यत्वात्तद्धननं कर्तुं अशक्यम् ॥ तथा स्वतो दुःखादिदोषरहितत्वात् तेषां दुःखमपि कर्तुमशक्यं इति सूच्यते ॥ 'मात्रास्पर्शा' इत्यत्र जीवस्य अभिमानादेव रागद्वेषसुखदुःखादयः न स्वत इत्युक्तम् ॥ तथा एनं ईश्वरं अविनाशिनं देहतो नाशरहितं नित्यस्वरूपतो नाशरहितं अजं निर्विकारं च वेद जानाति स पुरुषः कं हन्ति न कमपि कं घातयति न कमपि कथं हन्ति न कथमपि कथं घातयति न कथमपि । एनं हन्मि अनेन प्रकारेण हन्मि एनं घातयामि अनेन प्रकारेण घातयामि इति बुद्धिं न करोति ॥ यथाश्रुतार्थस्तु न युक्तः ॥ ज्ञानी न हंति न घातयतीत्युक्ते अज्ञानी हन्ति घातयतीत्यापद्यते ॥ तच्चायुक्तम् ॥ आत्मनो नित्यत्वात् ॥ अस्वातन्त्र्याच्च ॥ लक्षणया ज्ञानी तादृशबुद्धिं न करोतीत्युक्ते अज्ञानी तादृशबुद्धिं करोतीत्यापद्यते ॥ तच्च युक्तम् ॥ ज्ञानिनः आत्मनित्यत्वास्वातन्त्र्यज्ञानसत्वात् ॥ अज्ञानिनः तदभावात् ॥ 'य एनं वेत्ति हन्तारं' इत्यत्र आत्मनोऽनित्यत्वस्वातन्त्र्यप्रतीतेर्भ्रान्तित्वमुक्तम् ॥ अत्र तु तथाप्रतीतेः जीवेश्वरस्वरूपयाथात्म्यज्ञानाभावो हेतुरुच्यत इति भेदः ॥ जीवेश्वरस्वरूपयाथात्म्यमजानन् आत्मनोऽनित्यत्वं स्वातन्त्र्यं च मन्यते इति वक्तव्ये तथाऽनुक्त्वा जानन् न मन्यते इत्युक्त्या व्यतिरेकमुखेन हेतुरुक्त इति बोध्यम् ॥ तत्र भ्रान्तित्वे आत्मनोऽस्वातन्त्र्यानित्यत्वरूपोहेतुरुक्तः ॥ अत्र तु तत्रैव जीवेश्वरस्वरूपयाथात्म्यज्ञानिनः तादृशप्रतीत्यनुदयरूपोऽपरो हेतुरुच्यते इति भेदः ॥ इति वा ॥ २१ ॥

वि ॥ आत्मयाथात्म्यज्ञानस्य किं फलमिति चेत् ॥ एनं जीवं उक्तरूपं यो जानाति स पुरुषः एनं हन्मि घातयामि इति न शोचति ॥ अज्ञानंस्तु शोचति ॥ उक्तरूपशोकाभाव एव फलमात्मज्ञानस्य ॥ पार्थैदमवधेहि ॥ त्वं तु शोचसि ॥ अतो मूढोऽसि ॥ २१ ॥

अ ॥ अर्जुनः ॥ उक्तरीत्या आत्मानमविक्रियं अतएव नित्यं यो जानाति तस्य अविक्रियात्मज्ञानिनः किं फलं वद ॥

कृष्णः ॥ यः एनं आत्मानं अविनाशिनं विनाशः देशकालवस्तुभिः परिच्छेदः तद्रहितं सर्वदेशसर्वकालव्यापिनं सर्ववस्तुस्वरूपं च ॥ विनाशः शुक्तिरजतरज्जुसर्पादेरिव प्रमाणेन बाधः तद्रहितम् ॥ सत्यमिति यावत् ॥ तादृशमिति वा ॥

विनंष्टुं शीलमस्यास्तीति विनाशी रज्जूरगतुल्यः स्थूलसूक्ष्मकारणशरीराख्य उपाधिः तद्भिन्नं इति वा ॥ अजं अव्ययं नित्यं च निस्यं अत एव अजं अव्ययं अत एव अविनाशिनं इति वा॥ जानाति साक्षात्करोति च स पुरुषः यः एनं अविनाशिनं अजं अव्ययं च नित्यं सदा वेद स पुरुषः इति वा ॥ वेद आ विनाशिनं इति छेदः ॥ अज्ञानेनाऽऽवृतत्वात् आ समंतात् अदर्शनं गतं एनं यो नित्यं सच्चिदानन्दाऽऽत्मना सदैव सन्तं वेद स पुरुषः इति वा ॥ कं हन्ति कं घातयति कथं हन्ति कथं घातयति तादृशबुद्धिं न करोति ॥ हनने कर्तृत्वं प्रयोजकत्वं च न मनुते ॥ उभयत्राऽऽक्षेप एव न प्रश्नः ॥ उत्तरत्र प्रतिवचनाभावात् ॥ कं [१] कथं हन्ति इति हन्तृत्वरूपकर्तृत्वाऽऽक्षेपः॥ कं कथं घातयतीति प्रयोजकत्वाऽऽक्षेपः॥ कं इति हन्तव्यत्वरूपकर्मत्वाऽऽक्षेपः ॥ कथं इति साधनाऽऽक्षेपः ॥ 'पुरुष' इत्युक्तया आत्मयाथात्म्यज्ञानवानेव पुरुषः अन्यस्तु पशुरिति सूच्यते॥ विदुषो हननक्रियाऽऽक्षेपमुखेन सर्वकर्मसंन्यासो गीताशास्त्रे विवक्षितो लेशतः सूच्यते ॥ हननक्रियाया मुखत उक्तिस्तु प्रकरणानुगुण्याय ॥ कर्मकाण्डविहितानि कर्माणि तु अविदुषः ॥ वक्ष्यते च ॥ [२] 'कर्मयोगेन योगिना' मिति॥ विदुषस्तु कर्मसंन्यासे अधिकारः॥ वक्ष्यते च ॥ [३] 'ज्ञानयोगेन साङ्ख्याना' मिति ॥ [४] 'तस्य कार्यं न विद्यते' ॥ इति ॥ [५] सर्वकर्माणि मनसा संन्यस्यास्ते इति च ॥ हननक्रियाऽऽक्षेपादन्याः क्रिया विदुषोऽभ्यनुज्ञायन्ते इति कुतो न वाच्यं इति चेत् 'युध्यस्वे' ति हननक्रियामभ्यनुज्ञाय तस्या एवात्राऽऽक्षेपेण वास्तवकर्तृत्वाभाव एव विवक्षित इति स्पष्टमवगम्यते ॥ यस्य कर्तृत्वं नास्ति तस्य कथं कर्माणि स्युः ॥ लेशतः सूचितो विदुषः सर्वकर्मसंन्यास स्तत्रतत्रोपरिष्टादुपपादयिष्यते ॥ २१ ॥

अर्जुनः ॥ आत्मनो नित्यत्वं देहस्यानित्यत्वं चोक्तम् ॥ देहस्यानित्यत्वात् देहसंयोगवियोगरूपौ जन्मनाशावात्मनः स्त इति सिद्धम् ॥ पूर्वदेहवियोगोत्तरदेहसंयोगयोरात्मनो विकारादिकं दुःखादिकं च स्यात् ॥ अतस्तान् प्रति शोचामि ॥ सति चैवमहं कथं मूढः स्यां ॥ [६] वद ॥

१. कथं घातयति हन्तीति न घातयितृत्वहन्तृत्वाऽऽक्षेपः ॥ किंतु तत्कार्यप्रत्ययायाऽऽक्षेपः ॥ अत एव वक्ष्यते ॥ 'ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसीति (२. ३८.) ॥ इति केचित् ॥ २ [१]. ३. ३ ३. ३. ४. ३. १७. ५. ५. १३. ६ माऽस्त्वात्मनिमित्तः शोकः शरीरनिमित्तस्तुस्यादेव ॥ तत्र समाधानं वद इत्यर्थः ॥

कृष्णः ॥ वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि ॥
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ॥२२॥

वासांसीति ॥ नरः जीर्णानि वासांसि वस्त्राणि विहाय त्यक्त्वा अपराणि नवानि नूतनानि वासांसि यथा गृह्णाति ॥ तथा देहः अस्यास्तीति देही जीर्णानि शरीराणि विहाय अन्यानि नवानि शरीराणि संयाति प्राप्नोति ॥ २२ ॥

नरः जीर्णानि वस्त्राणि विहाय १ अन्यानि नूतनानि वस्त्राणि यथा गृह्णाति तथा जीवः जीर्णानि शरीराणि विहाय २ अन्यानि नूतनानि शरीराणि प्राप्नोति ॥ जीर्णवस्त्रपरित्यागनूतनवस्त्रग्रहणयोः यथा आत्मनो विकारः दुःखादिकं च नास्ति तथा जीर्णपूर्वशरीरपरित्यागे नूतनोत्तरदेहग्रहणे च नाऽऽत्मनो विकारो दुःखादिकं च॥ पूर्वदेहत्यागोत्तरदेहस्वीकारौ कौमाराद्यवस्थात्यागस्वीकाराविवेति 'देहिनोऽस्मि'न्नित्यत्राभिहितम् ॥ तत्र दृष्टान्तभूतत्यज्यमानगृह्यमाणदेहयोरत्यन्ताभिन्नत्वाभावात् अत्यन्ताभिन्नयोर्विषये कथं स्यादिति शङ्कापरिहाराय अत्यन्ताभिन्नदृष्टान्तप्रदर्शनमिदम् ॥ उत्तरपूर्ववस्त्रयोरिव उत्तरपूर्वदेहयोरेव जननाशौ नाऽऽत्मनः ॥ पूर्ववस्त्रत्यागोत्तरवस्त्रस्वीकारौ यथा अवश्यंभाविनौ तथा पूर्वदेहत्यागोत्तरदेहस्वीकारौ अवश्यंभाविनौ ॥ अवश्यंभावित्वेनापरिहार्यत्वान्न शोकः कार्यः ॥ वक्ष्यते च ॥ ३ 'तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि' ॥ इति ॥ वस्त्रदृष्टान्तेन यथा वाससामेव आगमापायौ नामरूपादिभेदः शैथिल्यं वैचित्र्यं च न त्वात्मनः ॥ तथा देहानामेव जन्मनाशौ अवान्तरविकाराः नामरूपादिभेदः शैथिल्यं वैचित्र्यं च नाऽऽत्मनः इति स्पष्टमुक्तं भवति ॥ वस्त्रान्तरस्वीकारात् यथा पूर्ववस्त्रनाशे न शोकः क्रियते तथा देहान्तरस्वीकारात् पूर्वदेहनाशे शोको न कार्य इत्युक्तम् ॥ किं प्रतिनिधिलाभमात्रेण समाधानं भवेत् ॥ स्वीक्रियमाणस्य नवानीति नूतनत्वोक्त्या त्यज्यमानस्य जीर्णानीति जीर्णत्वोक्त्या च समाधानमिति चेत् न पुरातनत्वनूतनत्वमात्रेण समाधानसंभवः ॥ सार्वभौमादिपुरातनशरीरत्यागेन नारकितिर्यक्स्थावराद्यतिगर्हितनूतनशरीरप्राप्तिः क-

१. अ॥ नामरूपलक्षणैः पूर्वानुभूतविलक्षणानि॥ २. नामरूपजातिगुणविशेषैः पूर्वानुभूतविलणानि॥
३. २. २७.

स्यचिदिष्टा ॥ न हि पुरातनगृहत्यागेन नूतनकारागृहप्रवेशः पुरातनवसनत्यागेन नूतनगोणीपरिग्रहश्च दृष्टचरः इति चेत् अन्यानि विलक्षणानि लोकोत्तराणीति गृह्यमाणस्य त्यज्यमानापेक्षया अत्युत्तमत्वोक्तया समाधानं संभवति ॥ न ह्यधमं वस्त्रं त्यक्त्वा उत्तमं वस्त्रं गृह्णन्तः शोचन्ति लोके ॥ किन्तु हृष्यन्ति ॥ तथा अधमं शरीरं त्यक्त्वा उत्तमं शरीरं ग्रहीष्यन्तो भीष्मादयो न शोचिष्यन्ति ॥ किंतु हर्षिष्यन्ति ॥ युद्धे तनुं त्यजतां अत्युत्तमशरीरप्राप्तिः वेदशास्त्रपुराणादितोऽवगम्यते ॥ तस्मात् शोको न कार्य इत्युक्तं युक्तमेव ॥ देहिनोऽस्मिन्नित्यत्र शोकाविषये शोकः क्रियते इत्युक्तम् ॥ अत्रतु शोकविरुद्धहर्षविषये शोकः क्रियते इत्युच्यत इति विवेकः ॥

१ अस्त्वेवं तेषामशोच्यता तथाऽपि तेषां परमोपकारिणां भोगायतनस्य शरीरस्य नाशने अपकारकरणेन कृतघ्नोऽहंस्यां ॥ स्मर्यते हि कृतघ्नमधिकृत्य ॥ 'ब्रह्मघ्ने च सुरापे च चोरे भग्नव्रते तथा ॥ निष्कृतिर्विहिता शास्त्रे कृतघ्ने नास्ति निष्कृतिः' ॥ इति ॥ अतो बिभेमीति चेत् ॥ हन्त भ्रांतोऽसि ॥ अभ्युपगम्य युद्धं भीष्मादिशरीरनाशने महोपकारी खलु तेषां स्याः ॥ कथमिति चेत् ॥ अपराणि अन्यानि इत्यनयोः २ परमोत्कृष्टानीत्यर्थः ॥ नवानि गृह्णातीत्युक्तयैव अन्यानि गृह्णातीत्यर्थस्य लाभात् ॥ जीर्णवस्त्रत्यागेन नूतनवस्त्रग्रहणस्य मनुष्येतरस्मिन् असंभवात् नर इति व्यर्थम् ॥ अतः नरः मनुष्यविशेषः ॥ उत्कृष्टो मनुष्य इति यावत् ॥ जीर्णानि वस्त्राणि विहाय नवानि पूर्वानुभूतवस्त्रापेक्षया उत्कृष्टानि वस्त्राणि यथा गृह्णाति तथा देही धर्मानुष्ठानैकतानतया ३ प्रशस्तदेहवान् भीष्मादिः जीर्णानि वयसा तपसा च कृशानि शरीराणि विहाय अन्यानि नवानि उत्कृष्टानि दिव्यादिशरीराणि सं गर्भवासक्लेशादिराहित्येन याति ॥ भीष्मादयो हि चिराय धर्मानुष्ठानक्लेशेन जर्जरीभूतदेहाः भोक्तुकामास्तद्धर्मफलं असमर्थाः शरीरेणानेन तद्भोगाय स्वहननमात्मनाकर्तुमधर्मत्वादनिच्छवः परेण विशिष्टेन पुंसा धर्म्येण पथा क्लमेनानेहसा वा शरीरनाशमपेक्षमाणा वर्तन्ते ॥ सति चैवं कृते त्वया युद्धे तच्छरीरनाशे कृतमहोपकार एव तेषां त्वं स्याः ॥ त्वया दुर्योधनादीनामसतामपि वीरजनप्राप्यस्वर्गभोगभोगाय तदुचितदेहसंपादनेन महानुप-

१. अ ॥ केचित् ॥ २. 'अन्येयं रूपसंपत्तिरन्या वैदग्ध्यघोरणी' ॥ इत्यादौ तथा दर्शनात् ॥
३. प्रशंसायां इनि प्रत्ययः ॥

कारः कृतो भवति ॥ किं पुनर्महानुभावानां भीष्मादीनाम् ॥ अतो मा भैषीः ॥ वसन-दृष्टान्तः सर्वसाधारणः तेन कोऽर्थविशेषः सूचितो भवतीति चेत् नूतनवस्त्रग्रहणं द्विविधम् ॥ केचित्स्वतन्त्राः भर्तृपित्रादयः पुरातनं जीर्णं वस्त्रं विहाय नूतनमुपभोग-क्षमं वस्त्रं क्रीत्वा परिदधते ॥ परतन्त्राः भार्यापुत्रादयस्तु भर्तृपित्रादिभिः क्रीत्वा परिधेहीदमिति दत्तं वस्त्रं परिदधते ॥ अत्र परतन्त्राणां नव्यवस्त्रग्रहणमेव दृष्टा-न्ततयाऽभिप्रेतम् ॥ परतन्त्रजीवशरीरग्रहणरूपदार्ष्टान्तिकानुरोधात् । परतन्त्रस्य जी-वस्य नूतनशरीरग्रहणं परमात्माधीनम् ॥ वक्ष्यते च ॥ १'प्रकृतिं स्वामवष्टभ्य विसृ-जामि पुनः पुनः' इति ॥ परतन्त्राः भार्यापुत्रादयः पूर्वानुभूतवसनापेक्षया उत्कृष्टवस-नलाभाय स्वतन्त्रान् भर्तृपित्रादीन् अनुवर्तमानाः तन्मुखोल्लासाय तदुक्तमनुतिष्ठंतश्च दृश्यन्ते ॥ तथाकरण एव स्वतन्त्राः परतंत्रेभ्यः उत्कृष्टं वसनं क्रीत्वा ददति नान्यथा ॥ तद्वत् पूर्वानुभूतदेहापेक्षया उत्कृष्टदेहलाभाय परतन्त्रैर्जीवैः स्वतन्त्रं परमात्मानमनु-वर्तमानैः तन्मुखोल्लासाय तदुक्तमनुतिष्ठद्भिश्च स्थातव्यम् ॥ तथाकरण एव तेभ्य ईश्व-रः दिव्यं देहं दद्यात् ॥ नान्यथा ॥ प्रत्युत अधमां गतिमपि प्रापयेत् ॥ वक्ष्यते च ॥ २'तानहं द्विषतः' इत्यादिना ३'ततो यांत्यधमां गतिम्'॥ इत्यन्तेन॥ किं तदुक्तमिति चेत् ॥ स्वस्ववर्णाश्रमोचितं विहितं कर्म स्वमुखोल्लासाय तैस्तैः कर्तव्यमितीदं तदु-क्तम् ॥ तदाज्ञारूपवेदशास्त्रपुराणादितोऽवगतम् ॥ वक्ष्यते च ॥ ४'स्वे स्वे कर्मण्य-भिरतः संसिद्धिं लभते नरः'॥ इति ॥ ५'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मान-वः'॥ इति च ॥ अतस्त्वया इतोऽप्युत्कृष्टशरीरलाभाय स्वतन्त्रभगवदाराधनरूपं तेन तव विहितं कर्म कर्तव्यम् ॥ तच्च तव क्षत्रियस्य युद्धमेव ॥ अतः एतावन्मनसि नि-धाय 'युध्यस्व भारते'त्युक्तम् ॥ अयमर्थविशेषो वासोदृष्टान्तेन सूच्यते ॥ २२॥ ॥

अर्जुनः ॥ आत्मनः स्वतो निमित्तैश्च न नाशः ॥ देहस्य तु सर्वथा नाश इत्युक्तम् ॥ युद्धे क्रियमाणे शस्त्रैः आग्नेयवारुणवायव्याद्यस्त्रैश्च नाशः स्यात् ॥ पृथिव्यादिभूतचतुष्टयविकारैरारब्धो विकारसंभवात् ॥ सामान्य निमित्तैरनाश्यस्यापि निमित्तविशेषेण नाशः संभवति ॥ दक्षशिरोनाशवत् ॥

१. ९. ८. २. १६. १९. ३. १६. २०. ४. १८. ४५. ५. १८. ४६.

१अच्छिनद्धि पशुपतिर्दक्षस्य शिर शस्त्रादिना छेत्तुमशक्नुवन्नपि युद्धं यज्ञत्वेन तत्र तं पशुत्वेन च ध्यात्वा मन्त्रपूर्वकपशुसंज्ञपनोपायरूपेण केनाचिन्निमित्तविशेषेण ॥ छेदादयो विकाराः देहस्यैव नाऽऽत्मन. तस्य अविक्रियत्वात् इति चेत् गृहस्य दाहे गृहान्तर्वर्त्तिन इव देहस्य छेदादौ तदन्तर्वर्त्तिन आत्मनोऽपि तदवश्यंभावात् स्युरेवाऽऽत्मनः छेदादय. ॥ सतिचैवं आत्मन उक्तं नित्यत्वं कथं घटेत ॥ वद ॥

कृष्णः ॥ नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ॥
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥ २३ ॥

नेति ॥ शस्त्राणि एनं न च्छिन्दन्ति ॥ पावकः अग्निः एनं न दहति ॥ आपः एनं न क्लेदयन्ति च ॥ मारुतः वायुः एनं न शोषयति ॥ २३ ॥

एनं जीवं शस्त्राणि गदाखड्गादयः पृथिवीविकाराः न छिदन्ति ॥ द्विधा न कुर्वन्ति ॥ पावकोऽग्निः एनं न दहति ॥ आपः जलानि च एनं न क्लेदयन्ति ॥ आर्द्रीकरणेन शैथिल्यमुत्पाद्य न नाशयन्ति ॥ मारुतः वायुः एनं न शोषयति ॥ निमित्तविशेषा अप्येनं न नाशयन्ति ॥ शस्त्रादीनां मुक्तत उक्तिस्तु तेषामेव युद्धे संभवात्॥ पृथिव्यप्तेजोवायूनामेव नाशकत्वशङ्कानिरासेनैषौ ॥ नाऽऽकाशस्य ॥ तस्य नाशकत्वासंभवात् ॥ भूतचतुष्टयेन देहस्य छेदादौ सत्यपि न तदन्तर्वर्तिनोऽप्यात्मनः छेदादिकम् ॥ गृहस्य दाहेऽपि गृहान्तर्वर्तिनामपि दाहानर्हाणामुपलानामिव ॥ एनमेनमित्यसकृदुक्तिः सर्वेऽपि जीवा एवंरूपा इति सूचनाय ॥ इदमेव 'अच्छेद्योऽय'मित्यादावुत्तरत्र अयमित्यभ्यासकृदुक्तेरपि फलं बोध्यम् ॥ छिन्दन्तीत्यादिवर्तमाननिर्देशेन शस्त्रादयो न तव मम च छेदादिकं कर्तुं २प्रभवन्तीति ३युद्धेऽस्मिन्विदितं भविष्यतीति

---

१ 'आक्रम्योरसि दक्षस्य शितधारेण हेतिना ॥ छिन्दन्नपि तदुद्धर्तुं नाशक्नोत त्र्यंबकस्तदा ॥ शस्त्रैरस्त्रान्वितैर्नैनं आनर्भिन्नत्वच हर ॥ विस्मयं परमापन्नो दध्यौ पशुपतिश्चिरम् ॥ दृष्ट्वा संज्ञपने योगं पशूनां स पतिर्मखे ॥ यजमानपशोस्तस्य कायात्तेनाहरच्छिरः '॥ इति भागवते ४ स्कन्धे ५ अध्याये ॥ २. वि ॥ 'विनाशमव्ययस्यास्य न कश्चित् कर्तुमर्हती 'त्युक्तस्यैव प्रपञ्चः ॥ ३ युद्धस्य अद्याप्यनारब्धत्वेन न छेदादेः प्रसक्तिः ॥ अतो वर्तमाननिषेधोऽयमयुक्त इति चेत् 'प्रवृत्ते शस्त्रसंपाते' इत्युक्तेरस्त्रेव छेदादेः प्रसक्तिः ॥ तत्र 'वर्तमानसामीप्ये वर्तमानवद्वा' (३. ३. १३१.) इति भविष्यति क्तः ॥

सूच्यते ॥ १ जीवस्य स्वरूपतोऽविनाशित्वं देहतो विनाशित्वं ईश्वरस्य तु स्वरूपतो देहतश्चाविनाशित्वं इत्युक्तम् ॥ तत्कथम् ॥ जीवस्येव ईश्वरस्यापि देहतो विनाशित्वमेव युक्तम् ॥ युद्धे शस्त्रादिना ईश्वरदेहस्य छेदादिसंभवात् इति चेत् एनं ईश्वरं शस्त्राणि न छिन्दन्तीत्यादि पूर्ववत् ॥ ईश्वरदेहस्य छेदाद्यभावपरमिदम् ॥ जीवस्येव ईश्वरस्यापि स्वरूपतः छेदाद्यभावपरमेवेदमस्त्विति चेत् जीवस्यापि स्वरूपतः छेदाद्यभावादीश्वरस्य कैमुत्येन तत्सिद्धेः जीवादीश्वरस्य विशेषानावायकत्वाच्च वचनमिदं व्यर्थं स्यात् ॥ अतो युक्तमुक्तम् ॥ एनमेनमिति अयमयमिति च शब्दाऽऽवृत्तिः सर्वेष्वपि भगवद्रूपाणीदृशानीति सूचनाय ॥ २३ ॥

अर्जुनः ॥ न छिन्दन्तीति वर्तमाननिर्देशेन वर्तमानच्छेदादेरेव निषेधात् इदानीं सत्त्वेन पूर्वं तदभावालिङ्गेश्च स्यादुत्तरत्र च्छेदादिना विनाशित्वमात्मन इति भाति ॥ परिहर तमेतं विशयम् ॥

कृष्णः ॥ अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च ॥ २४ ॥ ॥

अच्छेद्य इति ॥ अयं आत्मा छेत्तुं अर्हः छेद्यः न छेद्यः अच्छेद्यः ॥ अयं दग्धुं अर्हः दाह्यः न दाह्यः अदाह्यः॥ अयं क्लेदयितुं आर्द्रीकर्तुं अर्हः क्लेद्यः न क्लेद्यः अक्लेद्यः॥ अयं शोषयितुं अर्हः शोष्यः न शोष्यः अशोष्यः चैव ॥ २४॥ ॥

अयं आत्मा छेत्तं दग्धुं क्लेदयितुं शोषयितुं च अनर्ह एव ॥ २ निरवयवत्वाच्छे-

प्रवृत्ते प्रवर्तितुमुद्युक्ते अविलंबेन प्रवर्तयितव्ये इति यावत् ॥ तदा शस्त्रसंपातप्राक्काले इति व्याख्यातत्वान्नेदानीमपि युद्धमारब्धमित्यवगम्यते ॥ तथा च कथं शस्त्रादिभिः छेदादेः प्रसक्तिः इति चेत् यावद्गीतोपदेशसमाप्ति युद्धस्यानारंभेऽपि तदनन्तरं युद्धारंभनिश्चयात् तत्र च छेदादिप्रसक्तेर्विद्यमानत्वात् उक्तार्थोपपत्तिः॥ वर्तमानसामीप्याद्वर्तमानप्रत्ययः॥ अत एव हि विदितं भविष्यतीति सूच्यते इत्युक्तम्॥ तत्र प्रवृत्ते इति भूते कृतः ॥ तदा युद्धारंभसमये इति व्याख्याने नोक्तशङ्कावकाश इति चेत् समनन्तरभारतग्रन्थेन गीतोपदेशसमाप्त्यनन्तरमेव युद्धारंभावगमात् 'योत्स्यमानानवेक्षेऽहं' इत्यादिगीताविरोधाच्च पूर्वव्याख्यानमेव तत्र युक्तम् ॥ नहि चलति युद्धे गीतोपदेशः इति वक्तुं युक्तम् ॥ असंभवात् ॥ १. द्वै ॥ केचित् ॥

दानर्हः अमूर्तत्वाद्दाहानर्हः निरवयवत्वान् क्लेदनानर्हः द्रवत्वाभावाच्च शोषणानर्हः॥ यस्मादेवं तस्मान्नैनं छिन्दन्ति शस्त्राणीत्यादि ॥ यस्माच्छेदाद्यनर्हः तस्मात् कदाऽऽत्मनः छेदादिना विनाशित्वं न भवति ॥ एनं ईश्वरं न छिन्दन्तीत्याद्युक्तं कुत इति चेत् ॥ अयं ईश्वरः अच्छेद्यः इत्यादि पूर्ववत् ॥ यस्मात् ईश्वरः छेदाद्यनर्हः तस्मात् एनं ईश्वरं न छिन्दन्तीत्यादि ॥ अतः ईश्वरस्य न च्छेदादिना विनाशित्वं भवति ॥ ईदृशेश्वरप्रतिबिंबत्वाज्जीवस्यापि न च्छेदादिना विनाश इति बोध्यम् ॥ छेदादिना नाशरहितेश्वरप्रतिबिंबत्वात् जीवस्य न च्छेदादिना नाश इति वक्तुं ईश्वरपरयोजनापेक्षा ॥ ईश्वरस्य देहतोऽपि च्छेदाद्यभावपरतया योजनाय जीवपरयोजनापेक्षा ॥ जीवपरयोजनया जीवस्य स्वरूपतः छेदाद्यभावप्रतिपादने हि ईश्वरे तस्य कैमुत्येन सिध्या ईश्वरे विशेषानाधायकताऽऽपत्या ईश्वरस्य देहतोऽपि छेदाद्यभावपरतया योजनमावश्यकं भवति ॥ अतोऽत्र अन्योन्याश्रयः इति चेत् ईश्वरस्य स्वरूपतः छेदाद्यभावपरतया योजयित्वा ईदृशेश्वरप्रतिबिंबत्वाज्जीवस्य न च्छेदादिना नाशः इत्येवं व्याख्याने नान्योन्याश्रयः ॥ एवं व्याख्याने जीवादीश्वरे विशेषानाधायकताऽऽपत्या आवृत्या पुनरीश्वरस्य देहतोऽपि छेदादिना नाशाभावपरतयाऽपियोजनं क्रियते ॥ अतो नानुपपत्तिः॥ २३॥ ॥

अर्जुनः ॥ कुतो हेतो रात्मनः छेदाद्यनर्हत्वं वर्तमानच्छेदाद्यदर्शनादेवेति चेत् पूर्वं कदाऽप्यदृष्टस्य पश्चादर्शनादेवं वक्तुं न युक्तम् ॥ अतो हेत्वन्तरं वक्तव्यम् ॥ वद ॥

कृष्णः ॥ नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥ २४ ॥
अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते ॥ २४॥ ॥

नित्य इति ॥ अयं आत्मा नित्यः सर्वं गतः सर्वगतः स्थाणः न चलः अचलः सनातनः अयं न व्यक्तः अव्यक्तः अयं चिन्तयितुं अर्हः चिन्त्यः न चिन्त्यः अचिन्त्यः अयं विकर्तुं अर्हः विकार्यः न विकार्यः अविकार्यः अयं उच्यते ईदृश उच्यते ॥ २४ ॥ २४॥ ॥

सर्वगतः स्थाणुः इति छेदः॥ अयं जीवः नित्यः सर्वगतः स्थाणुः अचलः सनातनः॥

सर्वगतत्वस्य जीवे अभावात् भगवत्परतया नेतव्यत्वेन तत्सहपठितानां नित्यत्वादीनामपि तथा नयनं युक्तम् ॥ नित्यत्वादिविशिष्टेश्वरप्रतिबिंब इत्यर्थः ॥ अभेदस्य बाधितत्वात् ॥ नित्यत्वस्य सर्वगतत्वस्य च ईश्वरे अनाशिनः अप्रमेयस्य इति पदाभ्यां 'अन्तवन्त' इत्यत्र उक्तत्वेन पौनरुक्त्यं इति चेत् नित्यत्वं सर्वगतत्वे विवक्षितम्॥ 'सविशेषणे हि विधिनिषेधौ सति विशेष्ये बाधे विशेषणमुपसंक्रामतः '॥ इति न्यायात् ॥ नित्यं यत्सर्वगतत्वं तद्विशिष्टः इत्यर्थः ॥ बिंबभूतस्येश्वरस्य सर्वगतत्वेन बिंबोपाधिसंनिधेः सर्वदा सत्वात् नात्मनो बिंबोपाधिसंनिधिनाशप्रयुक्तनाशः इति तत्र अप्रमेयपदेनोक्तम् ॥ यदि तदीश्वरस्य सर्वगतत्वं कालतोऽनित्यं स्यात् तर्हि बिंबोपाधिसंनिधेर्नाशसंभवात् तन्नाशप्रयुक्तो नाश आत्मनः स्यात् इति शङ्काऽपनोदाय ईश्वरस्य सर्वगतत्वं नित्यं इति वक्तव्यत्वादेवं व्याख्यातव्यम् ॥ स्थाणुः स्थिरस्वभावः नैमित्तिकनाशरहितः अचलः प्राकृतचलनरहितः 'अगुणः अतुलः' इत्यादिवत् ॥ स्थाणुः निमित्तैरप्यन्यथाभावरहितः ॥ क्रियाऽऽवेशात्मककर्तृत्वरूपनैमित्तिकान्यथाभावस्य 'तदैक्षत' 'तदसृजत' इत्यादौ श्रवणात् स्थाणुत्वमनित्यमिति चेत् अचलः अचञ्चलस्वभावः कदाऽप्यनपगतस्थाणुत्वादिमान् ॥ तर्हि श्रयमाणं कर्तृत्वं मायया ऽऽरोपितमसत्यं इति वक्तव्यमिति चेत् अचलः कदाऽप्यनपगतकर्तृत्वादिमान् ॥ अन्यथाभावराहित्यरूपं स्थाणुत्वं अन्यथाभावरूपं कर्तृत्वं चेत्युभयं विरुद्धं कथमीश्वरे घटते इति चेत् सनातनः नादेन शब्देन सह वर्तते इति सनातनः शब्दप्रमाणवान् ॥ १ 'त्वयीश्वरे ब्रह्मणि नो विरुध्यते ' ॥ २ 'विज्ञानशक्तिरहमासमनन्तशक्तेः' ॥ ३ 'पराऽस्यशक्तिर्विविधैव श्रूयते ' ॥ ४ 'चित्रं न चैतत् त्वयि कार्य कारणे ' इत्यादिश्रुतिस्मृतिरूपप्रमाणबलादुभयमप्यचिन्त्याद्भुतशक्तिवशादुपपद्यते ॥ ईदृशविचित्रशक्तेरपगमे कथमुपपद्येत इति चेत् अचलः कदाऽप्यनपगतविचित्रशक्तिमान् कुतः इदमवगम्यते इति चेत् सनातनः श्रुतिस्मृतिरूपप्रमाणबलात् कदाऽप्यनपगतविचित्रशक्तिमत्वमीश्वरस्यावगम्यते॥ अतो नानुपपत्तिः ॥ अचलसनातनपदयोरावृत्तिः ॥ एतादृशो य ईश्वरः तत्प्रतिबिंबः ॥ किञ्च अयं जीवः अव्यक्तः चक्षुरादिज्ञानेन्द्रियाविषयः अयं अचिन्त्यः मनसोऽविषयः अयं अविकार्यः कर्मेन्द्रियाविषयः ॥ कुतः ईदृशत्वमवगम्यते इति चेत् उच्यते वेदशास्त्रपुराणादिभिः एतादृशः उच्यते ॥ अव्यक्तत्वादिमान् य ईश्वरः तत्प्रतिबिंबः ॥ अतः अच्छेद्यत्वादिमान् जीवः ॥

---

१. भाग० १०. ३. २. भाग. ३ ९. ३. श्वे. ६. ८. ४. भाग० ५. १८.

कुतः ईश्वरस्य छेदाद्यनर्हत्वं इति चेत् अयं ईश्वरः नित्यः सर्वगतः स्थाणुः अचलः सनातनः अव्यक्तः अचिन्त्यः अविकार्यः उच्यते ॥ अतः ईश्वरः छेदाद्यनर्हः ॥ ईदृशे ईश्वरप्रतिबिंबत्वाच्च जीवस्याच्छेद्यत्वादिकं इति वा ॥

नित्यसर्वगतत्वादिविशिष्टेश्वरसरूपत्वमुक्त्वा किमर्थं पुन 'रव्यक्तोऽय' मित्यादिना अव्यक्तत्वादिविशिष्टेश्वरसरूपत्वमुच्यत इति चेत् बिंबभूतेश्वरधर्माणां नित्यसर्वगतत्वादीनां जीवे असंभवात् तत्प्रतिबिंबत्वं न संभवति इत्याक्षेपे अव्यक्तत्वादीनां केषां चिदीश्वरधर्माणां जीवे संभवात् तत्प्रतिबिंबत्वम् ॥ न हि प्रतिबिंबस्य बिंबगतया वद्धर्मवत्वं लोके दृश्यते ॥ अतः संभवद्धर्मविवक्षया प्रतिबिंबत्वोक्तिः ॥ इति बोधनार्थं पुनरीश्वरप्रतिबिंबतोक्तिः ॥ जीवे ईश्वरप्रतिबिंबतायाः पूर्वमुक्तत्वेन पुनरत्र तदुक्तया पौनरुक्त्यमिति चेत् तत्तच्छङ्कानिवर्तकान् बिंबभूतेश्वरगुणान् तत्रतत्र प्रदर्श्य जीवे तत्प्रतिबिंबताया उक्तेरपौनरुक्त्यम् ॥

सहेतुकमच्छेद्यत्वादेः कथनादेव नैमित्तिकविनाशसंभवशङ्काऽनुन्मेषात् 'नैन' मिति तत्प्रतिषेधो व्यर्थः इति चेत् उक्ताच्छेद्यत्वादेः, युद्धरङ्गे प्रसक्तिमतोऽप्यवर्जनीयस्य छेदादेरदर्शनात् अच्छेद्यत्वादिकं युक्तं इत्युपपादनार्थं 'नैनं छिन्दन्ती'ति निषेधः ॥ तर्हि अच्छेद्य' इत्यादेरन्तरं 'नैन' मिति श्लोकेन भाव्यम् इति चेत् प्रसक्तस्य वर्तमानकालिकस्य छेदादेरभावरूपं हेतुमुक्त्वा अच्छेद्यत्वादिरूपं साध्यं वक्तुं यथाश्रुत एव क्रमः कल्पितः ॥ पूर्वं कदाऽप्यदृष्टस्य पश्चाद्दर्शनात् वर्तमानच्छेदाद्यभावस्य हेतुत्वं न संभवतीत्युक्तं इति चेन् तस्य निश्चययुक्तित्वासंभवेऽपि संभावनायुक्तित्वसंभवादेवं वक्तुं युक्तम् ॥

जीवस्यापि अच्छेद्यत्वादेरभ्युपगमे भगवता सर्वसाम्याऽऽपत्त्या अनाशिनोऽप्रमेयस्य भगवतः पूजार्थं युध्यस्वेति पूज्यपूजकभावोक्तिः अनुपपन्ना स्यात् ॥ जीवस्य स्वरूपतोऽच्छेद्यत्वादिकं ईश्वरस्य तु स्वरूपतो देहतश्च अच्छेद्यत्वादिकं इति विशेषसद्भावात् पूज्यपूजकभाव उपपद्यते इति चेत् सर्वथा विनश्यतो देहस्य विषये ईश्वरादिशेषसत्वेऽपि कदाऽप्यनपगमिष्यत स्वरूपस्य विषये अविशेषात् पूज्यपूजकभावोऽनुपपन्न एव इति चेत् जीवेश्वरयोः स्वरूपविषयेऽपि महान् विशेषोऽस्ति ॥ अतः पूज्यपूजकभावादिकमुपपद्यत एव ॥ स विशेषः क इति चेत् ॥ सर्वगतस्थाणुः इत्येकं

पदम् ॥ सर्वगते परमात्मनि तिष्ठति तदधीनतया तदाधारकतया च वर्तते इति सर्व गतस्थः स चासौ अणुश्च सर्वगतस्थाणुः ॥ नित्यः इत्यस्य नित्यमित्यर्थः ॥ क्रियाविशेषणत्वेऽप्यार्षत्वात् पुंस्त्वम् ॥ नित्यः इति सर्वगतस्थत्वविशिष्टस्य अणुत्वविशिष्टस्य च जीवस्य विशेषणं 'सविशेषणे ही' ति न्यायात् सर्वगतस्थत्वाणुत्वरूपविशेषणे उपसंक्रामति ॥ नित्यं यत् सर्वगतस्थत्वं अणुत्वं च तद्विशिष्टः ॥ इति वा ॥ नित्यं सर्वगतपरमात्माधीनः तदाधारकः अणुश्च जीवः ॥ परमात्मा तु सर्वगतः स्वतन्त्रः आधारभूतश्च ॥ अयमेव जीवेश्वरस्वरूपविषये विशेषः ॥ जीवस्य सर्वगतस्थत्वं अणुत्वं च यदा अपगच्छति तदा अविशेषः स्यात् इति चेत् अचलः अचञ्चलस्वभावः कदाऽप्यनपगतसर्वगतस्थत्वाणुत्वस्वभावः ॥ नित्यत्वविशेषणेनैवोक्तार्थलाभात् अचल इति व्यर्थमिति चेत् सर्वगतस्थत्वाणुत्वादेः स्वाभाविकनाशाभावेऽपि वरादिप्रबलनिमित्तक नैमित्तिकनाशः स्यात् इति शङ्कापरिहाराय अचल इत्युक्तम् ॥ जीवस्य ईदृशत्वं कुतोऽवसीयते इति चेत् सनातनः नादेन शब्दप्रमाणेन सहितः शब्दप्रमाणैकसमधिगम्यः ॥ जीवस्य ईदृशत्वं प्रमाणबलादवसीयते ॥ किं च जीवः सनातनः विधिनिषेधबोधकशब्दबद्धः परमात्मा तु विधिनिषेधागोचरः ॥ मुक्तौ जीवस्य विधिनिषेधागोचरत्वात् तदानीमीश्वराधीनता न स्यात् इति चेत् सनातनः मुक्तौ विधिनिषेधातीतत्वेऽपि जीवस्य भगवदधीनत्वं प्रमाणबलादवगम्यते ॥ अणुत्वाज्जीवस्य व्यक्तमदर्शनेऽपि तदाधारभूतस्य ईश्वरस्य व्यक्तं दर्शनं स्यात् इति चेत् अयमीश्वरः अव्यक्त अप्रकाशः ॥ वक्ष्यते च ॥ १ 'नाहं प्रकाशः सर्वस्ये' ति ॥ देहतोऽपि छेदादिरहितस्य सर्वगतस्य कथमव्यक्तत्वमिति चेत् अचिन्त्यः अचिन्त्यशक्तित्वात् सदा सर्वत्र सत्वेऽपि अदर्शनमुपपद्यते ॥ तादृशाचिन्त्यशक्तेर्नाशे तस्य दर्शनं स्यात् इति चेत् अविकार्यः विकर्तुं विकारं नेतुं अशक्यः अप्रतिहताचिन्त्यनित्यशक्तिकः ॥ ईश्वरस्य सर्वथा अदृश्यत्वे श्रवणमननादेर्वैयर्थ्याऽऽपत्या सर्वशास्त्रवैयर्थ्यम् ॥ अपरोक्षदर्शनपरश्रुत्यादीनां अप्रामाण्यं च स्यात् इति चेत् अव्यक्तः आत् ईश्वरात् तत्प्रसादात् ॥ २ 'अ इतिब्रह्मे' ति श्रुतिः ॥ व्यक्तः ॥ ३ 'यमेवैष वृणुते तेन लभ्यः तस्यैष आत्मा विवृणुते तनूं स्वां' ॥ इति श्रुतिः ॥ ४ 'अतोऽनन्तेन तथा हि लिङ्ग' मिति सूत्रम् ॥ तस्य प्रसादः

१. ७. २५. २. ऐ. आ. २. ३. ८. ७. ३. का. २. २३. ४. ३. २. २७.

कथमुत्पद्यते इति चेत् अचिन्त्यः अः ब्रह्म इति चिन्त्यः ॥ १ 'ब्रह्मदृष्टिरुत्कर्षा 'दिति सूत्रम् ॥ भगवतो ब्रह्मत्वेनोपासनात्तादृशो भगवतः प्रसादो लभ्यते ॥ अव्यक्तः अचिन्त्यः इत्यनयोरावृत्तिः । कुतः ईश्वरस्य ईदृशाचिन्त्याद्भुतशक्तिमत्वमिति चेत् उच्यते श्रुत्यादिभिरीश्वर एतादृश उच्यते ॥ तस्मादस्य विषये यदुच्यते तदखिलं युक्तम् ॥

'नैनं छिन्दन्ती 'ति सार्धश्लोकद्वयं ईश्वरपरमेव ईश्वरपरतय योजनं तूक्तम् ॥ एवंसति जीवस्य नैमित्तिकनाशप्रतिषेधकाभावात् जीवविषयनैमित्तिकनाशशङ्काथाः कः परिहारः इति चेत् बिंबभूतेश्वरस्य नैमित्तिकनाशप्रतिषेधे तत् तिर्बिंबस्य जीवस्य स्वतएव तल्लाभः ॥ तुल्यन्यायेन देहनोऽप्यच्छेद्यत्वादिकं जीवस्याऽऽपद्येत इति चेत् यो यत्प्रतिबिंबः स असति विरोधेतत्समानधर्मा ॥ देहतोऽप्यच्छेद्यत्वादेरभ्युपगमे प्रत्यक्षविरोधः ॥ अत उक्तं सर्वमुपपद्यते ॥ इति वा ॥ २४ ॥ २४॥ ॥

अ ॥ अयमात्मा नित्यः सर्वगतः स्थाणुः स्थिरस्वभावः रूपान्तरापत्तिरूपविक्रियाशून्यः अचलः क्रियारहितः अवस्थान्तरप्राप्तिर्विक्रिया अवस्थैक्येऽपि चलनमात्रं क्रिया इति भेदः ॥ पूर्वरूपापरित्यागी वा ॥ सनातनः सदैकरूपः अनादिर्वा चिरन्तनो वा॥ सना इत्यव्ययं नैरन्तर्यार्थकम् ॥ देशतः कालतो वस्तुतश्च परिच्छेदरहितो वा॥ वस्तुतः परिच्छेदाभावो नाम सर्ववस्त्वात्मकत्वं सजातीयविजातीयस्वगतभेदराहित्यं इति यावत् ॥ सना नैरन्तर्येण त्रिविधपरिच्छेदराहित्येन भवति अस्तीति सनातनः अखण्डैकरसः न कस्या अपि क्रियायाः कर्मभूतः ॥ कुत इति चेत् उत्पत्त्याप्तिविकृतिसंस्कृतिरूपकर्तृक्रियाफलयोगे हि कर्मत्वं स्यात् ॥ अनित्यो घटादिरुत्पाद्यते ॥ परिच्छिन्नो ग्रामादिः प्राप्यते ॥ रूपान्तरापत्तिरूपविक्रियावान् तक्षीरादिर्विकार्यते ॥ मलावरणेन पूर्वरूपपरित्यागी दर्पणादिः संस्कार्यते ॥ आत्मा तु नित्यत्वादनुत्पाद्यः सर्वगतत्वादप्राप्यः स्थाणुत्वादविकार्यः अचलत्वादसंस्कार्यः ॥ अतः अच्छेद्यत्वादिमान् ॥

चैत्रो दग्धः छिन्नः इत्यादिप्रयोगदर्शनात् स्यादेव च्छेदादिकमात्मनः इति चेत् अयमात्मा अव्यक्तः चक्षुरादीन्द्रियागोचरः ॥ अतः न प्रत्यक्षं तत्र प्रमाणम् ॥ प्रत्यक्षा-

---

१. ४ १. ५.

भावेऽप्यनुमानं तत्र प्रमाणमस्तु इति चेत् ॥ अयं अचिन्त्यः अनुमानाविषयः क्वचित्प्रत्यक्षस्यैव वन्ह्यादेरन्यत्रानुमानविषयत्वं दृष्टम् ॥ अयमात्मा तु अतीन्द्रियत्वेन प्रत्यक्षाविषयत्वादनुमानाविषयः ॥ अतीन्द्रियस्यापि चक्षुरादेरिन्द्रियस्य कार्येणानुमानविषयत्वदर्शनादस्यापि अनुमानविषयत्वं स्यात् इति चेत् अविकार्यः विलक्षणकार्याभाववान् विलक्षणकार्योपलंभे तदन्यथाऽनुपपत्या अतीन्द्रियत्वेऽप्यनुमानविषयत्वं स्यात् ॥ अयं तु कार्याभाववान् अतो नानुमानविषयः ॥ अतो नानुमानं तत्र प्रमाणम् ॥ श्रुतिः प्रमाणमस्तु इति चेत् उच्यते ॥ अयं वेदादौ अच्छेद्यत्वादिमानुच्यते॥ अतो न श्रुतिः प्रमाणम् ॥ लौकिकशब्दः प्रमाणमस्तु इति चेत् तस्य प्रत्यक्षादिपूर्वकत्वेन प्रत्यक्षादेरभावादसिद्धिः अतः सोऽपि न तत्र प्रमाणम् ॥ छेदादौ कस्यापि प्रमाणस्याभावादच्छेद्यत्वादिमानात्मा ॥ चैत्रो दग्ध इत्यादिप्रयोगस्तु भ्रान्तिमूलकः देहदाहादिपरो वा ॥ अयमात्मा अव्यक्तः चक्षुरा गोचरः अयं अचिन्त्यः मनसोऽप्यगोचरः अयं अविकार्यः कर्मेन्द्रियागोचरः आत्मतत्त्वज्ञैः एतादृश उच्यते इति वा ॥ 'वासांसि ' देहिनोऽस्मिन् ' इत्यत्र स्थूलशरीराभिन्नत्वमात्मनः प्रतिपादितं तन्नाशे नाऽऽत्मनो नाशः इति चोक्तम् ॥ लिङ्गशरीरशब्दितसूक्ष्मशरीरकारणशरीरयोरेवाऽऽत्मत्वात्तन्नाशे स्यादात्मनो नाश इति चेत् अव्यक्तः व्यक्तः सूक्ष्मदेहः तद्भिन्नः अचिन्त्यः चिन्त्यः कारणदेहः तद्भिन्नः अतः अविकार्यः विकारं प्रापयितुमनर्हैः श्रुत्यादिभिरुच्यते॥ व्यक्तः प्रत्यक्षगम्यः स्थूलदेहः तद्भिन्नोऽव्यक्तः कार्येणानुमेयचक्षुरादिसमुदायात्मकलिङ्गदेहः चिन्त्यः तद्भिन्नोऽचिन्त्यः ॥ विकारं स्थूलसूक्ष्मकार्यभावेनावस्थानं अर्हतीति विकार्यः त्रिगुणात्मकमूलाज्ञानरूपकारणदेहः तद्भिन्नोऽविकार्यः उच्यते॥ इति वा॥ 'सर्वगत ' इत्यनेन यो हि शस्त्रादौ न तिष्ठति तस्य शस्त्रादिना छेदादिकं स्यात् अयं तु सर्वगतत्वेन शस्त्रादीनामन्तः स्थित्वा तेषां सत्तास्फूर्त्तिप्रदः अतः शस्त्रादयः एनं न स्वव्यापारविषयीकुर्युः इति सूच्यते ॥ 'नैन 'मिति शस्त्रादीनां छेदादिकरणसामर्थ्याभाव उक्तः ॥ 'अच्छेद्योऽय 'मिति तत्र हेतुतया छेदाद्ययोग्यत्वं सहेतुकमुक्तम् ॥ 'अव्यक्तोऽय 'मिति छेदादौ १ प्रमाणाभाव उक्तः ॥ दुर्बोधत्वादात्मतत्त्वस्य पुनः पुनः शङ्का-

१. नित्यत्वादयोऽष्टौ हेतवः ॥ विकर्तुं योग्याः विकार्याः अवयवाः अविकार्यः निरवयवः ॥ इति केचित ॥

न्तराण्युद्धाम्ब तदेव भेग्यन्तरेणाभिहितं मन्दानांबुद्धिगोचरतामापद्येतेत्याशयात् क्वचिदर्थतः क्वचिच्छब्दतश्च पुनरुक्तिर्न दोषाय ॥ २४ ॥ २४॥ ॥

वि ॥ सर्वगतः परमसूक्ष्मत्वेन सर्वव्यापनस्वभावः अतः छेदाद्यभाववान् अतो नित्यः" परमसूक्ष्मत्वेन 'अविनाशित्वे'त्यत्रोक्तरीत्या छेदाद्यनर्हत्वादात्मनो न शस्त्रादिभिर्नाशः ॥ अत एव स्थाणुः स्थिरस्वभाव अचलः यत्नेनाप्यप्रकंप्यः ॥ 'स्थाणु'रिति नाशानर्हत्वमुच्यते ॥ 'अचल' इति शस्त्राद्यविषयत्वं इति वा ॥ 'स्थाणु'रिति स्वाभाविकविकाराभाव उच्यते ॥ 'अचल' इति नैमित्तिकविकाराभावः इति वा ॥ अयं सनातनः अनादिः ॥ छेदादिमत्वं प्रत्यक्षेण गृह्यते अतः अच्छेद्यत्वानुमानं प्रत्यक्षविरुद्धं इति चेत् अव्यक्तः चक्षुराद्यगोचरः ॥ शरीरस्य छेदादिमत्वं प्रत्यक्षेण गृह्यते ॥ अतः तस्य अच्छेद्यत्वादेरुक्तौ प्रत्यक्षविरोधः स्यात् ॥ आत्मनः छेदादिमत्वं न प्रत्यक्षेण गृह्यते आत्मनोऽनीन्द्रियत्वात् ॥ अतस्तस्य अच्छेद्यत्वादेरुक्तौ न प्रत्यक्षविरोधः ॥ अप्रत्यक्षस्यापि कुसूलनिहितधान्यस्य अङ्कुरायोग्यत्वसाधने प्रत्यक्षविरोधः तस्य अप्रत्यक्षत्वेऽपि अङ्कुरयोग्यप्रत्यक्षधान्यसाजात्यात् ॥ तद्वत् अप्रत्यक्षस्याप्यात्मनः छेदाद्ययोग्यत्वसाधने प्रत्यक्षविरोधः स्यादेव छेदादियोग्यप्रत्यक्षवस्तुसाजात्यात् इति चेत् अचिन्त्यः अव्यक्तपदेन व्यक्तशब्देनेन्द्रियग्राह्ययावद्वस्तुावजातीयत्वोक्तया छेदादियोग्यप्रत्यक्षसर्ववस्तुविजातीयत्वादात्मनः छेदादियोग्यप्रत्यक्षवस्तुसाजात्यात्तत्स्वभावत्वेन तदभावानुमाने प्रत्यक्षविरोध इति चिन्तयितुमनर्हः ॥ प्रत्यक्षसर्ववस्तुविजातीयत्वेन प्रत्यक्षवस्तुसाजात्यात् प्रत्यक्षविरोध इत्यपि न वक्तुं शक्यम् ॥ अतः अयमात्मा अविकार्यः विकारं प्रापयितुमनर्हः ॥ तर्हि शास्त्रविरोध इति चेत् उच्यते ॥ अयमात्मा अच्छेद्यत्वादिविशिष्टः नित्यत्वादिविशिष्टश्च शास्त्रैरुच्यते ॥ अतो न तद्विरोधः ॥ २४ ॥ २४॥ ॥

अर्जुनः ॥ अस्त्येवंताद्दश आत्मा ततः किम् ॥ वद ॥

कृष्णः ॥ तस्मादेनं विदित्वैवं नानुशोचितुमर्हसि ॥ २५ ॥

तस्मादिति ॥ तस्मात् एनं एवं विदित्वा ज्ञात्वा अनुशोचितुं नार्हसि ॥ २५ ॥

आत्मनः स्वभावतो निमित्ततश्च नाशाभावात् एनं आत्मानं एवं अनादिनित्यत्वादिना अशोच्यं विदित्वा हन्ताऽहमेतेषां मयेमे हन्यन्ते इति शोकं कर्तुं नार्हसि ॥ एवमात्मानमविदित्वा एवमन्वशोचः विदित्वा त्वेनमात्मानं नानुशोचितुमर्हसि ॥ नार्हसीत्युक्तया आत्मवेदिनस्ते शोको नोपपद्यते इति सूच्यते ॥ शोचसि च त्वम् ॥ अतस्त्वं मूढः त्वद्वादाश्च प्रज्ञावादाः ॥

१ अस्तु उक्तदिशा ईश्वरः स्वातन्त्र्यादिसकलकल्याणगुणरत्नाकरः ततः किं वद इति चेत् तस्मात् ईश्वरस्यैव स्वातन्त्र्यात् विहितं युद्धादिकं स्वकर्म कृतवतां उक्तगुणवत्तया स्वं ज्ञातवतां अशेषदुःखनिरसनद्वारा पुमर्थशिरोरत्नमोक्षप्रदत्वाच्च एनं ईश्वरं एवं विहितस्वकर्मानुष्ठानद्वारेण ज्ञात्वा तेन ज्ञानेन नानुशोचितुं दुःखाभावेन स्थातुं अर्हसि मुक्तो भवितुमर्हसि ॥ २५ ॥

अर्जुनः ॥ आत्मनां नित्यत्वात् देहानां सर्वथा नाशाच्च तान् प्रति शोकमोहौ परित्यज्य त्वया युद्धं कर्तव्यमित्युक्तम् ॥ नित्यत्वाप्यात्मनः शरीरसंयोगवियोगरूपौ जन्मनाशौ स्त एव ॥ युद्धे च शरीरवियोगरूपं मरणं नियतम् ॥ मृतानां च यावन्मोक्षं पुनर्जननं नियतम् ॥ अतो मदीयानां मम च मरणेन पश्चाज्जन्मना च दुःखं भविष्यतीति शोचामि ॥ कथं शोकमोहौ त्यक्त्वा युद्धं कर्तुं शक्यम् ॥ वद ॥

कृष्णः ॥ अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम् ॥
तथाऽपि त्वं महाबाहो नैवं शोचितुमर्हसि ॥ २६ ॥
जातस्य हि ध्रुवो मृत्युः ध्रुवं जन्म मृतस्य च ॥
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥ २७ ॥

अथेति ॥ महान्तौ बाहू यस्य सः महाबाहुः हे महाबाहो अर्जुन नित्यं नियमेन जातः नित्यजातः तं च नित्यं मृतं वा च अथ मन्यसे मन्यसे यदि ॥ तथाऽपि त्व एव उक्तरीत्या शोचितुं नार्हसि ॥ २६ ॥

१. द्वै ॥ केचित् ॥

जातस्येति ॥ जातस्य मृत्युः मरणं ध्रुवः नियतः ॥ मृतस्य जन्म च ध्रुवम् ॥ हि प्रसिद्धमिदम् ॥ हि यस्मात् तस्मादिति वा ॥ तस्मात् परिहर्तुं योग्यं परिहार्यं परिहार्यं अपरिहार्यं तस्मिन् अर्थे वस्तुनि विषये त्वं शोचितुं नार्हसि ॥ २७ ॥

एनं आत्मानं नित्यजातं नियमेन जनिमन्तं शरीरसंयोगरूपजनिमन्तमेव नित्यं नियमेन मृतं वा शरीरवियोगरूपमरणवन्तमेव च॥ अथ मन्यसे यदि मन्यसे तथाऽपि[1] एवं शोचितुं नार्हसि ॥ महाबाहोः परमधीरस्य तव एवं शोचनमनुचितम् ॥ अतएव नानुशोचितुमर्हसीत्युक्तम् ॥ २६ ॥

कुतो न शोचितव्यमिति चेत् जातस्य देहस्य मृत्युः मरणं ध्रुवः नियतः अवश्यंभावी ॥ मृतस्य जन्म पुनर्जनिश्च ध्रुवम् ॥ श्रुत्यादिप्रसिद्धमिदम् ॥ जन्ममरणयोरवश्यंभावित्वात् परिहर्तुमशक्ये अवर्जनीये जननमरणनिमित्तकदुःखरूपे पदार्थे विषये महाकुलप्रसूतः परमधीरश्च त्वं शोचितुं नार्हसि ॥ न ह्यवर्जनीये शोको युज्यते ॥ पूर्वश्लोकार्थे हेतूक्तिपरोऽयं श्लोकः ॥ २७ ॥

यान् प्रत्यहमनुशोचामि तेषामशोच्यत्वं सयुक्तिकमुक्त्वा तान् प्रति न त्वया शोकः कार्यः इति कृष्ण त्वया सम्यगभिहितम् ॥ अथापि न तदखिलं शोकातंककलंकिते मम मानसे श्रयते ॥ उक्तं हि मया ॥ '[2] कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसंमूढचेताः' ॥ इति ॥ सतिचैवं किं करोमि का वा मे गतिः ॥ वद ॥ इति चेत् अथेति पक्षान्तरतासूचनाय ॥ तिष्ठतु तावदयं विस्तरः ॥ पक्षान्तरमेव ब्रवीमि ॥ तथाऽपि उक्तयुक्तीनां त्वदीयमनःसंश्रयणाभावेऽपि एनं नित्यजातं च नित्यं मृतं च त्वं मन्यसे ॥ तेन त्वमेवं शोचितुं नार्हसि ॥ जन्ममरणे नियततया अवर्जनीये इति त्वयैव ज्ञातत्वात् तावन्मात्रज्ञाननैव त्वया शोको न कार्यः ॥ न ह्यवर्जनीयत्वेन ज्ञाते विवेकिनां शोको दृष्टः ॥ २६ ॥

जातस्येत्यादि पूर्ववत् ॥ जन्ममरणयोरवर्जनीयताज्ञानरूपहेतोः पूर्वश्लोक एवोक्तत्वात् पूर्वश्लोकोक्तयोः हेतुसाध्ययोरेव दार्ढ्यार्थमनुवादपरोऽयं श्लोकः ॥ २७ ॥

---

१. एनमिति पाठान्तरम् ॥ एनं प्रतीत्यर्थः ॥ २. २. ७.

अ ॥ अर्जुनः ॥ आत्मनो नित्यत्वान्न शोकः कार्य इत्यभिहितम् ॥ आत्मयाथात्म्यज्ञानं परमात्मप्रसादैकलभ्यम् ॥ न तदुदेति मम ॥ अहं तु आत्मा तत्तद्देहेन सह जायते ॥ तत्तद्देहेन सह नश्यतीति जीवानित्यत्वपक्ष एव युक्त इति मन्ये ॥ जीवस्यानित्यत्वात्तन्नाशशङ्कया शोचामि ॥ कथमेवं सति युद्धमङ्गीकुर्याम् ॥ वद ॥

कृष्णः ॥ अथेति पक्षान्तरतास्चकम् ॥ चशब्दोऽप्यर्थे ॥ दुर्बोधत्वादात्मयाथात्म्यस्य मदुक्तमनङ्गीकृत्य यदि जीवानित्यत्वपक्षमवलंबसे तत्राप्युच्यते इति वा ॥ एनं नित्यजातं तत्तच्छरीरोत्पत्तौ नियमेन जनिमन्तं च नित्यं मृतं च तत्तच्छरीरनाशे नियमेन नाशवन्तं च १ मन्यसे ॥ तथाऽपि एवं शोचितुं नार्हसि ॥ महाबाहुरपि पराक्रमसीमाऽपि त्वं दुर्मताभ्युपगमात् ईदृशोऽसि संवृत्तः इति साभिप्रायसोपहाससानुकंपसंबोधनेन तवेदमनुचितमिति सूच्यते ॥ २६ ॥

कुत इति चेत् जातस्य देहेन सह जातस्य मृत्युः ध्रुवः अपरिहार्यः ॥ देहेन सह मृतस्य पुनर्जन्म च अपरिहार्यम् ॥ देहारंभककर्मक्षये देहेन सह नाशस्य कृतेन देहारंभकेण कर्मणा पुनरुत्पत्तेश्च २ न्याय्यत्वात् ॥ श्रुत्यादिप्रसिद्धमिदम् ॥ तस्मात् जन्ममरणयोः मरणजन्मनोश्च अहोरात्रयोरिव शुक्लपक्षकृष्णपक्षयोरिव च अवर्जनीयत्वाद् परिहर्तुमशक्ये तस्मिन् जन्ममरणलक्षणेऽर्थे विवेकी त्वं न शोचितुमर्हसि॥२७॥

आत्मा ज्ञानस्वरूपः प्रतिक्षणविनाशीति बौद्धाः ॥ देह एवाऽऽत्मा स च जायते नश्यति प्रतिक्षणं विपरिणमते च इति चार्वाकाः ॥ देहातिरिक्तोऽप्यनित्य आत्मा देहेन सह जायते देहेन सह नश्यति इत्यन्ये ॥ सृष्ट्यादिकाल एव आकाशवज्जायते आप्रलयं शरीरभेदेऽप्यनुवर्तते नश्यति च प्रलय इत्यपरे ॥ नित्य एवाऽऽत्मा स च देहसंयोगेन जायत इत्युच्यते ॥ देहवियोगेन म्रियते इत्युच्यते ॥ तौ च देहसंयोगवियोगरूपजन्मनाशौ कर्मनिमित्तकत्वात् कर्माधारस्यात्मन एव मुख्यौ ॥ देहस्य कृतहानाकृताभ्यागमप्रसङ्गेन कर्माधारत्वाभावादमुख्यौ इति तार्किकाः ॥ नित्य

१. मन्यसे इति काकुः ॥ परमास्तिकस्त्वं न मन्यस एव ॥ यदि कदाचित् लोकवासनया मन्यसे तथाऽपि इति केचित् ॥ २. देहेन सह आत्मनो नाशादिदं चिन्त्यम् ॥ देहस्येव प्रकारान्तरेणोत्पत्तिर्वा विलक्षणीया ॥

एवाऽऽत्मा तस्य आकाशस्येव कर्णशष्कुलीजन्मना देहजन्मना जन्म तन्नाशेन च नाशः इति औपाधिकतया जन्मनाशावमुख्यौ ॥ देहस्य तौ मुख्यौ इत्यन्ये ॥ इति षट् पक्षाः ॥ तत्र प्रथमद्वितीयतृतीयपक्षेषु शोको न कार्यः ॥ प्रथमपक्षे नित्यं प्रतिक्षणं जातं नित्यं प्रतिक्षणं मृत इत्यर्थः ॥ द्वितीयपक्षे नित्यं नियमेन जातं नित्यं नियमेन मृतं इति प्रतिक्षणं विपरिणामाङ्गीकारात् नित्यं प्रतिक्षणं जनिमन्तं नित्यं प्रतिक्षणं मृतिमन्तं इति चार्थः ॥ पूर्वावस्थापरित्यागोत्तरावस्थास्वीकारयोः सत्वात् ॥ तृतीयपक्षे नित्यं प्रतिशरीरोत्पत्ति जातं नित्यं प्रतिशरीरनाशं मृतं इत्यर्थः ॥ तत्र प्रथमपक्षे प्रतिक्षणमात्मनोऽन्यत्वेन बन्धुविनाशजनितदुःखस्य पारत्रिकदुःखस्य चाभावेन दृष्टादृष्टोभयविधदुःखनिमित्तकशोकप्रतिषेधः ॥ द्वितीयतृतीयपक्षयोः दृष्टदुःखनिमित्तकशोकसंभवेऽपि शरीरनाशोत्तरमात्मनोऽभावेन पापहेतुकपारत्रिकदुःखानुभवभयनिमित्तकशोको न कार्य इत्यदृष्टदुःखनिमित्तकशोकप्रतिषेधः ॥ अत एव एवं शोचितुमित्युक्तम् ॥ आत्मनो नित्यत्वपक्षे यथा ऐहिकस्य पारत्रिकस्य च दुःखस्य संभवं मत्वा उभयथा शोचासि तथा शोचितुं नार्हसि ॥ प्रथमपक्षे उभयविधदुःखप्रसक्तेरभावात् द्वितीयतृतीयपक्षयोः पारत्रिकदुःखप्रसक्तेरभावात् ॥ इति तदर्थः ॥ अतो मदीयनित्यत्वपक्षापेक्षया त्वदीया नित्यत्वपक्षा एव एव त्वां युद्धे प्रवर्तयितुमनुकूलाः ॥ २६ ॥

चतुर्थपञ्चमषष्ठपक्षेषु नित्यं नियमेन जातं नित्यं नियमेन मृतं इत्यर्थः ॥ शरीरनाशानन्तरं आत्मनो विद्यमानत्वेऽपि शोको न कार्यः ॥ कुत इति चेत् जातस्य कर्मवशाल्लब्धशरीरसंयोगरूपजन्मनः स्वरूपतो नित्यस्याप्यात्मनः मृत्युः शरीरवियोगरूपं मरणं ध्रुवं निश्चितः अवश्यंभावी ॥ शरीरारंभककर्मक्षये शरीरक्षयस्य न्याय्यत्वात् ॥ मृतस्य लब्धशरीरवियोगरूपमरणस्य पुनर्जन्म च ध्रुवम् ॥ कृतशरीरान्तरारंभककर्मणः तेन पुनः शरीरसंयोगस्य न्याय्यत्वात् ॥ जीवन्मुक्तयवस्थामापन्नस्य न पुनर्जन्म अतः कथमुच्यते ' ध्रुवं जन्म मृतस्य च ' इति इति चेत् कर्मशेषवतो जीवस्यैव प्रकृते विवक्षणात् जीवन्मुक्तो मृतस्येत्यनेन न गृह्यते ॥ तस्मात् जन्ममरणयोरवश्यंभावित्वात् अपरिहार्ये तस्मिन्नर्थे न शोचितुमर्हसि ॥ त्वयियुद्धादुपरते यद्येते भीष्मादयो न म्रियेरन् म्रियेरंश्च युद्धे तर्हि शोकः कर्तुमुचितः ॥ न तथा मरिष्यन्त्येव नियतं ते ॥ वक्ष्यते च ॥ १ ' ऋतेऽपि त्वा न भविष्यन्ति सर्वे ' इति ॥ तत्परिहारासमर्थस्य

---

१. ११. ३२.

तव अवश्यंभाविनि तस्मिन् जननमरणरूपार्थे शोको न कर्तुमुचितः ॥ शोके प्रयोजनाभावात् इति चतुर्थादिषु त्रिषु पक्षेषु दृष्टदुःखनिमित्तकशोकप्रतिषेधः ॥ तस्मात् देहानाशेऽप्यात्मनोऽनाशात् अर्थे युद्धाख्ये विहितकर्मणि अपरिहार्ये विहितत्वात् विहितपरित्यागे प्रत्यवायप्रसङ्गाच्च परिहर्तुमशक्ये सति त्वं शोचितुं अदृष्टदुःखनिमित्तकं शोकं कर्तुं नार्हसि ॥ युद्धं हि क्षात्रियस्य विहितं कर्म तच्च हिंसारूपमपि यागीयपशुहिंसावत् न प्रत्यवायजनकम् ॥ प्रत्युत पारत्रिकसुखजनकं च ॥ अतः शरीरनाशेऽप्यात्मनोऽनाशात् तस्य पारत्रिकसुखलाभार्थे विहितकर्मणः कर्तव्यत्वेनापरिहार्यत्वात् तेन पारत्रिकदुःखसंभावनानिमित्तकः शोको न कार्यः इति तेषु पक्षेषु अदृष्टदुःखनिमित्तकशोकस्य प्रतिषेधः ॥ वक्ष्यते च ॥ १ 'स्वधर्ममपि चावेक्ष्य' २ 'स्वर्गद्वारमपावृतं' ३ 'नियतं कुरु कर्म त्वं' ४ तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर' ॥ ५ 'तस्मादसक्तः सततं कार्यं कर्म समाचर' इत्यादि॥ युद्धाख्यं कर्म काम्यम् ॥ वक्ष्यते च ॥ ६ 'हतो वा प्राप्स्यसे स्वर्गं जित्वा वा भोक्ष्यसे महीम्' ॥ इति॥ तत्तु परिहार्यम् ॥ वक्ष्यते च ॥ ७ 'दूरेण ह्यवरं कर्म' इति ॥ सति चैवं अपरिहार्यत्ववचनं कथमिति चेत् काम्यमपि आरब्धस्य परिसमापनीयत्वेन नित्यवदपरिहार्यम् ॥ आरब्धत्वात् ॥ इदं चाभ्युपेत्य ॥ वस्तुतो युद्धमकाम्यमेव प्रकृते विवक्षितम् ॥ वक्ष्यते च ॥ ८ 'सुखदुःखे समे कृत्वे'ति ॥ २७ ॥

परमास्तिकशिरोमणेस्तव वेदबाह्यमतावलंबनमनुचितम् ॥ अतः आत्मनित्यत्वपक्ष एव त्वयाऽभ्युपेयः ॥ तत्र त्वयोक्ताभिर्मयाऽङ्गीकृताभिरेताभिर्युक्ताभिर्युक्तिभिः आत्मनो नित्यत्वेऽपि तस्य शरीरसंयोगवियोगरूपजन्मनाशयोरवश्यंभावित्वात् युद्धे च शरीरनाशस्य नियतत्वात् अनुशोचामीति चेत् ॥ नित्यजातं नित्यश्चासौ जातश्च तं नित्यं शरीरसंयोगरूपजन्मवन्तं च नित्यं मृतं च नित्यमितिपुल्लिङ्गं द्वितीयान्तम् ॥ नित्यं शरीरवियोगरूपमरणवन्तं च अश मन्यसे मन्यसे यदि तथाऽपि त्वं एवं शोचितुं नार्हसि ॥ २६ ॥

कुत इति चेत् जातस्य मृत्युः ध्रुवः इत्यादि पूर्ववत् ॥ 'नैवं शोचितुमर्हसि'

१ २. ३१. २. २. ३३. ३. ३. ८. ४. ३. ९. ५. ३. १९. ६. २. ३७. ७. २. ४९. ८. २. ३८.

'न त्वं शोचितुमर्हसि' इति अव्यवधानेन द्विरुक्त्या शोकस्य सर्वथा अकर्तव्यत्व सूच्यते ॥ २७ ॥

वि ॥ अर्जुनः ॥ देहात्मनोर्भेदं आत्मनो नित्यत्वं चोक्त्वा शोको न कार्य इत्युक्तम् ॥ स देहात्मभेदवादो न मे बुद्धिमारोहति ॥ अतो देहात्मवाद एवाभिनिवेशो मम ॥ देहस्यैवाऽऽत्मत्वात् तस्य चानित्यत्वात् तन्नाशशङ्कया शोचामि ॥ अतः कथं युध्येय ॥ वद ॥

कृष्णः ॥ देहात्मवादेऽपि शोको न कार्यः ॥ अथेति पक्षान्तरारंभसूचनार्थः ॥ मन्यसे किं इति प्रश्नार्थो वा ॥ एवं मन्यसे चेत् तथैवास्तु तत्रापि ब्रूमः ॥ इत्यभ्युपगमार्थो वा॥ नित्यजातं नित्यं मृतं च वाशब्दश्चशब्दार्थे ॥ नियमेनोत्पत्तिमन्तं नाशवन्तं च देहमेव, चशब्द एवार्थे ॥ एनं आत्मानं मन्यसे॥ तथाऽपि त्वं एवं शोचितुं नार्हसि ॥ एवमतिमात्रं शोककरणमनुचितमिति सूचयितुमेवशब्दः ॥ देहातिरिक्तनित्यात्माभ्युपगमे शोकप्रसक्तिरेव नास्ति ॥ देहात्मवादाभ्युपगमे देहनाशशङ्कया शोकप्रसक्तावपि सर्वथा न शिष्यतो नाशस्य परिहर्तुमशक्यत्वात् अतिमात्रं न शोचितव्यम् ॥ देहातिरिक्तनित्यात्माभ्युपगमे पारत्रिकदुःखभिया अतिमात्रशोको युज्यते ॥ देहात्मवादाभ्युपगमे तस्य नाशनैयत्येन पारत्रिकदुःखप्रसक्तेरभावादतिमात्रं सन्तोष्टव्ये अतिमात्रं शोको न युक्तः ॥ महाबाहोर्धीरस्य तव स्वपरमरणनिमित्तकशोको न युज्यते ॥ २६ ॥

तत्र को हेतुरिति चेत् नित्यजातनित्यमृतपदाभ्यां सूचित एव हेतुरुपपाद्यते ॥ अवधारय ॥ जातस्य मृत्युः नाशः ध्रुवः मृतस्य नाशं प्राप्तस्य जन्म पुनरुत्पत्तिश्च ध्रुवं प्रमाणप्रसिद्धमिदम् ॥ हि यस्मादेवं तस्मादिति हेत्वर्थको वा हिशब्दः ॥ तस्मात् परिणामिनो द्रव्यस्य उत्पत्तिविनाशाख्यपरिणामपरंपराया अपरिहार्यत्वात् अपरिहार्ये तस्मिन्नर्थे उत्पत्तिविनाशाख्यपरिणामपरंपरारूपे वस्तुनि विषये त्वं न शोचितुमर्हसि॥ न ह्यवर्जनीये शोको युक्तः ॥ नाशं प्राप्तस्य पुनरुत्पत्तिरिति कथम् ॥ लोके हि प्रागविद्यमानस्यैव घटादेरुत्पत्तिर्दृश्यते ॥ न तु उत्पद्य विनष्टस्य ॥ लोके अदृष्टमपि मृतस्य जन्म वचनादस्मादभ्युपगन्तव्यं इति चेत् हि शब्देन लोकप्रसिद्धमिदमिति च बोधनात्तथा वक्तुं न शक्यम् ॥ मृतस्य पुनर्जन्माभ्युपगमे सर्वथा निवर्तयितव्यानां महता प्रयासेन निवर्तितानां संसारदुःखानां रोगाणां शत्रूणां च पुनरुत्पत्त्यापत्त्या तन्निवर्तनप्रयासवैयर्थ्यं स्यात् ॥ तन्निवर्तनपरशास्त्राणां च वैयर्थ्यं स्यात् ॥ मृतस्य पुत्रादेः

पुनरुत्पत्तिनैयत्येन पुत्रमरणादौ रोदनादिकमनुपपन्नं स्यात् ॥ अतोऽनुपपन्नमिदम् ॥ इति चेत् उत्पत्तिविनाशादयः सतो द्रव्यस्यावस्थाविशेषाः ॥ यथा सत एव मृद्रूपद्रव्यस्य मृत्पिण्डत्वकपालत्वघटत्वकपालत्वचूर्णत्वादयोऽवस्थाविशेषा एव उत्पत्तिविनाशादयः तथा ॥ पूर्वावस्थस्य उत्तरावस्थाप्राप्तिर्विनाशः सैव उत्तरावस्थस्य तस्योत्पत्तिः ॥ पूर्वपूर्वावस्थस्य उत्तरोत्तरावस्थाप्राप्तिर्विनाशः सैव उत्तरोत्तरावस्थस्य तस्योत्पत्तिः॥ मृत्पिण्डत्वाद्यवस्थस्य कपालत्वाद्यवस्थाप्राप्तिर्विनाशः कपालत्वाद्यवस्थस्योत्पत्तिः॥ एवं नाशावस्थां प्राप्तस्य उत्पत्त्यवस्थाप्राप्त्या मृतस्य पुनर्जन्मेति युक्तम् ॥ उत्पत्त्यवस्थां प्राप्तस्य पूर्वावस्थाप्राप्तिरूपोत्पत्तिं प्राप्तस्य उत्तरावस्थाप्राप्तिरूपविनाशप्राप्त्या जातस्य मृत्युर्ध्रुव इति युक्तम् ॥ नष्टस्य घटादेः पुनरुत्पत्त्यदर्शनात्कथमिदमिति चेत् यदवस्थस्य नाशः तदवस्थस्यैवोत्पत्तिर्नोच्यते ॥ किंतु अवस्थान्तरविशिष्टस्य तस्य ॥ अतो न दोषः॥ सांसारिकदुःखानां रोगाणां च नष्टानां पुनः नोत्पत्तिः परिणामिद्रव्यत्वाभावात् ॥ शत्रुदेहानां अवस्थान्तरवैशिष्ट्येन पुनरुत्पत्तावपि यदवस्थया शत्रुत्वं तदवस्थानाशादनिष्टनिवृत्तिरप्रतिहता ॥ पुत्रादिशरीराणां अवस्थान्तरवैशिष्ट्येन पुनरुत्पत्तावपि यदवस्थावैशिष्ट्येन पुत्रादित्वं तदवस्थानाशादिष्टनिवृत्तिरप्रतिहता ॥ अतो रोदनाद्युपपत्तिः ॥ इत्यादिकमूह्यम् ॥ उत्पत्तेः नाशत्वे नाशस्यचोत्पत्तित्वे उत्पत्तौ नाशव्यवहारः नाशे उत्पत्तिव्यवहारश्च स्यादिति चेत् अर्थक्रियाकारित्वे उत्पत्तिव्यवहारः तदभावे नाशव्यवहारः इति व्यवस्था क्रियते ॥ अतो नानुपपत्तिः ॥ 'जातस्य हि ध्रुवो मृत्युः तस्मान्न शोचितुमर्हसी'ति 'मृत्युनैयत्यमेव' शोकाकरणे हेतुत्वेन वाच्यम् ॥ मृत्युरेव हि शोकनिमित्तम् ॥ मरणशङ्कया ह्यहं शोचामि ॥ न पुनरुत्पत्तिशङ्कया ॥ अतः 'ध्रुवं जन्म मृतस्य चे'ति पुनरुत्पत्तिनैयत्यप्रतिपादनमनावश्यकं इति चेत् उक्तविधया अवस्थाभेदेन उत्पत्तिरेव विनाशः विनाश एवोत्पत्तिः इति पुनरुत्पत्तिप्रतिपादनमपि नाशनैयत्यप्रतिपादनमेव ॥ अतो न दोषः ॥ यस्य शोकनिमित्तत्वं तस्यैव नैयत्यप्रतिपादनेन शोकस्याकरणीयत्वं प्रतिपादनीयमित्याशये एवम्॥ न केवलं शोकनिमित्तस्य नाशस्य नैयत्येनैव शोकस्याकरणीयत्वम् ॥ किंतु नष्टस्य तस्यैव अवस्थान्तरवैशिष्ट्येन पुनरुत्पत्तिनैयत्येनापि इत्याशये 'ध्रुवञ्जन्म मृतस्य चे'त्यस्यानावश्यकताशङ्कैव नास्ति ॥ अतः सर्वमिदमवृथ्य न शोचितुमर्हसि ॥ २७ ॥

अर्जुनः ॥ न शोचितुमर्हसि इत्यसकृदुच्यते ॥ कथं मदीयानां मम च शरीरनाशहेतौ युद्धे प्रत्युपस्थिते नाशशङ्कया शोकमकृत्वा स्थातुं शक्यम् ॥ वद ॥

कृष्णः ॥ अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ॥
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥ २८ ॥

अव्यक्तेति । हे भारत अर्जुन भूतानि अव्यक्तं प्रधानं आदिः येषां तानि अव्यक्तादीनि व्यक्तं मध्यं मध्यावस्था येषां तानि व्यक्तमध्यानि अव्यक्ते प्रधाने निधनं लयो येषां तानि अव्यक्तनिधनान्येव तत्र परिदेवना विलापः का ॥ २८ ॥

जन्ममरणस्वरूपमविदन् शोचसि ॥ **वेदने तु तस्य न शोचेः** ॥ **अतस्तत्स्वरूपं शृणु** ॥ भूतानि शरीराणि अव्यक्तं जडप्रकृतिं आदिः उत्पत्तिकारणं उत्पत्तेः पूर्वरूपं वा येषां तानि जडप्रकृतेः परिणाममूतानीति यावत् ॥ अवयवसंस्थानसंनिवेशविशेषवैशिष्ट्येन व्यक्ततया अवस्थानं मध्यं मध्यमावस्था येषां तानि ॥ अव्यक्ते निधनं लयो येषां तानि तादृशान्येव ॥ प्रकृतावेव लीनानीति यावत् ॥ प्रकृतिरेव शरीरतामापद्य कञ्चित्कालं स्थित्वा पुन प्रकृतिरूपेणावतिष्ठते ॥ तत्र एवं सति तादृशेषु शरीरेषु विषये का परिदेवना कः शोकनिमित्तकविलापः ॥ परिवेदनेति पाठे कः शोकः ॥ शोकस्य विलापस्य वा प्रसक्तिर्नेति यावत् ॥

भूतानि जीवाः जडप्रकृतिः देहकारणं येषां तानि जडप्रकृतिकार्यदेहवन्तः ॥ जडप्रकृतिकार्यदृग्गोचरदेहवत्तयाऽवस्थान मध्यकाले येषां तानि ॥ जडप्रकृतावेव देहलयो येषां तानि ॥ जीवा जडप्रकृतिकार्यदेहसंयोगरूपं जन्म प्राप्य तेन देहेन जनदृग्गोचरतया सुखदुःखादिकमनुभवन्तः स्थित्वा देहवियोगरूपमरणं प्राप्नुवन्ति ॥ तादृशेषु जीवेषु का परिदेवना इति वा ॥

भूतानि जीवाः अव्यक्तं प्रकृतिरूपं लिङ्गशरीरं आदिः पूर्वशरीरं येषां तानि व्यक्तं जनदृग्गोचरं स्थूलशरीरं मध्यं मध्यकालिकं येषां तानि प्रकृतिरूपलिङ्गशरीरं निधनं अन्तिमशरीरं येषां तानि ॥ कारणभूतलिङ्गशरीर एव निधनं कार्यदेहलयो येषां तानि॥ इति वा ॥ लिङ्गशरीरेण स्थित्वा तदनुगुणं स्थूलशरीरमापद्य कञ्चित्कालं स्थित्वा पुनर्लिङ्गशरीरेणावतिष्ठन्ते ॥ तेषु जीवेषु परिदेवना का ॥

भूतानि जीवाः अव्यक्तं अव्यक्तत्वं १ अदर्शनं आदौ येषां तानि॥ व्यक्तं व्यक्तत्वं दर्शनं मध्ये येषां तानि अव्यक्तं अव्यक्तत्वं अदर्शनं निधने अन्ते येषां तानि ॥ तादृशेषु जीवेषु का परिदेवना ॥

जीवास्तावदादौ लिङ्गशरीरविशिष्टाः स्थूलदृगगोचरा एव स्थित्वा ततः कर्मवशेन प्रकृतिकार्यस्थूलदेहभाजो भूत्वा सुखदुःखान्यनुभूय तदारंभककर्मक्षये तद्देहप्रहाणेन पुनः पूर्ववदेव भवन्ति ॥ इदं च यावन्मोक्षं तेषां नियतम् ॥ अतो जीवविषये न शोकः कार्यः ॥

पूर्वश्लोकवदयमपि श्लोकः जन्मनाशनैयत्यरूपहेतुतद्धेतुकशोकाभावरूपसाध्ययोरनुवादपरः ॥ श्लोकद्वयेन तदनुवादस्तु जन्मनाशनैयत्यादस्वातन्त्र्यं जीवस्य ॥ जीवस्य देहसंयोगवियोगरूपजन्ममरणनैयत्यात्तद्विषये यथा शोको न कार्यः तथा तत्र स्वातन्त्र्यबुद्धिरपि न कार्या इति प्रागुक्तजीवास्वातन्त्र्यस्थिरीकरणार्थः ॥

भूतानि शरीराणि आदौ अव्यक्तानि अनुपलब्धानि मध्ये व्यक्तानि उपलब्धानि निधने अन्ते अव्यक्तानि अनुपलब्धानि ॥ तेषु शरीरेषु का परिदेवना ॥

भूतानि शरीराणि अव्यक्ता अनुपलभ्यमाना आदिः उत्पत्तेः पूर्वावस्था येषां तानि ॥ व्यक्ता उपलभ्यमाना मध्या मनुष्यत्वादिरूपमध्यमावस्था येषां तानि ॥ अव्यक्तं अनुपलभ्यमानं निधनं मृतेरुत्तरावस्था येषां तानि ॥ तेषु शरीरेषु का परिदेवना ॥

२ भूतानि शरीराणि अव्यक्तं अव्यक्तत्वं अदर्शनं आदिः उत्पत्तेः पूर्वावस्था येषां तानि ॥ व्यक्तं व्यक्तत्वं दर्शनं उत्पत्तेरूर्ध्वं मृतेश्च पूर्वं भवं मध्ये व्यावहारिकसत्वलक्षणा मध्यमावस्था येषां तानि ॥ अव्यक्तं अव्यक्तत्वं अदर्शनं निधनं मृतेरुत्तरावस्था येषां तानि ॥ तेषु शरीरेषु का परिदेवना ॥

अत्र, अदर्शनादिहायातः पुनश्चादर्शनं गतः ॥ नासौ तव न तस्य त्वं वृथा किमनुशोचसि ' ॥ इति भारतस्त्रीपर्व (२. १३.) वचनमनुसन्धेयम् ॥ २. एतदादि यावच्छ्लोकव्याख्यासमाप्ति अद्वैतिनां व्याख्यानुरोधेन ॥

भूतानि शरीराणि तद्धेतुभूतानि महाभूतानि वा अव्यक्तं प्रधानं जडप्रकृतिः पूर्वरूपं येषां तानि । व्यक्तं नामरूपाभ्यां स्पष्टं मध्यं जन्ममरणान्तरालस्थित्यवस्था येषां तानि ॥ अव्यक्ते प्रधाने निधनं लयो येषां तानि ॥ तेषु शरीरेषु का परिदेवना ॥

भूतानि शरीराणि अव्यक्तं माया तस्मात् जन्म शुक्तिरजतस्येव येषां तानि मायाकल्पितानि ॥ व्यक्तं सत्त्वेन भानं मध्ये तस्येव येषां तानि॥ देवमनुष्यतिर्यगादिभेदेन लब्धस्वरूपाणि ॥ अव्यक्ते मायायामेव निधनं तस्येव लयो येषां तानि ॥ तेषु [१] स्वाप्नैन्द्रजालगजतुरगादिवददृष्टदृष्टनष्टस्वरूपेषु शरीरेषु का परिदेवना ॥

भूतानि सर्वाणि ब्रह्मव्यतिरिक्तानि चेतनाचेतनात्मकानि वस्तूनि अव्यक्ते प्रमाणैः व्यक्तीकर्तुमशक्ये अधिष्ठानभूते परब्रह्मणि तदज्ञानात् शुक्तौ तदज्ञानाद्रजतस्येव आदिः जन्म येषां तानि ॥ व्यक्तं सर्वपदार्थव्यञ्जकं यावदधिष्ठानदर्शनं सत्तास्फूर्त्यादिसर्वकार्यनिर्वाहकं [२] अन्तः करणं मध्ये स्थितिकाले येषां तानि ॥ अव्यक्ते तस्मिन्नेव अधिष्ठानभूते ब्रह्मणि निधनं नाशो येषां तानि ॥ तादृशेषु शरीरेषु महाभूतेषु वा चेतनाचेतनात्मकेषु ब्रह्मेतरसर्ववस्तुषु वा का परिदेवना ॥ आदावन्ते च यानि न स्न्ति तानि मध्ये सन्त्यपि [३] न सन्त्येव॥ अत एवोक्तं मया॥ 'नासतो विद्यते भाव' इति ॥ तादृशेषु यावदधिष्ठानभूतब्रह्मदर्शनं नाशेऽप्यव्यक्तरूपेणविद्यमानेषु सति ब्रह्मदर्शने स्वात्मना नशिष्यत्सु स्वाप्नैन्द्रजालशुक्तिरजतरज्जुसर्पमरीचिकाजलादिवत् मिथ्याभूतेषु भूतेषु जन्ममरणनिमित्तकः शोको न कार्यः ॥ शुद्धवंशोद्भवत्वात् शास्त्र तत्त्वमर्मविमर्शार्होऽसि ॥ अतो न शोचितुमर्हसीत्यादि यदुक्तं तद्युक्तमेव ॥

भूतानामेषस्वभावः स्वभावस्त्वपरिहार्यः अतः स्वभावविषये न शोको युक्तः ॥

१. अत्र 'यथा स्वप्नप्रपञ्चोऽयं मयि मायाविजृंभितः ॥ तथा जाग्रत्प्रपञ्चोऽयं मयि मायाविजृंभितः' इति ॥ २. 'अत्र मनोवृत्तिमयं द्वैतं अद्वैतं परमार्थतः' ॥ इति ३. अत्र, 'आदावन्ते च यन्नास्ति वर्तमानेऽपि तत्तथा' ॥ इति वचनं चानुसन्धेयम् ॥

वस्तुस्वभाव एव शोकनिमित्तमिति चेत् नियतविचित्रानन्तभेदभिन्नस्वभाववस्तु सन्तते जगति सर्वस्य सर्वदाऽपि दुःखजलनिधावेव मज्जनं स्यात् ॥ सुखहेतुविच्छेदाच्छोक इति चेत् द्विषतां तत्संबन्धिनां भैक्षचर्यादेश्च सुखहेतुत्वं नास्ति ॥ प्रत्युत दुःखहेतुत्वमेवास्ति ॥ शत्रुतदीयनाशस्य सार्वभौमपदलाभादेश्च सुखहेतुत्वमेवास्ति ॥ स्वशरीरनाशाच्छोक इति चेत् महाबाहोः भारतस्य महामहिमवतो भवतो न शरीरनाशभिया शोको युक्तः ॥ बन्धुनाशनिश्चयेन शोक इति चेत् संरक्षणीयबन्धुजनसंरक्षणसंभवेन हर्षोदयाच्छोकः परिहर्तव्यः ॥ बन्धुवधपातकीति लोकापवादभिया शोकः इति चेत् युद्धादुपरमे भयादयं रणादुपरत इति परमासह्यदुःखजनकलोकापवादमहार्णवे मग्नः स्याः ॥ वक्ष्यते च ॥ १'भयाद्रणादुपरतं मंस्यन्ते त्वां' मिति ॥ अखिलमेतदेवमेव ॥ तथाऽप्ययं शोको दुष्परिहर इति चेत् अपरिहार्ये शोको न युक्त इति विवेकेन सुखदुःखादिमूलभूताभिमानत्यागेन च शोकस्सुपरिहर एव ॥ अतो न शोचितुमर्हसीत्युक्तं युक्तम् ॥ २८ ॥

अर्जुनः ॥ आत्मनो नित्यत्वादियाथात्म्यं यथावदसकृदभिहितं त्वया ॥ न तन्मम बुद्धावारोहति ॥ सति चैवं कथमहं शोकमकृत्वा स्थातुं शक्नोमि ॥ वद ॥

कृष्णः ॥ आश्चर्यवत्पश्यति कश्चिदेनं आश्चर्यवद्वदति तथैव चान्यः ॥
आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाऽप्येनं वेद न चैव कश्चित्॥

आश्चर्यवदिति ॥ एनं आत्मानं कश्चित् पश्यति जानाति ॥ सः आश्चर्यवत् ॥ आश्चर्य एव ॥ तथा एनं अन्यः वदति स च आश्चर्यवदेव ॥ एनं अन्यः शृणोति स च आश्चर्यवत् ॥ कश्चित् एनं श्रुत्वाऽपि नैव वेद च ॥ २९ ॥

यः कश्चित् एनं जीवं पश्यति जानाति सः ज्ञाता आश्चर्यवत् आश्चर्य एव दुर्लभ एव॥ दुर्लभं ह्याश्चर्यमुच्यते॥ तथा अन्यः कश्चित् एनं जीवं वदति सोऽपि आश्चर्यवत् दुर्लभ एव ॥ अन्यः कश्चित् एनं जीवं शृणोति स च आश्चर्यवत् दुर्लभ एव ॥ आत्मनो द्रष्टा-वक्ता श्रोता च दुर्लभः ॥ अहं स इति सर्वेषां स्वपरदर्शनवचनश्रवणसत्वात् कथमिदमिति चेत् चशब्दोऽप्यर्थे ॥ कश्चिच्च कश्चिदपि एनं जीवं श्रुत्वा उक्त्वा दृष्ट्वाऽपि

---

१. २. ३५.

नैव वेद ॥ सम्यक् न जानात्येव॥ एवमात्मतत्त्वयाथात्म्यज्ञानस्य परमगहनत्वात् क्रमेण सम्यक् ज्ञास्यसि ॥ इदानीं मदुपदेशादेव शोकमकृत्वा स्थातव्यमविशंकं त्वया ॥ सामान्यतो दर्शनादेः सत्वेऽपि उक्तविधया आत्मविषयकसम्यग्ज्ञानवचनश्रवणादिमान् दुर्लभ एव ॥ परतन्त्रप्रतिबिंबभूतजीवात्मयाथात्म्यज्ञानिन एव दौर्लभ्ये किमुत स्वतन्त्रबिंबभूतपरमात्मयाथात्म्यज्ञानिनः इति ईश्वरज्ञानिदौर्लभ्ये पर्यवसानम् ॥ स च महान् महिमा ॥ दुर्लभं हि यथावदीश्वरज्ञानम् ॥ वक्ष्यते च ॥ १ 'यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्वतः' ॥ इति ॥ २ 'बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते' ॥ इति च ॥ ३ 'श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोऽपि बहवो यं न विद्युः ॥ आश्चर्योऽस्य वक्ता कुशलोऽस्य लब्धा आश्चर्यो ज्ञाता कुशलानुशिष्टः' ॥ इति श्रुतिः ॥ कैमुत्यन्यायेन ईश्वरज्ञानिदौर्लभ्यलाभात्तादृशेश्वरप्रतिबिंबभूतस्य जीवस्य नाशाभावो युक्त इति लभ्यते ॥ ईश्वरमहिम्नः पूर्वमुक्तत्वेऽपि मन्दजनबोधनाय दार्ढ्यार्थं पुनरुक्तिः ॥ एनमित्यस्य आश्चर्यवदित्यस्य च असकृदुक्तिरादरार्था ॥

जननमरणनैयत्याज्जीवे स्वातन्त्र्यबुद्धिर्न कार्येत्यभिहितं ॥ तर्हि स्वातन्त्र्यबुद्धिः क्व कार्येति चेत् आश्चर्यशब्दः स्वतन्त्रमाह॥ सर्वस्वतन्त्रो ह्याश्चर्य उच्यते॥ अनेकसहस्रेषु मध्ये कश्चित् सात्विकप्रकृतिः एनं ईश्वरं आश्चर्यवत् आश्चर्यसदृशं आश्चर्यशब्दस्य स्वतन्त्रपरत्वात् स्वतन्त्रेश्वरसदृशं जानाति ॥ लोके स्वस्य स्वेनोच्यमानं सादृश्यं असंभवि सत् सदृशान्तरव्यवच्छेदकं भवतीति ४ प्रसिद्धम् ॥ तथा च ईश्वरस्य ईश्वरेण सादृश्यमुच्यमानमसंभावितं सत् सदृशान्तरव्यवच्छेदकं फलति ॥ ततश्च ईश्वरमेव स्वतन्त्रं जानाति नान्यं कमपि इति निष्पन्नम् ॥ श्रूयते च ॥ सदृशान्तरराहित्यमीश्वरस्य ॥ ५ 'एकमेवाद्वितीयं' इति ॥ तथैव अन्यः एनं ईश्वरं आश्चर्यवत् सदृशान्तररहितं वदति च ॥ अन्यः एनं ईश्वरं आश्चर्यवत् सदृशान्तररहितमेव शृणोति च ॥ कश्चिदपि यः पश्यति वदति शृणोति सोऽपि एनं ईश्वरं श्रुत्वा उक्त्वा दृष्ट्वा ऽपि नैव वेद च ॥ अचिन्त्याप्रमेयपरमाद्भुतवस्तुत्वात् यथावन्न जानाति ॥

१. ७. ३. २. ७. १९. ३. का. २. ७. ४. अत्र 'इन्दुरिन्दुरिव श्रीमान्' इति चन्द्रालोके अनन्वयालङ्कारश्लोकः ॥ 'गगनं गगनाकारं सागरः सागरोपमः॥ रामरावणयोर्युद्धे रामरावणयोरिव' ॥ इति रामायणे युद्धकाण्डे ११० सर्गे श्लोकश्चानुसन्धेयः ॥ ५ छां ६. २. १.

कश्चिदित्युक्तया न सर्वेऽपीश्वरस्य स्वातन्त्र्यं अन्यस्यास्वातन्त्र्यं च पश्यन्ति वदन्ति शृण्वन्ति च॥ किन्तु बहुजन्मसमाचीर्णपुण्यपरिपाकवान् कश्चिदेवेति सूच्यते॥ वक्ष्यते च ॥ १ 'मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये'॥ इति ॥ कश्चिदपि न वेदेत्यनेन सत्यपि श्रवणादौ यथावद्ज्ञानं दुर्लभमित्युक्तं भवति॥ वक्ष्यते च॥ २ 'यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्वतः' ॥ इति॥ चतुर्थपादस्याऽऽवृत्तिः कश्चित् तामसप्रकृतिः एनं श्रुत्वाऽपि न वेद ॥ वेद चेत् न वेद ॥ विरुद्धं वेद ॥ कश्चित् राजसप्रकृतिः एनं श्रुत्वाऽपि न वेद ईषद्वेद ॥ कश्चित् सात्विकप्रकृतिः एनं श्रुत्वा वेदापि किन्तु ३ साकल्येन न वेद ॥ राजसास्तामसाश्च ईश्वरं श्रुत्वाऽपि न जानन्ति ॥ किंतु सात्विका एव जानन्ति ॥ तेष्वपि न सर्वेऽपि जानन्ति ॥ किंतु काश्चिदेव ॥ सोऽपि समग्रं न जानाति ॥ किंतु किञ्चिदेव ॥ इति च ॥ २९ ॥

अ ॥ अर्जुनः ॥ 'अशोच्यानन्वशोचस्त्वं' इत्यादिना अशोच्यान् प्रत्यनुशोचंस्त्वं मूढ इति किं मामेवमुपालभसे ॥ शोचन्ति हि लोके अहमिव बहवः ॥ यदि वस्तुस्थितिरीदृशी तर्हि कुतस्ते शोचन्ति ॥ न त्वामेकमेवाहमुपालभे ॥ किंतु ये ईदृशास्तान् सर्वानपि ॥ परन्तु उपदेशस्य सर्वार्थत्वेऽपि यथा त्वां व्याजीकृत्य उपदेशः क्रियते ॥ तथा उपालंभस्य सर्वार्थत्वेऽपि त्वां व्याजीकृत्य उपालंभः क्रियते इति चेत् किमर्थं तथोपालंभः क्रियते ॥ विदिताऽऽत्मतत्वस्य तवैवमनुशोचनमनुचितमित्युपालभे इति चेत् अहमिव बहवो विदिताऽऽत्मतत्वा अप्यनुशोचन्ति ॥ ते श्रुताऽऽत्मतत्वा एव न पुनर्विदितात्मतत्वाः अतस्ते शोचन्ति ॥ शोचन्तु नाम ॥ अविदित्वा आत्मतत्वं त इव त्वं यदन्वशोचः तत्ते युक्तम् ॥ सर्वज्ञादीश्वरान्मत्तो यथावदात्मतत्वं साक्षाच्छ्रुत्वा विदिताऽऽत्मतत्वोऽपि त्वमनुशोचसीति त्वामहमुपालभे इति चेत् अहमपि त इव श्रुताऽऽत्मतत्वः न विदिताऽऽत्मतत्वः अतः शोचामि ॥ तर्हि महानयं तेषामिव ते दोषः ॥ यत् श्रुत्वाऽप्यात्मतत्वमात्मयाथात्म्यं न वेत्थ इति चेत् नायं

१. ७. ३. २. ७. ३. ३. अत्र, 'ब्रह्मादयस्सुरगणा मुनयोऽथ साध्याः सत्वैकतानमनसो वचसां वितानैः ॥ नान्तं परस्य परतोऽप्यधुनाऽपि यान्ति किं तोष्टुमर्हति स मे हरिरुग्रजातेः ॥' इति भागवते ७ स्कन्धे ९ अध्याये ॥

तेषां मम च दोषः ॥ किंतु तदुपदेष्टृणां मदुपदेष्टुस्तव चैवायं दोषः ॥ 'वक्तुरेव हि तज्ज्ञाज्ञं श्रोता यत्र न बुध्यते' ॥ इति न्यायः ॥ परीक्षार्थं प्रहितेषु पठितृषु परीक्षायां उत्कर्षमलभमानेषु पाठकस्य नास्य बोधनशक्तिरस्ति अत एवैवमभूत् इत्ययशः पाठकपदात्प्रच्यावनं च भवति लोके इति विदितमेव सर्वेषां ॥ इति चेत् ॥ स्यादयं तेषां विषये तेषां वा तदुपदेष्टृणां वा दोषः ॥ दुर्विज्ञेयत्वादात्मतत्वस्य यथावद्दर्शनवचनश्रवणवेदनानां दुर्लभत्वात् ॥ त्वद्विषये पुनरयं दोष स्तवैव ॥ उपदेष्टुर्मम नित्यनिरस्ताशेषदोषेश्वरतया त्वमेव न वेत्थेति पर्यवसानस्यैवौचित्यात् ॥ पाठके तत्रतत्र समीचीनाऽस्यपाठनशक्तिः इति लब्धप्रथे कुत्रचित्तेन प्रहितेषु पठितृषु परीक्षायां हीनेष्वपि न पाठकस्यायशः पदच्युतिर्वा ॥ किंतु पठितृणा मेव एते मन्दाः नापठंश्च सम्यक् इत्ययशः विद्याशालातः प्रच्यावनं च भवतीति विदितमेव हि लोके ॥ इति चेत् यद्येवं तर्हि महदिदं शोकस्थानम् ॥ सर्वज्ञस्य भगवतः ईश्वरस्य तव सकाशात् श्रुत्वाऽपि नाहमज्ञासिषमात्मतत्वम् मूढो मन्दोऽहं किं मया जीवता इति शोचामीति चेत् मैवं शोचीः ॥ विषयस्य यथावदवेदनं द्वेधा संभवति ॥ बुद्धिमान्द्यात् विषयकाठिन्याद्वा ॥ तत्र विषयस्य साधारणत्वेन केषुचित् परीक्षायामुत्कर्षमुपगतेषु तमलभमानः कश्चित्, मन्दोऽहं अतो नाहमुत्कर्षमाप्नुवं मोघमेवाहं जीवामीति शोचति ॥ विषयस्य काठिन्यात् सर्वेषु परीक्षायां हीनेषु तादृशः कश्चिदपि न शोचति ॥ किंतु किमेवमासीत् इति पृष्टः, कोवा प्रापोत्कर्षं कठिनो विषयः हन्त महदिदं अन्याय्यं परमोत्तमपरीक्षायां प्रष्टव्यान् विषयान् अवरपरीक्षायां पृष्ट्वा वयमुत्कर्षाच्च्याविता इति वदति ॥ पुनस्तस्मिन्नेव पर्वभेदे प्रविष्टः पठति च इति प्रसिद्धं हि लोके ॥ बुद्धिमतस्तव यथावदात्मतत्वावेदनं न बुद्धिमान्द्यात् ॥ किंतु आत्मतत्वस्य परमदुर्विज्ञेयत्वात् ॥ अतः तदेव भूयोपि श्रोतव्यं श्रावयामि च पुनःपुनरहं इति चेत् किं तदात्मतत्वं तथा दुर्विज्ञेयम् ॥ वद ॥

कृष्णः ॥ एनं आत्मानं कश्चित् आश्चर्यमिव पश्यति॥ तथैव अन्यः एनं आश्चर्यमिव वदति च ॥ अन्यः एनं आश्चर्यमिव शृणोति च ॥ कश्चिदपि एनं श्रुत्वा दृष्ट्वा उक्त्वापि नैव वेद नैव साक्षात्करोति अत्र प्रथमपादेन अद्भुतवस्तुदर्शनमिव आत्मदर्शनं दुर्लभं इत्यात्मविषयकदर्शनशब्दितज्ञानस्य द्वितीयपादेन अद्भुतवस्तुवचनमिव आत्म-

वचनं दुर्लभं इत्यात्मविषयकवचनस्य तृतीयपादेन अद्भुतवस्तुश्रवणमिव आत्मश्रवणं दुर्लभं इत्यात्मविषयकश्रवणस्य चतुर्थपादेन श्रवणदर्शनोक्तीनां भावेऽपि अद्भुतवस्तु-साक्षात्कार इव आत्मसाक्षात्कारो दुर्लभः इत्यात्मविषयकसाक्षात्कारस्य च दौर्लभ्य-मुच्यते ॥ तेन च दर्शनवदनश्रवणसाक्षात्काराणां दौर्लभ्यप्रतिपादनेन क्रमात् द्रष्टुः वक्तुः श्रोतुः साक्षात्कर्तुश्च दौर्लभ्यमुक्तं भवति ॥ तेन च दुर्विज्ञेयत्वमात्मतत्वस्योक्तं भवति ॥

कश्चित् एनं आत्मानं पश्यति सः आश्चर्यवत् आश्चर्येण तुल्यो वर्तते ॥ दुर्ल-भत्वेन आश्चर्यवस्तुसदृशो वर्तते ॥ उत्तरत्राप्येवमेव ॥ द्रष्टृवक्तृश्रोतृसाक्षात्कर्तॄणां-साक्षादेवदौर्लभ्यमुच्यते॥ वक्ष्यते च १'मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये' ॥ इति '॥ २'स महात्मा सुदुर्लभः '॥ इति च ॥

कश्चिद्यः एनं शास्त्राचार्योपदेशाभ्यां पश्यति सः आश्चर्यवत् पश्यति ॥ आश्चर्यं पश्यन्निव विस्मयेन पश्यति ॥ सर्वगतस्य नित्यज्ञानानन्दस्वभावस्य आत्मनः मायया परिच्छिन्नवत् अज्ञवत् दुःखिवच्चोपलभ्यमानतया तत्र शास्त्रा-चार्योपदेशाभ्यां गृह्यमाणं सर्वगतत्वादिकं असंभावनाभिभूतचेतस्कतया अघटमानं ऐन्द्रजालमिव विस्मयेन गृह्णाति ॥ एवं वदति शृणोति च ॥ विपरीतभावनाऽभि-भूतस्तु कश्चित् श्रुत्वा उक्त्वा ज्ञात्वाऽपि नैव वेद ॥ नैवाऽऽत्मनि तत् गृह्णाति ॥ अपितु शास्त्रादिकमेव प्रतारकं मन्यते ॥ अतो दुर्विज्ञेयमात्मतत्वम् ॥

यः कश्चित् एनं मत्प्रसादेन पश्यति साक्षात्कर्तुमिच्छति सः आश्चर्यवत् दुर्ल-भः ॥ विषयाशापाशमुच्छिद्य मोक्षेच्छाकरणस्य हनुमतः समुद्रलङ्घनस्येव अन्याश-कयतया आश्चर्यत्वात् तत्कर्ता मुमुक्षुर्दुर्लभः ॥ वक्ष्यते च ॥ ३ 'मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ॥ इति ॥ एवमन्यो यो वदति सोऽप्याश्चर्यवत् ॥ तत्वोपदेष्टा अतिदुर्लभः ॥ एवं अन्यो यः शृणोति सोऽप्याश्चर्यवत् ॥ भक्तिविरक्त्यादिसाधनसं-पत्तियुक्तः श्रोता आकाशगामीवातिदुर्लभः ॥ साधनसंपत्तिरहितः कश्चिदपि एनं श्रुत्वा मत्वाऽपि नैव वेद ॥ अतः आत्मतत्वं दुर्विज्ञेयम् ॥

---

१. ७. ३. २. ७. १९. ३. ७ ३.

आश्चर्यवदिति कर्तृकर्मक्रियाणां विशेषणम् ॥ आश्चर्यवद्वर्तमानं आश्चर्यवस्तुना तुल्यं लोकदृष्ट्या अघटमानविरुद्धनानाधर्मवत्तया प्रतीयमानं सन्तमप्यसन्तमिव स्वप्रकाशचैतन्यरूपमपि जडमिव आनन्दघनमपि दुःखिनमिव निर्विकारमपि विकारिणमिव नित्यमप्यनित्यमिव प्रकाशमानमप्यप्रकाशमानमिव ब्रह्माभिन्नमपि तद्भिन्नमिव मुक्तमपि बद्धमिव अद्वितीयमपि सद्वितीयमिव प्रतीयमानं एनं आत्मानं शमदमादिसाधनसंपन्नचरमशरीरः कश्चिदेव पश्यति ॥ शास्त्राचार्योपदेशादिना आविद्यकसर्वविरुद्धधर्मपरिहाणेन परब्रह्मत्वमात्राकारया वेदान्तमहावाक्यश्रवणमननजनितया अनेकजन्मसमार्जितसुकृतपरिपाकलब्धया अन्तःकरणवृत्त्या १ साक्षात्करोति ॥ अत्र आश्चर्यवदिति कर्मविशेषणम् ॥ तथा कश्चिदेनं यत्पश्यति तद्दर्शनं आश्चर्यवत् ॥ आश्चर्येण तुल्यं वर्तते ॥ आत्मदर्शनं स्वतो मिथ्याभूतमपि सत्यस्याऽऽत्मनो व्यंजकं आविद्यकमप्यविद्याया विघातकम् ॥ आश्रयभूताविद्यायाः स्वात्मस्वरूपस्य च निवर्तकम् ॥ अत आश्चर्येण तुल्यम् ॥ अत्र आश्चर्यवदिति क्रियाविशेषणम् ॥ तथा कश्चिद्यः एनं पश्यति सः आश्चर्यवत् वर्तते ॥ आत्मनो द्रष्टा निवृत्ताविद्यातत्कार्योऽपि प्रारब्धकर्मवशात्तद्वानिव सर्वदा समाधिनिष्ठोऽपि भाषणगमनाऽऽसनादिमांश्च वर्तेत ॥ अत आश्चर्यवत् ॥ अत्र आश्चर्यवदिति कर्तृविशेषणम् ॥ आत्मविषयकदर्शनतत्कर्मतत्कर्तृणामाश्चर्यत्वोक्त्या आत्मनो दुर्विज्ञेयत्वमुक्तं भवति ॥ यः एनं आत्मानं यथा पश्यति तथैव वदति च सः अन्यः सर्वजनविलक्षणः परमदुर्लभः ॥ अत्रापि आश्चर्यवदिति कर्तृकर्मक्रियाणां विशेषणम् ॥ अज्ञस्य उपदेष्टृत्वासंभवेन यथावद्विदितात्मयाथात्म्यस्यैव उपदेशे अधिकारः ॥ वक्ष्यते च ॥ २ 'उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः' ॥ इति ॥ तादृशो ज्ञानी च प्रायेण समाधिनिष्ठः स्यात् ॥ असमाधिस्थोऽपि न परैर्ज्ञायेत ॥ ज्ञातोऽपि द्रव्यलाभख्यात्यादिप्रयोजनानपेक्षणात् कथं परमगोप्यमात्मतत्त्वमन्यस्मैब्रूयात् ॥ प्रयोजनानपेक्षत्वेऽपि भक्तिमदास्तिकजनोद्दिधीर्षया करुणयैव ब्रूवंस्तु परमदुर्लभः ॥ अत्र आश्चर्यवदिति कर्तृविशेषणम् ॥ अन्यः इतरः इति तु न सम्यक् ॥ यथावद्दर्शनवचनयोरेकाधिकारिकत्वात् ॥ यद्वदति तद्वचनं आश्चर्यवत् ॥

१ पश्यति परोक्षतो जानाति इति वक्तव्यम् श्रुत्वा वेदापि साक्षात्करोत्यपि इति वक्ष्यमाणत्वात् ॥ इत्याहुः ॥

१ 'यतो वाचो निवर्तन्ते ॥ अप्राप्य मनसा सह' ॥ इति श्रुत्या केनापिशब्देनावाच्यस्य शुद्धस्यात्मनः शब्दैः प्रतिपादनस्याशक्यत्वात् ॥ सर्वशब्दावाच्यस्य शुद्धस्यात्मनो विशिष्टशक्तेन पदेन जहदजहल्लक्षणया कल्पितसंबन्धेन वा विना शक्तिं विना लक्षणां विना संबन्धं २ 'सुषुप्तोत्थापकवाक्यवद्वा बोधनस्य लौकिकप्रतिपादनविलक्षणत्वाच्च सा वचनक्रिया आश्चर्यवत् ॥ अत्र आश्चर्यवदिति क्रियाविशेषणम् ॥ कर्मण आश्चर्यत्वं तु प्राग्वत् ॥ वचनतत्कर्मतत्कर्तॄणां आश्चर्यत्वप्रतिपादनेन दुर्विज्ञेयत्वमात्मन उक्तं भवति ॥ द्रष्टुर्वक्तुश्च विलक्षणः अविदितात्मतत्वो मुमुक्षुः ब्रह्मविदं गुरुमुपेत्य शृणोति ॥ वेदान्तमहावाक्यतदर्थतत्तात्पर्यश्रवणजनितनिश्चयज्ञानविषयीकरोति ॥ अत्र आश्चर्यवदिति कर्तृकर्मक्रियाणां विशेषणम् ॥ कर्त्रादीनामाश्चर्यत्वं तु पूर्ववद्बोध्यम् ॥ अनेकजननान्तरसमाचीर्णपुण्यपरिपाकसंक्षालितमनोमलतया समुपजनितात्मयाथात्म्यशुश्रूषाको हि श्रोता ॥ वक्ष्यते च ॥ ३ 'मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये' ॥ इति ॥ ४ 'श्रवणायापि बहुभिर्यो न लभ्यः' इति श्रुतिः ॥ उक्तहेतुसमुपजनितोक्तरूपश्रवणशक्तिकश्च ॥ अतः श्रोता आश्चर्यवत् ॥ श्रवणतत्कर्मतत्कर्तॄणां आश्चर्यत्वप्रतिपादनेन आत्मनो दुर्विज्ञेयत्वमुक्तं भवति ॥ कश्चित् श्रुत्वाऽप्येनं वेद ॥ अत्रापि आश्चर्यवदिति संबध्यते ॥ तच्च कर्तृकर्मक्रियाणां विशेषणम् ॥ कर्त्रादीनामाश्चर्यत्वं तु आश्चर्यवत्पश्यतीत्यत्रोक्तरीत्या ज्ञेयम् ॥ वेदनतत्कर्मतत्कर्तॄणामाश्चर्यत्वप्रतिपादनेन आत्मनो दुर्विज्ञेयत्वमुक्तं भवति ॥ कृतश्रवणादिकानां वेदनसौलभ्यात् वेदनस्याऽऽश्चर्यत्वं कथं इति चेत् न चैव कश्चित् ॥ चशब्दात् श्रुत्वाऽप्येनमिति-संबध्यते ॥ कश्चित् एनं श्रुत्वाऽपि मननादिकं कृत्वाऽपि नैव वेद ॥ प्रतिबन्धकेन पापेन ५ प्रतिबन्धात् ॥ ६ 'शृण्वन्तोऽपि बहवो यं न विद्यु'रिति श्रुतिः ॥ ७ 'ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शना' दिति सूत्रम् ॥ श्रवणादिकमकुर्वंस्तु न वेदेति किमु वक्तव्यम् ॥ तस्मादात्मा दुर्विज्ञेय एव ॥ 'श्रुत्वाऽप्येनं वेद' 'न चैव कश्चित्' इति वाक्यद्वयम् ॥ श्रुत्वाऽपीत्यादेरेकवाक्यत्वे ८ 'आश्चर्यो ज्ञाता कुशलानुशिष्टः' इति

---

१. तै. २. ४. २. अत्र अगृहीत्वैव संबंधं अभिधानाभिधेययोः ॥ हित्वा निदां प्रबुध्यन्ते सुषुप्ते बोधिताः परैः ॥ जाग्रद्वन्न यतः शब्दं सुषुप्ते वेत्ति कश्चन' ॥ इति वचनमनुसन्धेयम् ॥ ३. ७ ३. ४. का १. ७. ५. अत, 'ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः' ॥ इति, कुतस्तद्ज्ञानमिति चेत् तद्धि बन्धपरिक्षयात् ॥ इति च वचनमनुसन्धेयम् ॥ ६. का. २. ७. ७. ३. ४. ५०. ८. का २. ७.

श्रुत्या ज्ञातुः सद्भावोक्तिर्विरुद्धा स्यात् ॥ अध्यात्मशास्त्राणामनारंभणीयता च स्यात् ॥ अत एवमुक्तम् ॥ वक्ष्यते च ॥ १ 'कश्चिन्मां वेत्ति तत्वतः' इति ॥ 'न चैव कश्चित्' इत्यस्य सर्वत्र संबन्धः ॥ कश्चित् पश्यति कश्चित् नैव पश्यति ॥ कश्चिद्वदति कश्चित् नैव वदति ॥ कश्चित् शृणोति कश्चित् नैव शृणोति ॥ कश्चित् वेद कश्चित् नैव वेद ॥ इति वा॥ कश्चित् पश्यति न वदति कश्चित् पश्यति वदति च॥ कश्चित् पश्यति वदति च न शृणोति कश्चित् शृणोति न पश्यति न वदति॥ कश्चित् शृणोति पश्यति वदति च॥ कश्चित् श्रुत्वाऽप्येनं वेद ॥ कश्चित् नैव वेद ॥ कश्चित् सर्वबहिर्भूतः इति अनेके प्रकाराः यथासंभवं संपद्यन्ते ॥

कश्चिदेव एनं पूर्वश्लोकोक्तं भूतग्रामं आश्चर्यवत् आश्चर्यं अद्भुतं स्वप्नेन्द्रजालादिकं तेन तुल्यं मिथ्याभूतं पश्यति ॥ एनं व्यवहारास्पदमपि मिथ्यात्वेन वदति तदत्याश्चर्यम् ॥ एनं अनात्मतया उपलभ्यमानं प्रत्यगभिन्नत्वेन शृणोति तदत्यन्तमाश्चर्यम् ॥ एनं प्रत्यगनन्यत्वेन श्रुत्वाऽपि स्वप्नादिदृष्टान्तैरुक्त्वाऽपि ध्यानेन साक्षात्कृत्वाऽपि नैव वेद तत्वतो न जानाति ॥ तीव्रविक्षेपवतः प्राप्ताऽपि प्रज्ञा परिहीयते ॥ तस्मादात्मतत्वं दुर्विज्ञेयम् ॥ २९ ॥

वि ॥ अर्जुनः ॥ देहात्मवादमङ्गीकृत्य शङ्कमानं मां प्रति देहनाशस्यापरिहार्यत्वात् वस्तुस्वभावनैयत्यानुसन्धानाच्च शोको न कार्य इत्यभिहितम् ॥ त्वदीयाऽऽत्मनित्यत्वपक्षं विहाय मदीयानित्यत्वपक्ष एव त्वया अभ्युपगत इति भाति ॥ किं तथा वद ॥

कृष्णः ॥ देहातिरिक्तनित्यात्मसत्वपक्ष एव श्रुत्यादिसम्मतः मदभिमतश्च ॥ सः कुतो न मम बुद्धावारोहतीति चेत् आत्मतत्वस्य दुर्विज्ञेयत्वात् न तव बुद्धिमारोहति ॥ किं तथा आत्मतत्वं दुर्विज्ञेयमिति चेत् शतसहस्रेषु महता पुण्येन क्षीणपापः कश्चित् अव्यक्तत्वादिना आश्चर्यवत् स्थितं एनं उक्तस्वभावं आत्मानं पश्यति ॥ तथैव अन्यः कश्चित् तथाविधएव आश्चर्यवत् स्थितं एनं परस्मै वदति च ॥ अन्यः कश्चित् आश्चर्यवत् स्थितमेनं शृणोति च ॥ कश्चित् एनं श्रुत्वाऽपि यथावन्नैव वेद च ॥ पश्यन्नपि यथावन्न पश्यति ॥ वदन्नपि यथावन्न वदति च ॥ शृण्वन्नपि यथावन्न शृणोति॥

१ ७. ३.

१ 'श्रवणायापि बहुभिर्यो न लभ्यः' इति मन्त्रार्थोपबृंहणरूपोऽयं श्लोकः कतिपयपद-व्यत्यासितः ॥ देहातिरिक्तनित्यात्मनो द्रष्टैव तावद्दुर्लभः किमुत यथावद्दृष्टा ॥ सत्स्वपि तादृशेषु वक्तैव दुर्लभः ॥ किमुत सकलरहस्यवक्ता ॥ सत्स्वपि तादृशेषु श्रोतैव दुर्लभः ॥ किं पुनः सकलशिष्यगुणसंपत्तियुक्तो यथावच्छ्रोता ॥ अत्र प्रथमं श्रवणं ततो मननात्तत्वनिश्चयः ततो वचनयोग्यता तत्रापि चिराभ्यासादिना यथावद्वचन-योग्यता ततो निदिध्यासनाद्दर्शनं ततश्चिरदर्शनसंस्काराद्वज्रादिरत्नानामिवाऽऽत्म-नस्सविशेषदर्शनमितिक्रमः ॥ दुर्विज्ञेयत्वादात्मतत्वं न तत्र बुद्धावारोहति ॥ सर्वैर्दु-र्विज्ञेये वस्तुनि विषये तवैकस्यैव मदीयोपालंभो वा किमर्थं ॥ पुनःपुनर्यथावदुप-दिश्य यथावदात्मतत्वं ग्राहयामि ॥ मा व्यथिष्ठाः ॥ २९॥

एवं दुर्विज्ञेयमात्मतत्वं तस्य बन्धं मोक्षं तदुपायं मोचयितारमीश्वरं तन्महिमानं च प्रतिपादयतो गीताग्रन्थस्यापि दुर्विज्ञेयता स्यात् ततश्च तद्दृष्टा तद्वक्ता तच्छ्रोता च दुर्लभःस्यात् न किं तथा वद ॥ इति चेत् एनं दुर्विज्ञेयात्मपरमात्मतत्वादिज्ञातव्यसक-लार्थप्रतिपादकं गीताग्रन्थं कश्चिदेव पश्यति ॥ स च अहो अस्य ग्रन्थस्य ज्ञातव्य-सर्वार्थप्रतिपादकता इति आश्चर्यवत् अद्भुतमिव विस्मयेन पश्यति ॥ सः आश्चर्य-वत् दुर्लभः ॥ तादृशेषु अनेकेषु अन्यः विलक्षणः कश्चिदेव वदति॥ सः आश्चर्यवत् दुर्लभः ॥ न हि सर्वेषां ज्ञातॄणां बोधकताशक्तिर्दृश्यते ॥ अत एव वक्ष्यते ॥ २ 'ज्ञानिन-स्तत्वदर्शिन' इति॥ ज्ञातृवक्तृभ्यामन्यः शृणोति ॥ न सर्वे शृण्वन्ति ॥ किन्तु बहुजन्म-समाचीर्णपुण्यपरिपाकसमुपजातशुश्रूषाकः कश्चिदेव शृणोति ॥ सोऽप्याश्चर्यवत् दुर्लभः ॥ स शृण्वन् आश्चर्यवत् अद्भुतमिव विस्मयेन शृणोति ॥ एनं ग्रन्थं श्रुत्वा ज्ञात्वा उक्त्वाऽपि कश्चित् नैव वेद ॥ साकल्येन न वेद ॥ किंतु किञ्चिदेव जानाति ॥ श्रुत्वा कश्चित् जानाति कश्चित् नैव जानाति ॥ गीताग्रन्थदर्शनवदनश्रवणानां दुर्ल-भत्वोक्तया महामहिमता तस्योक्ता भवति ॥ अत एव वक्ष्यते ॥ ३ 'य इदं परमं गुह्यं' इत्यादिना ४ 'प्राप्नुयात्पुण्यकर्मणाम्' ॥ इत्यन्तेन ग्रन्थेन गीताग्रन्थप्रवचनादीनां महत्फलम् ॥ अतो यथावच्छृणु ॥

१. का. २ ७. २. ४. ३४ ३ १८, ६८ ४. १८. ७१.

गीताग्रन्थस्य सकलार्थप्रतिपादकतया यथावत्तद्दर्शनवदनश्रवणादिकर्ता महा महिमवान् स्यात् नह्यन्तरेण व्याकरणादिशास्त्रान्तरपरिज्ञानं लोकतन्त्रदर्शनं संस्कृत-भाषायां अन्यादृशं परिचयं भगवति वासुदेवे भक्तिं च गीतार्थो यथावद्ज्ञातुं शक्यः॥ न किं तथा वद इति चेत् यः गीताग्रन्थं पश्यति वदति शृणोति च एनं आश्चर्यवत् खितं कश्चिदेव पश्यति॥ आश्चर्यवत् अतिविस्मयेन पश्यति॥ यः पश्यति सः आश्चर्यवत्॥ इत्यादि॥ गीताग्रन्थं यः सम्यक् श्रुत्वा ज्ञात्वा असकृदितरेभ्य उपदिशन् गीतारसं समग्रमनुभवति एनं श्रुत्वाऽपि ज्ञात्वाऽपि उक्त्वाऽपि तन्निष्ठानशेषविशेषान् साकल्येन न जानाति॥ इत्याद्यूह्यम्॥ २९॥

अर्जुनः॥ अस्त्वेकमखिलं प्रमेयम्॥ किं कर्तुं मां उद्योजयसि॥ ब्रूहि॥

कृष्णः॥ देही नित्यमवध्योऽयं देहे सर्वस्य भारत।
तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि॥ ३०॥

देहीति॥ हे भारत अर्जुन सर्वस्य देहे हन्यमानेऽपि देहः अस्यास्तीति देही आत्मा हन्तुं योग्यः वध्यः न वध्यः अवध्यः इति यत् तत् नित्यं निश्चितम्॥ तस्मात् सर्वाणि भूतानि प्रति त्वं शोचितुं नार्हसि॥ ३०॥

अयं जीवः देहे नष्टेऽपि देही देहवान् स्वरूपदेहवान् इति यत् तत् नित्यं निश्चितम्॥ अतः सर्वस्य तृतीयार्थे षष्ठी॥ सर्वेण प्रकारेण बिंबोपाधितत्संनिधिनाशादि-हेतुभिरपि अवध्यः नाशानर्हः॥ अयं ईश्वरः सर्वस्य प्राणिजातस्य देहे स्थूलदेहे लिङ्ग-देहे स्वरूपदेहे च रक्षकत्वेन वर्तते॥ अतः सर्वत्र रक्षकतया भगवतोऽवस्थानात् देही नित्यमेव अवध्यः॥ सर्वस्य सर्वत्र व्याप्तिमत्तया सर्वशब्दवाच्यस्य॥ वक्ष्यते च॥ १ 'सर्वं समाप्नोषि ततोऽसि सर्वः'॥ इति॥ तादृशस्य हरेरधीने देहे वर्तमानोऽयं जीवः नित्यमवध्यः तस्मात् त्वं सर्वाणि शरीराणि सर्वान् जीवांश्च प्रति अनुशोचितुं

---

१. ११. ४०.

नार्हसि ॥ नानुशोचितुं शोकमकृत्वा स्थातुमर्हसि ॥ एवमवस्थातुमेव त्वामुद्योजयामि॥ भारतत्वादेवं कर्तुमर्होऽसि ॥ योद्धुमर्हसीतिवक्तव्ये नानुशोचितुमर्हसीत्युक्त्या स्वत एष युद्धे प्रवृत्तत्वात्तव युद्धे प्रेरणं न मया कर्तव्यम् ॥ किन्तु प्रतिबन्धकशोकमोहापनोदनमेव मया कर्तव्यम् ॥ निवृत्ते च शोकमोहरूपे प्रतिबन्धके स्वयमेव धीरो वीरो धार्मिकश्च त्वं युद्धे प्रवर्तिष्यसे इति सूच्यते॥ त्वां व्याजीकृत्य लोकोद्धारार्थं विंशत्या श्लोकै स्तत्वोपदेशोऽयम् ॥ ३० ॥

अ ॥ अर्जुनः ॥ सर्वस्य प्राणिजातस्य देहे नष्टेऽपि तत्र विद्यमानोऽयं जीवः अवध्यः नाशानर्हः इति यत् तन्नित्यं निश्चितम् ॥ अतः सर्वाणि भूतानि भीष्मादीन् तदीयानि स्थूलसूक्ष्मशरीराणि च उद्दिश्य शोचितुं नार्हसि ॥ स्थूलदेहस्य सर्वथा नाशात् स्थूलदेहनाशेऽपि सूक्ष्मशब्दितलिङ्गदेहस्यानाशात् आत्मनश्च सर्वथा अनाशात् शोकमोहौ विहाय स्वधर्मं युद्धं कर्तुमर्हसि ॥

भीष्मादिशब्दवाच्यार्थभूतान् देहान् उद्दिश्य शोको न कार्य इत्युक्तम् 'अव्यक्तादीनि भूतानी'त्युपसंहृतम् ॥ भीष्मादिशब्दलक्ष्यार्थभूतानात्मन उद्दिश्य शोको न कार्य इत्युक्तमुपसंहियते ॥ देही देहोपाधिकः देहे उपलभ्यमानः जीवः सर्वस्य ब्रह्मादिस्तंबान्तस्य प्राणिजातस्य देहे वध्यमानेऽपि नित्यमवध्यः ॥ तस्मात् भीष्मादिशब्दलक्ष्यार्थभूतान् आत्मन उद्दिश्य १' त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि चे'त्युक्तरीत्या शोको न कार्यः ॥ अध्यात्मज्ञानसंपन्नस्य तव इदमेव युक्तम् ॥ शोकमोहपरिहारार्थमात्मानात्मतत्वमुपदिश्य न शोचितुमर्हसि इत्युक्त्या शोकमोहादिदोषरहितस्यापरोक्षज्ञानिनः सर्वकर्मसंन्यास एवाधिकार इति सूच्यते ॥

एवमेतावता ग्रन्थेन अर्जुनस्य कथमेते मदीया दीना अल्पबला बलवत्तरेण मया हन्तव्याः ॥ कथमेतेषां पुत्रादय एतैर्विना जीविष्यन्ति ॥ कथंवाऽहं भीष्मादिभिर्गुरुभिर्युद्धं कुर्याम् ॥ २ 'यानेव हत्वा न जिजीविषाम' इत्युक्तरीत्या कथं वा तैर्विना जीविष्यामि इति शोकः तन्मूलभूतः अनात्मनि आत्मधीरूपः अनात्मीये आत्मीयताधी

१. १. ३४. २. १. ६.

रूपश्च यो मोहः स च देहात्मतत्त्वोपदेशेन निराकृतः ॥ स्वधर्मे युद्धे अधर्मधीरूपो मोहस्तु 'स्वधर्ममपी'त्यादिना निराकरिष्यते ॥ ३० ॥

वि ॥ अयं देही सर्वस्य देवादेः स्थावरान्तस्य प्राणिनः देहे वक्ष्यमानेऽपि नियमेन अवध्यः ॥ देहीत्यनेनैव देहे विद्यमान इत्यर्थस्य लाभेन देहे इत्यस्य वैयर्थ्यादेवं व्याख्यानमुचितम् ॥ १ 'हन्यमाने शरीरे' ॥ इत्युक्तं हि मया ॥ २ 'न हन्यते हन्यमाने शरीरे' ॥ इति श्रुतिश्च ॥ तस्मात् सर्वाणि देवादिस्थावरान्तानि भूतानि जीवान् प्रति त्वं न शोचितुमर्हसि ॥ युयुत्सया पुरतोऽवस्थितानां भीष्मादीनां नाशशङ्कया युद्धादुपरिरंसन्तं मां प्रति भीष्मादीन् न शोचितुमर्हसीति वक्तव्ये सर्वाणि भूतानीति कुत उच्यते इति चेत् शरीरस्य सर्वथा नाशात् आत्मनश्च कयाऽपि विधया नाशाभावात् भीष्मादीन् प्रति शोको न कार्य इत्यसकृदुक्तया भीष्मादीनां विषये एवं स्यात् देवादिस्थावरान्तानां अन्येषां प्राणिनां विषये देहविषये जातिगुणदेशदुर्भेदत्वसुभेदत्ववैषम्यमिव आत्मविषये सुखित्वदुःखित्वादिवैषम्यमिव च नित्यत्वानित्यत्वादिवैषम्यमपि स्यात् इति शङ्कोत्पद्येत तां परिहर्तुं देवादिस्थावरान्तानां सर्वेषां आत्मनां साधारणमिदं नित्यत्वम् ॥ अनित्यत्वादिकं तु देहगतं ॥ अनित्यत्वादिमद्देहवाचकदेवादिशब्दैरात्मनो व्यपदेशस्तु देहस्यापृथक्सिद्धत्वादुपचारेण इति बोधयितुं सर्वाणि भूतानीत्युक्तम् ॥ अतः तादृशान् सर्वान् आत्मनः प्रति न त्वया शोकः कार्यः ॥ सूक्ष्मत्वाच्छेद्यत्वादिना नित्यत्वेन च स्वरूपतः समानानां जीवानां सुखदुःखादिवैषम्यं कथं इति चेत् तत्तद्देहोपाधिकज्ञानावस्थातारतम्यात् सुखदुःखादिवैषम्यमुपपद्यते ॥ इमे जनाधिपाइत्याद्युक्तिस्तु तेषामेव नाशस्य शङ्कितत्वेन शङ्कां सयुक्तिकं परिहृत्य युद्धे प्रवर्तनाय ॥ अतो नानुपपत्तिः ॥ एवमेतावता प्रबन्धेन पार्थस्य तव अस्थानकारुण्यमपनोदितम् ॥ ३ 'स्वधर्ममपि चे'त्यादिना ४ 'मरणादतिरिच्यते' इत्यन्तेन धर्माधर्मधीरपनोद्यते ॥ ५ 'भयाद्रणादुपरत'मित्यादिना ६ युद्धाय कृतनिश्चयः' इत्यन्तेन अस्थानस्नेहोऽपनोद्यते ॥ तत्त्रितयापनोदाय हि ७ अध्यात्मशास्त्रावतरणं मया कृतम् ॥ अतो विधूतशोकमोहादिको भूत्वा स्वधर्मं युद्धं कुरु ॥ भारतत्वाद्युद्धमेव कर्तुमर्होऽसि ॥ ३० ॥

१. २. २०, २. का. २. १८. ३. २ ३१. ४. २. ३४. ५. २. ३५. ६. २. ३७. ७. इदमेवोक्तं यामुनाचार्यैः गीतार्थसंग्रहे ॥ 'अस्थानस्नेहकारुण्यधर्माधर्मधियाऽऽकुलम् ॥ पार्थं प्रपन्नमुद्दिश्य शास्त्रावतरणं कृतम्' ॥ इति ॥

अर्जुनः ॥ उपदिष्टवानस्यात्मतत्वं परमया कृपया ॥ तथाऽपि तस्य बुद्धावनारोहात् पुनः पुनः शोको जायते ॥ सतिचैवं कथमहं स्वजनार्हिंसात्मके प्रकृते युद्धे प्रवर्तेय ॥ वद ॥

कृष्णः ॥ स्वधर्ममपि चावेक्ष्य न विकंपितुमर्हसि ॥
धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते ॥ ३१ ॥

स्वधर्मामिति ॥ अपि च किंच युत्धं स्वस्य धर्मः स्वश्चासौ धर्मश्च इति वा स्वधर्मः तं अवेक्ष्य पर्यालोच्य विकंपितुं युत्धाच्चलितुं कंपमाप्तुं वा नार्हसि ॥ क्षत्रियस्य धर्मादनपेतं धर्म्यं तस्मात् युत्धात् अन्यत् श्रेयः न विद्यते ॥ हि प्रसिद्धम् ॥ अतः न विकंपितुमर्हसीति वा ३१ ॥

तिष्ठतु तावदयं तत्वोपदेशः बुद्धावनारूढ एव मनसि ॥ कर्मयोगानुष्ठानसमुपजातसर्वकर्मसमाराध्यभगवत्प्रसादेन निश्शेषनिर्धूतमले मनसि स्वयमेव शुद्धां बुद्धिमध्यारोहेदयमुपदेशः ॥ अतः त्वां प्रकारान्तरेण स्वधर्मे युद्धे प्रवर्तयामि ॥ शृणु किंचिदवधानेन ॥ किंच युद्धं स्वधर्मं विचारय ॥ युद्धं हि क्षत्रियस्य तव स्वस्य विहितो धर्मः ॥ अत एव स्वः स्वकीयो धर्मः ॥ स्वतन्त्रत्वात्स्वशब्दवाच्यस्य भगवतः धर्मः तत्प्रीतिजनको धर्मः ॥ अत एव स्वीयधर्मः ॥ भगवत्प्रीतिजनक एव हि स्वधर्मः ॥ स्वं धनं तस्य धर्मः धनसंपादको धर्मः युद्धेन राज्यादेर्लाभात् ॥ अतः महायासलब्धद्रव्यव्ययैकसाध्ययागदानादिधर्मेभ्य उत्तमो धर्मः ॥ हिंसारूपतया अधर्मः किल युद्धं कथं स्वधर्मः इत्युच्यते इति चेत् सु अत्यन्तं अधर्मोऽपि १ तव स्वस्य विहितधर्मत्वात् स्वशब्दितभगवत्प्रीति जनको धर्मः ॥ तादृशं स्वधर्मं बुध्या २ विचार्यापि त्वं कंपितुं वेपथुशब्दितं कंपं प्राप्तुं नार्हसि ॥ ३ 'वेपथुश्च शरीरे मे' इति यत्त्वयोक्तं तदयुक्तम् ॥ तस्माद्युद्धाच्चालितुं नार्हसि ॥ ४ 'एतान्न हन्तुमिच्छामि'॥ ५ 'न यो-

१. 'तत्कर्म हरितोषं यत् सा विद्या तन्मतिर्यया' ॥ इति भागवते प्रथमस्कन्धे १ अध्याये ॥ २. अपि च किंच युद्धं च युद्धं तु अवेक्ष्यापि. अवेक्ष्यापि नार्हसि च नार्हस्येव इत्यादिरीत्या अपि चशब्दयोरन्वयः ॥ ३. १. २९. ४. १. ३५. ५. २. ९.

त्स्ये' ॥ १ 'कथं भीष्ममहं' इत्यादि यत्त्वयोक्तं तदयुक्तम् ॥ अतो योद्धव्यमेव ॥ स्वधर्मं क्षत्रियस्य तव विहितं युद्धे अपलायनरूपं धर्मं पर्यालोच्य विकंपितुं युद्धं विहाय पलायितुं नार्हसि ॥ वक्ष्यते च ॥ २ 'शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायन'मिति ॥ न केवलमात्मयाथात्म्यज्ञानात् किंतु युद्धस्य स्वधर्मत्वपर्यालोचनात् यद्वादपलायनस्य स्वधर्मत्वपर्यालोचनाच्च त्वया युद्धं कर्तव्यमेव ॥ किमर्थमेवं निर्बध्यते अन्यदेव किमपि श्रेयस्साधनमुपदिश्यतां अनुतिष्ठामीति चेत् धर्म्यात् धर्मात् अनपेतात् पारत्रिकसुखहेतुर्धर्मः तज्जनकात् धारकत्वाद्धर्मो भगवान् तत्पूजारूपत्वेन तत्प्रीतिजनकात् धर्मशास्त्रादागतात् विहिततया कर्तव्यत्वेन प्राप्तात् अपराङ्मुखत्वरूपधर्मोपेतात् निवृत्तनिरायुधशरणागतादिषु शस्त्रादिप्रयोगाद्यभावादिरूपन्यायतः प्रवृत्तात् युद्धात् अन्यत् श्रेयः श्रेष्ठं कर्म श्रेयस्साधनं वा क्षत्रियस्य न विद्यते ॥ हिशब्देन प्रमाणप्रसिद्धिस्सूच्यते ॥ अतः स्वधर्ममवेक्ष्य न विकंपितुमर्हसीति वा॥ ३ 'ये युध्यन्ते प्रधनेषु शूरासो ये तनुत्यजः' ॥ इति श्रुतौ युद्धस्य श्रेयस्साधनत्वं प्रसिद्धम्॥ युद्धमेव जयद्वारा प्रजारक्षणब्राह्मणशुश्रूषादिक्षत्रियधर्मनिर्वाहकमिति तदेव क्षत्रियस्य प्रशस्यतरं नान्यत् ॥ 'क्षत्रियो हि प्रजा रक्षन् शस्त्रपाणिः प्रदण्डवान् ॥ निर्जित्य परसैन्यानि क्षितिं धर्मेण पालयेत्' ॥ इति पराशरस्मृतिः ॥ समोत्तमाधमैः राजा चाहतः पालयन् प्रजाः ॥ न निवर्तेत संग्रामात् क्षात्रं धर्ममनुस्मरन् ॥ संग्रामेष्वनिवर्तित्वं प्रजानां चैव पालनम् ॥ शुश्रूषा ब्राह्मणानां च राज्ञः श्रेयस्करं परम्'॥ इति मनुस्मृतिः ॥ प्रमाणे राज्ञ इत्युक्तेः अस्त्वेवं राज्ञः त्वया तु क्षत्रियस्येति क्षत्रियसामान्यस्योच्यते ॥ तत्कथमिति चेत् ॥ अवेष्ट्यधिकरणन्यायेन विधिवाक्यस्थराजन्शब्दः क्षत्रियजातिमात्रवाची ॥ अतः क्षत्रियेण त्वया युद्धं कर्तव्यमेव ॥ क्षत्रियस्य श्रेयस्साधनानां यज्ञदानादीनामन्येषां विद्यमानत्वात् अन्यन्न विद्यत इति कथमुच्यते इति चेत् 'न हि निन्दा निन्दनीयं निन्दितुं प्रवृत्ता अपितु स्तोतव्य स्तोतुं' इति न्यायात् ४ 'अपशवो वा अन्ये गो अश्वेभ्यः' इत्यत्रेव स्तोतव्ययुद्धप्रशंसनाय अन्यच्छ्रेयो न विद्यते इत्युच्यते ॥ युद्धेन जयः तेन धनं तेन च यागादिकं तेन च चित्तशुद्धिः तया च ज्ञानं तेन च मोक्षः इति युद्धस्य श्रेयःसाधनत्वं बोध्यम् ॥ ५ 'न च श्रेयोऽनुपश्यामी'त्यादि ६ 'जीवितेन वा' इत्यन्तं यदुक्तं तदयुक्तम् ॥ स्वधर्ममित्यनेन स्वधर्मत्वात्कर्तव्यतया प्राप्ते युद्धे तादृशो-

१. २. ४. २. १८. ४३. ३. तै आ. ७. ३. ४. तै. सं. ५ २. ९. ५. १. ३१. ६. १. ३२.

यागे इव हिंसादिदोषविचारो न कर्तव्य इति नोच्यते । यथा यागीयपशुहिंसा 'न हिंस्यात्सर्वाभूतानि' इति श्रुत्या निषिद्धत्वादधर्मोऽपि 'अग्नीषोमीयं पशुमालभेत' इति श्रुत्या विहितत्वाद्धर्म इत्यनुष्ठीयते ॥ तथा युद्धं हिंसारूपत्वादधर्मोऽपि विहितत्वाद्धर्म इति क्षत्रियेण त्वया अनुष्ठेयमेव ॥ १'यद्यप्येते न पश्यन्ति' इत्यादिना युद्धस्य अधर्मत्वात्तापहेतुत्वाभिधानं २'कथं भीष्मं' इत्यादिना गुर्वादिहननप्रसक्त्या अकर्तव्यत्वाभिधानं च धर्मशास्त्रापरिज्ञानमूलकं त्वदीयम् ॥ युद्धस्य हिंसारूपत्वादधर्मस्यापि विहितत्वात्कर्तव्यत्वमस्तु धर्मत्वं कथम् । यागीयपशुहिंसावद्धर्मत्वं इत्युक्तमिति चेत् तत्रैव पृच्छामि ॥ यागीयपशुहिंसायाः अधर्मत्वेऽपि विहितत्वात्कर्तव्यत्वमस्तु धर्मत्वं कथमिति चेत् हिंसात्वे सति हि अधर्मत्वं स्यात् ॥ दृष्टान्ते यागे दार्ष्टान्तिके युद्धे च क्रियमाणायाः हिंसायाः हिंसात्वमेव नास्ति ॥ कुत इति चेत् केयं हिंसा दुःखजनकव्यापारो हिंसा इति चेत् रक्षारूपस्य चिकित्सकशल्यप्रयोगादेः दुःखजनकव्यापारत्वेन हिंसात्वं स्यात् ॥ अतो न सा हिंसा ॥ प्राणवियोगानुकूलव्यापारो हिंसा इति चेत् अतादृशेषु सर्वस्वहरणनरकपीडनादिषु हिंसाशब्दप्रयोगो दृश्यते ॥ अतो न सा हिंसा ॥ किन्तु अनर्थपर्यवसितः तादात्विकदुःखजनको व्यापारो हिंसा ॥ प्रकृते च युद्धे मृतानां स्वर्गादौ कल्याणतरदेहप्राप्त्युक्त्या अनर्थपर्यवसितत्वाभावेन न युद्धे क्रियमाणहिंसायाः हिंसात्वम् ॥ ३'न वा उ एतान्म्रियसे न रिष्यसि ॥ देवाँ इदेषि पथिभिः सुगेभिः ॥ यत्र यन्ति सुकृतो नापि दुष्कृतः ॥ तत्र त्वा देवस्सविता दधातु ॥' इति श्रुत्या यागे हिंस्यमानां पशूनां स्वर्गादौ कल्याणतरदेहप्रापकत्वावगमात् अनर्थपर्यवसितत्वाभावेन न दृष्टान्तभूतस्य अग्नीषोमीयादिपशुहिंसनस्यापि हिंसात्वम् ॥ उक्तं च युद्धे मृतानां कल्याणतरदेहप्राप्तिः ४'वासांसि जीर्णानि' इत्यत्र ॥ अतो धर्मत्वं युक्तम् ॥ अधर्ममपि इति अधर्मत्वमङ्गीकृत्य समाधानं कथमुक्तं इति चेत् युद्धं अज्ञदृष्ट्या अधर्मत्वेन प्रतीयमानमपि विज्ञदृष्ट्या धर्ममेव जानीहि इत्यर्थः । अतो युक्तमुक्तम् ॥ ३१ ॥

अर्जुनः ॥ जये सति युद्धस्य श्रेयस्साधनत्वं युक्तम् ॥ पराजये कथं तत् वद

१. १. ३८. २. २. ४. ३. तै. ब्रा. ७. ७. ४. २. २२.

कृष्णः ॥ यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् ॥
सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम् ॥ ३२ ॥

यदृच्छयेति ॥ हे पार्थ यदृच्छया अप्रयत्नेन भगवदिच्छया वा च एव उपपन्नं प्राप्तं अपगतं आवृतं आवरणं प्रतिबन्धकं यस्मात तत् अपावृतं तादृशं स्वर्गस्य द्वारं ईदृशं युद्धं सुखं तद्धेतुभूतं पुण्यं सुखकामना वा एषां अस्तीति सुखिनः क्षत्रियाः लभन्ते ॥ ३२ ॥

युद्धे जये सति उक्तविधया श्रेयोलाभः ॥ पराजये पारत्रिकस्वर्गादिश्रेयोलाभः । स्वर्गस्य साधनं हि युद्धं स्वर्गद्वारत्वम् अग्निष्टोमादेरप्यस्ति इति चेत् अपावृतं आवृतं आवरणं १ प्रतिबन्धकं प्रतिबन्धकरहितं स्वर्गसाधनम् ॥ अग्निष्टोमादिना स्वर्गादिकं चिरेण प्राप्यते युद्धेन तु अचिरेण ॥ आवृतं आवरणरूपं कवाटं उद्घाटित २ कवाटं स्वर्गस्य स्वर्गशब्दितसुखानुभवस्थानस्य प्रतीहारभूतं द्वारमिव प्राप्तिसाधनम् ॥ युद्धस्य श्रेयस्साधनत्वमुच्यते कस्यचन क्षात्रियस्य तदीये आयुषि युद्धं नैव प्रासङ्गत तस्य गतिः का किं श्रेयोऽर्थं पित्रादिना येनकेनचिद्युद्धं कर्तव्यं इति चेत् न तथा किन्तु अप्रयत्नेन भगवदिच्छया युद्धमुपनतं चेत् न विहातव्यम् ॥ तव चेदं युद्धं अप्रयत्नादीश्वरेच्छयोपनतम् ॥ ईदृशं जये कीर्तिप्रतिष्ठाराज्यलाभादेः पराजये स्वर्गस्य च साधनम् ॥ अपावृतं स्वर्गद्वारं यदृच्छयैवोपनतं युद्धं न सर्वेषां क्षत्रियाणां लभ्यम् ॥ किन्तु ये सुखिनः ३ सुखहेतुपुण्यवन्तः सुखकामनावन्तो वा न एव ४ लभन्ते । सुखवन्तो लभन्त इति यथाश्रुतं तु न सम्यक् ॥ युद्धेन प्राप्यस्य सुखस्य युद्धप्रापकत्वाभावात् ॥

१. अपगतं आवरणं प्रत्यवायरूपं स्वर्गद्वारताप्रतिबन्धकं यस्मात्तत् इति केचित् ॥ २. अत्र 'न ध्यातं पदमीश्वरस्य विधिवत् संसारविच्छित्तये स्वर्गद्वारकवाटपाटनपटुर्धर्मोऽपि नोपार्जितः ॥ नारीपीनपयोधरोरुयुगळं स्वप्नेऽपि नालिङ्गितं मातुः केवलमेव यौवनवनच्छेदे कुठारा वयम् ॥' इति श्लोकोऽनुसन्धेयः ॥ ३. सुखिन एव सन्तः न तु त्वमिव शोचन्तः इति केचित् ॥ ४. अलभन्त भीष्मो हि अम्बानिमित्तमयुध्यत परशुरामेण. गुरुणा ॥ गुरुजनप्रतियोद्धृकयुद्धाचरणं शिष्टाचारप्रदर्शनमिदं इति केचित् ॥

ये क्षत्रिया लभन्त तं सुखिनो भवन्तीति वा ॥ यस्मादेवं तस्माद्युद्धं ईदृशं उभयविधश्रेयस्साधनमिति वा ॥ अतः जये अपजये च श्रेयःसाधनत्वादिदं युद्धं त्वयाऽनुष्ठेयमेव ॥ अतः १'निहत्य धार्तराष्ट्रान्नः का प्रीतिः स्यात्' २'स्वजनं हि कथं हत्वा सुखिनः स्याम' इति त्वयोक्तमयुक्तम् ॥ यत् पुण्यवन्त एव क्षत्रिया लभन्ते अपावृतं स्वर्गद्वारं तत् यदृच्छयैवोपनतं चेत् तत्किमननुष्ठाय विहातुमर्हम् ॥ एतादृशं चेदवश्यमनुष्ठेयमेव ॥ ईदृशं ममोपनतं चेत् अहमवश्यमनुतिष्ठेयम् । तादृशं किं ब्रूहि इति चेत् ईदृशं क्षत्रियस्य तव युद्धं अतस्तदनुतिष्ठ ॥

क्षत्रियस्य युद्धमुभयविधश्रेयःसाधनत्वात्परमप्रशस्यमस्तु ॥ तथाऽपि प्रकृतमिदं युद्धं गर्हितत्वादकार्यमेव ॥ कुत इति चेत् ईदृशं रचितमहोपकारमहानुभावपरमपूज्यतमगुरुभीष्मद्रोणादिप्रतियोद्धृकम् अतो गर्हितम् इति चेत् ईदृशं तथाऽपि विधिविहितत्वेन धर्मत्वात् स्वर्गद्वारं ॥ यदृच्छया चोपनतं युद्धं इत्यादि पूर्ववत् ॥ विधिविहितो धर्म इति कथं 'श्येनेनाभिचरन् यजेत' इति विधिविहितश्येनयागस्य धर्मत्वं हि स्यात् इति चेत् अनिषिद्धफलोद्देश्यको धर्मः निषिद्धफलोद्देश्यकोऽधर्मः इति व्यवस्था ॥ अतः अनिषिद्धस्वर्गादिफलकं युद्धं धर्मः ॥ 'न हिंस्यात्' 'न निहन्यात्' इत्यादिना निषिद्धशत्रुवधरूपफलकः श्येनयागादिरधर्मः ॥ अतो धर्मत्वात्स्वर्गद्वारमिति युक्तम् ॥ विधिविहिते श्येनयागे कथं निषेधस्यावकाशः 'विधिस्पृष्टे निषेधानवकाशः' इति हि न्यायः इति चेत् यत्र विधिः श्येनयागादौ न तत्र निषेधः ॥ यत्र शत्रुवधरूपे फले निषेधः न तत्र विधिस्पर्शः ॥ अतो निषेधविषयफलकत्वात् श्येनयागादेरधर्मत्वं ॥ युद्धस्यातादृशत्वात् धर्मत्वं ॥ अतः स्वर्गद्वारं ॥ ईदृशं कथं स्वर्गद्वारं गुरुहननादेः पापहेतुत्वात् इति चेत् तेषां आततायिपक्षपातित्वेन शस्त्रपाणित्वरूपाततायिलक्षणाक्रान्तत्वेन च आततायित्वात् आततायिवधे च दोषाभावात् ईदृशमपि स्वर्गद्वारं ॥ आततायिवधाभ्यनुज्ञानस्य आचार्यादिव्यतिरिक्तविषयत्वात् ईदृशं कथं स्वर्गद्वारं ॥ इति चेत् आचार्यादिविषयेऽपि आततायिवधाभ्यनुज्ञानस्य मनुना स्पष्टमुक्तत्वात् ईदृशमपि स्वर्गद्वारं ॥ 'गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतं ॥ आततायिनमायन्तं हन्यादेवाविचारयन् ॥ आततायिनमायान्तमपि वेदान्तपारगं ॥

---

१. १. ३६. २. १. ३७.

जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेत् ॥ नाऽऽततायिवधे दोषो हन्तुर्भवति कश्चन ॥' इति मनुस्मृतौ ॥ आततायिवधस्वस्वजीवनरूपदृष्टप्रयोजनार्थत्वेन तद्विधायकं शास्त्रं अर्थशास्त्रं ॥ 'न हिंस्यात्' 'न निहन्यात्' इत्यादि शास्त्रं तु दृष्टप्रयोजनानपेक्षणाद्धर्मशास्त्रं ॥ यदननुष्ठाने प्रत्यवायः तद्धर्मशास्त्रं यदननुष्ठाने न स्यः तदर्थशास्त्रम् ॥ 'न हिंस्यात्' इत्यादिशास्त्रमननुष्ठाने प्रत्यवायः ॥ आततायिनं हन्यात् इत्यस्याननुष्ठाने न स्यः ॥ न हि 'न हिंस्यात्' इत्यादिशास्त्रविरोधेन वधं कुर्वन्निव जातस्य ध्रुवो मृत्युः यदा कदा वा मर्तव्यम् किमर्थं तात्कालिकजीवनाय मया अयं हन्तव्यः स्वजीवनार्थं हिंसनादपि अहिंसनं वरं इति आततायिनमहतवान् विध्युल्लङ्घनकारीति दण्ड्यते ॥ आततायिवधशास्त्रस्य उत्क्रीत्या अर्थशास्त्रत्वेन दुर्बलत्वादीदृशं कथं स्वर्गद्वारम् ॥ युध्यस्वेति प्रकृते मया विधीयमानस्य युद्धस्यापि दृष्टप्रयोजनानपेक्षत्वेन प्रकृते आततायिवधशास्त्रस्यापि धर्मशास्त्रत्वात् तस्य च अनुल्लङ्घनीयत्वात् ईदृशमपि स्वर्गद्वारम् ॥ वक्ष्यते च[1] 'सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ॥ ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥' इति । उभयोरपि धर्मशास्त्रत्वे कथं निर्णयः परस्परविरोधात् ॥ अतः ईदृशं कथं स्वर्गद्वारम् ॥ 'न हिंस्यात्' इत्यादिकं सामान्यशास्त्रम् 'आततायिनं हन्यात्' इति तु विशेषशास्त्रम् ॥ विशेषेण सामान्यस्य बाधो निर्विवादः अतः आततायिवधशास्त्रस्यैव बलवत्त्वात् ईदृशमपि स्वर्गद्वारम् ॥ आततायिवधशास्त्रस्य अर्थशास्त्रत्वाभिप्रायेण यदुक्तम् २'पापमेवाश्रयेदस्मान् हन्त्वेतानाततायिनः ॥' इति त्वया तदयुक्तम् ॥ 'अर्थशास्त्रात्तु बलवत् धर्मशास्त्रमिति स्थितिः ॥' इति याज्ञवल्क्यवचनस्य का गतिः इति चेत् दृष्टप्रयोजनाद्दृश्यकाधर्मयुद्धविषयं तद्वचनमिति न कोऽपि विरोधः ॥ अतः अपावृतस्वर्गद्वारत्वादनुष्ठेयमेव युद्धं त्वयेत्यलम् ॥ ईदृशं युद्धं ये क्षत्रियाः लभन्ते तेषां अपावृतं स्वर्गद्वारं अप्रयत्नेनैवोपनतं भवति ॥ गत्वा च स्वर्गं तत्र सुखिनो भवन्ति ॥ स्वर्गद्वारप्राप्तिहेतुत्वाद्युद्धं कर्तव्यं इति वा ॥ ३२ ॥

अर्जुनः ॥ अस्त्वेवं युद्धस्य करणे उभयथाऽपि श्रेयः ॥ तथाऽपि नाहं भीष्मादिभिर्युध्येय ॥ ३'न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च' इत्यादिना ४'अपि त्रैलोक्यराज्यस्य' इत्यादिना ५'अवाप्य भूमावसपत्नमृद्धं राज्यं

---

१. २. ३८. २. १. ३६. ३. १. ३२. ४. १. ३५. ५. २. ८.

सुराणामपि चाधिपत्यम् ॥' इति च उक्तविधया जयादिसर्वश्रेयोऽनपेक्षणात् ॥ अकरणे प्रत्यवायाभावाच्च ॥ यद्यकरणे प्रत्यवायः स्यात् तर्हि तदनुष्ठेयं स्यात् वद ॥

कृष्णः ॥ अथ चेत्त्वमिमं धर्म्यं सङ्ग्रामं न करिष्यसि ॥
ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ॥ ३३ ॥

अथेति ॥ अथ त्वत्पक्षावलंबनेन धर्मादनपेतं धर्म्यं इमं संग्रामं युद्धं न करिष्यसि चेत् ततः तर्हि स्वधर्मं कीर्तिं च हित्वा त्यक्त्वा पापं अवाप्स्यसि ॥ ३३ ॥

अथेति पक्षान्तरम् ॥ यदि मदीयं युद्धस्य कर्तव्यत्वपक्षं विहाय अकर्तव्यत्वपक्षमभ्युपेत्य युद्धं त्यजसि तर्हि तव तेन महान् प्रत्यवायः स्यात् ॥ अथ तथाऽपि युद्धस्य ईदृशत्वेऽपि दुरभिनिवेशादकर्तव्यत्वमभ्युपेत्य 'धर्म्याद्धि युद्धात्' इत्यत्रोक्तविधया धर्म्यं इदं युद्धं न करिष्यसि चेत् अथ युद्धप्रारम्भानन्तरं आरब्धं युद्धं त्यजसि इति वा ॥ अनेन यदि युद्धारम्भात्पूर्वमेव ईदृशी बुद्धिस्तवाऽऽगता स्यात् तर्हि सम्यक् स्यात् इति सूच्यते ॥ ततः तर्हि युद्धस्याकरणात् इति वा ॥ स्वधर्मं युद्धरूपं स्वधर्मफलभूतमैहिकमामुष्मिकं च सुखम् । स्वः स्वकीयः धर्मः यस्मिन् प्रतिपाद्यते तत वेदशास्त्रादिकं च हित्वा कीर्तिं च हित्वा स्वधर्मत्यागमूलकं पापं तन्मूलकं नरकादिदुःखं च प्राप्स्यसि ॥ स्वधर्मं कीर्तिं च हित्वा पापं च प्राप्स्यसि ॥ न केवलं स्वधर्मकीर्त्योर्हानिमात्रम् ॥ किन्तु पापप्राप्तिरपि ॥ कीर्तिं हित्वा स्वधर्मं सु महान् अधर्मः 'न निवर्तेत संग्रामात्' इत्यादिना निषिद्धो युद्धान्निवृत्तिरूपः तं तज्जनितं पापं च प्राप्स्यसीति वा ॥ स्वधर्मं अनेकजन्मार्जितं स्वकीयं सर्वं पुण्यं हित्वा पापं राजकृतं सर्वं पापं प्राप्स्यसि । युद्धात्परावृत्तः शत्रुभिर्हन्येत ॥ परावृत्य हतः स्वकीयसकलसुकृतहानिपूर्वकं राजकृतसकलपापभाक् भवति ॥ 'यस्तु भीतः परावृत्तः सङ्ग्रामे हन्यते परैः । भर्तुर्यद्दुष्कृतं किंचित् तत्सर्वं प्रतिपद्यते ॥ यच्चास्य सुकृतं किंचित् अमुत्रार्थमुपार्जितम् ॥ भर्ता तत्सर्वमादत्ते परावृत्तहतस्य तु ॥' इति मनुस्मृतौ ॥ 'राजा सुकृतमादत्ते हतानां विपलायिनां ॥' इति याज्ञवल्क्यस्मृतौ च ॥ १ 'पापमेवाश्नेयेद-

१. १. ३६.

स्मान्' इति । १ 'एतान्न हन्तुमिच्छामि' इति । २ 'यदि मामप्रतीकारम्' इति च यत्त्वयोक्तं तत्सर्वमयुक्तम् ॥

उक्तरूपत्वद्वचनश्रवणाद्विभ्रम कर्तव्यमादिश करिष्यामि इति चेत् ततः युद्धाकरणे उक्तरीत्या इष्टनिवृत्त्यनिष्टप्राप्त्योः प्रसङ्गात् त्वत्कीर्तितं पापं पाप-हेतुभूतं युद्धान्निवृत्तिरूपं कर्म हित्वा स्वधर्मं अव पालय ॥ तेन कीर्तिं आप्स्य-सि ॥ अव आप्स्यसि इति पदद्वयं तिङन्तम ॥ स्वधर्मकीर्त्योस्तत्रक्रमेणान्वयः ॥ ३३ ॥

अर्जुनः ॥ सुखं कीर्तिं च हित्वा पापहेतुकं दुःखं प्राप्स्यसीत्युक्तम् ॥ नाहं सुखकामः कीर्तिकामो वा ॥ पापप्राप्तिस्तु कालव्यवधानेन परलोके बा-धिका ॥ नेदानीमिह लोके बाधकं किञ्चिन ॥ अतो माऽस्तु युद्धम् वद ॥

कृष्णः ॥ अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययां ॥
संभावितस्य चाकीर्तिः मरणादतिरिच्यते ॥ ३४ ॥

अकीर्तिं चेति ॥ न कीर्तिः अकीर्तिः तां च प्राप्स्यसि ॥ भूतानि प्राणिनः न विद्यते व्ययः यस्याः सा अव्यया तां अकीर्तिं ते तव कथयिष्यन्त्यपि संभावि-तस्य पुंसः अकीर्तिः च तु मरणात् अतिरिच्यते विशिष्यते ॥ ३४ ॥

सङ्गामं न करिष्यामि चेत् अकीर्तिं च अवाप्स्यसि ॥ सा च लोकापवाद-रूपत्वादिदानीमेव इह लोक एव बाधिका ॥ उत्क्षत्रां नामाकीर्तिः को वा तां ज्ञास्यति के वा वदिष्यन्ति इति चेत् अनामधेयकुलगोत्रस्य कीर्तिमकीर्तिं च न कोऽपि जानीयात् ॥ जानन्तोऽपि न वदेयुः ॥ संभावितस्य सर्वैर्बहुमतस्य परमप्रसिद्धस्य[3] तव तामकीर्तिं भूतानि कथयिष्यन्ति ॥ कालेन सा नङ्क्षयति ॥ यत्र क्वापि पलायितं मां न बाधिष्यते च इति चेत् सा तु अव्यया स्थास्यति । व्ययः देशतः कालतश्च हानिः तस्या न भविष्यति ॥ संभावितस्याकीर्तिर्यदि भवति तर्हि सा सद्य एव सकलमपि भुवनं व्याप्नोति ॥ न च कालतो नश्यति ॥ अकीर्ति-दूषितो देशान्तरं गतश्चेदपि तत्रत्याः सोऽयमित्यङ्गुल्या तं निर्दिश्य तदीयं अकीर्ति-हेतुभूतं कुकर्म स्वैरं आविष्कुर्वन्ति ॥ तथा तत्रतत्र त्वदीयदोषमाविष्कुर्वन्तः कथा-

१. १. ३५. २. १. ४६. ३. न तु स्वतः पापिष्ठतमस्य दुर्योधनादेः इति केचित् ॥

प्रसङ्गेषु स्वैरं संलपिष्यन्त्यपि[1] ॥ भूतानीति सामान्यशब्दप्रयोगेण उत्तमाः संलपन्ति चेत् संलपन्तु नाम ॥ न तेन हानिः ॥ अधमा असमर्था अपि स्वैरं त्वां प्रतिसंलपेयुः॥ तत् परमां व्यथामापादयेत् ॥ अतो वदामि अपि भूतानि कथयिष्यन्ति ते अव्यया मिति ॥ इति सूच्यते ॥ अस्तु नाम तादृशी दुष्कीर्तिः का हानिः इति चेत् संभावितस्य पुंसः अकीर्तिस्तु मरणात् अतिरिच्यते विशिष्यते ॥ मरणदुःखादप्यधिकदुःखप्रदा भवति ॥ मरणदुःखं क्षणिकं अकीर्तिदुःखं तु यावद्देहभावि ॥ युद्धे स्वजनवधाद-कीर्तिः युद्धान्निवृत्तौ स्वधर्मत्यागादकीर्तिः स्यात् चैवं युद्धान्निवृत्तिः केवलमकीर्ति-करीत्युच्यते तत्कथं इति चेत् युद्धस्य विहितत्वेन धर्मत्वात्तत्र स्वजनवधाद-कीर्तिर्न भवति ॥ न हि स्वधर्ममनुतिष्ठतोऽकीर्तिस्संभवति ॥ युद्धे शरीरनाश संभवेन शरीररक्षणार्थं अकीर्तिः सोढव्या न त्वकीर्तेः परिहाराय युद्धं कर्तव्यम् ॥ जयानिश्चयेन शरीरनाशसंभवात् युद्धवर्जन[2] वचनसद्भावाच्च इति चेत् अकी-र्तिर्नरकदुःखहेतुः मरणं तु न तथा ॥ अकीर्तिदूषितः प्रेत्य परलोकं गतस्तया ऽनरकेषु पात्यते ॥ अतो न मरणपरिहारार्थाकीर्तिः सोढव्या ॥ युद्धवर्जनवचनं तु अर्थशास्त्रत्वा[3] न निवर्तेत सङ्ग्रामा दि त्यादिधर्मशास्त्रेण बाध्यते ॥ मरणभीर्व-शक्तविषयं वा ॥ मरणादतिरिच्यते इत्यनेन मरणादकीर्तिर्वरं इत्युच्यत इति कुतो न स्यात् ॥ आधिक्यं तु गुणेन अगुणेन वा संभवति ॥ अतः कथं निर्णय इति चेत् अकीर्तियुद्धमरणयोः नरकस्वर्गहेतुत्वविशेषात् प्रकरणाच्च उक्त-विधया निर्णयो युक्तः ॥ 'जीवन् भद्राणि पश्यति' ॥ 'एति जीवितमानन्दो नरं वर्षशतादपि ॥' 'त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्येजत् ॥ ग्रामं जनप-दस्यार्थे आत्मार्थे पृथिवीं त्यजेत्' ॥ इत्यादीनि जीवनावश्यंभाववचनान्यपि युद्धवर्जनवचनवन्नेयानि ॥ अतोऽकीर्तेः परिहाराय युद्धं कर्तव्यमेव ॥ ३४ ॥

---

१. चापि अपि च ॥ भूतान्यपि कथयिष्यन्ति च ॥ इत्यपि चापिशब्दौ योजयन्ति ॥ चापीति निपातसमुदायः समुच्चये इति वा ॥ २. 'साम्ना दानेन भेदेन समस्तैरुत वा पृथक् ॥ विजेतुं प्रयतेतारीन् न युध्येत कदाचन ॥ अनित्यो विजयो यस्मात् दृश्यते युध्यमानयोः ॥ पराजयश्च सङ्ग्रामे तस्मादयुद्धं विवर्जयेत् ॥ त्रयाणामप्युपायानां पूर्वोक्तानामसम्भवे ॥ तथा युध्येत सम्पन्नो विजयेत रिपून् यथा ॥' इति भारते शान्तिपर्ववचनान्यनुसन्धेयानि ॥ ३. "कीर्तिं स्वर्गफलामाहुः आसंसारं विपश्चितः ॥ अकीर्तिं तु निरालोकनरकोद्देशदूतिकाम् ॥ अकीर्तिर्यस्य गीयेत लोके भूतस्य कस्यचित् ॥ पतत्येवाधमान लोकान् यावच्छब्दस्स कीर्त्यते ॥" इत्यादि वचनमनुसन्धेयम् ॥

अर्जुनः ॥ अकीर्तिर्मरणादतिरिच्यत इति त्वदुक्तं सत्यम् ॥ यदि सा स्यात् न च सा जायेत ॥ सत्यपि शौर्ये बन्धुस्नेहात्कारुण्याच्च युद्धान्निवृत्ते मयि दुष्कीर्तिवादस्यानवकाशात् ॥ प्रत्युत दयालुत्वान्निवृत्तोऽयं युद्धादिति महती कीर्तिरेव स्यात् ॥ मूढा मौढ्यान्निन्दन्ति चेत् निन्दन्तु ॥ ज्ञातमदीयपराक्रमा भीष्मादयस्तु मां स्तुवीरन्नेव वद ॥

कृष्णः ॥ भयाद्रणादुपरतं मंस्यन्ते त्वां महारथाः ॥
येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवम् ॥ ३५ ॥

भयादिति ॥ येषां त्वं बहुमतः भूत्वा आसीः महारथाः त एव त्वां रणात् युद्धात् भयात् उपरतं मंस्यन्ते ज्ञास्यन्ति ॥ तेन लघोः भावः लाघवं तत् यास्यसि प्राप्स्यसि ॥ ३५ ॥

येषां त्वं पूर्वं बहुमतोऽभूः [१] बहुमानविषयस्सन्नासीः ते [२] भीष्मद्रोणकर्णादयो महारथा एव त्वां रणात् भयादुपरतं मंस्यन्ते ॥ युद्धादुपरतो भूत्वा लाघवं अल्पतां अल्पोऽयं गृह्णीत प्रहरत संहरत चैनं इत्यवमतिविषयतां प्राप्स्यसि ॥ महारथाः त्वां रणात् भयादुपरतं मंस्यन्ते ॥ येषां त्वं बहुमत आसीः तेषामेव पुरतो लाघवं यास्यसि इति वा ॥ अकीर्तिः पारोक्षिको लघूक्तिरापरोक्षिको इति भेदः ॥ इदानीं युद्धादुपरमे एवमेव मन्येरन् ॥ यदि युद्धोद्यमात्पूर्वमेव ईदृशी बुद्धिस्तवाऽगता स्यात् तदा त्वदुक्तरीत्या मन्येरन् ॥ अतः असह्या दुष्कीर्तिः स्यादेव ॥ तत्परिहाराय युद्धं कर्तव्यमेव ॥ ३५ ॥

अर्जुनः ॥ भीष्मादयो रणात् भयात् उपरतं मत्वा निन्देयुरित्युक्तम् ॥ निन्दन्ति चेत् निन्दन्तु नाम ॥ सह्यैव तैः कृतमहोपकारैः क्रियमाणा निन्दा ॥ हितानुध्यानपूर्वकत्वात् ॥ सहन्ते हि भर्त्रा पित्रा गुरुणा स्वामिना च भृशमाकुष्टाः निन्दिताः प्रहृताश्च भार्यापुत्रच्छात्रभृत्याः तमाक्रोशं तां च निन्दां तं च प्रहारं लोके ॥ अतस्तत्परिहाराय युद्धं कर्तव्यमिति न युक्तम् वद ॥

१. बहुभिः शौर्यादिभिर्गुणैर्युक्त इति मतः ज्ञातः इति वा ॥ २. भीष्मादीनां तत्त्ववित्त्वेन तथा मननासम्भवात् कर्णादीनां ग्रहणम् ॥

कृष्णः ॥ अवाच्यवादांश्च बहून् वदिष्यन्ति तवाहिताः ॥
निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम् ॥ ३६ ॥

अवाच्येति ॥ न हिताः अहिताः शत्रवः तव समर्थस्य भावः सामर्थ्यं निन्दन्तः सन्तः तव विषये बहून् वक्तुं अर्हाः वाच्याः न वाच्याः अवाच्याः ते च ते वादाश्च अवाच्यवादाः तान् वदिष्यन्ति च ॥ ततः दुःखतरं अधिकदुःखं किन्नु ॥ ३६ ॥

संग्रामं न करिष्यसि चेत् दुर्योधनादयः अहिताः शत्रवश्च तव सामर्थ्यं निवातकवचादियुद्धे महादेवयुद्धे उत्तरगोग्रहणयुद्धे च प्रसिद्धं निन्दन्तः देवैर्दत्तस्य देवदत्तस्य शङ्खस्य महिम्ना निवातकवचादियुद्धे अस्य जयः ॥ युद्धकौशलमस्य दयितायै प्रदर्शयितुं किरातरूपो भगवान् पिनाकपाणिः लीलायुद्धमकृत ॥ तेन तस्मिन् युद्धे अस्य प्रसिद्धिः ॥ उत्तरगोग्रहणे अज्ञातवासःसावशेषः गन्तव्यं भूयोऽपि पाण्डवैस्त्रयोदशवर्षाणि इति प्रख्यापयितुं युद्धाभिनयः कृतः ॥ अतस्तस्मिन् युद्धे अस्य जयः ॥ इति हेत्वन्तरारोपेण दूषयन्तः तव विषये बहूनि अवाच्यानि निन्दावचनानि वदिष्यन्ति ॥ तस्मात् [१] दुःखतरं किन्नु ॥ निन्दन्तः स्तवसामर्थ्यं इति छेदः ॥ स्तुतियोग्यत्वं निन्दन्तः इत्यर्थः ॥ अवाच्यवचनानि तव विषये वदिष्यन्तीति वा ॥ अहिता इत्यनेन यदि भीष्मद्रोणकृपशल्यादयो वदेयुः तर्हि तद्गौरवात्सोढुं शक्यं पराक्रमहीनैः आततायिभिः उक्तानवाच्यवादान् कथं सहेथाः इति सूच्यते ॥ तवेत्यनेन हीनस्य समाधिस्थस्य च अवाच्यवादश्रवणं न दुःखाय तद्व तु दुःखप्रदं इति सूच्यते ॥ परोक्षदूषणं दुःखं अपरोक्षदूषणं दुःखतरम् । न ततोऽधिकं किमपि ॥ अतस्तत्परिहाराय युद्धं कर्तव्यम् ॥ अवाच्यवादश्रवणदुःखमपि सहिष्ये नाहं योत्स्ये इति चेन्न मैवं ब्रूहि ॥ त्वमिदानीं युद्धाभिवृत्तोऽपि गाण्डीवसामर्थ्यादेः प्रत्यक्षदूषणश्रवणजनितदुःखं असहमानः स्वयमेव युद्धं करिष्यसि ॥ तदा नायं स्वधर्मबुध्या युद्धे प्रावर्तिष्ट ॥ किंतु दुर्योधनादिभिः दूषणवचनैः युद्धे प्रवर्तितः धिक् पार्थस्य धार्मिकतां इति त्वां प्रति, उपदिश्य

१. गुणशब्दादेव तरप् ॥ न जात्यादिशब्दात् ॥ न हि घटतरं पटतरमित्यादिप्रयोगो दृश्यते ॥ इति चेत् दुःखशब्दः सादृश्यात्प्रतिकूलवाचकः ॥ दृश्यते च प्रतिकूलतरमित्यादिप्रयोगः ॥

युद्धे प्रवर्तयितुं प्रवृत्तोऽपि नायं तथा कर्तुमशक्नोत् ॥ धिक् कृष्णस्योपदेशचातुरीं इति मां प्रति च स्वैरं संलपेयुः ॥ अतो मद्वचनात् धर्मबुद्ध्या स्वयमेव युद्धे प्रवर्तस्व ॥ किमहं गाण्डीवसामर्थ्यादेः प्रत्यक्षदूषणं न सहेय इति चेत् गाण्डीवसामर्थ्यादिदूषणे सर्वेभ्यः पूज्येभ्यः पूज्यतमं पितृसमं १ युधिष्ठिरमपि हन्तुं त्वमुद्युञ्जीथाः किंपुनः कर्णदुर्योधनादीन् ॥ अस्तुनामेदं मनसि तादृशे समये त्वामहं स्मारयिष्यामि ॥

अहिताः निन्दन्तु नाम हितास्तु पापभीरुरयं धर्मबुद्ध्या युद्धान्निवृत्त इति स्तुवीरन् ॥ तच्च सुखाय भवति इति चेत् तव आहिताः इति छेदः ॥ तव आः हिताः इति छेदः ॥ संग्रामं न करिष्यसि चेत् तव अत्यन्तं हिताः तव सामर्थ्यं सत्यपि सामर्थ्ये निवृत्तोऽयं युद्धात् धिगस्य सामर्थ्यमिति निन्दन्तः अवाच्यवादान् वदिष्यन्ति । तदतीव दुःखं आः महती पीडा खलु ॥ आ इति कोपसूचको वा ॥ अतस्तत्परिहाराय युद्धं कर्तव्यम् ॥ ३६ ॥

अर्जुनः ॥ करणे ऐहिकामुष्मिकसुखप्राप्तिसद्भावात् अकरणे ऐहिकामुष्मिकमहानर्थप्राप्तिसद्भावाच्च कर्तव्यमेव युद्धमिति महता प्रबन्धेनाभिहितं त्वया ॥ नेदं मोहावेशपरवशस्य मम बुद्धिमारोहति ॥ प्रत्युत विपरीतमेव भासते ॥ अलमदृष्टपारत्रिकसुखसद्भावासद्भावविचारेण ॥ ऐहिकसुखानुभवाय करणीयमेव युद्धमित्युक्तं मया इति चेत् जयानिश्चयात् सत्यपि जयनिश्चये तस्य पराजयादप्यधिकदुःखप्रदत्वात् न युद्धमैहिकसुखार्थं करणीयमिति २'न चैतद्विद्मः'३'हत्वार्थकामांस्तु गुरूनिहैव भुञ्जीय भोगान् रुधिरप्रदिग्धान्'४ ॥ 'यानेव हत्वा न जिजीविषाम' इत्यादिभिरभिहितमेव मया ॥ ५ 'स्वर्गद्वारमपावृतमिति' पारत्रिकसुखानुभवार्थं युद्धं करणीयमित्युक्तमिति चेत् युद्धे मृतस्यैव स्वर्गः ॥ पराजितस्यैव मृतिः ॥ न च पराजयनिश्चयः ॥ 'न चैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि

१. युधिष्ठिरस्य गाण्डीवादिनिन्दावचनम् पुनरर्जुनस्य युधिष्ठिरवधोद्योगश्च कर्णपर्वणि ॥ ४ 'धिग्गाण्डिवं धिक् च ते बाहुवीर्यं असङ्ख्येयान् बाणगणांश्च धिक् ते ॥ धिक् ते केतुं केसरिणः सुतस्य कृशानुदत्तं च रथं च धिक् ते ॥ युधिष्ठिरेणैव मुक्तः किरीटी श्वेतवाहनः ॥ असिं जग्राह संक्रुद्धो जिघांसुर्भरतर्षभ' ॥ इति ॥ (६९. ७०.) ॥ २. २. ६. ॥ ३. २. ५. ॥ ४. २. ६. ॥ ५. २. ३२. ॥

वा नो जयेयुः॥' इति पराजयनिश्चयाभावोऽपि मयोक्तः ॥ अतः ऐहिकसुखार्थं पारत्रिकसुखार्थं वा न युद्धं करणीयं इति भाति ॥ वद ॥

कृष्णः ॥ हतो वा [1]प्राप्स्यसे स्वर्गं जित्वा वा भोक्ष्यसे महीम् ॥
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः ॥ ३७ ॥

हत इति ॥ हे कौन्तेय अर्जुन त्वं हतः सन् स्वर्गं वा प्राप्स्यसे ॥ जित्वा महीं स्वर्गं वा च वा भोक्ष्यसे ॥ तस्मात् युद्धाय युद्धं कर्तुं कृतः निश्चयः येन सः कृतनिश्चयः सन् उत्तिष्ठ ॥ ३७ ॥

मास्तु जयनिश्चयः ॥ मा चास्तु पराजयनिश्चयः ॥ तथाऽपि युद्धं कर्तव्यमेव ॥ जयापजययोरन्यतरस्य निश्चितत्वात् ॥ जये अपजये च उक्तरीत्या महतः श्रेयसो लाभसद्भावात् ॥ कथमिति चेत् रणे शत्रून् जेष्यसि तैर्हन्यसे वा ॥ हतस्सन् स्वर्गं वा प्राप्स्यसे ॥ जित्वा महीं वा भोक्ष्यसे ॥ वाशब्दौ विकल्पार्थौ ॥ जये साम्राज्यं अपजये स्वाराज्यमित्युक्तं भवति ॥ न च तदुक्तम् ॥ जयापजययोर्मध्ये जयः उत्कृष्टः अपजयस्त्वपकृष्टः ॥ उत्कृष्टफलेन अपकृष्टफलादुत्कृष्टेन भवितव्यं ॥ न हि अपकृष्टापजयफलात् स्वाराज्यात् उत्कृष्टजयफलं भूमिराज्यं उत्कृष्टमिति वक्तुं शक्यम् ॥ किंच शत्रून् जेतुं शक्तेनापि स्वर्गं कामयमानेन शत्रून् अजित्वा तैर्हतेन भवितव्यमित्यापद्यते इति चेत् एको वाशब्दो विकल्पार्थे ॥ द्वितीयस्तु चशब्दार्थे ॥ जित्वा महीं स्वर्गं च भोक्ष्यसे इत्यर्थः॥ 'ये युध्यन्ते प्रधनेषु शूरासो ये तनुत्यजः' इति श्रुतौ अपजयस्येव जयस्यापि स्वर्गप्राप्तिहेतुत्वोक्तेः ॥ अपजये स्वर्गः जये स्वर्गो मही चेत्युभयं इति, अपजये स्वर्ग [2] प्राप्तिमात्रम् ॥ जये स्वर्गं प्राप्य तत्र विलक्षण [3] भोगानुभवोऽपि न केवलं तत्र ॥ महीं प्राप्य तत्र यावज्जीवं ऐहिकानिषिद्धसकलभोगानुभवोऽपि इति च अपकृष्टापजयफलादुत्कृष्टजयफलस्य उत्कर्षो बोध्यः ॥ जयेन महीं प्राप्य ततः स्वर्गं प्राप्नुवतः द्रव्यैकसाध्ययागदानधर्मादिसाधनानुष्ठान-

---

१. प्राप्स्यसि इति पाठान्तरम् ॥ २. अत एव तत्र प्राप्स्यसे इत्युक्तम् ॥ ३. अत एव तत्र भोक्ष्यसे इत्युक्तम् ॥

प्रजापालनरूपसाधनपौष्कल्यात् साध्यस्वर्गसुखपौष्कल्यमिति जयस्यापजयादुत्कर्षसिद्धिः ॥ प्रवर्तमानां तेषां जयस्य तद्धननमन्तरेणानुपपद्यमानतया जित्वैत्यस्य हननपर्यन्तपर्यवसायित्वेन कथं जित्वा स्वर्गं भोक्ष्यसे इत्युच्यते ॥ तद्धननस्य पापहेतुत्वेन नरकसाधनत्वात् इति चेत् युद्धस्य विहितधर्मत्वेन तत्र तद्धननस्य न पापहेतुत्वम् ॥ प्रत्युत पुण्यहेतुत्वमेव ॥ किंच आततायिनां तेषां वधे न कोऽपि दोषः ॥ आततायिवधाभ्यनुज्ञानस्य आचार्यादिविषयेऽपि प्रवृत्तिरूपपादिता हि मया 'यदृच्छया चोपपन्नं' मित्यत्र ॥ ऐहिकसुखानपेक्षायाः आमुष्मिकस्वर्गादिसुखानपेक्षायाश्च मया स्पष्टमुक्तत्वेन तथा निरपेक्षं मां प्रति 'हतश्चेत् स्वर्गं जित्वा वा भोक्ष्यसे महीं स्वर्गं च प्राप्स्यसि' इति वचनमनुचितम् ॥ विरक्तं प्रति कामिनीभोगसुखोपदेशवत् इति चेत् नाहमनपेक्षणीयानपेक्षितोपदेशकारी ॥ किंतु अपेक्षणीयं अपेक्षितं चैव मयोपदिश्यते ॥ किं स्वर्गो भूमिश्चेत्युभयं ममापेक्षितं इति चेत् स्वर्गशब्देन त्रिदिवापरपर्यायः स्वर्ग एव फलत्वेन मया नोच्यते । वक्ष्यते च तत्सुखस्य नाशशिरस्कत्वेन हेयत्वं मया १ 'क्षीणे पुण्ये मर्त्यलोकं विशन्ती' ति ॥ किंतु मोक्षसुखमपि ॥ 'यत्र दुःखेन संभिन्नं न च ग्रस्तमनन्तरम् ॥ अभिलाषोपनीतं च सुखं स्वर्गपदास्पदम् ॥' इति स्मरन्ति ॥ वैकुण्ठादिलोकोऽपीति वा ॥ स्वतन्त्रेण रमणात्मकेन च भगवतार्धिष्ठितत्वात् वैकुण्ठादिलोकः २स्वर्गः ॥ युद्धे जयेन भूमिराज्यं प्राप्य तत्र यागदानधर्मप्रजापालनादीन् वक्ष्यमाणनिवृत्तिकर्मतया कुर्वतस्ते अपेक्षणीयस्य त्वदपेक्षितस्य मोक्षसुखस्य प्राप्तिरपि भविष्यति इत्युक्तम् ॥ न त्वैहिकसुखं स्वर्गसुखं च भविष्यतीत्येव मयोक्तम् ॥ यद्येवं तर्हि उभयं कुत उच्यते मोक्ष इत्येवोच्यतां इति चेत् अस्य वचनस्य 'स्वर्गकामो यजेत' इत्यादिश्रुत्यनुसारित्वात् तत्र स्वर्गपदेन उभयोरपि प्रतिपादनात् अत्राप्युभयोः प्रतिपादनं ॥ श्रुतावेव पृच्छामि किमुभयप्रतिपादकं स्वर्गपदं प्रयुज्य उभयोः प्रतिपादनेन एकमेव एकवाचकपदं प्रयुज्य प्रतिपाद्यतां इति इति चेत् न केवलं त्वादृशान् विरक्तान् मुमुक्षून् प्रत्येव श्रुत्या गीतया चोपदेशः क्रियते ॥

१. ९. २१. ॥ २. अत एव 'सत्रं स्वर्गाय लोकाय सहस्रसममासत' ॥ (भाग. १. १.) इत्यादिकं संगच्छते ॥ कथमन्यथा शौनकादयः ऐहिकं सुखं स्वर्गसुखं च तृणाय मन्यमानाः नश्वरस्वर्गाय सहस्रवार्षिकं सत्रमासीरन् ॥ व्याख्यातं च तत्र व्याख्यातृभिरेवम् ॥

किन्तु विरक्तान् मुमुक्षून् अविरक्तान् विषयिणश्च प्रति ॥ तत्र अविरक्तान् विषयिणः अमुमुक्षून् नास्तिकान् प्रति तदनुभूयमानसुखापेक्षया अतिशयितस्य तज्जातीयस्य स्वर्गसुखस्य प्रतिपादनेन तानास्तिकीकृत्य प्रवृत्तिकर्मणि प्रवर्तयितुं विरक्तान् मुमुक्षून् आस्तिकान् प्रति सर्वसुखविलक्षणमोक्षसुखप्रतिपादनेन तत्साधननिवृत्तिकर्मणि प्रवर्तयितुं च उपदेशः कार्यः ॥ अतः उभयवाचकं पदं प्रयुज्य अधिकारिभेदेनोपदेशः क्रियते ॥ अतस्त्वं युद्धे जये पराजये वा मोक्षसुखं भोक्ष्यसे[1] इत्येव मयोक्तमिति गृहाण ॥ जये तस्मिन्नेव जन्मनि मोक्षसाधनानुष्ठानम् ॥ पराजये तु जन्मान्तरे इत्यादिकमूह्यम् ॥ तुल्यन्यायेन भीष्मादीनामप्येवमेव उभयथाऽपि श्रेयोलाभसंभवात् त्वया स्वार्थं परार्थं च युद्धं कर्तव्यं इत्युक्तं भवति ॥ तस्मात् उभयथाऽपि श्रेयोलाभहेतुत्वात् त्वं जयपराजयतत्फलसन्देहेऽपि जये पराजयेऽपि फलनैयत्येन युद्धं कर्तव्यमेवेति जेष्यामि शत्रून् मरिष्यामि वा इति च मनसि निश्चयं कृत्वा युद्धसन्नद्धो भव ॥ विशुद्धक्षेत्रे महापुरुषादुद्भूतस्य तव इदमेव युक्तम् ॥ ३७ ॥

अर्जुनः ॥ उक्तास्त्वया बह्व्यो युक्तयः तथाऽपि न ताः मम बुद्धौ प्रतिष्ठां लभन्ते ॥ मोहावेशपरवशत्वात् ॥ अतः त्वं एवं युध्यस्व एवमनुष्ठितेन युद्धेन पापं नावाप्स्यसीति मुखतो विस्पष्टं ब्रूहि ॥ अन्यथा पापभीरुरहं कथं गुरुभिर्युद्धमभ्युपगच्छेयम् ॥ वद ॥ उक्तं हि मया ॥ २ 'कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसंमूढचेताः ॥' इति ॥ किंच युद्धं मुमुक्षोर्मोक्षसाधनं इत्युक्तम् ॥ येन प्रकारेण कृतं चेन्मोक्षाय भवति तमपि प्रकारं ब्रूहि ॥

कृष्णः ॥ सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ।
ततो युद्धाय युज्यस्व नैव पापमवाप्स्यसि ॥ ३८ ॥

सुखेति ॥ सुखं च दुःखं च सुखदुःखे समे कृत्वा लाभश्च न लाभः अलाभः अलाभश्च लाभालाभौ जयश्च न जयः अजयः अजयश्च जयाजयौ तौ च समौ कृत्वा ततः युद्धाय युद्धं कर्तुं युज्यस्व प्रयतस्व ॥ ततः तादृशात् युद्धात् पापं नैव अवाप्स्यसि ॥ एवमिति पाठे एवं कृतेन युद्धेन पापं नावाप्स्यसि ॥ ३८ ॥

१. ऐहिकसुखस्वर्गसुखयोः प्राप्तिरानुषङ्गिकी ॥ निवृत्तिकर्मण्यपि आनुषङ्गिकं फलमस्त्येवेति स्पष्टमुपपादयिष्यते ॥ २. २. ७. ॥

जयापजयौ समौ कृत्वा तत्फलभूतौ लाभालाभौ समौ कृत्वा तत्फलभूते सुखदुःखे समे कृत्वा अनुपादेयतया दुःखतद्धेत्वलाभतद्धेत्वपजयैः सुखतद्धेतुलाभतद्धेतुजयान् समान्मत्वा सुखादिषु रागं दुःखादिषु द्वेषं चाकृत्वा तत्कृतहर्षशोकरहितोऽपि भूत्वा स्वधर्मत्वात् भगवत्पूजारूपं च मत्वा, १ 'समदुःखसुखं धीरं' इत्यत्रोक्तरीत्या वैषयिकसुखमेवात्र ग्राह्यम् ॥ तत्र दुःखस्यैव जयादीनां प्रथममुपादानात् तत्र दुःखसमं सुखं मत्वा इत्यर्थवत् अत्र जयादिसमान् अपजयादीन्मत्वा जयादिवदजयादीनपि उपादेयान्मत्वा इत्यर्थः स्यात् इति चेत् भोगैकनाश्यप्रारब्धकर्मफलानुभवरूपत्वेन प्रतिकलं भगवत्स्मरणहेतुत्वेन च २ अपजयादीनामप्युपादेयतासूचनार्थं तस्याप्यर्थस्य विवक्षितत्वादेवमुक्तम् ॥ कथं जयापजयादीनां समीकरणं कर्तुं शक्यं इति चेत् जयापजयादीनां भगवदधीनतामनुसन्दधानेन समीकरणं कर्तुं शक्यम् ॥ कथमिदं लभ्यते इति चेत् समे मा लक्ष्मीः तया सहितः समः लक्ष्मीपतिर्हरिः तस्मिन् कृत्वा समं ब्रह्म वक्ष्यते च ॥ ३ 'निर्दोषं हि समं ब्रह्मे'ति ॥ तस्मिन् समे ब्रह्मणि कृत्वा इति वा ॥ जयापजयादीनां भगवदधीनतां मत्वा विहितमनुष्ठीयमानं कर्म तत्राधाय इत्यर्थविवक्षणादिदं लभ्यते ॥ एतदर्थविवक्षा कथं ज्ञायते इति चेत् समत्वेन विशेषितानि त्रीणि द्वंद्वानि ॥ तत्र द्वे पुल्लिङ्गनिर्दिष्टे एकं नपुंसकलिंगनिर्दिष्टं ॥ एकस्यापेक्षणात् द्वयोरपेक्षणस्य न्याय्यत्वात् पुल्लिंगनिर्दिष्टद्विकानुरोधेन समशब्दे पुल्लिंगनिर्देशेन समौ इति वक्तव्यम् ॥ तथाऽनुक्त्वा एकस्यानुरोधेन समे इत्युक्तम् ॥ तेन ज्ञायते समे इत्यस्य समभ्यंततामाश्रित्य इदमर्थान्तरं विवक्षितमिति ॥ ततः विवेकेन जयापजयादीनां समीकरणानंतरं युद्धं कर्तुं युज्यस्व प्रयतस्व ॥ ४ एवं सति एवं युद्धकरणे पापं पापफलं दुःखं च नावाप्स्यसि ॥ ५ नावाप्स्यस्येव ॥ युद्धस्य विहितधर्मत्वेन विहितधर्मानुष्ठानस्य पापाहेतुत्वेन प्रत्युत पुण्यहेतुत्वेन च पापं तेन च दुःखं नावाप्स्यसि ॥ किन्तु पुण्यं तेन च सुखमेव अवाप्स्यसि ॥ युद्धाय युज्यस्व ततः युद्धादिति वा ॥ ततः सव्यसाची धनंजयः इति प्रसिद्धस्त्वं युद्धाय युज्यस्व इति वा ॥ ना एव इति च्छेदः ॥ ततः समीकरणसंपादनानन्तरं ना पुमान् सन्

१. २. १५. २. 'विपदः संतु नश्शश्वत् तत्रतत्र जगत्पते ॥ भवतो दर्शनं यत्स्यादपुनर्भवदर्शनम् ॥' इति भागवते १ स्कं. ८ अध्याये ॥ अन्यत्र च ॥ 'यस्यानुग्रहमिच्छामि तस्य वित्तं हराम्यहम् ॥' इति ॥ ३. ५. १९. ॥ ४. एवमिति पाठे ॥ ५. एवेति पाठे ॥

पुंधर्मं धैर्यमाश्रितः सन् युद्धाय युज्यस्व ॥ ततः अकामनया युद्धकरणात् पातीति पः न विद्यते पः यस्य सः अपः पश्चासौ अपश्च पापः स्वयमीश्वरः ईश्वरान्तररहितः भगवान् तं पापं अवाप्स्यस्येव ॥ पातीतिपा सर्वजगन्माता लक्ष्मीः तां पातीति पापः लक्ष्मीपतिर्हरिः तं अवाप्स्यस्येव ॥ इति वा ॥ वक्ष्यते च ॥ १'युध्य च ॥ 'मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयः ॥' इति ॥ २'मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः ॥ निर्वैरः सर्वभूतेषु यस्स मामेति पाण्डव' ॥ इति च ॥ अथाप्यकरणे किं स्यादिति चेत् अयुद्धं युद्धाभावः तस्मै युद्धमकर्तुं न युज्यस्व ॥ ततः युद्धाकरणात् पापं आप्स्यस्येव ॥ मुमुक्षुणा त्वया अकामनया भगवत्सेवारूपमिदमिति युद्धमनुष्ठेयम् ॥ तथाऽनुष्ठितेन तेन ज्ञानद्वारा मोक्षमाप्नुयाः ॥ पापभीरुरहं कथं गुरुभिर्युध्येय इति चेत् गुरुभिर्युद्धे पापमवश्यं स्यादिति हि शङ्क्यते ॥ तत्र किं प्रमाणम् ॥ न तावत्प्रत्यक्षादिकम् ॥ अतीन्द्रियत्वात् ॥ अपितु धर्मशास्त्रवचनं प्रमाणमिति वाच्यम् ॥ तस्याप्यवश्यादरणीयत्वे अनुल्लङ्घनीयत्वे च को हेतुः इति चेत् भगवदाज्ञारूपत्वमेव हेतुरिति वाच्यम् ॥ यस्याज्ञारूपं धर्मशास्त्रमिति तदुल्लङ्घनाद्बिभेषि स एव ह्यहं गुरुभिर्युद्धं कुर्विति स्वयं ब्रवीमि ॥ परोक्षवचनोल्लङ्घनाद्बिभ्यत् त्वं न कुतोऽपरोक्षवचनोल्लङ्घनाद्बिभेषि॥ धर्मशास्त्रवचनस्येव अस्यापि मद्वचनस्य अनुष्ठाने पापं नावाप्स्यसि ॥ प्रत्युत तस्येव अस्याप्युल्लङ्घन एव पापमवाप्स्यसि ॥ परोक्षापरोक्षवचनयोर्विरोधात् कथं निर्णय इति चेत् परोक्षवचनं सामान्यविषयम् अपरोक्षवचनन्तु विशेषविषयं अतः अपरोक्षवचनविषयभिन्नविषय एव परोक्षवचनस्य प्रवृत्तिः ॥ अतः सामान्यविशेषभावेन निर्णयः ॥ परोक्षवचनापेक्षया प्रत्यक्षवचनस्य प्राबल्यानुभवेन तदुल्लङ्घनएव प्रभोः कोपोदयदर्शनानुभवेन च मदीयपरोक्षवचनरूपश्रुतिस्मृतीतिहासधर्मशास्त्राद्यपेक्षया मदीयापरोक्षवचनस्यैव प्राबल्यात् तदनुरोधेन त्वया युद्धं कर्तव्यमेव ॥

३'हतो वा प्राप्स्यसे स्वर्गं' इति युद्धस्य स्वर्गार्थं कर्तव्यतोक्त्या काम्यत्वमापद्यते ॥ तेन च नित्यत्वं व्याहन्यते ॥ तेन चाकरणे पापहेतुत्वं विहन्यते ॥ ४'जित्वा वा भोक्ष्यसे महीं' इति राज्यार्थं कर्तव्यतोक्त्या दृष्टप्रयोजनापेक्षत्वादर्थशास्त्रत्वमापद्यते ॥ तेन च धर्मशास्त्रविहितधर्मत्वं विहन्यते ॥ अकरणे पा-

१. ८. ७. ॥ २. ११. ५५. ॥ ३. २. ३७. ॥ ४. २. ३७.

पहेतुत्वस्य धर्मशास्त्रविहितधर्मत्वस्य चाभावात् ॥ १'अथचे'दित्यत्र स्वधर्मं हित्वा पापमवाप्स्यसीत्युक्तमयुक्तमिति चेत् एवं युद्धं कुर्वन् पापं न प्राप्स्यसि ॥ कामनया करणे गुर्वादिहननमूलकं पापं अकरणे नित्यकर्मानुष्ठानमूलकं च पापं स्यात् ॥ अकामनया करणे तु तदुभयमपि न ॥ अतोऽकामनया युद्धं कुरु ॥ अकामनया युद्धकरणस्यैव मदभिप्रेतत्वात् ना'थचे'तिश्लोकोक्तार्थविरोधः ॥ नहि हतो वेति कुतः प्रयोजनं प्रदर्शितमिति चेत् न स्वर्गादिरूपकाम्यकर्मप्रयोजनं प्रदर्शितम् ॥ किंतु निवृत्तिधर्मज्ञानमोक्षरूपाकाम्यकर्मप्रयोजनमेव प्रदर्शितम् ॥ काम्यकर्मप्रयोजनप्रदर्शनार्थं स्वर्गपदप्रयोग इत्युक्तं हि त्वयेति चेत् विषयिणामाकर्षणाय निवृत्तिकर्मणामानुषङ्गिकफलप्रदर्शनाय च तथोक्तमिति न कोऽपि विरोधः ॥ पापं नावाप्स्यसीत्युच्यते ॥ पापशब्देन किं गुर्वादिहननसंभावितपापं गृह्यते ॥ उत कृतं पापम् ॥ आहोस्वित् करिष्यमाणम् ॥ नाद्यः ॥ युद्धस्य अधर्मत्वेऽपि स्वधर्मत्वेन कर्तव्यतोक्तया उक्तप्रायत्वात् ॥ न द्वितीयः ॥ नावाप्स्यसीति भविष्यदर्थकप्रयोगानुपपत्तेः ॥ न च तृतीयः ॥ करिष्यमाणे प्रायश्चित्तायोगात् ॥ प्रायश्चित्तं हि सुखदुःखादिसमीकरणम् ॥ करिष्यमाणपापनामश्लेषे तात्पर्यमिति चेत् ब्रह्मज्ञानव्यतिरिक्तस्य कस्यापि न तादृशी शक्तिः ॥ अतः कथमिदमिति चेत् एवं स्वकर्म कुर्वाणः पापं मुमुक्षोरनिष्टत्वाविशेषेण मोक्षप्रतिबन्धकपापशब्दितपुण्यपापरूपसकलसांसारिककर्मफलभूतं संसारबन्धं नावाप्स्यसीत्यर्थः ॥ न केवलं संसारानवाप्तिमात्रं किन्तु २'सोमृतत्वाय कल्पत' इत्युक्तरीत्या संसारबन्धान्मोक्षावाप्तिरपि भविष्यति ॥ अतः सर्वथा युद्धं कर्तव्यमेवेत्यलम् ॥ ३८ ॥

अर्जुनः ॥ ३'स्वधर्ममपि चावेक्ष्ये'त्यादिना 'नैवं पापमवाप्स्यसी'त्यन्तेन यत्त्वयाऽभिहितं तदखिलं श्रुतवतो मम युद्धं कर्तव्यमित्येव भाति ॥ अथापि मदीया इमे भीष्मद्रोणादयो युद्धे नियतं मरिष्यन्तीति शोकमोहावेशपरवशस्य मे न युद्धे प्रवृत्तिरुदेति ॥ आत्मा नित्यः देहस्तु सर्वथा नश्वरः देहनाशेऽपि देहान्तरप्राप्तिर्नियता ॥ अभिमानत्यागेन शोकपरिहारः कर्तुं शक्यः ॥ युद्धं तु स्वधर्मः अतः जये पराजये च श्रेयःप्रदं अकामनया रागद्वेषादिराहित्येन भगवत्प्रीत्यर्थं तस्य करणे न पापप्राप्तिर्भवति ॥ किन्तु ज्ञानद्वारा मोक्षप्राप्तिर्भवति ॥ इत्यादिकं तत्त्वजातं मया-

१. २. ३३. ॥ २. २. १५. ॥ ३. २. ३१.

सम्यगभिहितं श्रुतवतस्ते कुतश्चित् शोको मोहो वा इति चेत् पापरूपज्ञानप्रतिबन्धकान् न त्वदुपदेशो मम बुद्धिमध्यारोहति ॥ उपायेन बुद्धिं मम शुद्धां कृत्वा तां बुद्धिमध्यारोहय ॥

कृष्णः ॥ एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु ।
बुध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि ॥ ३९ ॥

एषेति ॥ हे पार्थ ते तुभ्यं साङ्ख्ये ज्ञानविषये एषा बुध्यतेऽनयेति बुद्धिः वाक् ज्ञानं वा अभिहिता उक्ता ॥ योगे तु इमां वक्ष्यमाणां बुद्धिं शृणु ॥ यया बुद्धया युक्तः सन् कर्मणो बन्धो वा कर्मबन्धः तं प्र निश्शेषं हास्यसि वक्ष्यसि ॥ ३९ ॥

हे पार्थ सांख्ये एषा बुद्धिस्तुभ्यमभिहिता ॥ योगे तु इमां बुद्धिं शृणु ॥ ख्यातिः ज्ञानं समीचीना ख्यातिः संख्या ॥ शुद्धात्मतत्त्वविज्ञानं सांख्यमित्यभिधीयते ॥ इत्युक्तं तत्त्वज्ञानं तस्मिन् विषये तद्विषयभूतजीवेश्वरतत्त्वविषये तत्प्रतिपादशास्त्रमिति यावत् ॥ ज्ञाने विषये तदुत्पादनार्थमिति यावत् ॥ इति वा ॥ एषा न त्वेवाहमित्यादिरूपा बुध्यते ज्ञायतेऽर्थोऽनयेति बुद्धिः वाक् तुभ्यं उक्ता मया सा न तव अशुद्धां बुद्धिमध्यारुक्षतः यदि ते बुद्धिर्विशोध्येत तर्हि शुद्धां तां बुद्धिमध्यारोहेत् ॥ केन पुनर्विशोध्या सा इति चेत् उपायेन ॥ स उपायः कः इति चेत् योगशब्दिते ज्ञानोपाये विषये वाच्यमभिधास्यामि शृण्विमां वक्ष्यमाणां तं त्वं मे युक्ततमो मतः ॥ इत्यन्तम् ॥ शृण्वन्तं त्वां प्रति पुनः शृण्वित्युक्त्वा सम्यक् श्रुत्वा तत्र निष्ठावान् भवेति सूच्यते ॥ तुशब्दः प्रकरणान्तरसूचकः ॥ कर्मयोगस्य अवश्यानुष्ठेयत्वरूपविशेषसूचको वा ॥ कर्मयोगादिकमुपाय इत्युक्तं भवति ॥ किं भक्तिश्रद्धापूर्वकं श्रुत्वा तत्र निष्ठा कर्तव्या ॥ किं तादृशी सा वाक् इति चेत् यया कर्मयोगध्यानयोगविषयया वाचा जनितया युक्तः कर्मयोगध्यानयोगवान् सन् कर्मबन्धं प्रहास्यसि ॥ यया वक्ष्यमाणया वाचा जनितया बुद्धया कर्मयोगध्यानयोगविषयकज्ञानेन योगवान् सन् तेन अन्तःकरणशुद्धिद्वारा श्रवणमननिदिध्यासनापरोक्षज्ञान-

द्वारा कर्मबन्धं तन्मूलकं संसारं निश्शेषं त्यक्ष्यसि ॥ मुक्तो भविष्यसि ॥ इति वा ॥ यया वाचा कर्मानुष्ठानद्वारा जनितया बुद्धया तत्त्वज्ञानेन युक्तः कर्मबन्धं प्रहास्यसि इति वा ॥ यया बुद्धया युक्तस्सन यया बुद्धया युक्तस्सन् यया बुद्धया युक्तस्सन् इति त्रिरावृत्त्याऽन्वयः ॥ यया वक्ष्यमाणया कर्मयोगादिविषयया वाचा जनितया बुद्धया कर्मयोगादिज्ञानेन युक्तः कर्मयोगादिमान् सन् यया उक्तया वाचा जीवात्मपरमात्मतत्त्वविषयया जनितया बुद्धया तत्त्वज्ञानेन युक्तः सहितः सन् कर्मबन्धं प्रहास्यसि सा एका उक्ता अन्यामिमां शृणु इति वा ॥ वागित्यनुक्त्वा बुद्धिपदेन तदुक्त्या उक्तविषये वक्ष्यमाणविषये च तव यथा सम्यक् बोधो जायेत तथा उक्तं वक्ष्यते चेति सूच्यते ॥ सांख्यशास्त्रयोगशास्त्रयोरप्रकृतत्वात् सांख्ययोगशब्दाभ्यां ज्ञानतदुपायावेव प्रकृते अभिधीयेते ॥ 'योगे त्विमां शृण्विति प्रतिज्ञाकरणं च तस्य अनेकैरध्यायैः प्रतिपादयिष्यमाणत्वात् तत्र श्रोतृजनमनसामवधानजननाय ॥ अतस्त्वं कर्मयोगादिविषये मया वक्ष्यमाणां वाचं श्रुत्वा तत्र निष्ठामधिष्ठाय उपायतया कर्मयोगादिकं कर्तुमर्हसि ॥ ३९ ॥

अ ॥ अर्जुनः ॥ सुखदुःखे समे कृत्वा युद्धाय युज्यस्व तेन पापं नावाप्स्यसीत्युक्तम् ॥ तथाऽपि न मे मानसं युद्धायोत्कण्ठते ॥ कुत इति चेत् १ 'य एनं वेत्ति हंतारं' इत्यादिना २ 'कं घातयति हंति कं' ॥ 'इत्येतेन त्वया यः सर्वकर्मसंन्यासः उक्त ॥ तस्मा एवाहं स्पृहये ॥ ३ 'स्वधर्ममपि चावेक्ष्य' इत्यादिना कर्तव्यत्वेनोपदिष्टाय युद्धाय कुतो न स्पृहयसे इति चेत् दुःखजनकयुद्धात्मककर्मकरणापेक्षया कर्तृकरणकर्मणां मिथ्यात्वानुसंधानेन सर्वं कर्म संन्यस्य तूष्णीमवस्थानस्य ज्यायस्त्वात्तमेव चिकीर्षामि न युद्धम् ॥ विहितत्वादुभयमप्यावश्यकमिति चेत उभयोर्विधानमेव कुतः ॥ समुच्चयाभिप्रायेण इति न वक्तुं युक्तम् ॥ प्रकाशतमसोरिव कर्तृत्वभोक्तृत्वादिसर्वधर्मविधुरशुद्धात्मस्वरूपोऽहमिति ज्ञानस्य कर्म कृत्वा तत्फलं भोक्ष्ये इति ज्ञानस्य च परस्परविरोधेन ज्ञानकर्मसमुच्चयानुपपत्तेः ॥ अधिकारिभेदेन द्वयोर्विधानमिति न युक्तम् ॥ मामेकमेव प्रति द्वयोर्विधानात् ॥ अतः कथमिदं वद ॥

कृष्णः ॥ तव एकस्यैव अंतःकरणशुद्धयशुद्धयवस्थाभेदेन द्वयोरुपदेशः ॥

---

१. २. १९. २. २. २१. ३. २. ३१.

अतो नानुपपत्तिः ॥ सं सम्यगाचीनतया ख्यायते उच्यते इति संख्या परविद्या ॥ सा हि १ 'अथ परा यया तदक्षरमधिगम्यते' इति प्रशस्यते ॥ सम्यक् ख्यायते प्रतिपाद्यते परं ब्रह्म अनयेति संख्या उपनिषत् ॥ सा हि परं ब्रह्म सम्यक् प्रतिपादयति ॥ उप अधिकं यथातथा निषीदति उपविष्टं वर्तते परं ब्रह्म प्रतिपाद्यतया अत्रेत्युपनिषत् ॥ उप समीपे एव निषीदति परमात्मानं प्राप्नोत्यनयेत्युपनिषदिति हि व्युत्पत्तिः ॥ तत्प्रतिपाद्यं सम्यक् ख्यायते प्रतिपाद्यते वस्तुतत्त्वमनयेति संख्या सम्यग्ज्ञानम् तस्यां विषयत्वेन प्रकाशमानं परविद्योपनिषत्प्रतिपाद्यं उपनिषदेकवेद्यं सम्यग्ज्ञानविषयीभूतं निर्विशेषं परं ब्रह्म सांख्यं तस्मिन्विषये शुद्धात्मतत्त्वविषये इति यावत् ॥ एषा २ 'न त्वेवाहं जातु' इत्यादिका ३ 'तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि ॥' इत्यन्ता बुद्धिः ज्ञानं ज्ञानजनिका वाग्वा तुभ्यमभिहिता ॥ तस्या बुद्धावनारोहान् योगे तादृशज्ञानोपायभूतकर्मयोगध्यानयोगविषये इमां वक्ष्यमाणां योगे कर्मयोगे विषये इमां 'सुखदुःखे समे कृत्वा' इत्युक्तां विस्तरेण वक्ष्यमाणां च इति वा बुद्धिं शृणु ॥ योगे कर्मयोगे करणीयां फलाभिसंधित्यागलक्षणां बुद्धिं शृणु इति वा ॥ तुशब्दोऽधिकारिभेदसूचकः ॥ शुद्धान्तःकरणं प्रति ज्ञानस्योपदेशः ४ न कर्मणः ॥ वक्ष्यते च ५ 'तस्य कार्यं न विद्यते' ॥ इति ॥ अशुद्धान्तःकरणं प्रति तु कर्मण उपदेशः तस्य ज्ञानयोगे अनधिकारात् ॥ अतो न विरोधः ॥ उपदेशस्य भिन्नाधिकारिविषयकत्वात् न ज्ञानकर्म ६ समुच्चय शङ्काबकाशः ॥ कथं भिन्नाधिकारिविषयकत्वमुपदेशस्य मामेकं प्रत्येव किलोपदिश्यते इति चेत् ॥ व्यक्तिभेद इव अवस्थाभेदेऽप्यधिकारिभेदसंभवादुपपन्नो भिन्नाधिकारिकयोरपि विषययोरेकं प्रत्युपदेशः ॥ यद्यपि अभ्यर्हितत्वादात्मतत्त्वोपदेशस्ते कृतः ॥ तथापि तस्य आरूढाधिकारिविषयकत्वान् इदानीं आरुरुक्षोस्तव चित्तशुद्ध्यादिना तत्त्वज्ञानप्राप्तये कर्मयोगस्यैव कर्तव्यतया कर्मयोगोऽपि संग्रहेणोक्तः ॥ विस्तरेण वक्ष्यते च ॥ आरुरुक्षुरशुद्धचेतास्त्वमिदानीं कर्म कुरु ॥ आरूढश्शुद्धचित्तो यदा भविष्यसि तदा कर्मयोगं संन्यस्य ज्ञानयोगाभ्यासमेव कुरु ॥ इत्यवस्थाभेदेन द्वयोर्विधानमुपपद्यते ॥ वक्ष्यते च स्पष्टमेव ॥ ६ 'आरुरुक्षोर्मुनेर्योगं

१. मुं. १. १. ५. २. २. १२. ३. २. ३०. ४. ३. १७. ५. 'स्वधर्ममपी'त्याद्युपदेशस्तु प्रासंगिकः ॥ न तात्पर्यतः प्रवृत्तः ॥ इति भावः ॥ ६. ९. ३.

कर्म कारणमुच्यते ॥ योगारूढस्य तस्यैव शमः कारणमुच्यते ॥ ४ 'यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते ॥ सर्वसंकल्पसंन्यासी योगारूढस्तदोच्यते ॥ इति ॥ वक्ष्यते चायं विषयविभागः स्पष्टम् ॥ ५ 'ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनां' इति ॥ किमवश्यं श्रोतव्या सा बुद्धिः इति चेन्न यया बुद्धया येन कर्मयोगध्यानयोगविषयकज्ञानेन यया कर्मयोगादिविषयया वाचा इति वा युक्तस्तत् संयुतस्तत् कर्मयोगादियोगवान् सन् इति वा ॥ हेतुभूतया यया बुद्धया येन कर्मयोगादिविषयकज्ञानेन यया कर्मयोगादिविषयया वाचा इति वा जनितया बुद्धया कर्मयोगादिजनितात्मापरोक्षज्ञानेन संयुतः सन् इति वा कर्मबन्धं कर्मात्मकं बन्धं निरहंत्वं वक्ष्यसि । तत्त्वज्ञानजनितेनैकरूप्यादुभयेन बन्धकेभ्यः सर्वेभ्यः कर्मभ्यो मुक्तो भविष्यसि ॥ वक्ष्यते च ॥ ६ 'अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः ॥ सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि ॥ इति ॥ ७ ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥ इति च ॥ युक्तः कर्मयोगवान् सन् कर्मणा बन्धः अन्तःकरणाशुद्धिलक्षणो ज्ञानप्रतिबन्धः तं प्रहास्यसि ॥ इति वा ॥ तां बुद्धिं शृणु ॥ कर्मनिमित्तकज्ञानप्रतिबन्धोऽपि आत्मतत्त्वोपदेशेनैव निवर्तेत ॥ श्रवणादेस्तन्निवर्तनसमर्थत्वात् ॥ अतः किं कर्मोपदेशेन इति चेन्न उपदिष्टस्यात्मतत्त्वं नाशुद्धान्तःकरणस्य तत्र बुद्धिर्जायतेऽतीति तत्प्राप्तयेऽपेक्षा पुनः ॥ करिष्यते च ॥ श्रवणादिकसन्तरङ्गसाधनमुपदिश्यते किं बहिरंगसाधनकर्मोपदेशेन इति चेन्न श्रवणादिकमपि नाशुद्धान्तःकरणस्य बुद्धिमारोहति ॥ अतो बहिरङ्गसाधनं कर्मैवोपदिश्यते ॥ श्रवणादेः कदा कथमुत्थानं इति चेत् कर्मणा तत्प्रतिबन्धकनिवृत्तौ सत्यां अज्ञानविषयसंशयादिनिवर्तकश्रवणादेरुत्थानोपपत्तेः ॥ अशुद्धान्तःकरणत्वाच्च न श्रवणादियोग्यतापि दूरे तु तावद्योग्यता ॥ किंतु बहिरंगसाधनकर्मयोगानुष्ठानयोग्यतैवेति इदानीन्तनीमवस्थां अनुसृत्य कर्मयोग एवोपदिश्यते ॥ वक्ष्यते च ॥ ८ 'कर्मण्येवाधिकारस्ते' ॥ इति ॥ ३९ ॥

वि ॥ अर्जुनः ॥ उपदिष्टमात्मतत्त्वं त्वया तन्न मे बुद्धावारोहति ॥ तस्य बुद्धावारोहाय कर्मानुष्ठानमुपदिश ॥

१. ३. ४. २. ३. ३. ३. ४. ३६. ४. ४. ३५. ५. २. ४५.

कृष्णः ॥ हे पार्थ सांख्या बुद्धिः तयाऽवधारणीयं सांख्यं आत्मतत्त्वं तस्मिन् विषये तज्ज्ञानायेति यावत् ॥ एषा बुद्धिः ज्ञानं तुभ्यं अभिहिता ॥ १ 'न त्वेवाहम्' इत्यादिना २ 'तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि ॥' इत्यन्तेन ग्रन्थेन उक्ता ॥ ३ 'स्वधर्ममपि चावेक्ष्य' इत्यादेः धर्माधर्मसमारम्भानन्तरप्रतीतक्षपमात्रार्थत्वेन तत्त्वज्ञानार्थत्वाभावात् न तस्य आत्मज्ञानार्थमभिहितत्वेनोक्तिः ॥ ज्ञानार्थं ज्ञानमुक्तमिति एकस्यैव साध्यसाधनभावः कथमिति चेत् निर्णयज्ञानाय युक्तिपरामर्शरूपज्ञानमुक्तमिति वा आत्मतत्त्वापरोक्षज्ञानाय तद्विषयपरोक्षज्ञानमुक्तमिति वा विवक्षणेन साध्यसाधनभाव उपपद्यते ॥ नैषा बुद्धिर्बुद्धिमध्यारोहतीति चेत् योगे ज्ञानोपायभूते कर्मयोगे विषये तज्ज्ञानार्थं वक्ष्यमाणां बुद्धिं वक्ष्यमाणं ज्ञानं शृणु ॥ योगे कर्मयोगविषये अपेक्षितो यो योगः समत्वबुद्धियोगः तस्मिन् विषये तदुत्पादनाय वक्ष्यमाणं ज्ञानं शृणु इति वा ॥ ज्ञानार्थं ज्ञानमिति एकस्यैव साध्यसाधनभावः कथमिति चेत् अनुष्ठानानुप्रविष्टं ज्ञानं साध्यं तत्साधनभूतं वक्ष्यमाणं कर्मयोगादिविषयकं ज्ञानं साधनमिति भेदसत्त्वादुपपद्यते ॥ उभयत्र बुद्धिः बोधजनिका वाक् इत्यर्थाभ्युपगमे तु नैवास्याः शङ्काया अवकाशः ॥ किमवश्यं श्रोतव्या सा बुद्धिरिति चेत् यया बुद्ध्या युक्तः येन ज्ञानेन संयुक्तस्त्वं यया वाचा हेतुभूतया युक्तः योगवान् त्वं इति वा ॥ कर्मणा बन्धः तं कर्मनिमित्तकं संसारबन्धं निहेषं हास्यसि तां बुद्धिं शृणु ॥ आत्मतत्त्वोपदेशमनन्तरं तच्चिन्तनरूपो ज्ञानयोग एव वक्तव्यः ॥ तथापि ज्ञानयोगस्य मनश्शुद्ध्याधायककर्मयोगसाध्यत्वात् कर्मयोगमुक्त्वा पश्चात् 'प्रजहाति यदा' इत्यादिना ज्ञानयोगोपदेश एव न्याय्यः ॥ अत इदानीं कर्मयोग उपदिश्यते ॥ शृणु तमवधानेन ॥ ३९ ॥

अर्जुनः ॥ कर्मयोगमुपदेक्ष्यामि तमनुतिष्ठ युक्तम ॥ आरब्धस्य मध्ये विच्छेदे कृषिवाणिज्यादिश्रेयःफल्यं स्यात् ॥ अंगवैकल्ये प्रमादादिना अन्यथाकरणे च चिकित्सावत् प्रत्यवायादनर्थोऽपि स्यात् ॥ यथाशक्ति स्वल्पमनुष्ठितं न फलाय कल्पेत अतः कर्मयोगादिभेमि ॥ यद ॥

कृष्णः ॥ नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ॥
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥ ४० ॥

---

१. २. १२. २. २. ३०. ३. २. ३१. ४. २. ६७.

नेति ॥ इह अकाम्यकर्मणि विषये अभिक्रमः उपक्रमः आरम्भः तस्य नाशः अभिक्रमनाशः नास्ति ॥ इह प्रत्यवायः दोषः न विद्यते नास्ति ॥ अस्य धर्मस्य स्वल्पमपि महतः भयात् त्रायते रक्षति ॥ ४० ॥

पार्थ मा भैषीः ॥ कर्म द्विविधं काम्यं अकाम्यं चेति ॥ अनेन कर्मणा इदं फलं मे भूयादिति भगवत्प्रसादव्यतिरिक्तफलेच्छया क्रियमाणं काम्यं कर्म ॥ भगवत्प्रीत्यर्थमेव क्रियमाणं कर्म अकाम्यं कर्म ॥ तत्र काम्यं कर्म बन्धहेतुः ॥ अकाम्यं कर्म मोक्षहेतुः ॥ स्पष्टं चेदं सर्वमुपरिष्टाद्वक्ष्यते ॥ [1]'योगे त्विमां शृणु' इत्युक्तं कर्म अकाम्यमेव यया बुद्ध्या कर्मबन्धं प्रहास्यसीति मोक्षहेतुत्वोक्तेः॥ इह कर्मणि पूर्वश्लोकोक्ते मया विधिस्मिते अकाम्ये कर्मणि उपक्रमशब्दितस्याऽऽरम्भस्य निष्फलत्वरूपो नाशो नास्ति ॥ आरब्धस्य मध्ये विच्छेदेऽपि आरम्भमात्रस्यापि फलमस्ति ॥ आरब्धस्य विच्छेदेन अङ्गवैकल्येन प्रमादादिना अन्यथाकरणेन अन्यधर्माकरणेन च प्रत्यवायदोषः न विद्यते ॥ अस्य पूर्वोक्तस्य धर्मस्य निवृत्तिकर्मणः स्वल्पमपि महतः संसारभयात् कर्तारं त्रायते ॥ अः परमात्मा तस्य धर्मः तदीयो धर्मः तत्प्रीतिजनको निवृत्तिधर्मः तस्य इति वा ॥ [2]'अ इति ब्रह्म' इति श्रुतेः ॥ फलमनपेक्ष्य भगवत्प्रीत्यर्थमेव करणात् तादृशो महिमा अस्य ॥ भृतिग्रहणार्थं कर्म कुर्वतः आरब्धस्य विच्छेदे अङ्गवैकल्ये अन्यथाकरणे अन्यकार्याकरणे च प्रभुप्रकोपद्वारा अनर्थो भवति। अभिलषितं फलमपि न सिध्यति ॥ अनपेक्ष्य वेतनं प्रभुप्रसादमात्रापेक्षया स्नेहेन वा कर्म कुर्वतः आरब्धस्य कर्मणो विच्छेदेऽपि आरम्भमात्रस्य प्रभुप्रीतिरूपं फलं सिध्यति ॥ अङ्गवैकल्येन यथावत्करणेन अन्यथाकरणेन अन्यकर्माकरणेन च प्रत्यवायो न दृश्यते ॥ फलानपेक्षस्य कर्मणः एकदेशोऽपि प्रभुप्रसादद्वारा महतो भयादेनं रक्षति इति प्रसिद्धं हि लोके ॥ फलापेक्षया क्रियमाणे काम्ये कर्मणि तु आरम्भमात्रस्य फलं नास्ति ॥ अङ्गवैकल्यादिना प्रत्यवायोऽपि ॥ एकदेशस्य उद्देश्यप्रसादद्वारा रक्षकत्वं च नास्ति ॥ अतस्त्वमकाम्यं कर्म कुरु ॥ 'नेहाभिक्रमनाशोऽस्ती'त्यस्य विवरणं स्वल्पमप्यस्येति ॥ उपक्रममात्रस्यापि भगवत्प्रसादरूपं फलमस्ति ॥ किं पुनः किंचित्कृतस्य ॥ किंचि-

---

१. गे. आ. २. ३. ८.

कृतं विघ्नैर्मध्ये विच्छिन्नं चेदपि महतो भयात् त्रायते ॥ कृतः स्वल्पोऽप्यंशो भगवत्प्रसादद्वारेण ज्ञानद्वारा संसारबन्धनिवर्तको भवति ॥ इति वा ॥

१ अकाम्यकर्मयोगस्य महदिदं माहात्म्यं यत्किल आरब्धस्य विच्छिन्नस्यापि भगवत्प्रकोपानुत्पादनपूर्वकं भगवत्प्रसादोत्पादनेन पुण्यलोकप्रापणं भूयोऽपि तादृशकर्मानुष्ठानयोग्यकुले जन्मप्रापणं तत्रानायासेन तादृशे योगे प्रवृत्त्युत्पादनं क्रमेणापवर्गप्रापणम् ॥ स्पष्टमिदं ३ 'पार्थ नैवेह नामुत्र' इत्यादिना ध्यानयोगमाहात्म्योक्तिमुखेन प्रपञ्चयिष्यते ॥ ४० ॥

४ अ ॥ अर्जुनः ॥ मां प्रति कर्मयोगो विधीयते ॥ इदं च न युक्तम् ॥ कर्मणो नश्वरफलकत्वात् ॥ ५ 'तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते' इति श्रुतिः ॥ ६'विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन' इति श्रुत्या सर्वेषां कर्मणां ज्ञानेच्छां ज्ञानं चोद्दिश्य विनियोगे सर्वेषां कर्मणां काम्यत्वात् सर्वांगसाहित्येन कर्तव्यानां तेषां यत्किंचिदंगवैकल्येऽपि वैगुण्यापत्त्या प्रत्यवायजनकत्वात् ॥ यज्ञेनेत्यादिविहितानां सर्वेषां कर्मणां पुरुषायुषशतेनापि कर्तुमशक्यत्वाच्च ॥ ब्रूहि ॥

कृष्णः ॥ इह कर्मणि अभिक्रम्यते कर्मणा प्रारभ्यते इत्यभिक्रमः फलं तस्य नाशः नास्ति ॥ अस्य निवृत्तिकर्मणः फलं चित्तशुद्धिः सा च पापक्षयरूपा क्षयस्य क्षयो न संभवति ॥ किंच निवृत्तिकर्मफलं ज्ञाननाज्ञाननिवृत्तिः तस्य च नाशो नास्ति ॥ निवृत्तेर्निवृत्त्यसंभवात् ॥ इह निवृत्तिकर्मणि अङ्गवैकल्येन प्रत्यवायो न विद्यते ॥ विविदिषन्तीति वाक्ये नित्यानामेव कर्मणां विविदिषां वेदनं च प्रति विनियोगः ॥ तत्र सर्वांगोपसंहारनियमो नास्ति ॥ काम्यान्यपि कर्माणि तत्र विनियुज्यन्ते इति पक्षेऽपि फलाभिसन्धिराहित्येन तेषां नित्यतुल्यत्वात् स नियमो नास्ति ॥ अस्य धर्मस्य मध्ये संख्यया इतिकर्तव्यतया वा स्वल्पमपि यथाशक्ति भगवदाराधनार्थं कृतं चेत् तत् ७ जन्मजन्मान्तराभ्यस्तं दानमध्ययनं तपः ॥ तेनैवाभ्यासयोगेन तच्चैवाभ्यस्यते पुनः ॥ ८ इति स्मृत्यनुरोधादुत्तरोत्तरसंस्काराधानद्वारा स्वसजातीय-

१. वि ॥ २. ६. ४०. ३. अ. केचित् ॥ ४. छा. ८. १. ६. जित इति पाठान्तरम् ॥ ५. बृ. ६. ४. २२.

यबुद्धेर्निमित्तं सन् कामादिदोषक्षपणद्वारा महतो भयात्संसारादनुष्ठातारं रक्षत्येव तस्मिन्वाक्ये समुच्चायकपदाभावेन समुच्चयेन विधानाभावाच्च ॥ अतः कर्मयोगमुपदिशामि ॥ श्रुत्वा तं कुरु ॥ तेन कर्मबन्धं प्रहास्यसीत्युक्तं युक्तमेव ॥ अतस्त्वं तादृशं कर्म कुरु ॥ ४० ॥

अर्जुनः ॥ ज्ञानोपायविषये बहवो बहुधा वदन्ति ॥ मतभेदसद्भावात्त्वदुक्त एव कथं मम विश्वासो जायेत ॥ त्वं तु शृणु इति वदन् मदीये मते विश्वासं कुर्विति बोधयसि ॥ कथमेतत् ॥ वद ॥

कृष्णः ॥ व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन ॥
बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम् ॥ ४१ ॥

व्यवसायात्मिकेति ॥ हे कुरुनन्दन अर्जुन इह अकाम्यकर्मणि विषये व्यवसायः निश्चयः आत्मा स्वरूपं यस्याः सा व्यवसायात्मिका बुद्धिः ज्ञानं एका एकरूपा एकफला च ॥ व्यवसायः एषां अस्तीति व्यवसायिनः न व्यवसायिनः अव्यवसायिनः तेषां अव्यवसायिनां बुद्धयः बहवः शाखाः यासां ताः बहुशाखाः न विद्यते अन्तः यासां ताः अनन्ताः च ॥ हि प्रसिद्धमिदम् ॥ ४१ ॥

हे पार्थ सम्यगवधार्य ॥ इह निवृत्तिकर्मणि विषये प्रमाणनिर्णीतार्थनिश्चयात्मिका बुद्धिः तादृशज्ञानजनिका वाक् एकरूपैव निश्चयज्ञानजनिका वाक् इह भेदे लोके च एकरूपैव इति वा ॥ इह ज्ञानजनिकासु बुद्धिषु निश्चयज्ञानजनिका बुद्धिः सर्वत्र एकरूपैव इति वा ॥ निश्चयज्ञानरहितानां वाचस्तु बहुप्रकाराः अनन्ताश्च प्रसिद्धमिदं ॥ मतं द्विविधम् ॥ प्रामाणिकं अप्रामाणिकं चेति ॥ वैदिकं प्रामाणिकम् ॥ अवैदिकं अप्रामाणिकम् ॥ प्रामाणिकमतविरोधश्चेत्परिहरणीयः अप्रामाणिकमतविरोधश्चेत् तस्य आकिञ्चित्करत्वादुपेक्षणीयः ॥ मदुक्तस्य प्रामाणिकमतानुसारित्वात् न प्रामाणिकमतविरोधः शंक्यः ॥ अप्रामाणिकमतविरोधस्तु स्यादेव ॥ तस्य च आकिञ्चित्करत्वेनाबाधकत्वादुपेक्षणीयः ॥ अतो मन्मते विश्वासं कुर्विति युक्तम् ॥ ४१ ॥

अ॥ अर्जुनः ॥ सांख्ये बुद्धिरभिहिता योगे बुद्धिं शृणु इति सांख्यबुद्धियोगबुद्धिरूपे द्वे बुद्धी उक्ते ॥ सतीषु उक्तबुद्धिद्वयव्यतिरिक्तासु बह्वीषु काणादादिशास्त्रप्रसिद्धासु ज्ञानरूपासु बुद्धिषु ता अनुक्त्वा उक्तबुद्धिद्वयस्यैवोक्तौ का हेतुः ॥ वद ॥

कृष्णः ॥ सन्त्यन्या बह्व्यो बुद्धयः तासु बाधनायाः बाधिके इमे द्वे बुद्धी एव ॥ अतः बाध्या बुद्धिरनुक्त्वा बाधिके इमे द्वे एव बुद्धी उक्ते प्रमाणजन्यनिश्चयरूपा बुद्धिः इह १ श्रेयोमार्गे एकैव ॥ द्वयोर्बुध्योरुक्तत्वादेकेति कथं इति चेत् बुध्योर्द्वित्वेऽपि मोक्षरूपफलस्यैक्यात् एकेत्युक्तिः ॥ मोक्षरूपैकफलसाधिके द्वे बुद्धी इतरासां बुद्धीनां बाधनायाभिहिते इति यावत् ॥ वक्ष्यते च ॥ उक्तयोर्द्वयोः बुद्ध्योरेकफलकत्वम् ॥ २ 'सांख्ययोगौ पृथक्' इत्यादिना ३ 'यः पश्यति स पश्यति' इत्यन्तेन ॥ निश्चयबुद्धिरहितानां काम्यकर्मिणां बुद्धयस्तु विषयभूतानां कामानां बहुप्रकारत्वाद्बहुशाखाः प्रतिशाखमवान्तरविशेषसद्भावात् अनन्ताश्च ॥ ४ 'आयुराशास्ते ॥ सुप्रजास्त्वमाशास्ते ॥ सजातघनस्यामाशास्ते ॥ उत्तरां देवयज्यामाशास्ते ॥ भूयो हविष्करणमाशास्ते ॥ दिव्यं धामाशास्ते ॥ विश्वं प्रियमाशास्ते' ॥ इति ५ 'जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्यात्' इति च श्रुतिः ॥ आसां बुद्धीनां अनुपरतसंसारप्रवाहप्रवाहप्रापकत्वादासां बाधनाय बाधिके मोक्षरूपैकफलहेतुभूते द्वे सांख्ययोगबुद्धी एव उपदिष्टे ॥ अतो युक्तमेवेदम् ॥

निवृत्तिकर्मयोगबुद्धिर्मोक्षफला इतरबुद्धिबाधिका इत्युक्तम् ॥ को निवृत्तिकर्मप्रवृत्तिकर्मबुध्योर्विशेषः इति चेत् इह निवृत्तिकर्मणि प्रवर्तमानस्य भगवानेवास्माकं शरणं भगवद्भजनेनैव ध्रुवं तरिष्यामि भवजलधिं इति निश्चयरूपा एकैव बुद्धिर्भवति निश्चयज्ञानरहितानां काम्यकर्मिणां बुद्धयः बहुशाखाः प्रत्येकं अनन्ताश्च॥ अनन्ताः प्रत्येकं बहुशाखाश्च इति वा ॥ निवृत्तिकर्मणि निश्चयबुद्धेरेकत्वेन सुलभत्वात्तत्र प्रवृत्तस्य न पातप्रसक्तिः ॥ काम्यकर्मणि प्रवृत्तस्य तु उद्देश्यफलानां बहुत्वेन निश्चयस्य दुर्लभत्वात् कदाचिदश्रेयस्यपि श्रेयस्त्वबुद्ध्या प्रवृत्तौ पातः स्यात् ॥ अतः प्रवृत्तिनिवृत्तिकर्मणोर्महान् विशेषः इति निवृत्तिकर्मबुद्धिर्बाधिकेत्युक्तम् ॥

---

१. इह सांख्ये योगे च या बुद्धिः सा एका इति केचित् ॥ २. भ. ४. ३. भ. ५. ४. तै. ब्रा. ३. ५. १०. ५. बृ. ३. ४. १७.

संशयदा स्वल्पस्य कर्मणो भयात् त्राणकर्तृत्वं इति चेत् इह श्रेयोमार्गे निवृत्तिकर्मणि तन्निश्चयात्मिका बुद्धिरेकैव सर्वेषामाश्रमाणां सर्वेषां वर्णानां च साधारणतया फलत्वेन विवक्षिता ॥ अतः तत्तद्वर्णाश्रमोचितेन एकेनापि सम्यगनुष्ठितेन तत्तत्फलानां संशयाग्रहतस्तस्यापि संसारभयात् त्राणकर्तृत्वमुपपद्यते ॥ अव्यवसायिनां बुद्धयस्तु बहुशाखा अनन्ताश्च ॥ तैः काम्यमानानां फलानामानन्त्यात् तत्तत्प्रापककर्मणामप्यानन्त्येन श्रमः फलोद्देशेन कर्मकरणात्तदनुभवायानेकजन्मप्राप्तिश्चेत्यनर्थावहं काम्यं कर्म ॥ अतः काम्याकाम्यकर्मणोर्महद्वैषम्यम् ॥ वक्ष्यते चानुषङ्गेण ॥ जन्मकर्मफलप्रदाम् ॥ क्रियाविशेषबहुलां इति ॥ अतस्त्वं अकाम्यं कर्म कुरु ॥ ४१ ॥

वि ॥ अर्जुनः ॥ यया बुद्ध्या कर्मबन्धं प्रहास्यसि इमां बुद्धिं शृणु इत्युक्त्या काम्यकर्मबुद्धेरपेक्षया अकाम्यकर्मबुद्धेरुत्कर्षः उक्तः कोऽसावुत्कर्षः तमुपपादय ॥

कृष्णः ॥ इह निवृत्तिकर्मयोगे या बुद्धिः निवृत्तिकर्मानुष्ठेयमिति बुद्धिः सा व्यवसायात्मिका आत्मयाथात्म्यनिश्चय[1] रूपिका ॥ याथात्म्यनिश्चयश्च, आत्मा नित्य स्वयंप्रकाशः आनन्दरूप असदचेद्रूपः स्वाभाविकापहतपाप्मत्वादिमान् इत्येवं निश्चयः ॥ आत्मपरमात्मनोः शेषशेषिभूतज्ञानमात्रे परमात्मप्रसादेतरफलानपेक्षया तत्प्रसादमात्रार्थं कर्म शरीरावस्थानद्रव्यार्जनादिसाध्यं कर्म कुर्यात् ॥ [2]काम्यकर्मबुद्धिस्तु नाऽऽत्मयाथात्म्यनिश्चयबुद्धिका ॥ आत्मयाथात्म्यनिश्चयाभावेऽपि आत्मा नित्य शरीरिजातस्वरूपव्यतिरिक्तश्च देहादिरिक्तः इति ज्ञानमात्रेण देहानुबन्ध्यस्वर्गादिफलककाम्यकर्मानुष्ठानं सम्भवति ॥ किंच निवृत्तिकर्मबुद्धिः एका ॥ यथा पृथिव्यधिकारस्थसिद्धस्वर्गफलसाधनभूताऽऽग्नेयादियागपदार्थविषया बुद्धिः स्वर्गार्थिना स्वर्गफलकं कर्म कर्तव्यमित्येकशास्त्रार्थविषयत्वादेका ॥ तथा पृथिव्यधिकारस्थसिद्धमोक्षरूपैकफलसाधनभूतनिवृत्तिकर्मविषया बुद्धिः मुमुक्षुणा मोक्षफलकं कर्म कर्तव्यमित्येकशास्त्रार्थविषयत्वादेका ॥ अतः सुलभा सुकरा च ॥

---

१. काऽकाम्यबुद्धिर्भेदव्यावृत्तेः व्यवसायस्य इत्यर्थकव्यवसायात्मिकेति पदप्रयोगः ॥
२. इह बुद्धिर्व्यवसायात्मिकेत्यनेनेदं लक्ष्यम् ॥

। आग्नेयादियागषट्के फलस्य स्वर्गस्य एकत्वम् ॥ निवृत्तिकर्मसु फलस्य मोक्षस्य एकत्वं इति विवेकः ॥ अव्यवस्थायिनां आत्मयाथात्म्यनिश्चयरहितानां आत्मावस्तित्वज्ञानमात्रेण काम्यकर्मसु प्रवृत्तानां काम्यकर्मबुद्धयस्तु स्वर्गपशुपुत्रान्नाद्ययशःश्रीपुष्टितुष्टिजयायुरारोग्यादीनां कामानामानन्त्येन तत्तद्धेतुभूतकर्मणामानन्त्यादनन्ताः ॥ एकैकस्मिन्नपि फले अवान्तरविशेषसत्त्वात् अन्येके बहुप्रकाराश्च ॥ एतदर्थमिदं कर्तव्यं एतदर्थमिदं कर्तव्यं इत्येवंशास्त्रार्थविषयत्वादनेकाः ॥ अनेकशाखाश्च ॥ अतो दुर्लभाः दुष्कराश्च ॥ अयमेव काम्याकाम्यकर्मबुद्ध्योर्विशेषः ॥ उक्तविशेषवत्त्वादकाम्यकर्मबुद्धेः काम्यकर्मबुद्ध्यपेक्षया उत्कर्षः ॥ अपर्यवसानानन्तकर्मतत्फलप्रवाहहेतुत्वात् काम्यकर्मबुद्धिर्बन्धहेतुः ॥ अनादिकालप्रवृत्ताच्चित्संसर्गमूलकपापवत्कुकर्मनिर्हरणहेतुत्वात् अकाम्यकर्मबुद्धिर्मोक्षहेतुः ॥ अत एवोक्तं 'कर्मबन्धं प्रहास्यसी'ति ॥ पूर्वश्लोके काम्यकर्मापेक्षया अकाम्यकर्मणोविशेष उक्तः ॥ अत्र तु काम्यकर्मबुद्ध्यपेक्षया अकाम्यकर्मबुद्धेर्विशेष उच्यते ॥ इति भेदः ॥ 'नेहे'त्यत्र आरम्भमात्रस्यापि साफल्येन विच्छिन्नस्यापि प्रत्यवायाजनकत्वेन स्वल्पस्यापि महाभयात् त्राणकर्तृत्वेन च निवृत्तिकर्मणः अन्यथाभूतकाम्यकर्मणः सकाशादुत्कर्ष उक्तः ॥ अत्र तु अन्तर्गतज्ञानयोगकतया ज्ञानाकारत्वेन ज्ञानकर्मोभयात्मकत्वात् मोक्षहेतुत्वात् एकशास्त्रार्थविषयैकबुद्धिविषयत्वाच्च निवृत्तिकर्मणः अन्यथाभूतकाम्यकर्मणः सकाशादुत्कर्ष उच्यत इति च भेदः ॥ नित्यनैमित्तिकानि तत्तत्र श्रूयमाणप्राप्तान्यलोकानिष्पुरुषतत्फलकाम्यलौकिकमिश्रत्वादिपरिहारादिरूपाणि फलानि परित्यज्य मोक्षैकफलतया एकशास्त्रार्थीकृत्य कर्तव्यानि ॥ काम्यान्यपि श्रूयमाणफलपरित्यागेन मोक्षैकफलतया नित्यनैमित्तिकैः सह एकशास्त्रार्थीकृत्य यथाशक्ति कर्तव्यानि ॥ इत्युक्तं भवति ॥ अतः त्वं स्वर्गाद्यर्थतया अभिधीयमानमपि युद्धं फलपरित्यागेन मोक्षैकफलतया नित्यनैमित्तिकैः सह एकशास्त्रार्थीकृत्य मोक्षैकफलकतया अनुतिष्ठ ॥ ४१ ॥

अर्जुनः ॥ अस्त्येवं अकाम्यकर्मणः तद्बुद्धेश्च माहात्म्यं तथापि काम्यकर्मणामपि वेदादिविहितत्वेन प्रशस्तत्वादनुष्ठानमेव तावदीति भाति ॥ किंच वैदिकाः केचित् प्रामाणिकाः कर्माणि स्वर्गादिफलान्येवाहुः ॥ त्वया तु काम्या-

१. आग्नेयः अग्नीषोमीयः उपांशुयाजः ऐंद्रः ऐंद्राग्नः ऐंद्राग्नः इति षड् यागाः ।

न्येव स्वर्गादिफलानि ॥ अकाम्यानि तु ईश्वरार्पणबुद्ध्या अनुष्ठितानि ज्ञानद्वारा मोक्षार्थानीत्युच्यते ॥ अतः प्रामाणिकमतविरुद्धे त्वन्मते कथं विश्वासः कार्यः ॥ किंच उक्तरूपा व्यवसायात्मिका बुद्धिः कुतो नोदेति सर्वेषां ॥ ब्रूहि ॥

कृष्णः ॥ यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः ॥
वेदवादरताः पार्थ नान्यदस्तीति वादिनः ॥ ४२ ॥

कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम् ॥
क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ॥ ४३ ॥

भोगैश्वर्यप्रसक्तानां तयाऽपहृतचेतसां ॥
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ॥ ४४ ॥

यामिति ॥ हे पार्थ विपश्चितः बहुज्ञाः न विपश्चितः अविपश्चितः अल्पज्ञाः वेदेषु वादाः वेदवादाः तेषु रताः आसक्ताः वेदवादरताः अन्यत् नास्ति इति वादिनः कामेषु आत्मा मनः येषां ते कामात्मानः स्वर्गः परः उत्कृष्टः येषां ते स्वर्गपराः ते पुष्पाणि अस्याः संजातानीति पुष्पिता तां पुष्पितां पुष्पितसदृशीं वा जन्म च कर्म च फलं च जन्मकर्मफलानि तानि प्रददातीति जन्मकर्मफलप्रदा तां क्रियाणां कर्मणां विशेषाः भेदाः तैः बहुला ते बहुलाः यस्यां सा इति वा क्रियाविशेषबहुला तां भोगश्च ईश्वरस्य भावः ऐश्वर्यं ऐश्वर्यं च भोगैश्वर्ये तयोः गतिः प्राप्तिः तां प्रति विद्यमानां यां इमां वाचं प्रवदन्ति तया वाचा अपहृतं चेतः येषां ते अपहृतचेतसः तेषां भोगश्च ऐश्वर्यं च भोगैश्वर्ये प्र अधिकं सक्ताः प्रसक्ताः भोगैश्वर्ययोः प्रसक्ताः भोगैश्वर्यप्रसक्ताः तेषां समाधौ समाध्यर्थं समाधिः मनः तस्मिन समाधिः परमात्मा तस्मिन विषये व्यवसायः निश्चयः आत्मा स्वरूपं यस्याः सा व्यवसायात्मिका बुद्धिः ज्ञानं न विधीयते नोत्पद्यते ॥ ४२ ॥ ४३ ॥ ४४ ॥

ये स्वर्गादीन्येव फलानि तत्साधनानि काम्यान्येव कर्माणि नातोऽन्यत् किमपि इति वदन्ति ॥ ते तु न वैदिकाः ॥ किंतु वैदिकाभासाः ॥ वेदतात्पर्यविषयीभूतार्थं पूर्वोत्तरसन्दर्भशुद्धिं चापर्यालोच्य आपाततः प्रतीतार्थमेव गृहीत्वा स्वयं नष्टाः परांश्च नाशयन्तो वराकाः ॥ अतस्तन्मतविरोधोऽपि अकिञ्चित्करत्वादुपेक्ष्यः ॥ अकाम्यकर्मणि प्रवृत्तिजननाय अकाम्यकर्मप्रशंसा कृता ॥ इदानीं काम्यकर्मणि प्रवृत्तिनिवारणाय काम्यकर्मनिन्दा क्रियते ॥ शृणु तामपि ॥ वेद्येन पथ्ये प्रवृत्तिजननाय पथ्यप्रशंसा क्रियते ॥ अपथ्ये प्रवृत्तिनिवारणाय अपथ्यनिन्दा क्रियते ॥ इति विदितमेव हि लोके ॥ अविपश्चितो यां वाचं प्रवदन्ति तया अपहृतचेतसां व्यवसायात्मिका बुद्धिर्न विधीयत इत्यन्वयः ॥ अविपश्चितः अल्पज्ञाः ॥ विविधं विशेषेण पश्यन्ती चित् बुद्धिः येषां ते विपश्चितः बहुज्ञाः न विपश्चितः अविपश्चितः अल्पज्ञा इत्यर्थः ॥ अतएव वेदवादरताः वेदेषु वादः आपाततः प्रतीतार्थः काम्यकर्मेतत्फलरूपः तत्रैव रताः ॥ वेदानां वादः निरर्थकः पाठः तत्रैव रताः ॥ वेदेषु वादः तात्पर्यार्थापरिज्ञानमूलको विवादः तत्रैव रताः ॥ वेदेषु ये वादाः यानि वाक्यानि तेष्वेव रताः तदर्थज्ञानहीनाः ॥ वेदेषु वादाः अर्थवादाः रुच्युत्पादकफलविशेषप्रतिपादनेन कर्मप्रशंसापरवाक्यानि तेषु रताः तेरेव सन्तुष्टाः ॥ मोक्षाख्यं फलं तत्प्रदं विष्ण्वाख्यं परं ब्रह्म तत्साधनं निवृत्तिकर्म तत्प्रतिपादकज्ञानकाण्डात्मकवेदभागश्च नास्तीति वादिनः ॥ मानिन इत्यनुक्त्वा वादिन इत्युक्त्या न केवलमेवं ज्ञात्वा स्वयं नश्येयुः ॥ किन्तु एवमुक्त्वा परानपि नाशयेयुः इति सूच्यते ॥ अतः रंभाद्यावासस्वर्गमेव[1] परमपुरुषार्थं मन्यमानाः कृत एतत्सर्वमिति चेत् कामात्मानः काम्यमानविषयशताकुलचित्ततया कामस्वरूपाः कामः विषयेच्छा तत्स्वभावाः कामेषु विषयेषु आत्मा मनो येषां ते तादृशाः कामः इच्छा आत्मनि मनसि येषां ते तादृशाः विषयभोगलंपटमनसः तात्पर्यार्थमजानत्वा पूर्वोत्तरसन्दर्भशुद्धिरहितवेदवाक्यानि केवलं परवञ्चनार्थमुदाहरन्तो वैदिकाभासाः पुष्पितां काम्यकर्मप्रतिपादिकां वाचं प्रवदन्ति ॥ फलस्थानीयं मोक्षं परित्यज्य पुष्पस्थानीयं स्वर्गादिकमेव फलत्वेन प्रतिपादयतीति पुष्पिता सा ॥ फलवदधिकसुखहेतुत्वान्मोक्षः फलस्थानीयः ॥ पुष्पवत् तात्का-

१. स्वर्गः परः इष्टः येषां ते इति केचित् ॥

लिकाकिञ्चि-सुखहेतुत्वात्स्वर्गः पुष्पस्थानीयः ॥ अतएव पुष्पसंपात्तमात्ररमणीय-पुष्पित १किंशुकवदापातरमणीया सा ॥ पुष्पितवृक्षवत्फलोद्भवं बोधयन्ती सा ॥ इमां जन्मकर्मफलप्रदामित्यादिना वक्ष्यमाणदोषं अध्ययनविध्युपात्तत्वेन प्रसिद्धां वा रंभादिसंभोगसंभूतगौरवविविधप्रतिपादकतया इष्टाद्वितस्य मन्मथस्य निरति-शयरतिसुखमयसाम्राज्यलक्ष्मीं प्रतिपादयन्तीम ॥ यः जन्मथस्य मा लक्ष्मीः यस्यांता दृशीम् ॥ जन्म च तत्र तत्तत्कर्म च तस्य फलं च ब्र पुनःपुनः ददातीति तादृशीम् ॥ जन्मरूपकर्मफलप्रदां वा ॥ जन्मानि तेषु पूर्वकर्मफलानि च प्रददातीति तादृशीं वा ॥ जन्मकर्मरूपे फले प्रददातीति तादृशी वा ॥ कामानामानन्त्यात्तत्तद्धेतुकर्म-विशेषैर्विस्तृतां च ॥ क्रियाविशेषाः बहुलाः यस्यां सा तादृशी वा ॥ तां कर्म-काण्डात्मिकां वाचं भोगः स्वकच्चन्दनवनितादिपदार्थोपभोगः तद्धेतुभूतमैश्वर्यं च तयोः २प्राप्तिं प्रति हेतुभूतां प्रवदन्ति प्रकृष्टतया वदन्ति ॥ प्रेम्णेन कर्मकाण्ड-वचनमेव न दोषः ॥ किन्तु अपकृष्टात्मात्तस्याः परत्वप्रकृष्टतया वदनं दोष इति मृष्यते ॥ भुज्यन्ते इति भोगाः स्वकच्चन्दनवनितादयः तेषां ऐश्वर्यं स्वामित्वं तस्य प्राप्तिं प्रति इति वा ॥ भोगैश्वर्यगतिं प्रति वर्तमानां वाचमिति वा ॥ भोगैश्वर्यगतिं प्रति ये क्रियाविशेषाः तैर्बहुलामिति वा ॥ भोगैश्वर्यफलं प्रति कारणत्वात इति वा ॥ जन्मकर्मफलप्रदां क्रियाविशेषबहुलां च यां भोगैश्वर्यगतिः तां इति इति वा ॥ यां वाचमेते वदन्ति तया अपहृतमनसां कुतोऽपहृतमनसो भवन्तीति चेत् भोगैश्व-र्यप्रसक्तानां व्यवसायस्यैव जातु मनसमाधानार्थे नोपयोगे ॥ स्वरूपं आधीयते अनेन सर्वमस्मिन पुरुषोपभोगाय इति वा स्वरूपं आधीयते पुरुषो विषयेषु अनेन इति वा समाधिर्मनः तत्रैव नोपयुज्यते ॥ स्वरूपमाधीयते सर्वमस्मिन जगत इति समाधिः परमात्मा तस्मिन विषये तेन दृढ्यते ॥ बुद्धिः व्यवसायात्मिका सती समाधौ समस्थितौ नोपयुज्यते ॥ एकरूपतां न प्राप्नोति ॥ अहं ब्रह्मेति ब्रह्मात्मना-ऽवस्थाने समाधिः तदर्थं न विधीयते ॥ स्वरूपानुसंधानकाले व्यवसायात्मिका बुद्धिः शुद्धचिन्मात्राकारा चिन्तयितुमेवोपयुज्यते ॥ व्यवसायात्मकबुद्धिरहितानां मोक्षो नास्त्येव ॥ अतः काम्यकर्मतत्फल-प्रतिपादनेन प्रलोभ्यानां व्यवसायात्मिकाऽस्तिक्यबु-

१. पुष्पितविपलतावदापातरमणीया इति भेदः । २. भोगः विशेषः क्रियाविशेषशब्दोक्तसा-धनविशेषात् भोगैश्वर्यरूपसाध्ये विशेषः इति कश्चित् ।

काम्यं कर्म मोक्षार्थिभिर्नानुष्ठेयम ॥ हे पार्थ महति क्षेत्रे महापुरुषादुत्पन्नत्वेन मोक्षार्हस्त्वं सन्नपि काम्यकर्मनरकं मा आप्नोः ॥ कुरु त्वमकाम्यमेव कार्यं कर्म ॥ ४२ ॥ ४३ ॥ ४४ ॥

अर्जुनः ॥ यद्येवं काम्यकर्म निन्द्यं तत्कारिणस्तद्वादिनश्च निन्द्याः ॥ तर्हि मातापितृमहर्षिभ्योऽपि अत्यन्तगुरवः अकर्तव्याद्विवर्ये कर्तव्ये प्रवर्त्य सर्वदुःखत्याजनेन सुखयितुं प्रवृत्ता वेदाः कुतः तादृशं निन्द्यं काम्यं कर्म प्रतिपादयन्ति ॥ कथं वा वेदोदितं कर्म त्यक्तुं शक्यम् ॥ वद ॥

कृष्णः ॥ त्रैगुण्यविषया वेदाः निस्त्रैगुण्यो भवार्जुन ॥
निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान ॥ ४५ ॥

त्रैगुण्येति ॥ वेदाः त्रयाणां गुणानां संबन्धि त्रैगुण्यं त्रिगुणात्मकं स्वर्गादिविषयः प्रतिपाद्योऽर्थः येषां ते त्रैगुण्यविषयाः ॥ हे अर्जुन त्वं त्रैगुण्यात् निष्क्रान्तः निस्त्रैगुण्यः भव ॥ द्वन्द्वेभ्यो निर्गतः निर्द्वन्द्वः भव ॥ सत्त्वे तिष्ठतीति सत्त्वस्थः नित्यं सत्त्वस्थः नित्यसत्त्वस्थः भव ॥ योगः अप्राप्तस्य प्राप्तिः क्षेमः तस्य रक्षणं योगश्च क्षेमश्च योगक्षेमौ ताभ्यां निर्गतः निर्योगक्षेमः भव ॥ आत्मा परमात्मा अस्यास्तीति आत्मवान् भव ॥ ४५ ॥

वेदाः काम्यं कर्म प्रतिपादयन्तीति सत्यम् ॥ तथाऽपि न तेषां काम्ये कर्मणि तात्पर्यम् ॥ किन्तु आपातत एव काम्यकर्मप्रतिपादनम ॥ अतः वेदाः त्रैगुण्यविषयाः ॥ त्रयाणां गुणानां सत्त्वरजस्तमसां संबन्धी यः स्वर्गादिः सः एषां विषयः आपाततः प्रतीयमानोऽर्थः ॥ न तु तात्पर्यतः प्रतिपाद्यमानोऽर्थः ॥ वस्तुतस्तु ते कथंभूता इति चेत् त्रैगुण्यविषयाः त्रिगुणितकर्मतत्फलज्ञानतत्फलमोक्षप्रतिपादनेन त्रैगुण्यरूपं विषं यान्ति यापयन्ति अपगमयन्ति त्याजयन्ति तादृशाः ॥ त्वं तु वेदैरापाततः प्रतिपाद्यमानात् त्रैगुण्यात् क्षुद्रफलरूपात् निवृत्तो भव ॥ तात्पर्यविषयीभूतार्थं ज्ञात्वा तत्र निष्ठां कुरु ॥ आपाततः प्रतीयमाने अर्थे भ्रान्तिं मा कार्षीः ॥ त्रैगुण्यान्निवृत्तस्य कथं सुखं सिध्येत इति चेत् निर्द्वन्द्वो भव ॥ सुखदुःखादिद्वन्द्वेभ्यो निर्गतो भव ॥ समदुःखसुखो भव ॥ एतत् निर्द्वन्द्वत्वं कथं सिध्येदिति चेत् नित्यसत्त्व-

स्थो भव ॥ साधुगुणवत्त्वात्सत्त्वशब्दवाच्ये विष्णावेव नित्यस्थितिमान् भव ॥ नित्यं हरिसंश्रयणाश्रिद्वन्द्वत्वादिकं संस्यति ॥ केन प्रकारेण नित्यं हरिस्मरणं कर्तव्यमिति चेत्र आत्मवान् भव ॥ परमात्मानमात्मशब्दितस्वामित्वेनोपास्व ॥ १ 'आत्मेति तृपगलन्ति ग्राहयन्तिचेति सूत्रम्॥ अनवरतं योगक्षेमचिंतायाः सत्त्वात् कथमेवं नित्यं हरिस्मरणस्यावकाशः इति चेत् अप्राप्तप्राप्तिरूपाद्योगात् प्राप्तपरिरक्षणरूपात् क्षेमाच्च त्वं निवृत्तो भव ॥ योगक्षेमचिन्तारहितो भव ॥ यद्यहं योगक्षेमचिन्तारहितः तूष्णीं हरिं स्मरन् तर्तेय तर्हि मदीययोगक्षेमस्य का गतिरिति चेत्र आत्मवान् भव ॥ आत्मशब्दितः परमात्मैव सर्वयोगक्षेमनिर्वाहक इति ज्ञानवान् भव ॥ वक्ष्यते च ॥ २ 'योगक्षेमं वहाम्यहमिति ॥ वेदैरापाततः प्रतिपाद्यमानकाम्यकर्मापेक्षया वेदैस्तात्पर्यतः प्रतिपाद्यमानं मोक्षहेतुज्ञानसाधनभूतमकाम्यं कर्म ज्यायः ॥ अतस्त्वं तदेव कुरु ॥ अन्यथा विशुद्धकर्मकारित्वरूपमर्जुनत्वं 'करोमि कर्म शुक्लं च तेन मामर्जुनं विदुः ३' इति त्वयोक्तं तव न सिध्येत् ॥ ४५ ॥

अ ॥ वेदाः त्रैगुण्यविषयाः त्रयाणां गुणानां कर्म त्रयाणां गुणानां पुण्यपापद्वयामिश्रकर्मतत्फलसंबन्धरूपः समाहारो वा त्रैगुण्यं संसारः त्रयाणां गुणानां संबन्धि त्रैगुण्यं स्वर्गादिरूपं फलं त्रयाणां गुणानां संबन्धि फलं ऊर्ध्वमध्याधोगतिरूपं संसरणम्॥ वक्ष्यते च ४ 'ऊर्ध्वं गच्छन्ति सत्त्वस्थाः मध्ये तिष्ठन्ति राजसाः ॥ जघन्यगुणवृत्तिस्थाः अधो गच्छन्ति तामसाः ॥' इति॥ तद्रूपो विषयः प्रकाशयितव्योऽर्थो येषां ते तादृशाः ॥ कुत्र काम्यं कर्म तत्फलं च प्रतिपादयन्तीति चेत् त्रैगुण्यविषयाः त्रैगुण्याः त्रिगुणात्मकाः सकामाः ये अधिकारिणः ते विषयाः बोधयितव्याः उपदेशोद्देश्याः येषां ते तादृशाः ॥ तादृशाधिकारिणां काम्यतत्फलप्रतिपादकाः कुतस्तेषां कामात्मनामयोग्यानामर्थे काम्यं कर्म तत्फलं च प्रतिपादनीयं इति चेत् त्रैगुण्यविषयाः त्रैगुण्याख्यं विषं जन्ममरणपर्यवसायित्वेन विषतुल्यत्वात् ॥ तत्र उपनिषद्भागैः मोक्षतत्साधनज्ञानतत्साधनाकाम्यकर्मप्रतिपादनेन यापयन्ति अपगमयन्ति ॥ शरीरायासद्रव्यव्ययादिभिरतिक्लेशसाध्येषु कर्मसु सहसा प्रवृत्तिर्नोदेति ॥ अतः गुडजिह्विकान्यायेन अनुभूयमानसुखसजातीयं स्वर्गादिसुखं

---

१. ४. १. ३. २. ९. ३१. २. १४. १८.

तत्साधनं काम्यं कर्म च प्रतिपाद्य तत्प्रशंसया तत्र प्रवर्त्य सुखं तत्साधनं चेमे वेदाः सम्यग्बोधयन्ति इति विश्वासमुत्पाद्य ततः स्वतात्पर्यविषयीभूतमोक्षतत्साधनज्ञानतत्साधनकर्मप्रतिपादनेन तत्र प्रवर्त्य संसारबन्धाद्विपाद्विमोच्य शाश्वतं स्वरूपसुखानुभवरूपममृतमनुभावयन्तीत्यहो वेदानां वात्सल्यम् ॥ विदितमेव हि सर्वेषां मातापित्रादयः अतात्पर्यविषयभूतं गुडमधुशर्करादिकं प्रदर्श्य स्ववशीकृत्य तात्पर्यविषयभूतं कटु भेषजं ग्राहयित्वा रोगाद्विमोच्य सुखं प्रापयन्तीति लोके ॥ अतो वेदानां आपाततस्तत्प्रतिपादनं युक्तम् ॥ प्रतिपादयन्तु नाम वेदास्तादृशाधिकारिणामर्थे त्रैगुण्यम् ॥ त्वन्तु तस्मात् त्रैगुण्यात् निर्गतो भव ॥ कथं निस्त्रैगुण्यो भवितुं शक्यं कर्मकरणे तत्स्वभावात् स्वर्गादिरूपतत्तत्फलोत्पादस्यापरिहार्यत्वात् इति चेत् निस्त्रैगुण्यो भव त्रिगुणात्मकप्रकृतिकार्यकामरहितो भव ॥ न हि कर्मणां अनिच्छायामपि फलजनकत्वं स्वभावः ॥ किन्तु यो यत्फलकामनया करोति तस्य तत्फलजनकत्वमेव स्वभावः ॥ निष्कामनयाऽनुष्ठाने फलजननप्रसक्तिरेव नास्तीति निस्त्रैगुण्यो भवितुं शक्यमेव ॥ शीतोष्णादिद्वन्द्वप्रतीकाराय वस्त्राद्यपेक्षणात् कथं निष्कामत्वं सिध्यदिति चेत् निर्द्वन्द्वो भव कथं द्वन्द्वसहनं कर्तुं शक्यं इति चेत् नित्यं अचञ्चलं सत्वं धैर्यं तत्र स्थितिमान् भव ॥ धैर्यमवलंब्य द्वन्द्वं सहस्वेत्यर्थः ॥ नित्यं सत्वगुणे स्थितिमान् भव ॥ विवेकेन रजस्तमसी अभिभूय सत्त्वमात्रावलम्बनो भव इति वा ॥ शीतोष्णादिसहनेऽपि असह्यक्षुत्पिपासापरिहाराय अप्राप्तस्य संपादनं प्राप्तस्य परिरक्षणं चेत्येतदुभयं कर्तव्यं तदर्थं यत्ने क्रियमाणे कथं नित्यसत्वस्थत्वं सिध्येत् इति चेत् नियोगक्षेमो भव ॥ यद्यहमेवं स्यां तर्हि कथमहं जीविष्यामि मदीया वा कथं जीविष्यन्तीति चेत् आत्मवान् भव ॥ परमात्मैव मदीययोगक्षेमनिर्वाहको वर्तते इति ज्ञानवान् भव ॥ निस्त्रैगुण्यः गुणत्रयातीतः भव ॥ गुणत्रयातीतो भव सत्वगुणस्थो भव इत्युभयोक्तिः कथं युज्यते ॥ सत्वगुणस्थो गुणत्रयातीतो न भवेत् गुणत्रयातीतः सत्वगुणस्थो न भवेत् इति परस्परविरोधादिति चेत् रजस्तमसी अभिभूय सत्वमात्रस्थो भव ॥ मोक्षस्य तत्साधनज्ञानस्य तत्साधनस्य शमदमक्षान्त्यादेश्च सत्त्वगुणैकलभ्यत्वात् ॥ तच्च शुद्धं सत्वं ज्ञानमुत्पाद्य स्वयं नश्यतीति निस्त्रैगुण्यतासिद्धिरिति न विरोधः ॥ आत्मा अवधानं तद्वान् अप्रमत्तो भव ॥ आत्मा मनः तद्वान् प्रशंसायां मतुप् ॥ निश्चलचित्तो भव इति वा ॥ वेदैः प्रथो-

मनार्थं प्रतिपाद्यमानं काम्यकर्म परित्यज्य तात्पर्यतः प्रतिपाद्यमानमकाम्यमेव कर्म त्वया कर्तव्यम् ॥

एवं अकाम्यं कर्म कृत्वा ज्ञानेन मोक्षमाप्तुं कथं मया स्थातव्यं इति चेत् त्रैगुण्यविषया वेदाः त्रयो गुणा यस्य तत् त्रिगुणं त्रिगुणात्मकमव्यक्तं त्रिगुणादुत्पन्नं त्रैगुण्यं प्रकृतिपरिणाममूतं जगत् तदेव कर्मकाण्डे प्रतिपाद्यते ॥ त्वं तु तस्माज्जगतः त्रैगुण्यशब्दिताच्चिष्क्रान्तो भव ॥ सर्वसंन्यासं कुर्वित्यर्थः ॥ कृतेऽपि सर्वसंन्यासे बहिर्मुखस्य ज्ञाननिष्ठा न सिध्येत् इति चेत् निर्द्वन्द्वो भव ॥ द्वन्द्वे नामरूपे ताभ्यां निर्गतो भव ॥ नामरूपयोर्ग्रहणं मा कुरु ॥ निष्टां कुर्वतोऽपि नामरूपग्रहणं न भवति तेन को विशेषो ज्ञानिन इति चेत् नित्यसत्त्वस्थो भव ॥ सतो ब्रह्मणो भावः सत्त्वं ब्रह्मत्वं नित्यं तत्र स्थितो भव ॥ सदा सर्वत्र ब्रह्मत्वानुसन्धानवान् भव ॥ तेन निर्योगक्षेमो भव ॥ देहयात्रानुकूलद्रव्यसंपादनं योगः तेन देहस्य पालनं क्षेमः ताभ्यां विनिर्गतो भव ॥ सर्वत्र ब्रह्मदृष्ट्या देहाभिमानं परित्यज ॥ तत्र ब्रह्मदृष्टौ आत्मवान् अप्रमत्तो भव ॥ तदर्थं आत्मवान् आत्मा ब्रह्माकारा बुद्धिः सर्वत्र तद्वान् भव ॥ आत्मानमेव अहंबुद्ध्या विषयं कुरु ॥ अनात्मानं अहंबुद्धेः क्वचिदपि कदाऽपि विषयं मा कुरु ॥ अनात्मानमात्मानं मा ब्राह्मीरित्यर्थः ॥ एवं स्थितो विदेहकैवल्यं प्राप्स्यसि ॥ ४५ ॥

वि ॥ परमकारुणिकभगवदाज्ञारूपाणां वेदानां आमूलाग्रं अपरिमितदुःखदुर्दिनानुबन्धिसुखकणखद्योतसाधनोपदेशो विषमपुरुषभोजनोपदेशवदयुक्त इति चेत् वेदाः त्रैगुण्या सत्त्वरजस्तम प्रचुराः सात्त्विका राजसाः तामसाश्च विषयाः उपदेशोद्देश्याः येषां ते तादृशाः ॥ अतः त्रयाणामपि तेषां उपदेशोद्देश्यत्वसाम्यात् तेषां त्रयाणामपि वत्सलतया हितमुपदेष्टव्यं वेदैः ॥ अतः यस्य यद्धितं तस्य तदुपदिशन्ति वेदाः ॥ सात्त्विकराजसतामसानां त्रयाणां पुत्राणां प्रसूः त्रयाणामपि तेषां पुत्रत्वसाम्यात् यस्य यद्धितं तदेव तस्य करोति ॥ न तु सात्त्विकमेकं स्वीकृत्य राजसतामसौ परित्यजति ॥ यदि राजसतामसयोः हितं अन्नपानादिकं न विदध्यात्प्रसूः तर्हि तौ प्रसुवं तं च पितरं हित्वा स्वैरं तत्रतत्र भोजनादिकमाचरन्तौ प्रणश्येताम् ॥ तद्वत् वेदाः यदि राजसानां तामसानां च हितं नोपदिशेयुः ॥ तर्हि ते हितं तत्साधनं चाजानन्तः अनुपादेयमुपादेयं मन्यमानाः अपथे प्रवृत्ताः क्षयं प्रणश्येयुः ॥ अतस्तेभ्योऽपि हितमुपदिशन्ति वेदाः ॥ एकैकस्यापि हितमा-

चरन्त्यां जनन्यां वत्सलेयमावयोर्यद्धितं तद्विदधाति श्राम्यति च नेन इति प्रीतिमधिकां कुर्वन्तौ राजस तामसौ हितमित्यनया यत् क्रियते तदेवाऽऽवयोर्हितमिति सात्विकस्य पुत्रस्य कृते तया क्रियमाणं सात्विकाहारमेव भुंजानौ आयुरारोग्यादिरूपामैहिकीं सत्त्वशुद्ध्यादिद्वारा आमुष्मिकीं च सिद्धिं लभेते ॥ तद्वत् राजसास्तामसाश्च यद्धितमस्माकं तदुपदिशन्तीमे वेदाः अतो वत्सलतराः अतो यद्धितमित्येतैरुपदिश्यते तदेवास्माकं हितमिति समुपजातविश्रंभाः सात्विकानामर्थं वेदैरुपदिश्यमाने मोक्षतत्साधनज्ञानतत्साधनाकाम्यकर्मरूपे मार्गे प्रवृत्ताः परमां सिद्धिमधिगच्छन्ति ॥ अतो वेदाम्नायाणामपि तेषां तामसराजससात्विकानां तत्तद्गुणानुगुण्येन ऐहिकामुष्मिकापवर्गफलाभिलाषिणां हितमुपदिशन्ति ॥ उपदिशन्तु नाम ॥ त्वं तु निस्त्रैगुण्यो भव ॥ [1]अन्योन्यसङ्कीर्णगुणत्रयातिगतो भव ॥ प्रकृतिबद्धेन कथं प्रकृतिगुणेभ्यस्त्रिभ्योऽपि निर्गन्तुं शक्यं इति चेत् नित्यं रजस्तमोभ्यामनभिभावात् प्रवृद्धे सत्वे स्थितो भव ॥ सत्वगुणमेव वर्धय ॥ रजस्तमसौ तु मा वर्धय ॥ नित्यसत्वस्थ इति रजस्तमोऽनभिभूतसत्वगुणवर्धनपरम् ॥ निस्त्रैगुण्य इति अन्योन्यसंकीर्णसत्वादिगुणत्रयवर्धननिषेधपरम् ॥ अतो न विरोधः ॥ कथमेतत् सिध्येदिति चेत् निर्द्वन्द्वो भव ॥ पुण्यपापमूलकसांसारिकस्वभावधर्मद्वयादिर्गतो भव ॥ सकलविधसांसारिकस्वभावेभ्यो निर्गतो भव ॥ क्रमेण मुक्तो भव ॥ साधनदशायां शीतोष्णादिद्वन्द्वसहिष्णुर्भव ॥ एवं सति योगक्षेमनिर्वाहः कथं स्यादिति चेत् निर्योगक्षेमो भव ॥ अप्राप्तस्य प्राप्तिर्योगः प्राप्तस्य परिरक्षणं क्षेमः ताभ्यामुभाभ्यां निर्गतो भव तच्चिन्तारहितो भव ॥ अप्राप्तात्मस्वरूपप्राप्तिरक्षणाभ्यामपि निर्गतेन भवितव्यं वा इति चेत् आत्मवान् भव ॥ आत्मस्वरूपान्वेषणपरो भूत्वा शुद्धात्मस्वरूपं लभस्व ॥ आत्मस्वरूपान्वेषणपरो भूत्वा तद्बहिर्भूतयोगक्षेमचिन्तां परित्यज्य साधनदशायां शीतोष्णसुखदुःखादिद्वन्द्वसहिष्णुर्भूत्वा सत्वगुणप्राचुर्यहेतुभूतसात्विकाहारादीन् सेवमानः सत्वगुणमभिवर्धयन् रजस्तमःप्राचुर्यहेतुभूतराजसतामसाहारादीन् परित्यजन् रजस्तमसी अभिभूय नित्यप्रवृद्धशुद्धसत्वस्सन् अन्योन्यसंकीर्णगुणत्रयातीतो भूत्वा सात्विकानामपवर्गाभिलाषिणामधि-

१. यथा वातपित्तकफप्रकृतीन् त्रिविधान पुरुषान् प्रति हितोपदेशिनो वैद्याः पर्यालोच्य तत्तत्प्रकृत्यनुगुणं भेषजभोजनादि विदधति तद्वदिति बोध्यम् ॥

कारिणामर्थे वेदैर्विहितानि अकाम्यकर्माण्येव कृत्वा तद्वललब्धसत्त्वशुद्धिस्सन् सकलसांसारिकबन्धेभ्यो विनिर्मुक्तो मुक्तो भव ॥ तथा भवितुं प्रयतस्व ॥ अर्जुनत्वात् त्वमेवं कर्तुमर्होऽसि ॥ ४५ ॥

अर्जुनः ॥ अकाम्यकर्म प्रशस्य काम्यकर्म च विगर्ह्य निस्त्रैगुण्यो भवेति काम्यकर्मत्याजनपूर्वकं अकाम्यं कर्म कुरु इत्युक्तं भवता कथमिदं युज्यते ॥ स्वर्गादिफलार्थं काम्यकर्मानुष्ठानं कर्ममार्गः ॥ मोक्षसाधनभूतज्ञानार्थमकाम्यकर्मानुष्ठानं ज्ञानमार्गः ॥ यथा कर्मिणां ज्ञानमार्गफलभूतो मोक्षो नास्ति तथा ज्ञानिनां कर्ममार्गफलभूतं स्वर्गादिकं नास्ति इति तयोस्साम्यात् ॥ समानयोर्मध्ये एकं विनिन्द्य अन्यस्मिन् विनियोजनं न युक्तम् ॥ वद ॥

कृष्णः ॥ यावानर्थ उदपाने सर्वतः संप्लुतोदके ॥
तावान सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ॥ ४६ ॥

यावानिति ॥ पीयतेऽस्मिन्निति पानं उदकस्य पानं उदपानं कूपादि तस्मिन् उदपाने यावान अर्थः यावत् प्रयोजनं भवति तावान् अर्थः तावत् प्रयोजनं सर्वतः सर्वत्र संप्लुतं पूर्णं उदकं यस्मिन तत् संप्लुतोदकं समुद्रादि तस्मिन समुद्रादौ यथा भवति ॥ एवं सर्वेषु वेदेषु कर्मकाण्डात्मकेषु यावान अर्थः भवति तावान अर्थः विजानतः परोक्षज्ञानवतः तेन ब्राह्मणस्य ब्रह्म अणति गच्छति जानाति इति ब्राह्मणः तस्य अपरोक्षज्ञानवतः भवति ॥ ४६ ॥

उदपाने कूपे यावान् स्नानपानाऽऽचमनादिरूपोऽर्थः प्रयोजनं भवति तावान् अर्थः सर्वतः संप्लुतोदके समृद्धजले समुद्रे महानद्यादौ वा यथा भवति ॥ दृष्टान्तदार्ष्टान्तिकभावबलात् एवमिति लभ्यते ॥ तद्बलात् यावान् अर्थः तावान् अर्थः इति च लभ्यते ॥ एवं सर्वेषु वेदेषु कर्मकांडात्मकेषु प्रवृत्तस्य काम्यकर्मभिर्यावानर्थः स्वर्गादिरूपः तावान् अर्थः विजानतः अकाम्यकर्मलब्धचित्तशुद्धिद्वारा लब्धपरोक्षज्ञानस्य तेन ज्ञानेन ब्राह्मणस्य लब्धापरोक्षज्ञानस्य भवति ॥ कूपप्रयोजनं समुद्रादौ यथा भवति तथा काम्यकर्मप्रयोजनं ज्ञाने भवति ॥ एवं समुद्रादौ यावानर्थः तावानर्थः उदपाने भवतीति काकुः न भवति ॥ विजानतः ब्राह्मणस्य ज्ञानमार्गे यावानर्थः

तावानर्थः वेदेषु काम्यकर्ममार्गे भवतीति काकुः न भवति ॥ अल्पोदककूपादि प्रयोजनं सर्वं समुद्रादौ भवति समुद्रादिप्रयोजनं सर्वं कूपादौ न भवति ॥ तथा काम्यकर्मफलं स्वर्गादिकं सर्वं ज्ञानमार्गे भवति ॥ ज्ञानमार्गफलं मोक्षादिकं सर्वं काम्यकर्ममार्गे न भवति ॥ स्वर्गादेर्ज्ञानफलैकदेशस्य कर्मणि सत्वेऽपि ज्ञानफलं सर्वं कर्मणि न भवति ॥ एतत्सूचनायैव यत्तच्छब्दप्रयोगमकृत्वा यावत्तावच्छब्द-प्रयोगः कृतः ॥ अतो न काम्यकर्मज्ञानमार्गयोः साम्यम् ॥ किन्तु महद्वैषम्यम् ॥ अतः सर्वतः सम्प्लुतोदकमहानदीसमुद्रादितुल्यत्वात् ज्ञानमार्गस्य तद्धेतुभूतमकाम्यमेव कर्म कुरु इत्युक्तम् ॥ युक्तमेव हि तत् । उत्कृष्टफलकोपायं साधितवतः निकृष्टफलको-पायफलं करस्थं निकृष्टफलकोपायं साधितवतः उत्कृष्टफलकोपायफलं कफोणी-गुडायितम् । अत उत्कृष्टफलक एवोपाय आश्रयणीयः ॥ राजधानीस्थ प्रधानव्यव-हारास्थानीस्थप्रधानप्राड्विवाकसमक्षं व्यवहर्तृ पदं साधितवतः शाखोपशाखाय-माननगरोपनगरस्थव्यवहारास्थानीस्थाप्रधानप्राड्विवाकसमक्षं व्यवहर्तृपदं कर-स्थम् ॥ इदं साधितवतः तत्तु कफोणीगुडायितम् ॥ इति विदितमेव लोके ॥ '[1]पुरुषार्थोऽतः शब्दादिति बादरायणः ॥' इति सूत्रम् ॥ [2] 'ज्ञानादेव स्वर्गो ज्ञाना-देवापवर्गो ज्ञानादेव सर्वे कामाः संपद्यन्ते ॥' इति ॥ [3] 'यं यं लोकं मनसा संवि-भाति विशुद्धसत्वः कामयते यांश्च कामान् ॥ तं तं लोकं जयते तांश्च कामान् तस्मादात्मज्ञं ह्यर्चयेद्भूतिकामः ॥' इति च श्रुतिः ॥ [4] 'संकल्पादेव च तच्छ्रुतेः ॥' इति सूत्रम् ॥ [5] 'स यदि पितृलोककामो भवति संकल्पादेवास्य पितरः समुप-तिष्ठन्ति ॥' इति श्रुतिश्च ॥

[6] 'सर्वतः संप्लुतोदके उदपाने महानद्यादौ यावानर्थः कूपादिप्रयोजनापे-क्षया परमोत्कृष्टप्रयोजनं भवति ॥ सर्वेषु वेदेषु विजानतो ब्राह्मणस्य तावा-नर्थः काम्यकर्मप्रयोजनस्वर्गाद्यपेक्षया परमोत्कृष्टं मोक्षरूपं प्रयोजनं भवति ॥ यदन्तरं कूपादेरल्पोदकस्य समुद्रादेः संप्लुतोदकस्य च तदन्तरं काम्यकर्ममार्गस्य

१. ३. ४. १. २. कौठरव्यश्च ॥ ३. मुं. ३. १०. ४. ४. ४. ८. ५. छा. ८. २. १. ६. द्वितीयतृतीयतुरीययोजनासु यथैवंपदयोरध्याहारः यावान्तावानित्यनयोरावृत्तिश्च न ॥ इतरासु मतत्रययोजनासु तदुभयमप्यस्ति ॥

ज्ञानमार्गस्य च ॥ अतो ज्ञानमार्गादवरत्वात् काम्यकर्ममार्गस्य तत्याजनपूर्वकं ज्ञानहेतुभूताकाम्यकर्मोपदेशः कृतः ॥ सर्वतः संप्लुतोदके समुद्रादौ सति उदपाने कूपे यावानर्थः तावानेव विजानतः अतः ब्राह्मणस्य परमात्ममननशीलस्य तस्मिन् महामार्गे सति सर्वेषु वेदेषु कर्मकाण्डात्मकेषु अर्थः ॥ महानद्यादिकं यस्य सविधे अस्ति तेन कूपोदकं यथा नाऽऽश्रीयते ॥ तथा ज्ञानतत्साधनकर्ममार्गयोग्यता यस्यास्ति तेन काम्यकर्ममार्गो नाऽऽश्रयणीयः ॥ इति वा ॥

त्रैगुण्यविषया वेदाः त्वं तु निस्त्रैगुण्यो भवेत्यनेन वेदानामापाततः प्रतीतो योऽर्थः तत्र विश्वासं मा कुरु ॥ तात्पर्यतः प्रतिपाद्यमानो योऽर्थः तत्रैव विश्वासं कुरु इत्युक्त्वा तं चार्थं ज्ञानतत्साधनकर्मरूपं समुद्रादिदृष्टान्तेन प्रशस्य अतो वेदतात्पर्यविषयीभूते अकाम्यकर्मणि प्रवर्तस्वेत्युक्तम् ॥ एवं उभयथा प्रतिपादनेन मनः खेदयन्तो नश्वरफलमापाततः प्रतिपाद्य प्रलोभयन्तो वेदाः किमर्थमाश्रयणीयाः ॥ कुतस्ते न त्याज्याः ॥ ब्रूहि इति चेत् सर्वतः संप्लुतोदके प्रलयोदके स्थिते उत्कृष्टत्वात् उत्तमपशाद्यिदनपालकराहित्यात् अपः सर्वश्रेष्ठकत्वात् अनः उच्छ्वासो अपश्वासो अनश्च उदपानपरमात्मा तस्मिन् सर्वेषां भावानां लयकालेऽप्येतादृशे परमात्मनि सति तत्प्रसादेनेति यावत् ॥ भक्तिज्ञानवैराग्यमोक्षादिरूपो यावानर्थो भवति तावान् सर्वोऽप्यर्थः सर्वेषु वेदेषु विशेषेण ज्ञानवतो ब्राह्मणस्यैव भवति ॥ वेदतात्पर्यविषयीभूतार्थं ज्ञात्वा अकाम्यं कर्म कृत्वा तेन परोक्षज्ञानवान् भूत्वा तेन लब्धापरोक्षज्ञानस्यैव भवति ॥ परमात्मस्वरूपज्ञापने वेदा एव प्रभवन्ति ॥ नान्ये ॥ वक्ष्यते च मया ॥ १ 'यदक्षरं वेदविदो वदन्ति ॥ इति ॥ २ 'वेदैश्च सर्वैरहमेव वेद्यः' इति च ॥ ३ 'सर्वे वेदा यत्पदमामनन्ति' इति श्रुतिः ॥ अतो वेदा न त्याज्याः ॥ किन्तु तेषामापाततः प्रतीयमानोऽर्थ एव त्याज्यः ॥ स्वीकर्तव्यश्च तैः तात्पर्यतः प्रतिपाद्यमानोऽर्थः ॥ अत उक्तं युक्तम् ॥ ४६ ॥

अ ॥ अर्जुनः ॥ वेदैः काम्यकर्मणां प्रतिपादनेऽपि त्वमकाम्यान्येव कर्माणि कुरु इत्युक्तम् ॥ निष्फलानि तानि किमर्थं कर्तव्यानि ॥ न हि लोके निष्फलं कर्म कोऽपि कुर्यात् ॥ वद ॥

---

१. ८. ११. २. १५. १५. ३. का. २. १५.

कृष्णः ॥ अकाम्यकर्माणि न निष्फलानि ॥ किन्तु सफलान्येव ॥ फलान्यपेक्ष्य इन्द्राद्यवरदेवान् उद्दिश्य क्रियमाणानां काम्यकर्मणामेव फलवत्त्वे किं वाच्यं फलानपेक्षया साक्षात्परमात्मानमुद्दिश्य क्रियमाणानां अकाम्यकर्मणां फलवत्त्वमस्तीति ॥ किं तदकाम्यकर्मफलं इति चेत् अन्तःकरणशुध्यादीनि तानि प्रधानसाधनापरोक्षज्ञानफले अन्तर्भूतानि ॥ अङ्गानां प्रधानफलेनैव फलवत्त्वम् ॥ नांगेषु प्रत्येकं फलविचारः कर्तव्यः ॥ न हि यागादौ सन्ध्यावन्दनादौ च प्राङ्मुखत्वोदङ्मुखत्वादेः फलविचारः क्रियते॥ यथा उदपाने यावानर्थः तावानर्थः सर्वतः संप्लुतोदके समुद्रादौ भवति॥ कूपादिषु यत्प्रयोजनं तत्प्रयोजनं समुद्रादिप्रयोजने अन्तर्भवति ॥ तथा सर्वेषु वेदेषु वेदोक्ताकाम्यकर्मसु यावानर्थः तावानर्थः विजानतः ब्रह्म सम्यक् जानतः ब्राह्मणस्य ब्रह्मैवाहमिति साक्षात्कृतवतः भवति ॥ अकाम्यकर्मफलं ज्ञानफले अन्तर्भवति ॥ वक्ष्यते च ॥ १ 'सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते' इति ॥ यद्येवं तर्हि फलवत्त्वादकाम्यत्वं न स्यात् इति चेत् सफलानि काम्यानि निष्फलान्यकाम्यानीति न विभागः ॥ किन्तु अभिसंहितफलानि काम्यानि अनभिसंहितफलान्यकाम्यानि इति ॥ अतः फलमनपेक्ष्य अकाम्यानि कर्माणि कुरु इति युक्तमेवोक्तम् ॥ अर्थः दृष्टान्ते स्नानपानाचमनादिः ॥ दार्ष्टान्तिके मनश्शुद्ध्यादिः ॥

अकाम्यकर्मणां फलानि मनःशुध्यादीनि तानि च तेषां फलानि प्रधानज्ञानफले अन्तर्भूतानि ॥ अतोऽकाम्यानि कर्माणि कर्तव्यान्येवेत्युक्तम् ॥ अस्त्वकाम्यकर्मणां कर्तव्यत्वम् ॥ काम्यानि कर्माणि न कर्तव्यानि इति यदुक्तं तत्कथम् ॥ यदि काम्यानि कर्माणि न क्रियेरन् ॥ तर्हि तत्तत्काम्यकर्मजनितस्वाराज्यमहीराज्यगेहारामपशुपुत्रादितत्फलानुभवजन्यैः सर्वविधैरानन्दैरहं विहीनः स्यामिति चेत् यावानर्थ इत्यादि पूर्ववत् ॥ यथा कूपादिप्रयोजनं समुद्रादिप्रयोजने अन्तर्भवति ॥ तथा सर्ववेदोक्तकाम्यकर्मफलानुभवजन्यानन्दः विजानतो ब्राह्मणस्य ज्ञानफले महति मोक्षानन्दे अन्तर्भवति ॥ ब्रह्मानन्दे क्षुद्रानन्दानामन्तर्भावात् ॥ २ 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ती'ति श्रुतिः ॥ मा भूवन्नाम तेते कर्मफलानुभवजन्या आनन्दाः अकाम्यकर्मज्ञानसाक्षात्कारलभ्यमोक्षानन्दस्य अंशांशै-

१. ४. ३३. २. बृ. १. ३. २२.

कदेशाः खलु ते ॥ अतः क्षुद्रानन्दफलकानि काम्यानि कर्माणि परित्यज्य मोक्षानन्दफलकमकाम्यमेव कर्म कुर्विति युक्तमेवोक्तम् ॥ अर्थः दृष्टान्ते पुण्यविशेषः ॥ दार्ष्टान्तिके आनन्दः ॥

काम्यकर्मफलानुभवजन्य आनन्दः ब्रह्मानन्दस्यैकदेश इत्युक्तम् ॥ तत्कथं ब्रह्मादिपदानुभवजन्यपरमोत्कृष्टानन्दस्यापि काम्यकर्मफलत्वेन काम्यकर्मफलानुभवजन्यानन्दसामान्यस्य ब्रह्मानन्दैकदेशत्वासंभवात् इति चेत् यावानर्थ इत्यादि पूर्ववत् ॥ यथा कूपादिजलं समुद्रादिमहाजलांशांशैकदेशः तथा सर्वेषु शब्दस्पर्शादिविषयजातं विदन्तीति वेदाः पिपीलिकादिब्रह्मान्ताश्चेतनाः तेषु यावान् आनन्दः तावानानन्दः विजानतः ब्राह्मणस्य भवति ॥ तत्रतत्र विद्यमानः आनन्दः ब्रह्मानन्दांशांशैकदेशः इत्युक्तं भवति ॥ अत उक्तं युक्तम् ॥ अर्थः दृष्टान्ते जलं दार्ष्टान्तिके आनन्दः ॥ अतस्तादृशब्रह्मानन्दावाप्तये निस्त्रैगुण्यो भूत्वा अकाम्यमेव कर्म कुरु ॥

निस्त्रैगुण्यो भूत्वा अकाम्यकर्मानुष्ठाय ज्ञानद्वारा मोक्षमाप्नुहीत्युक्तम् ॥ गुणत्रयसंबन्धिकर्मतत्फलप्रतिपादकवेदभागपरित्यागेन ज्ञानकाण्डात्मकवेदभागमात्राश्रयणात् कथं श्रेयः सिध्येत् इति चेत् सर्वतः संपूर्णोदके उदपाने जलाशयादौ अर्थः स्नानपानादिः यावान् घटमात्रजलानिर्वर्त्यः न तु कृत्स्नजलाशयजलव्ययनिर्वर्त्यः भवति ॥ सर्वेषु वेदेषु विजानतः ब्रह्म बुभूषोः तावानर्थः श्रेयोरूपः वेदैकदेशोपनिषद्रूपज्ञानकाण्डमात्रनिर्वर्त्यः ॥ न तु कृत्स्नवेदभागनिर्वर्त्यः ॥ अतः निस्त्रैगुण्यो भूत्वा अकाम्यकर्म ज्ञानार्थं कुर्विति युक्तम् ॥

उक्तरीत्या वेदानामतिगहनतया परित्यज्य तान् अन्येषामेव ग्रन्थानामाश्रयणं क्रियतां इति चेत् उदपाने यावानर्थः तावानर्थः सर्वतः संप्लुतोदके महाह्रदादौ यथा भवति ॥ तथा सर्वेषु शास्त्रपुराणादिषु यावानर्थः तावानर्थो विजानतो ब्राह्मणस्य वेदेष्वेव भवति ॥ दृष्टान्ते अर्थः स्नानपानादिः दार्ष्टान्तिके कर्मनैष्कर्म्यादिः ॥ सर्वप्रमाणापेक्षया वेदानां प्राबल्यात्त एव सर्वथा आश्रणीयाः ॥ अतस्तानाश्रित्य तैस्तात्पर्यतः प्रतिपाद्यमानं निवृत्तिकर्मैव कुरु ॥ ४६ ॥

वि ॥ अर्जुनः ॥ सात्विकानां राजसानां तामसानां च यद्यद्धितं तत्तदखिलं अभिदधति वेदाः सर्वार्थं प्रवृत्तत्वात् ॥ त्वं तु नित्यप्रबुद्धसत्वप्रचुरो भूत्वा

सात्त्विकानामथ वेदैर्यदुच्यते तदेवोपादत्स्व इत्युक्तम् ॥ तत्कथम् ॥ प्रमाणतमेन वेदेन प्रतिपादितेष्वर्थेषु कस्यचिदंशस्य परित्यागे वेदत्यागी खलु स्याम् ॥ कथं वैदिकेन मया वेदोक्तं त्यक्तुं शक्यम् ॥ वद ॥

कृष्णः ॥ सर्वार्थपरिकल्पिते सर्वतः संपूर्णोदके कूपतटाकादौ स्नानपानादिकं चिकीर्षोः यावान् अर्थः तावानेव हि उपादीयते ॥ यावत्पानीयं प्रयोजनसाधनं तावदेव स्नानपानाद्यर्थमुपादीयते ॥ न सर्वमपि ॥ एवं सर्वेषु वेदेषु सर्वार्थप्रवृत्तेषु काम्याकाम्यकर्मतत्तत्फलप्रतिपादकेषु ब्राह्मणस्य वैदिकस्य विजानतो मुमुक्षोः यावानर्थः तावानेवोपादेयः ॥ यदेव मोक्षसाधनं तदेवोपादेयम् ॥ नान्यत् ॥ सर्वार्थप्रवृत्तत्वादधिकमेव तत्र वर्तते ॥ यस्य यावदावश्यकं तेन तावदेवोपादातव्यम् ॥ न हि कूपादौ विद्यमानं सर्वं जलमुपादीयते केनापि ॥ किंतु स्वप्रयोजनाय यावदावश्यकं तावदेव ॥ अतस्त्वं अन्तःकरणशुद्धिज्ञानादिद्वारा मोक्षावाप्तये वेदेषु यदावश्यकं तव तदेवोपादत्स्व ॥ वेदोक्तपरित्यागाद्बिभेमीति चेत् वेदोक्तपरित्यागात् बिभ्यत् त्वं किं वेदोदितं स्त्रीधर्मं ब्रह्मचारियतिवानप्रस्थादिधर्मं चानुतिष्ठासि ॥ नेति चेत् कुतः अधिकारिभेदनियतत्वादुपदेशस्य क्षत्रियस्य गृहस्थस्य यदुपादेयं तदेवोपादीयते मया इति चेत् सात्त्विकेन त्वया यदुपादेयं तदेवाकाम्यकर्मादिकमुपादत्स्व इति युक्तमेवोक्तम् ॥ अनेकार्थपरिकल्पिते अन्नसूपरसभक्ष्यभोज्यशाकोपदंशादिराशावेकैकस्मिन्नपि स्वीयक्षुन्निवृत्तये यावदावश्यकं तावदेवैकैको भुंक्ते ॥ न त्वस्त्यधिकमिति कोऽप्यखिलमत्ति ॥ तथैवेदमित्यवधेहि ॥ ४६ ॥

द्वै ॥ अर्जुनः ॥ फलानि परित्यज्य कर्माण्यकाम्यतया कर्तव्यानि इत्युक्तम् ॥ 'स्वर्गकामो यजेते'त्यादिविधिपदघटितवेदवाक्यनिर्दिष्टं फलं वैदिकोऽहं कथं परित्यजेयम् ॥ वद ॥

कृष्णः ॥ कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ॥
मा कर्मफलहेतुर्भूः मा ते सङ्गोऽस्त्वकर्मणि ॥ ४७ ॥

कर्मणीति ॥ ते तव कर्मण्येव अधिकारः फलेषु कदाचन कदाचिदपि मा न ॥ कर्मणि फलं हेतुः यस्य सः कर्मणः फलं कर्मफलं कर्मफलस्य हेतुः

वा कर्मफलहेतुः मा भूः ॥ ते तव न कर्म अकर्म विरुद्धं निषिद्धं काम्यं च तत्र कर्मणोऽभावः अकर्म कर्माकरणं तत्र च संगः इच्छा माऽस्तु ॥ ४७ ॥

कर्मण्येवाधिकारः पुरुषप्रयत्नसाध्यत्वरूपकार्यत्वम् ॥ फलकामनासु मा न ॥ अतः कर्मण्येवाधिकारः विधिः ॥ फलकामनासु मा न ॥ अतः कर्मण्येव अधिकारः अकरणे प्रत्यवायकथनम् ॥ फलकामनासु मा न ॥ अतः विध्युद्देश्यस्य त्वादृशस्य कर्मण्येव विधिविहिते अधिकारः प्रवृत्तियोग्यता कृतिविषयत्वात् ॥ विधिवाक्यनिर्दिष्टेष्वपि फलेषु कदाऽपि अधिकारो नास्ति ॥ फलकामनायाः तत्तत्फलगतगुणविशेषार्थानत्वादविधेयत्वेन कृतिविषयत्वाभावात् ॥ कर्मण्येव विधिः न फले ॥ फलप्रदर्शनं तु कर्म कारयितुम् ॥ भेषजं ग्राहयितुं शर्कराप्रदर्शनवत् ॥ अतः कदाऽपि कर्मणि फलं हेतुर्यस्य तादृशो मा भूः ॥ फलकामनया कर्म मा कुरु ॥ कर्मणीव फलेऽपि विधिं मत्वा फलकामनया कर्म कुर्वाणास्तु यामिमामित्यादिना निन्दिताः॥ यद्येवं तर्हि किमकाम्यकर्मणा श्रममात्रजनकेन इति चेत् तव कर्माकरणे विरुद्धनिषिद्धकाम्यकर्मकरणे च सङ्गशब्दिता आसक्तिर्मास्तु ॥ ते असङ्गः इति छेदः ॥ अस्य भगवतः कर्म अकर्म अकाम्यकर्म तस्मिन् ते असङ्गः अनिच्छा मास्तु इति वा ॥ अल्पास्थिरस्वर्गपशुपुत्रादिफलाभावेऽपि अनल्पस्थिरमोक्षरूपपरमपुरुषार्थसाधनभगवज्ज्ञानभक्तिप्रसादरूपमहाफलानां भावात् ॥ तत्कामनायास्तु अनिन्द्यत्वेन शिष्टाचारावगतत्वात् ॥ १ 'बहिस्तूभयथाऽपिस्मृतेराचाराच्चे 'ति सूत्रम् ॥ अस्त्वेवं अज्ञानिनो ज्ञातार्थिनः कर्माऽवश्यकम् ॥ लब्धज्ञानरूपकर्मफलेन ज्ञानिना किमर्थं कर्म कार्यमिति चेत् ज्ञानरूपफललाभेऽपि मोक्षे आनन्दातिशयरूपफललाभार्थं ज्ञानिनाऽपि कर्म कर्तव्यमेव ॥ अतः ज्ञानिनः अज्ञानिनो वा ते अकर्मणि सङ्गो माऽस्तु ॥ २ 'भावं तु बादरायणोऽस्ति हि ॥' इति सूत्रम् ॥ अतः अकामनया कर्मकुर्विति युक्तमुक्तम् ॥

नित्यसत्वस्थः आत्मवान् इत्यनेन स्वामित्वेन हरिस्मरणं कर्तव्यमित्युक्तया ब्रह्मैवाहमित्यभेदेन हरिस्मरणं न कर्तव्यं इत्युक्तं भवति ॥ तत्कुत इति चेत् त्वादृशस्य सर्वस्यापि जीवस्य कर्मण्येव योग्यता ॥ कदापि फलेषु योग्यता नास्ति ॥

---

१. ३. ४. ४३. २. १. ३. ३३.

अतः फलदानशक्तत्वाशक्तत्वाभ्यां ईश्वरजीवयोर्भेदावश्यंभावाद्भेदासंभवेन कर्मफलहेतुरीश्वरो मा भूः ॥ त्वामीश्वरं मा मंस्थाः ॥ अभेदं माऽनुसन्धेहि ॥ १ 'फलमत उपपत्तेः ॥' इति सूत्रम् ॥ स्वामित्वेन हरिस्मरणेनैवालं किं कर्मणा इति चेत् तव अकर्मणि सङ्गो मास्तु ॥ कर्तव्याकरणहेतुकप्रत्यवायनिवृत्तये भगवत्प्रसादार्थं च कर्म कर्तव्यमेव ॥ न हि प्रसादजनकं किमपि कर्माकुर्वति स्वामित्वेन स्मरणमात्रात्प्रभुप्रसादो दृश्यते ॥ ४७ ॥

अ ॥ अर्जुनः ॥ मोक्षसाधनभूतज्ञानलाभार्थमकाम्यकर्माणि कुर्वित्युपदिश्यते ॥ मोक्षस्य अन्तरङ्गसाधनं ज्ञानमेवोपदिश्यताम् ॥ बहिरङ्गसाधनानि श्रमजनकानि कर्माणि कुर्विति किमर्थं निर्बध्नासि ॥ बद ॥

कृष्णः ॥ अशुद्धान्तःकरणस्य तवेदानीं कर्मण्येव अधिकारः योग्यता ॥ न ज्ञाने न वा कर्मसंन्यासे ॥ अतो बहिरङ्गसाधनं कर्मैव त्वया अनुष्ठेयम् ॥ तर्हि फलाभिलाषोऽपि स्यात् इति चेत् तव फलेषु अधिकारः कामः कदाऽपि मा भूत् ॥ कर्मण्येव ते अधिकारः मया इदं कर्तव्यमिति बोधः अस्तु ॥ फलेषु अधिकारः मयेदं फलं भोक्तव्यमिति बोधः माऽस्तु ॥ फलेषु ते सङ्गः मा भूत् ॥ सङ्गः इत्युत्तरार्धस्थमपकृष्यते ॥ इति वा ॥ फलकामनया काम्यकर्मकरणं बन्धहेतुः ॥ अतः कर्मफलस्य हेतुः मा भूः ॥ फलकामनायां कर्मफलहेतुः स्याः ॥ भवति हि स्वर्गकामी स्वर्गकामनया स्वर्गप्राप्तिहेतुः ॥ अतः यया फलकामनया फलप्राप्तिहेतुर्भवेः तां फलकामनां त्यज ॥ कर्मफलं स्वर्गपशुपुत्रादिकं हेतुः कर्मसु प्रवर्तकं यस्य तादृशो मा भूः ॥ फलापेक्षया कर्मकृन्मा भूः ॥ इति वा ॥ फलानपेक्षानिबन्धे कर्मैव माऽस्तु इति चेत् तव कर्माकरणे आसक्तिर्माऽस्तु ॥ कर्म कर्तव्यमेव ॥ फलं तु अनपेक्षणीयमेव ॥ श्रद्धत्स्वेदं मदीयं वचनम् ॥ कथमशुद्धान्तःकरणस्य मम कर्मणि इच्छा तत्फलेच्छानिच्छा जायेतेति चेत् मा भैषीः ॥ कर्मण्येव ते कामो भवतु तत्फलेषु कदाऽपि ते कामो मा भवतु ॥ कर्मफलहेतुः मा भूः ॥ ते अकर्मणि सङ्गो माऽस्तु ॥ मदीयेयमाशीः ॥ अनया तव तथैव स्यात् ॥ इति वा ॥ ४७ ॥

वि ॥ अर्जुनः ॥ मुमुक्षोर्यावानर्थः तावानेवोपादेयः न ततोधिकं किमपि इत्युक्तम् ॥ कियानुपादेयः ॥ ब्रूहि ॥

---

१. ३. २. ३९.

कृष्णः ॥ मुमुक्षोस्तव कर्मण्येवाधिकारः योग्यता ॥ स्वर्गपशुपुत्रादिरूपकाम्यकर्मफलेषु उपात्तदुरितक्षयाकरणनिमित्तप्रत्यवायपरिहारप्राजापत्यादिलोकावाप्त्यादिषु नित्यनैमित्तिककर्मफलेषु च न तवाधिकारः ॥ अतः फलं परित्यज्य कर्ममात्रमुपादाय तदकामनया कर्तव्यम् ॥ न केवलं फलपरित्यागेनालम् ॥ किंतु मा कर्मफलहेतुर्भूः ॥ कर्मणः फलस्य च नाहं हेतुः किन्तु गुणाः सर्वेश्वरः परमात्मा वा हेतुः इति आत्मन्यकर्तृत्वानुसन्धानमप्यावश्यकम् ॥ अकर्तृत्वानुसन्धानवान् भव ॥ किं मे परित्यक्तफलेन कर्मणा इति चेत् 'मा ते संगोऽस्वकर्मणि' ॥ कर्म करणं तदभावे अननुष्ठाने न योत्स्ये इत्यादिरूपेण संगो माऽस्तु ॥ युद्धादिविहितकर्मकरण एव संगशब्दितोऽभिलाषोऽस्तु ॥ ४७ ॥

अर्जुनः ॥ एतावता ज्ञानद्वारा मोक्षावाप्तये कर्म कर्तव्यमित्युक्तम् ॥ तत्कर्म कथं कर्तव्यम् ॥ वद ॥

कृष्णः ॥ योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय ।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ॥ ४८ ॥

योगस्थ इति ॥ धनं जयतीति धनंजयः हे धनंजय पार्थ त्वं योगे तिष्ठतीति योगस्थः सन् सङ्गं अहङ्काराममकारफलेच्छारूपं त्यक्त्वा सिद्धिश्च न सिद्धिः असिद्धिः असिद्धिश्च सिद्ध्यसिद्धी तयोः सिद्ध्यसिद्ध्योः समः भूत्वा कर्माणि कुरु ॥ समस्य भावः समत्वं योगः उच्यते ॥ ४८ ॥

योगः ज्ञानोपायः तत्र स्थितः तदेकपरः सन् फलेच्छां कर्तृत्वाभिमानं च त्यक्त्वा फलस्य सिद्धौ असिद्धौ च हर्षशोकरहितो भूत्वा विहितकर्माणि कुरु ॥ कुत एवं कर्तव्यमित्युच्यते इति चेत् सङ्गत्यागयुक्तं समत्वं योगैकदेश उच्यते ॥ सङ्गत्यागसमत्वोपेतकर्मण एव योगत्वात् उक्तरीत्यैव कर्म कर्तव्यम् ॥ नान्यथा ॥ अयमेव योगस्थ इत्यत्रत्यो योग उच्यते ॥ इति वा ॥ योगः भगवत्सम्बन्धः भगवत्प्राप्तिरूपो मोक्षः तत्र स्थितः तदेकपरः सन् उक्तरीत्या कर्माणि कुरु ॥ कुत एवं कर्तव्यमिति चेत् निर्विकारत्वरूपचित्तसमाधानमेव योगाङ्गत्वाद्योग उच्यते ॥ अत एवमेव कर्माणि कर्तव्यानि ॥ १ समं ब्रह्म ॥ वक्ष्यते च ॥ २ 'निर्दोषं हि समं

१. अ. २. ५. १९.

ब्रह्म' इति ॥ तस्य भावः समत्वं ब्रह्मत्वं तदेव योगः ज्ञानेन युज्यते प्राप्यते इति व्युत्पत्त्या योगशब्दवाच्यं ज्ञानप्राप्यं परमं फलं उच्यते ॥ तस्मिन् योगे स्थितः सन् ब्रह्मभावापत्तिरूपमोक्षककामः सन् उक्तरीत्या कर्माणि कुरु ॥ इति वा ॥ धनं स्वर्गसुखं जयति तुच्छत्वेन त्यजतीति धनञ्जयोऽसि ॥ अत एव हि उर्वश्या प्रार्थितस्तद्भोगमुपेक्षिष्ठाः ॥ अतोऽकाम्यं कर्म कर्तुं समर्थोऽसि ॥ ४८ ॥

अर्जुनः ॥ अकाम्यमेव कर्म कर्तव्यमित्युक्तम् ॥ ज्ञानयोगात् तद्धेतुभूताकाम्यकर्मयोगाच्च काम्यकर्म अवरमस्तु ॥ तथाऽपि तस्य कर्मत्वात् विहितत्वात् सफलत्वात् सद्यःफलप्रदत्वेन ज्यायस्त्वात् कर्तव्यमेव तदपि इति भाति ॥ सेव्यन्ते हि लोके राजापेक्षया अवरा अपि अमात्यादयः तदवरा अधिकृताश्च प्रभुत्वात् फलप्रदत्वात् सद्यःफलप्रदत्वेन ज्यायस्त्वाच्च परित्यज्य राजानम् ॥ वद ॥

कृष्णः ॥ दूरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जय ॥
बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ॥ ४९ ॥

दूरेणेति ॥ हे धनञ्जय अर्जुन कर्म, बुद्धिरूपो योगः बुद्धेः ज्ञानस्य योगः उपायः बुद्धया युक्तः कृतो वा योगः बुद्धियोगः तस्मात् दूरेण नितरां अवरम् ॥ बुद्धौ शरणं वासं अन्विच्छ स्वीकुरु ॥ फलं हेतुः येषां ते फलहेतवः फलस्य हेतवो वा कृपणाः दीनाः भवन्ति ॥ ४९ ॥

बुद्धियोगात् कर्म दूरेणावरम् ॥ ज्ञानरूपयोगात् बुद्धेः ज्ञानस्य योगात् उपायात् समत्वादिबुद्धिरूपयोगयुक्तात् बुद्ध्या व्यवसायात्मिकया कृतो योगः तस्मात् निवृत्तिकर्मयोगाच्च काम्यं कर्म दूरेण अत्यन्तं निकृष्टम् ॥ दूरत्वेन तत्फलविपरीतरूपसंसारबन्धप्रापकत्वेन अवरम् ॥ इति वा ॥ अतः बुद्धौ ज्ञाने निवृत्तिकर्मबुद्धौ ज्ञानबुद्धौ च इति वा ॥ कर्मणि क्रियमाणे उक्तरूपसमत्वबुद्धौ वा शरणं निवासं अन्विच्छ स्वीकुरु ॥ तत्रैव वर्तस्व ॥ तत्संपादनैकपरो भव ॥ बुद्धौ ज्ञाननिमित्तं शरणं ज्ञानदानेन रक्षितारं निवृत्तिकर्मयोगमाश्रय॥ इति वा॥ ज्ञाननिमित्तं शरणं सर्वरक्षकं परमात्मानमाश्रय॥ तदेकोद्देशेन कर्म कृत्वा तत्प्रसादेन ज्ञानं संपादय ॥ इति वा॥ काम्यकर्मणो ज्ञानात्तत्साधनभूतान्निवृत्तिकर्मणश्च अत्यन्तमवरत्वात्तन्न कार्यम्॥ कुत इति चेत् फलहेतवः फलं कर्मणि हेतुः येषां ते तादृशाः फलकामनया फलस्य

हेतवो वा काम्यं कर्म कुर्वाणा इति यावत् ॥ कृपणाः दीना भवन्ति॥ १'यो वा एतदक्षरं गार्ग्यविदित्वाऽस्माल्लोकात्प्रैति स कृपणः' इति श्रुतिः ॥ पुनःपुनः संसारचक्रे परिभ्रमन्ति ॥ २'नाकस्य पृष्ठे सुकृते तेऽनुभूत्वेमं लोकं हीनतरं चाविशन्ती'ति श्रुतिः ॥ वक्ष्यते च ॥ ३'क्षीणे पुण्ये मर्त्यलोकं विशन्ती'ति ॥ ४'गताऽऽगतं कामकामा लभन्ते ॥' इति च ॥ कर्मणा ज्ञानं संपादयेत्युक्त्या ज्ञानिनः कर्म अनावश्यकं इति भाति ॥ तत्कथं इति चेत् बुद्धौ ज्ञाने जातायामपि शरणं सर्वरक्षकं परमात्मानं अन्विच्छ आराधय ॥ अभेदबुद्धिर्न कार्या इत्यभिहितं कर्मण्येवेत्यत्र ॥ अज्ञानदशायां व्यावहारिकभेदाऽऽश्रयणेन भेदबुद्धिः कार्या ज्ञानदशायां तु ब्रह्मैवाहमिति पारमार्थिकाभेदबुद्धिरेव कार्या इति चेन्न बुद्धौ जातायामपि विष्णुं शरणं रक्षकमेव अन्विच्छ जानीहि ॥ रक्ष्यरक्षकभावेन भिन्नमेव भावय ॥ नत्वभिन्नम् ॥ कुतः इति चेन्न फलहेतुः ईश्वरः फलहेतवः ईश्वराभेदभावनावन्तस्तु कृपणाः दीनाः भवन्ति ॥ तमः प्राप्नुवन्ति ॥ अतोऽभेदबुद्धिर्न कार्येति युक्तम् ॥ कृपणा जनाः अतिदुःखेन धनमार्जयन्ति तेन दानादिजनितं महत् सुखमसंपादयन्तो यत्किञ्चिद्दृष्टसुखमात्रेण वञ्चयन्त्यात्मानम् ॥ तथा काम्यकर्मकृतो महता दुःखेन कर्माणि कुर्वन्ति तेन महाफलमसंपादयन्तोऽल्पास्थिरस्वर्गादिफलभोगमात्रेण वञ्चयन्त्यात्मानम् ॥ अहो दौर्भाग्यं मौढ्यं च तेषाम् ॥ इति कृपणपदेन सूच्यते ॥ ५'योगस्थः कर्माणि कुर्विन्युक्तम् ॥ कियत्पर्यन्तं कर्म कर्तव्यं इति चेन्न मोक्षं प्रति साधनभूतात् ज्ञानयोगात् ज्ञानसाधनतया परंपरासाधनभूतं अकाम्यमपि कर्म अत्यन्तमवरम् ॥ मोक्षं प्रति दूरत्वेन व्यवहितत्वेन अवरम् ॥ अतः ज्ञान एव यत्नं स्वीकुरु ॥ ज्ञाने जाते तत्रैव वर्तस्व ॥ कर्मयोगं परित्यज ॥ वक्ष्यते च ॥ ६'ज्ञानयोगेन साङ्ख्यानामिति ॥ ७'योगारूढस्य तस्यैव शमः कारणमुच्यते' ॥ इति च ॥ अतः तावत्पर्यन्तं कर्मयोगः कर्तव्यः ॥ तत्रापि अकाम्यमेव कर्म कर्तव्यम् ॥ न तु काम्यम् ॥ कुतः इति चेत् फलहेतवः कृपणाः भवन्ति ॥ इति वा ॥ ४९ ॥

अर्जुनः ॥ ज्ञानयोगात् तत्साधनभूताकाम्यकर्मयोगाच्च कर्म दूरेणावरं इति

---

१. बृ. ५. ८. १०. २. मुं. २. १०. ३. ९. २१. ४. ९. २१. ५. अ. ॥ ६. ३. ३. ७. ६. ३.

ज्ञानतत्साधनकर्मणोर्महामाहात्म्यमुक्तम् ॥ तत्कीदृशम् ॥ तदुपपादय ॥

कृष्णः ॥ बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ॥
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम् ॥ ५० ॥

बुद्धियुक्त इति ॥ इह बुद्ध्या युक्तः बुद्धियुक्तः सुकृतं च दुष्कृतं च सुकृत-दुष्कृते उभे जहाति त्यजति ॥ तस्मात् योगाय युज्यस्व प्रयतस्व ॥ योगः, कर्मसु कुशलस्य भावः कौशलं कुशलं श्रेष्ठं तदेव कौशलं इति वा ॥ ५० ॥

इह ज्ञान्यज्ञानिवर्गे ज्ञानयोगयुक्तः[1] मोक्षप्रतिबन्धकं अत एवानिष्टं पुण्यं पापं च उभे परित्यजति ॥ इह लोके इति वा ॥ इहैव जन्मनि इति वा ॥ इह अकाम्यकर्मणि कृते सति तेन ज्ञानयोगयुक्तः इति वा ॥ इह कर्मणि विषये समत्वबुद्धियोगयुक्तः इति वा॥ [2]मोक्षप्रतिबन्धकपुण्यपापोभयनिवृत्तिर्भवतीत्यावत्॥ ज्ञानस्योभयनिवर्तकत्वे [3]'तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति ॥' इति श्रुतिः ॥ [4]'तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥ इतरस्याप्येवमसंश्लेषः पाते तु ॥' इति सूत्रे च ॥ तस्मात् योगाय ज्ञानरूपोपायसम्पादनाय ज्ञानोपायभूताकाम्य-कर्मयोगाय कर्मयोगाङ्गसमत्वबुद्धियोगाय प्रयतस्व ॥ यत्नेन योगं सम्पादय ॥ ज्ञानोपायः सम्पाद्यते अकाम्यकर्मयोगो माऽस्तु इति चेत् योगः ज्ञानोपायभूतो योगः कर्मसु मध्ये यत् कौशलं श्रेष्ठं निवृत्तिकर्म तदेव ॥ कर्मसु श्रेष्ठं निवृत्ति-कर्मैव योगः इति वा ॥ अतः ज्ञानार्थं तदेव कर्तव्यम् ॥ यद्येवं तर्हि कुतः सर्वेऽपि समत्वयोगयुक्तमेव कर्म नानुतिष्ठन्ति इति चेत् कर्मसु वर्तमानस्य समत्वबुद्धियोगो य उक्तः सः कुशलभावः सामर्थ्यं सामर्थ्यसाध्यः इत्यर्थः ॥ साध्ये साधनवाचक-शब्दप्रयोगः ॥ कर्मसु क्रियमाणेषु कर्मसु वर्तमानस्येति वा यः समत्वबुद्धिरूप-योगः सः कौशलं चातुर्यम् ॥ बन्धकस्वभावानां कर्मणां फलपरित्यागादिना अब-न्धकत्वसम्पादनं महत्कौशलं हि ॥ इति वा ॥ कर्मसु उक्तरूपं यत्कौशलं तदेव योगः उपायः[5] तस्मै युज्यस्व ॥ इति वा ॥ कुतो निवृत्तमेव कर्म कुरु इत्युच्यते

१. इदं च दुष्कृतसनमित्याहाराद्ध्वनि ॥ २. स्वरूपेणेते चेदं 'ज्ञानाग्निः सर्वकर्माणि' 'न हि ज्ञानेन सदृशं' (४. ३७. ४. ३८.) इत्येतद्व्याख्यानावसरे ॥ ३. मुं ५. ३. ४- ४. १. १३. ५. उपा-येन प्रयुज्यमानं कर्म इष्टफलसमर्थं भवति॥ 'विज्ञाय सेवितश्चोरो मैत्रीमेति न चोरताम्॥' इति वासिष्ठे॥

इति चेत् योगः निवृत्तिकर्मयोगः कर्मसु मध्ये कुशलमेव कौशलं स्वसजातीय-दुष्टकर्मनाशनसमर्थम् ॥ अतस्तदेव कर्तव्यम् ॥ कर्मणः उक्तरूपकुशलत्वोक्त्या हन्त परमाद्भुतमिदं जडमपि कर्म स्वसजातीयदुष्टनाशनं करोति ॥ चेतनोऽपि त्वं स्वसजातीयदुष्टचेतननाशनं न चिकीर्षसि ॥ इति सूच्यते ॥ कुत एवं महता यत्नेन समत्वबुद्ध्यादिसाधननिष्पाद्यकर्मयोगेन ज्ञानं सम्पाद्यं इति चेत् योगः ज्ञानयोग एव कर्मसु प्रतिबन्धकतया नाशनीयेषु उभयविधेषु विषये कौशलं नाशनसमर्थं साधनम् ॥ 'न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ॥' इति वक्ष्यते ॥ इति वा ॥ ५० ॥

अर्जुनः ॥ कर्मयोगस्य मोक्षप्रतिबन्धकसुकृतदुष्कृतप्रहाणहेतुत्वात्तस्मैस्पृहयस्येत्युक्तम् ॥ किं सुकृतदुष्कृतहानिरेव पुरुषार्थः ॥ किंच दुष्कृतप्रहाणमनिष्टनिवृत्तिरूपत्वादिष्टम् ॥ सुकृतहानं तु इष्टनाशरूपत्वादनिष्टम् ॥ कथं तस्य फलत्वेनोक्तिः ॥ ब्रूहि ॥

कृष्णः ॥ कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः ॥
जन्मबन्धविनिर्मुक्ताः पदङ्गच्छन्त्यनामयम् ॥ ५१ ॥

कर्मजमिति ॥ कर्मणा जायत इति कर्मजं फलं त्यक्त्वा बुध्या परोक्षज्ञानेन युक्ताः बुद्धियुक्ताः मनीषा अपरोक्षज्ञानं एषां अस्तीति मनीषिणः सन्तः जन्मैव बन्धः जन्मना बन्धो वा जन्मबन्धः तस्मात् वि विशेषेण निः निश्शेषं मुक्ताः जन्मबन्धविनिर्मुक्ताः सन्तः न विद्यते आमयः दोषः दुःखं च यस्मिन् तत् अनामयं पदं स्थानं पद्यते प्राप्यते इति पदं ब्रह्म वा गच्छन्ति प्राप्नुवन्ति ॥ ५१ ॥

समत्वादिबुद्धियुक्ताः कर्मजं फलं त्यक्त्वा फलानपेक्षया कर्म कृत्वा फलपरित्यागमात्रस्य ज्ञानमोक्षाहेतुत्वात्प्रकरणादिदं लब्धम् ॥ मनीषिणः ज्ञानिनः सन्तः कर्मजं फलं त्यक्त्वा तेन बुद्धियुक्ताः परोक्षज्ञानिनः सन्तः तेन च मनीषिणः अपरोक्षज्ञानिनः सन्तः इति वा ॥ प्रशंसार्थकमत्वर्थीयेनिप्रत्ययादिदं लब्धम् ॥ तेन जन्माख्यबन्धात् निश्शेषं मुक्ताः जन्ममूलकबन्धशब्दितस्वच्छन्दत्वहानेर्मुक्ताः सन्तः जन्मना बन्धः संबन्धः यस्मिन् सः तादृशः संसारः तस्मान्मुक्ताः जन्मना बन्धः

संबन्धः यैस्तानि जन्मबन्धानि तेभ्यः पुनःपुनर्जन्मकर्मफलप्रदेभ्यः मोक्षप्रतिबन्धकेभ्यः कर्मभ्यः उक्तरीत्या मुक्ताः सन्तः अनामयं निर्दोषं निर्दुःखं मोक्षस्थानं पद्यते ज्ञायते प्राप्यते च इति व्युत्पत्त्या पदशब्दवाच्यं ज्ञेयं प्राप्यं च परं ब्रह्म तत्तुल्यं शुद्धात्मस्वरूपं वा गच्छन्ति प्राप्नुवन्ति ॥ प्रसिद्धमिदमुपनिषत्सु ॥ अतस्त्वं योगाय युज्यस्व ॥ कृत्वा च निवृत्तं कर्म तेन ज्ञानद्वारा मोक्षमाप्नुहि ॥ ५१ ॥

अ ॥ ज्ञानयोगादवरः अकाम्यकर्मयोगः किमर्थं करणीय इति चेत् बुद्धियुक्ताः ज्ञानयोगयुक्ताः अतः मनीषिणः विद्वांसः कर्मजं फलं त्यक्त्वा ज्ञानाग्निना सर्वकर्मणां दाहे सति 'निमित्तापाये नैमित्तिकस्याप्यपायः' इति न्यायेन त्यक्तकर्मफलाः सन्तः इत्यर्थः ॥ जन्मबन्धविनिर्मुक्ताः जन्मना बन्धः सम्बन्धो यस्य सः जन्मबन्धः देहः तस्मात् मुक्ताः कारणाभावेन भाविदेहात् अभिमानाभावेन वर्तमानदेहाच्च मुक्ताः ॥ जीवत्येव देहे जीवन्मुक्ताः सदेहकैवल्यं प्राप्ताः सन्तः अनामयं आध्यात्मिकादिसर्वोपद्रवरहितं पदं ज्ञानप्राप्यं परं ब्रह्म ॥ भावप्राधान्यात् ब्रह्मत्वं विदेहकैवल्यं गच्छन्ति प्राप्नुवन्ति ॥ प्रसिद्धमिदं वेदशास्त्रपुराणादिषु ॥ बुद्धिशब्दितज्ञानयोगस्य सदेहविदेहकैवल्यप्राप्तिहेतुत्वेन तत्प्राप्त्यर्थमवरोऽपि कर्मयोगः कर्तव्य एव इति च ॥ समत्वबुद्धियोगयुक्ताः कर्मजं फलं त्यक्त्वा अकाम्यं कर्म कृत्वा तेन मनीषिणः 'तत्त्वम' स्यादिवाक्यजन्याऽऽत्मज्ञानवन्तः सन्तः जन्मबन्धात् निश्शेषं मुक्ताः ज्ञेयं प्राप्यं च अनामयं अविद्यातत्कार्यात्मकरोगरहितं परं ब्रह्म अभेदेन प्राप्नुवन्ति ॥ मोक्षप्रतिबन्धकत्वादनिष्टस्यैव सुकृतस्य समत्वबुद्धियोगयुक्ताकाम्यकर्मणा नाशः न तु ज्ञानद्वारा मोक्षसाधकत्वादिष्टस्य सुकृतस्य ॥ अतः ज्ञानद्वारा मोक्षमाप्तुं अकाम्यकर्मयोगः कर्तव्य एव ॥ अतः ज्ञानद्वारा मोक्षमाप्तुं त्वमकाम्यं कर्मानुतिष्ठ इति च ॥ ५१ ॥

द्वै ॥ अर्जुनः ॥ उक्तरीत्या कर्तव्यं निवृत्तिकर्म कियत्पर्यन्तं कर्तव्यम् ॥ वद ॥

कृष्णः ॥ यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ॥
तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥ ५२ ॥

यदेति ॥ ते तव बुद्धिः यदा मोह एव कलिलं दोषः मोहकलिलं व्यति-

तरिष्यति त्यक्ष्यति ॥ तदा त्वं श्रुतस्य श्रोतुं योग्यं श्रोतव्यं तस्य श्रोतव्यस्य च नितरां वेदः लाभः निर्वेदः तं वैराग्यं वा गन्तासि प्राप्स्यसि ॥ ५२ ॥

निवृत्तिकर्मणा शुद्धं तव मनः यदा विपरीतज्ञानरूपं दोषं त्यक्ष्यति ॥ तदा त्वं श्रुतस्य श्रोतव्यस्य च वेदशास्त्रपुराणादेः निर्वेदं नितरां लाभं गन्तासि प्राप्स्यसि ॥ अज्ञानसंशयविपर्ययनिवृत्तिपूर्वकं तत्त्वज्ञानप्राप्तिपर्यन्तं अकाम्यं कर्म कर्तव्यमिति यावत् ॥ ५२ ॥

अ ॥ अर्जुनः ॥ अन्तःकरणशुद्ध्यर्थं कर्माणि कर्तव्यानीत्युक्तम् ॥ कर्मफलभूता अन्तःकरणशुद्धिः कथं ज्ञायेत ॥ ब्रूहि ॥

कृष्णः ॥ ते बुद्धिः अन्तःकरणं यदा मोहकलिलं विपरीतज्ञानात्मकं दोषं, मोहः इष्टानिष्टवियोगसंयोगजपरितापजन्यवैचित्र्यं तदेव कलिलं कालुष्यमिति वा मोहः देहादिष्वात्मबुद्धिः तदेव कलिलं गहनं दुर्गं इति वा त्यक्ष्यति ॥ तदा श्रुतस्य श्रोतव्यस्य च कर्मफलस्य विषये निर्वेदं वैराग्यं प्राप्स्यसि ॥ फलभूतेन वैराग्येण कारणभूता अन्तःकरणशुद्धिः ज्ञायेत ॥ एतावन्तं कालं श्रुतदृष्टादीनां इतःपरं श्रोतव्यद्रष्टव्यादीनां च कर्मफलानां विषये यदा वैराग्यं प्राप्स्यसि तदा मया कृतेनाकाम्यकर्मणा शुद्धान्तःकरणोऽहमभूवमिति ज्ञास्यसि ॥ तावत्पर्यन्तं अकाम्यं कर्म कर्तव्यम् ॥ श्रुतस्य श्रोतव्यस्य च दृष्टस्य द्रष्टव्यस्य च ज्ञातस्य ज्ञातव्यस्य च गृहीतस्य ग्रहीतव्यस्य च शास्त्रार्थस्य विषये वैराग्यं गमिष्यसि ॥ मलिनायां बुद्धौ श्रुतश्रोतव्यादिकं व्यर्थम् ॥ अस्फुरणात् ॥ शुद्धायामपि बुद्धौ तद्व्यर्थम् ॥ सद्यः स्फुरणात् ॥ उक्तरूपकर्मणा चित्तशुद्धौ श्रवणादिकं त्यक्त्वा ध्याननिष्ठ एव भव ॥ इति वा ॥ ५२ ॥

वि ॥ अर्जुनः ॥ संगं त्यक्त्वा सिद्ध्यसिद्ध्योः समो भूत्वा कर्माणि कुर्वित्युक्तम् ॥ अन्तःकरणशुद्ध्यर्थं कर्मयोगः कर्तव्य इत्यप्युक्तम् ॥ अशुद्धान्तःकरणः चित्तशुद्ध्यर्थं कर्म कुर्वन् कथं अन्तःकरणशुद्धिसिद्धसंगत्यागादिसहितं कर्म कुर्यात् ॥ किंच अन्तःकरणशुद्धौ संगत्यागादिसहितकर्मानुष्ठानं तादृशकर्मानुष्ठाने अन्तःकरणशुद्धिः इत्यन्योन्याश्रयदोषोऽपि ॥ अतः कथमिदम् ॥ वद ॥

कृष्णः ॥ तव बुद्धिः विपरीतज्ञानरूपदोषं यदा त्यक्ष्यति तदा त्याज्यतया मम सकाशात् श्रुतस्य श्रोतव्यस्य चार्थस्य विषये निर्वेदं हेयसंगोपादेयवैतृष्ण्यमूलकं स्वावमाननं तेन हेये वैराग्यं उपादेयोपादित्साजनकं प्राप्स्यसि ॥ त्याज्यतया श्रुतस्य श्रोतव्यस्य च कृते तन्निमित्तं तत्परित्यागार्थं वैराग्यं प्राप्स्यसि ॥ त्याज्यतया श्रुतस्य उपादेयतया श्रोतव्यस्य च कृते त्याज्यं त्यक्तुं उपादेयं उपादातुं च वैराग्यं प्राप्स्यसीति वा ॥ उपक्रमे अशुद्धांतःकरणतया संगत्यागादिसहितकर्मकरणासमर्थस्त्वं संगत्यागादिरहितमेव कर्म कर्तुमारभस्व ॥ कुर्वंश्च कर्मयोगं तत्कर्म मय्यर्पय ॥ कृतेनाशुद्धेन मय्यर्पितेन कर्मणाऽहं प्रसन्नो, मदुक्तानि कर्माणि करोत्ययं ॥ मनस्त्वशुद्धमेनं अल्पास्थिरफलतृष्णोत्पादनेन महाफलाच्च्यावयितुमुद्युङ्क्ते ॥ अतः अस्य मनो निगृह्य अस्य वशे नेयम् ॥ इत्यालोच्य स्वयमहमशुद्धं मनः शुद्धं करोमि ॥ शुद्धे च मनसि वैराग्यमुत्पद्यते ॥ तेन च संगत्यागादिपूर्वककर्मानुष्ठाने प्रवृत्तिर्जायते ॥ तदा यथोक्तकर्मानुष्ठानं भविष्यति ॥ अतः श्रद्धया कर्मयोगमारभस्व ॥ क्रमेण स सांगः सफलश्च भविष्यति ॥ ५२ ॥

द्वै ॥ अर्जुनः ॥ तत्त्वज्ञानोदयपर्यन्तं कर्म कर्तव्यमित्युक्तम् ॥ लब्धपरोक्षज्ञानेन पुंसा कर्म कर्तव्यं वा न वा ॥ ब्रूहि ॥

कृष्णः ॥ श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ॥
समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ॥ ५३ ॥

श्रुतीति ॥ श्रुतिभिः वेदवाक्यैः श्रवणैर्वा विप्रतिपन्ना विरुद्धतया जाता विशेषेण जाता वा ते बुद्धिः ज्ञानं मनो वा यदा निश्चला सती समाधौ संप्रज्ञातासंप्रज्ञातलक्षणे सति अचला स्थास्यति ॥ सं सम्यक् आधीयते सर्वं अस्मिन् इति समाधिः परं ब्रह्म तस्मिन यदा अचला स्थास्यति ॥ इति वा ॥ बुद्धिः ज्ञानं सम्यक् आधीयते सर्वं अस्मिन् इति समाधिः मनः तस्मिन् यदा अचला स्थास्यति ॥ इति वा ॥ तदा योगं कर्मफलसंबन्धं अवाप्स्यसि प्राप्स्यसि ॥ ५३ ॥

श्रुतिभिः आपाततो विरुद्धार्थकत्वेन प्रतीयमानैः वेदवाक्यैः विप्रतिपन्ना इदमदो वेति संशयेन विपरीतज्ञानेन च कलुषिता बुद्धिः परोक्षज्ञानं मनो

वा यदा श्रुतीनामैकार्थ्यज्ञानेन संशयविपर्ययरहिता सती असच्छास्त्रप्रसंगकोलाहलैः चालयितुं न शक्यते तदा तन्निश्चलं परोक्षज्ञानमित्युच्यते ॥ इयं परोक्षज्ञानकाष्ठा ॥ एवं यदा बुद्धिशब्दितं परोक्षज्ञानं मनो वा दृढतामापद्यते तदैव संप्रज्ञातसमाधिशब्दितं खण्डध्यानं सिध्यति ॥ तदर्थं परोक्षज्ञानदार्ढ्यपर्यन्तं परोक्षज्ञानिना कर्म कर्तव्यम् ॥ संप्रज्ञातसमाधौ सति तदनन्तरं बुद्धिः अपरोक्षज्ञानमुत्पद्यते ॥ प्राप्तपरोक्षज्ञानकाष्ठेन संप्रज्ञातसमाधिद्वारा अपरोक्षज्ञानोदयपर्यन्तं कर्म कर्तव्यम् ॥ ततः असंप्रज्ञातसमाधिर्भवति ॥ असंप्रज्ञातसमाधौ सति बुद्धिः मनः भगवति अचला चलनहीना अवतिष्ठते ॥ इयमपरोक्षज्ञानकाष्ठा ॥ तदा योगं कर्मयोगानुष्ठानफलं प्राप्स्यसि ॥ उपायेन लब्धफलो भविष्यसि ॥ स्थितप्रज्ञो भविष्यसि ॥ लब्धापरोक्षज्ञानेन असंप्रज्ञातसमाधिद्वारा भगवति मनसो निश्चलावस्थानसिद्धिपर्यन्तं कर्म कर्तव्यम् ॥ श्रुतौ विशेषेण प्रतिपन्ना श्रुत्यर्थविनिश्चयं प्राप्ता बुद्धिः मनः यदा निश्चला संशयादिरहिता स्थास्यति तदा समाधिः समाधानं श्रुत्यर्थनिश्चयः तस्मिन् सति अपरोक्षज्ञानेन सा बुद्धिः भगवति अचंचला भवति ॥ तदा योगं भगवद्योगं मुक्तिं प्राप्स्यसि ॥ एवं मुक्तिप्राप्तिपर्यन्तं कर्म कर्तव्यम् ॥ एवं कर्मयोगावधिर्दर्शितः ॥ ५३ ॥

अ ॥ अर्जुनः ॥ कर्मजा अन्तःकरणशुद्धिः वैराग्येण लक्षणेन ज्ञातव्येत्युक्तम् ॥ तादृशान्तःकरणशुद्धिपरिपाकजन्या ज्ञाननिष्ठा कदा जायते जातेति केन ज्ञातव्या ॥ वद ॥

कृष्णः ॥ तव बुद्धिः मनः श्रुतिभिः कर्मतत्फलज्ञानतत्फलसगुणब्रह्मतन्माहात्म्यनिर्गुणब्रह्मतन्माहात्म्यप्रतिपादकनानाविधवेदवाक्यैः नानाविधार्थश्रवणैर्वा फलश्रवणैर्वा विप्रतिपन्ना विविधतया जाता विरुद्धतया जाता वा संशयविपर्ययादिदूषिता सती मननादिजनिततत्त्वनिश्चयेन यदा समाधौ सम्यक् आधीयते चित्तमस्मिन्निति वा सर्वं जगत् आधीयते आरोप्यते अस्मिन्निति वा समाधिः प्रत्यगात्माभिन्नः परमात्मा तस्मिन् निश्चला विक्षेपशब्दितविपर्ययरहिता अचला विकल्पशब्दितसंशयरहिता च सती स्थास्यति निवातदीपवत् स्थिरा भविष्यति ॥ वक्ष्यते च ॥ १ 'यथा दीपो निवातस्थः' इति ॥ तदा योगं कर्मजन्यान्तःकरणशुद्धि-

---

१. ६. १९.

परिपाकजन्यां तत्त्वमस्यादिमहावाक्यार्थग्रहणजन्यां ब्रह्मात्मैक्यज्ञानलक्षणां ज्ञानयोगनिष्ठां स्थितप्रज्ञतालक्षणां प्राप्स्यसि ॥ निश्चला जाग्रत्स्वप्नदर्शनलक्षणविक्षेपरहिता अचला सुषुप्तिमूर्च्छास्तब्धीभावादिरूपलयलक्षणचलनरहिता इति वा ॥ निश्चला असंभावनाविपरीतभावनारहिता अचला दीर्घकालादरनैरन्तर्यसत्कारसेवनैः विजातीयप्रत्ययादूषिता इति वा ॥ निश्चला कुतर्कैरनास्कन्दिता अचला विक्षेपरहिता इति वा ॥ श्रुतिभिः विप्रतिपन्ना ते बुद्धिः श्रुतौ रोचनार्थायां फलश्रुतौ विप्रतिपन्ना त्यक्तादरा समाधौ परब्रह्मणि निश्चला कृतनिश्चया अचला विक्षेपरहिता च यदा स्थास्यति तदा योगं परमात्मना योगं ऐक्यलक्षणसंबन्धं प्राप्स्यसि ॥ इति वा ॥ श्रुतिभिः तत्त्वमस्यादिवेदवाक्यैः विप्रतिपन्ना विशेषेण प्रतिपत्तिमती विशिष्टज्ञानवती ते बुद्धिः यदा निश्चला विक्षेपरहिता सती समाधौ असंप्रज्ञातसमाधौ अचला निवातदीपवत् स्थास्यति तदा योगं स्थितप्रज्ञतारूपां प्रज्ञास्थैर्यलक्षणां ज्ञानयोगनिष्ठां प्राप्स्यसि॥ इति वा ॥ अन्तःकरणशुद्धया श्रवणादि जायते ॥ सति श्रवणादौ संशयादिकमुत्पद्यते ॥ मननादिना संशयादिनिवृत्त्या ब्रह्मैवाहमिति ब्रह्मात्मैकत्वज्ञानेन मनसो विक्षेपलयराहित्येन ब्रह्मणि स्थिरतरमवस्थानं तेन मोक्षः इति क्रमः ॥ उक्तरूपा स्थितप्रज्ञतालक्षणा अपरोक्षज्ञाननिष्ठा १ 'प्रजहाति यदा कामा 'नित्यादिना वक्ष्यमाणेन लक्षणेन समाधावचलाबुद्धिरित्युक्तेन २ ज्ञातव्या ॥ अतस्त्वं कर्मानुष्ठाय स्थितप्रज्ञो भव ॥ ५३ ॥

वि ॥ अर्जुनः ॥ समत्वबुद्धियोगयुक्तकर्मणो मोक्षहेतुत्वोक्त्या तद्धेतुभूतापरोक्षज्ञानहेतुत्वमुक्तं भवति॥ तत्कथं ॥ परोक्षज्ञानसाध्यं ह्यपरोक्षज्ञानम् ॥ कथमल्पमतिरहं परोक्षज्ञानद्वारा अपरोक्षज्ञानमाप्नुयाम् ॥ वद ॥

कृष्णः ॥ मा भैषीः ॥ मा च कुरु चिन्ताम् ॥ त्वं तु कृतःर्थोऽभूः ॥ यतोऽस्मन्मुखात् श्रवणभाग्यं लब्धवानसि॥ वक्ष्यते च ॥ ३ 'देहभृतां वरे 'ति ॥ ४ 'एतद्बुध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत ।' इति च ॥ श्रुतिविप्रतिपन्ना श्रुतिः श्रवणं अर्थात् अस्मत्त इति लभ्यते ॥ अस्मत्तः श्रवणेन विशेषतः प्रतिपन्ना तव

१. २. ५५. २. ज्ञानयोगनिष्ठालाभेन बुद्धिप्रसादो ज्ञेयः ॥ इति चित्तशुद्धेर्लिङ्गान्तरोक्तिरियमिति केचित् ॥ ३. ८. ४. ४. १५. २०.

बुद्धिः शास्त्रश्रवणजन्यं परोक्षज्ञानं स्वयमचला एकरूपार्थविषयत्वादेकरूपा विषयान्तररहिता च सती सम्यक् आधीयते आत्मज्ञानमस्मिन्निति व्युत्पत्त्या समाधिशब्दिते तैलधारावदविच्छिन्नस्मृतिहेतुभूते मनसि यदा निश्चला स्थास्यति ॥ अचला पूर्वोक्तबहुशाखत्वानन्तत्वरूपदोषरहिता इति वा ॥ श्रुतिविप्रतिपन्ना श्रवणेन सम्यगुत्पन्ना निश्चला मननेन स्थिरीकृता अचला कुतर्कैरकंपनीया इति वा ॥ परोक्षज्ञानकाष्ठारूपा स्थितप्रज्ञताख्यज्ञानयोगनिष्ठा यदा ते भविष्यति तदा तद्द्वारा योगं आत्मावलोकनाख्यमात्मसाक्षात्कारं प्राप्स्यसि ॥ सिद्धमिदानीं तव श्रवणसाध्यं परोक्षज्ञानं अस्मत्तः श्रवणात् ॥ तत्र मननादिना संशयविपर्ययपरिहारः परं कार्यः ॥ समत्वबुद्धियोगयुक्तकर्मानुष्ठानविशोधितेन मनसा मननादिना तत्करणे च स्थितप्रज्ञताख्यज्ञानयोगनिष्ठा सेत्स्यति ॥ तत्सिद्धौ च स्वत एव आत्मावलोकनरूपं साक्षात्कारशब्दितं अपरोक्षज्ञानमुदेष्यति ॥ अतो न भेतव्यम् ॥ परोक्षज्ञानसाध्यत्वेऽपि साक्षात्कारस्य कर्मसाध्यत्वोक्तिर्युक्ता ॥ कर्मणः शास्त्रजन्याऽऽत्मविषयकपरोक्षज्ञानपूर्वकत्वात् ॥ तत्काष्ठारूपज्ञाननिष्ठाहेतुत्वाच्च ॥ उक्तं हि मया ॥ १ 'व्यवसायात्मिका बुद्धिरेकेह' इति ॥ वक्ष्यते च ॥ २ 'यं संन्यास इति प्राहुर्योगं तं विद्धि पाण्डव ॥' इति च ॥ आत्मविषयकपरोक्षज्ञानेन कर्मयोगः ॥ तेन च स्थितप्रज्ञताख्या परोक्षज्ञानकाष्ठा ॥ तया च आत्मावलोकनं तेन च भगवति भक्तिः तया च तस्य साक्षात्कारः तेन च तत्प्राप्तिरूपो मोक्षः ॥ अतः मोक्षहेतुभगवदपरोक्षज्ञानहेतुभूतात्मावलोकनसाधनपरोक्षज्ञानकाष्ठामवाप्तुं कर्मयोगः कर्तव्यः ॥ ५३ ॥

द्वे ॥ अ ॥ सञ्जयः ॥ उक्तरूपं अकाम्यं कर्म कुर्वतः परोक्षज्ञानद्वारा अपरोक्षज्ञानं तेन च मोक्षप्राप्तिः फलमित्युक्तम् ॥ श्रुत्वा यदि मोक्षहेतुभूतापरोक्षज्ञानस्य गरिमाऽज्ञास्यत तर्हि तत्संपादने प्रवृत्तिरुदपत्स्यत सर्वेषामिति मत्वा लोकोपकारार्थं अपरोक्षज्ञानिलक्षणं अजानान इव पृच्छति भगवन्तं पार्थः ॥

अर्जुन उवाच ॥

स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ॥
स्थितधीः किं प्रभाषेत किमासीत व्रजेत किं ॥ ५४ ॥

---

१. २. ४१. २. ६. २.

स्थितेति ॥ हे केशव कृष्ण समाधौ तिष्ठतीति समाधिस्थः तस्य स्थिता प्रज्ञा यस्य सः स्थितप्रज्ञः तस्य भाषा लक्षणं का किं ॥ स्थिता धीः प्रज्ञा यस्य सः स्थितधीः सः किं कथं प्रभाषेत ॥ किं कथं आसीत उपविष्टः स्यात् ॥ किं कथं व्रजेत व्रजेत् ॥ ५४ ॥

द्वै ॥ समाधिस्थस्य असंप्रज्ञातसमाधिस्थत्वरूपलक्षणवत्तया उक्तस्य स्थितप्रज्ञशब्दितस्यापरोक्षज्ञानिनः लक्षणं किम् ॥ वद ॥ लक्षणमित्यनुक्त्वा भाषेत्युक्तिः कुत इति चेत् भाष्यते व्यवह्रियतेऽनयेति भाषा व्यवहारहेतुभूतं लक्षणमित्यर्थलाभाय ॥ तर्हि अनादृशं लक्षणं किमप्युक्तं पूर्वमिति भाति इति चेत् उक्तमेवैकं लक्षणम् ॥ किं तदिति चेत् असंप्रज्ञातसमाधिस्थत्वम् ॥ तर्हि तेनैव व्यवहारसिद्धया व्यवहारोपयोगिलक्षणान्तरप्रश्नः किमर्थमिति चेत् असंप्रज्ञातसमाधिस्थत्वलक्षणस्य तादात्विकत्वादयावद्द्रव्यभावित्वेन व्यवहारानुपयोगितया यावद्द्रव्यभावित्वेन व्यवहारोपयोगिलक्षणान्तरं ब्रूहीति प्रश्नाशयः ॥ येनायमपरोक्षज्ञानीति व्यवह्रियेत तल्लक्षणं ब्रूहि ॥ असंप्रज्ञातसमाधिस्थत्वरूपलक्षणस्य संप्रज्ञातसमाधिस्थे व्युत्थिते च ब्रह्मज्ञानिनि असत्वाद्व्याप्तिश्च ॥ अतो लक्षणान्तरं ब्रूहि ॥ इति पृच्छ्यते ॥ तर्हि उक्तालक्षणादन्यत्किमपि अपरोक्षज्ञानिनो लक्षणमुच्यतामिति प्रष्टव्यम् ॥ समाधिस्थस्य ज्ञानिनो लक्षणं ब्रूहि इति तु पृच्छसि ॥ किं असंप्रज्ञातसमाधिमान् विवक्षितः उत संप्रज्ञातसमाधिमान् ॥ आद्ये अपरोक्षज्ञानिमहिम्नो जिज्ञासितत्वेन अपरोक्षज्ञानिसामान्यस्य लक्षणस्य वक्तव्यतया यत्, दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ॥ ' 'तत्तत्प्राप्य शुभाशुभम् ॥ नाभिनन्दति न द्वेष्टि ॥' इति लक्षणं वक्ष्यते ॥ तस्य असम्भवः स्यात् ॥ असंप्रज्ञातसमाधिस्थस्य सुखदुःखशुभाशुभप्राप्तेरभावेन तस्य तस्मिन्नसत्वात् ॥ द्वितीये संप्रज्ञातसमाधिस्थत्वाभाववति व्युत्थिते समाधिरहिते अपरोक्षज्ञानिमात्रे 'प्रजहाति यदाकामा'नित्यादिना वक्ष्यमाणलक्षणस्य सत्त्वादतिव्याप्तिः स्यात् ॥ किं ब्रवीषि ॥ इति चेत् समाधिस्थस्येति विशेषणं न तादृशस्य स्थितप्रज्ञस्य लक्षणजिज्ञासयाऽभिहितम् ॥ किंतु यस्यापरोक्षज्ञानिनः पूर्वश्लोके असंप्रज्ञातसमाधिस्थत्वरूपं लक्षणमुक्तं तस्य लक्षणान्तरं ब्रूहीत्याशयेन पूर्वोक्तासंप्रज्ञातसमाधिस्थत्वरूपलक्षणानुवादेन प्रश्नः॥ सर्वमिदं लक्षणमित्यनुक्त्वा भाषेत्युक्तया लभ्यते॥ समाधिस्थ-

स्य समाधिशब्दितमनस्समाधानवतः इति वा॥ समाधिशब्दिते परमात्मनि निष्ठावतः इति वा ॥ स्थितधीः स्थितप्रज्ञः किं प्रयोजनं प्रति प्रभाषेत किं प्रति समाधिं विहाय उपविशेत् ॥ किं प्रति च गतागतं कुर्यात् ॥ तस्य ब्रह्मानन्दमग्नत्वेन प्रयोजनान्तरानपेक्षणात् न भाषणादौ प्रवृत्तिर्युक्ता ॥ दृश्यते च सा ॥ शुकादौ दर्शनात् ॥ अतः अपरोक्षज्ञानिनः असंप्रज्ञातसमाधिना ब्रह्मानन्दमग्नत्वोक्तिरयुक्ता इत्युत्तरार्धे आक्षेपः ॥ बलवत्कारणवशात् प्रवृत्तिरिति चेत् तत्कारणं किमिति प्रश्नः ॥ त्वं ब्रह्मरुद्रयोरपि प्रेरकत्वात्केशवोऽसि ॥ अतस्त्वं जिज्ञासितसकलार्थबोधनशक्तोऽसि ॥ ५४ ॥

अ ॥ हे केशव स्थिता स्थितिं प्राप्ता प्रज्ञा अहं ब्रह्मास्मि इत्येवंरूपं अपरोक्षज्ञानं यस्य तस्य असंप्रज्ञातसमाधियोगे स्थितस्य अपरोक्षज्ञानिनः भाषा भाषणं का किं किंमूलकं भाषणं वचनं व्यवहारः ॥ केन लक्षणेन अयमपरोक्षज्ञानीति परैर्व्यवह्रियेत ॥ लक्षणेन हि व्यवहारः ॥ अपरोक्षज्ञानी इति व्यवहारहेतुभूतं लक्षणं किमिति यावत् ॥ स्थितप्रज्ञः कथं प्रभाषेत ॥ कथमासीत ॥ कथं व्रजेत गतागतं कुर्यात् ॥ तस्य भाषणादीनि विलक्षणानि हि स्युः॥ कीदृशानि तानि ॥ समाधिस्थस्येति विशेषणेन स्थितप्रज्ञताख्यज्ञानयोगनिष्ठायां असंप्रज्ञातसमाधिना ब्रह्मानन्दामृतरसमग्नता मनसः सेत्स्यतीत्यतः तत्साधनमुपदेष्टव्यमिति प्रश्नाशयः इति सूच्यते ॥ यद्येवं साधनजिज्ञासया प्रश्नः तर्हि साधनं किमित्येव प्रष्टव्यम् ॥ लक्षणं किमिति तु पृच्छसि ॥ कथमिदमिति चेत् अयत्नसिद्धतया यान्यपरोक्षज्ञानिनो लक्षणानि यत्नसाध्यतया तानि अपरोक्षज्ञानं संपिपादयिषोः [१] साधनानि ॥ अतः साधनप्रश्न एवायम् ॥ यद्येवं साधनप्रश्ने तात्पर्यं तर्हि मुमुक्षोः साधनमेव साक्षादपृष्ट्वा अपरोक्षज्ञानिलक्षणप्रश्नमुखेन तत्प्रश्नः कृतः इति चेत् अपरोक्षज्ञानिलक्षणानामुक्तौ श्रोतॄणां अस्माभिस्तादृशैर्भवितव्यमिति तथाभवितुमपरोक्षज्ञानसम्पादने स्वरसतः प्रवृत्तिः स्यादिति मुमुक्षूणां

१. अत एवोक्तमभियुक्तैः ॥ 'विद्यास्थितये प्राग्ये साधनभूताः प्रयत्ननिष्पाद्याः ॥ लक्षणभूतास्तु पुनः स्वभावतस्ते स्थिताः स्थितप्रज्ञे ॥ जीवन्मुक्तिरितीमां वदन्त्यवस्थां स्थितात्मसंबोधां ॥ बाधितभेदप्रतिभासबाधितात्मप्रबोधसामर्थ्यात् ॥' इति ॥

अपरोक्षज्ञानसाधनसंसाधने प्रवृत्तिमुत्पादयितुं लक्षणप्रश्नः ॥ स्थिता ब्रह्माकारेण निश्चला बाह्यविषयानवगाहिनी प्रज्ञा बुद्धिर्यस्य तस्य आरूढस्य भाषा आरूढत्वेन भाषणं का कदा स्थितप्रज्ञ इति भाष्येत इति वा ॥ का भाषा किं लक्षणं ॥ किं प्रभाषेत कथं व्यवहरति ॥ किमासीत व्युत्थानेन विक्षिप्तानां बहिरिन्द्रियाणां निग्रहदशायां कथमुपविशति ॥ किं व्रजेत बहिरिन्द्रियनिग्रहाभावदशायां कथं विषयानाप्नोति ॥ ज्ञाननिष्ठो द्विविधः समाधिस्थः व्युत्थितश्चेति ॥ तत्र समाधिस्थविषये काभाषेत्येकः प्रश्नः ॥ व्युत्थितस्य विषये किंप्रभाषेतेत्याद्यास्त्रयः प्रश्नाः ॥ इति चत्वारोऽत्र प्रश्नाः ॥ सर्वान्तर्यामित्वात्त्वमेवेदृशप्रश्नप्रतिवचनसमर्थोऽसि ॥ अतस्सम्यगिदमुपदिश ॥५४॥

वि ॥ सञ्जयः ॥ स्थितप्रज्ञताख्यपरोक्षज्ञाननिष्ठाकाष्ठामवाप्स्यसीत्युक्तं श्रुत्वा तस्य स्थितप्रज्ञस्य स्वरूपं अनुष्ठानं च ब्रूहि इति पृच्छति भगवन्तं पार्थः ॥

कृष्णः ॥ हे केशव समाधिस्थस्य समाधिः मनः तत्र स्थितस्य तद्वशीकरणेनावस्थितस्य स्थितप्रज्ञस्य भाषा का भाष्यते उच्यते अनयेति भाषा वाचकः शब्दः कः ॥ तस्य स्वरूपं कीदृशमिति यावत् ॥ वाचकशब्दप्रश्नेन स्वरूपं कीदृशमिति स्वरूपप्रश्नो लभ्यते ॥ तत्कुत इति चेत् केनचित् वाचकशब्देन प्रकारभूतप्रवृत्तिनिमित्तविशिष्टस्वरूपं निर्देष्टव्यम् ॥ स्वरूपनिर्देशको वाचकः शब्दः कः इति प्रश्ने तेन निर्देष्टव्यम् स्वरूपं कीदृशमिति प्रश्नः पर्यवस्यति ॥ स्थितधीः स्थितप्रज्ञः किं कथं प्रभाषेत कथमासीत कथं व्रजेत ॥ पूर्वार्धे स्वरूपप्रश्नः ॥ उत्तरार्धे किंप्रभाषेतेति वाचिकानुष्ठानस्य किमासीतेति १ मानसानुष्ठानस्य किं व्रजेतेति कायिकानुष्ठानस्य च प्रश्नः ॥ इति चत्वारोऽत्र प्रश्नाः ॥ ५४ ॥

हैं ॥ सञ्जयः ॥ एवं पार्थेन पृष्टो भगवान् स्थितप्रज्ञ २ लक्षणमाह ॥ प्रजहातीत्यादिना ॥

॥ श्रीभगवानुवाच ॥

प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान् ॥
आत्मन्येवाऽऽत्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥ ५५ ॥

१. ध्यानार्थत्वाज्ज्ञान्यासनस्य किमासीतेत्यस्य मानसानुष्ठानप्रश्नपरत्वं ॥ २. उत्तरार्धे कृताऽऽक्षेपस्य परिहारस्तु 'यानिशा' इति वक्ष्यते ॥

प्रजहातीति ॥ हे पार्थ अर्जुन मनः गताः मनोगताः तान् मनोगतान् सर्वान् कामान् यदा प्र निःशेषं जहाति त्यजति ॥ आत्मना मनसा स्वेनैवेति वा आत्मन्येव आत्मस्वरूप एव परमात्मन्येवेति वा तुष्टः संतुष्टश्च वर्तते ॥ तदा स्थितप्रज्ञः उच्यते ॥ तुष्टः सन् कामान् प्रजहाति ॥ इति वा ॥ ५५ ॥

यदा मनोगतान् सर्वान् कामक्रोधादीन् निरवशेषं जहाति ॥ यदा परमात्मन्येव स्थितः सन् परमात्मप्रसादेन ब्रह्मानन्दानुभवादन्यत्रालंबुद्धिं प्राप्तो भवति ॥ तदा स्थितप्रज्ञः उच्यते ॥ ज्ञानिनामपि धर्माविरुद्धकामदर्शनाद्विरुद्धकामप्रहाणमत्र विवक्षितम् ॥ विरुद्धकामस्यापि क्वचिद्दर्शनात् प्रायो विरुद्धकामप्रहाणमत्र विवक्षितम् ॥ ज्ञानोदये कामादिनिवृत्तिः कुत इति चेत् कामादयो यस्मिन्मनसि वर्तन्ते तस्मिन्मनसि १ तद्विरोधिनो ज्ञानस्योदये कामादिनिवृत्तेरवश्यंभावात् मनोगतान् कामान् प्रजहातीत्युक्तम् ॥ निवर्तनशक्तस्य विरोधिनः प्रबलस्य स्वावासस्थाने स्थापने निवर्तनीयः सदनमाक्रम्य त्यक्तुमनीहया विवदमानः पुमान् तेन सहावस्थातुमशक्नुवानः स्वयमेव निवर्तते ॥ एतद्युक्तिसूचनायैव मनोगतानित्युक्तिः ॥ 'योगे त्विमां शृणु' ॥ इति ज्ञानोपायोपदेशं प्रतिज्ञातवतो मम, कृतेऽपि लक्षणप्रश्ने प्रकरणमिदं ज्ञानोपायोपदेशप्रकरणमिति ज्ञानोपायानेव वक्ष्यामीत्यनुक्त्वा प्रजहातीत्यादिना अभ्युपगम्य लक्षणप्रश्नं लक्षणवचनमनुचितमिति चेत् यानि ज्ञानिनो लक्षणानि तानि जिज्ञासोर्ज्ञानसाधनानि इत्याशयेन लक्षणोपदेशः ॥ ज्ञानिनो लक्षणत्वेनोच्यमानस्य विरुद्धकामप्रहाणादेः जिज्ञासौ उपायत्वेन विद्यमानत्वादतिव्याप्तिर्लक्षणस्य स्यात् ॥ न हि अतिव्याप्तिमल्लक्षणं भवितुमर्हतीति चेत् ज्ञानिनोऽयत्नसिद्धं लक्षणं जिज्ञासोर्यत्नसाध्यं साधनमिति भेदसत्त्वान्नोक्तदोषः ॥ पार्थेदमवधेहि ॥ ५५ ॥

अर्जुनः ॥ लक्षणमिदं विवरणेन विस्पष्टय ॥

कृष्णः ॥ दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ॥
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥ ५६ ॥

दुःखेष्विति ॥ यः दुःखेषु प्राप्तेष्वपि न उद्विग्नं अनुद्विग्नं अनुद्विग्नं

---

१. रसोऽप्यस्य परं दृष्ट्वा निवर्तते ॥' इति विरोधो वक्ष्यते ॥

मनः येषां ते अनुद्विग्नमनाः सुखेषु विगता स्पृहा इच्छा यस्मात् सः विगतस्पृहः रागश्च भयं च क्रोधश्च रागभयक्रोधाः वीताः रागभयक्रोधाः यस्य सः वीतरागभयक्रोधः सः मुनिः ज्ञानी स्थितधीः उच्यते ॥ ५६ ॥

दुःखेषु प्राप्तेषु अनुद्विग्नमनाः अक्षुभितचित्तः सुखेषु विषये विगतस्पृहः अशोभने शोभनत्वभ्रमो रागः रागभयक्रोधादिदोषरहितः सन् सदा भगवन्मननशीलः स्थितप्रज्ञ उच्यते ॥ ५६ ॥

कृष्णः ॥ यः सर्वत्रानभिस्नेहः तत्तत्प्राप्य शुभाशुभम् ॥
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥ ५७ ॥

य इति ॥ यः सर्वत्र न विद्यते अभिस्नेहः यस्य सः अनभिस्नेहः सन तत्तत् शुभं च अशुभं च अनयोः समाहारः शुभाशुभं प्राप्य नाभिनन्दति न द्वेष्टि ॥ तस्य प्रज्ञा प्रतिष्ठिता ॥ सः स्थितप्रज्ञः ॥ ५७ ॥

सर्वेषु विषयेषु स्नेहरहितः अतएव तत्तत्प्राप्तिविगमरूपं शुभाशुभं प्राप्यापि नाभिनन्दति तोषेण न प्रशंसति ॥ न द्वेष्टि द्वेषेण न निन्दति ॥ तस्य प्रज्ञा प्रतिष्ठिता ॥ सः स्थितप्रज्ञः ॥ लिङ्गशरीरनाशात्प्राक् किञ्चिद्देहाभिमानस्य सत्वात्सर्वत्रस्नेहराहित्यं कथं इति चेत् किंचित्स्नेहस्यावर्जनीयत्वात् अतिस्नेहराहित्यमत्र विवक्षितम् ॥ अतएव अस्नेह इत्यनुक्त्वा अनभिस्नेह इत्युक्तम् ॥ ५७ ॥

कृष्णः ॥ यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ॥
इन्द्रियाणीन्द्रियार्थेभ्यः तस्य प्रज्ञा प्रतिष्ठिता ॥ ५८ ॥

यदेति ॥ अयं, कूर्मः कमठः अङ्गानीव सर्वशः सर्वाणि सर्वैः प्रकारैर्वा इन्द्रियाणि इन्द्रियाणां अर्थाः विषयाः इन्द्रियार्थाः तेभ्यः यदा संहरते निवर्तयति ॥ तदा तस्य प्रज्ञा प्रतिष्ठिता ॥ सः स्थितप्रज्ञः ॥ ५८ ॥

अयं ज्ञानी विषयेषु प्रसृतानि सर्वाणि इन्द्रियाणि कूर्मः प्रसृतान् करचरणाद्यवयवानिव उपसंहरति च तदा अयं स्थितप्रज्ञ उच्यते ॥

विषयेभ्यः इन्द्रियाणां निवर्तनं जिज्ञासोर्यत्नसाध्यमपि ज्ञानिनोऽयत्नसाध्यमिति सूचयितुं कूर्मोऽङ्गानीति दृष्टान्तः ॥ प्रजहातीत्युक्तं लक्षणं श्लोकत्रयेण विवृतम् ॥ ५८ ॥

अ ॥ सञ्जयः ॥ एवमनुनेन पृष्टो भगवान् चतुर्णां प्रश्नानां १ क्रमेणोत्तरमाह ॥

कृष्णः ॥ आत्मन्येव परमानन्दरूपे प्रत्यगात्मस्वरूप एव स्थितः आत्मना स्वेनैव बाह्यविषयलाभनैरपेक्ष्येण तुष्टः २ स्वात्मानन्दरसानुभूत्यैव संतोषं प्राप्तः यदा मनसि स्थितान् मनोधर्मान् अनात्मधर्मत्वात्प्रहाणयोग्यान् सर्वान् इच्छाभेदान् विषयान्वा निरवशेषं सवासनं त्यजति तदा सः स्थितप्रज्ञः अपरोक्षज्ञानी उच्यते ॥ आत्मन्येव न तु तुच्छे ॥ आत्मना स्वप्रकाशचिद्रूपेण तेन न तु वृत्त्या तृप्त इति वा ॥ इदं समाधिस्थस्य का भाषेत्यस्योत्तरम् ॥ ५५ ॥

कृष्णः ॥ व्युत्थितविषयकप्रश्नत्रये प्रथमस्योत्तरं वक्ष्यम ॥ ज्वरशिरोवेदनादिनिमित्तकेषु आध्यात्मिकेषु चोरव्याघ्रसर्पादिनिमित्तकेषु आधिभौतिकेषु वर्षवातातपनिमित्तकेषु आधिदैविकेषु च दुःखेषु प्राप्तेषु अक्षुभितचेताः तथा आध्यात्मिकादिषु त्रिविधेषु सुखेषु प्राप्तेषु स्पृहाशब्दिततृष्णाभिवृद्धिरहितः॥ इन्धनाधानादग्नेरिव सुखप्राप्तेस्तृष्णाया अभिवृद्धिर्भवति तद्रहितः॥ रागभयक्रोधादिरहितः सर्वं ब्रह्मतया मनुते न तु तत्तदाकारेणेति मुनिः ब्रह्मनिष्ठः यदा भवति तदा स्थितप्रज्ञ उच्यते ॥ दुःखेषु दुःखहेतुषु प्राप्तेषु अक्षुभितचित्तः सुखेषु सुखहेतुषु प्राप्तेषु विगतस्पृहः आदररहितः इति वा ॥ दुःखेषु रजःपरिणामात्मकचित्तवृत्तिविशेषेषु प्राप्तेषु

१. 'प्रजहाती'ति प्रथमस्य, 'दुःखे'ष्वित्यादिद्वाभ्यां द्वितीयस्य, 'यदे'त्यादिषडिभः तृतीयस्य 'रागद्वेषे'त्याद्यष्टभिः चतुर्थस्य च प्रश्नस्योत्तरं बोध्यं ॥ 'प्रजहाती'ति प्रथमस्य, 'दुःखे'ष्विति द्वितीयस्य 'या निशे'त्यादिद्वाभ्यां तृतीयस्य, 'विहाये'ति चतुर्थस्य इति केचित् ॥ 'प्रजहाती'ति प्रथमस्य 'यस्सर्वत्रे'ति द्वितीयस्य 'यदे'ति तृतीयस्य, 'विहाये'ति चतुर्थस्य च इत्यपरे ॥ 'प्रजहाती'ति लक्षणं ॥ 'दुःखे'ष्विति लक्षणान्तरं ॥ 'यस्सर्वत्रे'ति लक्षणान्तरं ॥ इति केचित् ॥ २. अत्र 'न केचनजगद्भावाः तत्त्वज्ञैरजयन्त्यमी ॥ नागरं नागरीकान्तं कुग्रामललना इव ॥' इति वासिष्ठवचनमनुसन्धेयम् ॥

अनुद्विग्नमनाः अहो पापोऽहं धिङ्मां दुरात्मानं एतादृशदुःखभागिनं को मे दुःखं निराकुर्यादित्यनुतापात्मकश्चित्तवृत्तिविशेषः उद्वेगः तद्रहितचित्तः ॥ सुखेषु सत्त्वपरिणामात्मकचित्तवृत्तिविशेषेषु प्राप्तेषु विगतस्पृहः तत्सजातीयागामिसुखविषयतृष्णारहितः अहो धन्योऽहं यस्य ममेदृशसुखमुपस्थितं को वा मया तुल्यस्त्रिभुवने केनोपायेन ममेदं सुखं न विच्छिद्येतेत्येवमात्मकः उत्फुल्लतारूपः हर्षात्मकः चित्तवृत्तिविशेषः स्पृहा तद्रहित इति वा ॥ अशोभने शोभनाध्यासनिमित्तको विषयाभिनिवेशरूपश्चित्तवृत्तिविशेषो रागः ॥ तद्विषयविनाशके समुपस्थिते तन्निवारणासामर्थ्यमात्मनो मन्यमानस्य दैन्यात्मकश्चित्तवृत्तिविशेषो भयम् ॥ तद्विषयविनाशके समुपस्थिते तन्निवारणसामर्थ्यमात्मनो मन्यमानस्य ज्वलनात्मकश्चित्तवृत्तिविशेषः क्रोधः ॥ उक्तरूपरागभयक्रोधरहितः मुनिः स्थितप्रज्ञ उच्यते ॥ मुमुक्षुः दुःखेनोद्विजेत् ॥ सुखे च न प्रहृष्येत् ॥ वीतरागभयक्रोधश्च भवेत् ॥ इति साधनविधिरपि बोध्यः ॥ एवमुत्रापि ॥ ५६ ॥

कृष्णः ॥ यः सर्वत्र देहगेहधनाऽऽरामजीवितादौ अत्यासक्तिरहितः सन् तत्तत् शुभं अशुभं वा प्राप्यापि नाभिनन्दति न हृष्यति न द्वेष्टि न विषीदति तस्य प्रज्ञा प्रतिष्ठिता ॥ सः स्थितप्रज्ञः ॥ अन्यविषयः प्रेमापरपर्यायो मनोवृत्तिविशेषः स्नेहः ॥ यस्मिन् सति परस्य दुःखं सुखं च स्वस्मिन्नारोपयति ॥ तद्रहितः ॥ शुभं अशुभं च शुभं सुखहेतुं विषयं शुभप्रापयितारं वा अशुभं दुःखहेतुं विषयं अशुभप्रापयितारं वा प्राप्यापि नाभिनन्दति न प्रशंसति न द्वेष्टि न निन्दति ॥ गुणकथनादिप्रवर्तिका मनोवृत्तिरभिनन्दः ॥ निन्दादिप्रवर्तिका मनोवृत्तिर्द्वेषः ॥ तदुभयरहितः इति वा ॥ आपत्सु संपत्सु च न किमपि भाषते ॥ किंतु तूष्णीमेव तिष्ठतीति, शिष्यशिक्षार्थं अनुद्वेगनिस्पृहत्वादिवाचः प्रभाषते स्तुतिनिन्दारूपा वाचो न भाषते इति वा, किं प्रभाषेत इत्यस्योत्तरमुक्तम् ॥ ५७ ॥

कृष्णः ॥ व्युत्थितविषयकद्वितीयप्रश्नस्योत्तरं वक्ष्मि ॥ अयं ज्ञानी कूर्मः अङ्गानीव सर्वाणि इन्द्रियाणि श्रोत्रादीनि वागादीनि च यदा विषयेभ्यः संहरते निवर्तयति सङ्कोचयति तदा तस्य प्रज्ञा प्रतिष्ठिता ॥ सः स्थितप्रज्ञः स्थितप्रज्ञो व्युत्थितः ॥ प्रारब्धकर्मवशात् व्युत्थानेन विक्षिप्तानीन्द्रियाणि समाध्यर्थं

पुनरुपसंहरन्नासीत ॥ इन्द्रियाणां विषयेभ्यो व्यावर्तनं ज्ञानसाधनमिति बोध्यम् ॥ ५८ ॥

वि ॥ संजयः ॥ मोक्षहेतुभगवदपरोक्षज्ञानहेतुभूतात्मावलोकनसाधनपरोक्षज्ञाननिष्ठाकाष्ठां स्थितप्रज्ञताख्यामवाप्तुं कर्मयोगं कुरु इत्युक्तं स्ववचनं श्रुतवता पार्थेन कर्मयोगफलभूतां स्थितप्रज्ञताख्यां परोक्षज्ञाननिष्ठाकाष्ठां प्राप्तस्य स्वरूपमनुष्ठानं च ब्रूहीति पृष्टो भगवान् प्रश्नानामुत्तरमाह ॥

कृष्णः ॥ यदा आत्मना मनसा आत्मस्वरूप एव प्रीतिमान् आत्मस्वरूप एव स्थितेन मनसा तुष्टः अन्यत्र जातालंप्रत्ययः सन् सर्वान् मनोगतान् इच्छाभेदान् प्र अपुनरंकुरं यथातथा जहाति तदा सः स्थितप्रज्ञः उच्यते ॥ इदं, आत्मैकानुसन्धानरूपं तदासनं इत्येवं किमासीतेत्यस्य प्रश्नस्य उत्तरभूतं, आत्मैकरतित्वरूपं तत्स्वरूपं इत्येवं का भाषेत्यस्याप्युत्तरं भवति ॥ अतः तस्य स्वरूपं कीदृशं तस्य मानसानुष्ठानप्रकारः कीदृश इति द्वयोः प्रश्नयोरुत्तरभूतोऽयं श्लोकः ॥ परोक्षज्ञाननिष्ठस्य चतस्रोऽवस्थाः ॥ तत्र तत्काष्ठारूपा वशीकारसंज्ञाख्या चतुर्थी दशा ॥ तद्धेतुभूता ततोऽर्वाचीना एकेन्द्रियसंज्ञाख्या तृतीया दशा ॥ तद्धेतुभूता ततोऽर्वाचीना व्यतिरेकसंज्ञाख्या द्वितीया दशा ॥ तद्धेतुभूता ततोऽर्वाचीना यतमानसंज्ञाख्या प्रथमा दशा ॥ पूर्वपूर्वा उत्तरोत्तरनिष्पाद्या ॥ परोक्षज्ञाननिष्ठस्य या तत्काष्ठारूपा वशीकारसंज्ञाख्या चतुर्थी अवस्था सा 'प्रजहाती'ति श्लोके प्रतिपादिता ॥ ५५ ॥

कृष्णः ॥ तद्धेतुभूतां ततोऽर्वाचीनां एकेन्द्रियसंज्ञाख्यां तृतीयां दशां शृणु ॥ प्रियविश्लेषादिदुःखहेतुषु संनिहितेषु प्राप्तेष्वपि अचलितचेताः निर्दुःखचित्तो वा प्रियसंश्लेषादिसुखहेतुषु संनिहितेषु प्राप्तेष्वपि विगतेच्छः विगतात्यादरः अनागतेषु विषयेषु इच्छा रागः प्रियविश्लेषाप्रियसंश्लेषहेतुदर्शनजं दुःखं भयं प्रियविश्लेषाप्रियसंश्लेषहेतुभूत[२]चेतनान्तराणां दुःखोत्पादनहेतुभूतो मनोविकारः क्रोधः तद्रहितः एवं भूतः आत्ममननशीलः स्थितप्रज्ञ उच्यते ॥ अत्र मानसानुष्ठानप्रकार उच्यते ॥ अतः इदमपि किमासीतेति प्रश्नस्य

१. यद्यपि वैराग्यं मोक्षेच्छा तत्परत्वं चेत्येतत्त्रयमेव ज्ञानयोगसिद्धेः साधनं ॥ तथापि इन्द्रियजयमन्तरेण वैराग्यादेरनुदयादिन्द्रियजयोऽपि ज्ञानसाधनमुच्यत इति बोध्यं ॥ २. क्रोधादात्महननाद्यपि परपीडाभिप्रायेणेति भावः ॥

उत्तरम् ॥ तृतीयचतुर्थ्योरुभयोरप्यवस्थयोः कामक्रोधादिविरहसाम्येऽपि तृतीयस्यां दशायां भस्मच्छन्नदहनवदौत्सुक्यमात्रहेतुभूतवासनाशेषस्य विद्यमानत्वात् तृतीयस्याश्चतुर्थीतो भेदः ॥ चतुर्थ्यां समस्तवासनाविलयादौत्सुक्यमात्रमपि नावतिष्ठते ॥ ५६ ॥

कृष्णः ॥ तद्धेतुभूतां ततोऽर्वाचीनां व्यतिरेकसंज्ञाख्यां द्वितीयां दशां शृणु ॥ यः सर्वेषु प्रियेषु विषये अनभिस्नेहः स्नेहातिशयहेतुकप्रवृत्तिरहितः सन् दैवात् तत्तत् प्रियसंश्लेषरूपं शुभं प्रियविश्लेषरूपं अशुभं प्राप्यापि नाभिनन्दति न द्वेष्टि च ॥ शुभं प्राप्य नाभिनन्दति ॥ प्राप्तप्रियवस्तुसंबन्धिषु कालान्तरेषु च प्रीत्यनुवृत्तिहेतुभूतं मनोविकासं न प्राप्नोति ॥ अशुभं प्राप्य न द्वेष्टि ॥ अत्राप्यभीति विवक्षितं नाभिद्वेष्टीति ॥ प्राप्ताप्रियवस्तुसंबन्धिषु कालान्तरेषु च अप्रीत्यनुवृत्तिहेतुभूतं मनस्संकोचं न प्राप्नोति ॥ तस्य प्रज्ञा प्रतिष्ठिता सः स्थितप्रज्ञः ॥ अत्र मानसानुष्ठानप्रकारस्य भाषणं च आत्मतत्त्वैकविषयमिति वाचिकानुष्ठानप्रकारस्य प्रवृत्तिश्च आत्मप्राप्त्यर्थैवेति कायिकानुष्ठानप्रकारस्य चोक्त्या करणत्रयानुष्ठानविषयप्रश्नत्रयोत्तरमिदम् ॥ ५७ ॥

कृष्णः ॥ तद्धेतुभूतां ततोऽर्वाचीनां यतमानसंज्ञाख्यां प्रथमां दशां शृणु ॥ यदा अयं परोक्षज्ञाननिष्ठः विषयेषु प्रवृत्तानि प्रवर्त्तितुमुद्युक्तानि च इन्द्रियाणि इन्द्रियग्राह्यतत्तद्विषयेभ्यः कूर्मः अंगानीव सर्वशः सर्वैः प्रकारैः विलोकनभाषणविलासपरिहासकेलिपरिरम्भादिसकलविधव्यापारैः सह दोषदर्शनादिभिः नानाप्रकारैः सर्वैर्हेतुभिर्वा संहरते तानि उपसंहृत्य आत्मन्येव मनोऽवस्थापयति ॥ वक्ष्यते च ॥ 'तानि सर्वाणि संयम्य युक्त आसीत मत्परः ॥' इति ॥ तस्य प्रज्ञा प्रतिष्ठिता ॥ सः स्थितप्रज्ञः ॥ पूर्वत्र आत्मन्येव भाषणं आत्मन्येवानुसन्धानं आत्मन्येव प्रवृत्तिरिति करणत्रयानुष्ठनप्रकारः उक्तः ॥ अत्र तु अन्यविषये भाषणं न अन्यविषये मनःप्रवृत्तिर्न अन्यविषये गमनमुपादानादिकं च न इति करणत्रयानुष्ठानप्रकार उच्यते ॥ इति भेदः ॥

पार्थ इदमवधेहि ॥ यथा पिता दुष्टैराकृष्य दुर्विषयेषु प्रवर्त्यमानं पुत्रं दुर्विषयेभ्यो निवर्तयितुं प्रथमं आकर्षकान् दुष्टानेव दूरीकरोति न तु पुत्रं निर्बध्नाति वैरस्य प्रसङ्गात् ॥ दूरीकृत्य च तान् दुष्टान् पुत्रं तैरनाकृष्टं स्वसदन एवावस्थाप्य सन्मार्गे प्रवर्तयति ॥ तथा शास्त्रजन्यपरोक्षज्ञाननिष्ठावान्

प्रत्यवायज्ञानाभावेन भयाभावादपथे प्रवृत्य स्वयमनुभूय तत्र मनः समाकृष्य पातयितुं प्रवृत्तानि प्रवर्तितुमुद्युक्तानि च बाह्येन्द्रियाणि, भयाभावदशायां प्रसारितानि स्वीयकरचरणादीनि भये समुत्पन्ने सद्य एव कूर्म इव उपसंहृत्य इन्द्रियैरनाकृष्टं मनः स्वस्थान एवावस्थाप्य स्वात्मन्येव प्रवर्तयेत॥ इयं यतमानसंज्ञाख्या परोक्षज्ञाननिष्ठायाः प्रथमाऽवस्था॥ यथा पिता दुष्टान् दूरीकृत्य स्वगृह एवावस्थापितस्य पुत्रस्य तत्संसर्गात्सञ्जातापथरुचेः समये तैः सह बहिर्गमननिवारणाय हितोपदेशादिना औदासीन्यानभिनन्दनादिकमुत्पाद्य तदीयव्यापारानुपरमयति ॥ तथा सावशेषरागद्वेषादिदोषकलुषितस्य मनसः इन्द्रियैर्बहिर्गमननिवारणार्थं पक्वावशिष्टरागद्वेषादिदोषपचनाय औदासीन्यानभिनन्दनादिना मनोव्यापारानुपरमयेत् ॥ इयं व्यतिरेकसंज्ञाख्या द्वितीयाऽवस्था॥ यथा पिता उपरतव्यापारस्यापि पुत्रस्य दुष्टसंसर्गकालिकविषयानुभवभावितवासनया विषयेषु भोग्यत्वबुद्धिरूपया कदाचिद्विषयेषु मनः प्रवर्तेत तन्माभूदिति परमभोग्यं अनिषिद्धं विहितमुचितं विषयं प्रदर्श्य तत्र तं प्रवर्त्य तत्र रुचिमुत्पाद्य तदन्यत्र वासनामुन्मूलयति ॥ तथा मनसः परमभोग्यमात्मवस्तु यथावदुपपाद्य तत्र तस्य रुचिमुत्पाद्य तदितरबाह्यविषयेषु वासनामुन्मूलयेत् ॥ इयं एकेन्द्रियसंज्ञाख्या तृतीयाऽवस्था ॥ यथा पिता उचितविहितविषयरुच्या उन्मूलितदुर्विषयवासनाबलेन पुत्रेण अमन्दमानन्दमनुभवति॥ तथा परमभोग्यात्मवस्तुनि जातया रुच्या समुन्मूलितबाह्यविषयवासनाजालेन मनसा आत्मन्येव तुष्येत् ॥ इयं वशीकारसंज्ञाख्या चतुर्थी अवस्था ॥ इयं च परोक्षज्ञाननिष्ठायाः काष्ठा स्थितप्रज्ञताख्या ॥ सेयं योगाख्यमात्मावलोकनं साधयति ॥ तच्चात्मावलोकनं भगवदपरोक्षसाक्षात्कारद्वारा परमपुरुषार्थभूतमोक्षाय कल्पते ॥

यथा पिता स्वगृहे स्थितां मातापितृबन्धुभिरितरैश्चाऽऽप्तैः स्वस्वगृहान् प्रति नीयमानां तत्रैव कंचित्कालं स्थित्वा पुनरागच्छन्तीं परिणययोग्यवयसः प्राप्तौ तत्रतत्र गमनं निरुध्य स्वगृह एवावस्थाप्य हठात्तत्रतत्रगमननिवारणाय हितमुपदिश्य औदासीन्यानभिनन्दनादिकमुत्पाद्य तदीयव्यापारानुपरमय्य कस्मैचित्तां प्रदाय तद्गृहं प्रति प्रेषितां पूर्वानुभूतमातापितृतदीयबन्धुरूपविषयवासनया तत्र रुचिमलभमानां स्वयं तत्र गत्वा सह तया तत्र स्थित्वा तत्र सुखं प्रदर्श्य तत्र रुचिमुत्पाद्य तथा समुन्मूलिताशेषतदितरवस्तुवासनां तत्रैव रममाणां तदेकालंबनां स्व-

कन्यां दृष्ट्वा हृष्यति ॥ तथा परोक्षज्ञानवान् स्वबुद्धिं क्रमात् आत्मैकालंबनां कृत्वा तत्र रमयन् स्वयं तुष्येत् ॥ इत्यपि बोध्यम् ॥ विषयाणां अदर्शनं तुरीयदशायाम् ॥ दृश्यमानेष्वपि तेषु निस्संगता तृतीयदशायाम् ॥ संगलेशेन भुज्यमानेष्वपि तेषु नाति-स्नेहो द्वितीयदशायाम् ॥ प्रचुरे रागे तन्निरोधसंरंभः प्रथमदशायाम् ॥ इति विवेकः॥ तदेवं स्थितप्रज्ञताख्यपरोक्षज्ञाननिष्ठावतः आत्मरतित्वरूपं स्वरूपमिति तत्स्वरूप-प्रश्नस्य तदेकविषयं भाषणं तदनुसन्धानरूपं तदासनं तत्प्राप्त्यर्थप्रवृत्तिरूपं तद्भजनं इति तदनुष्ठानत्रयप्रकारप्रश्नत्रयस्य च चतुर्भिरेतैः श्लोकैरुत्तरं दत्तमित्यवधेयम् ॥५८॥

द्वै ॥ अर्जुनः ॥ सर्वान् कामाननायासेन प्रजहातीति ज्ञानिनो लक्षणमुक्तम् ॥ तेन, ज्ञानेन कामक्रोधाद्यनर्थनिर्वृत्तिरनायासेन भवतीत्युक्तं भवति ॥ यद्येवं तर्हि सर्वैस्तदर्थं ज्ञानमेव संपादनीयम् ॥ न च कामक्रोधादियुक्ताः तन्निवृत्तये ज्ञानसं-पादनाय यतन्ते ॥ तत्कुतः ॥ वद ॥ 'यदा संहरते चाय'मिति इन्द्रियजयस्याऽऽवश्य-कता उक्ता ॥ तस्य उपायं ब्रूहि ॥

कृष्णः ॥ विषया विनिवर्तन्ते निराहारस्य देहिनः ॥
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ॥ ५९ ॥

विषया इति ॥ निर्गतः आहारः यस्मात् सः निराहारः तस्य निराहारस्य देहः अस्यास्तीति देही तस्य देहिनः पुरुषस्य रसः रागः तं वर्जयित्वा रसवर्जं विषयाः विनिवर्तन्ते ॥ अस्य रसोऽपि परं ब्रह्म दृष्ट्वा निवर्तते ॥ ५९ ॥

ज्ञानं इन्द्रियजयसाध्यं इन्द्रियजयस्तु महायासेन साध्यः ॥ अतः इन्द्रियजय-साध्यस्य ज्ञानस्य दुःसंपादत्वात् न तत्संपादनाय यतन्ते ॥ किमिन्द्रियजयस्ता-दृशः इति चेत् आहाररहितस्य उपवासिनः विषयाः विनिवर्तन्ते ॥ निराहारस्य कस्याप्यर्थस्य सिद्धिः न भवति ॥ वक्ष्यते च ॥ 'न चैकान्तमनश्नतः ॥' इति इति चेत् महानुभावस्य विषये तथा अतादृशस्य विषये तु अल्पाहारस्येत्यर्थः ॥ दृश्यते चाल्पधने निर्धन इति प्रयोगः ॥ अनिराहारस्य इति छेदः ॥ निः नितरां आहारः यस्य स निराहारः न निराहारः अनिराहारः तस्य मिताहारस्येत्यर्थः ॥ वक्ष्यते च ॥ 'युक्ताऽऽहारविहारस्ये'ति ॥ इति वा ॥ तादृशस्य देहाभिमानवत आत्मनः विषयाः विषयभोगशक्तिमन्ति इन्द्रियाणि निवर्तन्ते ॥ निराहारत्वेन कथमिन्द्रि-

याणि निवर्तेरन् इति चेत् 'स विशेषणे ही'ति न्यायात् इन्द्रियाणां विषयभोगशक्तयो निवर्तन्ते इत्यर्थः । किं निराहारस्य विषयाऽऽशाऽपि निवर्तते इति चेत् रसवर्जं रसो विषयेच्छा तां वर्जयित्वा ॥ निराहारस्यापि विषयाऽऽशा न निवर्तते ॥ रसस्य कदा निवृत्तिरिति चेत् अस्य रसोऽपि परमात्मानं साक्षात्कृत्य निवर्तते ॥ चक्षुःश्रोत्रजिह्वाघ्राणत्वगाख्यानां पञ्चानामपीन्द्रियाणां विषयभोगशक्तिनिवृत्तिः परं निराहारत्वेन भवति ॥ विषयाऽऽशानिवृत्तिस्त्वपरोक्षेणैव भवति ॥ केषाञ्चिदेवम् ॥ केषाञ्चित्तु रसवर्जं रसनेन्द्रियं वर्जयित्वा तदितरेषां चतुर्णामिन्द्रियाणां विषयभोगशक्तिः विषयाऽऽशा च निराहारत्वेन निवर्तते ॥ रसोऽपि रसनेन्द्रियस्य रसभोगशक्तिः रसेच्छा च अपरोक्षेणैव निवर्तते ॥ रसनेन्द्रियेतरेन्द्रियाणां विषयभोगशक्तिनिवृत्तिः विषयाशानिवृत्तिश्च निराहारत्वेन भवति ॥ रसनेन्द्रियस्य रसभोगशक्तिनिवृत्तिः रसेच्छानिवृत्तिश्च अपरोक्षेणैव भवति ॥ शक्तिनिवृत्तिरूपः स्थूलजयः निराहारत्वेन भवति ॥ रागनिवृत्तिरूपः सूक्ष्मजयस्तु अपरोक्षज्ञानेन भवति ॥ अत इन्द्रियजयस्य महाऽऽयाससाध्यत्वान्न तत्साध्ये ज्ञाने प्रयतन्ते ॥ ज्ञानकामैस्तु महता प्रयत्नेन इन्द्रियजयः संपादनीयः ॥ ५९ ॥

अ ॥ अर्जुनः ॥ इन्द्रियाणां विषयेभ्यो व्यावर्तनं ज्ञाननिष्ठायाः साधनमित्युक्तम् ॥ तत्कथम् ॥ इन्द्रियाणां विषयेभ्यो व्यावर्तनेऽपि रागरूपप्रतिबन्धकसत्त्वेन ज्ञाननिष्ठाऽनुदयात् ॥ अन्यथा इन्द्रियैर्विषयाननाहरतः आतुरस्य कष्टे तपसि वर्तमानस्य च विद्याविहीनस्य सुषुप्तस्यापि ज्ञानोदयापत्तेः ॥ वद ॥ आवश्यकस्येन्द्रियजस्य उपायं ब्रूहि ॥

कृष्णः ॥ आहारशब्दितविषयस्वीकाररहितस्य[1] विषयानस्वीकुर्वतः देहिनः विषयाः इन्द्रियाणि विषया वा विषयाशावर्जं विनिवर्तन्ते ॥ तादृशस्य रागरूपप्रतिबन्धकसत्त्वान्न ज्ञानोदयः ॥ अस्य प्रतिबन्धको रसशब्दितो रागोऽपि परं ब्रह्म अहमेव तदित्यपरोक्षतो ज्ञात्वा निवर्तते ॥ रागरूपप्रतिबन्धकनिवृत्तौ ज्ञानं ज्ञाने प्रतिबन्धकरागनिवृत्तिः इत्यन्योऽन्याश्रयः इति चेत् अस्य रसः परं ब्रह्म दृष्ट्वा परोक्षतो ज्ञात्वा निवर्तते ॥ इयं स्थूलरागनिवृत्तिः ॥ ततः निवृत्तस्थूलरागस्य रसः परं

१. उपवासपरस्य इति केचित् ॥

दृष्ट्वा अपरोक्षतो ज्ञात्वा निवर्तते ॥ इयं सूक्ष्मरागनिवृत्तिः ॥ अपिशब्दाद्विषयाश्च निवर्तन्ते ॥ परोक्षज्ञानेन स्थूलरागनिवृत्तिः ततोऽपरोक्षज्ञाननिष्ठा तया च सूक्ष्मरागनिवृत्त्या मोक्षः इति नान्योऽन्याश्रयः ॥ आह्रियन्ते गृह्यन्ते विषया एभिरित्याहाराः इन्द्रियाणि तेभ्यो निर्गतः निराहारः इन्द्रियनिग्रहवान् तस्य विषयाः, रसः विषयेषु भोग्यत्वभावना तद्वर्जं विनिवर्तन्ते ॥ अस्य रसः भोग्यत्वभावना तु परं दृष्ट्वा निवर्तते ॥ इति वा ॥ विषयाणामनाहरणादिन्द्रियजयः जितेन्द्रियस्य परोक्षापरोक्षज्ञानाभ्यां स्थूलसूक्ष्मरागनिवृत्त्या मोक्षः ॥ अत इन्द्रियजयस्य ज्ञानसाधनत्वोक्तिर्युक्ता ॥ ५९ ॥

वि ॥ अर्जुनः ॥ स्थितप्रज्ञताख्या परोक्षज्ञाननिष्ठाकाष्ठा इन्द्रियजयसाध्या ॥ इन्द्रियजयस्तु परमदुश्शकः ॥ अतः सा दुष्प्राया ॥ कथं मम सा सेत्स्यति ॥ इन्द्रियजयद्वारा तत्प्राप्त्युपायं ब्रूहि ॥

कृष्णः ॥ आह्रियन्त इत्याहारा विषयाः तभ्यो निर्गतः निराहारः [1] विषयभ्यः प्रत्याहृतेन्द्रियः तस्य देहिनः विषयाः रागवर्जं विनिवर्तन्ते ॥ अस्य रागोऽपि परं विषयेभ्यः परमभोग्यं आत्मस्वरूपं दृष्ट्वा निवर्तते ॥ आत्मदर्शनं इन्द्रियजयद्वारा ज्ञाननिष्ठाकाष्ठाप्राप्तावुपायः ॥ महता प्रयत्नेन आत्मदर्शनं संपादय ॥ तेन चेन्द्रियजयद्वारा ज्ञाननिष्ठाकाष्ठा सेत्स्यति ॥ मा भैषीः ॥ ५९ ॥

द्वै ॥ अर्जुनः ॥ इन्द्रियजयस्य निराहारत्वेन अपरोक्षज्ञानेन च साध्यत्वोक्त्या असाध्यत्वमुक्तं भवति ॥ तच्चायुक्तम् ॥ विनैव निराहारतां 'इन्द्रियाणां विचरतां विषयेषु स्वभावतः ॥ बलादाहरणं तेषां प्रत्याहारः स उच्यते' ॥ इत्युक्तप्रत्याहाररूपसाधारणयत्नमात्रेण तेषां विषयेभ्यो निवृत्तिसंभवेन, तथा विनैवापरोक्षज्ञानं नित्यानित्यवस्तुविवेकरूपसाधारणज्ञानमात्रेण मनसो रागनिवृत्तिसंभवेन चेन्द्रियजयस्य सुसाध्यत्वात् ॥ अस्तु वा इन्द्रियजयो दुःसाध्यः । तच्चाविदुषां विदुषां तु

१. 'न चैकान्तमनश्नतः' (६. १६) 'युक्ताहारविहारस्य' (६. १७) इति वक्ष्यमाणत्वान्नात्र प्रसिद्धाहारनिषेधः ॥ प्रसिद्धाहारवर्जनस्य कतिपयविषयनिवृत्तिहेतुत्वेऽपि सकलविषयनिवृत्यहेतुत्वाच्च ॥

विवेकादिन्द्रियजयः सुसाध्यः ॥ अतो न विद्वद्भिरिन्द्रियजयार्थं महान् यत्नः कार्यः ॥ यद् ॥

कृष्णः ॥ यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः ॥
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥ ६० ॥

यतत इति ॥ हे कौन्तेय अर्जुन विपश्चित् विद्वान् तस्य विदुषोऽपि यततोऽपि यत्नं कुर्वतोऽपि पुरुषस्य प्रमथ्नन्तीति प्रमाथीनि इन्द्रियाणि प्रसभं बलात्कारेण मनः हरन्ति ॥ हि प्रसिद्धम् ॥ हिशब्दो हेतौ वा ॥ ६० ॥

विपश्चितोऽपि परोक्षज्ञानजन्यविवेकवतोऽपि यततोऽपि प्रत्याहाररूपसाधारणप्रयत्नं कुर्वतोऽपि पुरुषस्य देहाभिमानवतः पुंसः स्त्रियाश्च जीवस्य प्रमथनशीलानि इन्द्रियाणि मनः बलात्कारेण हरन्ति विषयान् प्रापयन्ति ॥ विषयाभिमुखीकृत्य तदनुरक्तं कुर्वन्ति ॥ हरत् इति सुबन्तं तत्र प्रथमाबहुवचनान्तमिदं हरन्तीति ॥ इन्द्रियाणि मनः हरन्ति सन्ति प्रमथनशीलानि भवन्ति ॥ इति वा ॥ 'बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति' ॥ इति हि वदन्ति ॥ अतः निराहारताऽपरोक्षज्ञानरूपमहाप्रयत्नसाध्य एवेन्द्रियजयः ॥ पुरुषस्येत्यनेन इन्द्रियजयस्य दुःसाधत्वे देहाभिमान एव हेतुरिति सूच्यते ॥ अत उक्तं युक्तम् ॥ ६० ॥

अ ॥ अर्जुनः ॥ इन्द्रियजयस्य ज्ञानसाधनत्वमुक्तम् ॥ समर्थितं च ॥ मनस एकस्य वशीकरणादेव ज्ञानोदयसंभवात् किमनेकेषामिन्द्रियाणां वशीकरणाऽऽयासेन ॥ ब्रूहि ॥

कृष्णः ॥ विवेकविज्ञानवतोऽपि सर्वं मायिकमसत् तुच्छमिति विजानतोऽपि विषयेषु भूयोभूयो दोषदर्शनरूपप्रयत्नं कुर्वतोऽपि पुरुषस्य आत्मनः प्रमथनशीलानि विषयान् प्रत्यनुधावनशीलानि. पार्थ विदितमेव हीदं सर्वेषाम् ॥ विषयदर्शनमात्रेण व्याकुलीकरणशीलानि अतिबलीयस्त्वाद्विवेकोपमर्दनक्षमाणि इन्द्रियाणि अवशीकृतानि निर्विकारं कृतमपि मनः बलात्कृत्य विषयान् प्रत्याकृष्य तेषु पातयित्वा विकारं प्रापयन्ति ॥ विवेकविज्ञानदोषदर्शनरूपप्रयत्नवतोऽपि अवशीकृतैरिन्द्रियैराकृष्यमाणस्य मनसो वशीकरणासंभवेन ज्ञानोदयासंभवात् तदर्थमिन्द्रियाणां वशीकरणमावश्यकम् ॥ अतः 'यदेन्द्रियाणि संहरते तदा तस्य प्रज्ञा प्रतिष्ठिता' ॥

इति पूर्वेण वा, अतः 'तानि सर्वाणि संयम्य युक्त आसीत मत्परः' ॥ इत्युत्तरेण वाऽन्वयः ॥ हिशब्दो हेतौ ॥ पश्यत्येव धनिनि स्वामिनि धनरक्षणाधिकृते च प्रमाथिनो दस्यवो यथा प्रसभमभिभूय धनं हरन्ति तथा पश्यत्येव विपश्चिति स्वामिनि विवेके च रक्षके प्रसभमिन्द्रियाणि मनो हरन्ति ॥ प्रसिद्धिद्योतको हिशब्दः ॥ ६० ॥

वि ॥ अर्जुनः ॥ इन्द्रियाणां विषयेभ्यः प्रत्याहरणमलं किं मनसो रागनिवर्तनप्रयत्नेन ॥ ब्रूहि ॥

कृष्णः ॥ शास्त्रजन्यहेयोपादेयविवेकवतोऽपि इन्द्रियजये यत्नं कुर्वाणस्यापि पुरुषस्य प्रमाथीनीन्द्रियाणि प्रसभं मनो हरन्ति ॥ 'बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति ॥' इति प्रसिद्धं हि लोके ॥ मनसो रागसत्वे प्रत्याहृतान्यपीन्द्रियाणि प्रसभमवसरे विषयान् प्रति मनः कर्षेयुः ॥ अतो रागनिवर्तनपर्यन्तमिन्द्रियजयाभावेन यत्नाद्रागनिवर्तनमावश्यकम् ॥ पूर्वश्लोके रागनिवृत्येन्द्रियजयस्याऽऽत्मदर्शनहेतुकत्वमुक्तम् ॥ अत्र तु रागनिवृत्तिपर्यन्तमिन्द्रियैर्मनसः कर्षणसम्भवादात्मदर्शनं नेति रागनिवृत्येन्द्रियजयहेतुकत्वमात्मदर्शनस्योच्यते ॥ अतो रागनिवृत्येन्द्रियजयादात्मदर्शनं आत्मदर्शनाद्रागनिवृत्त्येन्द्रियजयः ॥ इत्यन्योन्याश्रितत्वादिन्द्रियजयात्मदर्शनयोः इन्द्रियजयसाध्या आत्मदर्शनसाधनभूता स्थितप्रज्ञताख्यपरोक्षज्ञाननिष्ठा दुष्प्रापा ॥ ६० ॥

द्वै ॥ अर्जुनः ॥ विवेकज्ञानप्रत्याहाररूपसाधारणयत्नाभ्यामिन्द्रियजयस्याशक्यत्वोक्त्या पूर्वोक्तनिराहारताऽपरोक्षज्ञानैकसाध्यत्वमुपपादितं भवति ॥ ततश्चाशक्यत्वमेवेन्द्रियजयस्याऽऽपद्यते ॥ निराहारस्य देहावस्थानासम्भवादिन्द्रियजयासम्भवः ॥ अपरोक्षज्ञानादिन्द्रियजयः इन्द्रियजयादपरोक्षज्ञानमित्यन्योऽन्याश्रयान्न तेनेन्द्रियजयसंभवः ॥ ततश्च तत्साध्यापरोक्षज्ञानस्यासंभव एव ॥ ततश्च तदर्थकं शास्त्रं व्यर्थमापद्यते ॥ का गतिः ॥ वद ॥

कृष्णः ॥ तानि सर्वाणि संयम्य युक्त आसीत मत्परः ॥
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥ ६१ ॥

तानीति ॥ सर्वाणि तानि संयम्य अहं परो यस्य सः मत्परः युक्तः मयि मनोयोगयुक्तः सन् आसीत ॥ यस्य इन्द्रियाणि वशे स्युः तस्य प्रज्ञा प्रतिष्ठिता ॥ सः स्थितप्रज्ञः ॥ हि प्रसिद्धमिदम् ॥ ६१ ॥

अहं परो यस्य सः मत्परः युक्तः मयि मनोयोगयुक्तः सन् सर्वोत्तमत्वज्ञानपूर्वकं भगवति मयि निरन्तरमनोयोजनरूपप्रयत्नवान् सन् उक्तविधया जेतुमशक्यानि सर्वाणि तानीन्द्रियाणि 'विविक्तसेवी लघ्वाशी' (१८. ५२.) इति वक्ष्यमाण प्रयत्नेन विषयेभ्यः प्रतिसंहृत्य जित्वा तिष्ठेत् ॥ निराहारताऽपरोक्षज्ञानयोः साधनताऽसंभवेऽपि तत्प्रतिनिधिना उक्तसाधनान्तरेणेन्द्रियाणां जेतुं शक्यत्वान्न तत्साध्येन्द्रियजयस्य तत्साध्यापरोक्षज्ञानस्य चाऽसंभवः ॥ नापि तदर्थकशास्त्रस्य वैयर्थ्यम् ॥ यद्यत्रोक्तेन यत्नेन शक्यः स्यादिन्द्रियजयः तर्हि तस्य निराहारताऽपरोक्षज्ञानाभ्यां साध्यत्वोक्तिरयुक्ता इति चेत् केषाञ्चिन्महानुभावानां ताभ्यामपीन्द्रियजयो भवतीति वस्तुस्थितिप्रदर्शनार्थं तथोक्तिः ॥ न तु ताभ्यां जायमानस्येन्द्रियजयस्यापरोक्षज्ञानसाधनताऽभिप्रेता ॥ अतो नानुपपत्तिः ॥ उक्तहेतुना इन्द्रियजयः तेन चापरोक्षज्ञानमिति नान्योऽन्याश्रयः ॥ एवं इन्द्रियाणि यस्य वशे स्युः ॥ यो जितेन्द्रियः इति यावत् ॥ तस्य प्रज्ञा अपरोक्षज्ञानं प्रतिष्ठिता भवति ॥ प्रसिद्धमिदम् ॥ नाजितेन्द्रियस्यापरोक्षज्ञानमुत्पद्यते ॥ इन्द्रियजयस्तु उक्तरीत्या महाप्रयत्नसाध्यः ॥ अतस्तत्साधनभीरवो न तेन तदर्थं प्रयतन्ते ॥ ज्ञानकामैस्तु महता प्रयत्नेनेन्द्रियजयः संपादनीयः ॥ ६१ ॥

अ ॥ अर्जुनः ॥ अवशीकृतानीन्द्रियाणि मनो हरन्ति अतस्तान्यपि वशीकरणीयानीत्युक्तम् ॥ प्रमथनशीलानां तेषां वशीकरणं कथं कर्तुं शक्यम् ॥ 'निराहारस्य देहिनः' इति विषयाणामस्वीकरणं तत्रोपायतयोक्तं इति चेत् प्रमाथित्वादिन्द्रियाणां विषयानाहरणमशक्यम् ॥ 'परं दृष्ट्वा निवर्तते' इति ज्ञानं तत्रोपायतयोक्तं इति चेत् ज्ञानादिन्द्रियजयः इन्द्रियजयाच्च ज्ञानं इत्यन्योन्याश्रयान्नेन्द्रियजयज्ञानयोः साध्यसाधनभाव उपपद्यते ॥ अतस्तानि येनोपायेन वशं नेयानि तं तादृशं बलवन्तमनपायमुपायं ब्रूहि ॥

कृष्णः ॥ अहं सर्वात्मा वासुदेव एव परः उत्कृष्टोपादेयो यस्य स तादृशः सन् अहमेव परः[१] इष्टः यस्य स तादृशः सन् इति वा मय्यर्पितमनाः सन् इति यावत् ॥ तानि सर्वाणि इन्द्रियाणि संयम्य विषयैरसंगतानि कृत्वा संगतान्यपि विषयैस्तेभ्यः प्रत्याहृत्य युक्तः निगृहीतमनाः आसीत उपविष्टो भवेत् ॥ परमेश्वरे मयि समर्पित-

१. परं इष्टं इति व्याख्यातं 'विप्रतिषेधे परं कार्यं' इति (१. ४. २.) सूत्रे महाभाष्ये

मशुद्धमपि मनः १ निरस्ताशेषकल्मषमतिविमलं भवति ॥ विषयरागरहितं मनः सर्वाण्यपीन्द्रियाणि वशतामापादयति ॥ यथा निग्रहीतुमशक्या दस्यवो बलवन्तं राजानमाश्रित्य निगृह्यन्ते ॥ ततो राजाऽऽश्रितोऽयमिति मत्वा ते स्वयमेव तद्वशा भवन्ति ॥ तथा भगवन्तमाश्रित्य तदनुग्रहेण दुष्टानीन्द्रियाणि निग्राह्याणि ॥ ततो भगवदाश्रितोऽयमिति मत्वा स्वयमेव तानि तद्वशानि भवन्ति ॥ उक्तरीत्या वशीकृतेन्द्रियस्तत्त्वज्ञानाय प्रभवति ॥ अजय्यानामिन्द्रियाणां उक्तोपायेन वशीकरणं किमर्थं इति चेत् यस्येन्द्रियाणि वशे स्युः तस्यैव प्रज्ञा प्रतिष्ठिता ॥ स एव स्थितप्रज्ञताऽऽख्यापरोक्षज्ञाननिष्ठावानिति यावत् ॥ अतो मत्परः तानि संयम्य युक्त आसीत ॥ इन्द्रियाणां वशीकरणानन्तरं किं कर्तव्यं इति चेत् तानि संयम्य युक्तः निगृहीतमनाः सन् मत्परः अहं सर्वप्रत्यगात्मा वासुदेवः परः स्त्र्यादिभ्यो बाह्येभ्यः देहेन्द्रियादिभ्यः आन्तरेभ्यश्च उत्कृष्टः प्रियतमः आत्मा यस्य सः तादृशः ॥ आत्मा हि सर्वस्य सर्वेभ्यः प्रियतमो लोके ॥ नान्यस्तस्मादहमित्यभेदानुसन्धानं कुर्वन् आसीत ॥ अभेदानुसन्धानं कुर्वन्नासीतेत्युच्यतां तानि संयम्येतीन्द्रियजयानन्तरकरणीयता कुत उच्यते इति चेत् यस्येन्द्रियाणि वशे स्युः तस्यैव ब्रह्मैवाहमहमेवब्रह्मेत्यपरोक्षज्ञाननिष्ठासिद्धिः ॥ अतः तानि संयम्य मत्परः आसीत इति इन्द्रियजयानन्तरकरणीयता तस्योक्ता ॥ तदेवं इन्द्रियाणां मनसश्च वशीकरणमावश्यकम् ॥ अतस्त्वं तानि तच्च वशीकर्तुमुक्तैरुपायैः पयतस्व ॥ ६१ ॥

वि ॥ अर्जुनः ॥ इन्द्रियजयाऽऽत्मदर्शनयोरन्योऽन्याश्रितत्वात् ज्ञाननिष्ठा दुष्प्रापेत्युक्तम् ॥ दुष्प्रापाऽपि साऽवश्यं संपादनीया ॥ येन सा संपादयितुं शक्या तं निर्बाधमुपायं ब्रूहि ॥

कृष्णः ॥ सर्वाणि तानि दुर्जयानीन्द्रियाणि विषयेभ्यः प्रत्याहृत्य विषयसंस्पर्शरहितानि कृत्वा अहं परः विषयेभ्यः परमभोग्यो यस्य सः तादृशः शुभाश्रयभूते मयि अर्पितमनाः तेन युक्तः चित्तसमाधानवान् तिष्ठेत् ॥ मय्यर्पितं मनो

१. अत्र, 'यथाऽग्निरुद्धतशिखः कक्षं दहति सानिलः ॥ तथा चित्तस्थितो विष्णुः योगिनां सर्वकिल्बिषं ॥' इति (वि. ६. ७. ७४.) 'मालिन्यशालिन्यपि मानसे मे विश प्रभो तच्च विधेहि शुद्धं ॥ दीपो गृहे किं तिमिरोपरुद्धे नाऽऽयाति तत्किं न परिष्करोति ॥' इत्यादिकं चानुसन्धेयम् ॥

मदधिष्ठानमहिम्ना दग्धाशेषकल्मषतया विमलीकृतं उज्झितविषयरागं सत् इन्द्रियाणि वशे करोति ॥ एवं यस्येन्द्रियाणि वशेस्युः तस्यैव स्थितप्रज्ञता-ख्यपरोक्षज्ञाननिष्ठाकाष्ठा प्रतिष्ठिता भवति ॥ अतो मत्पर आसीत ॥ अशुद्धस्यापि मनसो मय्यर्पणेन विनैवाऽऽत्मदर्शनं स्थूलरागनिवृत्त्या स्थूलेन्द्रिय-जयः तेन च स्थितप्रज्ञता तया चात्मदर्शनं तेन च सूक्ष्मरागनिवृत्त्या सूक्ष्मेन्द्रिय-जयः तेन च परमपुरुषार्थरूपममृतत्वमित्यन्योऽन्याश्रयाभावादिन्द्रियजयस्य स्थित-प्रज्ञतोत्पादनद्वारा आत्मावलोकनाख्यापरोक्षज्ञानहेतुत्वसंभवेन, दुष्प्रापायास्तस्याः प्राप्तये उक्तोपायेन वशीकरणमिन्द्रियाणां संपादय ॥ तेन च सा सुप्रापा भवि-ष्यति ॥ ६१ ॥

द्वै ॥ अर्जुनः ॥ भगवति मनोयोजनरूपप्रयत्नेन जेतव्यानीन्द्रियाणीत्युक्तम् ॥ रागद्वेषादिदोषदुष्टस्य मनसः कथं भगवति योजनं संभवति ॥ रागद्वेषादिदोषाः परिहरणीयाः इति चेत् कथं तेषां परिहारः सम्भवति ॥ ब्रूहि ॥

कृष्णः ॥ ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते ।
सङ्गात्सञ्जायते कामः कामात् क्रोधोऽभिजायते ॥ ६२ ॥

क्रोधाद्भवति संमोहः संमोहात् स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात् प्रणश्यति ॥ ६३ ॥

ध्यायत इति ॥ विषयान ध्यायतः पुरुषस्य तेषु विषयेषु सङ्गः इच्छा उपजायते ॥ सङ्गात् कामः उत्कटेच्छा संजायते ॥ कामात् क्रोधः कोपः अभि-जायते ॥ क्रोधात् संमोहः भवति ॥ संमोहात् स्मृतेः स्मरणस्य विभ्रमः भ्रंशः भवति ॥ स्मृतिभ्रंशात् बुद्धेः नाशः बुद्धिनाशः भवति ॥ बुद्धिनाशात् प्रणश्यति ॥ ६२ ॥ ६३ ॥

विषयाणां दर्शने श्रवणे वा जुगुप्सितविषयदर्शनादाविव उदासीनैर्भवित-व्यम् ॥ न तु तेषां ध्यानं कर्तव्यम् ॥ कुत इति चेत् रूपादीन् विषयान् ध्यायतः पुंसः तेषु तत्सदृशेषु च सङ्गः इच्छा जायते ॥ सङ्गात् कामः इच्छा सञ्जायते उत्कटो भवति॥ कामात् केनचित् प्रतिहतौ कामो यैः प्रतिहन्यते तेषु क्रोधः अभिजायते• नितरा-मुत्पद्यते ॥ क्रोधात् संमोहः परहिंसनाद्यकार्यकरणेच्छा अधर्मे धर्मबुद्धिर्वा भवति ॥

संमोहात् प्रतिषेधादिस्मृतेर्नाशो भवति ॥ स्मृतिरूपो विभ्रमो वा ॥ हंसादेरधर्मत्वाभिधायकश्रुतिस्मृत्याद्यर्थस्य ज्ञातस्याप्यन्यथास्मृतिरिति यावत् भवति ॥ स्मृतिभ्रंशात् बुद्धिशब्दितदोषज्ञानस्य सर्वात्मना नाशो भवति ॥ बुद्धिनाशात् प्रणश्यति ॥ अधर्मकरणे प्रवृत्तः सन् अधर्मकरणान्नरकाद्यनर्थं प्राप्नोति ॥ अयमेवाऽऽत्मनः प्रकृष्टो नाशः ॥ विषयध्यानात् रागद्वेषादेरुत्पत्तिः ॥ रागद्वेषादेर्नरकाद्यनर्थप्राप्तिः ॥ रागद्वेषादिना नरकाद्यनर्थप्राप्तिर्भवतीति ज्ञाते रागद्वेषादीनां परिजिहीर्षा जायते ॥ रागद्वेषादेः कारणं विषयध्यानं इति ज्ञाते कारणभूतस्य तस्याकरणं संपद्यते ॥ अकरणे च कारणस्य कार्यस्य रागद्वेषादेरनुदयः उदितस्य तस्य परिहरणं च संपद्यते ॥ परिहृतरागद्वेषादिदोषस्य मनसः भगवति योजनं संभवति ॥ तेन चोक्तरीत्या इन्द्रियजयः संपद्यते ॥ भगवति मनोयोजनाद्रागद्वेषादिनिवृत्तिः रागद्वेषादिनिवृत्तेर्भगवति मनोयोजनं इत्यन्योन्याश्रयस्तु पूर्ववत् स्थूलसूक्ष्मभेदाश्रयणात्परिहरणीयः ॥ ६२ ॥ ६३ ॥

अ ॥ अर्जुनः ॥ 'तानि सर्वाणि संयम्य युक्त आसीते'ति इन्द्रियनियमनपूर्वकं भगवति योजनेन मनसो नियमनमपि कर्तव्यमित्यभिहितम् ॥ उभयोः करणमशक्यं अलमेकेन बाह्येन्द्रियनियमनेन ॥ सति बाह्येन्द्रियनियमने उत्खातदंष्ट्रोरगवदनर्थहेतुत्वाभावेन मनसो नियमनस्यानावश्यकत्वात् ॥ ब्रूहि ॥

कृष्णः ॥ निगृहीतबाह्येन्द्रियस्यापि अवशीकृतमनसः पुंसः मनः पूर्वानुभूतान् विषयान् ध्यायेत् ॥ मनसा विषयान् ध्यायतः पुंसः तेषु संगः सखहेतुत्वज्ञानलक्षणा प्रीतिः जायते ॥ संगात् कामः भोगेच्छा सञ्जायते ॥ सङ्गः इच्छा कामः सङ्गस्य उक्तटावस्था यामापन्नः पुमान् अभोज्यं कलञ्जादिकं अभोग्यां स्त्रियं स्वसारं मातरं वा अभुक्त्वा स्थातुं नोत्सहते ॥ कामात् प्रतिहतात् कामितविषयानुभवप्रतिबन्धकेषु क्रोधः जायते ॥ क्रोधात् कार्याकार्यविवेकाभावः भवति ॥ संमोहात् शास्त्राचार्योपदेशगृहीतार्थस्मरणस्य भ्रंशः भवति ॥ स्मृति भ्रंशात् बुद्धेः मनसः नाशः कार्याकार्यविवेकायोग्यतारूपः भवति ॥ बुद्धिनाशात् पुरुषार्थायोग्यो भवति ॥ स्मृतिः वेदान्तश्रवणजन्यज्ञानजन्या ब्रह्मैवाहमिति ब्रह्माकारेण परिणती बुद्धिवृत्तिः तस्याः विभ्रमः अनुत्पत्तिः ॥ स्मृतिभ्रंशात् बुद्धिनाशः सर्वस्य ब्रह्मत्वावगाहिनी अखण्डात्मिका बुद्धिवृत्तिः बुद्धिः तस्याः नाशः अनुत्पत्तिः भवति॥

बुद्धिनाशात् उक्तरूपात् हेतोः विद्वानपि न कदाचिदपि मुक्तिं प्राप्नोति ॥ इति वा ॥ विषयध्यानमनर्थमूलम् ॥ अतस्तत्परिहर्तव्यम् ॥ तत्परिहरणमनिगृहीतमनसोऽशक्यम् ॥ अतः निगृहीतबाह्येन्द्रियस्यापि मनोनिग्रहाभावे ईदृशानर्थसङ्गावादिन्द्रियनियमनानन्तरं मनोनियमनमप्यावश्यकम् ॥ अतः 'संयम्य युक्त आसीते' त्युक्तं युक्तम् ॥ एवं निगृह्य बाह्येन्द्रियाणि वशीकृतमनाः सन्नासीतेति षड्भिः श्लोकैः स्थिधीः कथमासीतेति प्रश्नस्योत्तरमुक्तम् ॥ ६२ ॥ ६३ ॥

वि ॥ अर्जुनः ॥ मनसो भगवत्यर्पणरूपोपायेन वशीकरणमिन्द्रियाणां संपादनीयमित्युक्तम् ॥ अनिवेश्यैव भगवति मनो यत्नान्तरेण तत् संपाद्यताम् ॥ तथाकरणे का हानिः संपद्येत ॥ ब्रूहि ॥

कृष्णः ॥ मय्यनिवेशितमनसः अपरिहृतरागद्वेषादिकषायस्य यत्नान्तरेणेन्द्रियाणि संयम्यावस्थितस्यापि पुंसः अनादिविषयवासनया विषयध्यानं नियमेन स्यात् ॥ विषयान् ध्यायतः पुंसः तेषु सङ्गः इच्छा जायते ॥ सङ्गात् कामः सञ्जायते॥ कामो नाम सङ्गस्य विपाकदशा यां दशामापन्नः पुरुषो विषयाननुभूय स्थातुं न शक्नोति ॥ कामात् प्रतिहतात् विषयानुभवालाभे विषयानुभवप्रतिबन्धकान् प्रति कामान्ध्या कर्तव्याकर्तव्यमौढ्येन तदात्वसन्निहितासन्निहितानन्यान् प्रत्यपि क्रोधः जायते ॥ दर्शिता चेयं कामिनां रीतिः १ 'सदेवगन्धर्वमनुष्यपन्नगं जगत्सशैलं परिवर्तयाम्यहम् ॥' इति वदता श्रीरामेण ॥ क्रोधात् कार्याकार्यविवेकराहित्यरूपः संमोहः भवति ॥ तेन सर्वमविशंकं करोति ॥ 'क्रुद्धः पापं न कुर्यात् कः क्रुद्धो हन्याद्गुरूनपि ॥' इति हि स्मरन्ति ॥ अतः कोपो बलवान् वैरी ॥ वक्ष्यते च ॥ २ 'विद्ध्येनामिह वैरिणम्' ॥ इति ॥ अतः स सर्वथा वर्जनीयः ॥ अत एव वदन्ति ॥ 'अपकारिणि चेत्कोपः कोपे कोपः कुतो न ते ॥ धर्मार्थकाममोक्षाणां प्रधानपरिपन्थिनि ॥' इति ॥ संमोहात् स्मृतिविभ्रमः आत्मदर्शनोपायभूतस्य इन्द्रियजयादिप्रयत्नस्य आरब्धस्य विस्मरणं भवति ॥ स्मृतिभ्रंशात् उपायभूतप्रयत्नविषयकस्मरणनाशात् उपायस्मृतिसाध्यायाः आत्मदर्शनोपायानुष्ठानव्यवसायरूपबुद्धेः नाशः भवति ॥ बुद्धिनाशात् प्रणश्यति परो-

१. रामा. आ. ६४ सर्गे ॥ २. ३. ३७.

क्षज्ञाननिष्ठाऽनुदयेन पुनः पुनः संसारे निमग्नः शुद्धात्मस्वरूपदर्शनं आत्मावलोकनाख्यं साक्षात्कारापरपर्यायं न लभते ॥ अनिवेद्य भगवति मानसमात्मपौरुषेणेन्द्रियजये प्रवर्तमानस्य पुंसः ईदृशानर्थसद्भावात् मनसो भगवद्विषयीकरणरूपेणोपायेनेन्द्रियजये प्रयतितव्यमित्युक्तं युक्तम् ॥ इन्द्रियजयस्य आत्मदर्शनहेतुकत्वोक्तिः सूक्ष्मरागनिवृत्त्या सूक्ष्मेन्द्रियजयाभिप्राया ॥ उक्तोपायसाध्यत्वोक्तिस्तु स्थूलरागनिवृत्त्या स्थूलेन्द्रियजयाभिप्राया ॥ उक्तोपायलब्धस्थूलेन्द्रियजयनिष्पन्नपरोक्षज्ञाननिष्ठानिष्पन्नमात्मदर्शनं सूक्ष्मेन्द्रियजयद्वारा भगवदपरोक्षसाक्षात्कारमुत्पाद्य तेन मुक्तिं प्रापयति ॥ अतो मनसो भगवद्विषयीकरणेन इन्द्रियजये प्रयतस्व ॥ ६२ ॥ ६३ ॥

अर्जुनः ॥ रागद्वेषादिना नरकाद्यनर्थो भवतीत्यनिष्टप्राप्तिरभिहिता ॥ रागद्वेषादिनिवृत्त्या लभ्यमानं इष्टं फलं ब्रूहि ॥ उभयमपि विदन्नेव स्वरसतस्तन्निवर्तने प्रयतेत ॥ किञ्च यद्येवं स्थीयेत तर्हि सुखाननुभवात् आत्मद्रोहः स्यात् ॥ 'अनिषिद्धसुखत्यागी पशुरेव न संशयः' ॥ इति हि स्मरन्ति ॥ अतः किं कर्तव्यम् ॥ वद ॥

कृष्णः ॥ रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ॥
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥ ६४ ॥

रागेति ॥ रागश्च द्वेषश्च रागद्वेषौ ताभ्यां वियुक्तानि रागद्वेषवियुक्तानि तैः वशे भवानि वश्यानि आत्मनः स्वस्य मनसो वा वश्यानि आत्मवश्यानि तैः इन्द्रियैः विषयान् चरन् अनुभवन् पुरुषस्तु विधेयः स्वाधीनः आत्मा मनः यस्य सः विधेयात्मा सन् प्रसादं मनोनैर्मल्यं अधिगच्छति प्राप्नोति ॥ ६४ ॥

उक्तोपायेन रागद्वेषादिपरिहारे सति रागद्वेषरहितैः आत्मनः स्वस्य मनसो वा वश्यैः अधीनैः आत्मनः क्षोभानापादकैः इन्द्रियैः विषयान् शरीरयात्रानिर्वाहमात्रोपयोगिनो रूपरसादीन् चरंस्तु अनुभवन्नपि एवमनुभवतो विशेषसूचको वा तुशब्दः ॥ विधेयात्मा वशीकृतमनाः सन् प्रसादं विनाऽपि प्रयत्नं प्रायोविषयेष्वप्रवृत्तिरूपं मनसो नैर्मल्यं प्राप्नोति ॥ रागद्वेषादिनिवृत्त्या मनोनैर्मल्यरूपमिष्टं फलं लभ्यते ॥ रागद्वेषरहितैरिन्द्रियैः उचितविहितविषयानुभवेन सुखानुभवान्नाऽऽत्मद्रोहोऽपि भवति ॥ अतो न काऽप्यनुपपत्तिः ॥ इन्द्रियाणां मनसश्च वशीकरणीयत्वोक्तया सर्वथा विष-

यानुभवादात्मद्रोहः कार्यः इति मयोच्यते इति मा मंस्थाः ॥ न मम तादृशः प्रद्वेषः प्राणिषु ॥ परित्यज्य दुर्विषयाऽऽशां उचितविहितविषयानुभवादानेषिद्धं सुखमनुभवतेत्यादरादुच्यते मयेत्यवधेहि ॥ 'आत्मवश्यैः विधेयाऽऽत्मे'ति अनुवादरूपत्वेऽपि यः उक्तोपायेन त्यक्तरागद्वेषादिः सः रागद्वेषवियुक्तैः इन्द्रियैः शरीरयात्रामात्रोपयोगिनो विषयान् चरति ॥ स तेन विधेयात्मा भवति ॥ तस्य तेनेन्द्रियाणि वश्यानि भवन्ति ॥ इति वाक्यवृत्त्या विधिरूपत्वं बोध्यम् । विषयान् चरन्नपीत्युक्त्या देहयात्रामात्रोपयुक्तविषयानुभवो न दोषायेति सूच्यते ॥ ६४ ॥

अ ॥ अर्जुनः ॥ विषयध्यानमनर्थमूलं अतो निगृह्य मनस्तत्परिहर्तव्यमित्युक्तम् ॥ स्मरणमपि चेद्विषयाणामनर्थकारणं सुतरां तर्हि भोगः ॥ अकरणे च तस्य शरीरयात्रानिर्वाहोऽपि न स्यात् ॥ उक्तानर्थमूलपरिहारोपायश्च कः ब्रूहि ॥

कृष्णः ॥ व्युत्थितविषयकतृतीयप्रश्नस्य उत्तरमष्टभिरुच्यते ॥ शृणु तदवधानेन ॥ दोषदर्शनेन रागद्वेषाभ्यां वियोजितैः अतः स्ववशैः श्रोत्रादिभिः शरीरयात्रानिर्वाहहेतुभूतान् अवर्जनीयान् विषयान् अनुभवन् अतः विधेयात्मा सन् प्रसादं मनस्स्वास्थ्यं परमात्मसाक्षात्कारयोग्यतारूपां मनसः स्वच्छतां प्राप्नोति ॥ रागद्वेषाभ्यां वियोजनमिन्द्रियाणां उक्तानर्थमूलपरिहारोपायः ॥ ताभ्यां वियोजितैरिन्द्रियैः अवर्जनीयशरीरयात्रानिर्वाहमात्रोपयोगिविषयानुभवो न दोषाय ॥ तेन शरीरयात्रानिर्वाहोऽपि ॥ न केवलमेतावदेव ॥ किंतु एवंभूतस्य मनःप्रसादरूपफललाभोऽपि ॥ अतः उक्तानर्थमूलपरिहारोपायत्वात् शरीरयात्रानिर्वाहहेतुत्वात् प्रसादरूपफलसाधनत्वाच्च उक्तरूपा स्थितिरवश्यं संपादनीया ॥ बाह्येन्द्रियाणामनिग्रहे तानि विषयेषु प्रवर्तेरन् ॥ प्रवर्तन्तां नाम ॥ सा च प्रवृत्तिर्न दोषाय भवति ॥ भवति च दोषाय रागद्वेषाभ्यां प्रवृत्तिः ॥ तादृशी प्रवृत्तिरिन्द्रियाणां निगृहीतमनसो न भवति ॥ निगृहीते मनसि रागद्वेषयोरनुदयात् ॥ रागद्वेषरहितानामिन्द्रियाणां अवर्जनीयशरीरयात्रानिर्वाहमात्रोपयोगिविषयेषु प्रवृत्तिस्स्यात् ॥ तादृशैरिन्द्रियैस्तादृशविषयानुभवो न दोषाय ॥ अतो निगृहीतमनस्को बाह्येन्द्रियजयाभावेऽपि न दोषः ॥ स्वाधीनैरिन्द्रियैर्विषयाननुभवतीति, 'स्थितधीः किं व्रजेते'ति प्रश्नस्योत्तरमिदम् ॥ ६४ ॥

वि ॥ स्वपौरुषेणेन्द्रियजये प्रयतमानस्य उक्तानर्थसङ्गावात् मनसो भगवद्विषयीकरणेनैवे १न्द्रियजयः संपादनीयः इत्युक्तम् ॥ तथा संपादितस्येन्द्रियजयस्य किं फलम् ॥ ब्रूहि ॥

कृष्णः ॥ उक्तोपायेन आत्मनो वश्यैः अतः रागद्वेषाभ्यां वियोजितैः इन्द्रियैः विधेयात्मा सन् विषयान् चरन् विषयान् २तिरस्कृत्य वर्तमान एव पुरुषः प्रसादं आत्मावलोकनविरोधिदोषराहित्यरूपं मनसो नैर्मल्यं प्राप्नोति ॥ इन्द्रियजयस्य मनोनैर्मल्यं फलम् ॥ अत उक्तोपायेन रागद्वेषनिरसनद्वारा स संपादनीयः ॥ ६४ ॥

अर्जुनः ॥ रागद्वेषवर्जनस्य मनोनैर्मल्यरूपं फलमुक्तम् ॥ किं तेन ॥ तस्य भावाभावाभ्यां इष्टानिष्टयोरुक्त्या तस्याऽऽवश्यकतामुपपादय ॥

कृष्णः ॥ प्रसादे सर्वदुःखानां हानिरस्योपजायते ॥
प्रसन्नचेतसो ह्याशु बुद्धिः ३पर्यवतिष्ठति ॥ ६५ ॥

प्रसाद इति ॥ हि यस्मात् प्रसन्नं चेतः यस्य सः प्रसन्नचेताः तस्य प्रसन्नचेतसः पुंसः बुद्धिः अपरोक्षज्ञानं आशु शीघ्रं पर्यवतिष्ठति प्रतिष्ठिता भवति तस्मात् प्रसादे सति अस्य सर्वाणि च तानि दुःखानि च सर्वदुःखानि तेषां हानिः नाशः उपजायते ॥ ६५ ॥

मनोनैर्मल्यसद्भावे इष्टप्राप्तिमुपपादयामि ॥ मनःप्रसादे सति अस्य प्राप्तमनःप्रसादस्य सर्वदुःखानां हानिः अविलंबेन जायते ॥ प्राप्तमनःप्रसादो निर्दुःखो भवतीति यावत् ॥ अन्तरेण मुक्तिं सर्वदुःखहानेरसंभवात् कथं प्रसादमात्रेण सा इति चेत् प्राप्तमनःप्रसादस्य पुंसः बुद्धिः अपरोक्षज्ञानं अविलंबेन पर्यवतिष्ठते सम्यग्भव-

१. इन्द्रियजयस्य उक्तोपायकार्यत्वे तस्य ल्यपा तत्पूर्वकालत्वोक्तिः कथं इति चेत् संयम्येत्यनेन विषयस्पर्शनिवारणमेवोच्यते न त्विन्द्रियजयः ॥ अतो न दोषः ॥ २. कृतेऽपि प्रतिषेधे चापल्याद्विषयानुभवे प्रवर्तमानान् प्रति अनुभवाभ्यनुज्ञा बाधिका ॥ अत एवं व्याख्यातं ॥ चरतिर्गत्यर्थः आक्रमणरूपगतिपरः ॥ भक्षणार्थो वा संहारपरः ॥ उभयथाऽपि तिरस्कारोत्र विवक्षितः ॥ तिरस्कारोऽत्रानादरः ॥ 'अनादरः परिभवः परीभावस्तिरस्क्रिया ॥' इत्यमरः॥ ३. पर्यवतिष्ठते इति पाठान्तरं ।

ति ॥ तेन मुक्तो भवति ॥ अतः दुःखानां हानिः जायते ॥ १ 'तरति शोकमात्मवि' दिति श्रुतिप्रसिद्धिद्योतको वा हिशब्दः ॥ प्रसादशब्दितमनोनैर्मल्यस्य अपरोक्षज्ञानजनन-द्वारा मोक्षरूपपरमेष्टफलप्राप्तिहेतुत्वात् तदवश्यमुक्तविधया संपादनीयम् ॥ प्रसादसं-पादने यत्नाधिक्यचिकीर्षोत्पादनाय मुखतः प्रसादस्य सर्वदुःखहानिहेतुत्वोक्तिः ॥ 'वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥' इति ज्ञानफलकत्वमिन्द्रियजय-स्योक्तं किमर्थमत्र पुनरुच्यते इति चेत् इन्द्रियजयस्य प्रसादद्वारा ज्ञानं फलमिति वक्तुं प्रसादं मध्येकृत्य पुनरत्र तदुक्तिः ॥ ज्ञानस्य इन्द्रियजयसाध्यत्वोक्तिप्रकरणे ज्ञान-रूपं इन्द्रियजयफलमेव वाच्यं 'सर्वदुःखानां हानिः उपजायते' इति दुःखनिवृत्ति-रूपं ज्ञानफलमपि किमर्थमुच्यते इति चेत् बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ॥' इति सुकृतदुष्कृतहानेः ज्ञानफलत्वोक्त्या जातायाः, सुकृतदुष्कृतहानिः न ज्ञानस्य फलं भवितुमर्हति इष्टप्राप्त्यनिष्टपरिहारान्यतरत्वाभावात् ॥ तयोरन्यतरदेव हि फलं भवितुमर्हति इति शंकायाः, ज्ञानफलभूतदुःखरूपानिष्टपरिहारहेतुत्वेन सुकृतदुष्कृत-हानेः ज्ञानफलत्वोक्तिर्युक्ता इति परिहारार्थं दुःखहानिरूपज्ञानफलस्याप्युक्तिः ॥ प्रसादस्य अत्र ज्ञानद्वारा दुःखरूपानिष्टनिवृत्तिफलकत्वोक्त्या उत्तरत्र सुखरूपेष्टप्राप्ति-फलकत्वोक्त्या च आवश्यकतां वक्तुं दुःखहानेः प्रसादफलत्वेन वक्तव्यत्वान्नावक-व्योक्तिदोषोऽपि ॥ अतएवात्र मोक्षस्य दुःखहानिरूपतया उत्तरत्र सुखरूपतयाचो-क्तिः ॥ इत्यादिकमवधेयम् ॥ ६५ ॥

अ ॥ प्रसादे प्राप्ते सति अस्य सर्वेषां दुःखहेतूनां विक्षेपाणां हानिः उप-जायते ॥ अतः प्रसन्नचेतसः बुद्धिः सर्वत्र ब्रह्मदर्शिनी प्रज्ञा ब्रह्मात्मैक्यज्ञानं वा पर्य-वतिष्ठति ॥ विपरीतभावनादिप्रतिबन्धकाभावात् नैश्चल्येन प्रतिष्ठिता भवति ॥ मनःप्रसादस्य विक्षेपनिरसनद्वारा प्रज्ञासिद्धिरूपेष्टफलहेतुत्वादुक्तोपायेन स संपादनीयः ॥ इति च ॥ ६५ ॥

वि ॥ बुद्धिः आत्मावलोकनरूपा पर्यवतिष्ठते स्थितिं लभते ॥ तस्मात् प्रसादे सति अस्य सर्वदुःखानां हानिः उपजायते ॥ सर्वानर्थहेतुभूतप्रकृतिबन्ध-मूलकः संसारबन्धो निवर्तते ॥ प्रसन्नचित्तो मुक्तो भवतीति यावत् ॥ मनःप्रसादस्य

---

१. छां ७. १. ३.

आत्मावलोकनद्वारा सर्वदुःखनिवृत्तिरूपेष्टफलहेतुत्वादुक्तोपायेन सोऽवश्यं संपादनीयः ॥ ६५ ॥

कृष्णः ॥ नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ॥
न चाभावयतः शान्तिः अशान्तस्य कुतः सुखम् ॥ ६६ ॥

नास्तीति ॥ युक्तः मनःप्रसादवान् न युक्तः अयुक्तः तस्य बुद्धिः नास्ति ॥ अयुक्तस्य भावना च नास्ति ॥ न भावयन् अभावयन् तस्य अभावयतः शान्तिश्च नास्ति ॥ न शान्तः अशान्तः तस्य अशान्तस्य सुखं कुतः ॥ नेत्यर्थः ॥ ६६ ॥

मनःप्रसादाभावे अनिष्टप्राप्तिमुपपादयामि॥ प्रसादाभावे अप्रसन्नचेतसो युक्तिः चित्तनिरोधशब्दिता मनसः एकाग्रता नास्ति ॥ अयुक्तस्य युक्तिशब्दितचित्तैकाग्रयरहितस्य बुद्धिः अपरोक्षज्ञानं नास्ति ॥ कुतः इति चेत् अयुक्तस्य भावना ध्यानं नास्ति ॥ अभावयतः ध्यानयोगरहितस्य बुद्धिः अपरोक्षज्ञानं नास्ति ॥ तदभावे शान्तिः मोक्षः नास्ति ॥ अशान्तस्य अमुक्तस्य सुखं सुखेपूत्तमं सुखं कुतः ॥ नास्तीत्यर्थः ॥ चशब्दौ समुच्चये ॥ अभावयतः शान्तिः भगवदेकनिष्ठबुद्धिता नास्ति ॥ अशान्तस्य तद्रहितस्य बुद्धिः अपरोक्षज्ञानं नास्ति ॥ अबुद्धेः अपरोक्षज्ञानहीनस्य सुखं सुखरूपो मोक्षः कुतः ॥ नेत्यर्थः ॥ १'नान्यः पन्था अयनाय विद्यते' इति ॥ २'तरति शोकमात्मवित्' इति च श्रुतिः ॥ ३'विद्यैव तु निर्धारणात्'॥ इति सूत्रम् ॥ वक्ष्यते च ॥ ४'ददामि बुद्धियोगं तं येन मामुपयान्ति ते' ॥ इति ॥ अयुक्तस्येति द्विरुक्तिः युक्तेरावश्यकतासूचनाय ॥ प्रसादाभावे उक्तविधया महानर्थाऽऽपत्त्या सोऽवश्यमुक्तोपायेन संपादनीयः ॥ ६६ ॥

अ ॥ अयुक्तस्य योगशब्दितमनःप्रसादरहितस्य आत्मस्वरूपापरोक्षज्ञानं नास्ति ॥ अयुक्तस्य भावना आत्मज्ञानाभिनिवेशः आत्मज्ञाने शब्दादापाततो जाते स्मृतिसन्तानहेतुभूतः साक्षात्कारार्थमभिनिवेशः न भवति ॥ अभावयतः तादृशभावनारहितस्य शान्तिः विषयतृष्णानिवृत्तिः न भवति ॥ अशान्तस्य तद्रहितस्य सुखं कुतः ॥ नेत्यर्थः ॥ परोक्षज्ञानेनैवापरोक्षज्ञानसिद्धेः किं प्रसादेन इति चेत् अयु-

१. तै. आ. ३. १२. २. छा. ७. १. ३. ३. ३. ३. ३. ४८. ४. १०. १०.

क्तस्य बुद्धिः परोक्षज्ञानं नास्ति ॥ बहुधा कृतादपि श्रवणात् जातं ज्ञानं पदवाक्यतदर्थगोचरमेव भवति ॥ न वस्तुगोचरम् ॥ तथा जातमपि न स्थिरमवतिष्ठते ॥ अयुक्तस्य भावना ब्रह्मैवाहमिति ब्रह्मण्यात्मत्वाभिनिवेशरूपसाक्षात्कारः न भवति॥ अभावयतः भावनाशब्दितापरोक्षज्ञानहीनस्य शान्तिः अनात्मतादात्म्यतत्कार्यसंबन्धादर्शनरूपा न भवति ॥ अशान्तस्य अनात्मानमेवात्मानं द्वैतं च पश्यतः सुखं ब्रह्मानन्दरसानुभवः कुतः ॥ अभावयतः सर्वं ब्रह्मैवेत्यपश्यतः शान्तिः चिदानन्दैकरसब्रह्मरूपेणावस्थितिरूपा विदेहमुक्तिः न भवति ॥ अशान्तस्य विदेहमुक्तिमप्राप्तस्य सुखं कुतः ब्रह्मभावमप्राप्तस्य ब्रह्मानन्दोनेत्यर्थः ॥ अयुक्तस्य योगशब्दितमनोवशीकरणरहितस्य तत्कार्यप्रसादरहितस्य बुद्धिः श्रवणमननजन्यं परोक्षज्ञानं नास्ति ॥ अयुक्तस्य भावना निदिध्यासनात्मिका विजातीयप्रत्ययानन्तरितसजातीयप्रत्ययप्रवाहरूपा न भवति ॥ अभावयतः उक्तरूपभावनारहितस्य शान्तिः सकार्याविद्यानिवृत्तिरूपो ब्रह्मात्मैक्यसाक्षात्कारः न भवति ॥ अशान्तस्य सुखं मोक्षानन्दः कुतः ॥ अयुक्तस्येति द्विरुक्तिः युक्तेरावश्यकतासूचनाय ॥ अयुक्तस्य श्रवणमननयोः [१] अयोजितमनसः बुद्धिः ब्रह्मात्मैक्यनिश्चयः परोक्षज्ञानरूपः नास्ति ॥ अयुक्तस्य [२] असमाहितमनसः भावना ध्यानं नास्ति ॥ अभावयतः ध्यानमकुर्वतः शान्तिः सर्वदुःखोपरमः न भवति ॥ अशान्तस्य सुखं कुतः ॥ उक्तविधानार्थपरंपराहेतुत्वादप्रसादस्य यत्नतः प्रसादः संपादनीयः ॥ ६६ ॥

वि ॥ अयुक्तस्य 'युक्त आसीत मत्परः ॥' इत्युक्तभगवद्विषयीकृतमनस्त्वरहितस्य तत्प्रयुक्तेन्द्रियजयलभ्यमनःप्रसादरहितस्य बुद्धिः शुद्धात्मस्वरूपविज्ञानं नास्ति ॥ न सेत्स्यति ॥ अयुक्तस्य अयुक्तत्वहेतुकबुद्धयभाववतः भावना ध्यानं न भवति अभावयतः शुद्धात्मस्वरूपभावनामकुर्वतः शान्तिः विषयस्पृहानिवृत्तिः न भवति ॥ अशान्तस्य विषयस्पृहायुक्तस्य सुखं नित्यनिरतिशयमोक्षसुखं कुतः ॥ न भवतीत्यर्थः ॥ अप्रसन्नचेतसः ईदृशानर्थसद्भावात् प्रसादो यत्नतः संपादनीयः ॥ ६६ ॥

अर्जुनः ॥ अयुक्तस्य बुद्धिर्नास्ति अयुक्तस्य भावना न भवति इत्युक्तम् ॥ तत्कथम् ॥ कृतश्रवणादिकस्य भावनाया बुद्धेश्च संभवात् ब्रूहि ॥

---

१. युजिर् योगे इति धातुः ॥ २. युज समाधौ इति धातुः ॥ अतो न द्विरुक्तिशंका ॥

कृष्णः ॥ इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते ॥
तदस्यहरति प्रज्ञां वायुर्नावमिवांभसि ॥ ६७ ॥

इन्द्रियाणामिति ॥ चरतां इन्द्रियाणां अनु पृष्ठतः मनः विधीयते इति यत्, इन्द्रियाणां मध्ये यत् इन्द्रियं मनः अनुविधीयते इति वा तत् अस्य प्रज्ञां वायुः अंभसि जले नावमिव हरति ॥ ६७ ॥

कृष्णः ॥ विषयेषु चरतां इन्द्रियाणां चक्षुरादीनां अनु पृष्ठतः मनः विधीयते ईश्वरेण तत्तदिच्छावता पुरुषेण वा प्रवर्त्यते इति यत् ॥ अनुविधीयते अनुप्रवर्तते इति यत इति वा कर्मकर्तरि लकारः ॥ तत् मनसः इन्द्रियानुसरणं, यत् मनः अनुविधीयते तत् इन्द्रियानुप्रवृत्तं मनः इति वा प्रतिकूलो वायुः जले नावमिव अस्य प्रज्ञां परोक्षज्ञानं परोक्षज्ञानहेतुभूतां विवेकबुद्धिं वा हरति कर्षति अपनयति वा ॥ उत्पत्स्यमानं परोक्षज्ञानं प्रतिबध्नाति ॥ उत्पन्नमपि तत् ध्यानयोगानुपयुक्तं करोति ॥ यथा प्रतिकूलो वायुः मार्गे गच्छन्तीं नावं आकृष्य अमार्गे नीत्वा आवर्तादौ पातयित्वा विध्वंसयति तथा प्रसादरहितं मनः अस्य बुद्धिं अपरोक्षज्ञानतत्साधनमार्गे गच्छन्तीं बलादाकृष्य नीत्वा विषयादिषु पातयित्वा विध्वंसयति ॥ अतः अयुक्तस्य बुद्धिर्नास्ति ॥ अयुक्तस्य भावना न भवति ॥ अतः युक्तिशब्दितो मनःप्रसादः यत्नतः संपादनीयः ॥ इन्द्रियाणामिति बहुवचनेन मनसो बह्विन्द्रियानुसरणमनर्थहेतुः नैकेन्द्रियानुसरणमिति भाति ॥ एकमपीन्द्रियं मनसाऽनुसृतमनर्थमावहति ॥ अतः कथमिदं इति चेत् इन्द्रियाणां मध्ये यत् एकं इन्द्रियं मनः अनुविधीयते तत् मनसाऽनुसृतं एकमपीन्द्रियं अस्य प्रज्ञां हरति ॥ किमु वक्तव्यं मनसाऽनुसृतानि बहूनीन्द्रियाणि प्रज्ञां हरन्तीति ॥ वायोः नौहरणमंभस्येवेति प्रसिद्धं अतः अंभसीति किमर्थं इति चेत् यथा वायोः अंभस्येव नौहरणसामर्थ्यं न भुवि तथा अंभस्स्थानीये मनश्चाञ्चल्ये सत्येव मनस इन्द्रियानुसरणस्य मनसाऽनुसृतस्येन्द्रियस्य वा प्रज्ञाहरणसामर्थ्यं न भूस्थानीये मनस्स्थैर्ये सति इति सूचनायांभसीत्युक्तम् ॥ इन्द्रियं प्रतिकूलवायुः मनः नाविकः प्रज्ञा नौः ॥ यदि नाविकः प्रतिकूलवायुमनुसृत्य नावं नयति तदा नाविकानुसृतः प्रतिकूलवायुः नावमन्यत्र नीत्वा नाशयति ॥ तथा यदि मनः इन्द्रियमनुसृत्य प्रज्ञां नयति तदा मनसाऽनुसृतं इन्द्रियं प्रज्ञामन्यत्र

नीत्वा नाशयति ॥ अतः मनसा नाविकेनेव सावधानेन भवितव्यम् ॥ अयमेव मनसः प्रसादः। स चेष्टप्राप्त्यनिष्टपरिहारौ कामयमानेन यत्नतः संपादनीयः ॥ ६७ ॥

अर्जुनः ॥ एतावता किं निष्पन्नम् ॥ वद ॥

कृष्णः ॥ तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः ॥
इन्द्रियाणीन्द्रियार्थेभ्यः तस्य प्रज्ञा प्रतिष्ठिता ॥ ६८ ॥

तस्मादिति ॥ महान्तौ बाहू यस्य सः महाबाहुः हे महाबाहो अर्जुन यस्य सर्वशः सर्वाणि इन्द्रियाणि सर्वैः व्यापारैः सह सर्वैः प्रकारैः इन्द्रियाणां अर्थाः इन्द्रियार्थाः तेभ्यः इन्द्रियार्थेभ्यः निगृहीतानि ॥ तस्य प्रज्ञा ज्ञानं प्रतिष्ठिता ॥ ६८ ॥

द्वै ॥ यस्मात् उक्तविधया इन्द्रियनिग्रहवत एव प्रसादद्वारा ध्यानयोगसिद्धिः नानिगृहीतेन्द्रियस्य तस्मात् यस्य सर्वाणीन्द्रियाणि समनस्कानि सर्वेभ्यो विषयेभ्यो व्यावर्तितानि तस्यैव प्रज्ञा प्रतिष्ठिता ॥ स एवापरोक्षज्ञानी ॥ 'विषया विनिवर्तन्ते' इत्यादिना ज्ञानस्य महाऽऽयाससाध्येन्द्रियजयसाध्यत्वं यदुक्तं तस्योपसंहारोऽयम् ॥ महाबाहुनाऽपि त्वया ज्ञानार्थं दुर्जयानामिन्द्रियाणां जयाय महान् प्रयत्नः कार्यः ॥ 'प्रजहाती'ति ज्ञानिलक्षणम् ॥ 'दुःखेष्वि'त्यादिभिस्त्रिभिस्तद्विवरणम् ॥ 'विषया' इत्यादिभिस्त्रिभिस्तदसंभवशंकानिरासाय ज्ञानस्य महाऽऽयाससाध्येन्द्रियजयसाध्यत्वोक्तिः ॥ 'ध्यायत' इत्यादिभिः सप्तभिस्तद्विवरणमिति विवेकः ॥ ६८ ॥

अ ॥ यस्मात् अनिगृहीतेन्द्रियस्य उक्तविधया ज्ञानाभावः तस्मात् यस्य सर्वाणीन्द्रियाणि सर्वैः प्रकारैः सर्वेभ्यो विषयेभ्यो निगृहीतानि स एवापरोक्षज्ञानी ॥ तस्येति सिद्धस्य साधकस्य च ग्रहणम् ॥ साधकः साधनेनानेन अपरोक्षज्ञानी भवति ॥ सिद्धः लक्षणेनानेन अपरोक्षज्ञानी ज्ञेयः ॥ मुमुक्षोः साधनं ज्ञानिनो लक्षणं चेत्युभयमिह विवक्षितम् ॥ अतस्तयोर्द्वयोरत्रोपसंहारः ॥ ज्ञानिनो लक्षणत्वात् मुमुक्षोः साधनत्वाच्च इन्द्रियजयः संपादनीयः ॥ महाबाहुत्वादन्तःशत्रुनिबर्हणसमर्थ एवेन्द्रियजयद्वारा ज्ञानी भवति ॥ महाबाहुत्वेन सर्वशत्रुनिबर्हण-

समर्थस्त्वं दुर्जयेन्द्रियशत्रुनिबर्हणेऽपि क्षमोऽसि ॥ सत्यपि चतुर्थप्रश्नोत्तरशेषे मुमुक्षोरिन्द्रियजयरूपसाधनोक्तिप्रकरणोपसंहारोऽयमिति बोध्यम् ॥ ६८ ॥

वि ॥ तस्मात् इन्द्रियानुविधायिनो मनसः प्रज्ञाहारित्वात् यस्य सर्वाणीन्द्रियाणि विलोकनादिभिः सर्वैर्व्यापारैः सह दोषदर्शनादिभिः सर्वैः प्रकारैर्वा सर्वेभ्यो विषयेभ्यो व्यावर्तितानि तस्यैव प्रज्ञाशब्दिता परोक्षज्ञाननिष्ठाकाष्ठा स्थितप्रज्ञताख्या प्रतिष्ठिता ॥ उक्तविधया इन्द्रियजयवत एव स्थितप्रज्ञताख्यपरोक्षज्ञाननिष्ठोदयात्तदर्थमिन्द्रियजयः संपादनीयः ॥ 'यदा संहरते चायं' त्यादिना यदुक्तमिन्द्रियजयस्य ज्ञानसाधनत्वं तस्योपसंहारोऽयम् ॥ महाबाहुत्वात्तवेदं साध्यम् ॥ अतस्तदर्थं प्रयतस्व ॥ ६८ ॥

द्वै ॥ अर्जुनः ॥ 'प्रजहाती' त्यादिनोक्तं अपरोक्षज्ञानिलक्षणं बुद्ध्यारोहाय पिण्डीकृत्य ब्रूहि ॥ 'स्थितप्रज्ञस्य का भाषे'ति कृतप्रश्नस्योत्तरमुक्तम् ॥ 'स्थितधीः किं प्रभाषेते'त्यादिना कृताक्षेपस्य परिहारं ब्रूहि ॥

कृष्णः ॥ या निशा सर्वभूतानां तस्यां जागर्ति संयमी ॥
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥ ६९ ॥

येति ॥ सर्वाणि च तानि भूतानि च सर्वभूतानि तेषां सर्वभूतानां या निशा निशेव तस्यां संयमः इन्द्रियनिग्रहः अस्यास्तीति संयमी जागर्ति बुध्यते भूतानि प्राणिनः यस्यां जाग्रति बुध्यन्ते सा मुनेः पश्यतः ज्ञानिनः निशा निशेव ॥ ६९ ॥

या ईश्वरस्वरूपलक्षणा व्यक्तिः ईश्वरस्वरूपरूपः पदार्थः सर्वप्राणिनां निशेव तस्यां ईश्वरस्वरूपविषये संयमी इन्द्रियनिग्रहसाध्यापरोक्षज्ञानवान् जागरूको वर्तते ॥ सर्वेषां ज्ञानाविषयं भगवत्स्वरूपं सम्यगापरोक्ष्येण पश्यति ॥ यस्यां विषयलक्षणायां व्यक्तौ विषयरूपे पदार्थे सर्वे प्राणिनो जागरूका वर्तन्ते सा विषयरूपः पदार्थः मुनेः परोक्षज्ञानवतः तेन पश्यतः अपरोक्षज्ञानिनः निशेव प्राणिभिर्दृश्यमानान् श्रूयमाणान् अनुभूयमानांश्च विषयान् न पश्यति न शृणोति न चानुभवति ॥ 'यत्तु सर्वाऽऽत्मनाऽज्ञानं सा निशा परिकीर्त्यते ॥' इति हि वदन्ति ॥ सदा भगवदनुभव-

वत्तया तदितरविषयानुभवाभाववत्वं ज्ञानिनो लक्षणम् ॥ निशादृष्टान्तेन ज्ञानिनोऽज्ञानिवद्विषयदर्शनाभावेऽपि प्रारब्धकर्मणा ईषत्तिरोहितब्रह्मस्वरूपस्य वासनया प्रायोऽल्पाभिसन्धिपूर्वकं मत्तस्येव भाषणासनगमनादि १ प्रवृत्तिरुपपद्यते इति प्रवृत्त्याद्याक्षेपस्य परिहारोऽप्यर्थाल्लभ्यते ॥ मुनेः अत एव पश्यतः इति हेतुहेतुमद्भावेनान्वयः ॥ मननादेर्दर्शनसाधनत्वस्य पूर्वं स्पष्टमनुक्तत्वादिह तदुक्तिः ॥ इदं च तत्त्वाभिमानिदेवेतरज्ञानिविषयम् ॥ अन्यथा सर्वप्रेरकाणां तेषां भगवदितरत्राभिसन्ध्यभावे लोकयात्रोच्छेदापातात् ॥ ६९ ॥

अ ॥ अर्जुनः ॥ इन्द्रियजयस्य आत्मदर्शनसाधनत्वमुक्तं उपपादितं उपसंहृतं च ॥ तेन साधनेनाऽऽत्मदर्शननिष्ठां प्राप्तस्य तादृशं फलं किम् ॥ ब्रूहि ॥

कृष्णः ॥ या व्यक्तिः परमार्थतत्त्वरूपः पदार्थः आत्मदर्शनहीनानां सर्वप्राणिनां अप्रकाशस्वरूपत्वान्निशेव ॥ तस्यां परमार्थतत्त्वविषये संयमी इन्द्रियनिग्रहवान् जागर्ति प्रबुद्धो वर्तते ॥ यथा नक्तंचराणां दिवाऽन्धानामुलूकानां अप्रकाशस्वरूपत्वान्निशाभूतेऽपि स्वतःप्रकाशभूते अह्नि तदितरे जाग्रति तथा अज्ञानामप्रकाशस्वरूपत्वान्निशातुल्येऽपि स्वतःप्रकाशे परमात्मतत्त्वे वशीकृतेन्द्रियोऽज्ञाननिद्रातः प्रबुद्धो जागर्ति ॥ इन्द्रियनिग्रहवान् आत्मदर्शनवान् भवतीति यावत् ॥ इन्द्रियनिग्रहवान् अपरोक्षज्ञानी भवतीति प्रागुक्तस्य तात्पर्यार्थस्यानुवादः ॥ यस्यां द्वैतदर्शनलक्षणायां अविद्यानिशायां भूतानि प्राणिनः जाग्रति निशायां सुप्ताः स्वाप्नपदार्थानिव मिथ्याभूतानेवार्थाननुभवन्ति ॥ सा द्वैतदर्शनलक्षणा अविद्यानिशा पश्यतः आत्मदर्शनवतः मुनेः ज्ञानिनः निशेव नाज्ञानामिव मिथ्याभूतानर्थान् प्रकाशयति ॥ यथा स्वतोऽप्रकाशस्वरूपत्वान्निशाऽपि रात्रिः स्वाप्नपदार्थप्रकाशकत्वादहस्तुल्या भवति

१. उक्तश्चापरोक्षज्ञानिनः प्रवृत्तिप्रकारो भागवते कृष्णोद्धवसंवादे (११. १३.) 'देहं च नश्वरमवस्थितमुत्थितं वा सिद्धो न पश्यति यतोऽध्यगमत्स्वरूपं ॥ दैवादुपेतमथ दैववशादपेतं वासो यथा परिकृतं मदिरामदान्धः ॥ १ ॥ देहोऽपि दैववशगः खलु कर्म यावत् स्वारंभकं प्रतिसमीक्षत एव सासुः ॥ तं सप्रपञ्चमधिरूढसमाधियोगः स्वाप्नं पुनर्न भजते प्रतिबुद्धवस्तुः ॥' इति ॥ परिवृतं ॥ प्रतिबुद्धवत् सः ॥ इति पाठान्तरम् ॥

तथा स्वतोऽप्रकाशस्वरूपत्वान्निशातुल्याऽपि द्वैतदर्शनलक्षणा अविद्या स्वाप्नपदार्थवन्मिथ्याभूतानामर्थानां प्रकाशकत्वाद्दशानामहस्तुल्या भवति ॥ पश्यतस्तु मुनेः सा कस्याप्यर्थस्याप्रकाशकत्वान्निशातुल्यैव भवति ॥ आत्मदर्शनवतः निरवशेषमविद्यातत्कार्यनिवृत्तिर्भवतीति यावत् ॥ इन्द्रियजयस्य आत्मदर्शनं फलं तस्य च निःशेषमविद्यातत्कार्यनिवृत्तिः फलम् ॥ अत उक्तफललाभाय इन्द्रियजयः संपादनीयः ॥ आत्मदर्शनवतः निरवशेषमविद्यातत्कार्यनिवृत्युक्त्या सर्वकर्मनिवृत्तिरुच्यते ॥ कर्मणामविद्याकार्यत्वात् ॥ अविद्यादशायां क्रियाकारकफलभेदप्रतिभानात्कर्मकरणं निवृत्तौ चाविद्यायास्तदभावात्सर्वकर्मसंन्यासः ॥ असति विद्योदये बाधकाभावाद्विद्या प्रमाणतया गृहीता कर्माणि प्रवर्तयति ॥ सति तु तस्मिन् अप्रमाणतया गृहीता सा कर्माणि निवर्तयति ॥ इत्यादिकमवधेयम् ॥

या ब्रह्मविद्या निशेव स्वयंप्रकाशरूपाऽपि अज्ञानां निशातुल्या भवति ॥ घुमणिद्युतिरिव सुदृष्टिहीनानाम् ॥ तस्यां निशायां संयमी जागर्ति ॥ यथा प्रसिद्धनिशा स्वीयतमश्शक्त्या नामरूपभेदमपोह्य सर्वं वस्तुजातं तमोमात्रं कृत्वा स्वयमेव सर्वत्र विजृम्भते तथा स्वीयचिच्छक्त्या नामरूपभेदमपोह्य सर्वं वस्तुजातं चिन्मात्रं कृत्वा स्वयं विजृम्भणान्निशातुल्यायां ब्रह्मविद्यायां जागर्ति ॥ अवहितस्सन्नास्ते ॥ पश्यतः सर्वं मिथ्यैवेति पश्यतः ॥ यथा ब्रह्मविद्यया ब्रह्मैवाहमिति स्वमात्मानं आनन्दैकरसपरब्रह्मतया विषयीकर्तुमज्ञा नशक्नुवन्ति तथा ब्रह्मवित् अहं ममेदमिति देहेन्द्रियादिकं विषयीकर्तुं न शक्नोति ॥ अत एव नास्य लौकिके वैदिके च कर्मण्यधिकारः ॥ अयोग्यत्वात् ॥ देहतदाश्रितवर्णजात्यादावभिमानवतः फलकामनावतः क्रियासु गुणदोषदर्शनवत एव कर्मणि योग्यत्वात् ॥ ब्रह्मतादात्म्यभावनापन्नस्य च तदभावात् ॥ वस्तुनः सत्यत्वनिश्चयपूर्विकायाः प्रवृत्तेः मिथ्यात्वदर्शनस्य च परस्परविरुद्धत्वाच्च ॥ तस्मादस्य चिदानन्दैकरसब्रह्मतादात्म्यभावनामन्तरेण न किञ्चित्कर्तव्यमस्तीति सिद्धम् ॥

दा परदेवता नितरां शेरतेऽस्यां प्राणिनः इति निशा रात्रिः सेव व्यवहर्तुमशक्यत्वान्निशातुल्या ॥ नितरां शं सुखं यस्याः सा निशा तस्यां अत्यन्तसुखरूपायां परस्यां देवतायां परब्रह्मणि संयमी जागर्ति तदन्ये तु शेरते ॥ श्रुतवेदान्ता अप्यवशीकृतेन्द्रियाः न किमपि जानन्तीत्यर्थः ॥ यस्यां अविद्यायां जाग्रति भेदेन

व्यवहरन्ति सा द्वैतदर्शनलक्षणा अविद्या पश्यतः सर्वं ब्रह्म पश्यतः मुनेः ब्रह्मनिष्ठस्य निशेव ॥ लौकिकं वैदिकं वा भेदेन व्यवहारं न करोति ॥

या अहं ब्रह्मास्मीति प्रज्ञा अप्रकाशरूपत्वात् निशेव ॥ यथा रात्र्यन्धस्य काकस्य दिनमुलूकस्य दिवान्धस्य निशा तथा ॥ तस्यां संयमी इन्द्रियजयसाध्यापरोक्षज्ञानवान् जागर्ति ॥ सावधानो वर्तते ॥ यस्यां द्वैतदर्शनलक्षणायां अविद्यायां प्राणिनो जाग्रति ॥ भ्रमनिमित्तव्यवहारं कुर्वन्ति ॥ सा अविद्या पश्यतः आत्मतत्वमपरोक्षतया पश्यतः मुनेः स्थितप्रज्ञस्य निशेव ॥ यथा दिवान्धस्य रात्रौ पश्यत उलूकस्य दिनं रात्र्यन्धस्य काकस्य निशा तथा ॥ अपरोक्षज्ञानी भ्रमनिमित्तकं कमपि व्यवहारं न करोति ॥ १ 'यत्र वा अन्यदिव स्यात् तत्रान्योऽन्यं पश्येत् ॥' इति २ 'यत्र त्वस्य सर्व मात्मैवाभूत्तत्केन कं पश्येत् ॥' इति च श्रुतिः ॥ ३ 'आविद्यककियाकारकादिव्यवहाराभावात् स्थितप्रज्ञस्य स्वत एवेन्द्रियजयसिद्धिः ॥ इन्द्रियजयो मुमुक्षोर्यत्नसाध्यं साधनम् ॥ स एव स्थितप्रज्ञस्यायत्नसिद्धं लक्षणम् ॥ मुमुक्षोः साधनं ज्ञानिनो लक्षणं इत्येतदुक्तमपि तात्पर्यात्पुनरत्रोक्तमिति बोध्यम् ॥

या सर्वप्राणिनां ४ आत्मविषयकाज्ञानरूपा रात्रिः तस्यां संयमी जागर्ति ॥ यस्यां जाग्रदवस्थायां भूतानि व्यवहारं कुर्वन्ति सा व्यवहारमपश्यत आत्मद्रष्टेः निशा ॥ व्युत्थितसमाधिस्थोभयानुगतं ज्ञानिलक्षणमिदमिति बोध्यम् ॥ ६९ ॥

वि ॥ अर्जुनः ॥ स्थितप्रज्ञतायां परोक्षज्ञाननिष्ठां प्राप्तस्य अवस्थाचतुष्टयमुक्तं उपपाद्योपसंहृतं च ॥ तदापन्नः कीदृशो भवति ॥

कृष्णः ॥ इन्द्रियसंयमादिरहितानां प्राणिनां या आत्मविषया बुद्धिः अप्रसूतदशाऽऽपन्नत्वान्निशेवाप्रकाशा तस्यां बुद्धौ संयमी इन्द्रियसंयमसाध्यमनः-

१. बृ. ६. ३. ३१. २. बृ. ६. ५. १५. ३. अत्र 'कारकव्यवहारे हि शुद्धं वस्तु न वीक्ष्यते ॥ शुद्धे वस्तुनि सिद्धे च कारकव्यापृतिस्तथा ॥ १ ॥ काकोलूकनिशेवायं संसारोऽज्ञाऽऽत्मवेदिनोः ॥ 'या निशा सर्वभूतानां'मित्यवोचत् स्वयं हरिः ॥' इत्येतदनुसन्धेयम् ॥ ४. अत्र, 'आत्मा न हि स्फुरति सर्वशरीरभाजां तेषां निशा भवति सा खलु तत्र योगी ॥ जागर्ति जाग्रति च ते व्यवहारजाते तत्र स्फुरत्युरुधियः क्षणदाऽस्य सा तु ॥' इत्यनुसन्धेयम् ॥

प्रसादादिमान् उक्तावस्थाचतुष्टयवान् जागर्ति अवहितो वर्तते ॥ सततमात्मानवलोकयन्नास्ते ॥ तद्विषयकप्रकाशमानप्रसृतबुद्धिविशिष्टो भवति ॥ यस्यां शब्दादिविषयायां बुद्धौ सर्वभूतानि जाग्रति सा शब्दादिविषयविषयकबुद्धिः पश्यतः उक्तावस्थाचतुष्टयसिद्धाऽऽत्मावलोकनवतः मुनेः ज्ञानिनः निशेवाप्रकाशा ॥ स मुनिः शब्दादिविषयादर्शनवान् भवति ॥ उक्तावस्थाचतुष्टयस्याऽऽत्मावलोकनं फलं आत्मावलोकनस्य शब्दादिविषयादर्शनं फलम् ॥ अत उक्तावस्थाचतुष्टयं यत्नतः साधनीयं ॥ उक्तमपीदं तात्पर्यात्पुनरत्रोक्त्वा निगमितं ॥ इन्द्रियजयमनःप्रसादयोरुक्तस्य फलस्य तात्पर्यात्पुनरनुवादेन प्रशंसेयमित्यवधेयम् ॥ ६९ ॥

द्वै ॥ अर्जुनः ॥ अस्तूक्तरीत्या स्थितप्रज्ञस्य गमनादिप्रवृत्त्युपपत्तिः ॥ तस्य दृश्यमानो विषयानुभवः कथमुपपद्यते ॥ विषयाननुभवतस्तस्य कथं मोक्षः ॥ विषयानुभवस्य मोक्षप्रतिबन्धकत्वात् ॥ ब्रूहि ॥

कृष्णः ॥ आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत् ॥
तद्वत्कामा यं प्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी ॥७०॥

आपूर्यमाणमिति ॥ आपूर्यमाणं न चला अचला प्रतिष्ठा स्थितिः स्वभावो वा यस्य सः अचलप्रतिष्ठः तं समुद्रं आपः जलानि यद्वत् यथा प्रविशन्ति तद्वत् तथा सर्वे काम्यन्त इति कामाः विषयाः यं ज्ञानिनं प्रविशन्ति ॥ सः ज्ञानी शांतिं मोक्षं आप्नोति ॥ कामेषु कामः कामकामः कामकामः अस्यास्तीति कामकामी शान्तिं नाऽऽप्नोति ॥ ७० ॥

नानानदीजलैरापूर्यमाणमपि अचलस्वभावं सरित्प्रवेशजनितवृद्धिविशेषराहित्येन स्वभावेनैवावस्थितं इति यावत् ॥ इदमुपलक्षणम् ॥ सरितामप्रवेशनिमित्तशोषरहितं सरितामागमनाय प्रयत्नमकुर्वन्तं च समुद्रं आपः यथा प्रविशन्ति ॥ तथा सर्वैः काम्यमानत्वात्कामशब्दिताः विषयाः स्थितप्रज्ञं प्रविशन्ति ॥ विषयैः आपूर्यमाणमपि अचलप्रतिष्ठं इच्छाभावादुत्सेकहीनं विषयालाभेऽपि शोषहीनं विषयलाभाय प्रयतनमकुर्वन्तं च समुद्रमिव गंभीरं यमेवं सर्वे विषयाः प्रविशन्ति ॥ य एवं विषयाननुभवतीति यावत् ॥ सः स्थितप्रज्ञः शान्तिं मोक्षं प्राप्नोति ॥ कामेषु

विषयेषु कामः इच्छा तद्वान् शान्तिं नाऽऽप्नोति ॥ स्थितप्रज्ञः पुमान् अनिच्छया यदृच्छयोपनतान् विषयाननुभवति ॥ अनिच्छया विषयानुभवो न मोक्षं प्रतिबध्नाति ॥ विषयेच्छा हि मोक्षस्य प्रतिबन्धिका ॥ सः शान्तिं आप्नोति यतः कामकामी न ॥ तस्यापि भगवत्प्रसादादिकामकामित्वात् कथं कामकामी नेत्युच्यते इति चेत् का कुत्सिता निषिद्धा इति मा ज्ञानं यस्यां सा कामा निषिद्धा इति ज्ञानविषयभूता निषिद्धेच्छा साऽस्यास्तीति कामकामी निषिद्धेच्छावान् न इत्युच्यते ॥ अतो न दोषः ॥ धर्माविरुद्धकामो न दोषाय ॥ वक्ष्यते च ॥ १ 'धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ ॥' इति ॥ नास्य ज्ञानिनः फलोक्तौ तात्पर्यं ॥ किन्तु तस्य प्रशंसायाम् ॥ अतः 'प्रसादे सर्वदुःखानां हानिरस्योपजायते ॥' इत्यनेन न पुनरुक्तिः ॥ तत्र ज्ञानिनः फलमुच्यते ॥ अत्र तु ज्ञानिनः अनिच्छया यदृच्छयोपनतविषयानुभवो न ज्ञानफलं प्रतिबध्नातीत्युच्यते ॥ इति भेदान्नैव पुनरुक्तिशङ्काऽध्यकाशः ॥ ज्ञानिनोऽज्ञानिवद्विषयेच्छाऽभावेऽपि विनैव प्रयत्नं स यदृच्छयोपनतविषयान् उत्सेकानुत्सेकराहित्येन वारिनिधिरिवापगा अनुभवति ॥ 'अतस्तस्य दृश्यमानो विषयानुभव उपपद्यते ॥ एवं विषयानुभवस्य मोक्षं प्रत्यप्रतिबन्धकत्वान्न मोक्षानुपपत्तिरपि ॥ इति बोध्यम् ॥ ७० ॥

अ ॥ अर्जुनः ॥ 'या निशा पश्यतो मुनेः' इति स्थितप्रज्ञस्य सर्वकर्मनिवृत्तिः विषयादृष्टिश्चोक्ता ॥ यद्येवं तर्हि तस्य विषयानुभवो नोपपद्येत ॥ दृश्यते च विषयानुभवः स्थितप्रज्ञस्यापि ॥ कथमिदमुपपद्यते ॥ वद ॥

कृष्णः ॥ आपः तत्तन्नादेयाः वृष्ट्यादिप्रभवाश्च जलैः पूर्णमपि आगतैः नानानदीजलैः पूर्यमाणमपि २ अचलत्वेन स्थितिमन्तं उदकात्मकस्वकीयप्रतिनियतस्वरूपस्थं अचला प्रतिष्ठा स्थितिर्यस्य तादृशं च वृद्धिरूपविकाररहितमेव सन्तं अनापूर्यमाणमपि ह्रासरूपविकाररहितमेव सन्तं गांभीर्यातिशयात् अचलानां मैनाकादीनां प्रतिष्ठा यस्मिन् तादृशं च समुद्रं ३ यथा प्रविशन्ति तथा सर्वे कामाः इच्छाविशेषाः काम्यमानाः शब्दादिविषया वा आपूर्यमाणमपि विषयसन्निधिमन्त-

१. ७. ११. २. भावप्रधानं ॥ अचलेन अचलत्वेन प्रतिष्ठा यस्य तं ॥ ३. येन विकारानापादकत्वप्रकारेण ॥

मपि अचलप्रतिष्ठं लाभालाभयोः वृद्धिह्रासरूपविकाररहित्येन स्वभावत एवावस्थितं निर्विकारमेव सन्तं यं स्थितप्रज्ञं अवर्जनीयतया प्रारब्धवशात् प्रविशन्ति समुद्रमिवाऽऽपोऽविकुर्वन्त एव प्रविशन्ति ॥ समुद्र इवापस्तस्मिन् प्रविलीयन्ते ॥ न तु स्ववशीकृत्य विकारमापादयन्ति ॥ सः शान्तिं मोक्षं सर्वलौकिकालौकिककर्मविक्षेपनिवृत्तिं अविद्यातत्कार्यनिवृत्तिं च आप्नोति ॥ कामान् विषयान् कामयितुं शीलं अस्य कामकामी शान्तिं नाप्नोति ॥ अपि तु लौकिकालौकिककर्मविक्षेपेण महतिं क्लेशजलधौ निमग्नो भवति ॥ सर्वकर्मसंन्यासिनः समुद्रवन्निर्विकारस्य ज्ञानिनो मोक्षः ॥ नासंन्यासिनः इच्छया विषयाननुभवतो मोक्षः ॥ अनिच्छया दैवादुपनतविषयभोगस्तस्येति न विषयभोगानुपपत्तिः ॥ सर्वकर्मसंन्यासः सर्वविक्षेपनिवृत्तिरूपा जीवन्मुक्तिः दैवादुपनतविषयभोगेऽपि निर्विकारता च तस्य संपद्यत इत्यहो महिमा ज्ञानस्य ॥

आपः नानाविधवर्णरसगन्धगुणफलवन्ति गंगादिनानामहानदीजलानि निजस्वरूपरूपजलैः पूर्णमपि आगतनिजनिजप्रवाहैः आपूर्यमाणमपि चलनवर्जितजलस्थितिमन्तं समुद्रं यथा प्रविशन्ति ॥ स्वकीयशुक्लनीलादिवर्णमधुरादिरसपरिमळादिगन्धलघुत्वादिगुणद्वित्रिकृच्छ्रादिसमानपुण्यफलगंगादिनामपरित्यागपूर्वकं समुद्रभावमेव गच्छन्ति ॥ नामरूपगुणादिविशेषैः समुद्रान्न भिद्यन्ते ॥ तथा सर्वे काम्यन्ते नामरूपादिभेदेन विविच्य गृह्यन्ते इति कामाः भोग्यपदार्थाः सूपापूपरसान्नादयः सर्वतोऽनिच्छाप्रारब्धवशादापतितैः अनेकैः नामरूपादिभेदभिन्नैः भोग्यविशेषैः [1]आपूर्यमाणमपि मां गृहाण मां गृहाणेति दातृजनद्वारा व्याकुलीक्रियमाणमपि अचला निर्विकल्पा विपरीतभावनाशून्या व्युत्थानदशायामाहारादावपि ब्रह्माकारतामापाद्य स्थिता प्रतिष्ठा स्थितिः यस्य तादृशं विपरिणामरहितान्तःकरणं अचले ब्रह्मणि प्रतिष्ठा स्थितिः यस्य तं इति वा यं स्थितप्रज्ञं प्रविशन्ति ॥ यं प्रविष्टाः अध्यात्मदृष्ट्या प्रविलापिताः चिदेकरसतामापन्नाः स्वकीयनामरूपादिपरित्यागपूर्वकं समुद्रं प्रविष्टा आपगाः समुद्रभावमिव ब्रह्मभावं गच्छन्ति ॥ स एव अविद्याप्रपंचोपशमलक्षणां शान्तिं विदेहमुक्तिं आप्नोति ॥ कामाः विषयाः तान् कामयते इति कामकामी ब्रह्मनिष्ठां परित्यज्य शुक्तौ रजतमिव ब्रह्मणि कल्पयित्वा

---

१. निरतिशयस्वात्मानन्देनैव परिपूर्णं अतः निर्विकारं इति केचित् ॥

अहं भोक्ता इदं भोग्यं इति ममताऽहन्ताभ्यां इदमिष्टं इदमनिष्टं इति भेदबुद्ध्या नाम-रूपादिभेदेन च पदार्थग्राही द्वैतदर्शी शान्तिं नाऽऽप्नोति ॥ तस्य अविद्यावत्त्वेन मुक्तेरनुपपद्यमानत्वात् ॥ बाल्ये स्वजनसन्निधौ स्थिता स्वजनैर्लाल्यमाना प्रौढा भूत्वा विहाय मातापितृभ्रात्रादीन् स्वजनान् भर्तारमेकमेवाऽऽश्रिता पतिव्रता कन्येव यस्य ब्रह्मविदः प्रज्ञा पूर्वं विषयविषया स्थिता पश्चात् प्रौढा भूत्वा प्रविहाय देहं प्राणमिन्द्रियजातं च सर्वं दूरतः चिदानन्दैकरसं परं ब्रह्मैकमेवाऽऽश्रिता तेनैव तृप्यन्ती हृष्यन्ती नन्दन्ती नान्यं स्पृहयन्ती पश्यन्ती शृण्वन्ती स्मरन्ती तत्रैव रममाणा तिष्ठति ॥ स एव विदेहमुक्तिमाप्नोति ॥ नेतरः ॥ अतः कैवल्यार्थिनः सर्वत्र ब्रह्मदृष्टिः सर्वकर्मसंन्यासश्चेत्युभयं कर्तव्यं संपन्नं इति बोध्यम् ॥ ७० ॥

वि ॥ अर्जुनः ॥ स मुनिः शब्दादिविषयादर्शनवान् भवतीत्युक्तं ॥ तादृशी दशा कथं संपद्येत ॥ ब्रूहि ॥

कृष्णः ॥ आपः तत्तन्नादेय्यः आपूर्यमाणमपि विनैव नादेयीनामपां प्रवेशं स्वत एव सम्यक् पूर्यमाणमपि वर्द्धिह्रासराहित्येन एकरूपतयाऽवस्थितं समुद्रं यथा येन प्रवेशेऽप्रवेशे च विशेषानापादकत्वप्रकारेण प्रविशन्ति ॥ तथा तेन प्रकारेण सर्वे कामाः शब्दादिविषयाः यं इन्द्रियजयमनःप्रसादादिमन्तं प्रविशन्ति ॥ तदीयतत्तदिन्द्रियगोचरतां यान्ति ॥ सः शब्दादिभिरिन्द्रियगोचरतामापन्नेषु अनापन्नेषु च यः स्वाऽऽत्मावलोकनतृप्त्या न विकारमाप्नोति ॥ स संयमी शान्तिं विषयानुभवनिवृत्तिं 'सानिशे'ति पूर्वश्लोकोक्तां मोक्षंधा आप्नोति ॥ कामान् कामयितुं शीलमस्य सः कामकामी यः शब्दादीनां प्रवेशाप्रवेशाभ्यां विकारं आप्नोति सः शान्तिं नाप्नोति ॥ विषयदर्शनेऽपि निर्विकारतारूपा ततोऽर्वाचीना दशेयं ॥ अनया विषयादर्शनरूपा दशा संपद्यते ॥ नित्यनिरवद्यनिरतिशयस्वात्मानुभवानन्दसन्दोहमग्नो न नश्वरदुःखमिश्रसातिशयविषयानुभवानन्दबिन्दुषु सज्जते ॥ अतः आत्मावलोकनाय यत्नः कार्यः ॥ इति सिद्धम् ॥ ७० ॥

द्वै ॥ अ ॥ अर्जुनः ॥ कामाः समुद्रमाप इव यं प्रविशन्ति स शान्तिमाप्नोतीत्युक्तं ॥ विषयाननुभवतः कथं मोक्षः ॥ विस्पष्टं ब्रूहि ॥

कृष्णः ॥ विहाय कामान् यः सर्वान् पुमांश्चरति निस्स्पृहः ॥
निर्ममो निरहंकारः स शान्तिमधिगच्छति ॥ ७१ ॥

विहायेति ॥ यः पुमान जीवः निर्गतः अहंकारः यस्मान् सः निरहंकारः निर्गतं मम ममकारः यस्मात् सः निर्ममः निर्गता स्पृहा तृष्णा यस्मात् सः निस्स्पृहः तादृशश्च सन् सर्वान् कामान् विषयान् विहाय अहंकारादिकं विहाय चरति अनुभवति ॥ सः शान्तिं मोक्षं अधिगच्छति प्राप्नोति ॥ ७१ ॥

निस्स्पृहः अनिषिद्धेऽपीच्छामकुर्वन् निर्ममः विषयेषु स्वस्य स्वामित्वबुद्धिरहितः निरहंकारः अहमनुभवामीति कर्तृत्वाभिमानरहितः तादृशश्च सन् सर्वान् अनिषिद्धान् विषयान् विहाय तेषु स्पृहां ममतां अहन्तां च त्यक्त्वा चरति अनुभवति ॥ विहायेति निषेधः स्पृहादेरेव न कामानां ॥ विशिष्टे निषेधस्य सति विशेष्ये बाधे विशेषणनिषेध एव पर्यवसानात् ॥ चरतीत्यनुभवोक्त्या विशेष्ये निषेधस्य बाधितत्वात् ॥ सः शान्तिं आप्नोति ॥ यः एवमनुभवति स एव पुमान् अन्यस्तु [१] पशुः ॥ स पुमान् इति प्रशंसा ॥ अतो न स्त्रीणां व्यावृत्तिः ॥ [२] 'स्त्रियो वैश्यास्तथा शूद्राः तेऽपि यान्ति परां गतिं ॥' इति स्त्रीणामपि हि मोक्षो वक्ष्यते ॥ एवं विषयानुभवो न मोक्षस्य प्रतिबन्धकः ॥ अतः स्थितप्रज्ञस्य दृश्यमानो विषयानुभव उपपद्यते ॥ दार्ढ्यार्थमुक्तस्यैवायं प्रपंचः ॥ ७१ ॥

अ ॥ यः पुमान् सर्वान् विषयान् परित्यज्य शरीररक्षणमात्रेऽपि स्पृहारहितः दैवादुपनते शरीरजीवनमात्रार्थेऽपि परिग्रहे ममेदमिति ममतारहितः अहमीदृश इत्यात्मसंभावनारहितश्च सन् चरति ॥ देशविशेषे नियतावस्थाने रागद्वेषादिसंभवेन जीवनमात्रचेष्टाशेषः सन् पर्यटति ॥ स एव शान्तिं सर्वसंसारदुःखोपरमलक्षणां निर्वाणाख्यां मुक्तिं प्राप्नोति ॥ अतो मोक्षार्थिना एवं भवितव्यम् ॥ इति च ॥

यः पुमान् यो ब्रह्मवित् ब्रह्मविदेव हि पुमान् निरहङ्कारः ब्रह्मैवाहमिति ब्रह्मण्येव निरूढाऽऽत्मत्वाभिनिवेशेन देहादावहंबुद्धिरहितः निर्ममः देहतद्धर्मादौ ममतारहितः स्वस्य निरन्तरब्रह्मानन्दामृतरसेनैव तृप्तत्वात् अनात्माऽऽत्मीयत्वेन निश्चितान् देहादीनुद्दिश्य सुखेच्छाऽसंभवाच्च विषयेषु स्पृहारहितश्च सन् सर्वान् कामान् विहाय

---

१. अत्र, कस्तं त्वनादृत्य परानुचिन्तां ऋते पशुघ्नमसतीं नाम युञ्ज्यात् ॥ पश्यन् जनं पतितं वैतरण्यां स्वकर्मजान् परितापान् जुषाणं ॥' इति भाग. २. २. श्लोकोऽनुसन्धेयः ॥

शुक्तिरजततुल्यैस्तैः प्रयोजनाभावात् तानिन्द्रियैरगृह्णन्वा चरति ॥ १ 'कामान्नी कामरूप्यनुसञ्चरन् ॥' इत्याद्युक्तप्रकारेण सर्वत्रासंगः पर्यटति ॥ स शान्तिं विदेहमुक्तिं आप्नोति ॥ नेतरः ॥ इति च ॥ एवमीदृशं स्थितप्रज्ञस्य व्रजनमिति 'किं व्रजेते'ति चतुर्थप्रश्नस्योत्तरमष्टाभिः श्लोकैरुक्तमिति बोध्यम् ॥ ७१ ॥

वि ॥ अर्जुनः ॥ विषयादर्शनरूपदशाहेतुभूता ततोऽर्वाचीना विषयदर्शनेऽपि निर्विकारतारूपा दशोक्ता ॥ सा च कथं संपद्यते ॥ वद ॥

कृष्णः ॥ यः पुमान् विषयेषु निस्पृहः निर्ममश्च सन् निरहङ्कारः देहे आत्माभिमानरहितश्च सन् सर्वान् विषयान् विहाय चरति वर्तते ॥ सः शान्तिं आप्नोति ॥ विषयसंग्रहणस्पृहाममकारदेहाऽऽत्मभ्रमनिवृत्तिरूपा ततोऽर्वाचीना दशेयम् ॥ अनया आत्मदर्शनं लब्ध्वा तेन विषयदर्शनेऽपि निर्विकारतारूपां दशामवाप्य तया विषयादर्शनरूपां दशां प्राप्नोति ॥ पूर्वश्लोकौ आत्मदर्शनवत्पुरुषविषयौ ॥ अयं तु आत्मदर्शनार्थिपुरुषविषयः ॥ इति विवेकः ॥ ईदृशमहाफलसद्भावादुक्तावस्थाचतुष्टयं यत्नतः संपाद्य स्थितप्रज्ञताऽऽख्या परोक्षज्ञाननिष्ठाकाष्ठा संपादनीया ॥ इति 'प्रजहाती'त्यादेरस्य प्रकरणस्याऽऽशयः ॥ इति बोध्यम् ॥ ७१ ॥

अर्जुनः ॥ अस्याः एतदध्यायोक्तायाः परमदुर्लभायाः महता प्रयत्नेन संपादितायाः स्थितेः किं फलम् ॥ ब्रूहि ॥

कृष्णः ॥ एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ॥ ७१[॥] ॥

एषेति ॥ हे पार्थ एषा स्थितिः ब्रह्मणि भवा ब्रह्मणः इयं वा ब्राह्मी ॥ एनां प्राप्य न विमुह्यति ॥ मोहं न प्राप्नोति ॥ ७१[॥] ॥

द्वै ॥ ब्रह्मज्ञानिसंबन्धिनी परब्रह्मविषया वा स्थितिः लक्षणं एषा 'प्रजहाती'त्यादिना 'या निशे'त्यन्तेन ग्रन्थेन उक्तप्रकारा ॥ एनां स्थितिं उक्तं लक्षणं प्राप्य न विमुह्यति ॥ मोहनिमित्तकं संसारबन्धं न प्राप्नोति ॥ मुक्तो भवती-

१. तै. ३. १०.

ति यावत् ॥ स्थितेरस्याः मोक्षः फलम् ॥ अत इयं यत्नतः संपादनीया ॥ पार्थेदमवधेहि ॥ ७१॥ ॥

अ ॥ एषा उक्ता ब्रह्मविदः सर्वकर्मसन्न्यसनपूर्वकं ब्रह्मरूपेणावस्थानरूपा स्थितिः ब्रह्मणि भवा ब्राह्मी ब्रह्मनिष्ठा ॥ ब्राह्मी ब्रह्मविषया स्थितिः अपरोक्षज्ञानलक्षणा ॥ स्थितिः ज्ञानरूपा ब्राह्मी ब्रह्मप्रापिका ॥ एनां प्राप्य परमार्थविवेकराहित्यरूपं विमोहं न प्राप्नोति ॥ वि विशिष्टो मोहः अहमित्येवंरूपः यस्मिन् सः विमोहः देहः तं हते वा ॥ ईदृशफलवत्त्वादियं संपादनीया ॥ ७१॥ ॥

वि ॥ एषा आत्मयाथात्म्यज्ञानपूर्वकाकाम्यकर्मानुष्ठानरूपा स्थितप्रज्ञताऽऽख्यपरोक्षज्ञाननिष्ठाकाष्ठाहेतुभूता स्थितिः कर्मनिष्ठा ब्राह्मी ब्रह्मप्रापिका ॥ एनां पूर्वोक्तप्रकारां कर्मनिष्ठारूपां स्थितिं प्राप्य न विमुह्यति ॥ मोहमूलकं संसारबन्धं नाऽऽप्नोति ॥ अत इयमनुष्ठेया कर्मनिष्ठा ॥ ७१॥ ॥

द्वै ॥ अर्जुनः ॥ कियत्पर्यन्तमस्यां स्थितौ स्थातव्यम् किमिदं लक्षणं प्राप्तवतो ज्ञानिनः तद्देहपातानन्तरमेव मुक्तिः ॥ उत देहान्तराणि प्राप्य ॥ वद ॥

कृष्णः ॥ स्थित्वाऽस्यामन्तकालेऽपि ब्रह्म निर्वाणमृच्छति ॥ ७२ ॥

स्थित्वेति ॥ अस्यां स्थितौ अन्तस्य कालः अन्तश्चासौ कालश्च स वा अन्तकालः तस्मिन् अन्तकालेऽपि स्थित्वा अन्तकाले स्थित्वाऽपि निर्वाणं निर्गतं वाणं प्राकृतशरीरं यस्मात् तत् अप्राकृतशरीरं ब्रह्म परं ब्रह्म ऋच्छति प्राप्नोति ॥ निर्वाणं आनन्दरूपं ब्रह्म ॥ ब्रह्मनिर्वाणं इत्येकं पदम् ॥ ब्रह्मणः ब्रह्मणि वा निर्वाणं आनन्दं ब्रह्मणि निर्वाणं लयं वा प्राप्नोति ॥ निर्वाणं सुखैकरूपं ब्रह्म शुद्धात्मानं प्राप्नोति ॥ ७२ ॥

अस्यां स्थितौ भगवदनुस्मृत्यादिरूपज्ञानिलक्षणे अन्तकाले देहत्यागसमयेऽपि स्थित्वा बाणं शरीरं वयोरभेदात् वाणं शरीरं प्राकृतशरीरादिरहितं अप्राकृतदिव्यमङ्गळविग्रहं ब्रह्म ऋच्छति प्राप्नोति ॥ मुक्तो भवति ॥ ब्रह्मप्राप्तिरेव हि मोक्षः ॥ यदि शरीरवियोगसमये भगवदनुस्मृत्यादिकं स्यात् तर्हि तद्देहपातानन्तरमेव मोक्षः ॥ य-

दि तदानीं तन्नस्यात् तर्हि देहान्तराणि प्राप्य मोक्षः ॥ वक्ष्यते च ॥ १ 'अन्तकाले च मामेव स्मरन् मुक्त्वा कलेबरम् ॥ यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ॥' इत्यादि ॥ यस्य ज्ञानिनः प्रारब्धं कर्म सावशेषं अन्तकाले, न तस्येयं स्थितिरन्तकाले स्यात् ॥ यस्य तु तदन्तकाले निरवशेषं भवति तस्येयं स्थितिरन्तकाले स्यात् ॥ २ 'ज्ञानिनां कर्मयुक्तानां कायत्यागक्षणो यदा ॥ विष्णुमाया तदा तेषां मनो बाह्यं करोति हि ॥' इति स्मरन्ति ॥ ३ 'बहुजन्मविपाकेन भक्तिज्ञानेन ये हरिम् ॥ भजन्ति तत्स्मृतिं त्वन्ते देवो याति न चान्यथा ॥' इति वचनान्नसर्वसाधारणीयमन्तिमस्मृतिः ॥ ४ 'विद्वानमृतमाप्नोति नात्र कार्या विचारणा ॥ अवसन्नं यदाऽऽरब्धं कर्म तत्रैव गच्छति ॥ न चेद्बहूनि जन्मानि प्राप्यैवान्ते न संशयः ॥' इति स्मरन्ति ॥ ५ 'ऐहिकप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॥' इति ६ 'भोगेन त्वितरे क्षपयित्वाऽथ संपत्स्यते ॥' इति च सूत्रे ॥ भीष्मादीनां अन्तकाले भगवदनुस्मृत्यादेस्सत्वेऽपि नान्तिमक्षणे तत्सत्वं ॥ अतो न तेषां तद्देहपातानन्तरं मोक्षः ॥ ७ 'स्मरन्मुक्त्वा कळेबरं' ॥ ८ 'स्मरन् त्यजत्यन्ते कलेबरं ॥' ९ 'मामनुस्मरन् ॥ यः प्रयाति त्यजन्देहं ॥' इति स्मरणदेहत्यागयोः समानकालत्वं वक्ष्यते ॥ तात्पर्यात् न विमुह्यतीत्यद्विवरणरूपा पुनः फलोक्तिः ॥ निरन्तराभ्यासाद्यावज्जीवमन्तिमक्षणेऽप्यस्यां स्थितौ स्थातव्यम् ॥ वक्ष्यते च ॥' १० 'सदा तद्भावभावितः ॥' ११ 'सर्वेषु कालेषु मामनुस्मर ॥' १२ 'अभ्यासयोगयुक्तेन चेतसा ॥' १३ 'अनन्यचेताः सततं यो मां स्मरति नित्यशः ॥' इत्यादि ॥

तस्मात् देहस्य सर्वथा नाशेन आत्मनश्च नाशाभावेन भीष्मादीनामशोच्यत्वात् अभिमानवर्जनेन दुःखस्य परिहर्तुं शक्यत्वात् युद्धस्य स्वधर्मत्वात् स्वधर्मानुष्ठानस्य पुण्यहेतुत्वात् प्रत्युत तदननुष्ठानस्यैव पापहेतुत्वात् स्ववर्णाश्रमोचितविहितधर्मानुष्ठानरूपकर्मयोगस्य पुमर्थशिरोरत्नमोक्षसाधनभूतापरोक्षज्ञानहेतु-

१. ८. ५. अत्र, एतावान् साङ्ख्ययोगाभ्यां स्वधर्मपरिनिष्ठया ॥ जन्मलाभः परः पुंसामन्ते नारायणस्मृतिः ॥' इति भाग. २. १. वचनमनुसंधेयं ॥ २. गारुडे ॥ ३. ब्रह्मवैवर्ते ॥ ४. नारायणाध्यात्मे ॥ ५. ३. ४. ५०. ॥ ६. ४. १. १९. ७. ८. ५. ८. ८. ६. ९. ८. १३. १०. ८. ६. ११. ८. ७. १२. ८. ८. १३. ८. १४.

त्वाच्च त्वया त्वदीयवर्णाश्रमोचितं विहितं युद्धादिकं कर्म करणीयम् ॥ स्यात्तेन ते सकलमपि मङ्गलम् ॥ ७२ ॥

अ ॥ अर्जुनः ॥ ईदृशीं ईदृशस्य महतः फलस्य हेतुभूतां एतां स्थितिं प्राप्तुमप्रयतमानः इयन्तमनेहसं मुधा यापितवानस्मि ॥ अहो मे दौर्भाग्यम् ॥ अन्तकाले प्राप्येमां स्थितिं किं प्रयोजनं लभेय ॥ ब्रूहि ॥

अ ॥ कृष्णः ॥ अन्तकाले १ चरमे वयसि आयुषश्चतुर्थभागे अस्यां स्थितौ स्थित्वाऽपि निर्वाणं निष्क्रियं नित्यानन्दैकरसं परं ब्रह्म ऋच्छति अभेदेन प्राप्नोति ॥ निर्गतं वानं गमनं यत् प्राप्य तत् निर्वाणम् ॥ वक्ष्यते च ॥ २ 'यं प्राप्य न निवर्तन्ते तद्धाम परमं मम ॥' इति ॥ ३ 'यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ॥' इति च ॥ ब्रह्म ब्रह्मनिर्वाणं ब्रह्मानन्दं ब्रह्मणि निर्वाणं लयं ब्रह्मरूपं सुखं वा ऋच्छति प्राप्नोति ॥ किमु वक्तव्यं आबाल्यात् स्थितावास्यां तिष्ठन् ब्रह्म प्राप्नोतीति ॥ तदेवं तत्त्वंपदयोरर्थौ ब्रह्मजीवौ तयोरैक्यं महावाक्यार्थः तत्सिद्धिः परमपुरुषार्थः साक्षात्तत्साधनमपरोक्षज्ञाननिष्ठा तद्धेतुश्च कर्मनिष्ठा इत्युपायोपेयभूतं निष्ठाद्वयं तवोदिष्टम् ॥ अतः स्वरूपं प्रकाश्य मृत्युसंसारात् पातीति पः परमात्मा तमेव अर्थयते इति पार्थः हे तादृश अर्जुन त्वमिदमवधेहि ॥ अखण्डाद्वितीयानन्दैकरसपरब्रह्मतादात्म्यापत्तिरूपमहाफलहेतुभूतां महतीमेतां स्थितिं प्राप्तुं वर्णाश्रमोचितविहितकर्मानुष्ठानरूपः कर्मयोगस्त्वया कर्तव्यः ॥ स्यात्तेन ते मङ्गलम् ॥ ७२ ॥

वि ॥ कृष्णः ॥ अस्यां स्थितौ उक्तरूपायां कर्मनिष्ठायां अन्तिमे वयसि स्थित्वाऽपि निर्वाणं सुखैकरूपं ब्रह्म शुद्धात्मानं ऋच्छति प्राप्नोति ॥ किंपुनर्वक्तव्यं आबाल्या दस्यां स्थितौ तिष्ठन् ब्रह्म प्राप्नोतीति ॥ आत्मयाथात्म्यं युद्धाख्यकर्मणस्तज्ज्ञानसाधनतां चाजानतो देहात्माभिमानेन मोहितस्य तेन च मोहेन युद्धा-

१. अत्र 'यस्त्वत्यन्तव्यवसितमतिः संजिघृक्षेत धर्मं खट्वाङ्गादेरिव न किमलं तस्य यामार्धमायुः ॥ दुष्पाण्डित्यादपहृतमतिर्यः पुनः संशयात्मा कस्मै तस्य प्रभवतु वृथा काकवद्दीर्घमायुः' ॥ इति शान्तिविलासश्लोकोऽनुसन्धेयः ॥ 'विज्ञाय चरमावस्थां खट्वाङ्गो राजसत्तमः ॥ वसिष्ठादाप्तविज्ञानो मुहूर्तान्मुक्तिमेयिवान्' ॥ इति वचनं चानुसन्धेयम् ॥ २. ८. २१. ३. १५. ६.

निवृत्तस्य तव तन्मोहशान्तये कर्मणि प्रवर्तनाय च 'एषा तेऽभिहिता साङ्ख्ये बुद्धिः' इत्युक्ता साङ्ख्यबुद्धिशब्दिता नित्याऽऽत्मविषया बुद्धिः 'योगे त्विमां शृ'ण्वित्युक्ता स्थितप्रज्ञताऽऽख्यपरोक्षज्ञानयोगनिष्ठाहेतुभूता साङ्ख्यबुद्धिपूर्वकाकाम्यकर्मानुष्ठानरूपकर्मयोगविषया बुद्धिश्चेत्युभयं तवोपदिष्टम् ॥ अतस्त्वं विहितमुचितमकाम्यं युद्धादिकमनुतिष्ठ ॥ स्यात्तेन ते मङ्गळम् ॥ ७२ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे कृष्णार्जुनसंवादे साङ्ख्ययोगो नाम द्वितीयोऽध्यायः ॥ १ ॥

इतीति ॥ श्रीमदित्यादि पूर्ववत् ॥ साङ्ख्ययोगो नाम साङ्ख्ययोग इति प्रसिद्धः द्वितीयोऽध्यायः इति समाप्तः ॥

सङ्ख्या ज्ञानं सैव साङ्ख्यं तद्रूपः योगः मोक्षोपायः यस्मिन् सः सङ्ख्ययोगः सङ्ख्या ज्ञानं तस्या इमानि साङ्ख्यानि ज्ञानसाधनानि तेषां योगः प्रतिपाद्यतया संबन्धो यस्मिन् सः साङ्ख्ययोगः साङ्ख्यस्य ज्ञानस्य योगः उपायभूतः निवृत्तिकर्मयोगः यस्मिन् सः सङ्ख्ययोगः सङ्ख्यया ज्ञानेन प्राप्यः साङ्ख्यानां ज्ञानिनां प्राप्यः मोक्षः साङ्ख्यः तस्य ज्ञानफलत्वेन प्रतिपाद्यतया संबन्धो यस्मिन् सः साङ्ख्ययोगः इति प्रसिद्धः द्वितीयोऽध्यायः इति संपूर्णः ॥ ॐ तत्सत् ॥

इति श्रीमद्भगवद्गीतोपन्यासदर्पणे लक्ष्मणाचार्यविरचिते साङ्ख्ययोगाध्यायार्थप्रदर्शको द्वितीयः प्रतिबिंबः ॥

॥ ओंतत्सत् ॥

श्रीः

॥ अथ तृतीयोऽध्यायः ॥

द्वै ॥ संजयः ॥ १'नत्वेवाह'मित्यादिना ज्ञानयोगमभिधाय २'योगे त्विमां शृणु' इति तदुपायभूतस्य कर्मयोगस्य वचनं प्रतिज्ञाय तत्र ३'नेहाभिक्रमनाशोऽस्ति' इत्यादिना निवृत्तं कर्म प्रशस्य ४'यामिमां पुष्पितां वाच'मित्यादिना प्रवृत्तं कर्म विनिंद्य ५'कर्मण्येवाधिकारः' इत्यादिना निवृत्तिकर्मानुष्ठानरूपः कर्मयोगोऽभिहितः ॥ तत्र ६'तस्माद्युध्यस्व भारते'ति युद्धविधिविधानं श्रुतवानर्जुनः ७'सर्व एते पुण्यलोका भवंती'ति विहितानां सर्वेषां कर्मणां काम्यत्वात् ८'हतो वा प्राप्स्यसे स्वर्गं जित्वा वा भोक्ष्यसे महीम् ॥' इति युद्धस्य काम्यत्ववचनाच्च युध्यस्वेति भगवता विधीयमानं युद्धरूपं कर्म काम्यं कर्म ॥ तच्च ९'दूरेण ह्यवरं कर्मे'त्यादिना अनिष्टफलकमवरमुक्तम् ॥ किं युद्धाख्ये काम्ये कर्मणि अनिष्टफलकेऽवरे मां नियोजयति ॥ फलाश्रवणादकाम्येषु शमदमादिषु ह्यहं नियोक्तव्यः ॥ ज्ञानार्थं हि कर्मयोगमभिधातुमुपाक्रमत ॥ ज्ञानार्थं हि कर्म वाच्यम् ॥ शमदमादीनि हि १०'शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वा आत्मन्येवाऽऽत्मानं पश्यतीति ज्ञानार्थानि श्रूयन्ते॥ इति मन्वानः ११'योगे त्विमां शृणु' इति ज्ञानार्थं कर्मयोगं वक्ष्यामीति प्रतिज्ञाय १२'कर्मण्येवाधिकारस्ते' इति कर्मयोगोऽभिहितः॥ १३ त्यक्त्वोत्तिष्ठ परन्तप ॥' १४'तस्माद्युध्यस्व भारत॥' १५'धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते ॥' १६'सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम् ॥' १७'अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि ॥ ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ॥' १८'तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः ॥' १९'ततो युद्धाय युज्यस्व नैव पापमवाप्स्यसि ॥' इत्यादिभिः युद्धरूपं कर्मैव मम कर्तव्यमित्यभिहितम् ॥ कुतः ज्ञानार्थानि विहाय

---

१. २. १२. २. २. ३९. ३. २. ४०. ४. २. ४२. ५. २. ४७. ६. २. १८. ७. छा. २. २३. १. ८. २. ३७. ९. २. ४९. १०. बृ. ६. ४. २३. ११. २. ३९. १२. २. ४७. १३. २. ३. १४. २. १८. १५. २. ३१. १६. २. ३२. १७. २. ३३. १८. २. ३७. १९. २. ३८.

शमदमादीनि काम्यत्वादनिष्टाल्पास्थिरफलके काम्ये कर्मणि तत्रापि दुष्टे युद्धाख्ये मां नियोजयसि ॥ ब्रूहि ॥ इति भगवन्तं पृच्छति ॥

अर्जुन उवाच

ज्यायसी चेत् कर्मणस्ते मता बुद्धिर्जनार्दन ॥
तत्किं कर्मणि घोरे मां नियोजयसि केशव ॥ १ ॥

ज्यायसीति ॥ जनान् जनं जननं वा अर्दयति नाशयतीति जनार्दनः हे जनार्दन कृष्ण ते तव कर्मणः सकाशात् बुद्धिः ज्ञानं ज्यायसी श्रेष्ठा मता चेत् तत् तर्हि कश्च ईशश्च केशौ तौ वर्तयति प्रवर्तयतीति केशवः हे केशव कृष्ण घोरे कर्मणि मां किं कमर्थं नियोजयसि प्रेरयसि ॥ १ ॥

हे कृष्ण फलश्रवणेन सर्वेषां कर्मणां काम्यत्वात् कर्मणः पञ्चमी कर्मणः सकाशात् बुद्धिः ज्ञानं ज्यायसी श्रेष्ठा इति ते मता चेत् ॥ तर्हि कर्मणि किं किमर्थं मां नियोजयसि ॥ तत्रापि युद्धाख्ये घोरे कर्मणि किं मां नियोजयसि ॥ १ 'दूरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जय ॥ बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ॥' २ 'यावानर्थ उदपाने सर्वतः संप्लुतोदके ॥ तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ॥' इत्यादिवचनादवगम्यते कर्मापेक्षया ज्ञानं ज्याय इति त्वं मन्यसे इति ॥ तथा मन्वानः परमाप्ततमस्त्वं परमाप्ततमाय मह्यं ज्यायस्त्वेनाभिमतं ज्ञानयोगं तदर्थं शमदमादिकं च कर्तव्यमनभिधाय अवरत्वेनाभिमतं कर्मयोगं किमर्थमभ्यधाः ॥ वद ॥

कर्मणः प्रवृत्तिकर्मणः सकाशात् ज्ञानं श्रेयस्त्वेनाभिमतं चेत् ज्ञाने मामनियुज्य हिंसारूपत्वेन घोरे युद्धाख्ये प्रवृत्तिकर्मणि किं मां नियोजयसीति वा ॥

'बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसी' त्युक्तया निवृत्तिकर्मणः षष्ठी बुद्धिशब्दिता उक्तिः श्रेष्ठा इति ते मता चेत् निवृत्तिकर्मणि मां अनियुज्य कुतः प्रवृत्तिकर्मणि युद्धाख्ये नियोजयसि ॥

कर्मणः पञ्चमी परंपरया मोक्षसाधनात् निवृत्तिकर्मणः ते कर्मणः त्वामुद्दिश्य क्रियमाणात् त्वदुद्देश्यकात् कर्मणः निवृत्तिकर्मणः इति यावत् ॥ इति वा ॥ तदपेक्षया बुद्धिशब्दितं ज्ञानं साक्षान्मोक्षसाधनत्वेन ज्याय इति ते मतं चेत् तर्हि घोरे

१. २. ४९. २. २. ४६.

गहने अत्यायाससाध्ये परंपरासाधने कर्मणि मां कुतो नियोजयसि ॥ ब्रूहि ॥ दुष्टनिग्रहशिष्टपरिपालनधर्मस्थापनभूभारपरिहरणाद्यर्थं किलावतीर्णोऽहम् ॥ वक्ष्यते च ॥ १ 'परित्राणाय साधूनां विनाशाय च दुष्कृताम् । धर्मसंस्थापनार्थाय संभवामि युगे-युगे' ॥ इति ॥ तदर्थं त्वामहं युद्धे नियोजयामि ॥ त्वं यथेच्छसि तथा कुरु इति चेत् कशब्दितस्य ब्रह्मणः ईशस्य च प्रवर्तकत्वात्केशवोऽसि त्वम् ॥ तादृशेन त्वया प्रेरितोऽहं तदकृत्वा कथं स्थातुं शक्नुयाम् ॥ जनार्दनत्वात्तथा प्रेरणं तयोचितमेव ॥ २ 'कथं भीष्ममहं' इत्याद्युक्तरीत्या युद्धमनिच्छन्नहं मां विसर्जय मा निर्बधानेति याचे भवन्तं अतो मैवं भूयो वादीः ॥ १ ॥

कृष्णः ॥ काम्यमपि कर्म श्रुतस्य फलस्य परित्यागादकाम्यं भवति ॥ अकाम्यं च कर्म ज्ञानद्वारा मोक्षाय भवति ॥ ३ 'कर्मणा ज्ञानमाप्नोति ज्ञानेनामृतमश्नुते' इति अथामृतानि कर्माणी'ति श्रुतिः ॥ ४ 'सुखदुःखे समे कृत्वा' इत्याद्युक्तरीत्या अकाम्य एव युद्धाख्ये कर्मणि त्वं नियोज्यसे ॥ साक्षान्मोक्षसाधनज्ञानयोगानर्हत्वात् ॥ युक्तं चेदम् ॥ कुत एवं पृच्छसि ॥ वद ॥

अर्जुनः ॥ व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे ॥
तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम् ॥ २ ॥

व्यामिश्रेणेति ॥ व्यामिश्रेणेव स्थितेन वाक्येन मे बुद्धिं मोहयसीव ॥ तत् तस्मात् तयोर्मध्ये इति वा येन अहं श्रेयः आप्नुयां लभेय तत् एकं निश्चित्य वद ॥ निश्चित्य श्रेयः आप्नुयां इति वा ॥ २ ॥

यद्येवं तर्हि कांचित् कर्मप्रशंसा कांचित् ज्ञानप्रशंसा कांचित् युद्धस्य स्वर्गाद्यर्थत्ववचनं क्वचित् युद्धस्य ज्ञानार्थत्ववचनं इति, तव वचनं व्यामिश्रं संशयोत्पादकमेव ॥ तेन मे बुद्धिं मोहयसि ॥ मां संशयादिमन्तं करोषि ॥ युद्धं तु श्रुतस्य फलस्य परित्यागादकाम्यं भवति ॥ तदपरित्यागे काम्यं भवति ॥ ततश्च वैकल्पिककाम्यं तत् इति निष्पन्नम् ॥ 'श्येनेनाभिचरन् यजेते'त्यादिभिर्विहितानि श्येनयागादीनि नित्य-

१. ४. ८. २. २. ४. ३.....४. २. ३८. ५. द्वै ॥ वि ॥ श्रेणैवेति पाठः ॥ अ ॥ श्रेणेवेति पाठः ॥

काम्यानि ॥ फलाश्रवणान्नित्याकाम्यानि शमदमादीनि ॥ युद्धादीनि तु वैकल्पिककाम्यानि ॥ फलेच्छानिच्छाभ्यां काम्यत्वाकाम्यत्वयोरुभयोरपि संभवात् ॥ सत्सु नित्याकाम्येषु शमदमादिषु रागद्वेषादिप्रसक्तिहीनेषु किमर्थं वैकल्पिककाम्ये रागद्वेषादिदोषदुष्टे हिंसारूपे युद्धकर्मणि मां नियोजयतीति संशयो मे जायते ॥ अतः तत् तयोः ज्ञानकर्मणोर्मध्ये येन अहं श्रेयः मोक्षं तत्साधनं ज्ञानं वा आप्नुयाम् तत् एकं निश्चित्य वद ॥ मैवं भूयो व्यामिश्रं वादीः ॥ तत् तस्मादिति वा ॥ किमहो यत्रकुत्रापि गत्वा ज्ञानं संपाद्य तेन ज्ञानकर्मणोरन्यतरस्य तत्वं निश्चित्य तुभ्यमुपदेष्टुमागन्तव्यम् मया इति चेत् 'तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयामि'ति मयोक्ते निश्चित्येत्यस्य वदेत्यनेनान्वयं मत्वा किमेवमकाण्डे कुप्यसि ॥ येन तव वाक्येन अहं कर्तव्यमिदमिति निश्चित्य श्रेय आप्नुयां तत् एकं वाक्यं ज्ञानकर्मणोः अन्यतरप्रतिपादकं वद ॥ इति खलु मया प्रार्थ्यसे ॥ अस्यायमर्हं इति मदीययोग्यतां निश्चित्य वदेति वा ॥ परमात्मः सर्वज्ञोऽहं ते बुद्धिं मोहयेयं वा इति चेत् अत एव हि [1] इवशब्दः प्रयुक्तः त्वं तु न मोहयेः मम तु मदीयबुद्धिदोषात् मोहयसीति भाति ॥ इति खलु निवेद्यते ॥ अतो विस्पष्टमेकं ब्रूहि ॥ २ ॥

अ ॥ संजयः ॥ द्वितीये अध्याये सांख्यबुद्धिर्योगबुद्धिश्चेति द्वे बुद्धी उपदिष्टे ॥ तत्र सांख्यबुद्धिर्ज्ञानविषया ॥ 'एषा तेऽभिहिता सांख्ये बुद्धि'रित्युक्ता ॥ योगबुद्धिस्तु कर्मयोगविषया ॥ 'योगे त्विमां शृणु' इत्युक्ता ॥ तत्र सांख्यबुद्धिः ॥ साक्षान्मोक्षसाधनत्वादुत्तमा ॥ योगबुद्धिः परंपरया मोक्षसाधनत्वादवरा तत्र सांख्यबुद्धिः २ 'प्रजहाति यदा कामानित्याद्युक्तलक्षणलक्षितेभ्योऽन्येभ्य उक्ता अर्जुनाय च ३ 'कर्मण्येवाधिकारस्ते' इति सांख्यबुद्ध्यनधिकारोक्तिपुरःसरं योगबुद्धिरुक्ता ॥ सांख्यबुद्धिमाश्रितानां ४ 'एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ॥ स्थित्वाऽस्यामन्तकालेऽपि ब्रह्म निर्वाणमृच्छतीति मोक्षप्राप्तिरुक्ता ॥ न तथा योगबुद्धिमाश्रितानां मोक्षप्राप्तिरुक्ता ॥ एवमुपदिष्टमर्थं श्रुतवानर्जुनः उपादिक्षद्भगवान् द्वे निष्ठे ज्ञानकर्मात्मिके मह्यमेकस्मै ॥ एकं मां प्रति तयोर्द्वयोरुपदेशादेकाधिकारिके ते इति भाति ॥ न च तयोरेकाधिकारिकत्वं संभवति ॥ तेजस्तिमिरयोरिव परस्परविरुद्धयोः तयोरेकत्र समावेशायोगेन समु-

---

१. श्रेणेवेति पाठमाश्रित्येदं ॥ २. २. ५५. ३. २. ४७. ४. २. ७२.

च्चयासंभवात् ॥ १ 'नान्यः पन्था अयनाय विद्यते ॥' इति श्रुतिश्च समुच्चयाभावं वक्ति ॥ उत्कृष्टापकृष्टयोः भिन्नफलकयोः इदं वा इदं वा इति विकल्पासंभवाच्च ॥ एकफलकयोः समयोर्हि विकल्प उपपद्यते ॥ एकाधिकारिकत्वे समुच्चयो विकल्पो वा वक्तव्यः ॥ न च तौ संभवतः उक्तयुक्तेः ॥ अतो भिन्नाधिकारिकत्वं वाच्यम् ॥ भिन्नाधिकारिकत्वे एकं मां प्रत्युभयोपदेशो न युक्तः अतः कथमिदम् ॥ समुच्चयविकल्पयोरयोगादेकाधिकारिकत्वानुपपत्त्या भिन्नाधिकारिकत्वे एकस्मै उभयोपदेशानुपपत्त्या मह्यमेकमेव परमाप्ततमेन कृष्णेन वाच्यम् ॥ यदुक्तं तद्धि आप्ताय आप्तेन वाच्यम् ॥ ज्ञानकर्मणोरुभयोर्मध्ये ज्ञानद्वारा साधनत्वेन मोक्षं प्रति परंपरासाधनात् उक्तफलजननियमरहिततयाऽनैकान्ति २ काद्य कर्मयोगात् साक्षान्मोक्षसाधनभूतः ३ ऐकांतिकः ज्ञानयोग एवोत्तमः ॥ अतः परमाप्तेन कृष्णेन भक्ताय आस्तिकाय परमाप्ताय मह्यं स एव ज्ञानयोग उपदेष्टव्यः ॥ सति चैवं कथं मह्यं भगवान् ज्ञानमनुपदिश्य कर्मैवोपादिक्षत् ॥ अयुक्तं चेदं तस्य इति मत्वा किमेवं कृतमिति भगवन्तं पृच्छति ॥

अर्जुनः ॥ कर्मणः परंपरासाधनात् अनैकान्तिकात् निवृत्तिकर्मणः बुद्धिः साक्षात्साधनं ऐकान्तिकं ज्ञानं ज्यायसी श्रेष्ठा इति ते तव मता चेत् तर्हि कर्मणि तत्रापि घोरे आयाससाध्ये गहने हिंसादिदोषदुष्टे युद्धाख्ये कर्मणि परंपरासाधने अनैकान्तिके मां प्रेरयसि ॥ इदं ते न युक्तम् ॥ ब्रह्मरुद्रादिप्रवर्तकत्वात्केशवस्त्वं सर्वैः स्वाभिलषितनिर्वहणाय याच्यमानत्वेन जनार्दनत्वात् अनुल्लंघनीयशासनः भक्तजनभवभयविध्वंसकश्च भवान् भक्तं प्रपन्नं च मामेवं कर्मण्यवरे न नियोजयितुमर्हतीत्येवं सादरमभ्यर्थयते ॥ १ ॥

कृष्णः ॥ ४ 'बुद्धौ शरणमन्विच्छे 'ति त्वां प्रति ज्ञानयोगोऽप्युपदिष्ट एव ॥ कुत एवं पृच्छसि वद ॥

अर्जुनः ॥ क्वचित्कर्मप्रशंसा क्वचित् ज्ञानप्रशंसा इति हेतोः एकं मां प्रति ५ 'कर्मण्येवाधिकारस्ते' 'बुद्धौ शरणमन्विच्छ' इत्युभयोपदेशाच्च हेतोः ते वचनं व्यामिश्रं ज्ञानकर्मसमुच्चयाभिप्रायकमिव भाति ॥ तथा भासमानेन वाक्येन मम बुद्धिं मोहयसीव ॥ संशयादिदोषदुष्टां करोषीव ॥ सर्वज्ञस्य प्रविविक्ताभिधायिनस्ते

---

१. तै. आ. १२. २. व्यभिचरितात् ॥ ३. अव्यभिचरितात् ॥ ४. २. ४९. ५. २ ५०

वचनं न व्यामिश्रं स्यात् ॥ परमास्तस्त्वं मां न मोहयेः ॥ अथापि मदीयबुद्धिदोषात् ते वचनं व्यामिश्रमिव भाति ॥ तेन त्वं मोहयसीति भाति ॥ क्षन्तव्यमिदम् ॥ तयोर्मध्ये येन अहं श्रेयः आप्नुयां तत् एकं कर्म ज्ञानं वा निश्चित्य वद ॥ येन निश्चित्य श्रेय आप्नुयां तदेकं वदेति वा ॥ इदमस्यानुरूपमिति मदीययोग्यतां निश्चित्य तयोरन्यतरत् वदेति वा ॥ २ ॥

वि ॥ संजयः ॥ द्वितीये अध्याये कर्मयोगस्य तदन्तर्गतज्ञानयोगस्य चाभिधानमुखेन प्राप्तुः प्रत्यगात्मनः तन्नित्यताज्ञानपूर्वकाकाम्यकर्मनिष्पाद्यज्ञानयोगसाध्यं १ 'अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाती'त्यादिषु मोक्षसाधनपरमात्मज्ञानसाधनतया निर्दिष्टं फलान्तररहितं प्रत्यगात्मदर्शनरूपं साधनं सम्यगभिहितम् ॥ स्थितप्रज्ञताप्रकरणे कर्मणः स्थितप्रज्ञताख्यज्ञाननिष्ठाहेतुत्वं तस्याश्च आत्मावलोकनशब्दितप्रत्यगात्मदर्शनसाधनत्वं च स्पष्टमुक्तम् ॥ उक्तमिममर्थं श्रुत्वानर्जुनः साक्षादात्मावलोकनसाधने ज्ञानयोगे प्रवृत्तिं कांक्षमाणः तद्विरुद्धे कर्मयोगे प्रेरणमनुचितं कृष्णस्येति मन्वानः कृष्णमाक्षिपन् पृच्छति ॥

अर्जुनः ॥ कर्मणः अकाम्यकर्मणः सकाशात् साक्षादात्मावलोकनसाधनं बुद्धिशब्दितं ज्ञानं श्रेष्ठं इति ते मतं चेत् तर्हि आत्मावलोकनविरोधिनि कर्मणि किमर्थं मां प्रेरयसि ॥ सिषाधयिषितस्य इन्द्रियव्यापारोपरतिनिष्पाद्यस्य आत्मावलोकनस्य अव्यवधानेन निष्पादिकां अतः कर्मणो ज्यायसीं ज्ञाननिष्ठां मह्यमनुपदिश्य आत्मावलोकनविरोधिनि सर्वेन्द्रियव्यापाररूपे कर्मणि किं मां नियोजयसि ॥ भक्तजनजननिरासकस्य ब्रह्मरुद्रादिपितुस्तव भक्तं प्रपन्नं तव प्राणायमानं मां प्रति कर्मणि नियोजनमनुचितम् ॥ कुत एवं कृतम् ॥ मैवं भूर्या वादीः ॥ १ ॥

कृष्णः ॥ ज्ञानयोगोऽप्युपदिष्टः खलु ते किमेवं पृच्छसि ॥

अर्जुनः ॥ व्यामिश्रेणैव ज्ञानयोगतद्विपर्ययरूपकर्मयोगविधायकत्वात् परस्परविरुद्धेनैव वाक्येन त्वं मे बुद्धिं मोहयसीव ॥ परमकारुणिकस्त्वं न मे बुद्धिं मोहयेः मदीयबुद्धिदोषात् त्वं मोहयसीति मे भाति ॥ तस्मात् येन वाक्येन ज्ञानकर्म-

---

१. का. २. १२.

णारन्यतरस्य कर्तव्यताप्रतिपादकेन अहमनुष्ठेयं निश्चित्य अनुष्ठाय श्रेय आप्नुयाम्॥ तत् एकं वाक्यं ज्ञानस्य कर्मणो वा प्रतिपादकं वद ॥ २ ॥

संजयः ॥ एवमर्जुनेन पृष्टो भगवान् सत्यं कर्मयोगात् ज्ञानयोगः श्रेष्ठ एव॥ तथाऽपि तव ज्ञानयोगानर्हत्वात् कर्मयोगार्हत्वाच्च त्वद्योग्यतामनुसृत्य कर्मयोग एव त्वं नियोजितः॥ इत्युत्तरं अधिकारिभेदेन ज्ञानकर्मनिष्ठाविभजनमुखेनाह॥

श्रीभगवानुवाच

कृष्णः ॥ लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ ॥
ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम् ॥ ३ ॥

लोक इति ॥ न विद्यते अघं पापं यस्य सः अनघः हे अनघ निर्दोष अर्जुन सांख्यानां ज्ञानयोगाधिकारिणां ज्ञानमेव योगः उपायः तेन योगः कर्मयोगः एषां अस्तीति योगिनः कर्मयोगाधिकारिणः तेषां योगिनां कर्मैव योगः उपायः कर्मयोगः तेन इति, अस्मिन् लोके निष्ठा द्वे विधे प्रकारौ यस्याः सा द्विविधा पुरा पूर्वं पूर्वाध्याये वा मया प्र सम्यक् उक्ता प्रोक्ता ॥ ३ ॥

द्वै ॥ किंचिद्बुध्यि शृणु ॥ मा कुरु कोपमेवम् ॥ हे निर्दोष अर्जुन अस्मिन् मोक्षाधिकारिणि जने निष्ठा स्वरूपेणावस्थितिः संसारगतिनिवृत्तिर्वा ॥ ष्ठा गतिनिवृत्ताविति धातुः ॥ मुक्तिरिति यावत्॥ द्विविधा ज्ञानकर्मरूपद्विविधसाधनसाध्या मया पुरा प्रोक्ता ॥ पूर्वमेवैवं मया व्यवस्थापितमस्तीति वा पूर्वाध्यायोक्तस्य अयमेवाशयः इति वा विद्धि ॥ केषां केन साधनेन साध्या इति चेत् सांख्यानां ज्ञानयोगार्हाणां देवानां सनकादीनां तत्सदृशानां च सम्यक् ख्यातिः संख्या ज्ञानं तत्र भवाः सांख्यैव सांख्यं तत्संबन्धिनः इति वा व्युत्पत्तिः ॥ ज्ञानयोगेन कर्मनिरपेक्षज्ञानरूपोपायेन निष्ठा मुक्तिः योगिनां कर्मरूपोपायवतां कर्मयोगार्हाणां जनकादीनां प्रियव्रतादीनां तत्सदृशानां त्वदादीनां च कर्मयोगेन कर्मसहितो योगः कर्मयोगः तेन कर्मसहितज्ञानयोगेन निष्ठा ॥ इत्येवं पुरा निष्ठा द्विविधा प्रोक्ता ॥ ज्ञानप्रचुरो योगः ज्ञानयोगः अप्रचुरकर्मोपेतः प्रचुरज्ञानरूपो योगः तेन ॥ कर्मप्रचुरो योगः कर्मयोगः अप्रचुरज्ञानोपेतः प्रचुरकर्मरूपो योगः तेन इति वा ॥ उभयेषामपि योगिनां मोक्षार्थं

ज्ञानमावश्यकम् ॥ तत्र ज्ञानयोगिनां ज्ञानं प्रचुरं कर्म अप्रचुरम् ॥ कर्मयोगिनां तु कर्म प्रचुरं ज्ञानमप्रचुरम् ॥ परस्परसमुच्चितेन ज्ञानेन कर्मणा वा मोक्षार्हा उभयेऽपि योगिनः ॥ उभयोरपि योगयोः प्रत्येकमुभयात्मकत्वात् कथमेकांशनिर्देश इति चेत् क्षीरनीरन्यायेन तथा निर्देशः॥ नीरमिश्रिते क्षीरे क्षीरांशस्याधिक्यात् क्षीरमिदं इति व्यवहारः ॥ क्षीरमिश्रिते नीरे नीरांशस्याधिक्यात् नीरमिदमिति व्यवहारः ॥ तथा ज्ञानयोगे ज्ञानांशस्याधिक्यात् ज्ञानयोग इति निर्देशः ॥ कर्मयोगे कर्मांशस्याधिक्यात् कर्मयोग इति निर्देशः॥ 'प्रधान्याद्व्यपदेश' इति न्यायः ॥ इति वा ॥ज्ञानमेव कर्मापेक्षया श्रेष्ठम्॥ अहं तु तव आप्तः त्वं तु मम आप्ततमः तथाऽपि त्वद्योग्यतामनुसृत्य तुभ्यं कर्मैव कर्तव्यमभिहितम् ॥ परमाप्ततमस्य पुत्रमपि वरिष्ठकक्ष्यापाठपठनानर्हं बालं तदीययोग्यतामनुरुध्य प्रथमकक्ष्यायामेव योजयति प्रधानोपाध्याय इति स्पष्टमेव लोके ॥ तथा अप्रचुरज्ञानोपेतप्रचुरकर्मरूपयोगार्हत्वात् कर्मैव तुभ्यमुपदिष्टम् ॥ सांते संशये पृष्टाऽऽचार्ये तस्य परिहरणमुचितम् ॥ अतो नात्र त्वामपराधिनं मन्ये ॥ न च त्वया भीः कार्या ॥ अतोऽसंशयं कर्म कुरु ॥ एतेन मदीयप्रश्नस्य किमुत्तरमुक्तं भवति विस्पष्टं ब्रूहीति चेत् इदमुक्तं भवति ॥ यद्यपि कर्मणः सकाशात् ज्ञानं ज्याय इति मम मतम् ॥ तथाऽपि कर्मणि तत्रापि युद्धाख्ये कर्मणि तव नियोजनमुचितम् ॥ तस्य अभिसन्धिभेदात् निवृत्तिकर्मत्वेन ज्ञानमार्गानुप्रवेशात् ॥ यद्यपि प्रवृत्तिकर्मणः सकाशात् ज्ञानं ज्याय इति मम मतम् ॥ तथाऽपि युद्धाख्ये कर्मणि तव प्रेरणमुचितम् । तस्य प्रवृत्तिकर्मत्वाभावस्यापि संभवात् ॥ यद्यपि निवृत्तिकर्मणः सकाशात् ज्ञानं ज्याय इति मम मतम् ॥ तथाऽपि गहने निवृत्तिकर्मणि तव नियोजनमुचितम् ॥ ज्ञानार्थत्वेन मुक्तावानन्दोद्रेकहेतुत्वेन च तस्यापि ज्यायस्त्वात् ॥ यद्यपि निवृत्तिकर्मणः बुद्धिशब्दितं वचनमेव ज्याय इति मम मतम् ॥ तथाऽपि युद्धाख्ये कर्मणि तव नियोजनमुचितम् ॥ तस्य अभिसन्धिभेदेन निवृत्तिकर्मत्वसंभवात् ॥ किंच क्वचिद्युद्धस्य स्वर्गार्थत्वप्रतिपादनेन प्रवृत्तिकर्मत्वप्रतिपादनम् ॥ क्वचित् ज्ञानार्थत्वप्रतिपादनेन निवृत्तिकर्मत्वप्रतिपादनम् ॥ क्वचित् ज्ञानप्रशंसनेन तस्य ज्यायस्त्वप्रतिपादनम् ॥ क्वचित् कर्मप्रशंसनेन तस्य ज्यायस्त्वप्रतिपादनम्॥ इत्येवं मम वाक्यं व्यामिश्रं इति मा मंस्थाः॥ अधिकारिभेदेन युद्धस्य वैकल्पिककाम्यस्य उभयरूपत्वसंभवात् ज्ञानकर्मणोरुभयोरपि मोक्षसाधनतत्साधनज्ञानसाधनताऽभिप्रायेण अधिकारिभेदेन प्रचुरसाधनताऽभिप्रायेण च प्रशंसनीयत्वाच्च ॥

किंच मोक्षाधिकारिणो द्विविधाः गृहस्थादिकर्मत्यागेन ज्ञाननिष्ठाः अप्रचुरकर्मोपेतप्रचुरज्ञानरूपज्ञानयोगाधिकारिणः सनकादिवत् ॥ गृहस्थादिकर्मात्यागेन ज्ञाननिष्ठाः अप्रचुरज्ञानोपेतप्रचुरकर्मरूपकर्मयोगाधिकारिणः जनकप्रियव्रतादिवत् ॥ त्वं तु जनकप्रियव्रतादिवत् आधिकारिकः ॥ अतः अप्रचुरज्ञानोपेतप्रचुरकर्मरूपकर्मयोगे अधिकृतः अत एव पूर्वाध्याये ज्ञानयोगं कर्मयोगं चोपदिश्य मया कर्मयोग एव त्वं नियोजितः ॥ अप्रचुरज्ञानोपेतप्रचुरकर्मरूपकर्मयोगाधिकृतत्वेऽपि मम नित्याकाम्येषु हिंसादिदोषगन्धविधुरेषु यत्याश्रमधर्मभूतेषु शमदमादिषु कर्मसु नियोजनमुचितम् ॥ किमर्थं तान् विहाय वैकल्पिककाम्ये युद्धे अहं नियोजितः इति चेत् अप्रचुरज्ञानोपेतप्रचुरकर्मरूपयत्याश्रमधर्मभूतशमदमादिनित्याकाम्यकर्मयोगः कर्मयोगिषु अनाधिकारिकाणामेव॥ आधिकारिकाणां तु आश्रमत्रयधर्मभूतवैकल्पिककाम्ययुद्धादिकर्मयोग एव॥ त्वं तु आधिकारिकः॥ अतः तव युद्धादिवैकल्पिककाम्यकर्मयोग एव ॥ माऽस्तु ममाऽऽधिकारिकत्वं इति चेत् भगवता तवाऽऽधिकारिकत्वेनैव कृप्तत्वात् ॥ अत एव यत्याश्रमस्वीकारे प्रवृत्तः प्रियव्रतः १ प्रतिषिद्धः आधिकारिकत्वयुक्त्युक्त्या पितामहेन ॥ तस्मात् त्वां निवृत्तिकर्मणि तत्रापि स्वधर्मभूते युद्धाख्ये कर्मणि नियोजयामि ॥ वक्ष्यते च ॥ २ 'श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठिता 'दिति ॥ अतः तव युद्धे नियोजनमुचितम् ॥ ३ ॥

अ ॥ हे अनघ निर्दोष अर्जुन अस्मिन् लोके शुद्धाशुद्धान्तःकरणभेदेन द्विविधे मोक्षाधिकारिजने निष्ठा ज्ञानपरत्वकर्मपरत्वान्यतररूपा मोक्षपरता ३ रूपा वा स्थितिः सांख्यानां सङ्ख्या आत्मानात्मविवेकबुद्धिः तद्वतां ब्रह्मचर्यादेव संन्यासाऽऽश्रमं प्राप्तवतां वेदान्तविज्ञानसुनिश्चितार्थानां ४ ज्ञाननिष्ठायाः परां काष्ठामारूढानां ५ ज्ञानयोगेन ज्ञानमेव योगः ब्रह्मप्राप्त्युपायः तेन भवति ॥ योगिनां अशुद्धान्तःकरणानां ज्ञाननिष्ठामनारूढानां आश्रमत्रयस्थितानां तत्तद्विहितकर्मानुष्ठानाधिकारवतां ६ कर्मयोगिनां कर्मयोगेन कर्मैव योगः अन्तःकरणशुद्ध्युपायः तेन भवति ॥

---

१. भाग. ५ स्कं. १ अध्याये ॥ २. ३. ३५. ३. सर्वमिदं अहं च ब्रह्मैवेति ब्रह्माऽऽकारवृत्त्या नैश्चल्येनस्थितिर्वा ॥ ४. वेदान्तैः सम्यक् ख्यायते प्रतिपाद्यते इति सांख्यं ब्रह्म तत् आत्मत्वेन जानतां ब्रह्मात्मैक्यज्ञानयोगनिष्ठानाम् ॥ ५. ज्ञानाय योगः ज्ञानस्य योगः इति वा ज्ञानयोगः जपध्यानादिः तेन वा ॥ ६. 'समत्वं योग उच्यते' इत्युक्तसमत्वबुद्धिरूपयोगवतां वा ॥

इति द्विविधा ॥ सांख्यानां ज्ञानपरतारूपा स्थितिः ज्ञानयोगेन कर्मयोगिनां कर्मपरतारूपास्थितिः कर्मयोगेन इति, मोक्षपरतारूपा स्थितिः सांख्यानां ज्ञानयोगेन कर्मयोगिनां तु कर्मयोगेन इति वा द्विप्रकारा ॥ पुरा सर्गादौ वेदादिरूपेण मया प्रोक्ता ॥ पूर्वाध्याये १ 'तानि सर्वाणि संयम्य युक्त आसीत मत्परः ॥' इत्यादिना २ 'धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते ॥' इत्यादिना च स्पष्टमुक्ता इति वा ॥ अनघत्वान्मत्तः साक्षादुपदेशार्होऽसि ॥ एतेन किमुक्तं भवतीति चेत् इदमुक्तं भवति ॥ यदि ज्ञाननिष्ठा कर्मनिष्ठा चेत्युभे निष्ठे परस्परनिरपेक्षे स्वतन्त्रे एव मया तुभ्यमुपदिष्टे स्याताम् तर्हि प्रश्नोऽयं त्वदीयः सङ्गच्छेत ॥ न च तथोपदिष्टं मया ॥ किंतु एकैव साध्यसाधनभावापन्ना निष्ठा एकस्यैवाधिकारिणः अन्तःकरणशुद्ध्यशुद्धिरूपावस्थाभेदेन द्विप्रकारा अभिहिता ॥ द्वयोस्साध्यसाधनभावापन्नयोरेकत्वमिति सूचयितुं निष्ठेत्येकवचनेन निर्देशः ॥ वक्ष्यते च ॥ ३ 'एकं साङ्ख्यं च योगं च यः पश्यति स पश्यति ॥' इति ॥ अत एव एकं त्वां प्रति 'एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु ॥' इत्युभयोरपि निष्ठयोरुपदेशो युज्यत एव ॥ परस्परविरुद्धयोस्तयोः समुच्चययोगेन भिन्नफलकयोः उत्कृष्टापकृष्टयोस्तयोर्विकल्पयोगेन च कथमेकाधिकारिकत्वं तयोर्युज्यते ॥ एकेन युगपदनुष्ठातुमशक्ययोस्तयोरधिकारिभेद एव ह्युचितः ॥ न चाधिकारिभेदस्त्वयाऽभिहितः ॥ प्रत्युत 'एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु ॥' इति द्वयोस्तयोरेकं मां प्रत्युक्त्युक्त्या ४ 'योगस्थः कुरु कर्माणि ॥' ५ 'बुद्धौ शरणमन्विच्छे'ति द्वयोस्तयोरेकस्मै मह्यमुपदेशाच्च एकाधिकारिकत्वमेव त्वयाऽभिहितम् ॥ अतः कथमिदमिति चेत् एकेन युगपदनुष्ठातुं अशक्ययोस्तयोर्भिन्नाधिकारिकत्वमेव ममाभिप्रेतम् ॥ सूचितं च तत् मया ॥ ६ 'एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु ॥' इति वदता ॥ न च तदनवधानेन त्वया गृहीतं ॥ भिन्नाधिकारिकयोस्तयोरेकं मां प्रत्युपदेशादिकं कथं युज्यते इति चेत् 'एषा तेऽभिहिते'त्यादिना उभयोरेकं त्वां प्रत्युक्तिः भिन्नाधिकारिकत्वेऽपि घटते ॥ अनेनेदं कर्तव्यं अनेनेदं कर्तव्यं इति द्वाभ्यां कर्तव्ययोरेकं प्रत्युपदेश उपपद्यते ॥ ७ 'कुरु कर्माणि' ८ 'बुद्धौ शरणमन्विच्छे'त्युपदेशस्तु कर्म कुरु तस्य ज्ञानमेव फलमन्विच्छ न तु स्वर्गादिक-

---

१. २. ६१. २. २. ३१. ३. ५. ५. ४. २. ४८. ५. २ ४९. ६. २. ३९. ७. २. ४८. ८. २. ४९.

मित्येवं मोक्षसाधनज्ञानफलकाकाम्यकर्मकर्तव्यतानियमनपरः न तु उभयोः कर्तव्यतोपदेशपरः ॥ १ 'कृपणाः फलहेतवः ॥' इति हेतूक्त्यनुरोधात् ॥ यद्येवं मां प्रत्येकस्यैवोपदेशे तात्पर्यमिति ब्रूषे ॥ तर्हि ज्ञानयोग एव कुतो मे नोपदिष्टः ॥ उपदिष्ट एव ज्ञानयोगस्ते ॥ अत एव हि 'एषा तेऽभिहिता सांख्ये बुद्धि'रित्युक्तं इति चेत् २ 'कर्मण्येवाधिकारस्ते' इति ज्ञानानधिकारित्वेन निर्णीतस्य मे ज्ञानाधिकारिपुरुषान्तरकर्तव्यज्ञाननिष्ठोपदेशः कथं घटत इति चेत् भिन्नाधिकारिकयोः परस्परविरुद्धयोर्द्वयोः कार्ययोः व्यक्तिभेदेन अनेनेदं कर्तव्यं तेन तत्कर्तव्यं इत्युक्तिवत् अवस्थाभेदेन अनेनेदानीं इदं कर्तव्यं अनेनैव तदानीं तत्कर्तव्यमित्युक्तिरपि युज्यते॥ भिन्नाधिकारिकपरस्परविरुद्धकार्यद्वयोपदेशो न व्यक्तिभेदमात्रप्रतिनियतः। किं तु व्यक्तिभेदावस्थाभेदसाधारणः ॥ अत एव त्वामेकं प्रति परस्परविरुद्धयोर्ज्ञानकर्मणोरुभयोरपि अन्तःकरणाशुद्धिरूपावस्थायां कर्मकर्तव्यं अन्तःकरणशुद्धिरूपावस्थायां ज्ञानयोगः कर्तव्य इत्युपदेशो युज्यते ॥ अत एव तवेदानीं अन्तःकरणाशुद्धिरूपावस्थावत्त्वेन चित्तशुद्ध्याधायके वर्णाश्रमोचितविहितकर्मानुष्ठानरूपे कर्मयोग एवाधिकारात् उचितमेव ज्ञानतोऽपकृष्टे कर्मणि तव नियोजनं मम ॥ अत उक्तं युक्तम्॥ न चात्र कश्चिदनुपपत्तिलेशोऽपीति सम्यगवधारय ॥ ३ ॥

वि ॥ हे अनघ निर्दोष पार्थ अस्मिन् लोके विविधाधिकारियुक्ते द्विविधा निष्ठा ज्ञानयोगकर्मयोगान्यतरविषया स्थितिः, सङ्ख्या आत्मैकविषया बुद्धिः तद्युक्ताः सांख्याः तेषां सांख्यानां ज्ञानयोगेन ॥ योगिनां अतदर्हाणां कर्मयोगाधिकारिणां योगिनामित्यत्र मत्वर्थीयेनिप्रत्ययार्थः संबन्धो योग्यतारूपो विवक्षितः ॥ कर्मयोगेन परमपुरुषाराधनरूपेण ॥ ३ 'यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ॥ स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥' इति उचितविहितकर्मणः परमपुरुषाराधनरूपत्वं वक्ष्यते॥ इति पुरा पूर्वकाले पूर्वाध्याये वा मया यथाधिकारमसङ्कीर्णैवाभिहिता॥ मद्वचनमर्म न सम्यगवधृतं त्वया ॥ एतेन किमुक्तं भवतीति चेत् इदमुक्तं भवति ॥ जनन्तराचरितविविधसुचरितपरिमृदितमनोमलानां अव्याकुलबुद्धीनां विनैव कर्मयोगं ज्ञानयोगे प्रभवितुं शक्तानां ज्ञानयोगाधिकारिणां ४ 'प्रजहाति यदा कामान्' इत्यादिना ज्ञानयोगः ॥ अतथाविधानां ज्ञानयोगे अशक्तानां विषयव्याकुलबुद्धियुक्ता-

---

१. २. ४९. २. २- ४७. ३. १८. ४६. ४. २. ५५.

नां मनोमलनिर्हरणाय 'कर्मण्येवाधिकारस्ते' इत्यादिना कर्मयोगः ॥ इत्युभयमसङ्कीर्णमेव तुभ्यमुपदिष्टं मया ॥ त्वं च ज्ञानयोगे अशक्तत्वात् कर्मण्येवाधिकृतत्वेन कर्मण्येव नियोजितः ॥ अतो न किञ्चिदिह व्यामिश्रमभिहितं ते ॥ त्वमनघोऽसि ॥ अतः कर्मयोगयोग्योऽसि ॥ यदा यथावदनुष्ठितेन कर्मणा अनघतरः संपत्स्यसे तदा ज्ञानयोगयोग्यो भविष्यसि ॥ अतस्त्वदीयां योग्यतामनुसृत्य उचितविहितकर्मयोगे युद्धानुष्ठानरूपे तव नियोजनं ममोचितमिति सम्यगवधेहि ॥ अवधार्येदं विहितं कर्म युद्धाख्यमनुतिष्ठ ॥ ३ ॥

द्वै ॥ अर्जुनः ॥ तव कर्मयोगयोग्यत्वात् ज्ञानद्वारा मोक्षहेतुभूते वर्णाश्रमोचिते युद्धाख्ये कर्मणि त्वं नियोजित इत्युक्तम् ॥ कर्माकरणेनैव मोक्षः सिध्यति॥ मोक्षो हि कर्माकरणेन प्राप्यः कुत इति चेत् मोक्षो नैष्कर्म्यशब्देनोच्यते कर्मणोऽभावो निष्कर्म तेन प्राप्यं नैष्कर्म्यं इति हि तदर्थः ॥ एवं कर्माकरणेनैव मोक्षसंभवात् तदर्थं ज्ञानसंपादनस्य अनावश्यकत्वेन तत्फलके कर्मणि मे नियोजनमनुचितम् ॥ किं ब्रूषे ॥

कृष्णः ॥ न कर्मणामनारंभान्नैष्कर्म्यं पुरुषोऽश्नुते ॥
न च संन्यसनादेव सिद्धिं समधिगच्छति ॥ ४ ॥

नेति ॥ पुरुषः जीवः कर्मणां न आरंभः अनारंभः तस्मात् निर्गतं कर्म यस्मात् सः निष्कर्मा निष्कर्मणो भावः नैष्कर्म्यं मोक्षं ज्ञानयोगनिष्ठां वा नाश्नुते न प्राप्नोति ॥ संन्यसनादेव निवृत्तिकर्मकरणमात्रादेव संन्यासाश्रमादेव सिद्धिं मोक्षं ज्ञानयोगनिष्ठां वा न समधिगच्छति च ॥ संन्यसनात् आरब्धस्य परित्यागात् सिद्धिं कर्मसिद्धिं नैव समधिगच्छति च ॥ इति वा ॥ ४ ॥

पुरुषो जीवः कर्तव्यानां कर्मणां अनारंभात् अकरणात् नैष्कर्म्यशब्दितं मोक्षं न प्राप्नोति ॥ किमुक्तं भवतीति चेत् इदमुक्तं भवति ॥ पुरं देहं सरति प्राप्नोतीति पुरुषः इति पुरुषपदेनोच्यमानः प्रारब्धकर्मनिर्मितप्राकृतदेहवान् जीवः कर्माकरणेन मोक्षं नाप्नोति ॥ कर्माकरणेन मोक्षप्राप्तेरसंभवात् ॥ यदि कर्माकरणेन मोक्षः स्यात् तर्हि अस्य मोक्षसाधनभूतकर्मकरणानर्हतिर्यक्स्थावराद्यनेकदेहेषु कर्माकरणसंभवान्मुक्त्यवश्यंभावेन पुरुषपदोक्तपरिदृश्यमानदेहवत्वं न युज्यते ॥ दृश्यते चायं

इदानीममुक्तः प्राकृतदेहवान् ॥ अतः कर्माकरणेन प्राप्यो मोक्ष इति न युक्तं वक्तुं ॥ तर्हि मोक्षस्य नैष्कर्म्यशब्देनोक्तिः कथमिति चेत् प्रवृत्तिकर्माकरणेन प्राप्यत्वान्नैष्कर्म्यशब्दनिर्देशः ॥ मुक्तेर्नैष्कर्म्यशब्दवाच्यत्वस्य अन्यथोपपत्तिकल्पनेऽपि कारणान्तरेण मुक्तेः कर्माकरणेन प्राप्यत्वं स्यादेव ॥ कथमिति चेत् कर्म हि संसारबीजं तदकरणे संसारबीजाभावात् असंसाररूपमोक्षस्स्यादेव इति चेत् अयं जीवः पुराणि देहान् सरतीति पुरुषः इति पुरुषपदेनोच्यमानः प्रारब्धकर्मनिर्मितानेकदेहवान् कर्माकरणेन मोक्षं न प्राप्नोति ॥ कर्माकरणेन मोक्षप्राप्त्यनुपपत्तेः ॥ कर्माकरणेन मोक्षस्य प्राप्यत्वे कदाऽप्यस्य मोक्षो न स्यात् ॥ कुत इति चेत् वर्तमानदेहे कर्माकरणेऽपि संसारबीजभूतकर्मकरणार्हानन्तदेहसंभवात् तत्तद्देहकृतानामनेकेषां कर्मणां भावेन संसारबीजभूतकर्माभावासंभवात् ॥ भोगेन कर्मणां क्षये मोक्षो भविष्यतीति चेत् एकैकस्मिन्नपि अनेकदेहारंभककर्मकरणात्कर्मणामसमाप्तेः ॥ अतः कर्माकरणप्राप्यत्वं मोक्षस्य नाङ्गीकर्तुं शक्यम् ॥ एवं मुक्तेः कर्माकरणप्राप्यत्वस्य कदाऽपि मोक्षासंभवापत्तियुक्त्या निवारणेऽपि कारणान्तरेण मुक्तेः कर्माकरणेन प्राप्यत्वं स्यादेव ॥ कथमिति चेत् भवति हि निवृत्तिकर्मकरणेन मोक्षः ॥ उक्तं च त्वया ॥ १ 'बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसी'ति ॥ २ 'कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः ॥ जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम् ॥' इति ॥ ३ 'तदा योगमवाप्स्यसी'ति च ॥ 'निवृत्तं सेवमानस्तु ब्रह्माभ्येति सनातनम् ॥' इत्यभियुक्ताः स्मरन्ति ॥ भवति हि संन्यासाश्रमेणापि मोक्षः ॥ ४ वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्वाः ॥ ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे ॥' इति श्रुतिः ॥ मोक्षस्य निवृत्तिकर्मसंन्यासाश्रमाभ्यां प्राप्यत्वात् कर्माकरणेनापि स प्राप्यो भवति ॥ फलाभाववत्त्वेन कर्माकरणस्य निवृत्तिकर्मसंन्यासाश्रमाभ्यां साम्यात् ॥ आयासाभावरूपगुणवत्त्वेन ताभ्यामाधिक्याच्च ॥ कर्मणोऽकरणे प्रत्यवायस्स्यादिति चेत् प्रत्यवायोक्तिरमुमुक्षुविषया ॥ न हि मुमुक्षोरनुष्ठेये निवृत्तिकर्मणि प्रत्यवायो जायते ॥ उक्तं च त्वया ॥ ५ 'प्रत्यवायो न विद्यते ॥' इति ॥ तत्साम्येन मुमुक्षोर्मोक्षसाधनतयाऽभिप्रेते कर्माकरणे प्रत्यवायो न जायते ॥ इति चेत् संन्यसनादेव सन्यासशब्दवाच्यकाम्यकर्मपरित्यागोपलक्षिताकाम्यकर्मकरण-

---

१. २. ३९. २. २. ५१. ३. २. ५३. ४. ना १२. ५. २. ४०.

मात्रादेव संन्यासाश्रममात्रादेव वा सिद्धिं मोक्षं न प्राप्नोति च ॥ किमुक्तं भवतीति चेत् इदमुक्तं भवति ॥ यदि निवृत्तिकर्ममात्रेण संन्यासाश्रममात्रेण वा मोक्षः स्यात् तर्हि प्रारब्धाभाववत्त्वात्तत्समेन कर्माकरणेनापि मोक्षः स्यात् ॥ न च तथा ॥ किन्तु चित्तशुद्धिविषयवैराग्यश्रवणमननिदिध्यासनज्ञानभगवत्प्रसादद्वारैव ताभ्यां मोक्षः ॥ न तयोरिव कर्माकरणस्य चित्तशुद्ध्यादिहेतुत्वं संभवति ॥ अतस्तत्प्रतिबन्धा कर्माकरणस्य मोक्षहेतुत्वं वक्तुं युक्तम् ॥ न हि फलानिच्छया प्रभोराराधनवत् तदकरणेन गृहे तूष्णीमवस्थानं च फलानपेक्षासाम्यात् प्रभुप्रसादैकलभ्यफलजनकं भवति ॥ किंतु आराधनमेव प्रसादजनकत्वात् फलं जनयति ॥ तदकरणं तु प्रसादाजनकत्वात्फलं न जनयति ॥ अतः फलमनपेक्षणीयं भगवदाराधनरूपं कर्म च कर्तव्यम् ॥ तादृशेन कर्मणैव मोक्षसिद्धिरिति स्थितम् ॥ ज्ञानार्थत्वान्निवृत्तिकर्मणस्तत्र त्वं नियोजित इत्युक्तम् ॥ तदयुक्तम् ॥ ज्ञानस्य निवृत्तिकर्मणेव तदन्येन हिंसादिदोषरहितेन केनचित्साधनेन वा काम्यकर्माकरणमात्रेण वा संन्यासाश्रमेण वा साधनसंभवात् इति चेत् तस्यापि इदमेवोत्तरम् ॥ 'न कर्मणा'मित्यादि ॥ उक्त एवार्थः ॥ ज्ञानं चित्तशुद्धिमूलकवैराग्यश्रवणादिसाधनलभ्यम् ॥ चित्तशुद्धिश्च अकाम्यकर्मान्वयव्यतिरेकानुविधायिनी ॥ अतः निवृत्तिकर्मकरण एव चित्तशुद्धिमूलकवैराग्यादिहेतुकज्ञानद्वारा मोक्ष इति तत्करणे त्वं नियोजितः ॥ आधिकारिकस्य त्वादृशस्य संन्यास एव न संभवति ॥ अनाधिकारिकस्य संन्यास संभवात् तस्य विनैव कर्मयोगं तेनैव ज्ञानद्वारा मोक्षः सिध्येदिति चेत् न संन्यासाश्रममात्रेण ज्ञानद्वारा मोक्षः ॥ किंतु तदाश्रमोचितकर्मानुष्ठानादेव चित्तशुद्ध्यादिद्वारा ज्ञानद्वारेण मोक्षः ॥ तर्हि अस्य संन्यासाश्रमस्वीकारो व्यर्थ इति चेत् संन्यासाश्रमोऽस्य आश्रमान्तरधर्मव्यापृतिमूलकविघ्नपरिहारेण सततं वेदान्तविचारनैयत्यसौकर्याय ॥ एवं सति सर्वैरनाधिकारिकैः आश्रमान्तरधर्मकरणानिच्छायां सत्यां संन्यासाश्रमं स्वीकृत्य तदुचितकर्म कर्तव्यं संपद्येत इति चेत् चित्तशुद्ध्यादिरहितसंन्यासाश्रमस्य भ्रष्टतापाऽऽदकत्वात् चित्तशुद्ध्यर्थं स्वस्वाश्रमोचितं कर्म कर्तव्यं ॥ माऽस्तु संन्यासाश्रममात्रान्मोक्षः अस्तु च तत्रापि कर्मानुष्ठानादेव ॥ अहं स्वीकृत्य संन्यासाश्रमं तदुचितं कर्म चिकीर्षामि ॥ न घोरं युद्धरूपं कर्म करिष्यामि इति चेत् आधिकारिकस्य तव संन्यासासंभवेन तथा वक्तुमयुक्तं ॥ अतः कर्म वर्णाश्रमोचितं कर्तव्यमेवेति स्थितम् ॥ ४ ॥

अ ॥ अर्जुनः ॥ अन्तःकरणाशुद्धिरूपावस्थावत्त्वात्तव चित्तशुद्ध्याधायके कर्मण्येव तव नियोजनमुचितमिति त्वं तत्र नियोजितो मयेत्युक्तं ॥ सत्यं ॥ तथाऽपि हिंसादिदोषदुष्टं कर्म परिहाय चित्तशुद्ध्यादिद्वारा ज्ञानसाधनभूतं कमप्यन्यमेवोपायं ब्रूहि ॥

कृष्णः ॥ पुरुषः चित्तशुद्ध्यादिद्वारा ब्रह्मज्ञानसाधनतयाऽभिहितानां वर्णाश्रमोचितविहितकर्मणां अनारंभात् अननुष्ठानात् नैष्कर्म्यं निष्कर्मा कर्मशून्यः तस्य भावो नैष्कर्म्यं कर्मशून्यतां ज्ञानयोगनिष्ठामिति यावत् ॥ न हि ज्ञानयोगनिष्ठः कर्मवान् भवति ॥ वक्ष्यते च ॥ १'तस्य कार्यं न विद्यते'॥ इति ॥ नाश्नुते न प्राप्नोति ॥ निष्कर्म निष्क्रियं ब्रह्म तस्य भावः नैष्कर्म्यं निष्क्रियाखंडाद्वितीयपरब्रह्मभावापत्तिरूपां मुक्तिमिति यावत् ॥ नाऽऽप्नोतीति वा ॥ मोक्षस्य ज्ञानैकनियतत्वात् ज्ञानस्य च चित्तशुद्ध्यादिसाधनैकनियतत्वात् चित्तशुद्ध्यादेश्च कर्मयोगैकनियतत्वात् वर्णाश्रमोचितविहितकर्माननुष्ठाने चित्तशुद्ध्यादिद्वारा ज्ञानं तद्द्वारा मोक्षं वा नाप्नोति ॥ २'न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः'॥ इति श्रुत्या कर्मणो मोक्षसाधनत्वं नास्तीत्युच्यते ॥ उच्यते च मोक्षसाधनत्वं संन्यासाश्रमनियतस्य कर्मसंन्यासस्य ३'वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्वाः ॥ ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे'॥ इति श्रुत्या ॥ अतः संन्यास एवाहं नियोज्यः न कर्मयोगे इति चेत् संन्यसनादेव संन्यासमात्रात् चित्तशुद्धिं विना कृतात् केवलात् ज्ञानरहिताद्वा कर्मत्यागात् सिद्धिं ज्ञानयोगनिष्ठारूपं फलं मोक्षं वा न समधिगच्छति प्राप्नोति ॥ न संन्यासस्य मोक्षहेतुत्वं तस्यापि कर्मरूपत्वेन मोक्षहेतुत्वासंभवात् ॥ संन्यासयोगादिति श्रुतेः का गतिरिति चेत् संन्यासः ब्रह्मण्यारोपितनामरूपग्रहणत्यागः ॥ न कर्मत्यागः तस्य यतश्च इत्यनेनैव सिद्धेः ॥ यतयः संन्यासाश्रमनियतकर्मत्यागवन्तः संन्यासयोगात् ब्रह्मण्यारोपितनामरूपत्यागरूपात् सम्यग्ज्ञानयोगात् मोक्षं प्राप्नुवन्तीति श्रुत्यर्थः ॥ नापि ज्ञाननिष्ठाहेतुत्वं संन्यासस्य ॥ तस्याः चित्तशुद्ध्यादिसाधनान्वयव्यतिरेकानुविधायित्वात् ॥ चित्तशुद्ध्यादेश्च कर्मयोगैकसाध्यत्वात् ॥ कर्मस्वलसतया दुःखबुद्ध्या च कर्मत्यागाय स्वीकृत्य संन्यासाश्रमं कर्मपरित्यागमात्रात् अकृतचित्तशुद्ध्यादिहेतुभूतवेदान्तश्रवणा-

---

१. ३. १७. २. ना १२. ३. ना १२.

देर्यतेः ज्ञानानुत्पत्तिदर्शनाच्च ॥ संन्यासाश्रमज्ञानयोगयोः कार्यकारणभावाभावे असंन्यासिनो ज्ञानमेव नोत्पद्यते इति प्राचां प्रवादस्य का गतिरिति चेत् स प्रवादः विक्षेपककर्मत्यागरूपसंन्यासविषयः ॥ न तु काषायपरिधानादिमात्रविषयः वसिष्ठादीनां तद्रहितानामपि ज्ञानोत्पत्तिदर्शनात् ॥ अतो ज्ञानार्थं उचितं विहितं कर्म कर्तव्यमेव ॥ 'न कर्मणे' त्यादिश्रुतिस्तु कर्मणो न साक्षान्मोक्षसाधनत्वं ॥ किंतु ज्ञानद्वारा इति वक्ति ॥ अतः चित्तशुद्ध्यादिद्वारा ज्ञानं तद्द्वारा मोक्षं च साधयतः कस्यापि कर्मेतरस्य साधनस्याभावात् कर्मण्येव तव नियोजनमुचितमिति कर्मण्येव त्वं नियोजितोऽसि मयेति सर्वं सुस्थम् ॥ ४ ॥

वि ॥ अर्जुनः ॥ ज्ञानार्थं कर्तव्यं कर्मानुतिष्ठेत्युक्तम् ॥ विनैव कर्मयोगं संपादयामि कथंचित् ज्ञानयोगम् ॥ किं कर्मणा ॥ वद ॥

कृष्णः ॥ लौकिकः पुरुषः शास्त्रैः कर्तव्यतया विहितानां अकाम्यकर्मणां अनारंभात् अननुष्ठानात् निष्कर्मा पर्यवसितकर्मा ज्ञानयोगी ज्ञान एव हि कर्मणः पर्यवसानम् ॥ वक्ष्यते च ॥ १ 'सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥' इति ॥ तस्य भावः नैष्कर्म्यं ज्ञानयोगनिष्ठां नाश्नुते न प्राप्नोति ॥ कारणभूतस्य कर्मणोभावात् ॥ युद्धाख्यस्य विहितकर्मणः उपक्रान्तत्वात् रथारोहणकुरुक्षेत्रागमनशंखध्मानधनुरुद्यमनज्यारोपणशरसन्धानपर्यन्तस्य तस्य कृतत्वाच्च कृतमेव कर्म तेनैव ज्ञानयोगः संपद्यते इति चेत् संन्यसनात् आरब्धानां कर्मणां २ परित्यागाच्च नैष्कर्म्यं पुरुषो नाश्नुते ॥ कुत इति चेत् आरब्धस्य कर्मणः परित्यागात् सिद्धिं ३ कर्मसिद्धिं सम्यक् नैव अधिगच्छति ॥ आरब्धस्य समापने हि कर्मसिद्धिः स्यात् ॥ अतः कारणभूतस्य कर्मणोऽसिद्धत्वेन न नैष्कर्म्यसिद्धिः ॥ कर्माभावे परमपुरुषप्रीत्यभावः तदभावे च पापसञ्चयानुपरमः तदनुपरमे च रजस्तमोमयमनोमलानपगमः तदनपगमे च रागद्वेषादिदोषानिवृत्तिः तदनिवृत्तौ च नेन्द्रियव्याकुलताशान्तिः तदशान्तौ च न प्रत्यगात्मज्ञाननिष्ठा इति ज्ञानयोगं प्रति

---

१. ४. ३३. २. कर्मणां संन्यासादित्यन्वयः ॥ संन्यसनादित्युक्त्या आरब्धानां इति लभ्यते ॥ ३. नैष्कर्म्यपदानुषंगसंभवेऽपि पुनः सिद्धिपदोपादानात् सिद्धिपदेन कर्मसिद्धिमभिप्रेत्य आवृत्त्या एवं योजना कृता ॥

कर्मयोगस्य कारणत्वेन कर्मणां अनुपक्रमे उपक्रान्तानां मध्यतस्त्यागे वा न ज्ञानयोगसिद्धिः ॥ न हि कारणस्यानुपक्रमे मध्यतस्त्यागे वा कार्योत्पत्तिर्दृश्यते ॥ १ 'नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ॥ स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥' इति, उपक्रान्तस्य मध्ये विच्छिन्नस्यापि फलाधायकत्ववचनं प्रधानफलेतरावान्तरफलजनकत्वाभिप्रायकम् ॥ वक्ष्यते च ॥ २ 'प्राप्य पुण्यकृतां लोका'नित्यादि ॥ आरभ्य समापितं हि एकं कर्म भवति ॥ तथाविधस्य कर्मणो हि नामनिर्देशेन अस्येदं फलमित्युच्यते ॥ आरभ्य असमापितं कर्मैव न भवति ॥ कुतस्तस्य तदीयफलप्रसक्तिः॥ फलमनभिसन्धाय मामेवोद्दिश्य कर्म कर्तुमुपाक्रमतायमिति करुणया किमप्यवान्तरं फलं प्रयच्छति भगवानीश्वरः ॥ वक्ष्यते च ॥ ३ 'न हि कल्याणकृत्कश्चित् दुर्गतिं तात गच्छति ॥' इति ॥ 'प्राप्य पुण्यकृतां लोकान्' इत्यादि च ॥ किंच आरभ्य युद्धं मध्ये पलायनमधर्मः अपलायनं धर्मः ॥ वक्ष्यते च ॥ ४ 'युद्धे चाप्यपलायनम् ॥' इति ॥ अतः उपक्रममात्रस्य फलाधायकत्ववचनं युद्धेतरविषयम् ॥ अतो न तद्विरोधः ॥ किंच 'बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि ॥' इति प्रशस्य 'नेहाभिक्रमनाशोऽस्ति' इति मध्यतो विच्छेदेऽप्युपक्रममात्रस्य फलजनकत्वोक्तया तद्वचनं दैवादशक्त्यादिना वा आपतितविच्छेदाभिप्रायकम् ॥ अतः सत्यां शक्तौ असत्यामनुपपत्तौ आरब्धं कर्म समापितं चेदेव सफलं भवेत् ॥ अत आरब्धं युद्धमांतमनुष्ठेयं त्वया ज्ञानयोगलाभाय ॥ विना कर्मयोगं ज्ञानयोगमेव साधयामीति च न वक्तव्यम् ॥ सप्तभौमस्य प्रासादस्य सप्तमं तलं प्रथमं चिकीर्षुरिवापहास्यो भविष्यसि ॥ अतो मैवं वादीः ॥ विमृशेदम् ॥ ४ ॥

द्वै ॥ अर्जुनः ॥ आशङ्कितं मुक्तेः कर्माकरणप्राप्यत्वं उक्तविधया परिहृतम् ॥ तथाऽपि प्रकारान्तरेण कर्माकरणप्राप्यत्वं मुक्तेः स्यादेव ॥ कुत इति चेत् कर्म बन्धकत्वान्मोक्षप्रतिबन्धकम् ॥ स्मरन्ति हि ॥ 'कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते ॥ तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिनः॥' इति॥ कर्म प्रतिबन्धकं तदकरणरूपस्तदभावः प्रतिबन्धकाभावः प्रतिबन्धकाभावः कार्यं प्रति कारणम् ॥ अतः कर्माकरणस्य कारणत्वात्तत्प्राप्यत्वं मुक्तेर्युक्तं ॥ वद ॥

कृष्णः ॥ न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् ॥

१. २. ४०. २. ६. ४१. ३. ६. ४०. ४. १८. ४३.

कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥ ५ ॥

न हीति ॥ जातु कदाचिदपि कश्चित् कोऽपि क्षणमपि कर्म करोतीति कर्मकृत् न कर्मकृत् अकर्मकृत् न तिष्ठति ॥ हि प्रसिद्धम् ॥ न वशः अवशः अस्वतन्त्रः अस्य परमाऽऽत्मनो वशः अधीनः अवशः तादृशः सर्वः प्राणी प्रकृतेः जायन्ते इति प्रकृतिजाः तैः गुणैः सत्वादिभिः कर्म कार्यते ॥ हि प्रसिद्धम् ॥ हि यस्मात् तस्मादिति वा ॥ ५ ॥

जातु सर्वावस्थास्वपि क्षणमपि कोऽपि किमपि कर्म अकुर्वन्न तिष्ठति ॥ प्रसिद्धमिदम् ॥ वक्ष्यते च ॥ १'न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः ॥' इति ॥ कुतः सदा कर्म कुर्वन्नेव वर्तते इति चेत् सर्वो जनः सात्विको राजसस्तामसो वा प्रकृतेः ईश्वरस्य गुणैरिच्छादिभिः प्रकृतेः जीवस्य गुणैः अदृष्टादिभिः प्रकृतेः जडप्रकृतेः गुणैः सत्वादिभिः कर्म कार्यते ॥ कुत इति चेत् अवशः अस्वतन्त्रो हि सः ॥ कस्य वश इति चेत् अवशः अशब्दवाच्यस्य हरेर्वशः ॥ सर्वः अवशः इति प्रथमा तृतीयार्थे ॥ स्वतन्त्रकर्त्रा ईश्वरेण प्रकृतेः गुणैः करणैः अस्वतन्त्रकर्त्रा जीवेन सात्विकं राजसं तामसं वा कर्म कार्यते ॥ अतः अकर्मकृत् कोऽपि न ॥ यदि मुक्तिः कर्माकरणप्राप्या स्यात् तर्हि सर्वेषां सर्वदा कर्मसद्भावात् न कस्यापि मुक्तिरिति मोक्षशास्त्रानर्थक्यम् ॥ अतः प्रतिबन्धकत्वभिया कर्मसामान्यस्य त्यक्तुमशक्यत्वेन कर्तव्यमेव विहितं कर्म ॥ प्रतिबन्धकत्वबोधकस्मृतेः का गतिरिति चेत् २'यज्ञार्था'दिति वक्ष्यते ॥ ५ ॥

अ ॥ अर्जुनः ॥ अज्ञस्य अशुद्धचित्तस्य कुतः संन्यसनात् ज्ञानयोगस्य मोक्षस्य वा सिद्धिर्नेत्युच्यते ॥ तद्विविच्य ब्रूहि ॥

कृष्णः ॥ अज्ञस्य संन्यासमभ्युपेत्य संन्यासी भवन्नज्ञः अन्तःकरणाशुद्धया ज्ञानाभावान्न मुच्यते इत्युक्तम् ॥ इदानीमज्ञस्य अशुद्धचित्तस्य संन्यास एव न संभवति ॥ अतस्तथोक्तमित्युच्यते ॥ शृणु ॥ जाग्रति स्वप्ने वा कोऽप्यज्ञः क्षणमपि किमपि अन्तर्बहिर्वा कर्म अकुर्वन् न तिष्ठति ॥ हि प्रसिद्धम् ॥ कुत इति चेत्, सर्वः

---

१. १८. ११. २. ३. ९.

प्राणी अज्ञः अवशः अजितेन्द्रियः अस्वतन्त्रो वा सन् प्रकृतेः सकाशात् कार्यरूपेणाभिव्यक्तैः १सत्वादिभिर्गुणैः प्रकृतिः स्वभावः तद्धेतुकैः गुणैः रागद्वेषादिभिर्वा कर्म करचरणादिचेष्टारूपं सात्विकं राजसं तामसं वा कायिकं वाचिकं मानसिकं वा दुर्मनोरथादिकं वा लौकिकं वैदिकं वा बाह्यं आन्तरं वा नानाविधं २ कार्यते ॥ अतः किमप्यकुर्वन्न तिष्ठति ॥ ईदृशस्य कर्माकरणादशुद्धचित्तस्य अज्ञस्य संन्यासाश्रमनियतः कर्मसंन्यास एव न संभवति ॥ अनधिकारेण संन्यासाश्रमस्वीकारस्यैवासंभवात् ॥ अतः संन्यसनादज्ञस्य अशुद्धचित्तस्य ज्ञानयोगो मोक्षो वा नेत्युक्तम् ॥ विदुषः कर्मसंन्यासे अधिकारादज्ञस्यैवात्र संन्यासो निषिध्यते ॥ 'संन्यस्य श्रवणं कुर्या'दित्यादिविविदिषासंन्यासशब्दितावित्कर्तृकज्ञानाङ्गभूतामुख्यसंन्यासवचनानां का गतिरिति चेत् अज्ञो द्विविधः शुद्धचित्तः अशुद्धचित्तश्चेति ॥ तत्र अशुद्धचित्तस्य हठात्संन्यासोऽत्र निषिध्यते ॥ एतज्जन्मकृतेन वा जन्मान्तरकृतेन वा कर्मयोगेन शुद्धचित्तस्याज्ञस्य वेदान्तविचारसौकर्याय क्रियमाणो विविदिषासंन्यासो न निषिध्यते ॥ तस्य च कर्मयोगस्य च तारतम्यपरीक्षायां कर्मयोग एव श्रेयानज्ञस्येति ३ 'तयोऽस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते' ॥ इति वक्ष्यते ॥ ५ ॥

वि ॥ अर्जुनः ॥ ज्ञानयोगाय कर्तव्यं कर्म त्वयेत्युक्तम् ॥ किं कर्मणा ॥ विनैव कर्मयोगं संपादयामि कथंचित् ज्ञानयोगमिति मयाऽभिहितेन त्वया विनैव कर्मयोगं ज्ञानयोगं संपिपादयिषुस्त्वं सप्तभौमस्य प्रासादस्य प्रथमादीनि तलान्यकृत्वा प्रथममेव सप्तमं तलं चिकीर्षुरिवापहास्यो भविष्यसीति वदता प्रथमादीनि तलानि विना प्रथमं सप्तमतलविरचनमिव विना कर्मयोगं ज्ञानयोगकरणमशक्यमित्युक्तं भवति ॥ कुतस्तथा ॥ तदेवोपपादय ॥

कृष्णः ॥ सर्वोऽपि लौकिकः पुरुषः न किंचित्करोमीति कृतव्यवसायोऽपि प्रकृतिसंभवैः सत्वरजस्तमोगुणैः प्राक्तनकर्मानुगुणं प्रवृत्तैः सात्विकं राजसं तामसं वा तत्तद्गुणोचितं यत्किंचित् कर्म प्रति अवशः अस्वतंत्रः कार्यते प्रवर्त्यते ॥ अतः विविधाधिकारियुक्ते अस्मिन् लोके कश्चिदपि लौकिकः पुरुषः कदाचिदपि

---

१. द्रव्यवासनाः गुणवासनाः कर्मवासनाः जातिवासनाः रागद्वेषादयश्च गुणाः तैः ॥ इति केचित् ॥ २. व्यर्थं तत्कुर्वन्ति न त्ववश्यानुष्ठेयं सत्कर्म इत्याश्चर्यमेतत् ॥ ३. ५. २.

क्षणमपि किमपि कर्म अकुर्वाणो न तिष्ठति ॥ अतो न कर्मणामनारंभात् आरभ्य त्यागाच्च ज्ञाननिष्ठां नाऽऽप्नोति ॥ अशुद्धचित्तस्य सत्वादिगुणपरतन्त्रतया ज्ञानयोगानर्हस्य लौकिकस्य पुरुषस्य सत्वादिगुणानां मोक्षार्थप्रवृत्त्यनुकूलताऽऽपादनरूपवशीकरणाय कर्मयोग आवश्यकः ॥ उक्तरूपविहितकर्मयोगेन प्राक्तनकुकर्मनाशः ॥ तेन सत्वादिगुणानां उक्तरूपं वशीकरणम् ॥ ततो मोक्षार्थप्रवृत्त्या श्रवणादिभिर्ज्ञानयोगलाभः ॥ इति कर्मयोगस्य प्राक्तनकुकर्मनाशादिद्वारा ज्ञानयोगं प्रति हेतुत्वात् न तेन विना ज्ञानयोगलाभः ॥ अतो ज्ञानाय कर्मानुतिष्ठ ॥ अशक्यं ज्ञानयोगकरणम् विना कर्मयोगात् ॥ ५ ॥

द्वै ॥ अर्जुनः ॥ कर्मसामान्यस्य त्यक्तुमशक्यत्वेन कर्तव्यमेव कर्मेत्युक्तम् ॥ सत्यं सामान्यतः कर्म त्युक्तुमशक्यमेव ॥ अतः कर्मसामान्यं 'कर्मणा बध्यते जन्तु'रिति त्यागशास्त्रविधेरविषयः ॥ 'नाऽशक्ये शास्त्रविधि'रिति न्यायात् ॥ तथाऽपि वर्णाश्रमोचितविहितकर्मणां त्यक्तुं शक्यत्वेन त्यागशास्त्रविधिविषयत्वसंभवात् त्याज्यमेवाकाम्यं कर्म युद्धादिकमिति भाति ॥ ब्रूहि ॥

कृष्णः ॥ कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ॥
इंद्रियार्थान् विमूढाऽऽत्मा मिथ्याऽऽचारः स उच्यते ॥ ६ ॥

यस्त्विन्द्रियाणि मनसा नियम्याऽऽरभतेऽर्जुन ॥
कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते ॥ ७ ॥

कर्मेन्द्रियाणीति ॥ वि विशेषेण मूढः विमूढः आत्मा अन्तःकरणं यस्य सः विमूढाऽऽत्मा यः कर्मणः इन्द्रियाणि कर्मेन्द्रियाणि संयम्य मनसा इन्द्रियाणां अर्थाः इन्द्रियार्थाः तान् स्मरन् सन् आस्ते तिष्ठति ॥ सः मिथ्या आचारो यस्य सः मिथ्याऽऽचारः कपटाऽऽचारः उच्यते ॥ ६ ॥

यस्त्विति ॥ हे अर्जुन यः मनसा इन्द्रियाणि नियम्य कर्मेन्द्रियैः कर्मरूपो योगः कर्मयोगः तं न सक्तः असक्तः सन् आरभते करोति सः तु विशिष्यते श्रेष्ठो भवति ॥ तुशब्दो विशेषसूचकः ॥ ७ ॥

यः कर्माकरणादशुद्धचित्तः कर्मेन्द्रियाणि वाक्पाणिपादपायूपस्थाऽऽख्यानि उपलक्षणया ज्ञानेन्द्रियाणि च चक्षुःश्रोत्रजिह्वाघ्राणत्वगाख्यानि 'इन्द्रियार्थान् मनसा स्मर'न्नित्युक्त्या ज्ञानेन्द्रियाणामपि नियमनमिह विवक्षितम् ॥ नियम्य दर्शनश्रवणादिरूपं प्रवचनपूजनादिरूपं च दर्शनश्रवणस्पर्शनवचनग्रहणादिसाध्यं युद्धादिकं च कर्म त्यक्त्वेति यावत् ॥ इन्द्रियगोचरान् रूपशब्दरसगन्धस्पर्शान् मनसा स्मरन् आस्ते उपविष्टो वर्तते ॥ जितेन्द्रियो महात्माऽयं न किमपि कुर्वन् सुखमास्ते इति द्रष्टॄणां बुद्धिमुत्पादयन् स्वस्मिन्नविद्यमानं महत्वं प्रकाशयन् सः विविधमोहयुक्तमानसः मिथ्याचारः कपटाचारः दांभिकः उच्यते ॥ स्वस्मिन्नल्पत्वं ज्ञात्वाऽपि अविद्यमानमहत्त्वप्रदर्शनं दंभः ॥ कस्तर्हि विशिष्यत इति चेत् यः इन्द्रियाणि चक्षुरादीनि मनसा नियम्य मनसा सह चक्षुरादीनि नियम्येति वा स्थातुमिति शेषः ॥ विषयेषु असक्तः सङ्गरहितः फलसङ्गादिरहितः सन्निति यावत् ॥ कर्मयोगं आरभते करोति ॥ 'नेहाभिक्रमनाशोस्ती' त्युक्तरीत्या उपक्रममात्रमपि फलाय भवति ॥ इति सूचनाय आरभत इत्युक्तम् ॥ सः विशिष्यते अतिरिच्यते ॥ यथाधिकारं कर्मकरणोपक्रमात् मनःशुद्ध्यादिमत्तया उत्कृष्टो भवति ॥ तुशब्दो विशेषसूचकः ॥ इतरेन्द्रियाणां कथञ्चिन्नियमनेऽपि मनसो नियमनमशक्यम् ॥ अनियमने च तस्य १'ध्यायतो विषयान् पुंसः' इत्याद्युक्तरीत्या प्रणाश एवाऽऽत्मनो भवति ॥ अतो मनसः शुद्धिरावश्यकी ॥ शुद्धिश्च मनसः कर्मणैव ॥ तच्च कर्म न चेष्टालक्षणं किंतु विहितं कर्मैव ॥ अतः त्यक्तविहिताकाम्यकर्मयोगः चित्तशुद्ध्याद्यभावेन ज्ञानाभावान्न मोक्षमाप्नोति ॥ प्रत्युत नरकाद्यनर्थमाप्नोति ॥ उक्तं च मया ॥ 'ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते ॥ सङ्गात्संजायते कामः कामात् क्रोधोऽभिजायते ॥ क्रोधाद्भवति संमोहः संमोहात् स्मृतिविभ्रमः ॥ स्मृतिभ्रंशात् बुद्धिनाशः बुद्धिनाशात् प्रणश्यति ॥' इति ॥ आरभमाणस्तु कर्मयोगं चित्तशुद्ध्यादिना ज्ञानलाभान्मोक्षमाप्नोति ॥ उक्तं च मया ॥ 'कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः॥ जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम् ॥' इति ॥ वक्ष्यते च ॥ २'ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः ॥ श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः ॥ ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम् ॥ सर्वज्ञानविमूढांस्तान् विद्धि नष्टानचेतसः ॥' इति ॥ अतो विहितानामकाम्य-

१. २. ६२. २. ३. ३१.

कर्मणां त्युक्तुं शक्यत्वेऽपि न त्यागशास्त्रविधिविषयत्वम् ॥ प्रतिबन्धकत्वाद्धि तत्र कर्मणां त्यागो विधीयते ॥ विहितानि तु कर्माणि न मोक्षस्य प्रतिबन्धकानि ॥ किंतु साधकानि ॥ यत्सत्वे कार्यस्यानुत्पत्तिः यदभावे च कार्यस्योत्पत्तिः तत् तस्य प्रतिबन्धकम् ॥ यत्सत्वे कार्यस्योत्पत्तिः यदभावे च कार्यस्यानुत्पत्तिः तत् तस्य साधकम् ॥ कर्मयोगसत्वे चित्तशुद्धिज्ञानद्वारा मोक्षरूपकार्यस्योत्पत्तिः ॥ तदभावे तस्यानुत्पत्तिः ॥ अतः मोक्षं प्रति कर्मयोगस्य साधकत्वेन प्रतिबन्धकत्वाभावात् न विहितकर्मणां त्यागशास्त्रविधिविषयत्वम् ॥ अतः कर्तव्यान्येव विहितानि कर्माणि ॥ मनसा सह इन्द्रियाणि नियन्तुं कर्मारभते इत्युच्यतामिति चेत् नियम्य असक्तः इत्यन्वयेन फलसङ्गत्यागः इन्द्रियमनोनियमनसाध्यः इत्यर्थसूचनाय नियम्येत्युक्तिः ॥ इन्द्रियमनोनियमनेन फलसङ्गादिरहितकर्मयोगः तेन च इन्द्रियमनोनियमनं इत्यन्योन्याश्रय इति चेत् स्थूलनियमनं कर्मयोगकारणं सूक्ष्मनियमनं तु कर्मयोगकार्यं इति विवक्षणान्न दोषः ॥ नियम्य मनः कर्मयोगकरणं ज्ञानिनां संभवति ॥ अतः चित्तशुद्ध्यादिना ज्ञानयोगं प्राप्तस्यापि परोक्षज्ञानिनः तदार्ढ्यार्थं तद्वतः अपरोक्षज्ञानार्थं अपरोक्षज्ञानिनः तदार्ढ्यार्थं तद्वतः मुक्तावानन्दोद्भाहार्थं कर्मयोग आवश्यक इति सूचनाय नियम्येत्युक्तिः ॥ उक्तं चेदं मया ॥ १ 'यदा ते मोहकलिलं' इत्यादिना २ 'तदा योगमवाप्स्यसि ॥' इत्यन्तेन ॥ पार्थेदं स्मर ॥ ६ ॥ ७ ॥

अ ॥ अर्जुनः ॥ अज्ञस्याशुद्धचित्तस्य संन्यास एव न संभवतीत्युक्तम् ॥ तत्कथं ॥ विहाय कर्माणि सुखेन तिष्ठासया कथञ्चिदौत्सुक्यादिना हठात्संन्यासाश्रमस्वीकारस्य कर्तुं शक्यत्वात् ॥ वद ॥

कृष्णः ॥ हे अर्जुन यः अज्ञः विमूढाऽऽत्मा भ्रान्तचित्तः रागद्वेषादिदूषितान्तःकरणः सन् कर्मेन्द्रियाणि संयम्य इन्द्रियाणि दश संयम्य तैः साध्यं कर्म च संयम्य इति वा ॥ संन्यासाश्रमं स्वीकृत्य कर्माणि संन्यस्येति यावत् ॥ मनसा इन्द्रियार्थान् शब्दादीनेव न तु ब्रह्म स्मरन् ध्यायन् आस्ते सः मिथ्याऽऽचारः कपटाऽऽचारः दांभिकः 'त्वंपदार्थविवेकाय संन्यासः सर्वकर्मणां ॥ श्रुत्येहविहितो

---

१. २. ५२. २. २. ५३.

यस्मात् [१] तत्त्यागी पतितो भवेत् ॥' इत्याद्युक्तविधया पापहेतुविपरीताचारो वा उच्यते ॥ यस्त्वज्ञः कर्मयोगे अधिकृतः मनसा इन्द्रियाणि ज्ञानेन्द्रियाणि चक्षुरादीनि नियम्य मनसा सह नियम्येति वा ॥ अत एव असक्तः सन् कर्मेन्द्रियैः वागादिभिः कर्मयोगं आरभते करोति ॥ सः कर्म कुर्वन् औत्सुक्यमात्रेण कृतसंन्यासादज्ञादतिरिच्यते ॥ तुशब्दो विशेषद्योतकः ॥ विशिष्यते इत्युक्तया चित्तशुद्धिमदज्ञकर्तृकात् विविदिषासंन्यासादपि कर्मयोगः श्रेयानिति सूच्यते ॥ हठात्संन्यासाश्रमस्वीकारस्य पातित्यहेतुत्वेन उत्कर्षावधित्वासंभवात् ॥ न हि पतितादग्निहोत्रादिकं कुर्वन् विशिष्यते इति वदन्ति ॥ किंतु अग्निहोत्रादिकमकुर्वतः सामान्यद्विजादग्निहोत्रादिकं कुर्वन् विशिष्यत इति वदन्ति ॥ स्पष्टं चेदं वक्ष्यते ॥ २ 'तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते ॥' इति ॥ अज्ञेन अशुद्धचित्तेन कथंचिदौत्सुक्यादिना कृतः कर्मसंन्यासः फलाय न भवति ॥ किंतु अन्तःकरणाशुद्धया विषयध्यानादिद्वारा नरकाद्यनर्थाय भवति ॥ उक्तं च मया ॥ ३ 'ध्यायतो विषयान् पुंसः' इत्यादि ॥ अज्ञेन कृतः कर्मयोगस्तु चित्तशुद्ध्यादिद्वारा ज्ञानमुत्पाद्य तद्द्वारा मोक्षाय भवति ॥ उक्तं च मया ॥ ३ 'कर्मजं बुद्धियुक्ता हि' त्यादि ॥ अतः हठात् संन्यासाश्रमस्वीकारस्य कर्तुं शक्यत्वेऽपि तस्य उक्तविधया पातित्यहेतुत्वादकर्तव्यत्वाऽऽशयेन स न संभवतीत्युक्तं युक्तम् ॥ अतः अज्ञस्याशुद्धचित्तस्य तव संन्यासासंभवात् कर्मयोग एवोचित इति त्वं कर्मण्येव नियोजितः ॥ अतस्तदेव कुरु ॥ त्वमर्जुनोऽसि ॥ शास्त्रीयस्य विहितस्य कर्मणोऽकरणे 'करोमि कर्म शुक्लं च तेन मामर्जुनं विदुः ॥' इति त्वया निरुक्तमर्जुननाम तवापगच्छेत् ॥ कथमन्यथा त्वमर्जुनः स्याः ॥ अतः कर्म कुरु ॥ ६ ॥ ७ ॥

वि ॥ अर्जुनः ॥ कर्मयोगकरणं प्राक्तनकुकर्मनाशनद्वारा ज्ञानयोगं साधयतीति करणे साधकमुक्तं ॥ अकरणे बाधकं किमप्यस्ति वा ॥ वद ॥

कृष्णः ॥ हे अर्जुन यः अन्तरेण कर्मयोगं ज्ञानयोगमारुरुक्षुं अशक्तः पुरुषः कर्मेन्द्रियाणि वागादीनि संयम्य कर्मयोगमकृत्वेति यावत् ॥ आत्मज्ञानाय प्रवृत्तः सन् विमूढाऽऽत्मा आत्मावलोकनपराङ्मुखमनाः सन् मनसा रूपादीन् विषयान्

---

१. संन्यस्य श्रवणादिकमकुर्वन् ॥ १. ५. २. २. २. ६२. ३. २. ५१.

स्मरन् ध्यायन् तिष्ठति ॥ सः मिथ्याऽऽचारः अन्यथा संकल्प्य अन्यथाऽऽचारवत्त्वात् विपरीताऽऽचारः॥ अन्यथात्वमेव हि सर्वत्र सर्वस्य मिथ्यात्वमुच्यते॥ आत्मावलोकनाय प्रवृत्तः तद्विरुद्धाऽऽचारवान् 'ध्यायतो विषया नित्याद्युक्तविधया विनष्टो भवति ॥ करणे साधकं अकरणे बाधकं चोक्तम् ॥ अस्ति किं सौकर्यं कर्मकरणाय इति चेत् शृणु ॥ यस्तु आत्मावलोकनप्रवृत्तेन मनसा इन्द्रियाणि नियम्य मनसा सह इन्द्रियाणि नियम्येति वा कर्मेन्द्रियैः स्वत एव कर्मसु प्रवृत्तैः इन्द्रियैः पूर्वाभ्यस्तसजातीये शास्त्रीये कर्मणि प्रवर्तितैः फलसङ्गादिरहितः सन् कर्मयोगं आरभते सः पूर्वोक्तात्पुरुषात् विशिष्यते ज्ञानद्वारा आत्मावलोकनसिद्ध्या श्रेयान् भवति ॥ इन्द्रियाणि सर्वाणि स्वत एव स्वस्वकर्मस्वशास्त्रीयेषु प्रवृत्तानि ॥ तेषां पूर्वाभ्यस्तसजातीयेषु शास्त्रीयेषु कर्मसु प्रवर्तनं सुशकम् ॥ विजातीये ज्ञानयोगे प्रवर्तनं तु दुःशकम् ॥ दृढोपलशकलसङ्घट्टनसुदृढीकृते अध्वनि अभ्यस्तसञ्चारस्य वाजिनः तत्सजातीये अन्यस्मिन्नध्वनि प्रवर्तनं सुशकम् ॥ विजातीये पङ्किले शर्करिले सिकतिले वा अध्वनि प्रवर्तनमशक्यं च दृष्टं लोके ॥ एतत्सूचनायैव कर्मसंबन्धित्वमुक्तं इन्द्रियाणां कर्मेन्द्रियैरिति ॥ एवं सौकर्यसत्वाच्च कृत्वैव कर्मयोगं ज्ञानयोगे प्रवर्तितव्यम् ॥ ज्ञानयोगाशक्तस्यैवमस्तु ज्ञानयोगशक्तेन कथं करणीयमिति चेत् ज्ञानयोगशक्तस्यापि कर्मयोगकरणमेव श्रेयः ॥ ज्ञानयोगशक्तत्वेन ज्ञानयोगनिष्ठादपि ज्ञानयोगशक्तोऽपि कर्मयोगं कुर्वन् विशिष्टो भवति ॥ अतएव विशिष्यते इति कर्मयोगिनः प्रशंसा क्रियते ॥ न हि निन्दितानिन्दितकर्मकारिणोरुभयोर्मध्ये कश्चन प्रशस्यते ॥ किंतु अनिन्दितविहितकर्मकारिणोर्मध्ये सुकरस्याप्रमादस्य नियतफलकस्य शीघ्रफलप्रदस्य कर्मणः कर्ता प्रशस्यते । ज्ञानयोगो दुष्करः संभाव्यमानप्रमादः अनियतफलकः विलंबेन फलप्रदः ॥ कर्मयोगस्तु उक्तरीत्या सुकरः असंभाव्यमानप्रमादः नियतफलकः अविलंबेन फलप्रदः ॥ अतः सत्यामपि ज्ञानयोगानुष्ठानशक्तौ यः सौकर्यासौकर्यप्रमादाप्रमादफलनैयत्यानैयत्यशैघ्र्याशैघ्र्यपर्यालोचनेन अकृत्वा ज्ञानयोगनिष्ठाप्रवृत्तिं कर्मयोग एव प्रवर्तते सः ज्ञानयोगनिष्ठाप्रवृत्तादपि उक्तहेतुभिर्वरिष्ठो भवति ॥ अतो ज्ञानयोगनिष्ठाशक्तेन तदशक्तेन वा त्वया कर्मयोग एव प्रवर्तितव्यमिति मया त्वं तत्रैव नियोजित इति 'ज्यायसी चेत्कर्मण' इत्यादेः सम्यगुत्तरं दत्तमित्यवधेहि ॥ ६ ॥ ७ ॥

द्वै ॥ अ ॥ अर्जुनः ॥ अस्त्वेवमखिलं ततः किं प्रकृते ॥ ब्रूहि ॥

कृष्णः ॥ नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ॥
शरीरयात्राऽपि च ते न प्रसिध्येदकर्मणः ॥ ८ ॥

नियतमिति ॥ त्वं नियतं विहितं कर्म कुरु ॥ कर्मणोऽभावः अकर्म कर्माकरणं तस्मात् कर्म विहितं कर्म कर्म करणं वा ज्यायः श्रेष्ठं ॥ हि प्रसिद्धं ॥ हि यस्मात् तस्मात् इति वा ॥ अकर्मणः कर्माकरणात् ते तव शरीरस्य यात्रा रक्षणं साऽपि न प्र प्रकर्षेण सिध्येत् ॥ न विद्यन्ते कर्माणि यस्य सः अकर्मा तस्य अकर्मणः तादृशस्य तव इति वा ॥ न कर्म अकर्म ज्ञानं तस्मात् अकर्मणः ज्ञानयोगात् कर्म ज्यायः इति वा ॥ ८ ॥

मोक्षहेतुज्ञानसाधनभूतायाः चित्तशुद्धेः कर्मयोगैकसाध्यत्वात् त्वं कर्म कुरु ॥ करोमि कर्मयोगं युद्धं केवलं मास्तु इति चेत् नियतं वर्णाश्रमानुरोधेन विहितं यत् तदेव नियतं नियमेन कर्तव्यम् ॥ वक्ष्यते च ॥ १'श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात् ॥ स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥' इति ॥ २'श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात् ॥ स्वभावनियतं कर्म कुर्वन्नाऽऽप्नोति किल्बिषं ॥' इति च ॥ विहितं तु तव क्षत्रियस्याऽऽधिकारिकस्य युद्धमेव ॥ कर्मकरणाभ्युपगमे युद्धमेव शिरसि मे निपतति ॥ अतः कर्मैव मास्त्विति चेत् अकर्मणः कर्मणोऽकरणात् कर्म उत्करीत्या ज्यायः श्रेष्ठम् ॥ उक्तं हि मया ॥ 'न च संन्यसनादेव सिद्धिं समधिगच्छति ॥' इति ॥ अस्तु यद्वा तद्वा यथा तथा वा ॥ नांगीकुर्यामहं युद्धमिति चेत् अकर्मणः हिंसात्मकं कर्मेदमिति युद्धरूपं कर्म अकुर्वतस्तव शरीररक्षणमपि न प्र प्रकर्षेण स्वधर्मवृत्त्या सिध्येत् ॥ कर्माकरणात् न केवलमन्तःकरणशुद्धयलाभमात्रम् ॥ किंतु शरीरयात्रानिर्वाहासिद्धिरपि ॥ अनेनापि हेतुना कर्म कर्तव्यम् ॥ शरीरयात्रायाः धनार्जनतण्डुललवणाद्याहरणपाकभोजनादिव्यापारमात्रसाध्यत्वेन तदर्थं कुतो युद्धमनुष्ठेयमिति चेत् हिंसातो बिभ्यत्त्वं यदि युद्धं तित्यक्षसि तर्हि सर्वाण्यपि शरीरयात्रानिर्वाहार्थानि कर्माणि त्वया त्यक्तव्यानि ॥ सर्वेषामपि यया कयाऽपि विधया दुष्टत्वात् ॥ ततश्च तव शरीरयात्रानिर्वाहो न सिध्येत् ॥ स-

---

१. ३. ३५. २. १८. ४७.

वेषां दुष्टत्वसाम्येऽपि मदिष्टैरकष्टैरन्यैरेव शरीरयात्रानिर्वाहो भविष्यति ॥ किमनिष्टेन कष्टेन युद्धेन इति चेत् शरीरस्य जडत्वनाशिष्णुत्वादिदोषदुष्टत्वेऽपि 'शरीरमाद्यं खलु धर्मसाधन'मित्याद्युक्तविधया ऐहिकामुष्मिकसर्वश्रेयःसाधनधर्मानुष्ठानसाधनत्वादात्मरक्षणहेतुत्वेन तद्रक्षणार्थानां कर्मणां करणमङ्गीकुर्वता त्वया शरीरनाशेऽप्यविनश्यतश्चेतनस्याऽऽत्मनो रक्षणार्थानां वर्णाश्रमोचितविहितकर्मणां करणमवश्यमभ्युपगन्तव्यमेव ॥ हिंसादोषदुष्टमन्तरेण युद्धमन्यान्यभ्युपगच्छामीति चेत् युद्धस्येव सर्वेषामपि विहितकर्मणां दुष्टत्वात् ॥ वक्ष्यते च ॥ १ 'सर्वाऽऽरम्भा हि दोषेण धूमेनाग्निरिवाऽऽवृताः ॥' इति ॥ सर्वेषामपि दुष्टत्वेन युद्धादनिष्टादिष्टमन्यदेव किमप्यस्तु इति चेत् दुष्टत्वेऽपि स्वभावनियतत्वरूपविशेषसत्त्वेन स्वस्य यद्धितं तदेव कर्तव्यम् ॥ तत्करणस्याऽऽवश्यकत्वात् ॥ तस्यात्याज्यत्वात् ॥ तत्करणे प्रत्यवायाभावाच्च ॥ वक्ष्यते च ॥ २ 'स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः ॥' ३ 'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥' ४ 'स्वभावनियतं कर्म कुर्वन्नाऽऽप्नोति किल्बिषम् ॥' ५ 'सहजं कर्म कौन्तेय सदोषमपि न त्यजेत् ॥' इत्यादि ॥ अतो यद्धितं युद्धं तदेवावश्यं कुरु ॥

'कर्मणा बध्यते जन्तु'रित्यादित्यागशास्त्रेण कर्मणां बन्धकत्वावगमादकरणमेव तेषां वरं करणात् ॥ सति चैवं कथमुच्यते 'कर्म ज्यायो ह्यकर्मणः ॥' इति ॥ इति चेत् त्यागशास्त्रगतकर्मशब्दस्य असंकुचितवृत्तित्वमभ्युपेत्य कर्मसामान्यत्यागे तव शरीरयात्राऽपि न सिध्येत् ॥ असंकुचितवृत्तित्वे 'न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृ'दिति कर्मसामान्यस्य त्यक्तुमशक्यत्वमेकं बाधकमुक्तम् ॥ शरीरयात्राऽसिद्धिरूपमपरं बाधकमनेनोच्यते ॥ एवं बाधकद्वयसद्भावात् संकुचितवृत्तित्वमभ्युपेत्य त्यागशास्त्रस्य गतिर्वाच्या ॥ गतिस्त्वनुपदं वक्ष्यते ॥ ८ ॥

अ ॥ हे अर्जुन त्वं ६ नियतं विहितं कर्म युद्धादिकं कुरु ॥ अकर्मणः कर्म करणं अकर्म अकरणं अननुष्ठानात् कर्म करणं कर्मानुष्ठानं ज्यायः श्रेष्ठं ॥ अतः कुरु ॥ अकर्मणः कर्माकरणात् कर्म विहितमकाम्यं कर्म श्रेष्ठं ॥ न विद्यते कर्म येन यस्मिन्वा सः अकर्मा कर्मसंन्यासः तस्मात् अन्तःकरणाशुद्धिमदविद्वत्कर्तृकात् कर्म श्रेष्ठं ॥ अतः कर्म कुरु ॥ इति वा ॥ कुतः अकर्मणः कर्म ज्यायः इति चेत् अकर्मणः

---

१. १८. ४८. २. १८. ४५. ३. १८. ४६. ४. १८. ४७. ५. १८. ४८. ६. नियमेन इति वा॥

पंचमी कर्माकरणात् तव शरीररक्षणमपि च न प्रसिध्येत् न जायेत ॥ करचरणादि-चेष्टासाध्यगमनादानादिव्यापारकरणे हि शरीरमवतिष्ठेत ॥ नान्यथा ॥ अकरणात् शरीरयात्रैव न सिध्येत् किमुत प्रयोजनान्तरं ॥ अतः अकरणात्करणं ज्यायः ॥ अतः कुरु ॥ 'अकर्मणः पंचमी' कर्मसंन्यासात् तव शरीरयात्राऽपि न सिध्येत् ॥ अनात्मभूतशरीररक्षणार्थानां कर्मणां कर्तव्यत्वाभ्युपगमे जननमरणप्रवाहे पतित्वा मुहुर्मुहुः क्लिश्यत आत्मनः ज्ञानद्वारा संसारसागरादुद्धरणरूपस्य परित्राणस्य ततोऽप्यावश्यकतया तदर्थानां विहितानां युद्धादीनां कर्मणां कर्तव्यत्वं सुतराम-भ्युपगन्तव्यं त्वया ॥ वक्ष्यते च ॥ १ 'उद्धरेदात्मनाऽऽत्मानं नाऽऽत्मानमवसादयेत् ॥' इति ॥ अतः कर्मसंन्यासात् कर्मकरणं वरं ॥ अतः विहितं कर्म कुरु ॥ अकर्मा बहुव्रीहिः षष्ठी युद्धादिविहितकर्मरहितस्य तव शरीरयात्राऽपि न प्रकर्षेण सिध्येत् ॥ भैक्ष्याशनादिना कथञ्चित् सिध्येत् ॥ न तथा शरीररक्षणं प्रशस्तं क्षत्रियस्य तव ॥ अतो युद्धादिविहितकर्म तदकरणात् ज्यायः ॥ अतः अशुद्धान्तःकरणः त्वं विहितं अकाम्यं युद्धादिकं कर्म कुरु ॥ ८ ॥

वि ॥ अर्जुनः ॥ ज्ञानस्य कर्मापेक्षया ज्यायस्त्वात्तदेव मे वक्तुमुचितं सति चैवं अवरे कर्मणि कुतो मां नियोजयसीति मया पृष्टेन वस्तुतः कर्मणोऽवरत्वात्, तस्य ज्यायस्त्वात्त्वं तत्र मया नियोज्यसे इति वक्तुमपारयता भवता तस्य साक्षादु-त्तरमनभिधाय प्रकारान्तरेण किमपि किमपि अन्यदेवोच्यते ॥ साक्षादुत्तरं ब्रूहि ॥ किञ्च ज्ञानयोगाशक्तेन ज्ञानार्थं कर्म कर्तव्यमिति वक्तुं युक्तम् ॥ उक्तं च त्वयाऽपि तथैव ॥ २ 'न कर्मणामनारंभान्नैष्कर्म्यं पुरुषोऽश्नुते ॥' इत्यादि वदता ॥ उत्कृष्टे ज्ञानयोगे प्रवर्तितुं शक्तः कुतस्तस्मादवरे कर्मयोगे प्रवर्तेत ॥ अतः ज्ञानयोगशक्तत्वेन ज्ञानयोगे प्रवर्तमानादपि यः ज्ञानयोगशक्तोऽपि उक्तहेतुभिः कर्मयोग एव प्रवर्तते स विशिष्यत इति वचनं अनुचितम् ॥ अतो युक्तमुत्तरं ब्रूहि ॥

कृष्णः ॥ हे पार्थ ज्ञानयोगशक्तोऽपि त्वं कर्मैव कुरु ॥ कुतः सत्यामपि ज्ञान-योगकरणशक्तौ कर्मैव कुरु इत्युच्यते इति चेत् प्रकृतिसंसृष्टस्य तव कर्मैव हि नियतं अभ्यस्ततया व्याप्तं पूर्वाभ्यस्तसजातीये प्रवर्तनमिन्द्रियाणां सुकरमिति

---

१. ६. ५. २. ३. ४.

चोक्तम् ॥ पूर्वमनभ्यस्तात् पूर्वाभ्यस्तकर्मविजातीयात् अकर्मशब्दितात् ज्ञानयोगादपि पूर्वाभ्यस्तसजातीयं कर्म श्रेष्ठम् ॥ सुकरत्वात् अप्रमादत्वात् अन्तर्गताऽऽत्मयाथात्म्यज्ञानकत्वाच्च ॥ अतः ज्ञानयोगशक्तेनापि त्वया सुकरत्वादिगुणयुक्तं कर्मैव कर्तव्यं ॥ अवरत्वात्कर्मयोगस्य तत्र किं मां नियोजयसीति त्वं मामप्राक्षीः ॥ ज्यायस्त्वात्कर्मयोगस्य त्वं तत्र नियोज्यसे इत्युत्तरं दत्तमवधेहि ॥ दुष्करेऽपि ज्ञानयोगे महता प्रयत्नेन प्रवर्तेय न कुर्यां कर्मयोगं इति चेत् अकर्मणः युद्धादिस्वोचितविहितकर्मरहितस्य तव शरीरस्थितेर्न प्रसिध्येत् ॥ १ अतोऽपि कर्म कर्तव्यम् ॥ २ शरीरयात्राऽपि न सिध्येत् किं पुनः ऐहिकामुष्मिकसुखसाधनसाधनानि ॥ येनकेनापि लौकिकेन कर्मणा शरीरयात्रानिर्वाहः सिध्येदिति चेत् सिध्येदेव ॥ तत्तु शरीरधारणं न प्रशस्तम् ॥ किंतु युद्धादिस्वोचितविहितकर्मकरणात् न्यायार्जितेन द्रव्येण पंचमहायज्ञानिष्ठा तच्छिष्टाशनेन ज्ञानार्थिना शरीरधारणं कार्यं ॥ तदेव तस्य प्रशस्तम् ॥ यज्ञशिष्टाशनेन शरीरधारणस्य प्राशस्त्यं वक्ष्यते ॥ '३ यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः ॥' ४ 'यज्ञशिष्टामृतभुजो यान्ति ब्रह्मसनातनम् ॥' इति ॥ अन्यथा शरीरयात्रानिर्वाहे प्रत्यवायश्च वक्ष्यते ॥ ५ 'भुंजते ते त्वघं पापा ये पचन्त्यात्मकारणात्' ॥ इति ॥ ६ 'नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम' ॥ इति च ॥ मास्तु मे शरीरयात्रेति तु न वक्तुं शक्यम् ॥ ज्ञानार्थिनो ज्ञानयोगशक्तस्य ज्ञानसाधनसाधनाय शरीरधारणस्याऽऽवश्यकत्वात् ॥ शरीरमाद्यं खलु धर्मसाधनमिति हि वदन्ति ॥ ज्ञाननिष्ठेनापि शरीरयात्रानिर्वाहार्थमवश्यमनुष्ठेयत्वात् अन्तर्गताऽऽत्मयाथात्म्यज्ञानकत्वात् पूर्वाभ्यस्तकर्मसजातीयत्वात् सुकरत्वात् अप्रमादत्वाच्च कर्मणः ७ ज्ञानयोगनिष्ठायोग्योऽपि त्वं कर्मैव कुरु ॥ ज्ञानयोगशक्तेनापि कर्मैव कर्तव्यम् । किंपुनः ८ ज्ञानयोगाशक्तेन त्वया इत्युभयथाऽपि तव कर्मणि नियोजनमुचितम् ॥ अतो युद्धाख्यं कर्म कर्तव्यमेव त्वया ॥ मान्यथा मंस्थाः ॥ ८ ॥

द्वै॥ अर्जुनः॥ कर्मणा बध्यते जन्तुरित्यत्र कर्मपदेन कर्मसामान्यग्रहणे कर्मसामान्यस्य त्यक्तुमशक्यत्वमेकं बाधकमुक्तम् ॥ 'न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृ'-

१. अपिशब्दार्थः ॥ २. च शब्दार्थः ॥ ३. ३. १३. ४. ४-३१. ५. ३. १३. ६. ४. ३१. ७. ८. त्वंशब्दस्य उभयथाऽप्यभिप्रायः ॥

दित्यत्र ॥ 'शरीरयात्रानिर्वाहानुपपत्तिरूपमपरं बाधकमुक्तम् ॥ शरीरयात्रापि च ते न प्रसिध्येदकर्मणः ॥' इत्यत्र ॥ एवं बाधकद्वयसद्भावेन कर्मसामान्यनिषेधकत्वाभावे का गतिस्तस्य वचनस्य ॥ गतिस्त्वनुपदं वक्ष्यते इत्युक्तम् ॥ तां गतिं वद ॥

कृष्णः ॥ यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः ॥
तदर्थं कर्म कौन्तेय मुक्तसङ्गस्समाचर ॥ ९ ॥

यज्ञार्थादिति ॥ हे कौन्तेय पार्थ अयं लोकः जनः यज्ञः भगवान् विष्णुः तदाराधनं वा तस्मै इदं यज्ञार्थं तस्मात् यज्ञः अर्थः प्रयोजनं यस्य तत् यज्ञार्थं तस्मात् इति वा ॥ कर्मणः अन्यत्र अन्यस्मिन् कर्माणि विषये कर्म बन्धनं बन्धकं यस्य सः कर्मबन्धनः ॥ तस्मै इदं तदर्थं सः यज्ञः अर्थः प्रयोजनं यस्य तत् तदर्थं कर्म मुक्तः त्यक्तः संगः फलेच्छादिरूपः येन सः मुक्तसंगः सन् सं सम्यक् आचर कुरु ॥ ९ ॥

न कर्मसामान्यं बन्धकं 'कर्मणा बध्यते जन्तु'रिति सामान्यत उच्यत इति चेत् भगवदुद्देशेन कृतादकाम्यकर्मणोऽन्यस्मिन् कर्मणि विषये अयं कर्मकृत् जनः कर्मणा [१] बध्यते ॥ अवैष्णवं काम्यं च कर्म बन्धकम् ॥ यज्ञो नाम भगवान् ॥ [२]'यज्ञो वै विष्णुः' ॥ इति श्रुतिः ॥ हे पार्थ तस्य भगवतः प्रीत्यर्थं फलापेक्षारहितः कर्तव्यं कर्म सम्यगाचर ॥ यः यातः प्राप्तः ज्ञः सर्वज्ञः विष्णुर्येन स उद्देशो यज्ञः तस्मै इदं तदर्थं विष्णूद्देशार्थं तस्मात् अन्यत्र अन्योद्देशार्थे कर्मणि विषये लोकोऽयं कर्मबन्धनः ॥ तदर्थं विष्णूद्देशार्थं कर्म पार्थ सङ्गरहितः सम्यगनुतिष्ठेति वा ॥ एवं अवैष्णवकाम्यकर्मनिषेधकतया वचनस्य चारितार्थ्यात् न कर्मसामान्यनिषेधकं तद्वचनम् ॥ वंशशुद्ध्या कर्मणा ज्ञानयोगार्होऽसि ॥ अतो निःशङ्कं कर्तव्यं कर्म कुरु ॥ ९ ॥

अ ॥ अर्जुनः ॥ नियतं कर्म कुर्वित्युक्तम् ॥ कर्मणा बध्यते जन्तुः विद्यया च विमुच्यते ॥ तस्मात्कर्म न कुर्वन्ति मतयः पारदर्शिनः ॥ इति कर्मणो बंधकत्वमुक्तमभियुक्तैः ॥ तद्वचनविरुद्धे त्वद्वचने न मम श्रद्धोन्मिषति ॥ अविरोधेन ब्रूहि ॥

कृष्णः ॥ यज्ञशब्दितविष्णुप्रीत्यर्थं क्रियमाणात् यज्ञशब्दितो भगवानेव अर्थः योजनं यस्य तस्मात् भगवदेकप्रयोजनकात् तदन्यप्रयोजनरहितात् इति वा ॥

१. कर्म बन्धनं बन्धकं यस्य सः कर्मबन्धनः ॥ २. तै ब्रा. ३. १. ६.

अन्यकर्मैव बन्धकम् ॥ भगवदन्योद्देश्यकं भगवदुद्देश्यकमपि काम्यं कर्म बन्धकम् ॥ न कर्मसामान्यम् ॥ कर्मणेत्यादिवचनं तु भगवदन्योद्देश्यककाम्यकर्मनिषेधकम् ॥ अतो न विरोधः ॥ अतो यज्ञशब्दितभगवत्प्रीत्यर्थं कर्मफलकामनादिरहितस्सम्यगनुतिष्ठ ॥ ९ ॥

वि ॥ अर्जुनः ॥ न्यायार्जितेन द्रव्येण पञ्चमहायज्ञानिष्ठा तच्छिष्टेन शरीरधारणस्य कर्तव्यत्वात् न्यायेन धनार्जनार्थं युद्धादिकं कर्म कुर्वित्युक्तं ॥ द्रव्यार्जनादेः कर्मणः अहंकारममकारगर्भत्वेन बन्धनं खलु कर्मवासनया स्यात् ॥ अतः कथमुच्यते द्रव्यार्जनार्थं युद्धं कुर्विति ॥ वद ॥

कृष्णः ॥ यज्ञतदुपलक्षितशास्त्रीयकर्मशेषभूतात् द्रव्यार्जनादेः कर्मणोऽन्यत्र आत्मीयप्रयोजनशेषभूते द्रव्यार्जनादौ कर्मणि प्रवृत्तोऽयं जनः तेन कर्मणा बध्यते ॥ भगवद्भागवताऽऽराधनाय धनं संपादनीयमिति बुद्ध्या धनार्जनं न बन्धकम् ॥ कलत्रपुत्रमित्रादिभरणाय धनं संपादनीयमिति बुद्ध्या धनार्जनं तु [1]बन्धकम् ॥ अतः तादृशधनार्जनाय युद्धादिकं कुर्वित्युक्तं युक्तम् ॥ अतः हे पार्थ तदर्थं यज्ञादिशास्त्रीयकर्मकरणार्थं धनार्जनादिकं कर्म आत्मात्मीयप्रयोजनशेषताबुद्धिरूपसङ्गात् मुक्तः सन् सम्यक् निःशङ्कमाचर ॥ तस्य अबन्धकत्वात् ॥ द्रव्यार्जनेन यज्ञादिकं तेन च भगवदाराधनं तेन च अनादिकालप्रवृत्तायाः कर्मवासनायाः समूलमुच्छेदः ततो ज्ञानयोगनिष्ठा तया चाऽऽत्मावलोकनं इत्यात्मावलोकननिदानत्वाद्द्रव्यार्जनादेः तत्साधनभूते युद्धाख्ये कर्मणि तव नियोजनमुचितम् ॥ अतस्त्वं तदर्थं युद्धादिकं कर्म कुरु ॥ ९ ॥

अर्जुनः ॥ 'कर्मणा बध्यते जन्तु'रिति बाधकवचनस्य शरीररक्षणाद्यर्थान्यावैष्णवकाम्यकर्मनिषेधपरतया सार्थक्यमुक्त्वा भगवत्प्रीत्यर्थं कर्तव्यं कर्म कुर्विति मामन्वशास्त्वम् ॥ किं तवैव वचनात् कर्तव्यं कर्म उत यस्यकस्यचित् महतः प्रामाणिकस्य वचनादपि ॥ किं कर्मकरणविषये तादृशं प्रमाणमस्ति ॥ अस्ति चेत् ब्रूहि ॥

धृतराष्ट्रः

किमेवमर्जुनेन पृष्टो भगवानकरोत् ॥ किं सर्वज्ञेन भगवता मया उच्यमानेऽर्थे मूलप्रमाणमपेक्षते अनुचितमेतत् इतिचामंस्त ॥ वद ॥

१. कर्म बन्धनं बन्धकं यस्येति वा कर्मणा बन्धनं यस्येति वा कर्मबन्धनः ॥

सञ्जयः

पार्थेनैवमनुयुक्तोऽपि नाकुप्यत् भगवान् ॥ नापगतोऽस्य मोह एतावतोपदेशेन ॥ अत एव १'व्यामिश्रेणैव वाक्येन बुद्धिं मोहयसीव मे ॥' इत्याह ॥ न मन्यते मामीश्वरम् ॥ अस्तु का हानिः ॥ अपगते मोहसन्तमसे स्वयमेव विवेकबुद्धिः प्रकाशिष्यते ॥ किमस्य पुरतो ममेश्वरत्वख्यापनेन ॥ मूलप्रमाणोपन्यासेन विस्रंभमस्योत्पादयामीति मन्वानः प्रकृतकर्मयोगविषये करणाकरणस्तुतिनिन्दागर्भं २उपाख्यानमाह ॥

कृष्णः ॥ ३सहयज्ञाः प्रजास्सृष्ट्वा पुरोवाच प्रजापतिः ॥
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ॥ १० ॥
देवान् भावयतानेन ते देवा भावयन्तु वः ॥
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥ ११ ॥
इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः ॥
तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः ॥ १२ ॥
यज्ञशिष्टाशिनस्सन्तो मुच्यन्ते सर्वकिल्बिषैः ॥
भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात् ॥ १३ ॥

---

१. ३. २. २. अर्थवादः प्राशस्त्यवचनं ॥ स चतुर्विधः ॥ स्तुतिरूपः निन्दारूपः परकृतिरूपः पुराकल्परूपश्चेति ॥ स्तुतिनिन्दे प्रसिद्धे ॥ परकृतिरेककर्तृकोपाख्यानं ॥ यथा 'जनको ह वैदेह आसांचक्रे' इत्यादि ॥ बहुकर्तृकोपाख्यानं पुराकल्पः ॥ यथा 'त्रयो हो ह्रीथे कुशला बभूवुः ॥' इत्यादि ॥ अत्र 'एष वोऽस्त्विष्टकामधुक्' इति 'इष्टान् भोगान् दास्यन्ते' इति 'सर्वकिल्बिषैर्मुच्यन्ते' इति च स्तुतिः ॥ 'स्तेन एव सः' इति 'भुंजते ते त्वघं पापाः' इति च निन्दा ॥ 'पुरोवाच प्रजापतिः' इति परकृतिः ॥ 'देवाः भोगान् दास्यन्ते इति यज्ञशिष्टाशिनः सन्तो मुच्यंते' इति च पुराकल्पः ॥ पूर्वैः कृतमिति सामान्योक्तिः पुराकल्पः ॥ अनेनेदं कृतामिति नामनिर्देशपूर्वमुक्तिः परकृतिः ॥ इति केचित् ॥ दृष्टान्ततया परस्य कृतिः परकृतिः ॥ प्रमाणतया पूर्वाचार्याणां कल्पः कल्पना आज्ञा पुराकल्पः ॥ इति वादिराजस्वामिनः ॥ ३. द्वै ॥ अ ॥ 'सहयज्ञा' इति पाठः ॥ प्रजा इत्यस्य विशेषणं ॥ वि ॥ 'सह यज्ञै'रिति पाठः ॥ असंकुचितमुख्यवृत्त्या प्रजापतिरत्र नारायणः ॥

सहेति ॥ प्रजानां पतिः प्रजापतिः ब्रह्मा नारायणो वा पुरा पूर्वं यज्ञैः देवताऽऽराधनभूतैः स्वस्वकर्मभिः सह वर्तन्ते इति सहयज्ञाः प्रजाः सृष्ट्वा उवाच ॥ अनेन प्रसविष्यध्वं उत्पादयध्वं ॥ एषः यज्ञः वः युष्माकं इष्टाश्च ते कामाश्च इष्टकामाः तान् दोग्धीति इष्टकामधुक् अस्तु ॥ अनेन देवान् भावयत आराधयत ॥ ते देवाः वः युष्मान् भावयन्तु रक्षन्तु ॥ परस्परं भावयन्तः प्रीणयन्तः सन्तः परं श्रेयः अवाप्स्यथ ॥ यज्ञैः भाविताः आराधिताः यज्ञभाविताः देवाः वः युष्मभ्यं इष्टान् भोगान् दास्यन्ते ॥ तैः दत्तान् एभ्यः देवेभ्यः अप्रदाय अदत्वा यः भुङ्क्ते सः स्तेनः चोर एव ॥ हि प्रसिद्धम् ॥ यज्ञेभ्यः शिष्टं यज्ञशिष्टं यज्ञशिष्टं अश्नन्तीति यज्ञशिष्टाशिनः सन्तः सर्वाणि च तानि किल्बिषाणि च सर्वकिल्बिषाणि तैः मुच्यन्ते ॥ ये आत्मनः कारणं आत्मकारणं तस्मात् पचन्ति पाकं कुर्वन्ति कारयन्ति च पापं एषां अस्तीति पापाः पापिनः ते अघं पापं तु पापमेव भुञ्जते ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥

पार्थ न केवलं ममैव वचनात्कर्मणः कर्तव्यत्वं किंतु महतः प्रामाणिकस्य वचनादपि ॥ स च महान् न यः कोऽपि ॥ किंतु प्रजापतिशब्दितः वेधाः वासुदेवो वा ॥ सः कदा कं प्रति किमुवाचेति चेत् प्रजापतिः सृष्ट्यादिकाले प्रजाः सृष्ट्वा तत्क्षेमाय तत्तदनुष्ठेयानि विहितकर्माणि च सृष्ट्वा ताश्च रक्ष्यरक्षककक्ष्याभेदेन द्वेधा स्थापयित्वा उवाच ॥ किमुवाचेति चेत् हे रक्ष्याः रक्षकाश्च शृणुतेमां मदीयां वाचं ॥ सृष्टानां युष्माकं क्षेमाय यज्ञशब्दितो विहितो धर्मः प्रकल्प्य दत्तोऽस्ति ॥ अनेन यज्ञेन यूयं प्रसविष्यध्वं इष्टमुत्पादयध्वं ॥ उत्पन्नं च तदभिवर्धयध्वं ॥ प्रसवः उत्पत्तिः अभिवृद्धिश्च ॥ उत्पादने अभिवर्धने च वयं न प्रभवामः इति चेत् वयमनुगृह्णीमः ॥ एषः यज्ञः युष्माकं अभीष्टविषयप्रदो भूयात् ॥ सकामानां स्वर्गपशुपुत्रादिकामितविषयलाभाय निष्कामानां ज्ञानप्रतिबन्धकदुरितक्षयाय च भूयात् ॥ [1]मोक्षरूपकामस्य तदनुगुणानां

१. 'अपि त्रैलोक्यराज्यस्य हेतोः किन्नु महीकृते' (१. ३५.) 'अवाप्य भूमावसपत्नमृद्धं राज्यं सुराणामपि चाधिपत्यम् ॥' (२. ८.) इत्यादिना स्वर्गादिकं तृणाय मन्यमानमर्जुनं प्रति स्वर्गादेः फलत्वप्रतिपादनानौचित्यात् परं श्रेय इति विशेष्यविवरणाच्च मोक्ष एव विवक्षितः ॥

च कामानां प्रपूरको भवतु इति वा ॥ यो विहितं कर्मानुतिष्ठति तं तदिष्टकामदोहनेन पुष्णातु इत्यहमनुगृह्णामि ॥ कथमचेतनोऽयं यज्ञः इष्टान् कामान् दुह्यात् ॥ क्षणिकक्रियारूपो यज्ञशब्दित आवश्यको धर्मः कथं कालान्तरभावि फलं साधयेत् ॥ १ 'नान्यः पन्था अयनाय विद्यते' इति ज्ञानेतरस्य मोक्षसाधनत्वनिषेधात् कथं मोक्षप्रदोऽस्तु इत्युच्यते इति चेत् एवं ॥ हे रक्ष्याः प्रजाः यूयं अनेन तत्तद्देवतोद्देश्यकविहितकर्मरूपेण यज्ञेन तांस्तान् देवान् मच्छरीरभूतान् मत्परिवारभूतान् मदात्मकान् भावयत तर्पयत हविर्दानेन वर्धयत सन्तुष्टान् कुरुत ॥ संतुष्टाश्च ते देवाः वः भावयन्तु वृष्ट्याद्युत्पादनेन वर्धयन्तु ॥ विधौ लोट् ॥ एवं यूयं देवाश्च परस्परं भावयन्तः उपकारेण तोषयन्तः परमं श्रेयः प्राप्स्यथ ॥ स्वस्वविहितकर्मकरणसन्तुष्टदेवताप्रसादेन ज्ञानद्वारा मोक्षं रक्ष्याः, भगवदाज्ञया स्वरक्ष्यरक्षणरूपविहितकर्मकरणसन्तुष्टभगवत्प्रसादेन मोक्षं रक्षका देवाश्च प्राप्नुवन्तु इत्याशयेनैव भवन्तो मया सहयज्ञाः सृष्टाः ॥ परं श्रेयः ज्ञानद्वारा मोक्षं २ स्वर्गं वा इति वा ॥ परं उत्कृष्टं श्रेयः अभीष्टं अर्थं इति वा ॥ परं उत्कृष्टं श्रेयः देवाः तृप्तिं प्राप्स्यन्ति यूयं च स्वर्गं प्राप्स्यथ इति वा ॥ अचेतनोऽपि क्षणिकक्रियारूपोऽपि ज्ञानान्योऽपि यज्ञः स्वानुष्ठानजनितदेवताप्रसादजन्यभगवत्प्रसादरूपापूर्वद्वारा कालान्तरभाविनो मोक्षरूपेष्टस्य साधको भवितुमर्हति ॥ अत उक्तं 'इष्टकामधुगस्तु' इति ॥ देवताराधनेन भगवानाराधितो मोक्षं ददाति ॥ वक्ष्यते चेदम् ॥ ३ 'यो यो यां यां तनुं भक्तः' इत्यादिना, ४ 'अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च ॥' इति च वक्ष्यते ॥ अत्र, प्रजापतिरिति यज्ञैः सह सृष्ट्वा अनेन प्रसविष्यध्वं इत्युवाच इति चोक्तया भगवता प्रजानां क्रियमाणः कश्चन परमोपकारः प्रतीयते स क इति चेत् प्रलये पिपीलिकादयः ब्रह्मान्ताः प्राणिनः उपसंहृत्य भगवता स्वोदरे निवेश्यन्ते ॥ ते च आप्रलयावसानं भगवदुदरे सविकासमासते ॥ तदानीं च ते उपसंहृतनामरूपविभागाः अनादिकालप्रवृत्ताचित्संसर्गविवशाः करणकलेबराद्यभावेन पुरुषार्थसाधनानर्हाः अचेतनकल्पाश्च वर्तन्ते ॥ चिराय शेरते त इमे मय्यचेतनकल्पाः पुरुषार्थसाधनानर्हाः करणकलेबरदानेन पुरुषार्थ-

१. तै० आ. ३. १२. २. परस्परमित्यस्य भावयन्त इत्यनेनैवान्वयः ॥ न तु श्रेयः प्राप्स्यथेत्यनेनापि ॥ देवानामुपदेशाविषयत्वात् ॥ इति भावः ॥ ३. ७. २१. ४. ९. २४.

साधनार्हाः कर्तव्या एवं रूपा मनोवृत्तिः भगवन्तं सृष्टावुन्मुखीकरोति । तदानीं परमया कृपया कृतज्ञतया प्रीत्या भगवतो भवति ॥ ततः स्वाराधनरूपयज्ञशब्दितपुरुषार्थसाधनोन्मुखीः स्वाः प्रजाः यथापूर्वं सृजति यथायथम् ॥ उपसंहृताः प्रजाः सृजति कल्पादौ इत्युक्तत्वे दयालुश्चेत्किमर्थं प्रजा उपसंहृत्य स्वस्मिन्प्रलीनाः शयत् ॥ इति चेत् । विविधविचित्रसांसारिकसुखदुःखसततोपभोगजनितपरिश्रमविश्रमाय अपथानुवर्तनप्रवृत्तिवासनाविच्छेदाय च प्रजा उपसंहृत्य शाययित्वा रक्षति ॥ यथा क्रीडापरिश्रान्तं हठादकर्तव्यकरणे प्रवर्तमानं च बालं वीक्ष्य दयमाना जननी तत्परिश्रमविश्रमाय अपथप्रवृत्तिविच्छेदाय च बलादेनं शाययित्वा डोलायां उपविश्य च निकटं रक्षति तद्वत् ॥ 'य एष सुप्तेषु जागर्ति' इति श्रुतिः ॥ यथा च चिराय शयालुमेनं बालं बलादुत्थाप्य पुनः स्तन्यदानेन प्रतर्प्य दत्वा क्रीडनकानि क्रीडाजनितसुखानुभवे प्रवर्तयति ॥ तद्वत् स्वस्मिन् प्रलीनाः प्रजाः पुनः सृष्ट्वा पुरुषार्थसाधनोन्मुखान् करोतीत्यहो महनीया दया दयालोरीश्वरस्य ॥ एवं पुरा प्रजास्सृष्ट्वा विहितधर्मानुष्ठानेन श्रेयः परमवाप्स्यथेति भगवानुवाच ॥ तदिदमुच्यते मया ॥ किमर्थं यज्ञशब्दितेन विहितकर्मणा देवतानां तृप्तिरुत्पादनीया इति चेत् देवाः रक्ष्याभ्यः प्रजाभ्यः वृष्ट्यादिद्वारा अन्नादिकं प्रयच्छन्ति ॥ किमर्थमिति चेत् स्वरक्ष्याणां जीवनाय स्वोपभोगाय रक्ष्यरक्षणजनितमहाश्रेयोलाभाय च, रक्ष्या एतावन्त इमे रक्षकानस्मान् कृतज्ञतया भयेन च अस्मद्दत्तान्नाद्येकदेशदानेनाराधयन्ति ॥ महती किल प्रभुता अस्माकं॥ रक्ष्यान् रक्षामः तैराराध्यामहे च इति मनस्तुष्ट्यनुभवाय च देवाः प्रजाभ्योऽन्नादिकं प्रयच्छन्ति ॥ अनेनाभिप्रायेण देवैर्दत्तान्

१. अत्र रामानुजभाष्यं ॥ स भगवान् अनादिकालप्रवृत्तचित्संसर्गविवशाः उपसंहृतनामरूपविभागाः स्वस्मिन प्रलीनाः सकलपुरुषार्थानर्हाः चेतनेतरकल्पाः प्रजाः समीक्ष्य परमकारुणिकः तदुज्जिजीवयिषया स्वाराधनभूतयज्ञनिर्वृत्तये यज्ञैः सह ताः सृष्ट्वा एवमुवाच ॥ तात्पर्यचन्द्रिका ॥ अनवरतसुखदुःखोपभोगायासपरिश्रान्तानां विश्रमार्थं अश्रान्तापथप्रवृत्तिवासनाविच्छेदार्थं चोपसंहारः ॥ अतो न संहारे नैर्घृण्यदोषः ॥ तादृशसुखदुःखोपभोगप्रदाने च परमात्मनित्यसंकल्पसिद्धजीवस्वातंत्र्यनिबन्धनानादिकर्मप्रवाहहेतुकाचित्संसर्ग एव हेतुरिति न तत्र वैषम्यनैर्घृण्ये ॥ अत्र, 'आसृष्टि सन्ततानां अपराधानां निरोधिनीं जगतः ॥ पद्मासहायकरुणे प्रतिसंचरकेलिमाचरसि ॥' 'अचिदविशिष्टान् प्रलये जन्तूनवलोक्य जातनिर्वेदा ॥ करणकलेबरयोगं वितरसि वृषशैलनाथकुरुणे त्वं ॥' इति दयाशतकश्लोकौ अनुसन्धेयौ ॥ २. का. ५. ८.

अन्नादीन् एभ्यः देवेभ्यः यथाविहितं भागं भक्तिपूर्वकमदत्वा यः स्वयमेव भुङ्क्ते सः स्तेन एव ॥ धनापहारी चोर इव दण्ड्यो भवति ॥ निरयगामी भवतीति यावत् ॥ दत्तानित्यस्य भुङ्क्ते इत्यनेनैवान्वयः ॥ न तु अप्रदायेत्यत्रापि ॥ दत्तस्य सर्वस्य दानाननुशासनात् ॥ राजानः प्रजाभ्यः स्वीयं क्षेत्रगृहाऽऽरामादिकं ददति॥ क्षेत्रगृहाऽऽरामादिकं सर्वं राजकीयमिति तावदविवादम् ॥ अन्यथा क्षेत्रादिकं स्वीयतया अनुभवन्तो राजभ्यः किमपि न दद्युः ॥ ददति च स्वानुभवाय राजकीयं तैः कल्पितं भागं तेभ्यः॥ यदि राजभ्यो देयं भागं न ददति तर्हि राजानः क्षेत्रादिकमपहरन्ति॥ राजानः क्षेत्रादिकं दत्वा स्वीयताज्ञापनाय किंचित् किंचिदेव तेभ्यस्तेभ्यो जिघृक्षन्ति॥ पूर्णकामत्वात् ॥ तैस्तैः किंचिन्किंचिद्दीयमानं मिलितमपरिमितमपि भवति ॥ विदितमेवेदं लोके ॥ तद्वत् देवैर्दत्तमदत्त्वैव तेभ्यः किमपि ये भुञ्जते ते देवस्वापहर्तारो राजस्वापहर्तार इव चोरा दण्ड्या भवन्ति ॥ अपहरन्ति च तेषां स्वमखिलं देवाः ॥ ये परेषां द्रव्यमपहरन्ति गूढं प्रसह्य वा ते किल चोराः कथमेषां चोरता इति चेत् १ अन्यदीये तत्प्रयोजनायैव परिकल्पिते वस्तुनि स्वकीयतावुद्धिं कृत्वा तेन स्वाऽऽत्मपोषणमिह चौर्यम् ॥ यदि स्वदत्तैः स्वानाराधयद्भ्यो देवा उत्तरोत्तरमधिकं प्रयच्छन्ति तर्हि उत्तरोत्तरमधिकं तेभ्यो दातुं शक्यम् ॥ अन्यथा मित एव तदत्तं किञ्चित्तेभ्यः किञ्चित् स्वेषां इति विभजने अपर्याप्तिः खलु स्यात् इति चेत् यदि तदत्तेन तानाराधयथ तर्हि युष्मभ्यं युष्माभिः पूर्वपूर्वैर्यज्ञैराराधितास्ते उत्तरोत्तरयज्ञापेक्षितान् कलत्रपुत्रमित्रपश्वन्नादीन् सुखसाधनभूतान् पदार्थान् दास्यन्ते ॥ पूर्वस्मादधिकं दत्वा तेभ्योऽधिकं ग्रहीतुमेव दास्यन्ति ॥ अत एवमुपकारशीलेभ्यो महोदारेभ्यो देवेभ्योऽदत्वा स्वयं भुञ्जानः कृतघ्नो निरयभागेव भवति ॥ अतो देवान् भावयतानेन ॥ देवताप्रसादादिष्टान् कामानेष दोग्धु इत्युवाच ॥ किं देवताऽऽराधनं यदा कदा वा कार्यं उत प्रतिदिनं इति चेत् प्रत्यहं कार्यम् ॥ ये देवयज्ञपितृयज्ञभूतयज्ञमनुष्ययज्ञब्रह्मयज्ञशब्दितान् पञ्च महायज्ञानिष्ट्वा तैर्देवानाराध्य वैश्वदेवातिथिसन्तर्पणादिरूपयज्ञशिष्टममृताख्यमश्नन्ति ते साधवः सर्वैः पापैर्मुच्यन्ते ॥ यज्ञशिष्टाशित्वेन वर्तमाना इति वा यज्ञशिष्टाशिनो भूत्वा इति वा सन्त इत्यस्यार्थः ॥ कानि तानि किल्बिषाणीति चेत् 'खण्डनी पेषणी चुल्ली उदकुम्भी च मार्जनी ॥ पंच सूना गृहस्थस्य ताभिः स्वर्गं न विन्दति ॥' 'पंचसूना गृहस्थस्य

१. वि.

पंचयज्ञैर्व्यपोहती'त्युक्तपंचहिंसाकृतानि पापानि तैर्मुच्यन्ते ॥ अत एव वैश्वदेवसंकल्पे पंचसूनादोषप्रायश्चित्तार्थं वैश्वदेवाख्यं कर्म करिष्ये इति वदन्ति ॥ न केवलं तैरेव मुच्यन्ते ॥ किन्तु अनेकजन्मोपार्जितैः भगवत्प्राप्त्युपायविरोधिभिः सर्वैः पापैः विरोधित्वेन पापतुल्यैः अल्पफलप्रदैः सांसारिकपुण्यैश्च मुच्यन्ते ॥ विहिताकरणनिमित्तैश्च पापैर्मुच्यन्ते ॥ यद्येवं न कुर्वन्ति तर्हि विहिताकरणेन पापिनः खलु स्युस्ते ॥ अत एव सर्वशब्दो बहुवचनं च ॥ ये एवं न कुर्वन्ति न ते पापैर्मुच्यन्ते ॥ न केवलमेतावदेव ॥ किन्तु ये आत्माऽऽत्मीयभोजनार्थमेव पाकं कुर्वन्ति कारयन्ति च न तु वैश्वदेवाद्यर्थं भुंजते च यज्ञाननिष्ठा ॥ ते पापिनः पापैरमुक्ताः अघमेव भुंजते ॥ पापहेतुमेव भुंजते ॥ भुज्यमानं तदन्तर्गत्वा पापमेवोत्पादयति ॥ तद्दृष्ट्याऽन्नमपि देवदृष्ट्या पापमेव तत् ॥ यथा दुष्टदृष्टिदृष्ट्या रजतमपि अन्यदृष्ट्या शुक्तिकाशकलं तद्वत् ॥ पापहेतुकं नरकमेव भुंजते ॥ पापहेतुकं अमेध्यमेव ते भुंजते ॥ तद्भोजनममेध्यभोजनतुल्यं ॥ अयज्ञशिष्टममेध्यतुल्यमिति सूचनायैव हि १'उच्छिष्टमपि चाऽमेध्यं भोजनं तामसप्रिय'मिति वक्ष्यमाणं अमेध्यशब्दप्रयोगः ॥ इति वा ॥ अत एवं प्रत्यहं कार्यम् ॥ श्रुतिरप्येतमर्थमाह ॥ २'मोघमन्नं विन्दते अप्रचेताः ॥ सत्यं ब्रवीमि वध इत् स तस्य ॥ नार्यमणं पुष्यति नो सखायम् ॥ केवलाघो भवति केवलादी ॥' इति ॥ अतः कर्तव्यं कर्म कृत्वा तेन द्रव्यं सञ्चित्य तेन ३ पञ्चमहायज्ञानिष्ठा तैर्देवानाराध्य तदाराधनशिष्टेन शरीरं रक्षन्तः सर्वपापविनिर्मुक्ताः परं श्रेयोऽवाप्स्यथ इति पुरा प्रजापतिः प्रजा उवाच॥ तदेवोच्यते मया॥ 'तदर्थं कर्म कौन्तेय मुक्तसङ्गस्समाचरे'ति ॥ अतो निर्विशङ्कं श्रद्धयाऽनुतिष्ठानुष्ठेयं युद्धादिकम्॥ ४'कर्मण्येवाधिकारस्ते मा फलेष्वि'त्युपक्रमात् अकाम्यकर्मोपदेशोऽयं ॥ कर्मप्रशंसा चेयं काम्यकर्मप्रशंसारूपा ॥ 'इष्टकामधुक्' इति, 'श्रेयः परमवाप्स्यथ' इति, 'इष्टान् भोगान् दास्यन्ते' इति च काम्यफलश्रवणात् ॥ अतः कथमियं अत्र संगच्छते इति चेत् अकाम्यकर्मोपदेशप्रकरणाऽसङ्गताऽपीयं काम्यकर्मप्रशंसा सामान्यतोऽक-

---

१. १७. १०. २. तै. ब्रा. २. ८. ८. ३. पंच महायज्ञाः तत्प्रकाराश्च तैत्तिरीयारण्यके 'पंच वा एते महायज्ञाः सतति प्रतायन्ते सतति संतिष्ठन्ते देवयज्ञः पितृयज्ञो भूतयज्ञो मनुष्ययज्ञो ब्रह्मयज्ञ इति यदग्नौ जुहोत्यपि समिधं तद्देवयज्ञः सन्तिष्ठते यत्पितृभ्यः स्वधा करोत्यप्यस्तत्पितृयज्ञः संतिष्ठते यद्भूतेभ्यो बलिꣳहरति तद्भूतयज्ञः संतिष्ठते यद्ब्राह्मणेभ्योऽन्नं ददाति तन्मनुष्ययज्ञः संतिष्ठते यत्स्वाध्यायमधीयीतैकामप्यृचं यजुस्साम वा तद्ब्रह्मयज्ञः संतिष्ठते' इत्युक्ताः ज्ञातव्याः ॥ ४. २. ४७.

रणात् करणं श्रेय इत्यर्थे पर्यवस्यतीत्येतावता प्रकृते सङ्गमिता इति वा ॥ अकाम्यकर्मप्रशंसैवेयं तदुपदेशप्रकरणस्थत्वात् ॥ फलोक्तिः कथं सङ्गच्छत इति चेत् वस्तुतोऽकाम्यकर्मणामपि प्रधानफलेतरस्य फलस्य विद्यमानत्वात् ॥ तथा चेदकाम्यकर्मत्वं हीयेतेति चेत् न फलराहित्यमकाम्यकर्मणो विवक्षितम् ॥ किन्तु फलापेक्षाराहित्यमेव ॥ उपपादितमेतदधस्ताद्विस्तरशः ॥ अतो न विरोध इति वा, मोक्षतदनुगुणज्ञानभक्तिवैराग्यादीनामेव फलत्वेनेह विवक्षणात् शङ्काया एव नावकाश इति वाऽवधेयम् ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥

धृतराष्ट्रः ॥

एवं भगवतोक्तं उपाख्यानं श्रुतवानर्जुनः कथममंस्त ॥ किमवादीत् ॥ किं वाऽकार्षीत् ॥ वद मे संजय ॥

संजयः ॥

भगवतोक्तमुपाख्यानमिदं श्रुत्वा, १'कथं भीष्म'मित्याद्युक्तरीत्या युद्धकर्मविमुखोऽहं ॥ उपाख्यानं चेदं, तदेव नियतं कर्म मम गले बध्नाति ॥ किं करणीयं ॥ भवतु एवं ब्रवीमि इत्यालोच्य, २'न कांक्षे विजयं कृष्ण' ३'अपि त्रैलोक्यराज्यस्य हेतोः' ४'अवाप्य भूमावसपत्नमृद्धं राज्यं सुराणामपिचाऽधिपत्यं ॥' इत्याद्युक्तरीत्या आब्रह्मलोकाधिपत्यं फलानामुपेक्षणात् अपेक्षितस्य मोक्षस्य ज्ञानेन तस्य च विचारेण लाभसंभवात् न मे देवताप्रसादेन कृत्यं ॥ अतो नानुतिष्ठेयमहमनिष्टं युद्धादिकं कर्म ॥ इति वदति पार्थे नेदानीमनेन कलहायितुं युक्तं किन्तु प्रकारान्तरेण कर्मणि प्रवर्तयितुं प्रयतेय ॥ इत्यालोच्य माऽस्तु उक्तरीत्या देवताप्रसादसंपादनाय कर्मयोगः ॥ किन्तु जगच्चक्रप्रवर्तनाय कर्मयोगः करणीयः इति सचमत्कारमुक्त्वा किंतज्जगच्चक्रमिति तेन पृष्टो भगवान् जगच्चक्रमाह ॥

कृष्णः ॥ अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसंभवः ॥
यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥ १४ ॥

कर्म ब्रह्मोद्भवं विद्धि ब्रह्माऽक्षरसमुद्भवं ॥
तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितं ॥ १५ ॥

---

१. २. ३. २. १. ३२. ३. १. ३५. ४. २. ८.

अन्नादिति ॥ भूतानि अन्नात् भवन्ति जायन्ते वर्धन्ते च ॥ अन्नस्य संभवः उत्पत्तिः अन्नसंभवः पर्जन्यात् वृष्टेः सकाशात् भवति ॥ पर्जन्यः वृष्टिः यज्ञात् भवति ॥ यज्ञः कर्मभ्यः ऋत्विग्यजमानादीनां व्यापारेभ्यः समुद्भवः उत्पत्तिः यस्य सः कर्मसमुद्भवः ॥ कर्म, ब्रह्म परमात्मा उद्भवत्यस्मादिति उद्भवः कारणं यस्य तत् ब्रह्मोद्भवं विद्धि जानीहि ॥ ब्रह्म परमात्मा अक्षरात् नाशरहितात् वेदात् समुद्भवः अभिव्यक्तिः यस्य तत् अक्षरसमुद्भवं ॥ तस्मात् यज्ञस्य सर्वमूलत्वात् सर्वगतं ब्रह्म सर्वव्यापी परमात्मा नित्यं सदा यज्ञे प्रतिष्ठितं ॥ यज्ञादेव स्थितिं लभते ॥ कर्म ब्रह्मशब्दितवेदसमुद्भवं विद्धि ॥ ब्रह्म वेदः अक्षरशब्दितपरमात्मसमुद्भवं परमात्मनः सकाशादभिव्यक्तं ॥ तस्मात् परब्रह्माभिव्यक्तत्वेन परमप्रमाणत्वात् सर्वगतं ब्रह्म सर्वार्थप्रकाशको वेदः नित्यं यज्ञे प्रतिष्ठितं तात्पर्येणावस्थितं ॥ यज्ञः द्रव्यार्जनादिरूपकर्मसमुद्भवः ॥ द्रव्यार्जनादिरूपं कर्म ब्रह्मशब्दितप्रकृतिपरिणामशरीरोद्भवं जानीहि ॥ ब्रह्मशब्दितं शरीरं अक्षरेण अन्तःस्थितेन प्रत्यगात्मना समुद्भवः कर्मसाधनतारूपेण भवनं यस्य तत् अक्षरसमुद्भवं ॥ तस्मात् यज्ञस्य शरीरं प्रति हेतुत्वात् सर्वगतं सर्वाधिकारिगतं ब्रह्मशब्दितं शरीरं सदा यज्ञे प्रतिष्ठितं यज्ञमूलकं ॥ अतो जगच्चक्रप्रवर्तकं यज्ञशब्दितं विहितं कर्मानुष्ठेयम ॥ १४ ॥ १५ ॥

भूतानि प्राणिनः अन्नात् अद्यमानपदार्थात् रेतोरूपेण परिणतात् भवन्ति जायन्ते॥ जातानि च भूतानि अन्नात भवन्ति तिष्ठन्ति स्थितिं लभन्ते जीवन्तीति यावत्॥ लब्धस्थितीनि च भूतानि अन्नात् भवन्ति वर्धन्ते उपचितबलानि कार्यक्षमाणि भवन्ति ॥ अन्नानां तेषां संभवः उत्पत्तिः पर्जन्यात् वृष्टेः मेघचक्राद्वा मेघचक्राभिमानिनः आदित्याद्वा वृष्टिद्वारा भवति ॥ स च पर्जन्यः यज्ञात् यज्ञतदुपलक्षितविहितकर्मानुष्ठानात् भवति ॥ देवतोद्देशेन हविषस्त्यागो यज्ञः तस्मात् हविर्भागोपभोगहृष्टपुष्टादित्यद्वारा वृष्टिः वार्षिकं मेघचक्रं च भवति ॥ आदित्यस्तु यज्ञात् भवति ॥ हृष्टपुष्टोपचितबलो वृष्ट्यादिहेतुः संपद्यते ॥ स्मरन्ति च ॥ 'अग्नौ प्रास्ताऽऽहुतिः सम्यगादित्यमुपतिष्ठते ॥ आदित्याज्जायते वृष्टिः वृष्टेरन्नं ततः प्रजाः ॥' इति ॥ स च ज्योतिष्टोमादिः तदुपलक्षितं विहितं कर्म च कर्मसमुद्भवः ऋत्विग्यजमानादीनां मानसि-

कवाचिककायिकक्रियाभिर्भवति ॥ तच्चाङ्गभूतं कर्म ब्रह्मोद्भवं विद्धि ॥ परमात्महेतुकं जानीहि ॥ परमात्मा हि सर्वं कर्म कारयति ॥ १ 'एष ह्येव साधु कर्म कारयती'ति श्रुतिः ॥ स च परमात्मा अक्षरशब्दिताद्वेदादभिव्यज्यते ॥ परमात्मस्वरूपावगतिश्च वेदात्संपद्यते ॥ स चाक्षररूपो वेदः उच्चारयितॄणां भूतानां उच्चारणादभिव्यज्यते ॥ तानि चान्नाद्भवन्तीत्यादिरीत्या चक्रमिदम् ॥ तस्मात् यज्ञस्य वृष्ट्यन्नभूतवेदद्वारा परमात्मस्वरूपाभिव्यक्तिहेतुत्वात् सर्वव्यापी परमात्मा नित्यं यज्ञे प्रतिष्ठितः ॥ यज्ञादेव तत्रतत्राभिव्यज्यमानस्वरूपः स्थितिं लभते ॥ सर्वान्तर्यामी सर्वरक्षकः परमात्मा वेदात् स च भूतेभ्यः तानि चान्नात् तच्च वृष्टेः सा च यज्ञात् स च अङ्गभूतकर्मणा कर्म च परमात्मना स च वेदात् स च भूतेभ्यः इत्यादिरीत्या जगच्चक्रम् ॥ कर्मणो वृष्ट्यन्नद्वारा भूतोत्पत्तिस्थितिवृद्धिहेतुत्वेन कर्म जगच्चक्रप्रवृत्तिहेतुभूतं भवति ॥ भूतवेदद्वारा परब्रह्माभिव्यक्तिहेतुत्वेन परब्रह्मस्थितिहेतुभूतमपि भवति ॥ विहितकर्मानुष्ठानस्य जगच्चक्रप्रवर्तनद्वारा भूतस्थितिपरब्रह्मस्थितिहेतुत्वेन तदुभयजनितोभयविधसुकृतहेतुत्वात् कर्तव्यमेव जगत्क्षेमार्थं मत्क्षेमार्थं च कर्म यथावदकामेनापि भवता ॥ १४ ॥ १५ ॥

अ ॥ भूतानि प्राणिनां शरीराणि प्राणिनो वा अन्नात् शुक्रशोणितरूपेण परिणतात् जायन्ते जीवन्ति वर्धन्ते ॥ २ 'अन्नाद्भूतानि जायन्ते ॥ जातान्यन्नेन वर्धन्ते ॥' इति श्रुतिः ॥ ३ 'अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते ॥ अन्नेन जातानि जीवन्ती'ति च ॥ तस्य चान्नस्य उत्पत्तिः पर्जन्यशब्दितायां वृष्टेः सकाशाद्भवति ॥ सा च वृष्टिः ज्योतिष्टोमादिविहितकर्मजन्यात् यज्ञशब्दितात् आत्मगतात् धर्मपुण्यापरपर्यायात् अपूर्वात् भवति ॥ स्मरन्ति च ॥ 'अग्नौ प्रास्ताऽऽहुतिः सम्यक् आदित्यमुपतिष्ठते ॥ आदित्याज्जायते वृष्टिः वृष्टेरन्नं ततः प्रजाः ॥' इति ॥ तच्चापूर्वं ज्योतिष्टोमादिविहितकर्मकरणात् भवति ॥ सा च वृष्टिः यज्ञात् कारीर्याख्यपर्जन्येष्टितः ॥ स च यज्ञः ऋत्विग्यजमानव्यापाररूपात् कर्मणः ॥ इति वा ॥ तच्च कर्म ब्रह्मशब्दितात् वेदादवगतं भवति ॥ उद्भवत्यस्मादित्युद्भवः प्रमाणं ॥ वेदप्रमाणकमिति यावत् ॥ स च वेदः अक्षरशब्दितस्य परब्रह्मणः सकाशात् निश्वसितवदभिव्यक्तः ॥ समुद्भवोऽत्राभिव्यक्तिः ॥ न तु बुद्धिपूर्वं कृतः ॥ तस्य नित्यत्वादपौरुषेयत्वाच्च ॥ एवं विद्धि ॥

१. कौ. ३. ८. तै. २. १. २. तै. ३. ३.

माऽन्यथा मंस्थाः ॥ १'अस्य महतो भूतस्य निश्वसितमेतत् यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यस्यैवैतानि निश्वसितानि ॥' इति श्रुतिः ॥ तस्मात् उक्तरीत्या साक्षात्परब्रह्मसमुद्भवत्वेन परमप्रमाणतया महामाहात्म्यवत्त्वात् २सर्वार्थप्रकाशको ३नित्यो वेदः यज्ञशब्दिते विहिते कर्मणि महातात्पर्यवत्तया तत्रैव प्रतिष्ठितः॥ तस्मात् यज्ञशब्दितस्य विहितकर्मणः उक्तरीत्या जगदुत्पत्तिस्थितिवृद्धिहेतुत्वात् सर्वार्थप्रकाशको वेदः यज्ञे नित्यं प्रतिष्ठितः तात्पर्येण स्थित इति वा ॥ तस्मात् यज्ञस्य स्वनिश्वसितवेदमूलकत्वेन स्वस्य परमाभिप्रेतत्वात् सर्वत्र अन्तर्यामित्वेन वर्तमानं परं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् यज्ञप्राप्यं ॥ 'उद्यमस्था सदा लक्ष्मी'रित्यादाविव तत्प्राप्यत्वमेव तत्र स्थितिः ॥ परब्रह्मणः सकाशादभिव्यक्तेन वेदेनावगमितात्कर्मणः यज्ञशब्दितमपूर्वं तस्माद्वृष्टिः वृष्टेरन्नं ततो भूतानि तैस्तत्कर्म कर्मणोऽपूर्वमित्यादिरीत्या जगच्चक्रमिदम् ॥ विहितस्य कर्मणः उक्तरीत्या जगच्चक्रप्रवृत्तिहेतुत्वात् परमप्रमाणापौरुषेयवेदप्रमाणकत्वात् परमप्राप्यपरब्रह्मप्राप्तिहेतुत्वाच्च युद्धादिकं विहितं कर्म त्वया कर्तव्यमेव ॥ विमृश्य कर्तव्यं कुरु ॥ १४ ॥ १५ ॥

वि ॥ भूतानि शरीराणि जीवाधिष्ठितानि शरीराणि वा अन्नाद्भवन्ति ॥ अन्नस्य उत्पत्तिस्तु पर्जन्यात् वृष्टेः ॥ स च पर्जन्यः यज्ञात् ॥ 'अग्नौ प्रास्ताऽऽहुतिः सम्यगादित्यमुपतिष्ठते ॥ आदित्याज्जायते वृष्टिः वृष्टेरन्नं ततः प्रजाः'॥ इति हि स्मरन्ति ॥ स च यज्ञः द्रव्यार्जनादिकर्तृव्यापाररूपकर्मणा भवति ॥ तच्च द्रव्यार्जनादिरूपं कर्म ब्रह्मशब्दितप्रकृतिपरिणामशरीरेण जायते ॥ तच्च ब्रह्मशब्दितं कर्मसाधनं शरीरं अक्षरशब्दितेन प्रत्यगात्मना अन्तःस्थितेन समुद्भवः कर्मसाधनतारूपेण भवनं यस्य तत् अक्षरसमुद्भवम् ॥ अक्षरस्य शरीरमधिष्ठाय कर्तव्ये कर्मणि शरीरस्य प्रवर्तनरूपं शरीराधिष्ठातृत्वं च अन्नपानादिना ॥ अन्नं च पर्जन्यात्॥ इत्यादिरीत्या चक्रमिदम् ॥ भूतशब्दनिर्दिष्टानि सजीवानि शरीराणि अन्नात् ॥ अन्नं च पर्जन्यात् ॥ पर्जन्यश्च यज्ञात् ॥ यज्ञश्च कर्मणा ॥ कर्म च सजीवाच्छरीरात् ॥ तच्च पुनरप्यन्नात् ॥ इत्यादिरीत्या चक्रकमिदम् ॥ तस्मात् यज्ञ-

१. बृ. ४. ४. १०. ॥ २. सर्वस्मिन् देशे काले च वर्तमानः ३. नित्यं सदा इति वा नियमेन इति वा ॥

स्य उक्तरीत्या वृष्ट्यन्नद्वारा शरीरं प्रति हेतुत्वात् सर्वाधिकारिगतं ज्ञानयोगाधिकारि-कर्मयोगाधिकारिरूपोभयाधिकारिगतं ब्रह्मशब्दितं शरीरं सदा यज्ञे प्रतिष्ठितं यज्ञमूल-कम् ॥ ब्रह्मशब्दितेन शरीरेण कर्म तेन यज्ञः तेन वृष्टिः तयाऽन्नं तेन शरीरमिति शरीरस्य कार्यत्वं कारणत्वं चेत्यात्माश्रयः शरीरेण कर्म कर्मणा च यज्ञवृष्ट्यन्नद्वारा शरीरं इत्यन्योन्याश्रयश्च इति चेत् केवलशरीरत्वरूपेण कार्यत्वं अन्नपानादितृप्ताक्ष-राधिष्ठिततया कर्तव्यकर्मकरणक्षमत्वेन रूपेण कारणत्वम् ॥ अतो नान्योन्याश्रयाऽऽ-त्माश्रयौ ॥ एवं जगच्चक्रप्रवृत्तिहेतुत्वात् कर्मणः कर्तव्यमवश्यं विहितं कर्म ॥ सर्वस्य यज्ञमूलकत्वात् तस्य च धनार्जनमूलकत्वात् न्यायेन तदार्जनार्थं 'तदर्थं कर्म कौन्तेये' त्युक्तरीत्या युद्धादिकं विहितं कर्म कुरु ॥ १४ ॥ १५ ॥

अर्जुनः ॥ जगच्चक्रप्रवर्तनार्थं कर्म कुर्वित्युक्तम् नाहं जगच्चक्रमनुवर्तेय ॥ १ 'न कांक्षे विजयं कृष्णे' त्याद्युक्तरीत्या आत्मश्रेयोविमुखस्य मम कथं जगच्चक्र-प्रवर्तने प्रवृत्तिः स्यात् ॥ अतो जगच्चक्रप्रवर्तनार्थमपि नाहं कर्म कुर्याम् ॥ किं ब्रवीषि ॥

कृष्णः ॥ एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः ॥
अघायुरिन्द्रियारामो मोघं पार्थ स जीवति ॥ १६ ॥

एवमिति ॥ हे पार्थ अर्जुन एवं भगवता प्रवर्तितं चक्रं जगच्चक्रं यः इह लोके नानुवर्तयति नानुवर्तते ॥ अघाय पापाय आयुः यस्य सः अघायुः इन्द्रियैः आरामः आरमणं यस्य सः इन्द्रियारामः सः मोघं व्यर्थं जीवति ॥ १६ ॥

इह लोके इह साधने वर्तमानः इति वा॥ यः कर्मयोगाधिकारी उक्तरीत्या ईश्वरेण तदाज्ञाधारकैः पुरातनैर्ब्रह्मादिभिश्च प्रवर्तितं जगच्चक्रं नानुवर्तयति नानुवर्तते॥ ईश्वरा-ज्ञामनुसृत्य न वर्तयति न प्रवर्तयतीति वा ॥ जगच्चक्रप्रवृत्तिहेतुभूतं कर्मयोगं नानुति-ष्ठति सः मोघं जीवति॥ तस्य जीवनं व्यर्थं॥ जीवितान्मरणमेव तस्य वरं ॥ कुत इति चेत् अघायुः अघं पापं तद्धेतुभूतमेव आयुर्भवत्यस्य॥ अघाय आयुर्यस्येति वा ॥ अघं अ-घपरिणतं आयुः यस्येति वा ॥ पापेन पापाय आयुर्वृद्धिरस्येति यावत् ॥ कुत इति चेत् इन्द्रियारामः इन्द्रियैः विषेषु आरमणं यस्य तादृशः ॥ इन्द्रियैः विषयेषु आरमतीति

१. १. ३२.

वा ॥ इन्द्रियाण्येव आरामा उद्यानानि तद्भूत भोगसाधनानि यस्येति वा ॥ इन्द्रियारामतया पापं वर्धयन्नेव यो जीवति तस्य जीवितान्मरणमेव वरं॥ अपथप्रवृत्तिविच्छेदहेतुत्वात्॥ कथं कर्माकरणमात्रेण जीवनस्य नैष्फल्यं ज्ञानयोगसंपादनेन सार्थक्यसंभवात्॥ इति चेत् अकृत्वा कर्मयोगं ज्ञानयोगादौ प्रवर्तमानोऽपि ज्ञानयोगस्य दुस्संपादनतया विफलप्रयत्नत्वेन मोघमेव जीवति ॥ न केवलं जीवनस्य नैष्फल्यमात्रं किंतु ईश्वराज्ञोल्लंघनेन नरकेऽपि पतनं तस्य भवति ॥ यस्तु स्वक्षेमाय परक्षेमाय च कर्मयोगमनुतिष्ठति तस्यैव जीवनं सार्थकम् ॥ ईश्वराज्ञानुवर्तनेन तत्प्रसादात् स्वर्गं मोक्षं वास फलमश्नुते ॥ अतः स्वार्थं जगच्चक्रप्रवृत्त्यर्थं च कर्म विहितमुचितं कुरु ॥ अन्यथा जीवनं ते पापहेतुतया व्यर्थं भविष्यति ॥ पतिष्यसि च नरके ॥ अतस्त्वया कर्म कर्तव्यमेव ॥ १६

अर्जुनः ॥ स्वार्थं जगच्चक्रप्रवर्तनद्वारा परार्थं च कर्म कर्तव्यमिति मां निर्बध्नासि ॥ चिरं तपसि लीनाः पुरातनाः च्यवनविश्वामित्रादयो मुनयः किमन्वतिष्ठन् तत्तत्काले समुत्थाय तानि तानि कर्माणि ॥ कर्म कर्तव्यमेवेति निर्बन्धोयं कुतो न तेषां ॥ मां केवलं वशे वर्तमानत्वात् निर्बध्नासीति भाति ॥ ब्रूहि ॥

कृष्णः ॥ यस्त्वात्मरतिरेव स्यात् आत्मतृप्तश्च मानवः ॥
आत्मन्येव च सन्तुष्टः तस्य कार्यं न विद्यते ॥ १७ ॥

नैव तस्य कृतेनार्थो नाऽकृतेनेह कश्चन ॥
न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥ १८ ॥

यस्त्विति ॥ यः मनुते इति मानवः अपरोक्षज्ञानी मुक्तो वा मनुष्यो वा आत्मनि परमात्मन्येव स्थितः सन सन्तुष्टश्च आत्मनैव निमित्तभूतेन तृप्तः अन्यत्र लब्धालंप्रत्ययः आत्मतृप्तश्च अतः आत्मन्येव रतिः सुखानुभवो यस्य सः आत्मरतिः तादृश एव च स्यात् तस्य कार्यं कर्तव्यं कर्म न विद्यते ॥ तस्य कृतेन साधनेन कृतं करणं तेन वा अर्थः प्रयोजनं नैवास्ति ॥ अकृतेन अकरणेन विरुद्धकर्मणा वा इह लोके कश्चन कोऽपि प्रत्यवायः नास्ति ॥ अस्य सर्वाणि च तानि भूतानि च सर्वभूतानि तेषु गुर्वादिप्राणिषु ब्रह्मादिस्थावरान्तेषु प्राणिषु आकाशादिषु भूतेषु कश्चित् कोऽपि अर्थस्य

प्रयोजनस्य व्यपाश्रयः संबन्धः येन सः अर्थव्यपाश्रयः प्रत्युत्थानादिव्यापारः अर्थस्य प्रयोजनस्य व्यपाश्रयः संबन्धो वा अर्थेन प्रयोजनत्वेन व्यपाश्रयः आश्रयणं वा नास्ति च ॥ १७ ॥ १८ ॥

अपरोक्षज्ञानिन एव कार्यं विहितं कर्म न विद्यते॥ च्यवनादयो मुनयस्तु अपरोक्षज्ञानिनः॥ तेषां कर्म न विद्यते ॥ न ते तन्निदर्शनेन कर्मपरित्यागो युक्तः ॥ तत्कर्मयोगाधिकारित्वात्॥ यः परमात्मन्येव सन् तत्र स्थित्या सन्तुष्टः असंप्रज्ञातसमाधिरूपया भगवति स्थित्या सन्तोषं महासुखं प्राप्तः ॥ अतः आत्मतृप्तः परमात्मना तृप्तः परमात्मनैव निमित्तभूतेन तदन्यत्र अलंबुद्धिं प्राप्तः ॥ अतः आत्मनः आत्मन्येव रतिमान् ॥ अपरोक्षज्ञानजन्यसुखवत्त्वेन तदन्यत्र जातालंप्रत्ययत्वात्परमात्मदर्शनजन्यसुखमेवानुभवन् स्यात् ॥ तस्य मानवस्य अपरोक्षज्ञानिनः 'मनु अवबोधने' इति धातुः ॥ एतादृशविशेषवतः कार्यं न विद्यते ॥ तुशब्दो विशेषसूचकः ॥ 'तस्य कार्यं न विद्यत' इति कथमुच्यते ॥ कर्तव्यस्य यागादेरनुष्ठाने श्रेयःप्राप्तिसंभवात् इति चेत् 'नैव तस्य कृतेनार्थः' तस्यापरोक्षज्ञानिनः समाधेर्व्युत्थितस्य कृतेन यागादिकर्मणा किमपि प्रयोजनं न विद्यते ॥ यागादेः पुण्यशब्दितमपूर्वं तेन सुखं इति प्रयोजनसद्भावात् 'नैव तस्य कृतेनार्थः' इति कथं इति चेत् 'आत्मन्येव च सन्तुष्ट' इत्युक्तभगवदनुभवजन्यमहासुखवत्त्वादस्य ततोऽप्यतिशयितं सुखमेव प्रयोजनं भवितुमर्हति ॥ तस्य चाभावात्प्रयोजनं नास्तीत्युक्तम् ॥ अकाम्यकर्मकरणे तेन जायमाना भगवत्प्रीतिः प्रयोजनमिति चेत् कर्मकृति यादृशी प्रीतिः न तादृशी ज्ञानिनि॥ किंतु ततोऽतिशयिता ॥ अतः साऽपि प्रयोजनं न भवति ॥ 'न तादृशी प्रीतिरौड्यस्य विष्णोः गुणोत्कर्षज्ञातरि यादृशी स्यात्॥' इति श्रुतिः ॥ वक्ष्यते च ॥ १ 'प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः॥' इति ॥ २ 'ज्ञानी त्वात्मैव मे मतम्॥' इति च॥ ज्ञानं प्रयोजनमिति चेत् कर्मजन्यपरोक्षज्ञानहेतुकापरोक्षज्ञानवत्त्वादस्य ज्ञानं प्रयोजनं न भवति ॥ अतः प्रयोजनं नास्तीत्युक्तम्॥ कृतकृत्यत्वादस्य माऽस्तु करणेऽभ्युच्चयहेतोर्यागादेः कर्मणः करणेन प्रयोजनम्॥ अकरणे प्रत्यवायजनकस्य सन्ध्यावन्दनादेः अकरणेन प्रत्यवायः परं स्यादेव ॥ अतः तत्कर्म कर्तव्यम्॥ कथमुच्यते 'कार्यं न

---

१. ७. १७. २. ७. १८.

विद्यते'॥ इति ॥ इति चेत् 'नाकृतेनेह कश्चन' ॥ अपरोक्षज्ञानिनस्समाधिस्थस्य कृतं करणं तदभावोऽकरणं तेन सन्ध्यावन्दनादिनित्यनैमित्तिककर्माकरणेनेति यावत् ॥ इह लोके कोऽपि दोषो नास्ति ॥ विहितकर्माकरणेन भवन् दोष एव भवतीति दोष इति लभ्यते ॥ सन्ध्यावन्दनादिविहितनित्यकर्माकरणे महतो दोषस्य श्रवणात् कथमुच्यते 'नाकृतेनेह कश्चने'ति॥ इति चेत् दोषो नाम अनर्थाऽऽपादकः कश्चिद्धर्मविशेषः स च स्वकारणेन विहितस्याकरणेन निषिद्धस्य करणेन च न साक्षात् समुत्पद्यते ॥ किंतु विधिनिषेधविधायकप्रभुप्रकोपजननद्वारा ॥ यदि तदेव स्वकारणं प्रभोः प्रकोपं नोत्पादयति तदा दोषं नाऽऽपादयति ॥ अपरोक्षज्ञानिनो भगवत्प्रियत्वात्तदीयं कर्माकरणं न भगवतः कोपमापादयति ॥ अतो न तेन तस्य दोषः संभवितुमर्हति ॥ अत उक्तं 'नाकृतेनेह कश्चने'ति ॥ समाधिकाले सन्ध्यावन्दनादेरकरणेन प्रत्यवायाभावेऽपि गुर्वादिपूज्यजनपूजनस्याकरणे प्रत्यवायसत्त्वेन उत्थाय करणे अभ्युदयसत्त्वेन च गुर्वादिपूज्यजनसमागमप्रसंगे समाधित उत्थापितेन पूज्यजनपूजनं कर्तव्यमिति तत उत्थापनमावश्यकम्॥ उत्थितेन पूज्यपूजनं कर्तव्यम् ॥ अन्यथा प्रत्यवेयात् ॥ कथ मुच्यते 'नैव तस्य कृतेनार्थ' इति 'नाकृतेनेह कश्चने'ति च इति चेत् 'न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः' अपरोक्षज्ञानिनः सर्वेषु प्राणिषु विषये अर्थप्रापकः प्रयोजनाऽऽधायकः कश्चिदपि प्रत्युत्थानाभिवादनादिव्यापारः नास्ति च ॥ पूज्यपूजनादिना, समाधिना लब्धात् प्रयोजनादधिकस्य प्रयोजनस्याभावात् 'नैव तस्य कृतेनार्थः' इत्युक्तम् ॥ भगवद्विषयकसमाधावेव विद्यमानत्वात् पूज्यपूजनादेरकरणेन प्रत्यवायस्याभावात् 'नाकृतेनेह कश्चने'त्युक्तम् ॥ पूज्यपूजनादेरावश्यकत्वसूचनाय पृथगुक्तिः ॥ भूतपदेन गुर्वादिपूज्यजना विवक्षिताः ॥ सर्वः सर्वशब्दवाच्यो भगवान् तस्य भूतानि प्राणिनः भगवत्संबन्धिनो जनाः गुर्वादयः तेषु इति वा ॥ वक्ष्यते च सर्वत्वं भगवतः॥ १ 'सर्वं समाप्नोषि ततोऽसि सर्वः॥' इति ॥ राजर्षिरिन्द्रद्युम्नः कथमेवं सति पूज्यस्य भगवतोऽगस्त्यस्यापूजनात्तेन शप्तो गजतामापेति चेत् न स तदानीं समाधाववर्तत ॥ अपि तु हरिमाराधयन् गृहीतमौनव्रतोऽवर्तत ॥ किंच सः स्वधर्मं प्रजापालनं विहाय जटाधारी मौनव्रती च भूत्वा हरिमाराधयितुं प्रावर्तत ॥ स्वधर्मप्रहाणेन परधर्मसेवनेन च तस्य सा गतिरभूत ॥ परधर्मसेवनं महतोऽनर्थस्याऽऽ-

१. ११. ४०.

पादकम् ॥ वक्ष्यते च ॥ १ 'श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ॥ स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥' इति ॥ २ 'श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ॥ स्वभावनियतं कर्म कुर्वन्नाऽऽप्नोति किल्बिषं ॥' इति च ॥ अत्रेदमवधेहि ॥ च्यवनविश्वामित्रादयो मुनयः कर्म न कुर्वन्त्येव ॥ तत्तेषां कर्माकरणं न प्रत्यवायमापादयति ॥ कुतः इति चेत् कर्मकरणं प्रभुप्रसादोत्पादनेन सुखावहम् ॥ कर्माकरणं प्रभुप्रकोपोत्पादनेन दुःखावहं दृष्टं लोके ॥ अपरोक्षज्ञानिनः कर्मकरणेन नार्थः कर्मकरणजन्यभगवत्प्रसादादतिशयितस्य भगवत्प्रसादस्य अपरोक्षज्ञानेन लब्धत्वात् विहितकर्माकरणरूपमाज्ञोल्लङ्घनं न भगवतः कोपमापादयति ॥ प्रसादजनकस्य अपरोक्षज्ञानेन भगवत्सामीप्यस्य विद्यमानत्वात् ॥ अस्मिन् काले आस्थानीं प्रति आगन्तव्यमिति सर्वसाधारण्येन विहितस्याऽऽदेशस्यानुवर्तनम् अप्राप्ताधिकप्रसादस्य स्थितस्थापनादिना सुखावहम् ॥ अनन्यसाध्यकार्यनिर्वहणेन प्राप्ताधिकप्रसादस्य तु तदेव सुखावहम् ॥ न साधारणाऽऽज्ञाऽनुवर्तनम् ॥ तथा आज्ञोल्लङ्घनं कर्मकरणकाले अकृत्वा कर्म क्वापि गतस्य अनर्थावहम् ॥ विहितसर्वसाधारणाऽऽज्ञाऽनुवर्तनजन्यप्रसादादतिशयितप्रसादजनककार्यनिर्वहणेन प्राप्ताधिकप्रसादस्य तदानीं तादृशकार्यनिर्वहणाय प्रभोः सकाशे स्थितस्य नानर्थावहम् ॥ उल्लंघितसाधारणादेशः सः तमनुवर्तमानानप्यतिशेते ॥ इतीदं दृश्यते स्पष्टं लौकिकाधिकारिसमुदाये ॥ अतोऽपरोक्षज्ञानिनो विलक्षणत्वात्तस्य कार्यं न विद्यते ॥ यः मानवः अवाप्तज्ञानफलभूतमोक्षः मुक्तः आत्मरतिः परमात्मना लब्धस्वरूपानन्दः तस्यैव कार्यं न विद्यते ॥ यावन्मोक्षप्राप्तिः तावद्धितं कर्मानुष्ठेयम् ॥ इति ३ मुक्तपरं वेदम् ॥ १७ ॥ १८ ॥

अ ॥ यः मानवः आत्मधित् ज्ञाननिष्ठानिष्ठः मापयति सर्वत्र ब्रह्मैव ग्राहयतीति मानं ब्रह्मज्ञानं तत् वाति भजतीतिमानवः इति व्युत्पत्तिः ॥ आत्मन्येव रतिमान् न तु स्रक्चन्दनवनितादिषु ॥ यः मानवः मनुष्यः इदं यः कश्चिदपि मनुष्य एवं भूतश्चेत् सः कृतकृत्यो भवति ॥ तस्य कार्यं न विद्यते ॥ न तु ब्राह्मणत्वादिप्रकर्षापेक्षा ॥ इति सूचयितुमिति वा ॥ आत्मनैव तृप्तश्च न तु अन्नरसादिना ॥ आत्मन्येव

१. ३. ३५. २. १८. ४७. ३. अत्र, 'यस्त्वेवात्मरतो मुक्तः कार्यं तस्यैव नास्ति हि ॥ तस्मात् कुर्वेव कर्माणीत्याह कृष्णोऽर्जुनं स्मयन् ॥' इति स्कान्दवचनमनुसन्धेयं ॥

सन्तोषं प्राप्तश्च न पशुपुत्रादिबाह्यार्थलाभेन ॥ तस्य अपरोक्षज्ञानिनः कर्तव्यं कर्म न विद्यते ॥ तस्य कृतेन कर्मणा अर्थः प्रयोजनं नैव ॥ इह लोके तस्य अकृतेन कर्माकरणेन कोऽपि दोषो नास्ति १ 'एष नित्यो महिमा ब्राह्मणस्य ॥ न कर्मणा वर्धते नो कनीयान्' इति श्रुतिः ॥ कुत इति चेत् अस्य ब्रह्मादिस्थावरान्तेषु सर्वेषु भूतेषु विषये अर्थव्यपाश्रयः प्रयोजनसंबन्धः नास्ति ॥ प्रयोजननिमित्तकं आश्रयणं नास्ति ॥ इति वा ॥ भूतेषु मध्ये अर्थार्थं प्रयोजनार्थं आश्रयणीयः कोऽपि नास्तीति वा ॥ अर्थो मोक्षाख्यपुरुषार्थे तन्निमित्तं आश्रयणीयः कोऽपि नास्तीति वा ॥ कञ्चित् भूतविशेषमाश्रित्य क्रियासाध्यः कोऽपि प्रयोजनविशेषो नास्ति ॥ कृतकृत्यतया केनापि भूतेन साध्यस्य कस्यापि प्रयोजनस्याभावात् न तदर्थं कर्मकरणमस्य ॥ अवाप्तसकलश्रेयःफलत्वात् न देवताप्रकोपेनास्यार्थहानिः ॥ अत उक्तं 'नैव तस्य कृतेनार्थः नाऽकृतेनेह कश्चने'ति ॥ २ 'तस्य ह न देवाश्च नाभूत्या ईशते आत्मा ह्येषां स सवर्त्ती'ति श्रुतिः ॥ अकृतेन विरुद्धकर्मणा कोऽपि दोषो नास्ति ॥ आत्मज्ञानिनि उत्तराघस्याश्लेषात् ॥ ३ तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशादिति सूत्रम् ॥ इति च ॥ उक्तलक्षणस्यापरोक्षज्ञानिनः कर्म न विद्यत इति कथमुच्यते ॥ वर्णाश्रमोचितविहितकर्मणां सर्वैरपि कर्तव्यत्वात् ॥ इति चेत् आत्मरतिः आत्मना तृप्तः आत्मन्येव सन्तुष्टः इति विशेषणैः अपरोक्षज्ञानस्य परा काष्ठोच्यते ॥ सा तु सप्तमी भूमिका ॥ काः प्रथमादयः सप्तम्यन्ता भूमिकाः इति चेत् श्रीरामं प्रति भगवता वसिष्ठेनोक्तास्ताः भूमिकाः प्रवक्ष्यामि ॥ शृणु ॥ मोक्षेच्छा प्रथमा भूमिका ॥ श्रवणमननादिरूपो वेदान्तविचारो द्वितीया भूमिका ॥ निदिध्यासनाख्योऽखण्डध्यानरूपो वृत्तिविशेषस्तृतीया भूमिका ॥ तत्परिपाकजन्यं साक्षात्कारशब्दितं अपरोक्षज्ञानं चतुर्थी भूमिका ॥ इमां प्राप्तो ब्रह्मविदित्युच्यते । एतत्परिपाकः पञ्चमीभूमिका ॥ इयं जीवन्मुक्त्यवस्था ॥ इमां प्राप्तो जीवन्मुक्त इत्युच्यते ॥ तत्परिपाकः षष्ठी भूमिका ॥ तत्परिपाकः सप्तमी भूमिका ॥ प्रथमद्वितीयतृतीयभूमिकात्रयं जाग्रदवस्था ॥ तासु जगतो भेदेन भानात् ॥ चतुर्थी भूमिका स्वप्नावस्था ॥ तस्यां सर्वस्यापि जगतो मिथ्यात्वेन स्फुरणात् ॥ पञ्चमी भूमिका सुषुप्तिरित्युच्यते ॥ निर्विकल्पकसमाध्यवस्थायां तस्यां जगतः सुतरामभानात् ॥'

१. तै. का. ३. ९. २. बृ. ३. ४. १०. ३. ४. १. १३.

इमां प्राप्तो ब्रह्मविद्वरः ॥ तत्र स्वयमेवोत्थानं ॥ षष्ठी भूमिका गाढसुषुप्तिः ॥ सुषुप्त्यवस्थायाश्चिरकालावस्थानात् ॥ इमां प्राप्तो ब्रह्मविद्वरीयान् ॥ तत्र परप्रयत्नेनैवोत्थानं ॥ सप्तमी भूमिका तुरीयावस्थेत्युच्यते ॥ इमां प्राप्तो ब्रह्मविद्वरिष्ठ इत्युच्यते ॥ न तत्र स्वयं नापि परप्रयत्नेनोत्थानं ॥ किंतु सर्वदा तन्मयः स्वप्रयत्नमन्तरेणैव अन्यैरेव निर्वाह्यमाणसकलदैहिकव्यापारः परिपूर्णपरमानन्दघन एव सर्वतस्तिष्ठति ॥ 'तद्यथाऽहिर्निर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं शेते अथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एव' इति श्रुतिः ॥ उक्तामिदं सर्वं वसिष्ठेन ॥ 'ज्ञानभूमिः शुभेच्छा स्यात् प्रथमा परिकीर्तिता ॥ विचारणा द्वितीया स्यात् तृतीया तनुमानसा ॥' तनुमानसा मनसः एकाग्रतारूपा ॥ 'सत्वापत्तिश्चतुर्थी स्यात् ॥' सत्वस्य ज्ञानस्य आपत्तिः प्राप्तिः ॥ 'ततोऽसंसक्तिनामिका ॥' संसक्तिः बाह्यप्रपञ्चभानं तदभावोऽसंसक्तिः ॥ निर्विकल्पकसमाधिशब्दितोऽसंप्रज्ञातसमाधिरिति यावत् ॥ 'पदार्थाभावनी षष्ठी ॥' स्वयमनुत्थानात् पदार्थाप्रतिभानस्य चिरकालानुवृत्त्या गाढसुषुप्तितुल्या ॥ 'सप्तमी तुर्यगा स्मृता ॥' तुरीयतामापन्नाऽवस्था ॥ भूमिकात्रितयं त्वेतत् राम जाग्रदिति स्थितं ॥ यथावद्भेदबुद्ध्येदं जगज्जाग्रति दृश्यते ॥ 'अद्वैते स्थैर्यमायाते द्वैते प्रशममागते ॥ पश्यन्ति स्वप्नवल्लोकं चतुर्थीं भूमिकामिताः ॥ पञ्चमीं भूमिकामेत्य सुषुप्तिपदनामिकां ॥ षष्ठीं गाढसुषुप्त्याख्यां क्रमात्पतति भूमिकां ॥ षष्ठ्यां भूम्यामसौ स्थित्वा सप्तमीं भूमिमाप्नुयात् ॥ किंचिदेवैष सम्पन्नस्त्वथ वैष न किंचन ॥' द्वैतादर्शनात् किंचित्प्राप्तः ॥ उपाधिभूतशरीरस्य सत्वात्किंचिदप्राप्तश्च ॥ 'सदेहमुक्तता तूक्ता सप्तमी योगभूमिका ॥ अगम्या वचसां शान्ता सा सीमा योगभूमिषु ॥' इति ॥ अथमत्रसंग्रहः ॥ चतुर्थी भूमिका ज्ञानं निस्रः स्युः साधनं पुरा ॥ जीवन्मुक्तेरवस्थास्तु परास्तिस्रः प्रकीर्तिताः ॥ सप्तापीमाः भूमिकाः अन्तरेण नामनिर्देशं स्वरूपतो लक्षणतश्च चतुर्दशे 'प्रकाशं च प्रवृत्तिं चे'त्यादिके गुणातीतलक्षणगुणा-

---

१. अत्र देहं च नश्वरमवस्थितमुत्थितं वा सिद्धो न पश्यति यतोऽध्यगमत्स्वरूपं ॥ दैवादुपेतमथ दैववशादपेतं वासो यथा परिकृतं मदिरामदांधः ॥ देहोऽपि दैववशगः खलु कर्म यावत् स्वारंभकं प्रतिसमीक्षत एव सासुः ॥ तं सप्रपंचमधिरूढसमाधियोगः स्वाप्नं पुनर्न भजते प्रतिबुद्धवस्तुः ॥ इति भागवते ३ स्कन्धे २८ अध्याये ३७. ३८ श्लोकावनुसन्धेयौ ॥ २. बृ. ६. ४. ७.

त्ययोपायनिरूपणपरे प्रकरणे वक्ष्यन्ते ॥ अत्र प्रथमभूमिकात्रयमारूढस्यापरोक्षज्ञानरहितस्यापि कार्यं न विद्यते ॥ तस्य समाधियोगेऽनुप्रवेशात् ॥ किंपुनः सविकल्पकसमाधियोगाभ्यासेन निर्विकल्पकसमाध्यवस्थां प्राप्य तेन जीवन्मुक्त्यवस्थाभेदान् प्राप्तस्य ॥ अतः 'तस्य कार्यं न विद्यत' इत्युक्तं युक्तम् ॥ संन्यस्य श्रवणं कुर्यादित्याद्यभियुक्तोक्तानुसारेण यः श्रवणमननादिरूपविचारसौकर्याय कर्मसंन्यासं विविदिषासंन्यासशब्दितं [1] अङ्गसंन्यासं करोति तस्य प्रथमभूमिकामारूढस्यापि कार्यं न विद्यते ॥ अङ्गस्य कर्मसंन्यासात् कर्मयोग एव श्रेयान् ॥ अतएव वक्ष्यते ॥ २'संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ ॥ तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते ॥' इति ॥ रीतिमिमामनुसृत्य यः परोक्षज्ञानार्थं कर्म कृत्वा परोक्षज्ञानवान् भवति तस्य तृतीयभूमिकामारूढस्यापि कार्यं न विद्यते ॥ किंपुनश्चतुर्थीं ततः परा वा भूमिकाः प्राप्तस्य ॥ अत उक्तं युक्तम् ॥ १७ ॥ १८ ॥

वि ॥ स्वार्थं जगच्चक्रप्रवृत्त्यर्थं च कर्म कर्तव्यमित्युक्तम् ॥ तच्च साधनभूतं कर्म कियत्पर्यन्तमनुष्ठेयम् ॥ तद्रूहि ॥ मुक्तस्यैव कार्यं न विद्यते ॥ आमुक्ति साधनमनुष्ठेयम् ॥ मुक्तस्य कुतो न कार्यं विद्यते इति चेत् आत्मावलोकनाय आत्मानुभवाय चैव हि साधनानुष्ठानम् ॥ मुक्तो हि स्वत एव सदा आत्मदर्शनवान् आत्मस्वरूपानुभववांश्च ॥ साधनसाध्याऽऽत्मदर्शनादेः प्रयोजनस्य सिद्धत्वात् न साधनानुष्ठानेन तस्य कृत्यमिति मुक्तस्याऽऽत्मदर्शनाद्यर्थं कर्तव्यं न विद्यते ॥ अमुक्तस्य तु आत्मदर्शनाद्यर्थं कर्म कर्तव्यमेव ॥ बद्धस्य आत्माभिमुख्यं कर्मयोगज्ञानयोगरूपसाधनेन न स्वतः ॥ मुक्तस्य तु स्वतः ॥ अतः आत्मरतिः स्वत एवात्माभिमुखो मुक्तः ॥ आत्मनैव तृप्तः नान्नपानादिभिः आत्मन्येव परमभोग्ये सन्तुष्टः न स्रक्चन्दनवनितोद्यानगीतादौ ॥ यो मनुष्यः एतादृशः स्यात् तस्यैव कार्यं न विद्यते ॥ मुक्तस्यैव एतादृशत्वात् मुक्तस्यैव कार्यं न विद्यत इति फलति ॥ असाधनायत्तस्वतस्सिद्धसदातनाऽऽत्मदर्शनादिमत्त्वात् तस्य मुक्तस्य कृतेन साधनेन अर्थः प्रयोजनं नैवास्ति ॥ परमप्रयोजनस्याऽऽत्मदर्शनादेर्लब्धत्वात् ॥ साधनेन अकृतेन आत्मदर्शनादेरभावरूपोऽनर्थः कश्चिदपि नास्ति ॥ अकृतेन अकरणेन इह आत्मदर्शनरूपप्रयोजने कोऽपि हानिरूपोऽनर्थः नास्ति ॥ तस्य अत्यन्तनिवृत्तत्वात् ॥ प्रयोजनस्य लब्धत्वेऽपि प्रति-

१. अंगसंन्यासो द्विविधः परोक्षज्ञानांगभूतः अपरोक्षज्ञानांगभूतश्च ॥ इति बोध्यम् ॥ २. ५. २.

बन्धकनिवृत्त्यर्थं साधनमपेक्ष्येत इति चेत् ॥ अस्य मुक्तस्य आकाशादिषु सकार्येषु भूतेषु [१] प्रयोजनत्वेन आश्रयणं किमपि नास्ति ॥ [२] आश्रयणीयं प्रयोजनं नास्तीति वा ॥ यदि किमपि प्रयोजनमपेक्ष्येत तर्हि तदपेक्षणरूपप्रतिबन्धकपरिहाराय साधनमनुष्ठेयं स्यात् ॥ आत्मव्यतिरिक्तसकलाचिद्वस्तुविमुखत्वात् मुक्तस्य न किमपि प्रतिबन्धकम् ॥ अतो न साधनापेक्षा तस्य ॥ अतो मुक्तस्य न कर्म विद्यते ॥ आमुक्ति कर्म कर्तव्यम् ॥ १७ ॥ १८ ॥

अर्जुनः ॥ अस्त्वेवं च्यवनावश्वामित्रादीनां ॥ मया किं कर्तव्यं ॥ विस्पष्टं ब्रूहि ॥

कृष्णः ॥ तस्मादसक्तः सततं कार्यं कर्म समाचर ॥
असक्तो ह्याचरन् कर्म परमाप्नोति पूरुषः ॥ १९ ॥

तस्मादिति ॥ तस्मात् कर्तुं योग्यं कार्यं कर्म सततं सदा न सक्तः असक्तः सन् समाचर कुरु ॥ असक्तः सन् कर्म आचरन् पुरुषः परं परं ब्रह्म ज्ञानाख्यं मोक्षाख्यं परमफलं वा परं उत्कृष्टं आत्मस्वरूपं वा आप्नोति ॥ हि प्रसिद्धमिदं ॥ हि यस्मात् तस्मादिति वा ॥ १९ ॥

असंप्रज्ञातसमाधिमतोऽपरोक्षज्ञानिनोऽन्येन मुक्तादन्येन मुमुक्षुणा च कर्मणः कर्तव्यत्वात् त्वं फलसंगरहितः सन् कर्तव्यं विहितं कर्म सततं [३] यावज्जीवं सम्यगाचर ॥ कुतः कर्म कर्तव्यं मया इति चेत् यः कोऽपि मनुष्यः फलसंगरहितः सन् कर्म करोति स तेन कर्मणा ज्ञानद्वारा मोक्षं प्राप्नोति ॥ ज्ञानं प्राप्नोतीति वा ॥ ब्रह्म प्राप्नोतीति वा ॥ प्रकृतेः परं परमभोग्यं स्वात्मस्वरूपं [४] ज्ञानव्यवधानं विनैव प्राप्नोतीति वा ॥ वक्ष्यते चेदं ॥ [५] 'कृत्वापि न निबध्यते ॥' इति ॥ [६] 'यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ॥' इति च ॥ जिज्ञासुः कर्मणा ज्ञानं ज्ञानी तु अपरोक्षज्ञानं तद्द्वारा ब्रह्म वा अपरोक्षज्ञानी तु मुक्तावानन्दातिशयं प्राप्नोतीति वा ॥ यः

१. अर्थशब्दो भावप्रधानः ॥ अर्थत्वेन व्यपाश्रयः ॥ २. अर्थ एव व्यपाश्रयः ॥ ३. वि ॥ यावदात्म प्राप्ति ॥ ४. अनेन ज्ञानयोगाधिकारिणोऽपि कर्मैव कर्तव्यमिति सूच्यते ॥ ५. ४. २२. ६. ५. ५.

प्राप्नोति स [illegible] पुरुषो मनुष्यः अन्यस्तु पशु[illegible] इति वा ॥ अतः सर्वथाऽपि प्रयोजनसद्भावात् तदर्थं कर्म कर्तव्यं कुरु ॥ १९ ॥

अर्जुनः ॥ कार्यं कर्म समाचरेत्युक्तं ॥ किं मज्जातीयैः पूर्वैरनुष्ठितोऽयं कर्मयोगः ॥ अनुष्ठितश्चेत् अनुरुध्य तं शिष्टाचारं मयाऽप्यनुष्ठेयः स्यात् ॥ वद ॥

कृष्णः ॥ कर्मणैव हि संसिद्धिमास्थिता जनकादयः ॥
लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसि ॥ २० ॥

कर्मणेति ॥ जनकः आदिः येषां ते जनकादयः कर्मणैव संसिद्धिं मोक्षं आस्थिताः प्राप्ताः ॥ हि प्रसिद्धमिदम् ॥ लोकानां संग्रहः संग्रहणं लोकसंग्रहः तमेव संपश्यन्नपि कर्तुमर्हसि ॥ २० ॥

जनकप्रियव्रतभगीरथाश्वपतिप्रभृतयो राजर्षयः कर्मणैव करणेन ज्ञानं ज्ञानद्वारा मोक्षं वा प्राप्ताः ॥ ज्ञानार्थं कर्मणः कर्तव्यत्वोक्तया प्राप्तापरोक्षज्ञानानां न कर्मणा कृत्यमिति भातीति चेत् जनकादयः अपरोक्षज्ञानिनः कर्मणा सहिता एव सन्तः संसिद्धिं संपूर्णमोक्षं मोक्षे आनन्दोन्नाहं इति यावत् ॥ प्राप्ताः ॥ प्रसिद्धमिदम् ॥ अपरोक्षज्ञानस्य निरपेक्षमोक्षसाधनत्वात् कर्मणा सहिता एव संसिद्धिं प्राप्ताः इति कथमुच्यते इति चेत् मोक्षमात्रं प्रति ज्ञानस्य कर्मनिरपेक्षत्वेऽपि तत्र आनन्दोन्नाहार्थं कर्मसाहित्यमावश्यकम् ॥ एतदभिप्रायक एव तत्रतत्र ज्ञानकर्मसमुच्चयवादः ॥ कर्मणैव मोक्षं प्राप्ता इत्युक्तया कर्मणः साक्षान्मोक्षसाधनत्वं प्रतीयते ॥ तच्च विरुद्धम् ॥ ज्ञानेतरस्य साधनत्वनिषेधात् ॥ १ 'नान्यः पन्था अयनाय विद्यते ॥' इति श्रुतिः ॥ २ 'विद्यैव तु निर्धारणात् ॥' इति सूत्रम् ॥ ३ 'भाक्तंवाऽनात्मवित्त्वात्तथाहिदर्शयति' इति च सूत्रम् ॥ इति चेत् कर्मणैव मोक्षं प्राप्ताः नान्येन साधनेन इति नार्थः किन्तु कर्म कृत्वैव ज्ञानद्वारा मोक्षं प्राप्ताः ॥ न तु कर्मयोगमन्तरेणेति ॥ कर्मणैवेत्येवकारो नान्ययोगव्यवच्छेदार्थः ॥ किन्तु कर्मायोगव्यवच्छेदार्थः ॥ तथाच 'विद्यैव तु निधारणा'दिति सूत्रे कर्मणैवेत्ययोगव्यवच्छेदः ॥ इति भाष्यम् ॥ कर्मणैव ज्ञानं प्राप्ता इत्यर्थे तु कर्मणैव नान्येन इति अन्ययोगव्यवच्छेदः ॥ कर्म कृत्वैव ४ ज्ञानं प्राप्ताः न विना कर्म-

१: तै. आ. ३. १२- २. ३. ३. ४८. ३. ३. १. ७. ४. 'सर्पिरस्ति पयसीक्षुगो रसः
स्तेत तिलमध्य एव तत् ॥ लभ्यते मथनयंत्रकर्मणा कर्मणा हृदि गता तथैव चित्॥' इत्यनुसन्धेयम् ॥

योगं इत्ययोगव्यवच्छेदः ॥ इत्युभयथापि वक्तुं शक्यम् ॥ ततश्च न कोऽपि विरोधः ॥ अतः तद्वत् त्वयाऽपि ज्ञानात्पूर्वं ज्ञानप्राप्तये ज्ञानानन्तरं मोक्षे आनन्दातिशयावाप्तये च विहितमुचितं कर्म कर्तव्यम् ॥ अतः कर्म समाचर ॥ यदि जनकादिवदहं ज्ञानं तद्वारा मोक्षं तत्राऽऽनन्दोन्नाहं वा कामयेय तर्हि ताननुवर्तेय ॥ न मे प्रयोजनाकांक्षा अतो न त इव कर्म कुर्यामिति चेत् लोकानां अज्ञजनानां संग्रहं धर्मे प्रवर्तनं तमेव सम्यक् प्रयोजनतया पश्यन् कर्तुमेवार्हसि न त्यक्तुम् ॥ न केवलं शिष्टाचारादेव कर्म कर्तव्यम् ॥ किन्तु लोकसंग्रहार्थमपि ॥ अनेकेषां जनानां कर्मणि [illegible] रूपेण लोकोद्धारेण भगवतः प्रीतिर्जायेत ॥ तदर्थमपि कर्म कुरु ॥ २० ॥

अ ॥ जनकादयः कर्मणैव साधनेन संसिद्धिं ज्ञाननिष्ठां तद्वारा मोक्षं वा आस्थिताः प्राप्ताः ॥ अतो ज्ञानार्थं कार्यं कर्म समाचर ॥ जनकादयः अप्राप्तज्ञानाः अतस्ते कर्मानुष्ठाय तेन सिद्धिं प्राप्ताः ॥ अहं तु अवाप्तज्ञानः कृतकृत्यः न मम कर्मणा कृत्यमिति चेत् लोकानां अज्ञजनानां संग्रहः स्वानुष्ठानमुखेन सन्मार्गे प्रवर्तनं स्वधर्मत्यागरूपादपथान्निवर्तनं च तमेव सम्यक् प्रयोजनतया पश्य ॥ तेन तदर्थं कर्म कुरु ॥ कर्तुमेवार्हसि न तु त्यक्तम् ॥ विदुषा अधिकारिकेण क्षत्रियेण त्वया आत्मदृष्टान्तेन लोके कर्ममार्गप्रवर्तनाय कर्तव्यमेव कर्म ॥ न कदापि त्यक्तुं युक्तं ॥ आत्मनः प्रयोजनाभावेऽपि लोकसंग्रहार्थमेव के वा कर्म कुर्युः इति चेत् ज्ञानिनो भूत्वाऽपि जनकादयः कर्मणा सहैव मोक्षं लोकसंग्रहार्थमास्थिताः गन्तुं प्रवृत्ताः ॥ न तु संन्यस्य कर्माणि ॥ अतस्तद्वत् लोकसंग्रहमपि प्रयोजनं संपश्यन् ज्ञान्यपि त्वं कर्म कर्तुमेवार्हसि ॥ न तु त्यक्तुम् ॥ अतो लोकसंग्रहार्थं कर्म कुरु ॥ यदि ज्ञानिनाऽपि कर्म कर्तव्यं तर्हि कथमुक्तम् 'तस्य कार्यं न विद्यते ॥' इति ॥ इति चेत् यस्य ज्ञानिनः प्रारब्धकर्मशेषो नास्ति तस्य सर्वथा कार्यं न विद्यते ॥ यस्य तु ज्ञानिनः प्रारब्धकर्मशेषोऽस्ति तस्य लोकसंग्रहार्थं कर्म विद्यते ॥ स्पष्टं चेदं विवरिष्यते ॥ १ 'यस्य सर्वे समारंभा' इत्यादौ ॥ परोक्षज्ञानिन एव लोकसंग्रहार्थं कर्म न त्वपरोक्षज्ञानिनोऽपि ॥ कुत इति चेत् अपरोक्षज्ञानी द्विविधः सिद्धः साधकश्चेति ॥ तत्र सिद्धस्य न लोकसंग्रहार्थं कर्मानुष्ठानम् ॥ तस्य सकलमपि प्रपञ्चं अखण्डैकरसाद्वितीयशुद्धबुद्धमुक्तस्वभावं ब्रह्मैव पश्यतः

---

१. ४. १९.

संग्रहीतव्यलोकाभावात् ॥ साधकस्यापि न लोकसंग्रहार्थं कर्मानुष्ठानम् ॥ तस्य अपरोक्षज्ञानदार्ढ्यार्थं निदिध्यासनशब्दिताखण्डध्यानैकनिष्ठस्य लोकसंग्रहे प्रवृत्त्यनुदयात् ॥ तस्य ज्ञाननिष्ठैव कर्तव्यत्वेन श्रूयते ॥ उक्तं च मया ॥ १ 'युक्त आसीत मत्परः ॥' इति ॥ वक्ष्यते च ॥ २ 'मनः संयम्य मच्चित्तोयुक्त आसीत मत्परः॥' इति ॥ ३ 'ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥' इति ॥ तस्मात्परोक्षज्ञान्येव बाह्यवासनाबद्धो लोकसंग्रहवचनस्य विषयः ॥ अतः परोक्षज्ञान्यपि त्वं लोकसंग्रहार्थं कर्म कुरु ॥ यदि अपरोक्षज्ञानिनः लोकसंग्रहार्थं कर्मानुष्ठानं न विद्यते ॥ तर्हि वसिष्ठादयः किमर्थं अनुतिष्ठन्ति कर्म ॥ न हि वसिष्ठादयः अप्राप्तसम्यक्दर्शना इति वक्तुं युक्तमिति चेत् अपरोक्षज्ञानित्वेऽपि आधिकारिकाणां लोकसंग्रहार्थं कर्मविधिरस्त्येव ॥ मार्गप्रदर्शनेन लोकानुग्रहाय ब्रह्मणा सृष्टाः आधिकारिकाः ॥ अतः अपरोक्षज्ञानिनोऽपि ते वसिष्ठादयो लोकसंग्रहार्थं कर्म कुर्वन्ति ॥ तद्वत् अपरोक्षज्ञान्यपि त्वं लोकसंग्रहार्थं कर्तव्यं कर्म समाचर ॥ जनकादीनां शिष्टानां आचारसत्वात् जातिधर्मोऽपि युद्धाख्यो धर्मः न मयाऽङ्गीकर्तव्यः ॥ मम कुले नास्तीति वक्तुं शक्यत्वात् ॥ प्रदर्शितं मया धर्मस्य जातिधर्मकुलधर्मभेदेन द्वैविध्यं ४ 'उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः ॥' इति वदता॥ इति चेत् आदिशब्देन जनकादीनामिव त्वदग्रजस्य परमधार्मिकस्य साक्षाद्धर्मदेवताऽवतारस्य युधिष्ठिरस्यापि ग्रहणात् कुलधर्मोऽप्यभूदयं विप्रतिपन्नो युद्धाख्यो धर्मः ॥ किं न पश्यति भवान् शंखमाधाय युद्धाय सन्नद्धमुद्यतकार्मुकं परमधार्मिकं निजाग्रजम् ॥ अतो जातिधर्मत्वात् कुलधर्मत्वाच्च कर्तव्यमेव युद्धाख्यं कर्म॥ आदिपदेन युधिष्ठिरग्रहणे मोक्षं प्राप्ता इत्यर्थस्यानुपपत्तिः ॥ इति चेत् अत एव आस्थिता इत्यस्य गन्तुं प्रवृत्ता इत्यर्थ उक्तः ॥ तस्मान्न कोऽपि विरोधः ॥ अतः कर्तव्यमेव विहितं त्वया कर्म ॥ २० ॥

वि ॥ जनकादयो राजर्षयः परमप्रसिद्धाः कर्मणैव संसिद्धिं आत्मप्राप्तिरूपं फलं प्राप्ताः॥ राजत्वाद्विस्तीर्णागाधमनसः ऋषित्वादतीन्द्रियार्थद्रष्टारः आत्मविदः ज्ञानिनामग्रेसराः॥ ज्ञानिनोऽपि ज्ञानयोगाभ्यासशक्ता अपि कर्मयोगस्य ५ 'कर्म ज्यायो ह्यकर्मणः' इत्यत्रोक्तदिशा अप्रमादत्वसुकरत्वादिना ज्ञानयोगापेक्षया श्रेष्ठत्वात् ज्ञान-

१. २. ६१. २. ६. १४. ३. १८. ५२. ४. १. ४३. ५. ३. ८.

योगाभ्यासमकुर्वाणाः कर्मयोगमेवाभ्यस्यन्तः ज्ञानयोगनिरपेक्षेण तेनैवात्मानं प्राप्ताः॥ अतः ज्ञानयोगयोग्योऽपि ज्ञान्यपि त्वं ज्यायस्त्वात्कर्मयोगस्य कर्तव्यं कर्म समाचर ॥ ज्ञानयोगानर्हः कर्मयोगाधिकारी ज्ञानार्थं कर्म कुर्यादिति १ 'न कर्मणामना-रम्भा'दित्यादिनोक्त्वा ज्ञानयोगयोग्योऽपि आत्मावलोकनार्थं कर्मैव कुर्यात् ॥ कर्मणः सुकरत्वादप्रमादत्वाच्च ॥ इति २ 'नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ॥' इत्यादिना अभिधाय तत्र जनकादीनामनुष्ठानं प्रमाणीकृतम् ॥ कथमिदं घटते ॥ जनकादीनामवाप्तज्ञानानां तेनैव आत्मप्राप्तिसंभवेन तदर्थं कर्मानपेक्षणात् ॥ इति चेत् जनकादयः ज्ञानिनोऽपि, वयं ज्ञानिनः अलमात्मप्राप्तये ज्ञानमेवास्माकं किं कर्मणा इति असंन्यस्य कर्माणि पूर्वसिद्धज्ञानयोगनिरपेक्षकर्ममार्ग एव स्थिताः ॥ किमर्थमिति चेत् आधिकारिकत्वाल्लोकसंग्रहार्थं ॥ जनकादयः ३ लोकसंग्रहं प्रति संसिद्धिं कर्मणैव आस्थिताः गन्तुं प्रवृत्ताः ॥ तथा त्वं ज्यान्यपि लोकसंग्रहमेव प्रयोजनं पश्यन्नपि तेनापि हेतुना कर्म कर्तुमर्हसि ॥ ४ कर्मैव कर्तुमर्हसि ॥ इति वा ॥ कर्तुमेवार्हसि न तु त्यक्तुमिति वा ॥ त्वं कर्तुमर्हसि इत्यनेन आधिकारिकस्य तव लोकसंग्रहाय कर्मकरणमेव युक्तं न तु कर्मणः परित्याग इति सूच्यते ॥ समित्यनेन सम्यगिदं विमृशेति सूच्यते ॥ २० ॥

अर्जुनः ॥ लोकसंग्रहार्थं कर्म कुर्वित्युक्तम् ॥ कथं मया कृतेन कर्मणा लोकसंग्रहो भविष्यति ॥ ब्रूहि ॥

कृष्णः ॥ यद्यदाचरति श्रेष्ठः तत्तदेवेतरो जनः ॥
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥ २१ ॥

यद्यदिति ॥ श्रेष्ठः यत् यत् आचरति करोति ॥ इतरः अन्यः जनः तत्तदेव आचरति ॥ सः श्रेष्ठः यत् प्रमाणं कुरुते लोकः तत् अनुवर्तते अनुसरति ॥ २१ ॥

ज्ञातृतया अनुष्ठातृतया च परमप्रसिद्धत्वेन प्रशस्यतमः यद्यत्कर्माऽऽचरति तदेव कर्म इतरोऽतथाविधो जनः आचरति ॥ स्वयं ज्ञात्वा कर्तुमशक्त-

---

१. ३. ४. २. ३. ८. ३. अयमर्थो मतत्रयेऽपि योज्यः ॥ लोकसंग्रहमित्यस्याऽऽवृत्तिः ॥ ४. एवेत्यनेन आत्मावलोकने ज्ञानयोगनैरपेक्ष्यं कर्मयोगस्योच्यते ॥ स्पष्टमिदमुपरिष्टात् ॥ 'कृत्वापि न निबध्यते ॥' (४. २२.) 'सांख्ययोगौ पृथग्बालाः' (५. ४.) इत्यादौ ॥

त्वात्, विद्वान् सः इदं एवं करोति मयाऽपि इदं एवमेव कर्तव्यमिति अविद्वानपि करोतिं ॥ एवं लोकसंग्रहो भवति ॥ विदुषा अनुष्ठितमविदुषाऽनुष्ठेयं इत्युक्ते शिष्ठानुष्ठितनिष्ठीवनादेरप्यनुष्ठानाऽऽपत्तिः ॥ इति चेत् सः श्रेष्ठः यत् शास्त्रं प्रमाणं कुरुते मन्यते ॥ प्रमाणमिति व्यवहरति वा ॥ सदेव प्रमाणं प्रमाणतया ज्ञापयतीति वा ॥ अज्ञो जनः तदेव शास्त्रं प्रमाणतया अनुसरति ॥ तदनुसृत्य वर्तते ॥ इति वा ॥ यत्प्रमाणमित्येकं पदम् ॥ यत् प्रमाणं यस्येति व्युत्पत्तिः ॥ शिष्टः यत्प्रमाणानुसारि कर्म करोति ॥ एतदर्थव्यक्त्यर्थमेव कुरुते इत्युक्तिः ॥ इतरः तत् तत्प्रमाणानुसारि कर्म करोति ॥ तदेव प्रमाणमनुसरति वा ॥ इति वा ॥ शिष्टेनानुष्ठितं शास्त्रीयमेव कर्म इतरेणानुष्ठेयं न तु सर्वमपि ॥ अतः न निष्ठीवनादेरशास्त्रीयस्यानुष्ठानाऽऽपत्तिः ॥ श्रेष्ठस्य कृतकृत्यतया कर्मणा प्रयोजनाभावात् अज्ञार्थमेव कर्तव्यत्वाच्च साङ्गोपाङ्गतया करणमनावश्यकमिति चेत् शिष्टः यत्प्रमाणं एकं पदम् ॥ यदङ्गयुक्तं कर्म करोति ॥ अन्यो लोकः तत् तदङ्गयुक्तमेव करोति॥ विद्वानहं ज्ञानेनैव मुक्तो भविष्यामीति कर्मणः परित्यागे वा अन्यथाऽनुष्ठाने वा लोकोपप्लवजनितपापेन ज्ञानयोगादपि प्रच्युत उभयभ्रष्टो भवेत् ॥ अतः प्रदर्शनाय अज्ञेन यथा साङ्गोपांगमनुष्ठेयं तथैव विदुषाऽप्यनुष्ठेयम् ॥ २१ ॥

अर्जुनः ॥ अवराणामुत्तमानुष्ठानानुसारेणानुष्ठातृत्वाल्लोकसंग्रहार्थं कर्म कुर्वित्युक्तम् ॥ को वा कृतकृत्यः परार्थमेव कुर्यात्कर्म ॥ सर्वेऽप्युपदिशेयुः न कोऽपि कुर्यात् ॥ 'परोपदेशसमये सर्व एव हि पण्डिताः ॥ तदनुष्ठानसमये मुनयोऽपि न पण्डिताः ॥' इति हि वदन्ति ॥ ब्रूहि ॥

कृष्णः ॥ न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किंचन ॥
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥ २२ ॥

नेति ॥ हे पार्थ अर्जुन मे मम त्रिषु लोकेषु किञ्चन किमपि कर्तव्यं नास्ति ॥ न अवाप्तं अनवाप्तं अवाप्तुं योग्यं अवाप्तव्यं च नास्ति ॥ अहं कर्मण्येव वर्ते ॥ कर्मणि वर्त एव ॥ २२ ॥

न केवलमहमुपदिशाम्येव ॥ किंतु लोकसंग्रहार्थमनुतिष्ठामि च ॥ कर्मणि वर्ते एव ॥ १'प्रसिद्धं तत् ॥ कर्मण्येव वर्ते इति वा ॥ इतरेषामिव तवापि विधिनिय-

१- च शब्दो हि शब्दार्थे ॥

म्यत्वात् त्वं कर्मणि वर्तसे ॥ कथमयमुपकारः ॥ इति चेत् त्रिषु लोकेषु मम कर्तव्यं कर्म किमपि नास्ति ॥ नाहं विधिनियम्यः ॥ कुत इति चेत् सर्वेश्वरः सर्वज्ञः सर्वशक्तिश्चाहम् ॥ अतो न विधिनियम्यः ॥ अनीश्वरो हि विधेर्विषयः ॥ अत एव नाकरणे प्रत्यवायोऽपि मम ॥ ईश्वरमपि भवन्तं विधिर्नियमयेत् इति चेत् मे त्रिषु लोकेषु अनवाप्तं कर्मणा अवाप्तव्यं किमपि प्रयोजनं नास्ति ॥ स्वतः परिपूर्णकामत्वात् ॥ विधिविहितेन कर्मणा प्राप्यस्य प्रयोजनस्य प्राप्तये हि विधिविहितमनुष्ठेयं ॥ स्वतः परिपूर्णकामस्य मम कर्मणा साध्यस्य प्रयोजनस्याभावात् न मां विधिर्नियन्तुं शक्नुयात् ॥ १ तथाऽप्यहं कर्मानुतिष्ठामि ॥ तस्य तु न प्रयोजनान्तरमस्ति ॥ अतो लोकसंग्रहमेव प्रयोजनं २संपश्यन् कर्मानुतिष्ठामि ॥ अतो लोकसंग्रहार्थं कर्मकरणे मामेव निदर्शनतया पश्य ॥ ईदृशोऽहमपि लोकसंग्रहार्थं कर्म करोमि ॥ किंपुनरनीश्वरेण विधिनियम्येन कर्मसाध्यज्ञानभक्तिवैराग्यादिसाधनतत्साध्यमोक्षरूपप्रयोजनवता अकरणे प्रत्यवायवता च त्वया कर्तव्यं कर्म कार्यमिति ॥ मम निःस्पृहत्वात् न कर्मणा कृत्यं ॥ उक्तं हि मया ॥ ३'न कांक्षे विजयं कृष्णे'त्यादिना ॥ इति चेत् अस्मिन् लोके प्रयोजनाकांक्षाऽभावेऽपि पारलौकिकमोक्षादिप्रयोजनाकांक्षाया विद्यमानत्वात् ॥ अत एव हि ४'यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे' इति, ५'तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयां ॥' इति चाहमभ्यर्थितस्त्वया ॥ श्रेष्ठेन खलु लोकसंग्रहाय कर्म कर्तव्यं ॥ किमहं श्रेष्ठः इति चेत् पृथासुतः किल त्वं ॥ कुन्यामिन्द्राज्जातस्त्वं अतिवरिष्ठोऽसि महाक्षत्रियकुलप्रसूतत्वेन शूरापत्यापत्यत्वेन च मत्समोऽप्यसि ॥ अतस्त्वया मयेव लोकसंग्रहार्थं कर्म कर्तव्यं ॥ अत एव कर्तुमर्हसीत्युक्तं मया ॥ अतस्तदर्थं कर्म कुरु ॥ २२ ॥

अर्जुनः ॥ अहमिव त्वमपि लोकसंग्रहार्थं कर्म कुर्वित्युक्तं ॥ मादृशानां पारलौकिकप्रयोजनोत्पादकभगवत्प्रीतिसंपादनाय लोकसंग्रहार्थं कर्मकरणमावश्यकं ॥ अवाप्तसमस्तकामस्य तव न तेनापि कृत्यं ॥ किमर्थं करोषि ॥ अहं करोमीति किमर्थमुपकार आरोप्यते ॥ मा कुरु ॥ मा चैवं वादीः॥ किं ब्रवीषि ॥

१. वि ॥ चशब्दार्थः ॥ २. लोकसंग्रहं संपश्यन् कर्तुमर्हसि ॥ संपश्यन् यद्यदाचरति ॥ संपश्यन् कर्मण्येव वर्ते ॥ इति श्लोकत्रयेऽपि संबध्यते ॥ एवमुत्तरत्रापि ॥ ३. १. ३२. ४ २ ७ ८ ९ -

कृष्णः ॥ यदि ह्यहं न वर्तेय जातु कर्मण्यतन्द्रितः ॥
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥ २३ ॥

यदीति ॥ अहं तन्द्रा आलस्यं सा सञ्जाताऽस्य तन्द्रितः न तन्द्रितः अतन्द्रितः सन् जातु कदाचित् कर्मणि यदि न वर्तेय ॥ न वर्तेयमिति पाठान्तरम् ॥ हे पार्थ सर्वशः सर्वे मनुष्याः मम वर्त्म मार्गं अनुवर्तन्ते अनुवर्तेरन् ॥ २३ ॥

अहं लोकसंग्रहं पश्यन् आलस्यहीनः सन् कदाचित् कर्मणि न वर्तेयं चेत् जातु कदाऽपि न वर्तेयं यदि सर्वदाऽपि न कुर्यां चेदिति यावत् ॥ इति वा ॥ तर्हि सर्वेऽपि मनुष्याः मम तमेव कर्माकरणमार्गमनुवर्तेरन् ॥ मद्दृष्टान्तेन कर्म त्यजेयुः ॥ सर्वैः प्रकारैः मामनुवर्तेरन्निति वा ॥ अहं कर्मणि कदाचित् कदाऽपि वा आलस्यहीनो न वर्तेयं चेत् आलस्यवान् स्यां चेदिति यावत् ॥ इति वा ॥ त्वयि कर्माकुर्वाणे कुतोऽन्ये त्यजेयुरिति चेत् ॥ [1] सर्वेऽपि मनुष्याः शिष्टजनाग्रेसरवसुदेवकुले जातस्य अत एव परमधार्मिकतया गृहीतस्य असाधारणैः कार्यविशेषैः प्रकटितेश्वरभावस्य मम मार्गमेव अनुवर्तन्ते ॥ अतः मय्यकुर्वाणे मद्दृष्टान्तेन सर्वेऽपि त्यजेयुः ॥ पार्थेदं विमृश ॥ स्वतः परिपूर्णकामः कृष्णोऽपि करोति मयाऽपि कर्तव्यमिति विमृश्य त्वं लोकसंग्रहार्थं कर्म कुरु ॥ २३ ॥

अर्जुनः ॥ मम वर्त्मानुवर्तेरन्नित्युक्तम् ॥ अनुवर्तन्तां नाम तव वर्त्म ॥ को दोषः ॥ वद ॥

कृष्णः ॥ उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम् ॥
सङ्करस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः ॥ २४ ॥

उत्सीदेयुरिति ॥ अहं कर्म न कुर्यां चेत् इमे लोकाः जनाः उत्सीदेयुः नश्येयुः ॥ इमाः प्रजाः अहं उपहन्यां नाशितवान् स्याम् ॥ सङ्करस्य कर्ता च स्याम् ॥२४॥

अहं कर्म न कुर्यां चेत् मद्दृष्टान्तेन कर्माकुर्वाणाः सर्वे जनाः कर्तव्यधर्मत्यागेन नरकाद्यनर्थं प्राप्नुयुः ॥ न केवलं तत् ॥ धर्मलोपेन तत्तद्वर्णाश्रमभेदव्यवस्था लुप्येत ॥

---

१. उत्तरार्धस्याऽऽवृत्तिः ॥

ततश्च वर्णानां साङ्कर्यं स्यात् ॥ वर्णसाङ्कर्यं चानर्थावहमिति त्वयैवाभिहितम् ॥ १ 'सङ्करो नरकायैवे'त्यादिना २ 'नरके नियतं वासो भवती'त्यन्तेन ॥ तस्य कर्ता अहमेव स्याम् ॥ तेन सर्वाः प्रजाः वर्णाश्रमव्यवस्थामूलकतत्तद्धर्मविपरिलोपादनर्थभागिनीः अकरणेन तत्तत्फलभूतस्वर्गपशुपुत्रादिप्रयोजनहीनाश्च कुर्याम् ॥ न कुर्यां चेत् उत्सीदेयुः स्वस्वकर्माणि त्यजेयुः ॥ स्वकर्मभ्रंश एव नाशः ॥ कर्मभ्रंशे नाशशब्दप्रयोगो दृश्यते ॥ कर्मभ्रष्टं नष्टोऽयमिति व्यवहरन्ति ॥ ततश्च संकरः स्यात् ॥ तस्य चाहं कर्ता स्यां तेन सर्वाः प्रजाः नरकाद्यनर्थभागिनीः कुर्याम् ॥ इति वा ॥ न कुर्यां कर्म चेदहं तर्हि इमे लोकाः नश्येयुः ॥ ३ 'अन्नाद्भवन्ति भूतानि' इत्युक्तदिशा लोकस्थितिहेतोः कर्मणोऽभावात् लोकानामनुत्पत्तिः उत्पन्नानां नाशश्च स्यात् ॥ वर्णसंकरश्च स्यात् ॥ तस्य च कर्तृभूतोऽहं स्याम् ॥ तेन सर्वाः प्रजाः नाशयेयम् ॥ इति वा ॥ यद्यहं वर्णाश्रमोचितं स्वकुलोचितं च कर्म न कुर्याम् ॥ तर्हि जातिधर्मान् कुलधर्माश्च अनुतिष्ठासवोऽपि महद्दान्तेन तांस्त्यजेयुः ॥ ततश्च धर्मसांकर्यं स्यात् ॥ कथमिति चेत् ब्राह्मणधर्मान् युद्धाकरणादीन् क्षत्रियाः कुर्युः ॥ तेन च उत्सीदेयुः ॥ नरकाद्यनर्थं प्राप्नुयुः॥ वक्ष्यते च मया ॥ परधर्मानुष्ठानस्य नरकाद्यनर्थहेतुत्वं ४ 'परधर्मोभयावहः ॥' इति ॥ एतादृशसङ्करकरणेन सर्वाः प्रजाः उपहन्याम् ॥ स्वधर्मत्यागपरधर्मानुष्ठानाभ्यां भ्रष्टत्वेन पश्चादपि धर्मकरणानर्हाः कुर्यामिति वा ॥ यद्यन्यः सङ्करस्यैवं कर्ता स्यात् तर्हि तेन दोषेण तस्यानर्थः स्यात् ॥ न च तथा तव ॥ ईश्वरत्वेन दोषास्पर्शात् ॥ इति चेत् ईश्वरत्वान्नदोषेण लिप्येय ॥ दुष्टनिग्रहशिष्टपरिपालनधर्मस्थापनार्थमवतीर्णोऽहम् ॥ वक्ष्यते च ॥ ५ 'यदा यदा हि धर्मस्य ग्लानिर्भवति भारते'त्यादि ॥ धर्मसंस्थापनेन प्रजापालनार्थमवतीर्णस्य करुणावरुणालयस्य सर्वेश्वरस्य ६ 'सहयज्ञाः प्रजाः सृष्ट्वे'त्युक्तरीत्या जगत्क्षेमार्थं धर्मान् सृष्टवतो मम इदं सुतरामननुरूपमापद्येत ७ 'विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतम् ॥' इति हि न्यायः ॥ किं लोकसंग्रहार्थं कर्मकरणोपदेशेन ॥ किमनुष्ठातॄन् शिष्टान् दृष्ट्वा अन्ये अनुतिष्ठन्ति ॥ किन्तु स्वयं परिहसन्ति तान् ॥ अतः कथं लोकसंग्रहो भवेदित्युच्यते ॥ इति चेत् अत्र लोकशब्देन ज्ञानार्थं कर्मानुतिष्ठासवः शिष्टा गृह्यन्ते ॥ न तु नास्तिका भ्रष्टाः ॥ अत एव वक्ष्यते ॥ ७ 'न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् ॥'

१. १. ४२. २. १. ४४. ३. ३. १४. ४. ३. ३५. ५. ४. ७. ६. ३. १०. ७. ३. २६.

इति ॥ पाण्डुपुत्रः कुन्तीतनुभवः युधिष्ठिरानुजः स्वयमर्जुनस्त्वं लोकरक्षार्थं कर्म कर्तुमर्हसि ॥ २४ ॥

यद्यदाचरतीत्यादेरपरा योजना ॥ न केवलं लोकसंग्रहार्थम् ॥ किन्तु शिष्टो यद्यदाचरति तत्तदेवेतरो जन आचरति ॥ अतः शिष्टाचारानुवर्तनार्थं च कर्तुमर्हसि ॥ कोऽसौ शिष्टः कीदृशश्च तस्याचारः इति चेत् अहमेव शिष्टः लोकसंग्रहार्थो मदीयो यथाशास्त्रमनुष्ठीयमान आचारः ॥ इति ॥

अर्जुनः ॥ अविद्वानिव विद्वानपि लोकसंग्रहार्थं कर्म कुर्यात् ॥ अतः त्वमपि तदर्थं कुर्वित्युक्तम् ॥ अविदुषेव विदुषाऽपि विहिते कर्मणि यथावदनुष्ठीयमाने को विदुषोऽविदुषस्सकाशाद्विशेषः ॥ ज्ञानाभिमानेन विहित कर्मानुतिष्ठन्तं स्वर्गादिफलोद्देशेन काम्यं कर्मानुतिष्ठन्तं च अज्ञमिवैनं मन्येरन् ॥ ततश्च का प्रतिष्ठा विदुषः ॥ ब्रूहि ॥

कृष्णः ॥ सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत ॥
कुर्याद्विद्वांस्तथाऽसक्तश्चिकीर्षुर्लोकसंग्रहम् ॥ २५ ॥

न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् ॥
जोषयेत्सर्वकर्माणि विद्वान युक्तस्समाचरन् ॥ २६ ॥

सक्ता इति ॥ न विद्वांसः अविद्वांसः अज्ञाः कर्मणि सक्ताः सन्तः यथा कुर्वन्ति ॥ हे भारत अर्जुन विद्वान् ज्ञानी लोकानां संग्रहः लोकसंग्रहः तं कर्तुमिच्छुः चिकीर्षुः सन् न सक्तः असक्तः सन् तथा कुर्यात् ॥ विद्वान् ज्ञानी अज्ञानां सङ्गः एषां अस्तीति सङ्गिनः कर्मणि सङ्गिनः कर्मसङ्गिनः तेषां कर्मसङ्गिनां बुद्धेः भेदः बुद्धिभेदः तं न जनयेत् ॥ किन्तु युक्तः सन् समाधानवान् सन् सर्वाणि च तानि कर्माणि च सर्वकर्माणि तानि सम्यक् अज्ञवत् साङ्गोपाङ्गतया आचरन् कुर्वन् समाचरन् सन् तानि जोषयेत् सेवयेत् कारयेत् ॥ २५ ॥ २६ ॥

अविद्वांसः कर्मणि तत्फले ज्ञाने स्वर्गादौ च सक्ताः यथा कर्म कुर्वन्ति ॥ विद्वान् लोकसंग्रहं कर्तुं इच्छुस्सन् तथा अज्ञवदेव कुर्यात् ॥ किन्तु असक्तः सन् कुर्यात् ॥ अ-

यमेव विदुषोऽविदुषः सकाशात् विशेषः ॥ असक्तश्चेत्किमर्थं कर्तव्यमिति चेत् लोकसंग्रहार्थम् ॥ मन्यते नाम लोकसंग्रहार्थं कर्म कुर्वन्तं विद्वांसमविद्वांसं ॥ न तावता तस्य हानिः ॥ बाह्यानुष्ठानसाम्येऽपि आन्तरविशेषस्य सत्त्वात् ॥ तं विशेषं को वा ज्ञातुं शक्नोतीति चेत् जानातु वा मा वा तं विशेषमन्यः ॥ विद्वांसमविद्वांसं मन्यमानेन विदुषः वा हानिः ॥ विद्वांसं मन्यमानेन विदुषः को लाभः ॥ विशेषानुसारेण फलसाताऽहम् ॥ जानामि तमहमान्तरविशेषम् ॥ सैव प्रतिष्ठा विदुषः ॥ विद्वान् कर्तव्यकर्माकरणेन अज्ञानां कर्मणि [1]सङ्गशब्दितप्रीतिमतां श्रद्धापूर्वकं कर्म कुर्वतामिति यावत् ॥ कर्मानुष्ठानबुद्धेश्चालनं न कुर्यात् ॥ [2]सर्वं मिथ्येति तत्त्वोपदेशेन कर्मानुष्ठानबुद्धेश्चालनं न कुर्यादिति वा ॥ किंतु युक्तः मनःसमाधानवान् सन् भगवति मनोयोगं युञ्जन् सन् इति वा ॥ कर्माणि यथावदाचरन् सन् स्वहृष्टान्तेन कर्तव्यानि सर्वाणि कर्माणि जोषयेत् प्रीत्या सेवयेत् श्रद्धापूर्वकं कारयेत् ॥ अज्ञानां संग्रहार्थं अज्ञवदनुतिष्ठेत् ॥ अज्ञैरज्ञवद्व्यवहरेच्च ॥ कर्मतद्देवतातत्फलादेस्सर्वस्य मिथ्यात्वं जानन्नपि अज्ञेषु कर्मसंगिषु तदप्रकाशयन् कर्मादेः प्रशंसां च कुर्वन् तत्र रुचिमुत्पाद्य श्रद्धापुरस्सरं अनुष्ठापयेत् ॥ मिथ्यात्वोपदेशे मिथ्यात्वज्ञानेन कर्मणां निष्फलत्वं ज्ञानयोगाप्राप्त्या च तेषामुभयभ्रष्टता स्यात् ॥ ततश्च ते निरयं प्राप्नुयुः ॥ मिथ्यात्वमुपदिष्टवान् ज्ञान्येव नरके पातितवान् स्यात् ॥ मिथ्यात्वज्ञानस्य किं फलमिति चेत् ॥ स्वयं मिथ्यात्वेनानुसंधानं मिथ्यात्वं जानता तत्त्वविदा यथावद्व्यवहरणं च फलम् ॥ मोक्षसिद्धिश्च महाफलम् ॥ वरिष्ठासु परीक्षासु लब्धोत्कर्षा अपि पाठशालाध्यापकाः प्रथमादिकक्ष्यापाठनावसरे न प्रकाशयन्ति स्वपाण्डित्यम् ॥ किन्तु तद्बोधनोपयोगिभिरल्पज्ञसुलभैरेव शब्दैर्व्यवहरन्ति ॥ स्वतुल्यैः स्वपाण्डित्यानुगुणं व्यवहरन्तीति प्रसिद्धमिदं लोके॥लोकसंग्रहमित्यत्र लोकशब्देन किं ज्ञानार्थं ये कर्मानुतिष्ठन्ति तेषां ग्रहणं उत स्वर्गाद्यर्थं ये काम्यकर्मानुतिष्ठन्ति तेषां ग्रहणं इति चेत् उभयेषामपि ग्रहणम् ॥ कुत इति चेत् त्वमज्ञानी चेत् ज्ञानार्थं

१. देहेन्द्रियादिभिः क्रियमाणेषु कर्मसु अहं कर्ता भोक्ता इत्यादिरूपोऽभिमानः संगः तद्वत्ता ॥ २. अत्र, 'अज्ञस्यार्थप्रबुद्धस्य सर्वं ब्रह्मेति यो वदेत् ॥ महानिरयजालेषु स तेन विनिपातितः ॥' इति वचनमनुसंधेयं ॥ नास्तिकतया कर्मस्वप्रवृत्तो निद्राळुः ॥ मुमुक्षया स्वर्गाद्यपेक्षया वा कर्मसु प्रवृत्तोऽर्धप्रबुद्धः ॥ कर्मणा ज्ञानं प्राप्तवान् सम्यक् प्रबुद्धः ॥ इति विवेकः ॥

कुरु ॥ ज्ञानी चेत् लोकसंग्रहार्थं कुरु ॥ इत्युक्तम् ॥ अनुतिष्ठन्तं शिष्टं ज्ञानिनं दृष्ट्वा ज्ञानार्थिना ज्ञानार्थं स्वर्गाद्यर्थिना स्वर्गाद्यर्थं च कर्तव्यम् ॥ अज्ञानां अतएव ज्ञानार्थं कर्मसङ्गिनां इति ज्ञानार्थं कर्मानुतिष्ठतां विवक्षा सूच्यते ॥ कर्मणि सक्ता इति फलाभिसंधिकर्तृत्वाभिमानादेरुक्तया अविद्वदनुष्ठानविवरणपरे 'प्रकृतेः क्रियमाणानी'त्यत्र 'अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते ॥' इति तद्विवरणेन च काम्यकर्मानुतिष्ठतां विवक्षा सूच्यते ॥ ज्ञानार्थं ये अनुतिष्ठन्ति तेषामेव ग्रहणं प्रकरणानुगुण्यात् ॥ तेषां ज्ञानाभावेन तत्कर्मणः फलापेक्षया कर्तृत्वाभिमानादिना चानुष्ठीयमानत्वेन 'सक्ताः कर्मणी'त्यस्य 'कर्ताऽहमिति मन्यत' इत्यस्य चोपपत्तेः ॥ इति चेत् ज्ञानार्थमनुष्ठीयमानेन कर्मणा फलसङ्गादिरहितेन भाव्यमित्यस्यार्थस्य १ 'कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः ॥' इत्यादिनाऽवगमात् अत्र उभयेषां ग्रहणम् ॥ ज्ञानार्थकर्मण एव ग्रहणं वाच्यं ॥ ज्ञानार्थं अज्ञैरनुष्ठीयमाने अकाम्यकर्मणि फलसंगादिराहित्यं स्थूलम् ॥ सूक्ष्मरूपेण फलसंगादेर्विद्यमानत्वात् ॥ सूक्ष्मरूपेण विद्यमानफलसंगादिप्रतिपादनपरं 'सक्ताः कर्मणि' 'कर्ताऽहमिति मन्यते' इति च ' ॥ ज्ञानेनानुष्ठीयमाने कर्मणि फलसंगादिराहित्यं सूक्ष्मम् ॥ 'असक्त' इति 'तत्ववित्तु' इत्यत्र 'न सज्जत' इति च तत्प्रतिपादनपरम् ॥ अतो न कोऽपि विरोधः ॥ इति वा ॥ त्वं तु भरतवंशोत्पन्नत्वेन विशिष्टाधिकारिकक्षत्रियत्वात् स्वानुष्ठानेन कर्माणि जोषयितुमर्हसि ॥ अतः कर्तव्यमेव त्वया कर्म ॥ २५ ॥ २६ ॥

वि ॥ अर्जुनः ॥ व्यपदेश्यः विशिष्टः शिष्टो ज्ञान्यपि लोकरक्षार्थं कर्म कुर्यादित्युक्त्या तत्र 'वर्त एव च कर्मणी'त्यात्मानं प्रमाणीकृत्य अतः विशिष्टः शिष्टस्त्वमपि लोकसंग्रहार्थं कर्म कुर्वित्युक्तम् ॥ ज्ञानी लोकसंग्रहार्थं स्वा[illegible]धिकारतिरस्कारेण अविद्वदधिकारानुरूपमाचरेद्वा ॥ वद ॥

कृष्णः ॥ अविद्वांसः अतएव ज्ञानयोगाभ्यासेनैवात्मानमुपलब्धुमसमर्थाः अतः कर्मणि सक्ताः कर्मयोगाधिकारिणः आत्मावलोकनाय यथा कर्मैव कुर्वन्ति ॥ तथा विद्वान् कर्मण्यसक्तः ज्ञानयोगाभ्यासेनैवात्मानमुपलब्धुं समर्थोऽपि लोकसंग्रहचिकीर्षया आत्मावलोकनाय कर्मैव कुर्यात् ॥ अज्ञानां ज्ञानयोगेऽनधिकारात् कर्मयोगे सक्तानां ज्ञानयोगाधिकारित्वेऽपि, सुकरत्वादप्रमादत्वाच्च कर्मणस्तत्रैव सक्ता-

१. ३. ५१.

नां कर्मयोगादन्यदात्मावलोकनसाधनमस्तीति स्वीयज्ञानयोगाभ्यासेन मतिमुत्पाद्य कर्मानुष्ठानबुद्धेः भेदनं न कुर्यात् ॥ किंतु स्वयं कर्म सम्यगाचरन् सन् स्वानुष्ठानेन ज्ञानयोगनिरपेक्षं कर्मैव आत्मावलोकनसाधनमिति मतिमुत्पाद्य सर्वकर्माणि कारयेत्॥ यदि, यदि ज्ञानयोगाभ्यासशक्तोऽयं तमकुर्वन् लोकसंग्रहार्थं कर्माणि प्रवर्तेय॥ तर्हि मम ज्ञाननिष्ठामूलकात्मावलोकनसिद्धिः अल्पः स्यादित्येवं मन्येत ॥ तर्हि न कर्मणि प्रवर्तेतेति चेत् युक्तः योगोऽयं बुद्धियोगः स च कर्मणि समत्वबुद्धियोग इव ज्ञाननिष्ठानैरपेक्ष्येण कर्मणः एवाऽऽत्मावलोकनसाधनत्वबुद्धियोगः तद्युक्तः समाचरन् जोषयेत् ॥ अस्तु मे ज्ञानयोगाभ्यासः लोकसंग्रहार्थं क्रियमाणेनानेन कर्मणैव ज्ञानयोगनिरपेक्षेण आत्मावलोकनं सेत्स्यतीति कृतनिश्चयः सन् स्वयं कृत्वा आत्मदृष्टान्तेन अन्यानपि तत्तत्कर्म कारयेत् ॥ अन्यथाकरणे अकरणे च, स्वं दृष्टान्तीकुर्वतां अज्ञानां कर्मलोपमूलकदुर्गतिप्रापकत्वेन सुमहाननर्थोऽस्य स्यात् ॥ अतः व्यपदेश्यः शिष्टो विशिष्टः स्वाधिकारतिरस्कारेण अविद्वदधिकारानुरूपमेवाऽऽचरेत ॥ अतस्त्वमपि तथा समाचर ॥ २५ ॥ २६ ॥

अर्जुनः ॥ विद्वदविदुषोः अनुष्ठानसाम्येऽपि आन्तरो विशेषोऽसक्तः 'सक्ता' इत्युक्तः ॥ तत्र प्रथमनिर्दिष्टं 'सक्ता' इत्युक्तं अविदुषो विशेषं हेतूकृत्या उपपादय ॥

कृष्णः ॥ प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ॥
अहङ्कारविमूढाऽऽत्मा कर्ताऽहमिति मन्यते ॥ २७ ॥

प्रकृतेरिति ॥ अहङ्कारेण विमूढः अहङ्कारविमूढः आत्मा यस्य सः अहङ्कारविमूढात्मा पुरुषः प्रकृतेः गुणैः क्रियमाणानि सर्वशः सर्वाणि कर्माणि प्रति अहं कर्ता इति मन्यते ॥ २७ ॥

अविद्वान् प्रकृतेः प्रकृष्टकृतिमतः ईश्वरस्य गुणैः इच्छासङ्कल्पादिभिः प्रकृतेः जडापेक्षया प्रकृष्टकृतिमतः जीवस्य गुणैः अदृष्टादिभिः प्रकृतेः जडप्रकृतेः गुणैः सत्वरजस्तमोगुणैः प्रकृतेः गुणैः कार्यभूतैः देहेन्द्रियादिभिः क्रियमाणानि सर्वशः १ सर्वाणि कर्माणि प्रति २ कर्मणां वा अहं कर्ता इति मन्यते ॥ कुत

१. सर्वैः प्रकारैः क्रियमाणानि ॥ सर्वैः प्रकारैः अहंकारविमूढात्मा॥ इति वा॥ कर्तेति तृन्नन्तम्॥ तेन न षष्ठी ॥ इति भावः ॥

इति चेत् ॥ अहङ्कारेण विमूढबुद्धिः देहेन्द्रियादावनात्मनि आत्मतादात्म्याध्यासः अहङ्कारः तेन विविधं मूढः मोहं प्राप्तः आत्मा मनो बुद्धिर्वाऽस्य ॥ देहेन्द्रियादावात्माध्यासेन विमूढः मोहं प्रापितः द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता चाहं इति तत्तदुपाधिसंबन्धसंभावितविपरीतवृत्तीनां विषयतां गमितः आत्मा प्रत्यगात्माऽनेन । अहंकारेण विमोहितः अविद्वितः आत्मा प्रत्यगात्मा अनेन ॥ अहङ्कारेण विमूढः अनात्मधर्मान् आत्मधर्मत्वेन पश्यन् आत्मनश्च असंगानन्दसंविद्रूपतामपश्यन् स चासौ आत्मा च तादृशोऽयम् ॥ अनात्मनि प्रकृतौ अहंप्रत्ययेन विमूढात्मा अज्ञातस्वस्वरूपः ॥ अतोऽहं कर्ता इति मन्यते ॥ अतः कर्तृत्वाभिमानफलापेक्षापूर्वकं कर्म करोति ॥ इदमेवोक्तं 'सक्तः कर्मण्यविद्वांसः' इति ॥ २७ ॥

अर्जुनः ॥ 'विद्वांस्तथाऽसक्तः' इत्युक्तं विदुषो विशेषं हेतूकृत्वा उपपादय ॥

कृष्णः ॥ तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः ॥
गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते ॥ २८ ॥

तत्त्वविदिति ॥ हे महाबाहो अर्जुन गुणाश्च कर्माणि च गुणकर्माणि तेषां विभागौ गुणकर्मविभागौ तयोः गुणकर्मविभागयोः तत्त्वं वेत्तीति तत्त्ववित् तु गुणाः गुणेषु वर्तन्ते इति मत्वा न सज्जते ॥ २८ ॥

गुणानां गुणशब्दोक्तानां ईश्वरेच्छादीनां पूर्वोक्तानां विभागे कर्मणां [1]विभागे च तत्त्वज्ञः ॥ [2]विभागयोस्तत्त्वं जानन्तः ॥ अत एव विशिष्टः गुणानां सत्त्वादीनां भागः गुणविभागः कर्मणां तैः क्रियमाणानां कर्मणां भागः कर्मविभागः तयोर्विषये तत्त्वज्ञः ॥ गुणानां चक्षुरादीनां इन्द्रियाणां अहङ्कारास्पदानां विभागः गुणविभागः कर्मणां दर्शनादीनां ममकारास्पदानां विभागः कर्मविभागः तयोः तत्त्वज्ञः ॥ नाहं गुणात्मकः इति गुणेभ्य आत्मनो विभागः गुणविभागः न मे कर्माणीति कर्मभ्य आत्मनो विभागः कर्मविभागः तयोः तत्त्वज्ञः ॥ विभज्यते पृथक् भवतीति विभागः गुणकर्मादिभ्यो भिन्न आत्मा गुणाश्च कर्माणि च एषां समाहारः गुणकर्म गुणकर्म च विभागश्च गुणकर्मविभागौ तयोः गुणानां कर्मणां आत्मनश्च तत्त्वज्ञः विद्वांस्तु गुणाः ईश्वरे-

१. सप्तमीति भावः । २. षष्ठीति भावः ॥

च्छादयः गुणेषु जीवादृष्टादिषु हेतुतया वर्तन्ते ॥ ते च सत्त्वादिगुणेषु ते च देहेन्द्रियादिषु ते च स्वकार्येषु दर्शनादिषु तैश्च इन्द्रियाणि विषयेषु प्रवर्तते ॥ ईश्वर एव स्वतंत्रो जीवादृष्टाद्यनुसारेण स्वार्थोनायाः प्रकृतेः कार्यभूतैः देहेन्द्रियादिभिः तत्तत्कार्यं करोति ॥ अतो मम न क्वापि स्वातंत्र्यमिति मत्वा न सज्जते ॥ अहं ममेत्यभिमानं न करोति ॥ सत्त्वादिगुणाः स्वकार्येषु वर्तन्ते इति मत्वा न कर्तृत्वाभिमानं करोतीति वा ॥ करणात्मकाः गुणाश्चक्षुरादयः विषयेषु प्रवर्तन्ते नासंग आत्मा इति मत्वा न सज्जते ॥ इति वा ॥ तत्ववित् गुणा गुणेषु वर्तन्ते इति मत्वा गुणकर्मविभागयोः न सज्जते ॥ इति वा ॥ अयमेव विशेषः विद्वांस्तथाऽसक्त इत्युक्तः ॥ महाबाहुत्वात्स्वधर्मं युद्धरूपं कर्तुं समर्थोऽसि ॥ अतः स्वधर्ममनुष्ठापयितुं लोकसंग्रहार्थं वा कर्म कुरु इति त्वं निर्बध्यसे ॥ २८ ॥

अर्जुनः ॥ अस्त्वेवं विद्वदविदुषोरांतरो विशेषः ॥ विदुषा किं कर्तव्यम् ॥ विस्पष्टं ब्रूहि ॥ किं विदुषा अविदुषां तत्वोपदेशः कार्यः ॥

कृष्णः ॥ प्रकृतेर्गुणसंमूढाः सज्जंते गुणकर्मसु ॥
तानकृत्स्नविदो मंदान् कृत्स्नविन्न विचालयेत् ॥ २९ ॥

प्रकृतेरिति ॥ प्रकृतेः गुणैः गुणेषु वा सं नितरां मूढाः गुणसंमूढाः पुरुषाः गुणानां कर्माणि गुणकर्माणि गुणाश्च कर्माणि च गुणकर्माणि इति वा तेषु सज्जन्ते ॥ कृत्स्नं विदन्तीति कृत्स्नविदः न कृत्स्नविदः अकृत्स्नविदः तान् मन्दान् कृत्स्नं वेत्तीति कृत्स्नवित् न विचालयेत् ॥ २९ ॥

प्रकृतेः ईश्वरस्य गुणैः इच्छादिभिः प्रकृतेः जडप्रकृतेः गुणैः सत्त्वादिभिः तस्याः गुणेषु नितरां मोहं प्राप्ताः स्वातंत्र्याभिमानिनः गुणकर्मसु गुणेषु शब्दादिषु कर्मसु स्वेन क्रियमाणेषु कर्मसु च सज्जन्ते सक्ता भवन्ति ॥ गुणेषु सक्तिः स्नेहातिशयः । कर्मसु सक्तिः स्वातंत्र्याभिमानः तद्वन्तो भवन्ति ॥ गुणकर्मविभागे किञ्चिदपि अजानतः मन्दान् अयोग्यजनान् कृत्स्नवित् ज्ञानी उपदेशेन न चालयेत् ॥ कुत इति चेत् ते अयोग्याः उपदेशमादराद्न गृह्णीयुः ॥ योग्यस्योपदेशः कार्यः ॥

अयोग्यस्य तु वादरूपेण अर्थः प्रकाशनीयः ॥ स्वानुष्ठानमुखेन कर्माणि जोषयेत्॥ अतः त्वमेवं कुरु ॥ २९ ॥

अ ॥ प्रकृतेः गुणैः देहेन्द्रियादिभिः संमूढाः देहेन्द्रियादीनेव आत्मानं मन्यमानाः सन्तः गुणकर्मसु गुणानां देहेन्द्रियादीनां कर्मसु सज्जन्ते ॥ अहंममेत्यभिमानवन्तो भवन्ति ॥ प्रकृतेः गुणैः सत्वादिभिः । गुणेषु इन्द्रियेषु तत्कर्मसु विषयेषु च सज्जन्ते ॥ गुणैः अहंकारादिभिः । प्रकृतेः गुणेषु [illegible] तत्कर्मसु च सज्जन्ते ॥ तान् अकृत्स्नविदः अनात्मविदः मूढान् कृत्स्नवित् आत्मवित् कृत्स्नशब्दः सर्वात्मको य आत्मा तत्परः ॥ न विचालयेत् अकरणेन सर्वं मिथ्येत्युपदेशेन च कर्मानुष्ठानाच्चालनं न कुर्यात् ॥ अल्पज्ञान् सर्वज्ञो न विचालयेदिति वा ॥ अतो लोकसंग्रहाय विदुषाऽपि त्वया कर्तव्यं कर्म ॥ २९ ॥

वि ॥ प्रकृतेः गुणैः सत्वादिभिः आत्मनि विषये संमूढाः सत्वादिगुणनिमित्तकर्मस्वेव सज्जन्ते ॥ आत्मविषये अकृत्स्नवित्तया आत्मावलोकनाय ज्ञानयोगाभ्यासमेव कर्तुमसमर्थाः आत्मावलोकनाय कर्मस्वेव प्रवर्तन्ते ॥ इदमेवोक्तं 'अज्ञानां कर्मसङ्गिना'मिति ॥ 'अविद्वांसः' 'कर्मणि सक्ताः' इति च ॥ तान् अकृत्स्नविदः मन्दान् आत्मनि कृत्स्नवित् अतएव आत्मावलोकनाय ज्ञानयोगाभ्यासशक्तोऽपि न विचालयेत् स्वीयेन ज्ञानयोगाभ्यासेन आत्मावलोकनाय कर्मयोगादन्यदस्तीति मतिमुत्पाद्य कर्मानुष्ठानात् न चालयेत् ॥ किंतु स्वयं कुर्वन् तैः कारयेत् ॥ कथं विदुषा कर्तव्यमिति चेत् आत्मनि कर्तृत्वानुसन्धानमकुर्वन् कुर्यात् ॥ तर्हि कर्तृत्वानुसन्धानं कुत्र कार्यमिति चेत् प्रकृतेः गुणेषु कर्तृत्वानुसंन्धानं कार्यम् ॥ गुणेषु कर्तृत्वानुसन्धानं नाम आत्मनो न स्वरूपप्रयुक्तमिदं कर्तृत्वं किंन्तु गुणसंपर्ककृतमित्यनुसन्धानम् ॥ इदमेवोक्तं 'गुणा गुणेषु वर्तन्ते इति मत्वा न सज्जते ॥' इति ॥ २९ ॥

अर्जुनः ॥ विद्वदविदुषोर्बाह्यानुष्ठानसाम्येऽपि आन्तरविशेषसत्वात् विदुषा लोकसंग्रहार्थं कर्म कर्तव्यमित्युक्तम् ॥ अस्त्वेवमेतत् मया किं कर्तव्यं ॥ कर्म कर्तव्यमिति चेत् किं तत्कर्म मया कर्तव्यम् ॥ कथं कर्तव्यं ॥ विस्पष्टं ब्रूहि ॥

कृष्णः ॥ मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा ॥
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥ ३० ॥

मयीति ॥ आत्मानं अधिकृत्य प्रवृत्तं अध्यात्मं अध्यात्मं च तत् चेतश्च अध्यात्मचेतः तेन अध्यात्मचेतसा सर्वाणि कर्माणि मयि संन्यस्य समर्प्य निर्गतः आशिषः इच्छातः निराशीः निर्गतं मम ममकारः यस्मात् सः निर्ममः भूत्वा विगतः ज्वरः मनःपीडा यस्मात् सः विगतज्वरः सन् युध्यस्व युद्धं कुरु ॥ ३० ॥

विदुषा लोकसंग्रहार्थं कर्म कर्तव्यम् ॥ त्वं तु विद्वान् अतस्त्वं लोकसंग्रहाय युद्धाख्यं कर्म कुरु ॥ विदुषाऽप्येवं कर्म कर्तव्यं किमुत अविदुषा ॥ त्वं तु अविद्वान् अतस्त्वं कर्म कुरु ॥ अविद्वत्त्वान्मया कर्तव्यमित्युक्ते किमविदुषा अमुमुक्षुणेव स्वर्गपशुपुत्रादिफलकामनया कर्तव्यमिति चेत् विद्वदविदुषोर्यथा आन्तरो विशेषोऽस्ति तथा अविदुषोरपि अविद्वत्त्वसाम्येऽपि मुमुक्षुत्वामुमुक्षुत्वविशेषानुसारी आन्तरो विशेषोऽस्ति ॥ त्वमविद्वत्त्वेऽपि मुमुक्षुरसि ॥ अतः मुमुक्षुणा यथाऽनुष्ठेयं तथा कुरु ॥ मया येन प्रकारेण कर्तव्यं कर्म तं प्रकारं ब्रूहीति चेत् त्वं अनात्मज्ञश्चेत् तदा आत्मज्ञानरूपस्वप्रयोजनार्थमेव परोक्षज्ञानी चेत् लोकसंग्रहेण परप्रयोजनार्थं चित्तपरिपाकादपरोक्षज्ञानरूपस्वप्रयोजनार्थं चेत्युभयार्थं अपरोक्षज्ञानी आधिकारिकश्चेत् लोकसंग्रहेण परप्रयोजनार्थमेव कर्म कुरु ॥ अध्यात्मचेतसा आत्मानं परमात्मानं जीवात्मानं चाधिकृत्य वर्तमानं चेतः मनः तेन ॥ अधि अधिकः आत्मा परमात्मा तस्मिन् चेतः तेन वा । आत्मानं प्रत्यगात्मानं अधिकृत्य वर्तमानं चेतः तेन अन्तर्याम्यधीनोऽहं राज्ञा नियुक्तो भृत्यो राज्ञे इव ईश्वरनियुक्तोऽहं ईश्वराय कर्म करोमि इति बुध्या, आत्मानं अधिकृत्य प्रवृत्तं शास्त्रं अध्यात्मं वेदान्तशास्त्रं तत्र चेतः तेन वा, आत्मानं जीवात्मानं अधिकृत्य जातं अध्यात्मं आत्मविषयकं चेतः श्रुतिशतसिद्धं ज्ञानं तेन वा, सर्वाणि कर्माणि मयि [१] ईश्वरे समर्प्य ईश्वर एव मयि स्थित्वा सर्वं कर्म करोति तच्च तस्य भगवतः पूजारूपमित्यनुसन्धाय मच्छरीरतया मत्प्रवर्त्यात्मस्वरूपानुसन्धानेन, स्वकीयेनात्मना स्वशेषभूतेन प्रयोज्यकर्त्रा स्वकीयैश्चोपकरणैः स्वाराधनैकप्रयोजनाय परमपुरुषः सर्वेश्वरः सर्वशेषी स्वयमेव स्वकर्माणि कारयतीति ईश्वरे [२] कर्तृत्वमनुसन्धाय भृत्यो राज्ञीव कर्माणि

---

१. अत्र गीतायां भगवन्तं भक्तिजननार्थं परोक्षतया निर्दिश्य स्वस्मिन् भक्तिजननार्थं अपरोक्षतया निर्दिशति भगवान् ॥ २. गुणेषु कर्तृत्वानुसन्धानं पूर्वमुक्तं ॥ अत्र तु ईश्वरे कर्तृत्वानुसन्धानमुच्यते ॥

मयि समर्प्य फलापेक्षारहितः अहं करोमि ममेदं कर्म महत्फलमनेन मम भविष्यति इति अहङ्कारममकाररहितश्च भूत्वा ऐहिकामुष्मिकदुर्यशोनरकपातादिसंभावनासंभूतमनःपीडारहितः सन् १ प्राचीनेन अनादिकालप्रवृत्तानन्तपापसंचयेन कथमहंभविष्यामीत्येवंभूतान्तर्ज्वरविनिर्मुक्तः सन् युद्धाख्यं कर्म कुरु ॥ ईश्वर एव कर्ममिराराधितो बन्धान्मोचयिष्यतीति सुखेन कर्मयोगं कुरुष्व ॥ विवेकदृष्ट्या पर्यालोचने क्रियमाणे २ 'निहत्य धार्तराष्ट्रान्नः का प्रीतिःस्याज्जनार्दन ॥' ३ 'स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ॥' ४ 'नरके नियतं वासो भवतीत्यनुशुश्रुम ॥' ५ 'अहो बत महत्पापं कर्तुं व्यवसिता वयम् ॥' ६ 'कथं भीष्ममहं संख्ये द्रोणञ्च मधुसूदन ॥' ७ 'श्रेयो भोक्तुं भैक्षमपीह लोके ॥' ८ 'यानेव हत्वा न जिजीविषामः' इत्यादि त्वदुक्तं शोकमोहमूलकप्रलपितमिति तवैव भायात् ॥ अतो विवेकबुद्ध्या पर्यालोच्य फलसङ्गादिकं त्यक्त्वा विगतशोकस्स्वधर्ममनुतिष्ठ ॥ ३० ॥

अर्जुनः ॥ जनकादिभिः शिष्टैरनुष्ठितमिति त्वमप्यनुतिष्ठेत्युक्तम् ॥ किं जनकादयः स्ववचनानुसरणेन स्वानुष्ठितानुष्ठानेन च तुष्टाः मोक्षं दातुमीशते ॥ अतो न तदनुरोधेन कर्म कुर्याम् ॥ किंब्रूषे ॥

कृष्णः ॥ ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः ॥
श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः ॥ ३१ ॥

य इति ॥ ये मानवाः श्रद्धा एषां अस्तीति श्रद्धावन्तः न असूयन्तः अनसूयन्तः च सन्तः मे मम मतं इष्टं इदं उक्तरूपं कर्म अनुतिष्ठन्ति ॥ तेऽपि कर्मभिः हेतुभिः मुच्यन्ते मोक्षं प्राप्नुवन्ति ॥ प्रतिबन्धकेभ्यः कर्मभ्यो मुच्यन्ते इति वा ॥ ३१ ॥

न केवलं जनकादिभिरनुष्ठितत्वादनुष्ठेयः कर्मयोगः ॥ किन्तु मया तत्रतत्रोक्तत्वात् इदानीमुच्यमानत्वात् अनुष्ठितत्वात् अनुष्ठीयमानत्वाच्च सर्वथा मद्भक्तवर्त्तिभिर्मानवैः मम संमतोऽयं कर्मयोग इत्यनुष्ठेयः ॥ अतएव ह्युक्तं मया ९ 'वर्त एव

---

१. वि ॥ २. १. ३६. ३. १. ३७. ४. १. ४४. ५. १. ४५. ६. २, ४. ७. २. ५. ८. २. ६ ९. ३. २२.

च कर्मणो 'ति ॥ ये मानवाः इदं कर्मयोगानुष्ठानरूपं वर्त्म मे नियन्तुरीश्वरस्य सर्वज्ञस्य सर्वशक्तेर्मोक्षदातुः अनुल्लङ्घनीयस्वाज्ञारूपश्रुतिस्मृतिरूपस्ववचनस्य मम मतं संमतं इष्टमिति मत्वा नित्यं सर्वदा अनुतिष्ठन्ति ॥ नित्यं नित्यवेदबोधितमिति वा ॥ नित्यमोक्षफलकमिति वा ॥ कथमनुष्ठेयमिति चेत् श्रद्धावन्तोऽनसूयन्तोऽनुतिष्ठन्ति ॥ अस्ति कृष्णेनोच्यमानं परलोकादिकं तत्साधनं धर्मज्ञानादिकं चेत्यास्तिक्यबुद्धिः श्रद्धा तद्वन्तः कष्टे कर्मणि कृष्णः प्रेरयतीति दोषाविष्करणं असूया तां अकुर्वन्तः सामान्यतः श्रद्धया अनसूयया च युक्ता इति वा ॥ अनुतिष्ठन्ति ॥ तेऽपि कर्मभिः मुच्यन्ते अनुष्ठितैः कर्मभिः हेतुभूतैः ज्ञानद्वारा मोक्षं प्राप्नुवन्ति ॥ १ किमुत ज्ञानिनः॥ मानवा इत्युक्त्या सर्वैर्मनुष्यैः स्वस्वकर्मानुष्ठेयमित्युक्तं भवति ॥ अत एव वक्ष्यते ॥ २ 'स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः' ॥ इति ॥ मोक्षप्रतिबन्धकैः पुण्यपापाख्यैः कर्मभिः मुक्ता भवन्ति ॥ इति वा ॥ कर्मभ्यो मुक्तिरूपायाः अस्याः मुक्तेः अमुख्यत्वमपिशब्देन द्योत्यते ॥ अपिशब्दात् जन्मादिभिश्च मुच्यन्ते इति ज्ञेयम् ॥ इति वा ॥ अतः मत्प्रसादात् मोक्षरूपस्य महतः फलस्य विद्यमानत्वात् त्वं कर्मयोगमातिष्ठ ॥ ३१ ॥

वि ॥ मे मतं इदं ये मानवाः नित्यं अनुतिष्ठन्ति ॥ ते प्रतिबन्धकैः बन्धहेतुभिः अनादिकालारब्धैः सर्वैः कर्मभिः मुच्यन्ते ॥ अननुतिष्ठन्तोऽपि ये अस्मिन् गीताशास्त्रे श्रद्दधाना भवन्ति अश्रद्दधाना अपि ये महाफले अस्मिन् शास्त्रार्थे दोषारोपरूपामसूयां न कुर्वन्ति तेऽपि मुच्यन्ते ॥ अपिशब्दादयं त्रेधा विभागः ॥ इदानीं अनसूयामात्रेण क्षीणपापाः श्रद्धावन्तो भवन्ति ॥ श्रद्धाऽनसूयाभ्यां क्षीणपापाः अनुतिष्ठन्ति ॥ श्रद्धाऽनसूयासहितकर्मणा क्षीणपापा मुच्यन्ते ॥ कर्मानुष्ठातारः साक्षान्मुच्यन्ते ॥ श्रद्धावन्तः अनसूयन्तश्च परम्परया मुच्यन्ते ॥ ये तु असूयया अश्रद्धया च नानुतिष्ठन्ति ॥ तेषां गतिस्त्वनुपदमेव वक्ष्यते ॥ ३१ ॥

अर्जुनः ॥ मत्प्रसादद्वारा मोक्षसाधनत्वात् कर्मयोगस्य तमनुतिष्ठेत्युक्तम् ॥

---

१. कैमुत्यसूचकोऽपिशब्दः ॥ न समुच्चयार्थः ॥ ज्ञानस्येव कर्मणो मोक्षसाधनत्वाभावात् । अपरोक्षज्ञानस्य मोक्षसाधने कर्मानपेक्षणाच्च ॥ ज्ञानकर्मसमुच्चयस्तु न मोक्षसाधने ॥ किंतु मुक्तौ आनन्दातिशयसाधने ॥ इत्युक्तं 'कर्मणैव हि संसिद्धिमास्थिता' इत्यत्र ॥ २. १८. ४५.

अस्तु मोक्षः कर्मानुतिष्ठतां ॥ अननुतिष्ठतां किं स्यात् ॥ वद ॥

कृष्णः ॥ ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम् ॥
सर्वज्ञानविमूढांस्तान् विद्धि नष्टानचेतसः ॥ ३२ ॥

य इति॥ ये तु अभ्यसूयन्तः असूयां कुर्वन्तः सन्तः मे मतं एतत् कर्म नानुतिष्ठन्ति ॥ तान् न विद्यते चेतः विवेकः ज्ञानं वा येषां ते अचेतसः तान् ज्ञायन्त इति ज्ञानानि सर्वाणि च तानि ज्ञानानि च सर्वज्ञानानि विशेषेण मूढाः विमूढाः सर्वज्ञानेषु विमूढाः सर्वज्ञानविमूढाः तान् नष्टान् नरकाद्यनर्थभागिनः पुरुषार्थायोग्यतारूपनाशवतो वा विद्धि जानीहि ॥ ३२ ॥

ये पूर्वोक्ताधिकारिविपरीताः श्रद्धारहिताः असूयां कुर्वन्तश्च मानवाः मे मतमिदं अश्रद्धया असूयया च नानुतिष्ठन्ति ते सर्वेषु ज्ञातव्येषु कर्मसगुणनिर्गुणविषयेषु ज्ञानेषु वा सर्वेषु कर्मसगुणनिर्गुणरूपेषु विषयेषु विषये यज्ज्ञानं तत्र वा विषये विशेषेण मूढाः विपरीतज्ञानिनः सर्वशब्दवाच्यं सर्वात्मकं ब्रह्म ॥ १'सर्वं समाप्नोषि ततोऽसि सर्वः' ॥ इति वक्ष्यते ॥ तस्य ज्ञानं तद्विषये ब्रह्मज्ञानविषये विमूढाः ॥ इति वा ॥ कुतः अचेतसः विवेकशून्याः दुष्टचित्ता वा ॥ अतः नरकाद्यनर्थभागिनो भवन्ति ॥ अननुष्ठातॄनेतादृशान् विद्धि ॥ इदं तु सम्यगवधेयम् ॥ ये नानुतिष्ठन्ति ये च न श्रद्दधते ये चाभ्यसूयन्ति तांस्त्रिविधानपि अचेतसः चेतः कार्यवस्तुयाथात्म्यनिश्चयरूपज्ञानरहितान् सर्वेषु ज्ञानेषु विशेषेण मूढान् अहंममेत्यादिज्ञानेषु यथावस्थितस्वरूपप्रकारानभिज्ञान् नष्टान् पुरुषार्थायोग्यान् जानीहि ॥ अननुष्ठातॄणां नरकादेर्महतोऽनर्थस्य विद्यमानत्वात् त्वं अनसूयया श्रद्धया च ममेष्टमिदमनुतिष्ठ ॥ ३२ ॥

अर्जुनः ॥ करणे महानर्थः अकरणे महाननर्थः इत्युक्तं ॥ यद्येवं करणाकरणयोरर्थानर्थौ स्यातां तर्हि सर्वेऽपि कुतस्त्वेष्टं कर्मयोगं नानुतिष्ठन्ति ॥ वद ॥

कृष्णः ॥ सदृशं चेष्टते स्वस्याः प्रकृते र्ज्ञानवानपि ॥
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥ ३३ ॥

---

१. ११. ४०.

सदृशमिति ॥ ज्ञानं अस्यास्तीति ज्ञानवान् अपि स्वस्याः स्वकीयायाः प्रकृते सदृशं अनुगुणं यथातथा चेष्टते कर्म करोति ॥ भूतानि प्राणिनः प्रकृतिं यान्ति अनुसरन्ति ॥ निग्रह निर्बन्धः किं करिष्यति ॥ ३३ ॥

कर्मतत्फलतत्कर्तृतद्भोक्त्रात्मस्वरूपज्ञानवानपि स्वकीयायाः प्रकृतेः अनुगुणमेव कर्म करोति ॥ प्रकृतिकार्यरागद्वेषयोः पूर्वजन्मपुण्यपापज्ञानेच्छादिसंस्कारस्य वा तदधीनस्वभावस्य वा सदृशमेव प्रवर्तते ज्ञानवानपि ॥ किंपुनरज्ञस्तथा प्रवर्तत इति ॥ अतः स्वधर्मे न प्रवर्तते ॥ प्रवर्तते च परधर्मे ॥ कुत इति चेत् सर्वे प्राणिनः स्वभावं पूर्वजन्मसंस्कारं वा अनुसरन्ति ॥ एवं कुरु एवं मा कुरु इति शास्त्र निग्रहः मम राज्ञो वा निग्रहः स्वस्य यदकर्तव्यं तत्र प्रवर्तमानस्य मनसः तस्मान्निवर्तनरूपो निरोधो वा इन्द्रियनिग्रहो वा किं करिष्यति ॥ सर्वोऽपि देही १ 'न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्' इत्युक्तरीत्या किमप्यकुर्वन् तूष्णीं स्थातुं न शक्नोति ॥ किंतु किमपि कुर्वन्नेव वर्तते ॥ कुर्वंश्च कर्म २ 'कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः' ॥ इत्युक्तरीत्या बलिष्ठया प्रकृत्या प्रवर्त्यमानत्वात्तदनुगुणमेव कर्म करोति ॥ न तु शास्त्रानुगुणं स्वस्वकर्तव्यकर्मण्येव प्रवर्तते ॥ अतः वर्णाश्रमोचितमुचितं विहितं कर्मैव सर्वैः कर्तव्यमिति मयोच्यमाने कर्मयोगे यथावन्न प्रवर्तते ॥ मया किं कर्तव्यम् ॥ ३३ ॥

अर्जुनः ॥ सर्वेऽपि स्वस्वप्रकृत्यनुगुणं चेष्टंते मया वा शास्त्रेण वा किं कर्तुं शक्यं इत्युक्तम् ॥ तर्हि शास्त्रेण तदुपदेष्टा च प्रयोजनाभावादनर्थकं शास्त्राचार्योपदेशादिकमित्यापद्यते ॥ ब्रूहि ॥

कृष्णः ॥ **इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ॥**
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ॥ ३४ ॥

इन्द्रियस्येति ॥ इन्द्रियस्य इन्द्रियाणां इन्द्रियस्य अर्थे विषये शब्दादौ रागश्च

---

१. ३. ५. २. ३. ५.

द्वेषश्च रागद्वेषौ व्यवस्थितौ नियमेन स्थितौ ॥ हि यस्मात् तौ रागद्वेषौ अस्य प्राणिनः परिपन्थिनौ शत्रू ॥ तस्मात् तयोः रागद्वेषयोः वशं वशतां नागच्छेत् न प्राप्नुयात् ॥ ३४ ॥

१ इन्द्रियस्य इन्द्रियस्यार्थे इन्द्रियगोचरेषु रूपादिषु विषयेषु इन्द्रियस्य इन्द्रियस्य सर्वेन्द्रियाणां अर्थे स्वविषयेषु इन्द्रियस्य इन्द्रियेषु मुख्यस्य मनसः इन्द्रियस्यार्थे विषयेषु रागः द्वेषश्चेत्येतौ व्यवस्थितौ नियमेन स्थितौ तत्तत्संस्कारानुरोधादवश्यंभाविनौ ॥ इन्द्रियस्य श्रोत्रादेः अर्थे शब्दादौ इन्द्रियस्य वागादेः अर्थे वचनादौ पुरुषस्य रागद्वेषौ व्यवस्थितौ इति वा ॥ उपलक्षणया लोभमोहमदमात्सर्याणामपि ग्रहणम् ॥ प्राधान्यात् कामक्रोधशब्दितयोरनयोरुक्तिः ॥ तयोः राग. द्वेषयोः वशं वशतां नाऽऽगच्छेत् ॥ तौ रागद्वेषौ अस्य परिपन्थिनौ ॥ पथिकस्य चौराविव विघ्नकर्तारौ अनर्थकारिणौ च शत्रू ॥ अतः तयोर्वशे न भवितव्यम् ॥ शास्त्रानर्थक्यमापद्यत इत्यस्य कथमनेनोत्तरं आगतमिति चेत् एवं, यथा न शकट एव स्वमधिरूढं नयति पातयति चाधः किन्तु चक्राभ्यामेव तथा न प्रकृतिरेवैनं साक्षादकर्तव्ये प्रवर्तयति निवर्तयति च कर्तव्यात् ॥ किन्तु अकर्तव्ये रागं कर्तव्ये द्वेषं चोत्पाद्य ॥ रागो नाम अनिष्टसाधने अनिष्टसाधनताज्ञानाभावेन आभासमानगुणदर्शनेन च स्वभावानुसारिणी प्रीतिः ॥ द्वेषो नाम इष्टसाधने इष्टसाधनताज्ञानाभावेन आभासमानदोषदर्शनेन च स्वभावानुसारिणी अप्रीतिः ॥ तयोः रागद्वेषयोः नाशने प्रकृतिः निर्वीर्या नैनं बाधितुमीष्टे ॥ नष्टचक्रनिर्वीर्यशकटवत् ॥ रागद्वेषयोर्नाशनं च रागविषये वस्तुनि विद्यमानस्य दोषस्य द्वेषविषये वस्तुनि विद्यमानस्य गुणस्य च सम्यगवगमेन भवति ॥ गुणदोषावगमश्च शास्त्राचार्योपदेशाभ्यामेव ॥ शास्त्रादाचार्योपदेशाच्च दोषं गुणं च जानन् स्वभावानुसारिणं रागं द्वेषं च दूरीकृत्य २ शास्त्रादिवश्यो भूत्वा इष्टसाधन एव प्रवर्तते ॥ निवर्तते चानिष्टसाधनात् ॥ विषसंसृष्टशर्कराऽन्नभोजने विषसंसर्गाज्ञानेन स्वभावतः प्रवृत्तोऽपि तदात्वोपागतेन परमाप्तेन विषसंसृष्टमिदं मा भुंक्ष्वेत्यभिहिते विषसंसर्गरूपदोषज्ञानेन मरणसाधनमिदमिति निश्चित्य लोलुपोऽपि शर्करान्ने तद्भोजनान्नि-

१. जात्येकवचनम् ॥ २. म ॥ एतच्च योग्यजनविषयम् ॥ अतएव अयोग्येभ्यस्तत्त्वोपदेशो न कार्य इत्युक्तं ' तानकृत्स्नविदो मन्दान् कृत्स्नविन्न विचालयेत्' ॥ इति ॥ (३. २९)

वर्तते ॥ अस्वादुभेषजसेवने रोगहरणशक्तिरूपगुणाज्ञानेन स्वभावतस्तस्मान्नि-वृत्तोऽपि तदात्वोपागतेन परमाप्तेन भेषजमिदं वीर्यवत्तरं नियतं तव रोगं हरेत् भुंक्ष्वेदं इत्यभिहिते रोगहरणशक्तिरूपगुणज्ञानेन आरोग्यसाधनमिदमिति निश्चित्य जुगुप्समानोऽप्यस्वादुभेषजाय तत्सेवने प्रवर्तते ॥ प्रसिद्धं हीदं लोके ॥ अतः गुण-दोषावगमद्वारा इष्टानिष्टप्राप्तिपरिहाररूपप्रयोजनस्य विद्यमानत्वान्न शास्त्राचार्योप-देशादेरानर्थक्यं ॥ प्रकृतिः अकार्यं प्रवर्तयति शास्त्रं तस्मान्निवर्तयति प्रवर्तते च प्रकृत्या निवर्तते च दोषदर्शनेन इति प्रकृतेः शास्त्रस्य कर्तुरात्मनश्च स्वा तन्त्र्यमुच्यते ॥ कथमिदं ॥ ईश्वरो हि स्वतन्त्रः प्रवर्तयति निवर्तयति च ॥ इति चेत् पूर्वपूर्वसंस्कारानुगुणं रागद्वेषावुत्पाद्य पुरुषमकार्ये प्रवर्त्य क्लेशयितुमुद्यतोऽपि भगवानीश्वरः विधिप्रतिषेधशास्त्रश्रवणादिसमुपजातविवेकेन तेन भक्त्यादिभिरा-वर्जितः तदीयौ रागद्वेषौ स्वयं व्युदस्य प्रकृतिवशं तं शास्त्रवशमारचय्य कर्तव्ये प्रवर्तयति निवर्तयति चाकार्यात् ॥ ह्यस्तनेन आज्ञोल्लंघनरूपापराधेन कुपितो राजा-दिरपराधिनं निगडबन्धेन क्लेशयितुमुद्यतोऽपि अद्यतनेन दानमानादिना आवर्जितः तमेवापराधिनं तत्तत्कर्मानुगुणं रागद्वेषादिवत् उपद्रवं कुर्वतां भटानामाधिपत्ये नियुंक्ते ॥ इति प्रसिद्धं हि लोके ॥ रागद्वेषयोर्निरसनाय ईश्वरमावर्जयितुं शास्त्रा-चार्योपदेशादेरावश्यकत्वान्नानर्थक्यम् ॥ ३४ ॥

वि ॥ अर्जुनः ॥ करणाकरणयोरर्थानर्थावुक्तौ ॥ किमर्थमुक्तौ ॥ करणेरुच्यु-त्पाद्नार्थं अकरणे भयोत्पादनार्थं चेति चेत् तत्किमर्थम् ॥ स्वेस्वे कर्मणि प्रवर्तना-र्थमिति चेत् तत्किमर्थम् ॥ आत्मावलोकनसिद्ध्यर्थं इति चेत् ज्ञानयोगेनैवात्मावलो-कनं सेत्स्यति किं कर्मकरणनिर्बन्धेन ॥

कृष्णः ॥ ज्ञानयोगाशक्तेन कर्मयोगयोग्येन ज्ञानार्थं कर्म कर्तव्यमित्युक्त्वा ततो ज्ञानयोगयोग्येनापि कर्मयोगस्य ज्यायस्त्वात् कर्मैव कर्तव्यमित्युक्त्वा तत्र शिष्टानामनुष्ठानं प्रमाणीकृत्य ततो व्यपदेश्येन शिष्टेन ज्ञानिनाऽपि लोकसंग्रहार्थं कर्मैव कर्तव्यमित्युक्त्वा करणाकरणयोरर्थानर्थावुक्तौ ॥ इदानीं अकृत्वा कर्मयोगं यो ज्ञानयोग एवात्मावलोकनार्थं प्रवर्तते सः ज्ञानवानपि १'कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणै'रित्युक्तरीत्या प्राचीनकर्मवासनानुगुणं प्राकृतेषु शब्दादिविषये-

१. ३. ५.

ष्वेव प्रवर्तते ॥ किंपुनः ज्ञानयोगयोग्यः तदयोग्यः कर्मयोगयोग्यश्चाज्ञानी प्रकृतेः सदृशं चेष्टत इति ॥ सर्वाण्यपि भूतानि पूर्ववासनामेवानुसरन्ति ॥ शास्त्रनिग्रहः किङ्करिष्यति ॥ बलवती प्रकृतिवासना विद्वांसमपि स्वानुगुणमकर्तव्येषु प्रवर्तयति ॥ न पुनर्ज्ञानयोगाभ्यासायोपकरोति ॥ अतः अकृत्वा कर्मयोगं ज्ञानयोगाभ्यासो नारम्भणीयः ॥ किन्तु कर्मैव कर्तव्यम् ॥ ३३ ॥

अर्जुनः ॥ वासना स्वानुगुणं अकर्तव्ये प्रवर्तयतीत्युक्तम् ॥ कथं प्रवर्तयति तं प्रकारं ब्रूहि ॥

कृष्णः ॥ इन्द्रियस्य श्रोत्रादेः अर्थे शब्दादौ इन्द्रियस्य रागादेः अर्थे वचनादौ रागद्वेषौ पुरुषस्य नियमेन भवतः ॥ प्रकृतिवासना रागद्वेषावुत्पाद्य प्रवर्तयति ॥ का हानिरिति चेत् तौ रागद्वेषौ, अकृत्वा कर्मयोगं ज्ञानयोगाभ्यासे प्रवृत्तस्य परिपन्थिनौ शत्रुवत् प्रकृतकार्यविघ्नकर्तारौ ज्ञानयोगाभ्यासं प्रतिबध्नीतः ॥ अतः तयोः वशतां न प्राप्नुयात् ॥ दुःशको ज्ञानयोगः सुशकं च कर्म अतः कर्मणैव आत्मावलोकने प्रयतितव्यम् ॥ विहितकर्मानुष्ठानेन सवासनायाः प्रकृतेः विनाश्य वीर्यं तया अप्रतिबद्धः तेनैव कर्मणा ज्ञानयोगनिरपेक्षेण आत्मावलोकन सिद्धिं लभते ॥ अतः कर्मैव कर्तव्यम् ॥ ३४ ॥

अर्जुनः ॥ कर्मकरणाकरणयोरर्थानर्थावुक्तौ त्वया ॥ यद्येवं तर्हि सर्वेऽपि कुतः तवेष्टं कर्मयोगं नानुतिष्ठन्तीति पृष्टं मया ॥ सर्वोपि प्रकृतेः सदृशं चेष्टते ॥ किं मया अन्येन वा शास्त्रेण वा कर्तुं शक्यमित्यभिहितं त्वया ॥ यद्येवं तर्हि शास्त्राचार्योपदेशादेर्वैय्यर्थ्यमापद्यत इत्यनुयुक्तं मया ॥ गुणदोषप्रख्यापनेन रागद्वेषयोरपाकरणं शास्त्राचार्योपदेशादेः प्रयोजनमित्युक्तं भवता ॥ तथाच शास्त्राचार्योपदेशादिना गुणदोषौ ज्ञात्वा रागद्वेषौ निरस्य प्रकृतिं निर्वीर्यामारचय्य शास्त्राचार्योपदेशवशो भूत्वा शास्त्रीयं वर्णाश्रमोचितं विहितमुचितं उत्क्रीत्या करणाकरणयोरर्थानर्थावहं कर्म कुर्यादित्युक्तं भवति ॥ शास्त्रवश्योऽहमास्तिकः तथैव कर्म कुर्याम् ॥ युद्धं परं न कुर्याम् ॥ अत एव हि पृष्टं मया ॥ १ 'तत्किं कर्मणि घोरे मां नियोजयसि केशवे'ति ॥ युद्धादन्यत् सर्वं कर्म कुर्याम् ॥ तथा कर्तुमनुजानीहि ॥

---

१. ३. १.

कृष्णः ॥ श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात् ॥
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥ ३५ ॥

श्रेयानिति ॥ सु सम्यक् अनुष्ठितः स्वनुष्ठितः तस्मात् स्वनुष्ठितात् परस्य धर्मः परधर्मः तस्मात् परधर्मात् स्वस्य धर्मः स्वधर्मः विगतः गुणः अङ्गं यस्मात् सः विगुणः अङ्गहीनोऽपि श्रेयान् श्रेष्ठः ॥ स्वधर्मे निधनं मरणं श्रेयः श्रेष्ठं ॥ परस्य धर्मः परधर्मः भयं आवहति जनयतीति भयावहः ॥ ३५ ॥

सम्यगनुष्ठितात् स्वस्य अविहितात् परस्य विहिताच्च धर्मात् स्वस्य विहितः धर्मः विगुणोऽपि गुणरहितोऽपि दोषवानपि अङ्गहीनोऽपि श्रेष्ठः ॥ अतः स्वधर्मं युद्धमेवानुतिष्ठ ॥ युद्धं न कुर्या युद्धादन्यत्कर्म कुर्यामित्युक्तं मया ॥ न तु स्वधर्मं युद्धं विहाय परधर्ममनुतिष्ठेयमित्युक्तम् ॥ एवंसति त्वया युद्धाकरणाद्युद्धकरणस्य श्रेयस्त्वं युद्धान्यक्षत्रियधर्माद्युद्धरूपक्षत्रियधर्मस्य श्रेयस्त्वं वा वाच्यम् ॥ न तु अन्यस्य विहितात् धर्मात् स्वस्य विहितो यो धर्मः तस्य श्रेयस्त्वं वक्तुं युक्तम् ॥ इति चेत् आस्तिकस्त्वं युद्धं विहाय किमपि कर्माकुर्वन्न तूष्णीं वर्तेथाः ॥ किंतु विहितं किमपि कर्म कुर्या एव ॥ कुर्वंश्च कर्म साधारणं कर्म न कुर्याः ॥ किंतु परमप्रशस्यतममेव कर्म कुर्याः ॥ उक्तं हि त्वया ॥ १ 'निश्चित्य येन श्रेयोऽहमाप्नुया 'मिति ॥ युद्धादन्यत् क्षत्रियस्य विहितं कर्म न तादृशम् ॥ किंतु युद्धादवरम् ॥ उक्तं हि मया ॥ २ 'धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते'॥ इति ॥ तच्च तवानिष्टम् ॥ अतः परिशेषात् शमदमाद्युपेतो ब्राह्मणधर्मो वा हिंसादिदोषरहितो भैक्षाशनरूपः परिव्राड्धर्मो वा कर्तव्यत्वेन तवाभिमतो वाच्यः ॥ स च तवाविहिततया परधर्मः ॥ तस्मात् स्वधर्मः श्रेयान् ॥ मास्तु परधर्मः स्वधर्ममेव युद्धादन्यमनुतिष्ठेयमिति चेत् युद्धान्यक्षत्रियधर्मस्य युद्धादवरत्वेन युद्धरूपस्वधर्म एव श्रेयस्त्वेन ग्राह्यः ॥ परधर्मो निषिद्धः स्वधर्मः प्रशस्यः ॥ स्वधर्मेषु यः उत्तमः सः प्रशस्यतरः स एव सगुणश्चेत् प्रशस्यतमः ॥ अतस्त्वया युद्धमेव कर्तव्यम् ॥ अतः उक्तं युक्तम् ॥ न केवलमेषा रीतिस्तवैव किन्तु सर्वैः परधर्मं विहाय स्वधर्मेषु यः

---

१. ३. २. २. २. ३१

श्रेयान् स एव कर्तव्यः ॥ स्वधर्मः स्वपरहिंसाबहत्वेन मरणादिप्रसक्तिमान् परधर्मस्तु न तथा तथा चेत् किं करणीयमिति चेत् स्वधर्म एव वर्तमानस्य मरणमपि श्रेयः ॥ परधर्मे वर्तमानस्य जीवितादपि ॥ परधर्मः इह अकीर्त्यावहत्वेन परत्र नरकाद्यनर्थावहत्वेन भयावहः ॥ स्वधर्मस्तु इह कीर्तिजनकत्वेन परत्र स्वर्गमोक्षमहाफलावहत्वेन परमसुखावहः ॥ अतः स्वधर्म एवानुष्ठेयः ॥ स्वधर्मे वर्तमानस्य मरणं परधर्मे वर्तमानस्य मरणादपि श्रेयः ॥ स्वधर्मे वर्तमानस्य मरणे भगवत्स्मृतिर्जायते ॥ तेन भगवदनुभवयोग्ये महति कुले जन्म भवति ॥ परधर्मे वर्तमानस्य मरणे विषयस्मरणं भवति ॥ तेन तदनुभवयोग्ये कुले जनिर्भवति ॥ ततश्च भगवति विमुखोऽभिमुखश्च विषयेषु विनश्यति ॥ अतः स्वधर्म एवानुष्ठेयः ॥ स्वस्य अज्ञस्य विहितः धर्मः अकाम्यकर्मरूपः अङ्गहीनोऽपि सम्यगनुष्ठितात् परस्य बहुजन्मानुष्ठितपुण्यपुञ्जपरिपक्वान्तःकरणस्य सर्वतो विरक्तस्य ज्ञानिनः धर्मः कर्मसंन्यासरूपः तस्मात् श्रेयान् ॥ अज्ञस्य कर्मसंन्यासात् कर्मैव श्रेयः ॥ कर्मणः स्वधर्मत्वात् कर्मसंन्यासस्य परधर्मत्वात् ॥ अतः अज्ञेन कर्मैवानुष्ठेयम् ॥ स्वधर्मे निधनं दोषाङ्गवैकल्यादिरूपन्यूनताऽपि श्रेयसी ॥ परधर्मस्तु भयावहः ॥ अतः स्वधर्म एवानुष्ठेयः ॥ दृश्यते च स्वधर्मे न्यूनताया अपि श्रेयस्त्वं परधर्मस्य सम्यगनुष्ठितस्यापि अनर्थावहत्वं लोके ॥ कस्यांचिदास्थान्यां कर्तव्यकार्यशेषनिर्वहणाय विंशतिं अधिकृतान् नियुंक्ते मूर्धन्यः ॥ त्वया एतावत् एतावति काले कार्यं त्वया एतावत् एतावति काले कार्यमिति ॥ सर्वेऽपि ते भिया जागरूकाः स्वस्य स्वस्य विहितं कर्मानुतिष्ठन्ति ॥ कश्चित्तु असाधारणबुद्धिकौशलयुक्ता मुहूर्तमात्रानवत्यऽास्मन् काय किमथमद्यप्रभृति प्रवाततव्यं अन्तिमदिने मुहूर्तमात्रे करवाणि इति अप्रविष्ट एव तस्मिन् कार्ये स्वनिकटस्थेन आदिष्टकार्यनिर्वहणाशक्तेन वृत्तिच्युतिसंभावनासमुपजातसाध्वसेन सादरमभ्यर्थितः तेन कर्तव्यं कार्यं कुर्वन् वर्तते ॥ तच्च कार्यं निरवशेषं निर्व्यूढम् ॥ सतिचैवं कार्यविमर्शनाय मूर्धन्य आगच्छति ॥ विमृशति च प्रथमादीनां कार्यम् ॥ एकैकस्यापि कार्यं सशेषं विगुणं च वर्तते ॥ दृष्ट्वा च मदाज्ञामनुवर्तमानो यथाशक्ति करोति ॥ भवतु नाम न्यूनता ॥ नैतावताऽस्य हिंसा कार्या ॥ आज्ञानुवर्तनेन संतोष्टव्यमिति मत्वा एवं कर्तव्यं एवं कर्तव्यं इत्युपदिश्य नातिचिरेण समापयेत्यादिश्य गच्छति ॥ कुशलस्य निकटे तिष्ठन्तं कुशलेन कारितस्वकार्यं अकुशलं दृष्ट्वा किमा-

सीत् इति पृच्छति ॥ निरवशेषं निर्व्यूढमिति तेनोक्ते त्वमकुशलः कथमिदमिति स्मयमानः पृच्छति ॥ वृत्तिच्युतिभीरुः कुटुंबी चाहं पार्श्ववर्त्तिनोऽस्य कुशलस्य सादरमभ्यर्थितस्य दयया कृतकार्योऽभूवं ॥ इति तेनोक्ते दृष्ट्वा स्वयमकुशलैरेवमेव कार्यं अतीव परितोषो मे इत्युक्त्वा गच्छति ॥ कुशलं दृष्ट्वा किमासीदिति पृच्छति ॥ न मयाऽस्मिन् कार्ये प्रविष्टं श्वः समापयिष्यामि इति तेनोक्ते किंकृतमेतावत्पर्यन्तं त्वया इति पृच्छति ॥ निकटस्थस्यास्य कार्यं निरवशेषं तदर्थनया परिसमाप्य तस्मिन्नदां इत्युक्ते तेन तदीयं कार्यं सम्यगेव निर्व्यूढमास्ति कुशलः किलासि त्वं तस्य विहितं तेन कर्तव्यं कार्यं त्वया कस्यादेशमनुसृत्य कृतं ॥ अविहितपरकीयकार्ये विना मूर्धन्यस्यादेशं स्वेच्छया प्रवृत्तत्वात् त्वं दंडनार्होऽसि ॥ गच्छ बहिरित्येनमधिकारात्प्रच्याव्य बहिर्निष्कासयति ॥ प्रसिद्धं हीदं लोके ॥ अतः स्वधर्मएवानुष्ठेयः ॥ स च फलसंगादिरहित एवानुष्ठेयः ॥ कुत इति चेत् स्वः आत्मा तस्य धर्मः तस्य सुखप्रापको धर्मः ज्ञानतत्साधनाकाम्यकर्मरूपः श्रेयान् ॥ कस्मादिति चेत् परेषां इन्द्रियादीनां सुखप्रदात् काम्यनिषिद्धकर्मरूपात् धर्मात् ॥ कुत इति चेत् स्वधर्मः विगुणः गुणमयप्रकृतिबन्धान्मोचकः ॥ अतः स्वधर्मे निधनं श्रेयः ॥ परधर्मस्तु बन्धकत्वेन भयावहः ॥ उक्तं हि मया ॥ १'कृपणाः फलहेतवः' ॥ इति ॥ अतस्त्वं स्वधर्मं युद्धं फलसङ्गादिरहितस्सन्ननुतिष्ठ ॥ ३५ ॥

वि ॥ ज्ञानयोगस्य दुश्शकत्वात्सप्रमादत्वाच्च सुकरः प्रमादादिरहितः कर्मयोग एव कर्तव्य इत्युक्तम् ॥ २ ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दने 'त्युक्तरीत्या ज्ञानयोगस्य वस्तुतो ज्यायस्त्वात् स एव हि महता प्रयत्नेन साध्यः ॥ कुतः कर्मैव करणीयमिति निर्बध्यते ॥ वद ॥

कृष्णः ॥ ज्ञानयोगाशक्तस्य तच्छक्तस्य वा अज्ञस्य स्वस्य कर्तुं शक्यः कर्मयोगरूपो धर्म एव अङ्गविकलोऽपि प्रशस्यतरः ॥ कस्मादिति चेत् सम्यक् साङ्गोपाङ्गमनुष्ठितात् परस्य कर्तुं शक्यात् ज्ञानयोगरूपधर्मात् ॥ कुत इति चेत् दुःशकतया महता प्रयत्नेन साङ्गोपाङ्गमनुष्ठितोपि ज्ञानयोगो मध्ये विच्छिद्येत ॥ न हि सगुणोऽपि विच्छिन्नः फलाधायको भवति ॥ कर्मयोगस्तु विगुणोऽपि सुशकतया

---

१. २. ४९. २. ३. १.

विघ्नैरप्रतिहत आमरणमनुवर्तते ॥ विगुणस्यापि चिरानुवृत्तस्य क्रमेण सगुणारंभद्वारा फलाधायकत्वं प्रसिद्धम् ॥ किंपुनः सगुणः कर्मयोगः फलाधायक इति ॥ विघ्नैरप्रतिघातेऽपि मरणेन स्वधर्मो विच्छिद्येतेति चेत् स्वस्य शक्ये कर्मयोगे वर्तमानस्य संभवत् मरणं श्रेयः १ 'नेहाभिक्रमनाशोस्ती 'त्यत्रोक्तरीत्या अनन्तरभाविनि ततः परस्मिन्वा जन्मनि पूर्वाभ्यासवशेन सगुणकर्मारंभकं सत् महते फलाय भवति ॥ वक्ष्यते चेदं २ 'पार्थ नैवे हे 'त्यादिना ३ 'ह्रियते ह्यवशोऽपि स' इत्यन्तेन॥ परधर्मः सगुणोऽपि मध्ये विच्छेदेन जन्मान्तरेपि फलाधायकत्वासंभवात् भयावहः ॥ अतः ज्ञानयोगशक्तेन तदशक्तेन च कर्मैव कर्तव्यम् ॥ ३५ ॥

सञ्जयः ॥

'तौ ह्यस्य परिपन्थिना 'विति कामक्रोधादीनां षण्णां भगवतोक्तं श्रेयोविघातकत्वं श्रुतवानर्जुनः किमिमे षट् वैरिणः पृथक् परिहर्तव्याः उत बलिष्ठस्य मूलभूतस्य कस्यचित् परिहारे सर्वेऽपि परिहृता भवेयुः ॥ आद्ये अशक्यमिदं महायाससाध्यत्वात् ॥ द्वितीये मूलभूतो बलीयान् शत्रुः कः ॥ तं मे ब्रूहि ॥ इति भगवन्तं पृच्छति ॥

अर्जुन उवाच ॥

अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः ॥
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥ ३६ ॥

अथेति ॥ वृष्णेः यादवस्य गोत्रापत्यं वार्ष्णेयः हे वार्ष्णेय कृष्ण अथ अयं पूरुषः न इच्छन्नपि अनिच्छन्नपि बलात् नियोजितः प्रेरितः भृत्य इव केन प्रयुक्तः प्रेरितः सन् पापं चरति करोति ॥ ३६ ॥

स्वकीयकर्मकर्तव्यतारूपप्रकृतप्रमेयादन्यदेव किमपि पृच्छामि॥तर्हि पूर्वासङ्गतोऽयं प्रश्न इति चेत् 'तयोर्न वशमागच्छे 'दित्युक्त्या सञ्जातमूलत्वात् प्रासङ्गिकोऽयं प्रश्नःपूर्वप्रकरणसंगत एव ॥ अयं पुरुषः कामादिषु केन प्रयुक्तः पापं चरति ॥ यस्य

---

१. २. ४०. २. ६. ४०. ३. ६. ४४.

जयेन सर्वेऽपि वैरिणो जिता भवन्ति ॥ इच्छया हि कर्म करोति विवेकादनिच्छन् न करोतु पापं कर्मेति चेत् अनिच्छन्नपि करोति ॥ अनिच्छन् कुर्याद्वा इति चेत् राज्ञा नखंपचे महत्यातपे गच्छेति बलान्नियोजितो भृत्यः स्वयमनिच्छन्नपि यथा अनुल्लङ्घनीयराजप्रेरणया गत्वा तत्कार्यं कृत्वा आगच्छति तथा अनिच्छन्नपि अनुल्लंघनीयया कस्यचित्प्रेरणया पापं कर्म करोति स कः ॥ १अयमेकः प्रश्नः ॥ अथेति प्रकरणान्तरारंभसूचकः ॥ स्वकीयं कर्म फलसंगादिराहित्येन कर्तव्यमिति महता प्रबन्धेन समर्थितम् ॥ १ ' निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥' इत्युपसंहृतं च ॥ कथं तथा कर्मकरणं शक्यं रागद्वेषादीनां बलवतां प्रतिबन्धकानां विद्यमानत्वात् ॥ शास्त्राचार्योपदेशबलेन रागादयः परिहर्तव्या इति ' तयोर्न वशमागच्छे 'दित्यनेनोक्तं हि मया॥ इति चेत् तेषां सर्वेषां पृथक् परिहारप्रयत्ने महानायासः स्यात् ॥ यो बलवान् मूलभूतः तस्य नाशने केवलं प्रयत्यतां मूलोच्छेदादन्येपि विनष्टा भवेयुः इति चेत् स कः इत्यपरः २प्रश्नः॥ अथेति प्रश्नसूचकः॥ केनेति किंशब्देन प्रश्नः सूच्यते इति चेत् प्रश्नस्यास्य आवश्यकतासूचकोऽथशब्दः॥ पृष्ट्वा ज्ञात एव प्रतिबन्धके तद्वीर्ये च तदुच्छेदेन विहिते अकाम्ये कर्मणि स्वारसिकी प्रवृत्तिर्जायते ॥ सर्वोऽपि पुरुषः सर्वमपि पापं इति कात्स्न्यर्थको वा अथशब्दः ॥ रागद्वेषादीन् विनाश्य विहितमकाम्यं कर्म कर्तव्यमित्युक्तम् ॥ विवेकेन रागादीनां नाशनेऽपि अकार्ये प्रवृत्तिर्लोके दृश्यते ॥ अनिच्छन्नपि भृत्यो राजनिर्बन्धात्करोति कर्म ॥ अतो रागादिभ्योऽन्यः कश्चित्प्रेरकोऽस्तीति भाति स कः ॥ अय ३ मपरः प्रश्नः ॥ अथेतिशब्द आनन्तर्यार्थकः ॥ अथ रागद्वेषादेर्नाशानानन्तरं अनिच्छन्नपि पापं कर्म करोति केन प्रयुक्तः करोतीति ॥ ईश्वरः देवाः कामादयश्च प्रेरकाः इति २ ' प्रकृतेः क्रियमाणानी' त्यादिना ३ ' तौ ह्यस्य परिपन्थिना ' वित्यन्तेन ग्रन्थेन ज्ञायते ॥ तेषु अथ ईश्वरात् देवेभ्यश्चानन्तरं केन प्रयुक्तोऽयं पापं चरति तं ब्रूहि ॥ तं जेतुं यतिष्ये ॥ अय ४ मन्यः प्रश्नः ॥ आनन्तर्ये अथशब्दः ॥ ४ ' सदृशं चेष्टते स्वस्याः प्रकृते 'रिति प्रकृति वासनायाः प्रवर्तकत्वमुक्तम् ॥ वासना च इच्छाद्वारैव प्रवर्तयतीति तावदनुभवसिद्धम् ॥ अकृत्वा कर्मयोगं ज्ञानयोगमारभमाणो न तद्विरोधिनं विषयानुभवमिच्छति इच्छति च ज्ञानयोगम् ॥ सतिचैवं विषयानुभवेच्छाया अभावात् किं

---

१. ३. ३०. २. ३. २७. ३. ३. ३४. ४. ३. ३३.

द्वारीकृत्य वासना विषयेषु प्रवर्तयति ॥ द्वारभूतं किमपि वाच्यम् ॥ इच्छैवेति चेत् सा तु नास्ति ॥ अन्यदेव किमपीति चेत् तर्हि ब्रूहि ॥ इत्यपरः ५ प्रश्नः ॥ अथेति प्रश्ने कात्स्न्यें वा ॥ त्वं वृष्णिशब्दितयादवकुलोत्पन्नोऽसि ॥ अहं तु वार्ष्णेय्याः पृथायाः सुतः अतो नाहमुपेक्षणीयः ॥ परमानन्दं वर्षतीति वृष्णिः सम्यक्बोधः तद्विषयत्वाद्वार्ष्णेयः परमात्मा त्वं परमात्माऽसि ॥ अतः पापाचरणहेतुमुक्त्वा तज्जयोपायमप्युपदिश्य तज्जयं कारयित्वा अनुग्रहीतुमर्हसि ॥ ३६ ॥

सञ्जयः ॥ एवमर्जुनेन पृष्टो भगवान् अनिच्छतोऽप्यकार्यप्रवृत्तिहेतुं बलिष्ठं शत्रुमाह ।

श्रीभगवानुवाच ॥

काम एष क्रोध एष रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥ ३७ ॥

काम इति॥ एषः कामः एषः क्रोधः एषः रजोरूपश्चासौ गुणश्च रजोगुणः समुद्भवत्यस्मादिति समुद्भवः कारणं रजोगुणः समुद्भवो यस्य सः रजोगुणसमुद्भवः एषः महत् अशनं यस्य सः महाशनः महान् पाप्मा पापं येन सः महापाप्मा एनं कामं इह वैरिणं शत्रुं विद्धि जानीहि ॥ ३७ ॥

एषः 'केन प्रयुक्त' इति त्वया पृष्टः बलीयान् कामः अनिच्छतोऽप्यकार्यप्रवृत्तिहेतुः॥ कामो नाम बलवती इच्छा ॥ अनिच्छतः प्रवर्तकप्रश्ने इच्छा प्रवर्तिका इति कथं युज्यते ॥ तस्येच्छाया अभावात् ॥ अनिच्छन् हि सः ॥ कामादिषु केन बलीयसा प्रेरितः करोतीति प्रश्ने एष काम इत्युत्तरं युज्येत इति चेत् कामादिषु बलीयान् क इति प्रश्नस्यापि १ इदमुत्तरम् ॥ कामादिषु बलीयान् काम एवेति ॥ अस्त्वेतत् अनिच्छतः प्रवर्तकः क इति प्रश्नस्य कथमिदमुत्तरमिति चेत् एषः रजोगुणसमुद्भवः रजोगुणादुद्भवति ॥ समुद्भवत्यस्मादिति समुद्भवः रजोरूपः गुणः रञ्जनात्मिका सामान्येच्छा वा समुद्भवो यस्येति वा रजोगुणात्समुद्भवतीति वा

१. प्रथम द्वितीय तुरीय प्रश्नानां ॥

व्युत्पत्तिः ॥ सत्त्वं रजः तमः इति त्रयः प्रकृतेर्गुणाः ते न युगपत् स्वस्वकार्यमारभन्ते ॥ विरोधात् ॥ किंतु तेष्वेक एव द्वावन्यावभिभूय स्वकार्यमारभते ॥ वक्ष्यते चेदम् ॥ १' रजस्तमश्चाभिभूय सत्त्वं भवति भारत ॥ रजः सत्त्वं तमश्चैव तमस्सत्त्वं रजस्तथा ॥' इति ॥ रजस्तमःप्रचुरस्य कारणविशेषैः कदाचिदुद्भूतेन अल्पेन सत्त्वेन आत्मस्वरूपसुखावाप्तिसाधनज्ञानादिसाधनेच्छा जायेत ॥ तदानीं प्रचित-प्राचीनकर्मोद्भावितनिरन्तरानुवृत्तरजोमूला विषयानुभवाद्यकार्येच्छा निवर्तते ॥ तदानीमयमनिच्छन् भवति ॥ तथाविधस्यास्य तदल्पं सत्त्वं वासनामूलो बलीयान् रजोगुणोऽभिभूय स्वीयां विषयानुभवेच्छामुत्पादयति ॥ तया सात्विकी पूर्वोक्ता इच्छा निवर्तते ॥ करोति च राजस्या कामशब्दितया तया इच्छया पापमयं पुरुषः ॥ अतः अनिच्छतः प्रवर्तकः क इति प्रश्नस्य २इदमुत्तरंयुज्यते॥ सत्त्वोन्मेषादनिच्छन्नपि सत्त्वमभिभूय स्वयमुद्भूतस्य रजस औत्कट्यादुद्भूतया अकार्येच्छया करोत्येवाकार्यं पुरुष इति ॥ अयमेकः प्रकारः ॥ कामो नाम इदं मे भूयादिदं मे भूयादिति शब्दादिविषयविषयकतीव्रेच्छानिमित्तभूतो मनसोऽनवस्थितत्वापादकश्चेतसो वृत्तिविशेषः ॥ विवेकादिच्छाया निवर्तनेऽपि मूलभूतस्य कामस्य सत्त्वात् पुनरिच्छा उदेति ॥ तया चायं पुरुषः पापं चरति ॥ अतः अनिच्छतः प्रवर्तकः क इति प्रश्नस्य ३ इदमुत्तरं युज्यते ॥ अयमपरः प्रकारः ॥ क्रोधस्यापि अकार्यप्रवर्तकत्वं दृश्यते ॥ कथं कामस्यैकस्यैव प्रवर्तकत्वमुच्यते इति चेत् क्रोधः एष एव एतन्मूलक एव प्रतिहतगतिः काम एव क्रोधात्मना परिणमति नान्यः ॥ अतस्तत्रापि कामस्यैव प्रवर्तकत्वात् काम एव प्रवर्तक उक्तः ॥ कामः क्रोधश्च प्रवर्तकावुच्येते इत्येवं कुतो न वाच्यं इति चेत् एषः कामः क्रोधश्च इत्येव पूर्तौ एष इत्यस्य द्विःप्रयोगोऽनर्थकः स्यात् ॥ वित्ध्येतावेह वैरिणौ इति वक्तव्यं स्यात् ॥ केन प्रयुक्त इत्येकस्य प्रबलस्य प्रश्ने द्वयोरुक्तिरसंगता च स्यात् ॥ अत एव तेन एतेन अस्य एनं कामरूपं शत्रुं इत्युत्तरत्र कामस्यैकस्यैवोक्तिः संगच्छते ॥ एनं रजोगुणसमुद्भवं क्रोधजनकं कामं इह ऐहिकामुष्मिकपुरुषार्थविषये संसारे मोक्षमार्गे ज्ञानयोगे वैरिणं विद्धि ॥ कुतोऽयं वैरीति चेत् शत्रुर्नाशयति अयमपि अकार्ये प्रवर्त्य नाशयति ॥ अनेन प्रेरितो हि पापं चरति ॥ अयं कथं पापे पूवर्तयतीति चेत् रजोगुणसमुद्भवः रजोरूपगुणस्य रजसो गुणः कार्यं तस्य प्रवृत्त्यादेः समुद्भवः कारणभूतः रजसो गुणो कार्यभूतौ

१. १४. १०. २. पञ्चमप्रश्नस्य ॥ ३. तृतीयप्रश्नस्य ॥

तृष्णासंगौ तयोरुत्पादकः कार्यजननेन रजोगुणाभिवृद्धिहेतुत्वात् पापे पूर्वत्र नाशको भवति ॥ अतोऽयं वैरी ॥ न केवलं काम एव रजोगुणसमुद्भवः किंतु क्रोधोऽपि विषयार्पणेन समाधीयतामिति चेत् १ महाशनः ॥ सामभेदाभ्यां समाधीयतामिति चेत् महापाप्मा अत्युग्रः अतः परिशेषाद्दण्ड्य एव ॥ विषयार्पणेनासमाधेयोपि यावदपेक्षं विषयार्पणेन समाधीयतामिति चेत् महापाप्मा महतः पापस्यो २त्पादको भवेत् ॥ अत्युत्कटेन कामेन स्वसारमप्यारोढुमिच्छति ॥ चण्डालादप्यर्थं गृह्णाति ॥ कामप्रतिहत्या क्रुद्धो ३ गुरुमपि जिघांसति ॥ कामो महाशनः क्रोधो महापाप्मा कामस्य महाशनत्वात् तज्जन्यक्रोधस्य महापाप्मत्वात् कामो वैरीति वा ॥ अतो यथावत्कर्मयोगाद्यनुष्ठानद्वारेण श्रेयः प्राप्तुं कामरूपशत्रुजये प्रयतितव्यमिति विद्धि ॥ ३७ ॥

अर्जुनः ॥ कामस्य वैरित्वं सम्यक् दृष्टान्तैरुपपादय ॥ सम्यक्ज्ञाते हि वैरित्वे तज्जये प्रयत्नः क्रियेत ॥

कृष्णः ॥ धूमेनाव्रियते वह्निर्यथाऽऽदर्शो मलेन च ॥
यथोल्बेनाऽऽवृतो गर्भस्तथा तेनेदमावृतम् ॥ ३८ ॥

धूमेनेति ॥ यथा वह्निः अग्निः धूमेन आव्रियते यथा आदर्शः दर्पणः मलेन धूल्यादिना आव्रियते यथा गर्भः उल्बेन गर्भावरणचर्मपेश्या आवृतः तथा तेन कामेन इदं आवृतम् ॥ ३८ ॥

'पापं चरति पूरुषः' इति बाध्यमानजीवस्योक्त्या इदमिति बाध्यमानजीवपरामर्शः ॥ जीवस्तु त्रिविधः ॥ उत्तमाधममध्यमभेदात् ॥ तत्र उत्तमजीवः धूमेन वह्निर्यथा किञ्चित् अच्छाद्यते तथा कामेन किञ्चित् अच्छाद्यते॥ मध्यमजीवः दर्पणः

१ महत् दातुमशक्यं अशनं भोग्यं यस्य सः ॥ 'न जातु कामः कामानामुपभोगेन शाम्यति ॥ हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते'॥ भाग. ९. १९. ॥ २. महान् पाप्मा पापं येन सः ॥ 'ईहन्ते कामभोगार्थं अन्यायेनार्थसंचयान् ॥ इति (१६. १२.) वक्ष्यते ॥ उक्तं च मया ॥ 'ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते' (२. ६२.) इति ॥ ३. क्रुद्धः पापं न कुर्यात् कः क्रुद्धो हन्याद्गुरूनपि ॥ इति हि वचनं श्रूयते ॥

यथा मलेन अधिकमाच्छाद्यते तथा कामेन अधिकमाच्छाद्यते ॥ अधमजीवस्तु जरायुशब्दितेन गर्भवेष्टनचर्मणा यथा अत्यन्तमावृतः तथा कामेन अत्यन्तमावृतः ॥ एवं जीवजातं तेन कामेन तत्तद्योग्यताभेदादावृतम् ॥ बाधप्रकारं ब्रूहीति चेत् धूमेन वह्निरिव ईश्वरः जीवगतकामेन आवृतः ॥ वह्निः स्वयंप्रकाशरूपो धूमावरणादन्यैर्न ज्ञायते ॥ तथा प्रकाशरूपोपीश्वरः कामावरणादन्यैर्न ज्ञायते ॥ मलेन दर्पण इव जीवान्तःकरणं कामेनाऽऽवृतम् ॥ दर्पणो मलेनाऽऽवृतो मुखादिकं न प्रकाशयति ॥ तथा कामेनाऽऽवृतं अन्तःकरणं जीवपरमात्मादितत्वानि न प्रकाशयति ॥ गर्भो यथा उल्बेनाऽऽवृतः स्वैरं चेष्टितुं न क्षमते॥ तथा जीवः कामेनाऽऽवृतः स्वैरं चेष्टितुं न क्षमते ॥ किंतु परतन्त्रः क्लिश्यति ॥ एवं इदं ईश्वरः अन्तःकरणं जीवश्चेति त्रयं कामेनाऽऽवृतम् ॥ आवरणक्रमानुरोधेन आवियमाणवस्तुभेदानुरोधेन च दृष्टान्तत्रयोपादानम् ॥ ज्ञानसाधनमन्तःकरणं ज्ञानं वा उपमृद्य पुरुषं पापे प्रवर्तयति कामः ॥ तस्य च तिस्रोऽवस्थाः सूक्ष्मत्वस्थूलत्वस्थूलतरत्वरूपाः ॥ तत्र प्रथमावस्थायां धूमेनाऽऽवृतो वह्निरिव कामेनाऽऽवृतं ज्ञानं स्वकार्यं करोति ॥ स्वरूपत उपलभ्यते च ॥ किंतु धूमाऽऽवृतवह्निवदकार्यप्रवर्तनेन बाधकत्वादुष्टम् ॥ द्वितीयावस्थायां मलेनाऽऽवृतो दर्पण इव स्वकार्यं न करोति ॥ स्वरूपतः परमुपलभ्यते ॥ तृतीयावस्थायां उल्बेनाऽऽवृतो गर्भ इव स्वकार्यं न करोति॥ स्वरूपतश्च नोपलभ्यते॥ एवमवस्थात्रयप्रदर्शनाय दृष्टान्तत्रयोपादानम् ॥ वह्निवत् प्रकाशस्वरूपं दर्पणवत् बिंबप्रकाशनेनाऽऽह्लादकरम् ॥ आभासव्याप्त्या चेतनतुल्यं च ज्ञानं धूमवदप्रकाशस्वरूपेण मलवल्लेपनस्वरूपेण उल्बवदचेतनेन च कामेनाऽऽवृतम्॥ अवस्थाभेदादावरणप्रकारभेदप्रदर्शनार्थं दृष्टान्तत्रयोपादानम् ॥ इदं जन्तुजातं धूमेन वह्निरिव मलेन आदर्श इव उल्बेन गर्भ इव आवृतम् ॥ कामस्य धूमवत् सहजत्वं मलवन्निवर्तितस्यापि पुनरुपागमं उल्बवत् स्वतोनिवर्तयितुमशक्यत्वं च दर्शयितुं दृष्टान्तत्रयोपादानम् ॥ एवं बाधकत्वेन वैरित्वात् कामोऽवश्यं जेतव्यः ॥ ३८ ॥

अर्जुनः ॥ अज्ञस्य उक्तरीत्या कामो बाधकः स्यात्॥ ज्ञानिनस्तु कथं बाधकः स्यात् ॥ ज्ञानेन कामस्य निवर्तयितुं शक्यत्वात् ॥ सातिचैवं [१]'सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपी'ति कथम् ॥ ज्ञानमावृत्य ज्ञानिनं बाधते इति चेत् ॥ ज्ञानस्य रागादिनिवर्तकत्वात् कथमिदम् ॥ ब्रूहि ॥

---

१. ३. ३३.

कृष्णः ॥ आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा ॥
कामरूपेण कौन्तेय दुष्पूरेणानलेन च ॥ ३९ ॥

आवृतमिति॥ हे कौन्तेय अर्जुन ज्ञानं अस्यास्तीति ज्ञानी तस्य ज्ञानिनः ज्ञानं कामः रूपं स्वरूपं यस्य सः कामरूपः काम : इति रूपं आख्या यस्य स : कामरूप : इति वा॥ तेन कामरूपेण पूरयितुं अशक्यः दुष्पूर : तेन दुष्पूरेण न विद्यते अलं पर्याप्तिः यस्य सः अनल : तेन अनलेन अतः अनलेन अग्निसदृशेन एतेन नित्यं वैरी शत्रुः नित्यवैरी तेन नित्यवैरिणा आवृतं आच्छादितम् ॥ ३९ ॥

ज्ञानिनः ज्ञानं एतेन कामाख्येन अनर्थप्रापकत्वान्नियमेन वैरिणा नित्यस्य मोक्षस्य तत्साधनापरोक्षज्ञानस्य वा वैरिणा प्रतिबन्धकेन आवृतं प्रतिबद्धं ॥ ज्ञानं हि ज्ञानिन एव स्यात् ॥ अतः ज्ञानमित्येवालं ज्ञानिनो ज्ञानमिति किमर्थमिति चेत् ज्ञानिनः १अधिकज्ञानवतः ज्ञानमपि एतेन आवृतं ॥ किमुतालपज्ञानवतः ॥ सर्वेषां ज्ञानं कामरूपेण इच्छास्वरूपेण एतेन कामेन कामो विषयः तमेव रूपयति गोचरयति नाऽऽत्मतत्वमिति वा कामरूपः तेन आवृतं ॥ कामः कीदृश इति चेत् ॥ ज्ञानिनो नित्यवैरी ॥ अज्ञो विषयभोगकाले कामं मित्रमिवपश्यन् तेन दुःखे प्राप्ते कामेनाहमिदं दुःखं प्रापितः इति तं वैरिणं मन्यते॥ अतः कामोऽज्ञस्य अनित्यवैरी ॥ ज्ञानी बलवता कामेनाकार्ये प्रवेशितो भोगकालेऽपि कामेनाहमनर्थे प्रवेशितः किं कुर्यामिति दुःख्यति ॥ किंपुनस्तेन दुःखे प्राप्ते ॥ अतः कामो ज्ञानिनो नित्यवैरी इति वा ॥ ज्ञानिन: ज्ञानस्वभावस्य अनिष्पन्नज्ञानस्य ज्ञानं कामाकारेण एतेन नित्यवैरिणा अनादित्वात्पूर्वावधिशून्येन आत्मसाक्षात्कारोत्तरावधिना वैरिणा आवृतं प्रतिबद्धं सत् नोत्पद्यते ॥ इति वा ॥ विषयार्पणेन समाधीयतामिति चेत् 'महाशन' इत्युक्तरीत्या पूरयितुमशक्येन पुरुषं दुःखेन पूरयता वा ॥ कुत इति चेत् अनलेन न विद्यते अलं पर्याप्तिः तृप्तिः यस्य तादृशेन अत एव अनलशब्दिताग्निसदृशेन अग्निः हविषापूरयितुमशक्यः कामस्तु विषयभोगेन पूरयितुमशक्यः ॥

१. आधिक्ये इनि प्रत्ययः ॥ 'भूमनिन्दा प्रशंसासु नित्ययोगेऽतिशायने ॥ संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः'॥ इत्यनुशासनात् ॥

कामितविषयाप्राप्तौ अग्निवत्तापकेन यथेच्छं विषयभोगाय महत्यकार्ये प्रवर्तकत्वेन महापाप्मेत्युक्तरीत्या महापापजनकत्वादग्निवन्नाशकेन वक्ष्यते च कामस्य नाशकत्वं १'त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ॥ कामः क्रोधस्तथा लोभस्तस्मादेतत् त्रयं त्यजे'दिति ॥ उक्तं च मया ॥ २'ध्यायतो विषया'नित्यादिना ३'बुद्धिनाशात्प्रणश्यती'त्यन्तेन ॥ पर्याप्तिः परिमितिः तद्रहिततया अपरिमितत्वादनलशद्वितसमुद्रतुल्येन ॥ ४'नेव हि कामस्यान्तोस्ति ॥ न समुद्रस्य ॥' इति श्रुतिः ॥ न विद्यते अलं अधिकं मास्तु इति निवारणक्रिया यस्य तादृशेन अत एव तादृशसमुद्रतुल्येन समुद्रः स्वयं पूर्णोऽपि आगच्छन्ति नद्यादिजलानि न निवारयति स्वीकरोति च ॥ तथा कामोविषयार्पणेन पूर्यमाणोऽपि न विषयविमुखो भवति ॥ किंतु स्वीकरोत्येव विषयान् ॥ तादृशेन कामेन ज्ञानमावृतं भवति ॥ अज्ञानां ज्ञानं प्रतिबद्धं सत् नोत्पद्यत एव ॥ ज्ञानिनामुत्पन्नमपि ज्ञानं प्रतिहतवीर्यं सत् नापरोक्षज्ञानजननसमर्थं भवति ॥ अतः कामो वैरी सर्वेषां ॥ अतस्तन्नाशने प्रयतितव्यं ॥ वार्ष्णेयेति संबोधयता त्वया त्वयाऽहं नोपेक्षणीय इति सूचितं ॥ वार्ष्णेय्याः कुंत्याः पितृष्वसुः पुत्रत्वादेव तवायमुपदेशः क्रियते ॥ ३९ ॥

अर्जुनः ॥ महता प्रयत्नेन अवश्यं जेतव्यो बलवान् शत्रुर्निरूपितः ॥ तस्य सामर्थ्यं शत्रुत्वप्रकारश्च इत्येतदपि सम्यगभिहितं ॥ उत्तिष्ठमानः शत्रुः नोपेक्ष्यः ॥ अतस्तज्जये प्रयतितव्यं ॥ ज्ञाते हि तदधिष्ठाने समूलमुन्मूलयितुं शक्येत ॥ अतस्तस्य कामाख्यशत्रोरधिष्ठानं ब्रूहि ॥

कृष्णः ॥ इन्द्रियाणि मनोबुद्धिरस्याधिष्ठानमुच्यते ॥
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥ ४० ॥

इन्द्रियाणीति ॥ इन्द्रियाणि मनः बुद्धिः अस्य कामस्य अधिष्ठानं करणं आश्रयो वा उच्यते ॥ एषः कामः एतैः इन्द्रियादिभिः ज्ञानं आवृत्य आच्छाद्य देहः अस्यास्तीति देही तं देहिनं आत्मानं विमोहयति विविधं मोहं प्रापयति ॥ ४० ॥

अस्य कामरूपशत्रोः इन्द्रियाणि श्रोत्रादीनि वागादीनि च मनः बुद्धिः मनो बुद्ध्योरिन्द्रियत्वेऽपि प्राधान्यात्पृथगुक्तिः ॥ अधिष्ठानमित्युच्यते ॥ अधितिष्ठत्येन-

१. १६. २१. २. २. ६२. ३. २. ६३. ४. तै. ब्रा. २. २. ५.

मिति व्युत्पत्त्या अधिष्ठानमाश्रयः ॥ दर्शनश्रवणादिभिः ज्ञानेन्द्रियव्यापारैः वचनस्पर्शनादिभिः कर्मेन्द्रियव्यापारैः संकल्पेन मनोव्यापारेण अध्यवसायेन बुद्धिव्यापारेण च अस्य कामस्य प्रादुर्भावात् ॥ इन्द्रियाणि मनो बुद्धिश्च अस्याऽऽश्रयः ॥ अस्याऽऽश्रयभूतैः एतैः स्वस्वव्यापारद्वारा हेतुभूतैः एषः कामः अन्तःप्रविश्य विवेकविज्ञानमावृत्य ज्ञानमनुत्पाद्य उत्पन्नमपि ज्ञानं कार्याक्षमं कृत्वा देहाभिमानिनं जीवं विविधं १'विशेषेण मोहयति आक्रामति विपरीतज्ञानमुत्पाद्य नाशयति ॥ अधितिष्ठत्येभिः काम आत्मानं इति हेतोः इंन्द्रियाणि मनो बुद्धिश्च अधिष्ठानं उपकरणं अन्तःप्रवेशमार्गः इत्युच्यते ॥ एतैः उपकरणैः सहायभूतैः अन्तः प्रविश्य ज्ञानमावृत्य जीवं विमोहयति॥ इति वा ॥ यथा चोरः अनिरुद्धैः अंतःप्रवेशमार्गैः अन्तः प्रविश्य स्वव्यापारविरोधिनं प्रकाशमानं दीपं निर्वाप्य सर्वस्वापहारेण गृहाभिमानिनमाक्रामति ॥ तद्वत् ॥ इंन्द्रियमनोबुद्धिव्यापारैः समुदितैरेव कामस्याऽऽविर्भाव इति सूचनाय अधिष्ठानमित्येकवचनं ॥ वेदाः प्रमाणमितिवत् ॥ ४० ॥

अर्जुनः ॥ अतः कामजये प्रयतितव्यमित्युक्तं ॥ प्रयत्नेन कामजयप्रकारं ब्रूहि॥

कृष्णः ॥ तस्मात्त्वमिंद्रियाण्यादौ नियम्य भरतर्षभ ॥
पाप्मानं प्रजहिह्येनं ज्ञानविज्ञाननाशनम् ॥ ४१ ॥

तस्मादिति ॥ भरतानां भरतेषु वा ऋषभः श्रेष्ठः भरतर्षभः हेभरतर्षभ अर्जुन त्वं तस्मात् कामस्य शत्रुत्वात् आदौ विमोहनात्पूर्वमेव इन्द्रियाणि नियम्य वशीकृत्य ज्ञानं च विज्ञानं च ज्ञानविज्ञाने नाशयतीति नाशनं ज्ञानविज्ञानयोः नाशनं ज्ञानविज्ञाननाशनं पाप्मानं पापरूपं पापहेतुं वा एनं कामं प्रजहिहि परित्यज ॥ हि स्फुटं प्रजहि नाशय इति वा ॥ ४१ ॥

हि यस्मात् कामरूपः शत्रुः ज्ञानमावृत्य मोहयति तस्मात् महाकुलप्रसूतत्वात्तज्जयसमर्थः त्वं आदौ आक्रमणात्पूर्वमेव इन्द्रियाणि नियम्य विषयासंस्पृष्टान् विषयसंस्पर्शेपि क्षोभरहितांश्च कृत्वा उपलक्षणया मनोबुद्धी अपि नियम्य तयोरधिष्ठानत्वोक्त्या तज्जयस्याप्यवश्यं वाच्यत्वात् ॥ सत्यामन्तर्विषयचिन्तायां इंन्द्रिय-

१. 'अनात्मन्यात्मबुद्धिर्या अस्ते स्वमिति या मतिः ॥ अविद्यातरुसंभूतिबीजमेतत् द्विधास्थितम् ॥ इति विष्णुपुराणे ॥ ७ अंशे ११ अध्याये ॥

जयस्य विफलत्वात् ॥ उक्तं हि मया ॥ १ 'मिथ्याऽऽचारः स उच्यते ॥' इति ॥ इन्द्रियत्वेन मनोबुद्ध्योरपि इंद्रियपदेनैव ग्रहणं वा ॥ इन्द्रियाणि आदौ नियम्येत्युक्तया अनन्तरं मनोबुद्धी नियम्येति लभ्यते ॥ इति वा ॥ इन्द्रियाणां नियमने बहिर्निर्गमनमार्गनिरोधात् मनोबुद्ध्योर्निरोधः स्वत एव भवति इति तन्नियमनस्यानुक्तिरिति वा ॥ आदौ मोक्षोपायानुष्ठानारंभसमय एव इंद्रियाणि नियम्य इन्द्रियव्यापारात्मके कर्मयोग एव नियम्य इति वा ॥ पापहेतुं ज्ञानस्य सामान्यज्ञानस्य शास्त्राचार्योपदेशजन्यपरोक्षज्ञानस्य वा विज्ञानस्य विशेषज्ञानस्य अपरोक्षज्ञानस्य वा तयोर्नाशकरं ज्ञानस्य आत्मस्वरूपज्ञानस्य विज्ञानस्य आत्मगतविशेषविषयज्ञानस्य च नाशकरमिति वा ॥ ज्ञानस्य सामान्यतः आत्मज्ञानस्य विज्ञानस्य तत्स्वरूपविशेषप्रतिपादकशास्त्रजन्यज्ञानस्य च नाशकरमिति वा ॥ ज्ञानं शास्त्रादिजन्यं विज्ञानं निदिध्यासनजन्यं तयोर्नाशकरमिति वा ॥ एनं कामरूपं शत्रुं प्र निरवशेषं जहि नाशय ॥ 'हन हिंसाया'मिति धातुः ॥ २ प्रजहिहि इत्येकं पदं ॥ त्यज ॥ 'हाकू त्याग' इति धातुः ॥ हि शब्दः, यथा चोराणां अन्तः प्रवेशात्पूर्वमेव अंतःप्रवेशमार्गं निरुध्य तदीयमुपद्रवं परिहरन्ति तद्वत् इति प्रसिद्धिद्योतको वा ॥ अयं कामजयोपायः अनेनोपायेन कामो जेतव्यः ॥ अतस्त्वमेवमेनं जहि ॥ ४१ ॥

अर्जुनः ॥ इन्द्रियाणि मनोबुद्धी च नियम्य कामं निश्शेषं जहीत्युक्तं । इन्द्रियादिजयमात्रेण न कामो निर्मूलमुन्मूलयितुं शक्यः ॥ अधिष्ठाननिरोधेन कामस्य स्थूलरूपेण नाशनेऽपि सूक्ष्मरूपेणानुवृत्तेः ॥ अतः सूक्ष्मरूपेणापि तस्य नाशने उपायं ब्रूहि ॥

कृष्णः ॥ इन्द्रियाणि पराण्याहुः इन्द्रियेभ्यः परं मनः ॥
मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥ ४२ ॥
एवं बुद्धेः परं बुध्वा संस्तभ्याऽऽत्मानमात्मना ॥
जहि शत्रुं महाबाहो कामरूपं दुरासदम् ॥ ४३ ॥

---

१. ३. ६. २. 'जहिहि जहीहि जहाहि रामभार्याम् ॥' इति भट्टिः ॥

इन्द्रियाणीति॥ हे महाबाहो अर्जुन इन्द्रियाणि पराणि प्रबलानि आहुः वदन्ति॥ इन्द्रियेभ्यः मनः परं आहुः ॥ बुद्धिस्तु मनसः परा प्रबला॥ बुद्धेः परतः यः सतु सः॥ परमात्मा ॥ एवं बुद्धेः परं परमात्मानं बुध्वा ज्ञात्वा आत्मना बुत्ध्या आत्मानं मनः संस्तभ्य समाधाय स्थिरीकृत्य दुरासदं दुर्जयं कामरूपं शत्रुं जहि नाशय ॥ बुद्धेः परतः यः सतु सः कामः ॥ एवं कामं बुद्धेः परं बुध्वा॥ इति वा ॥४२॥४३॥

अधिष्ठाननिरोधेन स्थूलरूपेण जित्वा जडादारभ्य परमात्मपर्यन्तं उत्तरोत्तरं परत्वं ज्ञात्वा सर्वतः परत्वेन भगवन्तं ज्ञात्वा तेन तारतम्यज्ञानेन ततोऽधिकं जित्वा सर्वतः परस्य भगवतः साक्षात्कारेण कामं निर्मूलमुन्मूलय ॥ तारतम्यप्रकारः क इति चेत् देहात् जडात् जडेभ्यो विषयेभ्यश्च इन्द्रियाणि पराणि उत्कृष्टानि ॥ ग्राह्याणां तेषां ग्राहकत्वेन ज्ञानजननशक्तिमत्वात् ॥ वचनाशनगमनादिशक्तिमत्वाच्च ॥ इन्द्रियेभ्यः मनः परं ॥ इन्द्रियैर्ग्राहितस्य विषयस्य ग्रहणपूर्वकं तत्र सङ्कल्पविकल्पयोर्जननात् ॥ मनसः बुद्धिः परैव । अध्यवसायशब्दितनिश्चयजनकत्वात् ॥ तस्याः बुद्धेः परतः अगोचरे यो वर्तते स तु स एव ॥ १'प्रकृतेः क्रियमाणानी' त्यत्र प्रकृतिपदेन २'तेनेदमावृत 'मित्यत्र इदंशब्देन च प्रकृतः ३'रसोऽप्यस्य परं दृष्ट्वा निवर्तते ॥' इत्युक्तः परमात्मैव ॥ एवं बुद्धेरगोचरं भगवन्तं ज्ञात्वा, तथा इन्द्रियाभिमानिनः तदवरेभ्यो देवमनुष्यादिभ्य उत्तमाः ॥ इन्द्रियमनसोर्मध्ये अर्था इत्यध्याहृत्य इन्द्रियाभिमानिभ्यो देवेभ्यः विषयाभिमानिनः उत्तमाः तेभ्यः मनोभिमानिनो गरुडशेषरुद्राः उत्तमाः तेभ्यो बुद्ध्यभिमानिनी सरस्वती उत्तमा॥ तस्याः महान् आत्मा महत्तत्वाभिमानी ब्रह्मा उत्तमः तस्मात् अव्यक्तशब्दिता लक्ष्मीरुत्तमा ॥ तस्याः परतस्तु स एव ॥ सर्वमिदं अध्याहारलभ्यं ॥ ४'इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः॥ मनसस्तु परा बुद्धिः बुद्धेरात्मा महान् परः ॥ महतः परमव्यक्तं अव्यक्तात् पुरुषः परः ॥ पुरुषान्नपरं किञ्चित् सा काष्ठा सा परा गतिः'॥ इति श्रुतिः ॥ गीतायामप्यभिमानिविवक्षायां अर्थाभिमानिभ्य इन्द्रियाभिमानिनां उत्तमत्वं प्रतीयते ॥ तत्कथमिति चेत् अवरेभ्यः अर्थाभिमानिभ्यः इन्द्रियाभिमानिनामुत्तमत्वं ज्ञातव्यम् ॥ एवं बुद्धेः महतः अव्यक्ताच्च परं भगवन्तं तारतम्यावधि-

---

१. ३. १७. २. ३. ३८. ३. २. ५९. ४. का. ३. १. ११.

भूतं ज्ञात्वा तं ज्ञात्वा साक्षात्कृत्य आत्मना बुद्ध्या आत्मानं मनः संस्तभ्य कामाद्यभिभवराहित्येन निर्विकारं कृत्वा दुःखेनापि जेतुमशक्यं कामरूपं शत्रुं नाशय ॥ महाबाहुत्वात् त्वं तं जेतुं शक्तोऽसि ॥ महाबाहुत्वेन बाह्यसर्वशत्रुपक्षशिक्षणविचक्षणस्य तवाप्यजय्योऽयं काम इत्यहो कामस्य शक्तिरन्यादृशी ॥ यथावत्कर्मयोगकरणाय अधिष्ठाननिरोधेन विवेकविज्ञानेन च स्थूलरूपेण कामं जित्वा यथावत्कर्मयोगमनुष्ठाय तेन परोक्षमपरोक्षं च ज्ञानं लब्ध्वा तेन निर्मूलमुन्मूलितकामादिदोषः सन् निर्निरोधमेव मुक्तो भविष्यसि ॥ अतस्त्वमिदानीं स्थूलरूपेण कामादीन् जित्वा अकाम्यं कर्मानुतिष्ठ ॥ स्यादनेन ते मङ्गलम् ॥ ४२ ॥ ४३ ॥

अ ॥ स्थूलात् बाह्यात् शरीरात् इन्द्रियाणि सूक्ष्माणि आन्तराणि उत्कृष्टानि॥ इन्द्रियेभ्यः प्रवर्त्येभ्यः प्रवर्तकं मनः उत्तमम् ॥ मनसः सङ्कल्पविकल्पात्मकात् अध्यवसायात्मिका बुद्धिः उत्तमा ॥ तस्याः बुद्धेरपि योऽगोचरे वर्तते सः स तु स एव ॥ रसोऽप्यस्य परं दृष्ट्वा निवर्तते ॥' इति कामादेः समूलोच्छेदनसाधनसाक्षात्कारविषयत्वेनोक्तः 'ज्ञानमावृत्य देहिन'मिति प्रकृतप्रत्यगात्माभिन्नः परमात्मैव॥ एवं बुद्धेः परं तं परमात्मानं बुध्वा साक्षात्कृत्य आत्मना बुध्या शास्त्राचार्योपदेशसंस्कारसंस्कृतेन मनसा वा आत्मानं मनः संस्तभ्य स्थिरीकृत्य आत्मानं अन्तःकरणं आत्मना अखंडाद्वितीयानंदैकरसेन परब्रह्मणा सह संस्तभ्य आरोपितनामरूपग्रहणमकृत्वा तदधिष्ठानभूतब्रह्मदर्शन एव नियोज्य आत्मानं परमात्मानं आत्मना स्वात्मना संस्तभ्य अहमेवाहमस्मीति ऐक्येनानुसंधाय कामरूपं दुरासदं दुर्जयं दुःखेन आसदः आसादनं प्राप्तिर्यस्य तादृशं दुष्यापं प्राप्तिरत्र ज्ञानं ॥ गत्यर्थानां ज्ञानार्थत्वात् ॥ दुर्विज्ञेयानेकविशेषं शत्रुं जहि नाशय ॥ महाबाहुस्त्वं तं जेतुं समर्थोऽसि ॥ अतः स्थूलरूपेण कामादीन् जित्वा यथावदकाम्यं कर्म कृत्वा तेन ज्ञानवान् भूत्वा ततो ब्रह्मैवाहमिति साक्षात्कृत्य निश्शेषनिरस्तकामादिवासनः सन् विदेहमुक्तिं प्राप्स्यसि ॥ अतो मोक्षसाधनीभूतापरोक्षज्ञानलाभाय यथावदकाम्यं कर्म कर्तव्यं त्वया ॥ स्यात्तेन ते परमं श्रेयः ॥ ४२ ॥ ४३ ॥

वि ॥ अर्जुनः ॥ इंद्रियाणि नियम्य कामं जहीत्युक्तं ॥ न हि इन्द्रियमात्रनियमने कामजयः शक्यते कर्तुं ॥ न हि प्राकारत्रयावृतं दुर्गमाश्रितः शत्रुः बाह्यस्यैकस्य

प्राकारस्य स्वायत्तीकरणमात्रेण जेतुं शक्यो भवति ॥ अतः कामो दुर्जयः ॥ किं कर्तव्यं ॥ ब्रूहि ॥

कृष्णः ॥ ज्ञानविरोधित्वे इन्द्रियाणि देशकालादिसामान्यविरोध्यपेक्षया शरीरापेक्षया च प्रधानानि आहुर्मन्वादयः ॥ इन्द्रियेषु विषयव्यापृतेषु आत्मज्ञानानुदयात् ॥ इन्द्रियेभ्यः मनः प्रधानं ॥ इन्द्रियेषु विषयव्यावृत्तेष्वपि मनसि विषयप्रवणे आत्मज्ञानानुदयात् ॥ मनसस्तु बुद्धिः परा ॥ मनसि विषयविमुखेऽपि विपरीताध्यवसायप्रवृत्तौ आत्मज्ञानानुदयात् ॥ बुद्धेः परतः परः यः सः स तु स एव॥ एषः तेन एतेन एषः एनं इति प्रकृतः काम एव॥ सर्वेषु शत्रुषु ज्ञानविरोधिषु स्थूलनिग्रहादुपरतेष्वपि कामरूपः शत्रुः सूक्ष्मरूपेण वर्तते चेत् सः प्रचितप्रारब्धकर्मोद्भावितेन निरन्तरानुवृत्तेन रजसा उद्भूतः सन् इन्द्रियादीनि स्ववशे प्रवर्त्य आत्मज्ञानं निरुन्ध्यात् ॥ अतः सर्वेभ्यो ज्ञानविरोधिभ्यः काम एव प्रधानविरोधी ॥ एवं तं कामं बुद्ध्येरपि प्रधानं शत्रुं ज्ञात्वा आत्मना बुद्ध्या आत्मानं मनः संस्तभ्य ज्ञानयोगमनारभमाणस्सन् कर्मयोग एव प्रवर्त्य तेन कर्मणा दुरासदं अननुष्ठितकर्मयोगैः अनिरस्तप्राचीनपापैः अगृहीतसुदृढसत्वकवचैः दोषदर्शनेऽप्यपाकर्तुमशक्यं कामरूपं शत्रुं नाशय ॥ ज्ञानयोगं दुश्शकं मत्वा कर्मयोगे कृते तेन प्राचीनपापक्षयः ॥ तेन रजस्तमसोरुपमर्देनसत्वस्योन्मेषः ॥ तेन ज्ञानद्वारा साक्षाद्वा आत्मावलोकनसिद्धिः ॥ अतस्त्वं 'विहितं युद्धाख्यं कर्मैव कुरु ॥ स्यात्तेन ते मंगळं ॥ ४३ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
कृष्णार्जुनसंवादे कर्मयोगो नाम तृतीयोऽध्यायः ॥ ३ ॥

इतीत्यादि पूर्ववत् ॥ कर्मयोगविषयकानेकाक्षेपसमाधानद्वारा कर्मयोगव्यवस्थापकत्वात् कर्मयोग इति प्रसिद्धः तृतीयोऽध्यायः इति संपूर्णः ॥

इति श्रीमद्भगवद्गीतोपन्यासदर्पणे लक्ष्मणाचार्य विरचिते कर्मयोगाध्यायार्थ-
प्रदर्शकः ततीयः प्रतिबिंबः ॥ ३ ॥

श्रीगुरुभ्यो नमः ॥

चतुर्थोऽध्यायः ॥

सञ्जयः ॥

द्वितीयेऽध्याये कर्मयोगं श्रुतवताऽर्जुनेन 'तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुया 'मिति मया प्रार्थितेन भवता ज्ञानयोगमनुक्त्वा कर्मयोग एवाभिहितः ॥ किमहो व्यामिश्रेण वाक्येन भूयोऽपि मां मोहयसि ॥ यथावदवचने व्यामिश्रेण वाक्येन मोहजनने च द्वौ हेतू ॥ एको विषयस्य नूतनता ॥ अपरो विषयस्य अनादितः सिद्धत्वेपि उपदेशस्य नूतनता ॥ तत्राद्यः, आदिसृष्टौ सह कर्मयोगेन प्रजाः सृष्ट्वा श्रेयोऽर्थं मिमं कर्मयोगमनुतिष्ठतेति प्रजापतिरादिदेशेति कथां कथयता भवता परिहृतः " द्वितीयेन हेतुना व्यामिश्रतेति भाति " इत्यभिहितो भगवान् विषय इव उपदेशोऽपि पुरातनः ॥ नेदानीमेवायं योगस्तुभ्यमुपदिश्यते॥ किंतु १ 'सूर्य आत्मा जगतस्तस्थुषश्चे 'त्यादिश्रुतिप्रतिपादितमहावैभवाय महानुभावाय श्रीरामेण २ 'नाऽनृग्वेदविनीतस्ये 'त्यादिना अतिमात्रसंश्लाघितसकलकलावैशारद्यस्य निरवद्यस्य परममहितमहिमवतो हनूमतो विद्योपदेशाचार्याय सूर्याय पुरा उपदिष्टोऽयं योगः ॥ अतः त्वं मयि मैवं शङ्किष्ठाः इत्याह ॥

॥ श्रीभगवानुवाच ॥

इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ॥
विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥ १ ॥

एवं परंपराप्राप्तं इमं राजर्षयो विदुः ॥
स कालेनेह महता योगो नष्टः परन्तप ॥ २ ॥

स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः ॥
भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम् ॥ ३ ॥

---

१. तै. सं २. ४. १४. २. रा. कि. ३.

इममिति ॥ अहं न विद्यते व्ययः नाशः यस्य सः अव्ययः तं इमं योगं विवस्वते सूर्याय प्रोक्तवान् ॥ विवस्वान् मनवे प्राह ॥ मनुः इक्ष्वाकवे अब्रवीत् ॥ १ ॥

एवमिति ॥ एवं परंपरया प्राप्तं परंपराप्राप्तं इमं योगं राजानः ऋषय इव राजर्षयः राजानश्च ऋषयश्च इति वा विदुः जानन्ति अजानन्वा ॥ हे परन्तप अर्जुन सः योगः महता कालेन इह काले नष्टः ॥ २ ॥

स एवेति ॥ त्वं मे भक्तोऽसि सखा च असि इति हेतोः पुरातनः स एव अयं योगः अद्य इदानीं मया ते तुभ्यं प्रोक्तः सम्यगुक्तः ॥ एतत् उत्तमं रहस्यं हि प्रसिद्धम् ॥ हि यस्मात् तस्मात् ते प्रोक्तः इति वा ॥ ३ ॥

सूर्याया १ यं योगः पुरा मया सम्यगुपदिष्टः॥ न केवलं सूर्यायोपदिष्टत्वमात्रेण ग्राह्योऽयं योगः ॥ किंतु अव्ययश्च॥ अव्ययवेदप्रमाणप्रमितः॥ अव्ययमोक्षफलकश्च॥ अतोऽपि ग्राह्यः ॥ पुरा त्वया अयं योगः सूर्याय किलोपदिष्टः विदित्वेमं योगं जनकादयः कथमन्वतिष्ठन् इति चेत् स सूर्यः स्वसुताय वैवस्वतमनवे प्राह ॥ स मनुः स्वसुताय इक्ष्वाकवे अब्रवीत् ॥ एवं गुरुपरम्परया प्राप्तं इमं कर्मयोगं ज्ञानयोगं वा राजर्षयः ऋषितुल्याः राजानः राजानश्च ऋषयश्च वा २ विदुः विदन्ति ॥ एवमेव विदुरिति वा ॥ विदुः लट् ॥ अविदुः अजानन् इति वा ॥ लङो झेर्जुस् ॥ यद्येवं गुरुपरंपराप्राप्तः पूर्वैर्विदितश्चायं योगः तर्हि किमर्थं नूतनमिव मह्य मिममुपदिशसि ॥ इदानीन्तनानां ज्ञापनायेति चेत् पूर्वे राजर्षय इव इदानीन्तना अपि तयैवोपदेश परंपरया कुतो नजानीयुः अतस्त्वया मह्यं क्रियमाण उपदेशोऽनावश्यकः इति चेत् स च सूर्यायोपदिष्टो योगः महता कालेन युक्तः बहोः काला त्पूर्वं उपदिष्टत्वेन इह ३ लोके नष्टप्रायः संवृत्तः ॥ यथावत्संप्रदायप्रवर्तकाभावात् संप्रदायविच्छेदेन विनष्टप्रायोऽभूत् ॥ लोके प्रवर्तयितुं मया सूर्यायोपदिष्टः ततस्तदादि-

---

१. द्वै ॥ वि ॥ इमं योगं कर्मयोगं ॥ अ ॥ कर्मयोगप्राप्यं ज्ञानयोगम् ॥ इमं योगं अध्यायद्वयोक्तं कर्मयोगं ज्ञानयोगं चेत्युभयम् ॥ द्वयोर्योगयोरुक्तत्वेऽपिफलैक्यादेकवचनम् ॥ २. वेदनमनुष्ठानस्याप्युपलक्षणम् ॥ ३. द्वै ॥ अ ॥ अस्मिन् काले ॥ वि ॥ विचित्राधिकारिपूर्णे जगति ॥

गुरुपरंपराप्राप्तश्च योगः कालक्रमात्संप्रदायशैथिल्येन जीर्णोऽभूत् ॥ अतो जीर्णस्य तस्योद्धाराय मया तुभ्यमुपदिश्यते ॥ जीर्णोद्धारस्त्वया कुतः कार्य इति चेत् जीर्णस्य देवालयादेरुद्धाराय तत्कर्ता तत्संबन्धी वा हि लोके प्रवर्तते ॥ अतो जीर्णोद्धारो मयैव कर्तव्य इति मयोपदिश्यते ॥ क्रियतां नाम जीर्णोद्धारायोपदेशः ॥ स च अन्यस्मै यस्मै कस्मैचन क्रियताम् इति चेत् इन्द्रावतारत्वेन नरांशत्वेन परमप्रियभगिनीपतित्वेन पितृष्वसुः पुत्रत्वेन सवयस्त्वेन आबाल्यात् सिग्धत्वेन च त्वमेव साक्षात् मत्त उपदेशग्रहणार्होऽसि ॥ नान्य एतादृश उपलभ्येत ॥ अतस्तुभ्यमुपदिश्यते ॥ सूर्यादिभ्यो महद्भ्य उपदिष्टो योगो महीयान् स्यात् इति चेत् मया तुभ्यमिदानीं प्रोक्तः उच्यमानः वर्तमाने क्तः ॥ वक्तुमुपक्रान्तो वा ॥ आदिकर्मणि क्तः ॥ अयं योगः स एव ॥ जीर्णश्चेत् भवतु कुतो महता तात्पर्येण जीर्णोद्धारायोपदिश्यत इति चेत् पुरातनः पुरातनवेदमूलकः पुरातनमहानुभावसूर्यादिगुरुपरंपराप्राप्तः प्रवाहतोऽनादिपरंपरानुगतः अतः तात्पर्येण स एवोपदिश्यते ॥ किमहमेतादृशस्य महतो योगस्य साक्षात् त्वत्त उपदेशं ग्रहीतुमर्हं इति चेत् यदि भक्तो न स्यात् तर्हि नाऽऽदरेण शृणुयात् यदि सखा न स्यात् तर्हि भियानाऽऽक्षिपेत् ॥ न च पृच्छेत् ॥ इति हेतोः ते मया उपदेशः क्रियते ॥ त्वं तु मे भक्तोऽसि सखा चासि ॥ किं च त्वं परन्तपोऽसि ॥ स्वर्गलोके स्वयमेवाऽऽगत्य प्रार्थयमानाया ऊर्वश्याः प्रत्यादेशेन त्वं जितेन्द्रियोऽसि ॥ कथेयं सूचिता मया १ 'क्लैब्यं मा स्म गम' इत्यत्र ॥ अतस्तवात्रास्त्यधिकारः ॥ अतः तुभ्यमेवोपदिश्यते ॥ नान्यस्मै उपदिश्येत ॥ कुत इति चेत् एतत् उत्तमं अतो रहस्यम् ॥ रहस्यं अत उत्तमम् ॥ इति वा ॥ उत्तमं रहस्यमिति वा ॥ अतः नान्यस्मै उपदिश्येत॥ तुभ्यमेवोपदिश्यते ॥ विषय इव उपदेशोऽपि पुरातनः ॥ अतो न मदुपदेशे व्यामिश्रता शङ्कनीया ॥ अतः श्रद्धत्स्वेमं मदुपदेशम् ॥ १ ॥ २ ॥ ३ ॥

सञ्जयः ॥ सृष्ट्यादौ जातः पुरातनो देवताकोटिप्रविष्टः सूर्यः ॥ कृष्णस्त्विदानीन्तनो मनुष्यः ॥ सति चैवं कृष्णः सूर्यायोपदिष्टवानिमं योगमित्येतत् कथं श्रद्धेयं स्यात् ॥ न हि कोऽपि केनापि बालेन मत्तिताम्हाय सर्वज्ञाय मया तत्वमुपदिष्टमित्युक्ते श्रुत्वा स्यादेवमिति श्रद्दध्यात् ॥ अतः परिहसनीयमिदमश्रद्धेयं

१. २. ३.

चेति बालिशा मन्येरन् ॥ इति मत्वा तत्परिहाराय, कृष्णः कश्चिदन्यमनुजनिर्विशेषो मनुष्यः सति चैवं कथं तदुक्तमिदं तारकं सर्वशास्त्राण्यतिशयानं शास्त्रं स्यात् ॥ इति तेन कृष्णेन गीतायामस्यां गीतायां अविदितभगवदवतारतत्वानां अविश्वासादनादरः संपद्येत ॥ न शृणुयुश्च श्रद्धाभक्तिभ्याम् ॥ अतो गीतोपदेष्टुः कृष्णस्य ईश्वरत्वादिमहामहिमख्यापनाय च परिहारं भगवन्महिमानं च स्वयमजानान इव भगवन्तं पृच्छति पार्थः ॥

अर्जुन उवाच ॥

अपरं भवतो जन्म परं जन्म विवस्वतः ॥

कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति ॥ ४ ॥

अपरमिति ॥ भवतः तव जन्म अपरं अल्पकालीनं विवस्वतः सूर्यस्य जन्म परं बहुकालीनम् ॥ अतः त्वं आदौ सूर्याय प्रोक्तवान् इत्येतत् कथं विजानीय यथार्थं जानीयाम् ॥ ४ ॥

भवतः जन्म वसुदेवगृहे १ अर्वाक्तनम् ॥ सूर्यस्य जन्म २ प्राक्तनम् ॥ सूर्यः सृष्ट्यादौ जातः ॥ १'चक्षोः सूर्यो अजायते'ति श्रुतिः ॥ अतः पुरातनः देवश्च सूर्यः ॥ त्वं तु इदानीं वसुदेवगृहे जातः ॥ अतः अर्वाक्तनः मनुष्यश्च ॥ सतिचैवं त्वं आदौ सूर्याय इमं योगं प्रोक्तवान् इत्येतत्कथं वि यथार्थं जानीयाम् ॥ नेदं मम यथार्थं भाति ॥ अपितु प्रतारकं भाति ॥ सूर्यायोपदेशः एतद्देहेन वा देहान्तरेण वा ॥ आद्ये एतद्देहस्य तदानीमभावादनुपपत्तिः ॥ द्वितीये देहान्तरेऽनुभूतस्य देहान्तरे स्मरणासंभवादनुपपत्तिः ॥ अतः कथमिदम् ॥ अत्र तत्वं वद ॥ जन्मेति द्विः प्रयोगेण युवयोर्जन्मनोर्बहुकालव्यवधानसत्वात्कथमिदं इत्यसंभावनां द्रढयता अत्यन्तासंभावितमेतदिति सूच्यते ॥ ४ ॥

सञ्जयः ॥ पार्थेनैवं पृष्टो भगवान् मूर्खशङ्कापरिहाराय मन्महिमख्यापनाय च जानन्नप्यर्जुनोऽजानान इव मां पृच्छति ॥ किं च जानात्येवायमर्जुनो मां भगवन्तं वासुदेवम् ॥ अतएव वक्ष्यति ॥ ३'पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम् ॥ आहु-

---

१. अपकृष्टम् ॥ २. उत्कृष्टम् ॥ ३. १०. ११. १३.

स्त्वामृषयस्सर्वे देवर्षिर्नारदस्तथा ॥ असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे '॥ इति ॥ सूर्यादपि पुरातनेन रूपान्तरेण सूर्यायोपदेशः सङ्गच्छते ॥ बहुकाल-विप्रकृष्टस्य स्मृतिर्महतामपि युज्यते ॥ किम्वीश्वरस्य ॥ इति परिहारं च जानाति ॥ अथापि सर्वेश्वरस्य जन्म किमिन्द्रजालादिवन्मिथ्या उत सत्यम् ॥ सत्यत्वे च कथं जन्मप्रकारः किमात्मकोयं देहः कश्च जन्महेतुः कदाच जन्म किमर्थश्च जन्म ॥ इति षट् प्रश्नान् मनसि निधाय तेषामुत्तरं मन्मुखादुत्थापयितुं जानन्नप्यजानान इव पृच्छति ॥ इति विदितपार्थाभिप्रायः पार्थमाह ॥

श्रीभगवानुवाच ॥

बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ॥
तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप ॥ ५ ॥

बहूनीति ॥ हे अर्जुन मे मम बहूनि जन्मानि व्यतीतानि ॥ तव च बहूनि जन्मानि व्यतीतानि गतानि ॥ हे परन्तप अर्जुन तानि जन्मानि अहं वेद जानामि ॥ त्वं न वेत्थ जानासि ॥ ५ ॥

हे पार्थ, बालेन त्वया वृद्धाय सूर्यायोपदेशः कृत इति कथमहं श्रद्दध्यां वद मे तत्वमिति किमेवं पृच्छसि ॥ जन्मान्तरे मया सूर्यायोपदेशः कृत इति जानीहि ॥ जन्मांतरे मया सूर्यायोपदेशः कृत इति जानीहि जन्मान्तरे मया सूर्यायोपदेशः कृत इति चेत् तदन्यज्जन्म इदमन्यज्जन्मेत्युक्तं भवति ॥ सतिचैवं त्वमनेकजन्ममरणावानित्यापद्यते ॥ मरणमन्तरा अन्यजन्मग्रहणानु-पपत्तेः ॥ इति चेत् सत्यम् ॥ मम बहूनि जन्मानि व्यतीतानि ॥ न केवलं मम ॥ तव च बहूनि जन्मानि व्यतीतानि अतिक्रान्तानि यद्येवं ममेव तवाप्यनेकानि जन्मानि व्यतीतानि स्युः ॥ तर्हि मत्तः कस्ते विशेषः ॥ यदि निर्विशेषः स्याः तर्हि कुतस्तव मम च गुरुशिष्यभावः इति चेत् तानि मदीयानि त्वदीयानि अन्यदीयानि च सर्वाणि जन्मानि अहं सर्वज्ञः ईश्वरो वेद्मि ॥ अल्पज्ञो जीवस्त्वं तानि न वेत्सि ॥ त्वदीयान्यपि न वेत्सि किमुत मदीयानि अन्यदी-यानि च ॥ तव मम च अतीतानेकजन्मवत्वे तुल्येऽपि ज्ञानवैषम्येण भवानज्ञो जीवः ॥ अहं सर्वज्ञ ईश्वरः ॥ अतोऽहं गुरुः त्वं शिष्यः इत्युपपद्यते ॥ वेत्थ वेद इति मध्यम-

पुरुषोत्तमपुरुषप्रयोगभेदेनैव त्वमहमित्यनयोर्लोभेऽपि सर्वज्ञत्वादिगुणानां अज्ञत्वादिदोषाणां च सूचनाय अहं त्वमित्यनयोः प्रयोगः ॥ जन्मान्तरेणोपदेश इति स्पष्टं परिहारमजानतस्तव अर्जुनशब्दसूचितं सौन्दर्यं परन्तपशब्दसूचितं शौर्यं च मुधेति संबोधनद्वयाभिप्रायः ॥ 'अर्जुने'त्यनेन श्लेषेण अर्जुनवृक्षसमानेति सूच्यते ॥ तेन अज्ञानसंबन्धिनी आवरणशक्तिः सूच्यते ॥ 'परन्तप'इत्यनेन अविद्यमानानपि परान् भ्रान्त्या कल्पयित्वा तांश्च शत्रून् कल्पयित्वा तान् तापयितुं प्रवृत्तोऽसि ॥ अहो भ्रान्तिरिति सूच्यते ॥ तेन अज्ञानसंबंधिनी विक्षेपशक्तिः सूच्यते ॥ संबोधनद्वयेन आवरणविक्षेपावज्ञानधर्मौ सूचिताविति वा ॥ नेश्वरस्य मम जन्मानि इन्द्रजालवन्मिथ्या । किंतु सत्यानि ॥ सत्यत्वसूचनार्थमेव 'तवचे'ति दृष्टान्ततया उपात्तम् ॥ अन्यथा जन्मान्तरे मयोपदिष्टमिति परिहारकथनाय मे जन्मानि व्यतीतानि इत्येतावदेवोक्तं स्यात् ॥ सत्यत्वे हि बहुत्वजन्मत्वातीतत्वादयः स्वरसतः संगच्छेरन् ॥ ईश्वरत्वात् मम जन्मनः अवतार इति मृतेरंतर्धानमिति च व्यवहारः॥ त्वदादीनां जीवानां जन्मनः जन्मेति मृतेर्मरणमिति च व्यवहारः ॥ सम्यगवधेहीममावयोर्महान्तं विशेषम् ॥ नान्यथा मंस्थाः ॥ ५ ॥

अर्जुनः ॥ अनेकजन्मवत्वमंगीकृत्य ज्ञानवैषम्यादीश्वरोऽहमित्युक्तम् ॥ अकर्मवश्यः ईश्वरस्त्वं कर्मवश्यो जीव इव कुतो जन्मानुभवसि ॥ दुःखहेतुर्हि जन्मानुभवः ॥ ब्रूहि ॥

कृष्णः ॥ अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ॥
प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया ॥ ६ ॥

अजोऽपीति॥ अहं न जायत इत्यजः जन्मरहितः सन्नपि न विद्यते व्ययः नाशः विकारो वा यस्य सः अव्ययः अव्ययः आत्मा स्वरूपं देहो वा यस्य सः अव्ययात्मा सन्नपि भूतानां प्राणिनां ईश्वरः सन्नपि स्वां स्वाधीनां प्रकृतिं अधिष्ठाय आश्रित्य आत्मनः मायया प्रकृत्या इच्छया संकल्पेन संभवामि ॥ ६ ॥

जन्मसंबन्धान्न मम ईश्वरत्वहानिः दुःखसंबन्धो वा॥ अतो जन्मानुभवामि ॥

कुत एवं इति चेत् यदि त्वदादिजीवा इव शरीरसंयोगवियोगरूपजन्ममरणवान् स्यां तर्हि पूर्वजन्मपरित्यागे मरणदुःखं उत्तरजन्मस्वीकारे जन्मदुःखं च मे स्यात् ॥ नाहं तथा ॥ किंतु अजः स्वरूपतः शरीरतश्च जन्मरहितः ॥ अव्ययात्मा स्वरूपतः शरीरतश्च नाशरहितः ॥ अव्ययः आत्मा स्वरूपं शरीरं च यस्येति विग्रहः ॥ अतो न मे जन्मना दुःखानुभवः ईश्वरत्वहानिर्वा ॥ अजत्वादव्ययत्वाच्च न मे जन्ममरणे स्त इति वचनं युक्तं ॥ जन्मरहितस्य जन्मना न दुःखानुभव इति तु वचनमयुक्तं ॥ व्याहतं हि तत् ॥ अतः कथमिदमिति चेत् [१] अजत्वं बहुजन्मवत्वं च मे श्रुतिर्वक्ति ॥ 'अजायमानो बहुधा विजायते' ॥ इति ॥ कर्मवश्यजीवजन्मसदृशजन्मरहितः जीवजन्मविलक्षणानेकजन्मवांश्चाहं ॥ अतो मदुक्तं युक्तं ॥ तव जीवस्येव जन्ममरणे कुतो न स्त इति चेत् । अहं भूतानां ब्रह्मादिस्थावरान्तानां ईश्वरः ॥ ब्रह्मादीनामहमिव यदि ममान्य ईश्वरः स्यात् तर्हि ब्रह्मादीनहमिव मामन्यः कर्मानुगुणं सृजेत् संहरेच्च ॥ नास्ति [२] ममेश्वरोन्यः ॥ अहमेव सर्वेषामीश्वरः॥ अतो न मम स्रष्टा संहर्ता वा ॥ अतो न मम जीवानामिव जन्ममरणे ॥ यदि ईदृशस्त्वं ईदृशस्य तव यद्यन्यः स्रष्टा संहर्ता च न स्यात् तर्हि तव लोकविलक्षणं जन्म वा कुत इति चेत् अहमेव ईदृशोऽपि सन् मदिच्छया जन्म स्वीकरोमि ॥ जन्मस्वीकारेण तव प्रयोजनमस्ति न वा ॥ आद्ये ततः पूर्वं तदभावादपूर्णत्वं स्यात् ॥ द्वितीये निरर्थककर्मकारित्वादुन्मत्ततापसंगः ॥ अतः कुतोऽयं जन्मस्वीकारः इति चेत् ॥ अयं मम स्वभावः स्वां प्रकृतिं स्वकीयं स्वभावं अनुसृत्य संभवामि ॥ [३] 'देवस्यैष स्वभावोऽयं आप्तकामस्य का स्पृहा' ॥ इति श्रुतिः ॥ जन्मना न मे प्रयोजनं तथाऽपि कृपारसातिशयेन परप्रयोजनमपि स्वप्रयोजनं मन्यमानः संभवामि ॥ अतः अपूर्णतायाः उन्मत्ततायाश्च न प्रसक्तिः ॥ परप्रयोजनं च वक्ष्यते ॥ [४] 'परित्राणाय साधूना'मिति ॥ लोकविलक्षणजन्मांगीकाराय समुचितस्थलोपलब्धिः कथमिति चेत् स्वां प्रकृतिमधिष्ठाय रजो-

---

१. तै. आ. ३. १३. २. अत्र, आत्मेश्वरोऽसि न परोऽस्ति तवेश्वरोऽन्यो विश्वस्य चासि पतिरस्य परायणं च ॥ नारायणाच्युत परस्त्वमिहैक एव ब्रह्मादयोऽपि भवदीक्षणलब्धसत्ताः'॥इति श्लोकोऽनुसन्धेयः ॥ ३. मां. २. ९. ४. ४. ८.

गुणात्मिकया प्रकृत्या अवतारसमुचितान् वसुदेवादिदेहान् सृष्ट्वा तत्र संभवामि ॥ कुतो जीवजन्मसदृशजन्मवत्तया प्रतीयसे ॥ जातोऽस्ति वर्तते इति हि लोकरीत्या त्वां व्यवहरन्ति लोके ॥ इति चेत् स्वां प्रकृतिं तमोगुणात्मिकां प्रकृतिं कारणीकृत्य संभवामीव ॥ लोकरीत्या जात इव व्यवहारविषयतां प्राप्नोमि ॥ यदि जन्म स्वीकुरुषे तर्हि अवतारे ज्ञानसंकोचः स्यात् इति चेत् आत्मनः मायया ज्ञानेन शक्त्या च युक्त एव संभवामि ॥ १'पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ॥ पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥ इति श्रुतिः ॥ अपि सन् इत्यस्य द्विः प्रयोगः अजत्वेऽपि भूतेश्वरत्वेऽपि स्वेच्छयैव लोकोपकाराय लीलया मानुषादिदेहं स्वीकरोमीत्युक्तार्थे तात्पर्यद्योतनाय ॥ एवं मज्जन्मनो लोकविलक्षणत्वात् स्वेच्छागृहीतत्वात् ज्ञानशक्त्याद्यसंकोचेनैव गृहीतत्वाच्च न तेन ममेश्वरत्वहानिः दुःखसंबन्धो वा ॥ अतो जन्मांगीकारेऽपि न काऽपि मम क्षतिः ॥ ६ ॥

अ ॥ वस्तुतो न जीवानामिव मम अपूर्वदेहेन्द्रियादिग्रहणरूपं जन्म अपूर्वगृहीतदेहेंद्रियादिवियोगरूपो नाशो वा ॥ कारणाभावात् ॥ किंतु मायामयं नित्यसिद्धं शरीरमेकमेव मम ॥ कदाचित्कार्यार्थं दृग्गोचरत्वेन तं दाविर्भावयामि ॥ तदेव मम जन्म ॥ कार्यानन्तरं तत्तिरोभावयामि ॥ तदेव मे मरणं ॥ आविर्भावमुत्पत्तिं मन्यन्ते ॥ तिरोभावं मरणं मन्यन्ते मायामोहिताः ॥ २'देवानां कार्यसिद्ध्यर्थं आविर्भवति सा यदा ॥ उत्पन्नेति तदा लोके सा नित्याऽप्यभिधीयते ॥' इति स्मरन्ति ॥ सा ईश्वरस्य मूर्त्तिः ॥ येन देहेन सूर्यायोपदिष्टवानहं तेनैव देहेन तुभ्यं उपदिशामि ॥ अजः स्वरूपतः शरीरतोऽपि जन्मरहितः ३अव्ययात्मा शरीरतः स्वरूपतश्च नाशरहितश्च ईदृशस्सन्नपि भूतानां कर्मवश्यानां ब्रह्मादिस्थावरांतानां ईश्वरस्सन्नपि स्वां मदधीनां ४प्रकृतिं मायां अधिष्ठाय चिदाभासेन वशीकृत्य मदुपाधिभूतां यावत्कालस्थायित्वेन नित्यां जगत्कारणत्वसंपादिकां मदिच्छयैव प्रवर्तमानां विशुद्धसत्वमयीं अनादिमायां देहत्वेन स्वीकृत्य तदाविर्भावकाले मम ५मायया संभवामि संभवामीव जन्मवानिव भवामि ॥ मायया मम

१. बृ. उ. १. १. २. वायु. ३४. वरा. १४. ३. अव्ययात्मा अक्षीणज्ञानशक्तिस्वभावः ॥ ४. प्रत्यगभिन्नं चैतन्यं ॥ स्वभावं सच्चिदानन्दैकरसम् ॥ ५. मायया मायामयदेहेन संभवामि मदधीनया शक्तित्वेन मदभिन्नया वा मायया ॥

मनुष्यादित्वप्रतीतिः ॥ न वस्तुगत्या ॥ अतो न मम जन्मना दुःखानुभवः ईश्वरत्वहानिर्वा ॥ नापि असर्वज्ञत्वादित्वाभ्यां उद्भावितायाः सूर्यायोपदेश एतद्देहेन वा देहान्तरेण वेत्यादिशंकाया अवकाशः ॥ यथा कश्चिन्मायावी स्वयं स्वस्थानादप्रच्युत एवादृश्यो भूत्वा स्थूलसूक्ष्मभूतान्यनुपादायैव केवलया मायया द्वितीयं मायाविनं स्वसदृशमेव सूत्रमार्गेण गगनमारोहन्तं सृजति ॥ एवमहं कूटस्थचिन्मात्रोऽग्राह्यः स्वमायया चिन्मयमात्मनः शरीरं सृजामि ॥ तस्य बाल्याद्यवस्थाश्च सूत्रारोहणवद्दर्शयामि ॥ लौकिको मायावी मायामुपसंहरन् द्वितीयं मायाविनमप्युपसंहरति ॥ अहंतु तामनुपसंहरन् स्वशरीरमपि नोपसंहरामि ॥ तस्मात्सिद्धं परमेश्वरस्य मम मायामयं [१] शरीरं नित्यमेकमेवेति ॥ तेनैकेनैव शरीरेण सूर्यादिभ्यस्तुभ्यंचोपदेश इति न काप्यनुपपत्तिः ॥ ६ ॥

वि ॥ अजः जन्मरहितः स्वरूपतो विकाररहितः अव्ययात्मा आत्मा स्वभावः धर्मतो विकाररहितः ॥ स्वरूपतो देहतश्च जननमरणरहितो वा ॥ आत्माऽत्र देहः ॥ सर्वेषां भूतानामीश्वरश्च ॥ ईदृशः खल्वहं नित्यविभूतौ ॥ सोऽहं अजः अव्ययात्माऽपि सन् भूतानामीश्वरोऽपि सन् ॥ अजत्वाव्ययात्मत्वसर्वेश्वरत्वादिस्वभाववानेव मदीयं सर्वमैश्वरं स्वभावं अत्यजन्नेवेति यावत् ॥ स्वां स्वकीयां प्रकृतिं अप्राकृतदिव्यमंगलविग्रहं आश्रित्य [२] स्वमेव दिव्यं रूपं देवमनुष्यादिसजातीयसंस्थानं कुर्वन् आत्मनः संकल्पेन संभवामि ॥ देवमनुष्यादिरूपोऽवतरामि ॥ अवतारविग्रहस्यापि अप्राकृतपरमपदनिलयदिव्यविग्रहांशविशेषत्वात् न जन्मसंबन्धेन मम दुःखसंबन्धः ईश्वरत्वहानिर्वा ॥ 'अजायमानो बहुधा विजायते ॥'

१. इदं परमेश्वरे देहदेहिभावं मन्यमानानां भाष्यकारादीनां मतं ॥ 'निल्योयः कारणोपाधिः मायाख्योऽनेकशक्तिमान् ॥ स एव भगवद्देह इति भाष्यकृतां मतं ॥' अन्येतु देहदेहिभावं नांगी कुर्वन्ति ॥ स्वरूपमेव शरीरम् ॥ मायया तु लोकवत देहदेहिभावप्रतीतिः ॥ इत्याहुः ॥ २. अत्र, स्वमेवरूपं तत्तत्सजातीयसंस्थानं स्वस्वभावमजहदेव कुर्वन् तेषुतेषु लोकेष्ववतीर्यावतीर्यैति अवतरणिकाभाष्यस्थवाक्यं, 'समस्तशक्तिरूपाणि तत्करोति जनेश्वर ॥ देवतिर्यङ्मनुष्याख्याचेष्टावन्ति स्वलीलया ॥' इति श्रीविष्णुपुराण (६ ७. ७१.) वचनं चानुसन्धेयम् ॥

इति श्रुतिः ॥ इतरपुरुषसाधारणं जन्माकुर्वन् देवादिरूपेण [illegible] उक्तप्रक्रियया जायत इत्यर्थः ॥ अतो देवकार्यार्थं तत्रतत्र तदातदा अवतारकरणेऽपि न मम काऽपि क्षतिः ॥ अत्र पूर्वार्धेन जन्मप्रकारउक्तः ॥ तृतीयपादेन देहयाथात्म्यमुक्तं ॥ चतुर्थपादेन जन्महेतुरुक्तः ॥ इति बोध्यं ॥ ६ ॥

अर्जुनः ॥ ईदृशं विलक्षणं जन्म कदाकदा ॥ ब्रूहि ॥

कृष्णः ॥ यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ॥
अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहम् ॥ ७ ॥

यदेति ॥ हे भारत अर्जुन यदायदा धर्मस्य ग्लानिः ह्रासः भवति अधर्मस्य अभ्युत्थानं वृद्धिः भवति तदा अहं आत्मानं सृजामि ॥ ७ ॥

यस्मिन् यस्मिन् काले धर्मस्य ग्लानिर्भवति ॥ तथा अधर्मस्य अभितः उत्थानं च भवति ॥ तस्मिन् तस्मिन् काले अहमात्मानं सृजामि ॥ स्वेच्छया अवतरामि ॥ उक्तरूपावतारविग्रहविशिष्टं करोमि ॥ धर्माधर्मग्लानिवृद्धिकाले पूर्वोक्तरीत्या मायामयं शरीरं नित्यसिद्धमेव दृग्गोचरत्वेनाऽऽविर्भावयामि ॥ प्रसिद्धं चेदं पुराणादिषु ॥ ग्लानिशब्देन ग्लानिमपि न सहे ॥ किंपुनर्विच्छेदं इति, अभ्युत्थानशब्देन उद्गममात्रमपि न सहे ॥ किमुत शाखानुशाखतामिति च सूच्यते ॥ भरतवंशोद्भवत्वेन भाशब्दितज्ञानरतत्वेन च तवापि धर्मग्लानिरधर्मवृद्धिश्चासह्या ॥ किमुत धर्मस्थापनेन जगद्रक्षणशीलस्य मम ॥ न जीवानामिव मज्जन्मनः कालनियमः ॥ किंतु उक्तहेतुर्यस्मिन् काले संभवति स एव मज्जन्मनः कालः ॥ ७ ॥

अर्जुनः ॥ 'तदाऽऽत्मानं सृजाम्यहं ॥' इत्युक्तं ॥ किमर्थं तदातदा आत्मानं सृजसि ॥ ब्रूहि ॥

कृष्णः ॥ परित्राणाय साधूनां विनाशाय च दुष्कृताम् ॥
धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥ ८ ॥

परित्राणायेति॥ साधूनां परित्राणाय रक्षणाय दुः दुष्टं कार्यं कुर्वन्तीति दुष्कृतः असाधवः तेषां दुष्कृतां विनाशाय च धर्मस्य सं सम्यक् स्थापनं धर्मसंस्थापनं तदेव अर्थः प्रयोजनं तस्मै धर्मसंस्थापनार्थाय युगेयुगे संभवामि ॥ ८ ॥

१ साधूनां अनुष्ठानेन धर्मवृद्धिहेतूनां परितः रक्षणाय पापकर्म कुर्वतां धर्मविरोधिनां समूलनाशाय च दुष्टनिग्रहशिष्टपरिपालनाभ्यां धर्मस्य सम्यक् स्थापनं यत् तद्रूपप्रयोजनाय च २ युगेयुगे संभवामि॥ यदायदाहीति युगमध्ये अवान्तरकालोक्तिपरं ॥ मज्जन्मना यत्परेषां उक्तरूपप्रयोजनं तदेव अवाप्तसमस्तकामस्यापि मम प्रयोजनं ॥ प्रतियुगं धर्माधर्महासवृद्धिकाले अहं युगानुगुणं कार्यानुगुणं चावतारशब्दितं जन्म स्वीकृत्य दुष्टनिग्रहशिष्टपरिपालनाभ्यां धर्मसंस्थापनं कुर्वन् लोकान् परिपालयामीत्यहो मम परोपकारनिरतता ॥ एवमनेकावतारकर्तृत्वात् एकस्मिन्नवतारे मया सूर्यायोपदेशः कृतः स्यादिति परिहारमवधेहि ॥ ८ ॥

सञ्जयः ॥ एवं भगवतोक्तं भगवज्जन्मनः भगवत्कर्मणश्च याथात्म्यं श्रुतवता पार्थेन, किमनेनाप्रकृतेन प्रसक्तानुप्रसक्त्या प्रवृत्तेन विचारेण उपदेष्टुमुपक्रांतं कर्मयोगं ज्ञानयोगं वा भूयः कथयेत्यभिहितो भगवान्, कर्मध्यानज्ञानभक्तियोगाः मत्प्राप्तेरुपायाः मां प्रेप्सुभिरवश्यं यत्नतः संपाद्याः ॥ उक्तं मज्जन्मकर्मरहस्यंतु मदीयं याथात्म्यं ॥ अत एतत्प्रकरणं गीतायामतिशयितं मान्यथामंस्थाः॥ उक्तरूपमज्जन्मकर्मरहस्यज्ञानी मुक्तिं प्राप्नोतीत्याह ॥

कृष्णः ॥ जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्वतः॥
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥ ९ ॥

१. वि ॥ वैष्णवाप्रेसरणां मत्स्वरूपचेष्टितावलोकनाऽऽलापादिदानेन रक्षणाय ॥ २. कलियुगे अवतारोनास्ति ॥ अत एव भगवतः त्रियुग इति नाम ॥ उक्तं च प्रह्लादेन ॥ 'धर्म महापुरुषपासि युगानुवृत्तं छन्नः कलौ यदभवः त्रियुगोऽथ तत्वं'॥ इति ॥ भाग ७ स्कंधे अध्या ९॥ सर्तिचैवं युगेयुगे इति कथमिति चेत् ॥ वृत्तवर्तमानावतारविवक्षया इदं ॥ कल्क्यवतारस्य कलिकृतयुगसन्धिगतत्वेन कलियुगगतत्वाभिप्रायाद्वा ॥

जन्मेति ॥ हे अर्जुन यः मे दिव्यं जन्म कर्म च एवं तत्वतः वेत्ति स देहं त्यक्त्वा पुनः जन्म नैति न प्राप्नोति ॥ मां एति ॥ ९ ॥

मम दिव्यं अलौकिकं विलक्षणं जन्म कर्म च उक्तरीत्या तत्वतो यो जानाति सः वर्तमानं देहं त्यक्त्वा एतज्जन्मानंतरं पुनः जन्मशब्दितं देहसंयोगं न प्राप्नोति॥ तर्हि तस्य किं भवतीति चेत् मां प्राप्नोति हे पार्थ सम्यंगवधेहीदं तत्वं ॥ ९ ॥

अर्जुनः ॥ **जन्म कर्म च यो वेत्ति स मामेतीत्युक्तं ॥ तत्कथं ॥ न जन्मकर्मरहस्यज्ञानमात्रेण मुक्तिः स्यात् ॥ किंतु यथावद्ब्रह्मस्वरूपज्ञानान्मोक्षः ॥ अन्यथा ज्ञानभक्तिवैराग्यादिसाधनोपदेशपरशास्त्राणां वैयर्थ्यं हि स्यात् ॥ अतस्तत्वं ब्रूहि ॥**

कृष्णः ॥ **वीतरागभयक्रोधा मन्मया मामुपाश्रिताः ॥**
बहवो ज्ञानतपसा पूता मद्भावमागताः ॥ १० ॥

वीतेति ॥ ज्ञानरूपं च तत् तपश्च ज्ञानतपः तेन ज्ञानतपसा पूताः शुद्धाः बहवः मां उपाश्रिताः सन्तः मन्मयाः मत्प्रधानाः मदेकशरणाः सन्तः रागश्च भयं च क्रोधश्च रागभयक्रोधाः वीताः गताः रागभयक्रोधाः येषां ते वीतरागभयक्रोधाः सन्तः मद्भावं मयि भावः स्थितिः मम भावः स्वभावः मम भावः तादात्म्यं वा मद्भावः मुक्तिः तं आगताः प्राप्ताः ॥ १० ॥

न केवलं मज्जन्मकर्मरहस्यज्ञानमात्रेण मुक्तिः ॥ किंतु यथावत् ब्रह्मस्वरूपज्ञानेनैव ॥ जन्मकर्मरहस्यज्ञानं तु भक्तिज्ञानादिसाधनसामग्रीद्वारा परंपरया मोक्षसाधनं ॥ यो वेत्ति स मामेतीति साक्षान्मोक्षसाधनत्वोक्तिस्तु १' अपाम सोममम्रता अभूमे'त्यादिवत् स्तुत्यर्था ॥ मदीयं जन्मकर्मरहस्यं जानंतः वैराग्यभक्तिज्ञानसामग्रीद्वारा मुच्यन्ते ॥ किमेवं केऽपि मुक्तिं गता वर्तंते इति चेत् नैके किंतु बहवः ॥ इमे जन्मकर्मरहस्यज्ञानेन कीदृशा भूत्वा मुक्तिं गता इति चेत्

---

१. तै. सं. ३. २. ५.

जन्मकर्मरहस्यज्ञानेन जातया अंतःकरणशुद्ध्या रागभयक्रोधादिमानसदोषरहितास्संतः ॥ रागभयक्रोधाः १ वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यत " ॥ इत्यत्र व्याख्याताः ॥ मन्मयाः मत्प्रधानाः अहमेव प्रधान इति ज्ञातवंतः मत्प्रचुराः अहमेव सर्वेषु वस्तुषु सत्ताप्रवृत्तिप्रतीत्यादिप्रदत्वेन वर्ते इति मदीयां व्याप्तिं जानंतः इति वा ॥ मां उपाश्रिताः ज्ञानरूपेण तपसा शुद्धाः दग्धाशेषकल्मषाश्च संतः मद्भावं मयि भावं सायुज्यं मे भाव इव भावः सारूप्यं तं मया सह भावः स्थितिः सामीप्यं तं मयि मदीये लोके भावः सालोक्यं च यथायोग्यं प्राप्ताः ॥

अ ॥ मन्मयाः मत्स्वरूपाः मदभिन्नाः ब्रह्मैवाहमिति स्वस्य मदभेददर्शिनः मदेकचित्ता वा मदेकप्रधाना वा ॥ मां उपाश्रिताः ॥ एकांतभक्त्या मामेव शरणं गताः ॥ केवलज्ञानमात्रनिष्ठा वा ॥ ज्ञानाख्यतपसा ज्ञानं च तपश्च ताभ्यां वा ॥ ज्ञानरूपं तपः आलोचनं मम जन्मकर्मणोः स्वरूपस्य च निरंतरचिंतनं तेन वा ॥ शुद्धाश्च संतः मद्भावं ब्रह्मत्वं प्राप्ताः ॥ ज्ञानाख्यतपसा पूताः मामुपाश्रिताः सर्वं ब्रह्मेति सर्वत्र मदेकत्वदर्शनं कुर्वंतः मन्मयाः जीवन्मुक्तौ ब्रह्मैवाहमिति मदात्मना स्थिताश्च संतः देहपातानंतरं ब्रह्मत्वं प्राप्ता इति वा ॥ जीवन्मुक्तौ मयि भावं रत्याख्यं प्रेमातिशयं प्राप्ताः ॥ २ 'तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते ॥' इति वक्ष्यते ॥ इति वा ॥

वि ॥ उक्तरूपजन्मकर्मरहस्यज्ञानरूपतपसा पूताः मदीयदिव्यजन्मचेष्टितयाथात्म्यविज्ञानेन विध्वस्तसमस्तमत्समाश्रयणविरोधिपापाः अतः तस्मिन्नेव जन्मनि मामुपाश्रिताः मन्मयाः मया ज्ञानविषयीभूतेन मयाः प्रचुराः मदेकचित्ताः मम भावं स्वभावं परमं साम्यं ३ प्राप्ताः ॥ १० ॥

संजय ॥ समाप्तमिदं प्रासंगिकं ॥ कथयामि ते उपदेष्टुं उपक्रान्ते कर्मयोगे

१. २. ५६. २ ७. १७. ३. द्वै ॥ आगताः सम्यक् प्राप्ताः ॥ अ ॥ वि ॥ प्राप्ताः गत इति वक्तव्ये आगता इत्युक्तिः एषामिदं स्वकीयमिति सूचनाय ॥ एवमेव वक्ष्यति ॥ 'मम साधर्म्यमागता' (१४. २.) इति ॥ अत एव वाल्मीकिः, 'आजगाम मुहूर्तेन यत्र रामः सलक्ष्मणः ॥ (रा. यु. १७.) इत्यत्र जगामेति वक्तव्ये आजगामेत्याह ॥

वक्तव्यशेषं ॥ सादरमवधानेन शृणु ॥ इत्यभिहिते, पार्थेन अवहितोऽस्मि भूयः कथय ॥ १'बुद्ध्या युक्तो यया पार्थ कर्मबंधं प्रहास्यसि ॥' २'जन्मबंधविनिर्मुक्ताः पदं गच्छंत्यनामयं ॥' ३'श्रद्धावंतोऽनसूयंतो मुच्यंते तेऽपि कर्मभिः ॥' इति अकाम्यकर्मकरणान्मोक्षं, ४'यामिमां पुष्पितां वाचं प्रवदंत्यविपश्चितः ॥' ५'भोगैश्वर्यप्रसक्तानां तयाऽपहृतचेतसां ॥' इति काम्यकर्मकरणात्स्वर्गादिकं च प्राप्यमभ्यधाः ॥ उभयविधं कर्म कुर्वद्भ्य उभयेभ्यस्तेभ्य उभयविधं फलं भवानेव हि ददाति॥ स्वाधीने फलदाने कुतो वैषम्यं ॥ केभ्यश्चिन्मोक्षः केभ्यश्चित्स्वर्गादिकमिति ॥ कुतो नाविशेषेण फलं दीयते ॥ अतो विषमो भवान्॥ बूहीत्यभिहितो भगवान् आत्मनो वैषम्यं परिहरन् उभयविधं कर्म कुर्वतां फलभेदे कारणमाह ॥

कृष्णः ॥ ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहं ॥
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥ ११ ॥

य इति ॥ हे पार्थ ये मां यथा प्रपद्यन्ते तान् तथैव अहं भजामिं आश्रयामि ॥ सर्वशः सर्वे मनुष्याः सर्वैः प्रकारैर्वा मम वर्त्म मार्गं अनुवर्तन्ते अनुसरन्ति ॥ ११ ॥

ये यथा येन प्रकारेण अकामनया ज्ञानद्वारा मोक्षप्रापकमत्प्रसादैककामनया वा स्वर्गपशुपुत्रादिरूपफलकामनया वा साक्षात् इंद्रादिरूपेण वा मामाश्रयंते ॥ अकाम्येन काम्येन वा कर्मणा आराधयन्ति ॥ तान् उभयानपि तथैव तत्तत्कामानुसारेणैवाहमाश्रयामि ॥ मोक्षस्वर्गादिरूपफलदानेन संतोषयामि ॥ यदि केभ्यश्चित् फलं न दद्यां तर्ह्यहं विषमः स्यां न तथा किंतु तान् उभयान् फलदानेन भजाम्येव ॥ अतो न मे वैषम्यं ॥ तत्तत्कामानुसारेण फलदानं हि दातॄणां निसर्गः॥ एवमेव हि ददति ६ कल्पद्रुमादयोऽपि॥ कुतोऽल्पस्वर्गादिफलकामनया इंद्रादिद्वारा भवन्तमाराधयद्भ्यः इन्द्रादीनाराधयद्भ्यश्चाल्पं फलं ददासि ॥ दत्वा वैषम्यपरिहारायैवं श्राम्यसि ॥ अकामनया भवंतमाराधयद्भ्य एव फलं दीयतां ॥ नान्येभ्य इति चेत् हे पार्थ काम्यं कर्म कुर्वतः सर्वे मनुष्याः मदीयं किल मार्गमनुसरन्ति ॥

१. २. ३९. २. २. ५१. ३. ३. ३१. ४. २. ४२. ५. २. ४४. ६. भाग. १०. ३८.

तैराश्रितः प्रवृत्तिकर्ममार्गोऽपि मया हि प्रवर्तितः ॥ उक्तं हि मया ॥ १'देवान् भावयतानेने'त्यादि ॥ वक्ष्यते च ॥ २'यो यो यां यां तनुं भक्त' इत्यादि ॥ मया प्रवर्तितं मार्गमनुसरद्भ्यो देयमेव हि फलं मया ॥ अतो दीयते ॥ परंतु कर्मानुगुणं अल्पं स्वर्गादिकं दीयते ॥ उभयविधं कर्म कुर्वन्तः उभयेऽपि मनुष्याः मम वर्त्मानुवर्तन्ते ॥ प्रवृत्तिमार्गो निवृत्तिमार्गश्च मयैव हि प्रवर्तितः अत उभयेभ्योऽपि फलं देयमेवेति दीयते ॥ परंतु तत्तत्कर्मानुगुणं दीयते ॥ अतो न वैषम्यमिति वा ॥ फलकामनाया अल्पफलप्राप्तिहेतुत्वेन त्वं अकामनयैव कर्तव्यं कर्मानुतिष्ठ ॥ ११ ॥

द्वै ॥ अर्जुनः ॥ ३ मामुपाश्रिताः मद्भावमागताः इत्युक्त्या त्वदाश्रयणं मोक्षहेतुरिति प्रतीयते ॥ यद्येवं तर्हि साक्षात् त्वामाश्रितानां ज्ञानिनामिव इन्द्रादिरूपेण त्वामाश्रितानां काम्यकर्मिणामपि मोक्षः फलं स्यात् ॥ अस्तु इति चेत् ज्ञानिनां त्रैविद्यानामपि फले साम्यादविशेषः स्यात् ॥ तच्चायुक्तं ॥ न फलसाम्यं किंतु ज्ञानिभ्यो मोक्षं काम्यकर्मिभ्यः त्रैविद्येभ्यः स्वर्गादिकं ददामीति चेत् विषमं फलं ददत् त्वं विषमः स्याः । किं ब्रवीषि ॥ वद ॥

कृष्णः ॥ नोभयेभ्यः एकं फलं ददामि ॥ किंतु ज्ञानिभ्यो मुक्तिं अन्येभ्योऽन्यत् फलं ददामि ॥ हन्त तर्हि वैषम्यं स्यादिति चेत् ये मां यथा प्रपद्यन्ते तान् अहं तथैव भजामि ॥ कर्मानुगुणफलदानमेव हि साम्यं ॥ अतो न मम वैषम्यप्रसक्तिः ॥ कुत उभयेभ्योऽपि फलं दीयत इति चेत् उभयेऽपि मम हि मार्गं श्रुतिस्मृतिचोदितं अनुसरन्ति ॥ अत उभयेभ्योऽपि दीयते ॥ परंतु कर्मानुगुणं दीयते ॥ अतो न वैषम्यं मम ॥ ११ ॥

अर्जुनः ॥ 'परित्राणाय साधूनां विनाशाय च दुष्कृतां ॥ संभवामि' इत्युक्तं ॥ यद्येवं तर्हि त्वं साधुषु रागी असाधुषु द्वेषी च भवेथाः ॥ रागद्वेषवांश्च भवान् वयमिव विषमः स्यात् ॥ वद ॥

१. ३. ११. २. ७. २१. ३. द्वै ॥ अ ॥ प्रासंगिकवचनोपरि शङ्कातत्समाधानपरतया प्रवृत्तोऽयं ग्रन्थः 'कर्मभिर्न स बध्यते' इत्यन्तः ॥ कर्मोपदेशारम्भस्तु 'एवं ज्ञात्वे'त्यत्र ॥

कृष्णः ॥ साधवः परेषु प्रीतिं कुर्वन्ति ॥ असाधवस्तु परेषु द्वेषं ॥ अहं तु सर्वत्र वर्ते ॥ प्रीतिविषयेषु वर्तमानोऽहं प्रीतिं कुर्वत्सु प्रीतिं करोमि ॥ द्वेषविषयेषु वर्तमानोऽहं द्वेषं कुर्वत्सु द्वेषं करोमि ॥ बिंबपूजापरिभवौ हि प्रतिबिंबे संक्रामतः ॥ नातो वैषम्यं मम ॥ ये तु मनुष्या मम भक्तिध्यानादिमार्गमनुवर्तन्ते तानहं सर्वशः सर्वैः प्रकारैः भजामि ॥ अतः श्रेयोऽर्थिभिः परेषां हिताचरणायैव प्रयतितव्यं ॥ हे पार्थ त्वं सर्वथा सर्वेषां हितमेवाऽऽचर ॥ न कस्यापि मनागप्यहितम् ॥

अ ॥ अर्जुनः ॥ 'मामुपाश्रिता' इति विशेषणेन ज्ञानतपसा पूताः इति विशेषणेन वा निष्कामा एव मुक्तिं प्राप्नुवन्ति ॥ नान्ये सकामाः ॥ इति प्रतीयते ॥ यद्येवं तर्हि केभ्यश्चित् मोक्षं केभ्यश्चित् अन्यत्फलं ददत् भवान् विषमः स्याः ॥ वद ॥

कृष्णः ॥ १'यो यो यां यां तनुं भक्तः श्रद्धयाऽर्चितुमिच्छति ॥ तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहं ॥ स तया श्रद्धया युक्तः तस्याराधनमीहते॥ लभते च ततः कामान् मयैव विहितान् हि तान् ॥' इति वक्ष्यते ॥ स्वर्ग पशुपुत्रादिफलापेक्षया इन्द्रादीनाराधयन्तोपि मामेवाराधयन्ति ॥ २'येऽप्यन्यदेव ताभक्ताः यजन्ते श्रद्धयाऽन्विताः ॥ तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकं ॥' इति वक्ष्यते ॥चतुर्विधाः सुकृतिनः मां भजन्त ॥ आर्तः जिज्ञासुः अर्थार्थी ज्ञानी चेति ॥ ३'चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन'॥ इति वक्ष्यते ॥ मां भजमानाः द्विविधाः सकामाः निष्कामाश्च ॥ तत्र निष्कामेभ्यो मुक्तिं सकामेभ्य. तैस्तैः कामितं स्वर्गादिकं आर्तिनिवृत्त्यादिकं च ददामि ॥ यदि भजमानेभ्यो नैकरूपं फलं दीयते ॥ अपि तु भिन्नभिन्नरूपं ॥ तर्हि भवान् विषमः स्याः इति चेत् ये यथा येन प्रकारेण मां प्रपद्यन्ते तान् तथा तेन प्रकारेणैव भजामि ॥ स्वर्गादिकामनया सेवमानान् स्वर्गादिदानेन आर्त्तिनिवृत्तिकामनया सेवमानान् आर्त्तिहरणेन ज्ञानकामनया सेवमानान् ज्ञानादानेन मोक्षैककामनया सेवमानान् अकामान्

१. ७. २१. २२. २. ९. २३. ३. ७. १६.

मोक्षदानेन भजामि ॥ कामनानुगुणं फलदानमेव हि साम्यं ॥ कामितं हि फलं दीयमानं तोषाय कल्पेत ॥ नहि तंडुलादिकमर्थ्यमानाय महार्घवस्त्राभरणादि दीयमानं तस्य तोषाय कल्पते ॥ सर्वशः सर्वैः प्रकारैः आराधयंतोऽपि ममैव वर्त्मशब्दितमार्गमनुसरन्ति ॥ सर्वेषामप्युपासनामार्गाणां मयैव विहितत्वात् ॥ मदीयं मार्गमनुवर्तमानाः सर्वेऽपि मदीया एव खलु ॥ तेभ्यः सर्वेभ्योऽपि फलं देयमेव हि मया ॥ अतो मया सर्वेभ्यः सेवकेभ्यः तत्तत्सेवानुगुणं फलं दीयते ॥ न्याय्यमेव हीदं ॥ नहि सुरद्रुमादयः स्वाश्रितेभ्यः सर्वेभ्योऽप्येकरूपं फलं ददति ॥ अपितु तत्तत्कामनानुगुणमेव ॥ अतो नाहं विषमः ॥ मैवं पुनर्मंस्थाः ॥ कुतः सर्वेऽप्येकेनैव प्रकारेण त्वां न भजन्ते इति चेत् सर्वेऽपि मनुष्याः ॥ मम मार्गं अनुसृत्य प्रवर्तन्ते ॥ यस्मिन् यस्मिन् मार्गे मया प्रेर्यन्ते तस्मिन् तस्मिन् मार्गे प्रवर्तन्ते ॥ सर्वप्रेरकः खल्वहं ॥ अहंतु तत्तत्पूर्वकर्मानुगुणं प्रेरयामि ॥ ११ ॥

वि ॥ [1] सञ्जयः ॥ [2] 'यदा यदा हि धर्मस्य' 'परित्राणाय साधूनां' इति स्वस्य सौलभ्यसौशील्यवात्सल्यादिकल्याणगुणपूगं सूचयन् स्वस्य परोपकारशीलतामभिधाय, हे पार्थ परमो हि खलूपकारो मया क्रियमाणः सः ॥ ततोऽप्यतिशायितं मामाराधयतां परमसौकर्यापादकमेकं मयाक्रियमाणमुपकारं मयोच्यमानं शृणु इति स्वकीयां परोपकारपरमकाष्ठा माहभगवान् ॥

१. प्रासंगिकप्रकरणसंगतोऽयं श्लोकः कर्मयोगारंभस्तुत्तरश्लोके ॥ २, अत्र प्रवृत्तिनिवृत्तिकर्मपरतया व्याख्याने सुगमे कुत एवं व्याख्यातं भाष्ये इति चेत् 'तमरुहंद देव्वुरुवं अव्वुरुवं ताने तमरुहंददेप्पेर् मठूप्पेर् तमरुहंद देव्वण्णं चिंदित्तिमैयादिरुप्परे अव्वण्णमाधियानाम् ' इति परमप्रमाणतमकासारयोनिगाधानुसारेणैवं व्याख्यातं ॥ तैर्वा कुतस्तथोक्तमिति चेत् 'त्वद्भावयोगपरिभावितहृत्सरोजाः ये सच्छ्रुतेक्षितपथा ननु नाथ पुंसां ॥ यद्यद्धिया त उरुगाय विभावयन्ति तत्तद्वपुः प्रणयसे तदनुग्रहाय ' इति श्रीभागवततृतीयस्कंधगतब्रह्मवचनानुसारेण तथोक्तं तैः ॥

कृष्णः ॥ यदि मदाराधने अयमवतारः इदं रूपं इदं नाम इयमवस्था अयं देशः अयं कालः इति मया नियमः कृतः स्यात् तर्हि केषांचिदसौकर्यं स्यात् ॥ ततश्च शते नवतिराराधकाः अनवाप्तप्रयोजनाः स्युः ॥ करुणावरुणालयः परमोदारस्वभाववानहं सर्वैरप्यवाप्तप्रयोजनैर्भवितव्यं नैकेनापि अनवाप्तप्रयोजनेन भाव्यमिति मत्वा तैस्तैः स्वस्वेच्छासौकर्यानुसारेण स्वाभिलषितनामरूपादिभिरुपासने क्रियमाणे तस्मिन् देशे तस्मिंश्च काले तेन नाम्ना तेन रूपेण सएवाहमित्याविर्भूय स्वीयं रूपं प्रदर्श्य समनुगृह्णामि ॥ ये यथा येन प्रकारेण [1]नामरूपादिना मां आराधयन्ति अहं तान् तथैव तेन नामरूपादिना अनुगृह्णामि ॥ अतएव सर्वे मनुष्याः आराधकाः मम वर्त्म मार्गं स्वभावं ॥ मार्गशब्दः [2]स्वभावेपि प्रयुज्यते ॥ स्वासाधारणविग्रहचेष्टासौशील्यादिस्वभावं सर्वैः प्रकारैरनुभवन्ति ॥ मदीयं विग्रहादिकं चक्षुरादिभिरनुभवन्तः तेन च नितरां तुष्यन्तो वर्तन्ते ॥ अन्यथा न सर्वेऽपि लभेरन्निदं प्रयोजनं ॥ इयं परोपकारकाष्ठा मदीया ॥ परिरक्षणमेव नोपकारः ॥ किंतु [3] तत्तदिच्छासौकर्यानुसारेण परिरक्षणमेवोपकारः ॥

---

१. राम कृष्णाद्यवतारा इव अर्चावतारा अपि ग्राह्याः ॥ २. अत्र, 'कोऽयं पन्था यदसि विमुखो मंदभाग्ये मयीत्थं' ॥ इत्यादिप्रयोगाः ऊह्याः ॥ ३. यथा किल, परमोदाराः आस्माकीनाः सार्वभौमाः स्वकीयामाज्ञां शिरसि धृत्वा विहितं कर्मयोगं क्लेशमनेहसं यथावदनुष्ठितवन्तः चरमे वयसि सदन एव यथासुखमवस्थाप्य नास्मन्मदीयैरेभिः कुटुंबभरणाय शोचितव्यमिति परमया कृपया जीवसनसौकर्याय भूतेरर्धमामरणं प्रतिमासं ददति ॥ सुमहान्किलायमुपकारः ॥ यदीमे भृतावर्धं गृह्णन्तः प्रतियासं पंचमदिनादर्वाक् प्रधानराजधानीमेत्य तत्र प्रधानास्थान्यां गृह्णंतु स्वंस्वं वेतनार्धमिति निर्बंधः क्रियेत तर्हि गमनागमनसौकर्याधभावेन शते नवतिर्मास्तिष्ठेदमिति परित्यज्यतादिच्छां नष्टप्रयोजना भवेयुः ॥ मामूवंस्तथा लभतामिदं प्रयोजनं सर्वेपि तदर्हाः इति तत्तदिच्छासौकर्यानुसारेण तत्तदभिलषितदेशस्थस्वीयकोशागारे ददति तेभ्यस्तेभ्यो देयं ॥ ततोऽप्यातिशयितः खल्वयमुपकारः ॥

१ हनूमतो भवतश्च युगपदग्निप्रवेशावसरे कृष्णेति त्वया रामेति हनुमता चानुध्यात स्तथैव कृष्णो रामश्च सन् प्रादुर्भूय त्वां तं च तस्मात्संकटादुददीधरं किल ॥ किं तत्त्वं व्यस्मार्षीः ॥ तत्तदिच्छासौकर्याद्यनुसारेण तत्रतत्राविर्भूय रक्षणशीलोऽयं महोपकारीति मां सततमनुसंधेहि ॥ ११ ॥

अर्जुनः ॥ एवं काम्याकाम्यकर्मणोः महति फलभेदे सति कुतोऽल्पफलके इंद्राद्याराधनरूपे काम्ये कर्मणि प्रवर्तन्ते लोकाः ॥ ब्रूहि ॥

कृष्णः ॥ कांक्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः ॥

क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा ॥ १२ ॥

कांक्षन्त इति ॥ हि यस्मात् कर्मणा जायत इति कर्मजा सिद्धिः फलं मानुषे लोके क्षिप्रं शीघ्रं भवति तस्मात् इह लोके कर्मणां सिद्धिं फलं कांक्षन्तः अपेक्षमाणाः सन्तः देवताः यजन्ते आराधयन्ति ॥ यजन्तः सन्तः मम वर्त्म अनुवर्तन्ते इति वा ॥ १२ ॥

कर्मणां फलं स्वर्गादिकं कांक्षमाणाः नतु ज्ञानफलं मोक्षं इह लोके इन्द्रादि देवताः यजन्ते नतु मां ॥ क्रियमाणानां कर्मणां फलं इह लोके कांक्षंत इति वा ॥

---

१. अत्र अर्जुनतीर्थयात्रायां रामेश्वरं गत्वा सेतुप्रविष्टमात्र तत्र श्रीरामाज्ञया सेतुं परिरक्षंतं हनुमन्तमभिवीक्ष्य कस्त्वं किमीयः कितवात्र इति पृष्ट्वा कथितस्वीयसकलोदन्तेन तेन कस्त्वमिति पृष्टः पार्थः स्वं स्वमहिमानं चाभिधाय रुष्टेन तेन प्रदर्शितं श्रीरामसेतुं दृष्ट्वा यदि रामः पराक्रमी तर्हि तेन शरैर्भिद्धेन भवितव्यं अनेन सेतुना ॥ बध्नीयामहं तथा इत्युक्त्वा मदीयो बाणसेतुर्यदि त्वया भज्येत तर्हि ज्वलनं प्रज्वाल्य प्रविशामीति प्रतिज्ञाय स्वेन रचिते शरसेतौ हनूमता भग्ने ज्वलनं प्रवेष्टुमुद्यतो यदुनाथं प्रार्थयामास ॥ स च वृद्धब्राह्मणरूपेण तत्रागत्य साक्षिहीनमसत्यमेतत् पुनश्च क्रियतामित्याह ॥ क्रियतां यदि न भज्येत तर्ह्यहमपि ज्वलनं प्रविशामीति प्रतिज्ञाय, पार्थेन कृते शरसेतौ महताऽपि प्रयत्नेनाभग्ने ज्वलनं प्रज्वाल्य प्रवेष्टुमुद्यतो मारुतिः रघुनाथं प्रार्थयामास ॥ तदा वृद्धब्राह्मणरूपेण मध्ये तिष्ठन् वासुदेवः स्वं कृष्णं पार्थाय स्वं रामं हनुमते प्रदर्श्य ताभ्यामभिष्टुतः श्रीरामः कृष्णश्च एकमेव तत्त्वमिति तत्त्वमुपदिश्य असत्कृत्यमनध्वजदंडनिवासाभ्युपगमेन निस्तीर्णज्वलनप्रवेशप्रतिज्ञौ तौ विधाय रक्षेति कथकसमयपथिता पौराणिकी कथाऽनुसंधेया ॥

कुतः कर्मफलं कांक्षंते इति चेत् कर्मफलं मनुष्यलोके तत्सदृशे स्वर्गलोके च [1]शीघ्रं भवति ॥ ज्ञानफलं तु न क्षिप्रं भवति ॥ [2]'बहूनां जन्मनामन्ते' इति वक्ष्यते ॥ नापि मनुष्यलोके ॥ अतो न ज्ञानफलमपेक्षन्ते ॥ प्रवृत्तिकर्मफलस्य शीघ्रं लाभात् [1]मनुष्यलोके एव लाभाच्च क्षुद्रेऽपि तस्मिन् फले कांक्षा समुदेति ॥ कालविलंब-साध्यं देशांतरे लभ्यं महदपि फलमुपेक्षमाणाः क्षिप्रलभ्यं स्वावासदेशलभ्यं च क्षुद्रमपि फलमपेक्षन्ते हि लोके ॥ कुत एवमिति चेत् बुद्धिस्तेषां पूर्वकर्मानुसारिणी कालविलंबं न सहते ॥ महाफलानुभवौपयिकादृष्टहीनास्ते पापिनः ॥ प्राक्तनपाप-कर्मानुसारिणी बुद्धिः तान् क्षुद्रे फले कांक्षामुत्पाद्य तत्साधने कर्मणि प्रवर्तयति ॥ कालविलंबमसहमानाः किल याचकाः परमक्षुद्रं अणकादिकं लभमानाः तेनैव कृतार्थमन्यमानाः पर्यटंति ॥ विलंबं सहमानास्तु शतं सहस्रं वा लभंते ॥ शता-धिकभृतिलाभौपयिकपरीक्षासु कालविलंबासहनादप्रयतमानाः केचिद्दशावरभृति लाभौपयिकाल्पपरीक्षयैव कृतार्थमन्यमानाः दशावरभृतिमिति कार्ये संगताः आ मरणं वृद्धिमलभमानाः तावतीमेव भृतिं गृह्णन्तोऽनुभूयन्ते ॥ अतो निवृत्तिकर्म करणप्रवृत्तिप्रतिबन्धकपापवन्तः तत्र प्रवृत्तिमलभमानाः काम्येन कर्मणा इन्द्रादी नाराधयंति ॥ प्राक्तनपुण्यकर्मवन्तस्तु मामेवाराध्य महते फलाय कल्पंते ॥ अत स्त्वमकाम्यं कर्म कुरु ॥ १२ ॥

[2]अर्जुनः ॥ 'मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः' ॥ इत्युक्तं ॥ अका-मनया त्वामाराधयन्तः तव वर्त्म अनुवर्तमाना भवेयुः ॥ फलकामनया इन्द्रादी-नाराधयन्तः कथं त्वन्मार्गानुवर्तिनो भवेयुः ॥ अतः कथमिदं ब्रूहि ॥

कृष्णः ॥ उभयेऽपि ममैव वर्त्म अनुवर्तन्ते ॥ परंतु एतावान् विशेषः ॥ यतः कर्मजा सिद्धिः शीघ्रं मनुष्यलोक एवं भवति ॥ तस्मात् इह कर्मणां फलं

अ ॥ १. मानुषे लोके शीघ्रं भवतीत्युक्त्या लोकान्तरे विलंबेन कर्मफलसिद्धिरस्तीति सूच्यते ॥ कुतस्तत्र विलंबेनेति चेत् वर्णाश्रमादिविभागः तत्तत्कर्मविभागश्च मनुष्य लोक एव नान्यत्र ॥ मानुषे लोके कर्मजेत्यनेनेदंसूच्यते ॥ वर्णाश्रमधर्मरूपकर्मफलं अत्र क्षिप्रं भवति ॥ वर्णाश्रमधर्मेतरकर्मफलं अन्यत्र

कांक्षमाणाः तदर्थं इंद्रादिदेवताः इह यजंतः संतः मम वर्त्म अनुवर्तन्ते ॥ फलकामनारहितास्तु कर्मफलमकांक्षमाणाः इन्द्रादिदेवताः अयजन्तः सन्तः मामाराधयन्तो मम वर्त्मानुवर्तन्ते ॥ देवताः यजन्तः तन्मार्गानुयायिनः स्युः ममवर्त्मानुवर्तन्ते इति कथमविशेषेणोच्यते इति चेत् देवताः यजन्तोऽपि मम वर्त्मैवानुवर्तन्ते ॥ देवताराधनस्य अन्ते मयिसमर्पणाद्वा देवतानां मच्छरीरत्वेन मत्परिवारत्वेन मत्सेवकत्वेन च तदाराधनस्य मदाराधने पर्यवसानाद्वा ॥ किमुत मामेव यजन्तः ॥ उत्तमाः निष्कामाः मामेवाराधयन्ति ॥ मध्यमाः सकामाः ' फलकामनया मामेव वा ' आराधयन्ति ॥ देवताः आराध्य अन्ते मयि समर्पणं वा कुर्वन्ति ॥ अधमासकामाः इन्द्रादिनैवाऽऽराधयन्ति ॥ सर्वेऽपि ममैव वर्त्मानुवर्तन्ते ॥ सर्वेषामुपासनामार्गाणां मयैव कृतत्वात् ॥ अतः सर्वेऽपि मम वर्त्मानुवर्तन्ते इति, तेन ' येयथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहं ॥ ' इति च युक्तमुक्तं ॥ १२ ॥

[1]अर्जुनः ॥ ' ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यह ' मित्युक्तं ॥ एवं ज्ञानकर्मयोगफलप्रदाने समभावेन स्थिते, त्वयि वैषम्यनैर्घृण्याद्यारोपणमयुक्तं ॥ अस्तु नाम तत् ॥ किमिति महाफलं ज्ञानयोगं विहाय तत्साधनभूतमवरं निवृत्तिकर्ममार्गमनुतिष्ठंति मुमुक्षवः ॥ वद ॥

कृष्णः ॥ इह अस्मिन् लोके कर्मणां सिद्धिं चित्तशुद्धिरूपां कांक्षमाणाः तदर्थं कर्मभिः इंद्रादिदेवान् यजन्तः सन्तस्सर्वे मुमुक्षवो मनुष्याः मम वर्त्म ममाभिमतं मया प्रवर्तितं च निवृत्तिकर्ममार्गमेवानुवर्तन्ते ॥ न प्रथमत एव ज्ञानयोगं ॥ विना कर्मयोगं ज्ञानयोगे प्रवृत्तस्य ज्ञानयोगासंभवात् ॥ उक्तं हि मया ॥ [2]' न कर्मणामनारंभान्नैष्कर्म्यं पुरुषोऽश्नुते ' ॥ इति ॥ यजन्तोपि ममैव वर्त्मानुवर्तन्ते इति च ॥ हठयोगादिभिरपि चित्तशुद्धेः संपादयितुं शक्यत्वादनावश्यकं निवृत्तिकर्मयोगाश्रयणमिति चेत् मानुषे लोके निवृत्तिकर्मजा चित्तशुद्धिरूपा सिद्धिः क्षिप्रं भवति ॥ कर्मभिरारधितानां मनोबुद्धीन्द्रियाद्यभिमानिनां देवानां प्रसादात्—शीघ्रमेव मनःप्रसादो भवति ॥ हठयोगादिभिर्जायमाना चित्तशुद्धिर्विलंबेन

---

१. अ. शंक ॥ २. ३. ४.

महता शरीरायासेन च भवति ॥ अतः अविलंबेन चित्तशुद्धिं कांक्षमाणा-निवृत्तिकर्ममार्गमाश्रयन्ते ॥ ते च कर्मभिः शुद्धान्तःकरणाः ज्ञानद्वारा मोक्ष-माप्नुवन्ति ॥ अतो युक्तं मुमुक्षूणां ज्ञानयोगानधिकारिणां निवृत्तिकर्ममार्गानु-सरणं ॥ १२ ॥

अर्जुनः ॥ ये प्रपद्यन्ते तान् भजामीति, सर्वशो मनुष्या इति च सामान्यत उक्त्या सर्ववर्णसर्वाश्रमस्थैस्त्वमाराध्यसे इति प्रतीयते ॥ कुतः सर्वैऽपि त्वामारा-धयन्ति ॥ किं सर्वैस्त्वमेवाऽऽराधनीयः उतवर्णाश्रमभेदादन्येऽपि यदि सर्वैरह-मेवाऽऽराधनीयः अतएव मामाराधयन्तीत्युच्यते तर्हि सर्वेषां त्वदाराधकानां फलमेकरूपं हि भाव्यं कुतः फलभेदः ॥ वद ॥

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ॥ १३ ॥ ॥

चातुर्वर्ण्यमिति ॥ मया गुणाश्च कर्माणि च गुणकर्माणि गुणकर्मणां विभागः गुणकर्मविभागः तेन गुणकर्मविभागशः चत्वारो वर्णाः ब्राह्मणादिजातयः चातुर्वर्ण्यं सृष्टम् ॥ १३ ॥

सत्त्वादिगुणोपचयापचयभेदात् ब्राह्मणक्षत्रियवैश्यशूद्राश्चत्वारो वर्णा मया [1] सृष्टाः ॥ [2] 'ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः ॥ ऊरू तदस्य यद्वैश्यः ॥ पद्भ्यां शूद्रो अजायत' ॥ इति श्रुतिः ॥ तत्र सात्त्विकाः ब्राह्मणाः ॥ सत्त्वोपसर्जनरजःप्रधानाः क्षत्रियाः ॥ तमोगुणोपसर्जनरजःप्रधानाः वैश्याः ॥ तामसाः शूद्राः ॥ इति विवेकः ॥ तेषां कर्मभेदोऽपि मया सृष्टः ॥ उक्तं हि मया [3] 'सहयज्ञाः प्रजाः सृष्ट्वा' इत्यादि ॥ कर्मभेदश्च [4] 'शमो दमश्च' इत्यादिनाऽष्टादशे वक्ष्यते ॥ गुणभेदेन ब्राह्मणादिवर्णान् सृष्ट्वा तेषां कर्मभेदोऽपि मया विहितः ॥ तत्तत्कर्मानुसारेण तांस्तान् तत्तद्गर्भेषूत्पाद्य तानि तानि कर्माणि कारयामि ॥ इद-मुपलक्षणं आश्रमाणामपि ॥ तत्तद्गुणकर्मभेदानुसारेण तांस्तान् तेषुतेष्वाश्रमेषु योजयामि ॥ अतस्सर्वेषां पिताऽहं ॥ अतः सर्ववर्णसर्वाश्रमस्थैरहमेवाऽऽराधनीयः ॥

---

१. अ ॥ मनुष्यलोके एव वर्णाश्रमाणां मया कल्पितत्वात् तत्रैव वर्णाश्रमादिकर्माणि नान्यत्र

अतएव सर्वेऽपि मामाराधयन्ति ॥ फलभेदः कुत इति चेत् ये पितरं मां साक्षादाराधयन्ति ॥ तेषामुत्तमं फलं ॥ ये पितरं मां विहाय अल्पफलादातॄन् अन्यानाराधयन्ति तेषां न तादृशं फलं ॥ किंतु तत्तद्योग्यतानुगुणं अल्पं फलं ॥ कुतस्तेभ्यस्त्वामनाराधयद्भ्यः अल्पं वा फलं दातव्यमिति चेत् आराध्यमानानां अन्येषां देवानामपि मदीयत्वात् तदाराधकेभ्योऽल्पं फलं दीयते ॥ तदाराधनमार्गस्यापि मदीयत्वात् तेऽपि मम वर्त्म ह्यनुवर्तन्ते ॥ चतुर्णां वर्णानां हितं चातुर्वर्ण्यं गुणकर्म गुणाश्च कर्माणि च एषां समाहारो गुणकर्म विभागेन मया सृष्टं ॥ कर्माणि अग्निहोत्रादीनि गुणा द्रव्यदेवतारूपाः ॥ पुत्रप्रीत्या पितुरिव देवताप्रीत्या मम तृप्तिर्भवति ॥ अतः तदाराधकेभ्योऽपि फलं दयिते ॥ ये मां मदीयांश्च नाऽऽराधयन्ति ॥ प्रत्युत विरुद्धं चेष्टन्ते ॥ तानधः पातयामि ॥ लोके हि पितरः स्वाराधकेभ्यः पुत्रेभ्योऽधिकं स्वमनादृत्य स्वीयानाराधयद्भ्योऽल्पं ददतः ये स्वं स्वीयांश्चानादृत्य विरुद्धं चेष्टन्ते तेभ्यः पुत्रेभ्यः किमप्यददतः प्रत्युत क्लेशयंतश्च दृश्यन्ते ॥ स्वष्टीक्रियते चेदं [1]'काभेस्तैस्तै'रित्यादिना सप्तमे ॥ [2]'येऽप्यन्यदेवताभक्ता' इत्यादिना नवमे ॥ [3]'तानहं द्विषतः क्रूरान्' इत्यादिना षोडशे ॥ कुतः केचित् सकामाः केचिन्निष्कामाः कोऽत्र हेतुः इति चेत् इदमेवोत्तरं ॥ चत्वारो वर्णाः गुणकर्मभेदवंतः गुणकर्मवैषम्यात् सकामाः निष्कामाश्च भवंति ॥ १२ ॥

अर्जुनः ॥ यद्येवं सर्वेषां त्वं कर्त्तोऽसि तर्हि तव विषमसृष्ट्यादिकर्तृत्वेन वैषम्यं नैर्घृण्यं च स्यात् ॥ श्रमचिंतादिभिर्दोषवांश्च स्याः ॥ कार्यस्य सकर्तृकत्वनियमेन त्वदन्यस्य त्वत्कर्तृकत्ववत् तव त्वदन्यकर्तृकत्वं स्यात् ॥ ततश्च अन्येभ्यस्तत्कर्तुस्तव यथोत्तमत्वं तथा त्वत्कर्तुस्त्वत्तोऽप्युत्तमत्वं स्यात् ॥ ततश्च 'भूतानामीश्वरोऽपि सन्' इत्याद्युक्तमयुक्तं स्यात् ॥ ब्रूहि ॥

कृष्णः ॥ तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययं ॥ १३ ॥

न मां कर्माणि लिंपन्ति न मे कर्मफले स्पृहा ॥
इति मां योऽभिजानाति कर्मभिर्न स बध्यते ॥ १४ ॥

---

१. ७. २०. २. ९. २३. ३. १६. १९.

तस्येति ॥ मां तस्य कर्तारमपि न कर्ता अकर्ता तं न विद्यते कर्ता यस्य सः अकर्ता तं अकर्तारं न विद्यते व्ययः विकारः नाशश्च यस्य सः अव्ययः तं विद्धि जानीहि ॥ मां कर्माणि न लिंपन्ति ॥ मे कर्मणः फलं कर्मफलं तस्मिन् कर्मफले स्पृहा इच्छा नास्ति ॥ इति मां यः अभिसम्यक् जानाति सः कर्मभिः न बध्यते ॥ १३ ॥ १४ ॥

तस्य चातुर्वर्ण्यस्य चातुराश्रम्यस्य च कर्ताऽहं तथाऽपि न मम वैषम्यादिकं लोकविलक्षणकर्तृत्वाद [1]कर्ताऽहं ॥ लौकिककर्तुर्हि वैषम्यादिकं ॥ सर्वस्यापि कर्ताऽहं ॥ न मेऽन्यः [2]कर्ता ॥ मम अनादिनित्यत्वात् स्वतंत्रत्वात् ईश्वरत्वाच्च ॥ अतस्तादृशस्य मम कर्तृत्वेन न श्रमचिन्तादयो दोषाः ॥ मां तस्य कर्तारमपि विलक्षणकर्तृत्वादकर्तारं विद्धि ॥ तस्य कर्तारं मां कर्त्रंतररहितत्वादकर्तारमपि विद्धि ॥ अतएव मां तस्य कर्तारमपि निर्विकारत्वात् अव्ययं विद्धि ॥ अकर्तृत्वात्तव जन्माभावेपि मृतिः स्यात् ॥ असति त्वयि जगत उत्पत्त्यादिकं कथं सेत्स्यति ॥ इति चेत् अहमव्ययः स्वभावतो निमित्ततश्च स्वरूपतः शरीरतश्च नाशरहितः अतः शाश्वतत्वान्मम न काऽप्यनुपपत्तिः ॥ त्वमेवं मां विद्धि ॥ लोकविलक्षणकर्तृत्वेन श्रमचिन्तादिकं मास्तु ॥ वैषम्यादिकं तु स्यादेव ॥ विषमव्यापारान् कुर्वन्तो विषमा हि व्यवह्रियन्ते ॥ अतः कथमिदमिति चेत् यतः मम लौकिककर्तुरिव अहंकर्तेत्यादिरूपो दुरभिनिवेशो नास्ति ॥ यतश्च मम कर्मणःफले स्पृहा नास्ति ॥ अतः विषमसृष्ट्यादिकर्माणि कर्तारं मां न लिंपन्ति ॥ न निबध्नन्ति ॥ वैषम्यनैर्घृण्यादिदोषवन्तं न कुर्वन्ति ॥ कर्मफलाऽऽसक्तिः तत्र दुराग्रहरूपोऽभिनिवेशः तन्मूलभूतौ रागद्वेषौ इत्यादयो दोषाः येषां कर्तृणां स्युः तान् हि तत्कर्माणि लिंपेयुः ॥ नैकोऽप्यस्ति मम दोषः ॥ दोषगंधविधुरत्वान्मम ॥ अतस्तानि कर्माणि मां न लिंपन्ति ॥ लौकिका अपि कर्तारः फलाऽऽसक्तिदुरभिनिवेशरागद्वेषादिदोषराहित्येन तत्तदनुगुणं कर्म विषममपि कुर्वन्तो न विषमा निर्घृणाश्च भवन्ति ॥ विचार्य कांश्चिन्मुंचन् कांश्चिद्दंडयन्नपि प्राज्ञोवाको न विषमो निर्घृणश्चोच्यते ॥ स्तूयते च सर्वत्र समोऽयमिति ॥ फलाऽऽसक्त्यादिभिस्तथा कुर्वस्तु विषमो निर्घृणश्चो-

---

१. न कर्ता अकर्ता ॥ २. न विद्यते कर्ता यस्यासौ अकर्ता ॥

ज्यते ॥ निंद्यते च विषमोऽयं निर्घृण इति ॥ लौकिकोऽपि कर्ता फलासक्त्यादिदोषराहित्येन कुर्वन् तैः कर्मभिर्न लिप्यते ॥ किमुत लोकविलक्षणकर्ताऽहं ॥ अतः लोकविलक्षणकर्तृत्वान्न मम वैषम्यादिकमिति युक्तमुक्तं ॥ किंबहुना मे कर्मफले स्पृहा नास्ति अतो न मां कर्माणि लिंपन्तीति मां भगवन्तं यः सम्यक् जानाति सः कर्मभिर्न बध्यते ॥ मे कर्मफले स्पृहा नेति मां कर्माणि न लिंपंतीति च यो जानातीत्युक्तौ स्वस्य ईश्वराभेदाभिप्रायेणकर्मलेपाभावादिकं यो जानाति इति जीवेश्वराभेदज्ञानाऽवश्यकतायां पर्यवस्येत् तन्माभूदिति पुनर्मामित्युक्तं ॥ मे स्पृहा नास्ति मां न लिंपन्तीति मां यो जानाति नतु स्वात्मानं सः न बध्यते ॥ यस्य कर्मलेपाद्यभावं जानन्तमन्यमपि कर्माणि न लिंपन्ति ॥ किमुवाच्यं तं कर्माणि न लिंपन्तीति ॥ इति विमर्शनीयं ॥ सर्वेषितृत्वान्मम सर्वैरप्यहमेवाऽऽराधनीयः ॥ फलंतु तत्तदुपासनानुसारि यथायोग्यं भवति ॥ अतो यथोपासितोऽहं महाफलं दद्यां तथा कर्मणा मामुपास्व ॥ १३ ॥ १४ ॥

अ ॥ अर्जुनः ॥ गुणकर्मविभागशः चातुर्वर्ण्यं मया सृष्टं ॥ अतएव सर्वेषितृत्वात् सर्वैरप्यहमेवाऽऽराधनीयः ॥ इत्युक्तं ॥ यदि कर्ता स्याः तर्हि त्वमीश्वरो न स्याः ॥ ईश्वरस्य कर्तृत्वभोक्तृत्वादिसर्वधर्मविधुरत्वात् ॥ ब्रूहि

कृष्णः ॥ तस्य चातुर्वर्ण्यस्य अज्ञदृष्ट्या कर्तृत्वेन प्रतीयमानमपि मां विद्ध्यदृष्ट्या अकर्तारं विद्धि ॥ मायया कर्तारमपि परमार्थतोऽकर्तारं विद्धि ॥ सगुणरूपेण कर्तारमपि निर्गुणरूपेणाकर्तारं विद्धि ॥ विद्ध्यदृष्ट्या परमार्थतः निर्गुणरूपेण च कर्तृत्वादिशून्यत्वात् निर्विकारं च मां विद्धि ॥ अतः कर्तृत्वाभिमानाभावान्न मां कर्माणि लिंपन्ति ॥ आप्तंकामस्य मे कर्मफले स्पृहा नास्ति ॥ १ 'आप्तकामस्य का स्पृहा ॥' इति श्रुतिः ॥ अतः भोक्तृत्वाभिमानाभावाच्च न मां कर्माणि लिंपन्ति इतिमां एवंप्रकारं मां कर्तृत्वभोक्तृत्वादिसर्वधर्मविधुरं ईश्वरं मां यः अभिसम्यक् तत्वतः ब्रह्मैवाहमित्यभेदेन जानाति सः ज्ञानी कर्मभिर्न बध्यते ॥ क्रियमाणैः कर्मभिः हेतुभिः ज्ञानद्वारा मुच्यते ॥ प्रतिबंधकैः पुण्यपापात्मकैः कर्मभिः

१. मां. २. ७.

न बाध्यते इति वा ॥ अहंकाराभावात् कर्मफलस्पृहाभावाच्च मां कर्माणि न लिंपन्तीनि मां योऽभिजानाति सः कर्मभिर्न बध्यते ॥ तेन क्रियमाणानि कर्माणि तं न लिंपन्ति कर्मिणं न कुर्वन्ति ॥ मामेवं जानत एव कर्मलेपो नास्ति ॥ किंवाच्यं मम नास्तीति ॥ कर्तृत्वादेः मायिकत्वात् न मम श्रमचिन्तादिकं वैषम्यनैर्घृण्यादिकं वा ॥ एवं मां जानतः उक्तरूपफलसद्भावात् त्वमप्येवं मां विद्धि ॥ १३ ॥ १४ ॥

वि ॥ अर्जुनः ॥ कुतः क्षुद्रफले काम्ये कर्मणि प्रवर्तते इति पृष्टेन भवता प्राक्तनपापकर्मानुसारिणी बुद्धिः तान् क्षुद्रफले कांक्षामुत्पाद्य तत्साधने काम्ये कर्मणि प्रवर्तयतीत्युक्तं ॥ यद्येवं तर्हि निवृत्तिकर्मयोगारंभविरोधिपापनिवृत्युपायं ब्रूहि

कृष्णः ॥ गुणकर्मविभागशः चातुर्वर्ण्यं तदुपलक्षितं सर्वं जगत् मया सृष्टं ॥ यद्येवं सर्वस्य जगतः त्वं कर्ता स्याः तर्हि विषमसृष्ट्यादिभिः विषमो निर्घृणश्च स्याः इति चेत् तस्य कर्तारमपि मां अकर्तारं विद्धि ॥ अकर्तृत्वान्न मम वैषम्यादिकम् ॥ मया सृष्टमिति कर्तृत्वमुक्त्वा कथमकर्तृत्वान्न मम वैषम्यादिकमित्युच्यते ॥ विरुद्धं हि कर्तृत्वमकर्तृत्वं चेत्युभयमेकत्र इति चेत् अकर्तृत्वं न कर्तृत्वाभावरूपं ॥ अतो न विरोधः ॥ तर्हि किंरूपं तदिति चेत् देवमनुष्यादिवैचित्र्यरूपविशेषप्रयोजकत्वाभावरूपं ॥ सृजाम्येवाहं ॥ अतः कर्ताऽहं ॥ परंतु देवमनुष्यादिवैचित्र्यं न करोम्यहं ॥ अतोऽकर्ताऽहं ॥ अतः देवमनुष्यादिवैचित्र्यकर्तृत्वाभावान्न मम वैषम्यादिकं ॥ तर्हि तानि किंनिमित्तानीति चेत् पुण्यपापरूपकर्मविशेषप्रयुक्तानि ॥ एवमकर्तृत्वात् विषमसृष्ट्यादीनि कर्माणि मदीयान्यपि मां न संबध्नन्ति ॥ कर्तारः कर्मफले सस्पृहा भवन्ति ॥ मम तु विषमकर्मणः सृष्ट्यादेः फले स्पृहा नास्ति ॥ अतोऽप्यकर्ताऽहं ॥ अकर्तृत्वान्न मां कर्माणि लिंपन्ति ॥ प्रवाहानादिवासनामूलतत्तदिच्छानुरूपं प्रवर्तयन् तत्तदिच्छाहेतुकतत्तत्पुण्यपापानुगुणं फलं प्रयच्छामि ॥ नतु स्वेच्छानुरूपं प्रयच्छामि ॥ नापि स्वातंत्र्यमात्रेण विषमं फलं ददामि ॥ नच स्वप्रयोजनार्थं परान् पीडयामि ॥ अतो न मम वैषम्यादिकं ॥ १ 'न कर्माविभागादिति चेन्नानादित्वात्' इति सूत्रं ॥ इत्येव महं ज्ञातव्यः ॥ मां एवं चातुर्वर्ण्यमित्यादिसार्धश्लो-

---

१. २. १. ३६.

कोक्तसर्वजगत्कर्तृत्वादिमहामहिमवन्तं यस्सम्यक् जानाति सः उक्तमन्माहात्म्यज्ञानी निवृत्तिकर्मयोगारंभविरोधिभिः प्राचीनपापकर्मभिः न संबध्यते ॥ तस्य उक्तज्ञानेन निवृत्तिकर्मयोगारंभविरोधिपापानि नश्यन्ति ॥ नष्टे प्रतिबन्धके स्वयमेवाकाम्ये कर्मणि प्रवर्तन्ते ॥ त्वमप्येवं मां विद्धि ॥ तेन ते विरोधिपापक्षयः स्यात् ॥ ततश्च अकाम्ये युद्धाख्ये मदभिमते कर्मणि प्रवर्तेथाः ॥ तेन च ज्ञानद्वारा मोक्ष्यसे ॥ १३ १४ ॥

द्वै ॥ अर्जुनः ॥ योऽभिजानाति कर्मभिर्न स बध्यते इति ज्ञानान्मोक्ष उक्तः॥ यद्येवं तर्हि ममापि ज्ञानित्वेन ज्ञानान्मोक्षः सिद्धः ॥ अतः न ज्ञानद्वारा मोक्षार्थं कर्मकरणमावश्यकं ॥ अतो नाहं कर्म कुर्यां ॥ किं ब्रवीषि ॥

कृष्णः ॥ एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः ॥
कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतं ॥ १५ ॥

एवमिति ॥ एवं ज्ञात्वा पूर्वैः मोक्तुमिच्छवः मुमुक्षवः तैरपि कर्म कृतं॥ तस्मात् त्वं ततोऽपि पूर्वैः कृतं अतिशयेन पूर्वं पूर्वतरं कर्मैव कुरु १५ ॥

एवं ज्ञात्वाऽपि पूर्वैः मुमुक्षुभिः कर्म कृतं ॥ ज्ञानिनामपि अधिकानन्दसिद्धये कर्माचरणदर्शनात् तैः कृतं ॥ तेभ्यः पूर्वैरपि कृतं ॥ अनादिवेदविहितत्वेन ततोऽपि पूर्वभावि कर्मैव ज्ञान्यपि त्वं कुरु ॥ १५ ॥

अ ॥ अर्जुनः ॥ मम मां जानतश्च कर्मलेपो नास्तीत्युक्तं ॥ किं तेन प्रकृते ॥ प्रकृतेन कर्मयोगेन संगमय ॥

कृष्णः ॥ एवं ज्ञात्वा अहंकाराभावात् कर्मफलस्पृहाभावाच्च नेश्वरस्य कर्मलेपः ॥ यद्येवमहमपि अहंकारादिकं फलापेक्षां च परित्यज्य कर्मकुर्यां ॥ तर्हि विषमेणापि कर्मणा नाहं लिप्येय ॥ किमुत विहितेन कर्मणा इति ज्ञात्वा ईदृशानुसंधानपूर्वकं त्वया कर्म कर्तव्यं ॥ किमेवं ज्ञात्वा कैश्चित्कृतमस्तीति चेत् एवं ज्ञात्वा अस्मिन् युगे पूर्वैः मुमुक्षुभिः स्वयं मोक्षेच्छावद्भिः लोकसंग्रहार्थं कृत्वा प्रदर्श्य

अनुष्ठाप्य १ मोचयितुं इच्छुभिश्च ययातियदुप्रभृतिभिरपि कृतं ॥ युगान्तरे जनकादिभिरपि कृतं ॥ २ ततोऽपि पूर्वभावि पूर्वपूर्वपूर्वानुष्ठानादत्यन्तं पूर्वं ॥ तस्मात् कर्मैव त्वमेवं ज्ञात्वा कुरु ॥ यदि त्वमशक्तः तर्हि ज्ञानाय यदि त्वं ज्ञानी तर्हि लोकसंग्रहाय कर्म कुरु ॥ 'कर्मणैवे'त्यस्यायं प्रपंचः ॥ १५ ॥

वि॥ अर्जुनः ॥ सार्धश्लोकोक्तभगवद्याथात्म्यज्ञानवान् निवृत्तिकर्मयोगारंभविरोधिपापक्षयादकाम्ये कर्माणि प्रवर्तते ॥ इत्युक्तं ॥ किं पूर्वे सर्वेऽपि एवं ज्ञात्वा तेन प्रक्षीणपापाः कर्माकुर्वन् ॥ वद ॥

कृष्णः ॥ पूर्वैः मुमुक्षुभिरपि उक्तरीत्या मद्याथात्म्यं ज्ञात्वा तेनक्षीणप्रतिबंधकपापैः कर्म कृतं ॥ तस्मात् त्वमपि एवं ज्ञात्वा तेन प्रक्षीणप्रतिबंधकपापः पूर्वैः विवस्वन्मन्वादिभिः कृतं ॥ ततोऽपि प्राक् मयोपदिष्टं कर्मैव त्वं कुरु ॥ १५ ॥

अर्जुनः ॥ ३ 'कर्मण्येवाधिकारस्ते' इत्युक्त्वा ४ 'योगस्थः कुरु कर्माणी'त्युक्तं ॥ ५ 'तत्किं कर्मणि घोरेमां नियोजयसि केशव' ॥ इत्याक्षेपस्य ६ 'ज्ञाननयोगेन सांख्यानां कर्मयोगेन योगिना'मिति समाधानमुक्त्वा ७ 'नियतं कुरु कर्म त्व'मित्युक्तं ॥ पुनरनेकाऽऽक्षेपसमाधानपूर्वकं ८ 'तदर्थं कर्म कौन्तेय मुक्तसंगः समाचर' ॥ ९ 'तस्मादसक्तः सततं कार्यं कर्म समाचर' ॥ इत्युक्तं ॥ पुनरिदानीमुक्तं 'कुरुकर्मैव तस्मात्त्व'मिति ॥ महता तात्पर्येण नियोज्ये ॥ अतः करिष्यामि कर्मयोगं ॥ परंतु तस्य स्वरूपं न जाने ॥ तस्य स्वरूपं अज्ञात्वा कथं तत्कर्तुं शक्यं ॥ अनभ्युपगमेनैव परिजिहीर्षुः कर्मयोगं तस्य स्वरूपं कीदृशमिति नैतावदहमप्राक्षं ॥ द्वितीयादिषु श्रुतकर्मयोगवैभवः परिजिहीर्षामनुचितां मत्वा यथावदनुतिष्ठासुः स्वरूपं तस्य जिज्ञासे ॥ कर्म चलनात्मकं कर्माभावोऽकर्म लोकविरुद्धं कर्म विकर्म इति लौकिकी प्रसिद्धिः ॥ किं तान्येव वा तानि उत विजातीयानि ॥ वद ॥

१. अन्तर्णीताणिजन्तम् ॥ २. पूर्वैः पूर्वतरं प्रथमतरं कृतम् ॥ अनुष्ठानेन वचनेन च अत्यावश्यकतया स्थापितम् ॥ ३. २. ४७. ४. २. ४८. ५. ३. १. ६. ३. ३. ७. ३. ८. ८. ३. ९. ९. ३. १९.

कृष्णः ॥ किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः ॥
तत्ते कर्म प्रवक्ष्यामि यद्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ १६ ॥

किमिति ॥ कर्म किं न कर्म अकर्म किं न विरुद्धं कर्म अकर्म विकर्म किं इत्यस्मिन् विषये कवयोऽपि ज्ञानिनोऽपि मोहिताः मोहवन्तः यथार्थज्ञानरहिताः ॥ यत् ज्ञात्वा न शुभं अशुभं तस्मात् अशुभात् मोक्ष्यसे तत् कर्म अकर्मेति च च्छेदः ॥ अकर्म विकर्म च ते तुभ्यं प्र सम्यक् वक्ष्यामि ॥ १६ ॥

कर्मादिस्वरूपं नाहमज्ञो जानामीति माव्यथिष्ठाः ॥ कर्म किं अकर्म किं कर्माभावः कः विकर्म किं इत्यत्र विद्वांसोऽपि मोहिताः सम्यक् न जानन्ति ॥ तस्मात्त्वं मा व्यथिष्ठाः ॥ यद्येवं को मे कर्मादिकं यथावदुपदेक्ष्यतीति चेत् तस्मात् कर्मादेर्दुर्विज्ञेयत्वात् तुभ्यं तत्कर्म अकर्मेति छेदः ॥ नञोऽभावो विरोधश्चार्थः ॥ अकर्म विकर्म च इत्येतत्त्रयं सर्वज्ञोऽहं सम्यक् वक्ष्यामि ॥ प्रवचनायासेन त्वां क्लेशयित्वा उपदेशग्रहणायासेनाऽऽत्मानं क्लेशयित्वा किं ज्ञातव्यमेव वा कर्मादिकमिति चेत् कर्मादित्रयज्ञानात् मोक्षप्रतिबन्धकशुभाशुभोभयनिवृत्तिर्भवति ॥ यस्मात् यत् कर्मादित्रयं ज्ञात्वा अशुभात् शुभाच्च मोक्ष्यसे ॥ अशुभात् संसारबंधात् मोक्ष्यसे इति वा ॥ तस्मात् तत्कर्मादिकं तुभ्यमहं प्रवक्ष्ये अवहितः शृणु ॥ १६ ॥

अर्जुनः ॥ कवयोप्यत्र मोहिताः अहं ते तद्वक्ष्यामीत्युक्तं ॥ किं कर्मादिषु तथा बोद्धव्योंशो वर्तते ॥ वद

कृष्णः ॥ कर्मणोह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः ॥
अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ॥ १७ ॥

कर्मण इति ॥ कर्मणः विषये बोद्धुं योग्यं बोद्धव्यं अस्ति ॥ विकर्मणः विषये च बोद्धव्यं अस्ति ॥ अकर्मणः विषये च बोद्धव्यं अस्ति ॥ अतः कर्मणः अकर्मणः इति च च्छेदः ॥ अकर्मणः विकर्मणश्च गतिः ज्ञानं गहना दुःसंपादा ॥ हि प्रसिद्धं ॥ हि यस्मात् तस्मात् ते प्रवक्ष्यामीति वा ॥ १७ ॥

कर्मणः विषयेऽपि बोद्धव्यमस्ति ॥ विकर्मणश्च विषये बोद्धव्यमस्ति ॥ अकर्मणश्च विषये बोद्धव्यमस्ति ॥ अतः १कर्माकर्मविकर्मणां मार्गः दुर्विज्ञेयः ॥ ज्ञानं दुःसंपादमिति वा ॥ अतोऽहं ते प्रवक्ष्यामि ॥ २ कर्म कर्तव्यं विहितं कर्म ॥ अकर्म तत्त्यागः॥ विकर्म निषिद्धं कर्म॥ एतेषां त्रयाणां विषये बोद्धव्योंशोऽस्ति॥ तद्बोधश्च गहनः ॥ अतोऽहं वक्ष्यामि ॥ देशकालयुगाधिकारिवर्णाश्रमवयोऽवस्थादिभेदेन संकोचव्याकोचाभ्यां कर्मविधेरनेकरूपत्वात् कर्तव्यस्य कर्मणस्तत्वं सम्यक् बोद्धव्यं॥ निषिद्धस्यापि देशकालादिभेदेन बहुविधत्वात् तस्य तत्वमपि सम्यक् बोद्धव्यं ॥ अकर्मशब्दितस्य कर्मत्यागस्यापि काम्यकर्मत्यागः निषिद्धकर्मत्यागः सर्वकर्मत्यागः कर्ममात्रत्यागः फलमात्रत्यागः इति बहुविधत्वात् तस्यापि तत्वं सम्यक् बोद्धव्यं ॥ अतोऽहं ते वक्ष्यामि ॥

द्वै ॥ किंच ३ कर्मणः सकाशात् अकर्म विकर्म च विविच्य बोद्धव्यं ॥ विकर्मणः सकाशात् ४ कर्म अकर्म च विविच्य बोद्धव्यं ॥ अकर्मणः सकाशात् ५ कर्म विकर्म च विविच्य बोद्धव्यं ॥ अतोऽहं वक्ष्यामि॥ इति च॥ किंच कर्मण इत्यादौ कर्म नः इत्यादिरीत्या छेदः छांदसं णत्वं ॥ कर्म नः अस्माकं सकाशाद्भवति ॥ एवं अकर्म विकर्म च अस्मत्त एव भवतीति बोद्धव्यं ॥ इति च ॥ यतः कर्मादीनां गतिर्गहना ॥ यतश्च कवयोऽपि मुह्यन्ति ॥ अतः कर्म अकर्म विकर्म च नः सका-

१. ' गहना कर्मण ' इत्यत्र गहना अकर्मण इति च छेदः अत उक्तार्थलाभः ॥ २. प ॥ कर्मप्रवृत्तिनिवृत्त्युभयसाधारणं विहितमनुष्ठेयं कर्म ॥ तद्द्विविधं ॥ काम्यमकाम्यं चेति ॥ तत्र काम्यं कर्म विकर्म ॥ नश्वरफलकत्वात् ॥ अकाम्यं ज्ञानकोटावनुप्रविष्टं कर्म अकर्म ॥ उक्तं चैतदभियुक्तैः ॥ ' कर्माकर्मविकर्ममर्म सुधिया बोद्धव्यमेवाऽऽदितः कर्म स्याद्विधिपूर्वकं तु मनसा संवेन्द्रियव्यापृतिः ॥ तद्द्वेधा सफलं फलेन रहितं त्वाद्यं विकर्म स्मृतं बन्धादन्यदकर्म शुद्धिकरणा-न्नैष्कर्म्यतामागतम् ' ॥ इति ॥ सफलं काम्यं बन्धाद्धेतोः विकर्म स्मृतम् ॥ अन्यत् अकाम्यं शुद्धिकरणाद्धेतोः ज्ञानपदत्वं प्राप्तं अकर्म ॥ इति ज्ञानव्यमित्यर्थः ॥ ३. पूर्वस्मादकर्मेत्यनुवर्त्य उभयथा व्याख्येयं ॥ ४. कर्माकर्मपदे अनुवर्तनीये ॥ ५. कर्माकर्मपदे अनुवर्त्य अकर्म विकर्म इति व्याख्येयम् ॥

शादेव बोद्धव्यं ॥ नान्य एतस्य यथावद्वक्ताऽस्ति ॥ इति च ॥ बोद्धव्यपदावृत्त्या बोधस्य आवश्यकता सूच्यते ॥ १७ ॥

वि ॥ अर्जुनः ॥ ज्ञात्वा कर्म कुर्वित्युक्तं ॥ ज्ञानमिदं कर्मेदं इत्येव मया न ज्ञायते ॥ किं कार्यं अतो व्यथते मे मनः ॥ ब्रूहि त्वं ॥

कृष्णः ॥ किं कर्म ॥ किं तदंतर्गतं अकर्मशब्दितं ज्ञानमित्यत्र कवयोऽपि मोहिताः ॥ तस्मात् ते तत्कर्म १ अकारप्रश्लेषेण अकर्म च प्रवक्ष्यामि ॥ ज्ञात्वेदं द्वयं कृतकरणीयः वेदितवेदनीयश्च भूत्वा अशुभात् संसारबन्धात् मोक्ष्यसे ॥ कर्मणोऽनुष्टेयस्य विषये बोद्धव्यमस्ति ॥ विविधं कर्म विकर्म ॥ नित्यनैमित्तिककाम्यभेदेन नानाविधे कर्मण्यपि बोद्धव्यमस्ति॥ अकर्मशब्दिते ज्ञानेऽपि बोद्धव्यमस्ति॥ विकर्मणि बोद्धव्यं च फलभेदेन कृतं वैविध्यं परित्यज्य मोक्षैकफलतया एकशास्त्रार्थताऽनुसन्धानं ॥ उक्तं हीदं मया ॥ २ व्यवसायाऽऽत्मिकाबुद्धिरेके'त्यत्र ॥ अतो गतिः कर्मणो गहना ॥ अतः कर्म तत्ते प्रवक्ष्यामि ॥ मा व्यथिष्ठाः ॥ १६ ॥ १७ ॥

अर्जुनः ॥ कर्माकर्मविकर्मस्वरूपबोधनपूर्वकं कर्तव्यकर्मकरणप्रकारमुपदिश॥ अवहितोऽस्मि ॥

कृष्णः ॥ कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः ॥
स बुद्धिमान् मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥ १८ ॥

कर्मणीति ॥ यः कर्मणि न कर्म अकर्म कर्मणोऽभावः अकर्म पश्येत् जानीयात् ॥ यः अकर्मणि कर्म च पश्येत् ॥ सः मनुष्येषु बुद्धिः अस्यास्तीति बुद्धिमान् युक्तः योगवान् कृत्स्नानि च तानि च कर्माणि च कृत्स्नकर्माणि कृत्स्नकर्माणि करोतीति कृत्स्नकर्मकृत् ॥ १८ ॥

---

१. कुरु कर्मैव गहना कर्मण इति पूर्वोत्तरावमर्शात् कर्मणः प्राधान्यं अकर्मणस्तद्विशेषणत्वमिति सूचनात् कर्माकर्मणोरुभयोः प्रकृतत्वेऽपि कर्म प्रवक्ष्यामीत्युक्तमिति वा ॥ २. २. ४१.

कर्माणि सति कर्माभावं कर्माभावे सति कर्म च यः जानीयात् सः बुद्धिमान् ॥ एवं यः पश्येत् सः भ्रान्तः खलु स्यात् कथमुच्यते बुद्धिमानिति ॥ इति चेत् एवं, कर्माणि क्रियमाणे स्वस्य अस्वातंत्र्यात् कर्माभावं यः पश्येत् ॥ वक्ष्यते च' ॥ १ 'नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववि'दिति ॥ अस्य अशब्दवाच्यस्य विष्णोः कर्म अकर्म निष्पद्यमानं कर्म स्वस्य स्वातंत्र्याभावेन भगवत एव कर्म तेनैव क्रियमाणं कर्म इति यः पश्येत् इति वा ॥ उक्तं चैतन्मया ॥ २ 'प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ॥ अहंकारविमूढाऽऽत्मा कर्ताहमिति मन्यते' ॥ ३ 'तत्त्ववित्तु महा-बाहो गुणकर्मविभागयोः ॥ गुणा गुणेषु वर्तन्ते इति मत्वा न सज्जते ॥' इति ॥ जीवस्यास्वातन्त्र्यात् कर्माभावे कथं कर्मनिष्पत्तिरिति चेत् भगवतेत्युक्तं भवति ॥ जीवस्य कर्माभावेऽपि ईश्वरः कर्म कुर्वन्नास्ते इति कुतोऽवसीयते इति चेत् अकर्मणि जीवकर्तृककर्मणः सर्वथाऽभावे सुषुप्तौ मूर्च्छादौ च देहेन्द्रियादिमनोबुद्धिरक्षणादिकं स्वप्ने स्वाप्नरथगजतुरगादिविविधविचित्रवस्तुरचनरूपं कर्म भगवान् करोति ॥ ४ 'संध्ये सृष्टिराह ही'ति सूत्रं ॥ ५ 'य एष सुप्तेषु जागर्त्ति कामं कामं पुरुषो निर्ममाणः ॥' इति श्रुतिः ॥ ६ न तत्र रथा न रथयोगा न पन्थानो भवन्ति अथ रथान् रथयोगान् पथः सृजते' ॥ इति च ॥ तद्दृष्टान्तेन जाग्रदवस्थायामपि तदीयमेव कर्मेति निश्चेतव्यं ॥ इति यः पश्येत् सः मनुष्येषु मध्ये बुद्धिमान् सः मनुष्येषु युक्तः कर्मयोगवान् ॥ ईदृशानुसंधानपूर्वकमनुष्ठितमेव हि कर्म कर्मयोगः ॥ सः मनुष्येषु कर्तव्यसकलकर्मकृत् ॥ ईदृशानुसन्धानपूर्वकं किमपि कर्तव्यं कर्म कुर्वतः कथं सर्वकर्मकर्तृत्वं इति चेत् सर्वकर्मणां यत्फलं ज्ञानं मोक्षश्च तस्य फलस्य नियमेन प्रापणात् सर्वकर्मकर्तृत्वं ॥ एकस्यापि कर्मणः यथावदनुष्ठानं कृत्स्नकर्मानुष्ठानतुल्यमिति स्तुतिर्वा ॥ अतएव कर्म जीवः करस् इति सांतशब्दवाच्यकर्मविधिना मीयते विपर्यीक्रियते इति व्युत्पत्तिः ॥ कर्मविध्युद्देश्यत्वेन कर्म शब्दिते जीवे कर्माभावं कर्मविध्यविषयत्वेन जीवभिन्नत्वेन च अकर्मशब्दिते परमा-

१. ५. ८. २. ३. २७. ३. ३. २८. ४. ३. २. १. ५. का. ५. ८. ६. बृह. ६. ३. १.

त्मनि कर्म च यः पश्येत् स बुद्धिमान् युक्तः कृत्स्नकर्मकृत् ॥ अत एवं क्रियमाणं कर्म कर्म ॥ कर्माकरणमकर्म ॥ अनेवं क्रियमाणं काम्यं निषिद्धं च कर्म विकर्म ॥ इत्येतत्सर्वं ज्ञात्वा कर्तव्यं कर्म १ यथावत्कुरु ॥ १८ ॥

कर्मणि कृते अकर्म प्राचीनकुकर्मनाशं यः पश्येत् ॥ अकर्मणि विहितकर्माकरणे कर्म प्राचीनकुकर्मसद्भावं च यः पश्येत् स बुद्धिमानित्यादि ॥

कर्मणि क्रियमाणे तेन अकर्म ज्ञानं जायते इति यः पश्येत् अकर्मणि ज्ञाने जातेपि कर्म कर्तव्यं यः पश्येत् स बुद्धिमानित्यादि ॥ कर्मणि कर्मयोगे अकर्म न विद्यते कर्म कृतिः यस्य तदकर्म अपौरुषेयो नित्यो वेदः तत् यः पश्येत् ॥ वेदः कर्मणि प्रमाणमिति यः पश्येत् ॥ अकर्मणि वेदे च कर्मैव तात्पर्यतः प्रतिपाद्यं यः पश्येत् स बुद्धिमानित्यादि ॥ कर्मणि कर्मसु अकर्म अस्य 'अ इति ब्रह्मे'ति श्रुत्या अशब्दवाच्यस्य ब्रह्मणः कर्म ब्रह्मप्रापकं ब्रह्मोद्देश्यकं च निवृत्तिकर्म श्रेष्ठं यः पश्येत् ॥ अकर्मणि च निवृत्तिकर्मण्येव कर्म कर्मत्वं यः पश्येत् ॥ उक्तं हि मया ॥ २ 'योगः कर्मसु कौशल' मिति ॥ स बुद्धिमानित्यादि ॥

अ ॥ ३कर्मणि अकर्म यः पश्येत् अकर्मणि च कर्म यः पश्येत् स बुद्धिमान् ॥ कर्मण्यकर्मदर्शनं अकर्मणि कर्मदर्शनं च विपरीतदर्शनं तद्वान् भ्रान्तः खलु स्यात् ॥ तथाहि ॥ कर्मणि सति कर्माभावदर्शनं कर्माभावे सति कर्मदर्शनं च विरुद्धं ॥ भावाभावयोर्विरोधात् ॥ तथा कर्मण्यधिकरणे अकर्मदर्शनं अकर्मण्यधिकरणे कर्मदर्शनं च विरुद्धं ॥ कर्माकर्मणोरधिकरणयोः अकर्मकर्मणोरभावात् ॥ अत एवं दर्शनं भ्रान्तिः ॥ ४नावि गच्छन्त्यां तत्स्थः पुरुषः तीरस्थेषु दूरस्थेषु गमनक्रियावत्सु पुरुषेषु अगमनं पश्यति ॥ तथा तीरस्थेषु

---

१. द्वै ॥ वि ॥ 'कर्मण्यकर्मे'त्यादिका सप्तश्लोकीयं आरुरुक्षुकर्मयोगिपरा ॥ २. २. ५०. ३. सैषा सप्तश्लोकी आरूढपरा ॥ उभयपरेतिकेचित् ॥ ४. स्वाधिष्ठिते गमनाभाववति धूमशकटे गमनं पार्श्वस्थे गमनवति शकटे गमनाभावं च पश्यन् पुरुषोऽप्यत्र दृष्टान्तः ॥

वृक्षेषु गमनक्रियाऽभाववत्सु गमनं पश्यति ॥ एवं पश्यन् भ्रान्तः किलोच्यते ॥ एवं सति 'स बुद्धिमा'नित्यादि कथमिति चेत् एवं, कर्तृत्वादिधर्मरहिते अकर्मणि निष्क्रिये आत्मनि देहादिकमध्यस्य तत्क्रियामात्मन्यारोप्य आत्मानं सक्रियं मन्यते ॥ अकर्त्रात्मविज्ञानाभावात् ॥ देहेंद्रियमनोबुद्ध्यादिगतं कर्म आत्मन्यारोप्य अहं करोमि अहं पश्यामि अहं ध्यायामि अहं निश्चिनोमीत्यादिरीत्या आत्मानं कर्मवन्तं मन्यते आत्मस्वरूपयाथात्म्यज्ञानरहितः पुरुषः ॥ इदं विपरीतदर्शनं ॥ वस्तुत आत्मनि कर्मणोऽभावात् ॥ एतदपनोदनायोच्यते 'कर्मण्यकर्म यः पश्येत् स बुद्धिमा'नितिः॥ यथा यदिदं रजतमिति प्रतिपन्नं तदिदानीं शुक्तिशकलं पश्य इति भ्रमसिद्धरजतरूपविषयानुवादेन तदधिष्ठानं शुक्तिमात्रमुपदिश्यते ॥ तथा भ्रमसिद्धकर्माद्यात्मकविषयानुवादेन तदधिष्ठानं कर्मादिरहितं कूटस्थं ब्रह्म मयोपदिश्यते ॥ अहंकरोमीत्यादिविधया यदात्मस्वरूपं कर्मवत्तया प्रतीयते तत् कर्मादिरहितं ब्रह्म पश्येदिति ॥ शुक्तिरजतवत् आरोपितभ्रांतिसिद्धे विहिते प्रतिषिद्धे वा कर्मणि विषये अकर्त्रात्मस्वरूपपर्यालोचनेन कर्माभावं गमनवत्तया प्रतीतेषु वृक्षेषु गमनाभावमिव यः पश्येत् सः मनुष्येषु बुद्धिमान् ॥ तथा आत्मनि देहादिकमध्यस्य तस्मिन् निर्व्यापारे सति तदीयव्यापारोपरमं आत्मन्यारोप्य किमप्यकुर्वन् निर्व्यापारस्तूष्णीं सुखमासे इत्यादिविधया आत्मानं कर्मरहितं मन्यते सदासव्यापारदेहेन्द्रियादिस्वरूपविज्ञानरहितः पुरुषः ॥ इदं विपरीतदर्शनं ॥ वस्तुतो देहेन्द्रियादिषु निर्व्यापारताया अभावात् ॥ एतदपनोदनायोच्यते ॥ 'अकर्मणि च कर्म यः पश्येत् स बुद्धिमा'निति ॥ भ्रमसिद्धकर्माभावानुवादेन कर्म, गमनाभाववत्तया प्रतीतेषु पुरुषेषु गमनमिव मयोपदिश्यते ॥ निर्व्यापारस्तूष्णीमासे इति कर्माभाववत्तया प्रतीतौ सदासव्यापारदेहेन्द्रियादिस्वरूपपर्यालोचनेन कर्मवत्तां यः पश्येत् स बुद्धिमान् ॥ तत्तद्देहादिषु चलनादिक्रियाभावेऽपि अंतः कर्मनिवर्तनप्रयत्नरूपक्रियायाः तूष्णीमासे इति मानसाभिमानरूपक्रियायाश्च सत्वात् ॥ ननु कर्मवत्तया प्रतीयमानमात्मानं तद्याथात्म्यपर्यालोचनेन कर्मरहितं पश्यन् बुद्धिमानिति युक्तं ॥ अकर्मवत्तया दर्शनस्य सम्यग्ज्ञानत्वात् ॥ कर्माभाववत्तया प्रतीयमानमात्मानं कर्मवत्तया पश्यन् कथं बुद्धिमान् स्यात् ॥ कर्मवत्तया दर्शनस्य विपरीतज्ञानत्वात् ॥ इति चेत् यथा

आत्मनि भ्रमसिद्धकर्मानुवादेन कर्माभाव उपदिश्यते न तथा आत्मनि भ्रमसिद्ध-कर्माभावानुवादेन कर्मोपदिश्यते ॥ कर्मवत्त्वादर्शनस्य भ्रमरूपत्वात् ॥ न हि भ्रमापनोदाय भ्रमसिद्धमेकमनूद्य भ्रमसिद्धस्यान्यस्योपदेशो युक्तः ॥ किंतु देहा-दिषु भ्रमसिद्धाकर्मानुवादेन तेष्वेव कर्मोपदिश्यते ॥ अतः 'अकर्मणि कर्म पश्यन् बुद्धिमा'नित्ति युक्तं ॥ अतएव कर्मेन्द्रियमात्रनियमनेन बहिः कर्मसंन्यासमभिनयन् अन्तर्मानसाग्रहादिक्रियावान् मिथ्याचार उभयभ्रष्ट उक्तो मया ॥ १'नचसंन्यसना-देव' इत्यादिना २'मिथ्याचारः स उच्यते ॥' इत्यन्तेन ॥ ननु कर्मणि अकर्म-दर्शनस्य जन्मादिबन्धनिवर्तकत्वात् तत्कर्तव्यं ॥ अतः तदुपदेशो युक्तः ॥ अक-र्मणि कर्मदर्शनस्य प्रयोजनाभावादकर्तव्यं तत् ॥ अतस्तदुपदेशो व्यर्थ इति चेत् यथा शुक्तौ रजतं मिथ्या ॥ मिथ्याभूतरजतापवादेन शुक्तिज्ञानमावश्यकं भ्रममूलक-सुखदुःखहर्षशोकचिन्ताक्लेशादिपरिहाराय ॥ तथा अकर्मणि कर्म मिथ्या ॥ कर्मणि अकर्म मिथ्या ॥ मिथ्याभूतकर्मानुवादेन अकर्मात्मविज्ञानं मिथ्याभूता-कर्मानुवादेन कर्मज्ञानं च भ्रममूलकसुखदुःखादिपरिहारायावश्यकं ॥ अत उभयोरुपदेशः ॥ कर्मण्यकर्मदर्शनस्य अकर्मणि कर्मदर्शनस्य च बन्धनिवृत्ति-हेतुत्वात् ॥

किंच देहादौ निष्क्रियत्वे आरोपिते तस्य 'निष्क्रियं शांत' मिति ब्रह्मलक्ष-णत्वात् देहादौ परब्रह्माभिन्नात्मत्वज्ञानं स्यात् ॥ अनात्मनि देहादौ आत्मत्वज्ञानं तु बंधहेतुरिति तावदविवादम् ॥ अतः अकर्मणि कर्मदर्शनोपदेशः ॥ यद्य-कर्मणि कर्मद्रष्टा स्यात् ज्ञानी तर्हि अकर्माऽप्यहं कर्मवानेव भवामि ॥ अतः अकर्मणः कर्मैव वरमिति लोकसंग्रहाय कर्मण्येव प्रवर्तेत ॥ अतः अकर्मणि कर्मदर्शनोपदेशः ॥ ननु अकर्मदर्शनं कर्मदर्शनं च नैककर्तृकं अकर्मदर्शनस्य मिथ्यात्वज्ञाननिबन्धनत्वात् ॥ कर्मदर्शनस्य सत्यत्वज्ञाननिन्धनत्वात् ॥ 'यः पश्येत्' 'यः पश्ये'दितियच्छब्दद्वयप्रयोगाच्च ॥ सति चैवं कथमेकेन स इति तच्छब्देन परामर्श इति चेत् कर्माकर्मणोरुभयोरपि मिथ्यात्वज्ञाने ता-त्पर्यात् एकस्यैव विदुष उभयं संभवति ॥ यच्छब्दद्वयप्रयोगस्तु ३'यतो वा इमानि भूतानि जायन्ते ॥ येन जातानि जीवन्ति' ॥ इत्यादाविव उक्तार्थे

१. ३. ४. २. ३. ६. ३. तै. ३. १.

महातात्पर्यबोधनाय ॥ कर्मणि अकर्मदर्शी अकर्मणि च कर्मदर्शी यः स मनुष्येषु मध्ये बुद्धिमान् सः मनुष्येषु मध्ये युक्तः ज्ञानयोगी सः कृत्स्न-कर्मकृत् सर्वकर्मफलानां ज्ञानफलेऽन्तर्भावात् ॥ उक्तं हि मया ॥ [1]'यावानर्थ उदपाने सर्वतः संप्लुतोदके ॥ तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः'॥ इति ॥ स बुद्धिमान् कुत इति चेत् भोजनादीनि सर्वाणि कर्माणि कुर्वन्नपि युक्तः समाधिस्थ एव ॥ अतः पंडित इति वा ॥ ईदृशोऽयमिति तस्येयं स्तुतिः ॥ सर्वेषां प्राणिनां यानि कर्माणि तानि सर्वाण्यनेन कृतानि भवन्ति इति वा ॥ 'यथा कृताय विजिताया धरेयाः संयंत्येवमेनं सर्वं तदभिसमेति ॥ यत्किंच प्रजाः साधु कुर्वन्ति यस्तद्वेद यत्स वेदे'ति श्रुतेः ॥ विहितं देहेन्द्रियादिगतं आत्मन्यारोप्यमाणं कर्म कर्म ॥ तदेव प्रतिषिद्धं विकर्म ॥ तूष्णीमासनमकर्म ॥ इति कर्माकर्मविकर्मणां स्वरूपं ज्ञात्वा विकर्माकर्मणी परित्यज्य कर्तृत्वाभिमानफलाभिसन्धिहानेन विहितं कर्मैव कर्तव्यमिति परमाऽऽशयः ॥

कर्मणि ज्ञानकर्मणि दृश्ये जडे जगति अकर्म ज्ञानाकर्म अवेद्यं परं ब्रह्म अनुस्यूतं यः पश्येत् तथा अकर्मणि ब्रह्मणि कर्म दृश्यं जगत् अध्यस्तं यः पश्येत् स बुद्धिमानित्यादि ॥

कर्मणि विहिते अकाम्ये कर्मणि विषये अकर्म यः पश्येत् ज्ञानहेतुत्वेनबन्धकत्वाभावादकर्मेदं इति यः पश्येत् तथा अकर्मणि दुःखबुध्या विहितकर्माकरणे विषये प्रत्यवायापादकत्वेन बन्धहेतुत्वादिदं कर्म इति यः पश्येत् स बुद्धिमान् इत्यादि ॥

कर्मणि सति अकर्म नैष्कर्म्यशब्दितं ज्ञानं यः पश्येत् तथा अकर्मणि तस्मिन् हेतुभूतं कर्म इति यः पश्येत् सः ज्ञानकर्मणोः कार्यकारणभावं पश्यन् पुरुषः बुद्धिमानित्यादि ॥

१. २. ४६.

कर्मणि कर्माकर्मविकर्मरूपे अकर्म तद्विपरीत्यं यः पश्येत् कर्म तद्विपरीतं अकर्म विकर्म च भवति ॥ तथा अकर्म तद्विपरीतं कर्म विकर्म च भवति ॥ तथा विकर्म तद्विपरीतं कर्म अकर्म च भवति ॥ यथा यज्ञादिकं कर्म अश्रद्धया कृतं अकर्म भवति ॥ 'अन्यथा कृतमकृत 'मिति न्यायात् ॥ वक्ष्यते च ॥ १ 'अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् ॥ असदित्युच्यते पार्थ न च तत्प्रेत्य नो इहे 'ति ॥ तदेव दंभेन मानेन च कृतं चेत् विकर्म च भवति ॥ 'चत्वारि कर्माण्यभयंकराणि भयं प्रयच्छंत्ययथाकृतानि ॥ मानाग्निहोत्रमुत मानमौनं मानेनाधीतमुतमानयज्ञः' ॥ इत्यभियुक्तोक्तेः ॥ तथा औदासीन्यरूपं तूष्णीमासनं अकर्मापि शक्तस्याऽऽर्तपरित्राणाभावात् विकर्म ॥ दीक्षितस्य भगवद्ध्यानाऽऽसक्तस्य च स्वकाले पंचमहायज्ञाद्यकरणं अकर्मापि कर्म ॥ 'दीक्षितो न ददाती'त्यादिवचनात् दीक्षितस्य, २ 'तस्य कार्यं न विद्यते' इति वचनात् भगवन्तं ध्यायतः ज्ञानयोगिनश्च महायज्ञाद्यकरणाभ्यनुज्ञानात् ॥ वक्ष्यते च ॥ ३ 'सर्वधर्मान् परित्यज्य मामेकं शरणं व्रजे 'ति ॥ कर्मकाले प्रत्यवायहेतोरन्यस्याऽविहितस्याकरणात् ॥ प्रत्युत कर्माकरणस्य यागे योगे चोपयोगात् ॥ तथा यागीयहिंसा विकर्मापि कर्म ॥ 'अग्नीषोमीयंपशुमालभेते 'ति विहितत्वात् ॥ सैव पशौ नष्टे न कर्म ॥ विध्यर्थानिष्पत्तेः ॥ नापि विकर्म ॥ कामकारेणाकृतत्वात् ॥ किंतु कृताऽप्यकृतैवेत्यकर्म ॥ एवं कर्माकर्मविकर्मसु तद्विपरीत्यं उक्तरीत्या यः पश्येत् ॥ तथा अकर्मणि क्रियारहिते आत्मनि कर्म वियदादिप्रपंचं च आधाराधेयभावेन अधिष्ठानाध्यस्तभावेन वा यः पश्येत् ॥ सः एवं पश्यन् पुरुषः बुद्धिमानित्यादि ॥

कर्माकर्मविकर्मसु तद्विपरीत्यदर्शी बुद्धिमान् ॥ अकर्मशब्दिते ब्रह्मणि जगतः अध्यासदर्शी युक्तः परोक्षज्ञानवान् ॥ यो बुद्धिमान् युक्तश्च सः कृत्स्नकर्मकृत् ॥ नत्वेकैकः ॥ यो बुद्धिमानप्ययुक्तः कर्म करोति सः न कृत्स्नकर्मकृत् ॥ असदेव हि तस्य सर्वं भवति ॥ ४ 'यो वा एतदक्षरं गार्ग्यविदित्वाऽस्मिन् लोके यजते

१. १७. २८. २. ३. १७. ३. १८. ६६. ४. बृह. ५. ८. १०.

ददाति तपस्तप्यतेऽपि बहूनि वर्षसहस्राण्यन्तवदेवास्य तद्भवती'ति श्रुतिः ॥ यस्तु युक्तोऽपि अबुद्धिमान् पापं कर्म करोति स प्रत्यवायी भवति ॥ पापाश्लेष-निमित्तस्यापरोक्षज्ञानस्याभावात् ॥ आत्मानात्मस्वरूपज्ञानपुरःसरं कर्मादिस्व-रूपं जानन् कर्मकुर्यात् ॥ एवंसति ज्ञानकर्मणोः समुच्चयः आपद्यत इति चेत् ॥ परोक्षज्ञानकर्मणोः समुच्चय इष्ट एव ॥ असमुच्चयवादस्तु अपरोक्षज्ञानविषयः ॥ इति वा ॥

कर्म ससाधनं यज्ञादिकं तस्मिन् अकर्म ब्रह्म पश्येत् कर्मतदंगेषु ब्रह्मदृष्टिं कुर्यात् ॥ वक्ष्यते चानुपदं ॥ १'ब्रह्मार्पणं ब्रह्म हविः ब्रह्माग्नौ ब्रह्मणा हुतं ॥ ब्रह्मैव तेन गन्तव्यं ब्रह्म कर्म समाधिना' इति ॥ उपरिष्टाच्च ॥ २'अहं क्रतुरहं यज्ञः स्वधाऽहमहमौषधं ॥ मंत्रोऽहमहमेवाऽऽज्यमहमग्निरहं हुतं' ॥ इति ॥ तथा अकर्मणि प्रत्यक्चेतने कर्म अध्यस्तं यः पश्येत् स बुद्धिमानित्यादि ॥

कर्मणि अकर्म ब्रह्म यः पश्येत् ब्रह्मदृष्ट्या कर्म कुर्यात् ॥ तथा अकर्मणि कर्माभावे कर्म यः पश्येत् न त्वकर्म ॥ यथा ब्रह्मदृष्ट्या कर्म करोति न तथा ब्रह्मदृष्ट्या अकर्म कुर्यात् ॥ सः एवं पश्यन् बुद्धिमानित्यादि ॥

कर्माणि क्रियते इति कर्म जगत् तस्मिन् अकर्म निष्क्रियं ब्रह्म यः पश्येत् ॥ प्रतीतं सर्वं प्रपंचं ब्रह्मैव यः पश्येत् ॥ यथा प्रतीतं रजतं शुक्तिमेव पश्यति तद्वत् ॥ तथा अकर्मणि ब्रह्मणि कर्म जगच्च अध्यस्तं यः पश्येत् ॥ ब्रह्मैव भ्रान्त्या द्रव्यगुणकर्मादिभेदभिन्नजगदात्मना भातं न वस्तुतो जगदस्ति ॥ यथा मरुरेव जलवत्तरंगफेनादिरूपेण भाति न वस्तुतो जलादिकमस्ति तद्वत् ॥ स बुद्धिमान् ब्रह्मज्ञानी सः युक्तः ब्रह्मनिष्ठः सः कृत्स्नानि अनेककल्पाऽऽर्जितानि अनेकजन्मार्जितानि संचितानि आगामीनि अनारब्धफलानि नानायोनि प्राप-काणि स्वयाथात्म्यविज्ञानखड्गेन कृन्तति छिनत्तीति कृत्स्नकर्मकृत् ॥ कृती छेदने इति धातुः ॥ ३'सर्वं पाप्मानं तरती'ति श्रुतिः ॥ एवं द्रष्टा मुक्तो भवति ॥ अत एवंदर्शनसिद्धये कर्म यथावत्कर्तव्यमित्यलं ॥ १८ ॥

---

१. ४. २४. २. ९. १६. ३. बृह. ६. ४. २३.

वि ॥ कर्मणि अकर्मशब्दितं ज्ञानं यः पश्येत् क्रियमाणे कर्मणि आत्मयाथात्म्यज्ञानस्य विद्यमानत्वात् कर्म ज्ञानाकारं यः पश्येत् ॥ तथा अकर्मणि ज्ञाने वर्तमान एव कर्म यः पश्येत् ॥ न हि आत्मयाथात्म्यज्ञानाभावे अकाम्ये कर्मणि प्रवर्तते ॥ अतो ज्ञानं कर्मयोगान्तर्गततया कर्मकारं यः पश्येत् ॥ सः एवं ज्ञानकर्मणोः अन्योन्याकारतां पश्यन् पुरुषः मनुष्येषु बुद्धिमान् कृत्स्नशास्त्रार्थवित् ॥ स युक्तः मोक्षायार्हः ॥ सः कृत्स्नकर्मकृत् ॥ कृत्स्नशास्त्रार्थानुष्ठाता ॥ इति स्तुतिः ॥ विहिते अनुष्ठेये कर्मणि बोद्धव्यं, आत्मस्वरूपयाथात्म्यानुसन्धानगर्भमिदमित्येतत् ॥ अकर्मशब्दिते ज्ञानयोगे बोद्धव्यं तु, अकाम्यकर्मयोगान्तर्गतमिदमित्येतत् ॥ एवं आत्मस्वरूपयाथात्म्यानुसन्धानगर्भं अकाम्यं कर्म ज्ञात्वा यथावत्तदनुष्ठेयं ॥ १८ ॥

द्वै ॥ अस्वातंत्र्यात् स्वस्य कर्माभावं ज्ञात्वा हरेरेवेदं कर्मेति बुद्ध्या विहितं कर्म कुर्वन् बुद्धिमानिति स्तुत्या स्वस्य अकर्तृत्वानुसंधानेन कर्म कर्तव्यमित्युक्तं भवति ॥ किमकर्तृत्वानुसन्धानमात्रेण कर्म कर्मतामश्नुते उत अन्यदप्यपेक्षते ॥ वद ॥

कृष्णः ॥ यस्य सर्वे समारंभाः कामसंकल्पवर्जिताः ॥
ज्ञानाग्निदग्धकर्माणं तमाहुः पंडितं बुधाः ॥ १९ ॥

यस्येति ॥ यस्य सर्वे सम्यक् आरभ्यन्त इत्यारंभाः कर्माणि कामश्च संकल्पश्च कामसंकल्पौ ताभ्यां वर्जिताः रहिताः कामसंकल्पवर्जिताः तं ज्ञानमेवाग्निः ज्ञानाग्निः ज्ञानाग्निना दग्धं कर्म यस्य सः ज्ञानाग्निदग्धकर्मा तं ज्ञानाग्निदग्धकर्माणं पण्डा विलक्षणा बुद्धिः अस्य संजाता पण्डितः तं बुधाः विद्वांसः आहुः वदन्ति॥१९॥

न केवलं कर्तृत्वानुसन्धानत्यागमात्रेणालं किंतु कर्मणि कामसंकल्पत्यागोऽप्यावश्यकः ॥ तथाकृतमेव कर्म कर्म ॥ अन्यदकर्म ॥ यः कर्तृत्वानुसन्धान-

फलेच्छासंकल्पादिकं परित्यज्य कर्म करोति स पंडितः ॥ यस्य सर्वाणि सम्यगारभ्यमाणत्वेन समारंभशब्दितानि विहितकर्माणि कामशब्दितफलेच्छया अनेनेदं साधयिष्यामि अनुभविष्यामि चैवमिदं मोदयिष्यामि चाऽऽत्मानमनेनेति चिन्तनरूपेण संकल्पेन च वर्जितानि ॥ तं पंडाशब्दितविलक्षणबुद्धिमन्तं विद्वांसः प्राहुः ॥ स्वस्य अस्वातंत्र्यज्ञानेन आत्मनः कर्माभावज्ञानवान् हि सः ॥ कर्मकर्तुः कर्माभाववत्त्वं कथमिति चेत् भगवानेव स्वतंत्रः ॥ अतस्तस्यैवेदं कर्म ॥ अहंतु खर्ववथाऽस्वतंत्रः ॥ अतो न ममेदं कर्म ॥ इति यत् ज्ञानं तेन अस्य कर्माणि न सन्तीत्यभावबुद्धिविषयीकृतत्वेन दग्धप्रायाणि ॥ अतोऽयं ज्ञानाग्निदग्धकर्मा ॥ तादृशं तं बुधा वदन्ति ॥ कर्मणि क्रियमाणे यत् अस्वातंत्र्याच्च ममेदं कर्म भगवतः स्वातंत्र्यात् भगवत एवेदं कर्म इति ज्ञानं तेन दग्धं कर्म भावप्रधाननिर्देशेन कर्मत्वं यस्य विषये सः ज्ञानाग्निदग्धकर्मा तं पंडितं बुधा वदन्ति ॥ कर्तृत्वानुसन्धानफलेच्छासंकल्पत्यागपूर्वकमनुष्ठितं कर्म, न कर्म ॥ किंतु ज्ञानहेतुत्वेन ज्ञानकोटावनुप्रविष्टं ॥ उक्तरूपज्ञानेन दग्धप्राचीनपापकर्माणं तं पंडितं बुधा वदन्ति ॥ अतः कर्तृत्वाभिमानफलेच्छासंकल्पत्यागपुरःसरं कर्म कर्तव्यं ॥ उपक्रमवाचकसमारंभपदप्रयोगेण उपक्रम एव कामसंकल्पादिवर्जनमावश्यकमिति सूच्यते ॥ १९ ॥

अ ॥ कर्मणि अकर्मदर्शी अकर्मणि कर्मदर्शी च यः परमार्थदर्शी आरूढः सः कर्मणां मिथ्यात्वदर्शनात्कर्मसंन्यासी सः 'सबुद्धिमा'नित्यादिना स्तूयते ॥ किंताद्दशो महिमा तस्य ॥ ब्रूहि ॥

कृष्णः ॥ परमार्थदर्शी आरूढो द्विविधः ॥ प्रारब्धकर्मशेषवान् प्रारब्धकर्मशेषरहितश्चेति ॥ तत्र प्रारब्धकर्मशेषवान् वैदिकानि कर्माणि लोकसंग्रहार्थं कुर्यात् ॥ अन्यस्तु लौकिकानि शरीरयात्रामात्रनिर्वाहकाणि प्राणत्राणमात्रोपयोगीनि चेष्टारूपाणि कर्माणि कुर्यात् ॥ उभयविधोऽपि सः तानि कर्माणि कामसंकल्परहितानि कुर्यात् ॥ स च कर्माकर्मणोरर्थतत्त्वदर्शनाग्निना शुद्धबुद्धनित्य निरुपायसच्चिदानन्दाखंडैकरसाद्वितीयपरब्रह्मयाथात्म्यज्ञानाग्निना वा दग्धपूर्वोत्तरविचित्रविविधशुभाशुभकर्मा ॥ १ 'तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ-

१. सू. ४. १. १३.

तद्व्यपदेशा'दितिसूत्रं ॥ १'तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेत एवं हैवास्य सर्वे पाप्मानः प्रदूयन्ते ॥ इति श्रुतिः ॥ अतएव पंडितः ॥ तं न केवलमहं पंडितं ब्रवीमि ॥ किंतु बुधा अपि तं पंडितं २प्राहुः ॥ यस्य लौकिकानि वैदिकानि वा सर्वाणि कर्माणि कामसंकल्पवर्जितानि ॥ कामाः अनेनेदं मे भूयात् इदं मे भूयात् इतीच्छाविशेषाः तैः, तद्धेतुभूताः संकल्पाः सं इति कल्पाः सम्यक्त्वबुद्धयः ॥ सम्यक्त्वबुध्याखलुकामाः संपद्यन्ते ॥ वक्ष्यते च ॥ ३'संकल्पप्रभवान् कामा'निति ॥ तैश्च वर्जितानि ॥ कामः फलतृष्णा संकल्पः अहंकरोमीति कर्तृत्वाभिमानः ताभ्यां वर्जितानीति वा ॥ कामः फलं काम्यत इति काम इति व्युत्पत्तिः ॥ तद्विषयकः संकल्पः तेन वर्जितानीति वा ॥ तं ज्ञानाग्निदग्धकर्माणं पंडितं बुधाः प्राहुः ॥ अतस्त्वमीदृशो भव ॥ १९ ॥

वि ॥ अर्जुनः ॥ यथावदनुष्ठीयमानं कर्म ज्ञानाकारं भवतीत्युक्तं ॥ कर्मणः कर्माकारता युक्ता ॥ ज्ञानाकारता कथं युज्यते ॥ वद ॥

कृष्णः ॥ यस्य सर्वे कर्मोपक्रमाः द्रव्यार्जनादिलौकिककर्मपूर्वकनित्यनैमित्तिककाम्यरूपसर्वकर्मारंभाः कामः फलसंगः संकल्पः सं एकीभावेन कल्पः कल्पना ज्ञानं ऐक्यज्ञानं तद्वर्जनस्य आवश्यकतोक्त्या तस्य भ्रमत्वं विवक्षितमिति ज्ञायते ॥ अनात्मनि देहादौ आत्मत्वाभिमानरूपः देहात्मैक्यभ्रमः ॥ ४'व्यवसायाऽऽत्मिकाबुद्धिरेके'त्यत्रोक्तदिशा प्रकृतिवियुक्तात्मस्वरूपानुसन्धानयुक्ततया ताभ्यां रहितः ॥ एवं कर्म कुर्वाणः सः अन्तर्गतज्ञानककर्मयोगवत्त्वात्पंडितः ॥ तं एवं कर्म कुर्वाणं पंडितं कर्मान्तर्गताऽऽत्मयाथात्म्यज्ञानरूपाग्निना दग्धप्राचीनकर्माणं बुधाः प्रवदन्ति ॥ एवं कर्म कुर्वतः कर्मान्तर्गतज्ञानाग्निना प्राचीनानि पापकर्माणि नश्यन्ति ॥ अत उक्तरूपं कर्म ज्ञानाकारं ॥ अत उक्तं युक्तं ॥ १९ ॥

अर्जुनः ॥ कर्तृत्वानुसन्धानफलेच्छासंकल्पत्यागमात्रेण कर्म कर्मतामश्नुते उत अन्यदप्यपेक्षते ॥ ब्रूहि ॥

१. छा. ५. २४. ३. २. कर्मजन्यज्ञानरूपाग्निदग्धकर्माणं ॥ पूर्वार्धे आरुरुक्षुः॥ उत्तरार्धे आरूढः ॥ इति केचित् ॥ ३. ६. २४. ४. २. ४१.

त्यक्त्वा कर्मफलाऽऽसंगं नित्यतृप्तो निराश्रयः ॥
कर्मण्यभिप्रवृत्तोऽपि नैव किंचित् करोति सः ॥ २० ॥

त्यक्त्वेति ॥ नित्यं तृप्तः नित्यतृप्तः आश्रयात् निर्गतः निराश्रयः पुमान् कर्मणः फलं कर्मफलं तस्मिन् आसंगः कर्मफलासंगः तं त्यक्त्वा कर्मणि अभि सम्यक् प्रवृत्तोऽपि सः किंचिदपि नैव करोति ॥ २० ॥

कर्तृत्वाभिमानफलेच्छासंकल्पानां त्यागेऽपि कर्मणि फले च इदं सुखसाधनमिति स्नेहः स्यात् । सोऽपित्याज्यः ॥ कर्मणि फले च आसंगशब्दितं स्नेहं त्यक्त्वा कर्म कर्तव्यं ॥ यः नित्यतृप्तः निराश्रयः तादृशभगवत्सरूपः ॥ 'अतस्मिन्प्रयुज्यमानस्तच्छब्दो विनाऽपि वर्ति वत्यर्थं लभते' ॥ 'अतद्भावे सामानाधिकरण्यं सारूप्यं गमयति' ॥ इति न्यायः ॥ लक्षणया तादृशभगवत्सरूपोऽहमस्मि इति ज्ञानवान् सन् ॥ नित्ये ब्रह्मणि तृप्तः ॥ अनिराश्रयः इति छेदः ॥ निराश्रयः आश्रयहीनः स न भवतीत्यनिराश्रयः ॥ भगवदाश्रितत्वात् ॥ अः अशब्दवाच्यो भगवान् नितरां आश्रयो यस्य सः अनिराश्रयः तादृशश्च सन् ॥ कर्मफलाऽऽसंगं त्यक्त्वा कर्म करोति सः कर्मणि सम्यक् प्रवृत्तोऽपि किंचिदपि कर्म नैव करोति ॥ 'कर्मण्यकर्म यः पश्येदित्युक्तरीत्या अस्वातंत्र्येण कर्माभावात् ॥ 'ज्ञानाग्निदग्धकर्माण'मित्युक्तरीत्या तदीयकर्मणां ज्ञानकोटिप्रविष्टत्वाद्बन्धकत्वेन कर्मत्वाभावाच्च॥ कर्तृत्वानुसंधानफलेच्छासंकल्पकर्मफलाऽऽसंगत्यागपूर्वकं कर्म कुर्यात् ॥ २० ॥

अ ॥ अर्जुनः ॥ प्रारब्धकर्मशेषरहितः परमार्थदर्शी शरीरयात्रामात्रनिर्वाहाय चेष्टारूपाणि कर्माणि करोति ॥ तस्य ज्ञानाग्निदग्धकर्मता युक्ता ॥ 'पंडित' इति स्तुतिश्च युक्ता ॥ यस्तु प्रारब्धकर्मशेषवान् लोकसंग्रहाय वैदिकान्येव कर्माणि ज्ञानोदयात्प्रागिव कुर्यात् कथं तस्य तदुभयं घटते ॥ किंच उदाहृतसूत्रानुरोधेन पूर्वोत्तरकर्मसंबन्धराहित्येऽपि शरीरयात्रार्थं क्रियमाणानि लोकसंग्रहार्थं क्रियमाणानि वा कर्माणि क्व गच्छेयुः ॥ अतः कथं स उभयविधोपि कर्मसंन्यासी स्यात् ॥ कथं वा तस्याऽस्तु सा स्तुतिः ॥ वद ॥

कृष्णः ॥ नित्यतृप्तः नित्येन स्वरूपानन्देन तृप्तः अतएव विषयेषु निस्पृहः निराश्रयः आश्रयत्यनेन कर्मेत्याश्रयः फलसाधनं तद्रहितः ॥ दृष्टादृष्टफलसाधनाश्रयरहितः ॥ निराश्रयः आश्रयो देहेन्द्रियादिः तद्रहितः ॥ देहेन्द्रियाद्यभिमानशून्यः ॥ आश्रयत्यनेन कर्मेत्याश्रयः अहंकारः [१] तद्रहितः ॥ अतः कर्मफलाऽऽसंगं त्यक्त्वा नित्यतृप्तत्वात् फलापेक्षां त्यक्त्वा निराश्रयत्वात् कर्मण्यहंकरोमीत्यभिमानं त्यक्त्वा लोकसंग्रहार्थं वैदिके कर्मणि वैदिके लौकिके वा कर्मणि सम्यक सांगोपांगं सर्वेषु कर्मसु प्रवृत्तोऽपि सः किंचिदपि नैव करोति ॥ निष्क्रियाऽऽत्मस्वरूपयाथात्म्यदर्शनवत्वात् ॥ तस्य कर्म न कर्म ॥ किंतु अकर्मतामश्नुते ॥ अत उभयोर्यदुक्तं तद्युक्तं ॥

नित्येन आनन्दैकरसेन स्वाऽऽत्मना साक्षात्कृतेन ब्रह्मणैव तृप्तः स्वरूपसुखसंपन्नः अतः निराश्रयः निरहंकारः कर्मफलासंगं त्यक्त्वा कर्माणि फलन्ति अत्रेति वा कर्माणि फलतीति वा स्वयं कर्मणां फलत्वाद्वा कर्मफलो देहः तत्र कर्ता भोक्ता वक्ता श्रोता द्रष्टाऽहमिति तादात्म्यं त्यक्त्वा आहारादौ शरीरयात्रानिर्वाहाय प्रवृत्तोऽपि नैव किंचित्करोति सः ॥ कर्मण्यकर्मदर्शनेन उपाधिना कृतैः कर्मभिः न बध्यते ॥ अतोऽकर्मैव स भवतीति युक्तमुक्तं ॥ २० ॥

वि ॥ अर्जुनः ॥ एवं कर्म कुर्वन् पंडित इत्युक्तम् ॥ तत्कथम् ॥ कर्म कुर्वन् कर्मी स्यात् न ज्ञानी स्यात् ॥ सतिचैवं कर्म कुर्वतः पण्डितशब्दितज्ञानित्वं कर्मणो ज्ञानत्वं च कथं युज्येत ॥ वद ॥

कृष्णः ॥ कर्मफले आसंगशब्दितामिच्छां त्यक्त्वा नित्ये स्वाऽऽत्मन्येव तृप्तः ॥ अनित्यदेहविविक्तनित्याऽऽत्मलाभसमुपजनितममन्दमानन्दमाशंसमानः आत्मविषये कांक्षावत्वेन अन्यत्र अलंबुद्धिमान् ॥ अतएव निराश्रयः आत्मव्यतिरिक्तास्थिरप्रकृतिविकारेषु दारापत्यादिषु च आश्रयणीयत्वबुद्धिरहितः एतादृशः सन् यः कर्म करोति सः कर्मणि सम्यक् तदेकपरतया प्रवृत्तोऽपि नैव किंचित्कर्मकरोति ॥ कर्मकरणापदेशेन पुनःपुनः तदन्तर्गतज्ञानयोगमेवाऽभ्यस्यति ॥ अतो

१. आश्रयणीयरहितः ॥ इति केचित् ॥

ज्ञान्येव सः ॥ तदीयं कर्म च ज्ञानाकारं ॥ पुनःपुनरभ्यासेन दृढीकृतज्ञानयोगगर्भत्वात् ॥ अतो यदुक्तं तद्युक्तम् ॥ २० ॥

अर्जुनः ॥ 'कामसंकल्पवर्जिताः' 'त्यक्त्वाकर्मफलाऽऽसंगं' इत्युक्तः कामादित्यागो दुःशकः ॥ केनोपायेन सः सुशकः स्यात् ॥ ब्रूहि तमुपायं ॥

कृष्णः ॥ निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः ॥
शारीरं केवलं कर्म कुर्वन्नाऽऽप्नोति किल्बिषं ॥ २१ ॥

निराशीरिति ॥ आशिषः इच्छातः निर्गतः निराशीः चित्तं च आत्मा च चित्तात्मानौ यतौ वशीकृतौ चित्तात्मानौ येन सः यतचित्तात्मा सर्वे च ते परिग्रहाश्च सर्वपरिग्रहाः त्यक्ताः सर्वपरिग्रहाः येन सः त्यक्तसर्वपरिग्रहः तादृशः सन् केवलं कामसंकल्पादिरहितं शरीरस्य इदं शारीरं कर्म कुर्वन्नपि किल्बिषं पापं नाऽऽप्नोति ॥ २१ ॥

मनोबुद्धीन्द्रियाणां निग्रहेण कामसंकल्पादित्यागो भवति ॥ चित्तं बुद्धिः आत्मा मनः उपलक्षणया अन्येषामिन्द्रियाणां ग्रहणं ॥ निगृहीतमनोबुद्धीन्द्रियः त्यक्तसर्वपरिग्रहो भवति ॥ स्वकर्मफलानुभवाय परिगृह्यमाणत्वेन परिग्रहशब्दितमित्रापत्यकलत्रदेहगेहादिषु अहंममेत्यभिमानरहितो भवति ॥ तेन निराशीर्भवति ॥ आशोः कामः कामतदुपलक्षितसंकल्पादित्यागवान् भवति ॥ अनेनोपायेन कामादित्यागः सुशकः ॥ उक्तं हि मया ॥ १'इन्द्रियाणि मनो बुद्धिः अस्याधिष्ठानमुच्यते ॥ एतैर्विमोहयत्येषः ज्ञानमावृत्य देहिनं ॥ तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ ॥ पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनं' ॥ इति ॥ वक्ष्यते च ॥ २'यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः ॥ विगतेच्छाभयक्रोधः यः सदा मुक्त एव सः' ॥ इति ॥ अनेनोपायेन महता प्रयत्नेन बुद्ध्यादीनि निगृह्य कामसंकल्पादित्यागपूर्वकं कर्मणि कृतेऽपि तस्य कर्मत्वात्तेन बध्यतैवेति चेत् ॥ केवलं कामसंकल्पादि-

---

१. ३. ४०. ४१. २. ५. २८.

रहितं शारीरं शरीरेण क्रियमाणं विहितं कर्म कुर्वन् अपि अनिष्टत्वेन पापतुल्यत्वात् पापवाचककिल्बिषशब्दितं बंधं नाऽऽप्नोति ॥ कामादित्यागात् अभिमानत्यागाच्च ज्ञानकोटावनुप्रविष्टस्य निवृत्तिकर्मणो बन्धकत्वाभावात् ॥ अतएव कुर्वन्नपि नैव करोतीत्युक्तं ॥ उक्तं चेदं मया ॥ १'कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ॥ इन्द्रियार्थान् विमूढाऽऽत्मा मिथ्याऽऽचारः स उच्यते ॥ यस्त्विन्द्रियाणि मनसा नियम्याऽऽरभतेऽर्जुन ॥ कर्मेन्द्रियैः कर्मयोगं असक्तः स विशिष्यते' ॥ इति॥ २१ ॥

अर्जुनः ॥ यतचित्तात्मत्वमुपाय इत्युक्तं ॥ यतचित्तात्मनो लक्षणं किं ॥ तदुच्यतां तत्संपादनाय ॥

यदृच्छालाभसंतुष्टो द्वंद्वातीतो विमत्सरः ॥
समस्सिद्धावसिद्धौ च कृत्वाऽपि न निबध्यते ॥ २२ ॥

यदृच्छेति ॥ यदृच्छा अप्रयत्नः भगवदिच्छा वा तया लाभः यदृच्छालाभः तेन सम्यक् तुष्टः यदृच्छालाभसंतुष्टः द्वंद्वानि अतीतः द्वंद्वातीतः विगतः मत्सरः मात्सर्यं यस्मात् विमत्सरः सिद्धौ असिद्धौ च समः तादृशः यः सः कृत्वाऽपि न निबध्यते ॥ २२ ॥

यदृच्छा अप्रयत्नः भगवदिच्छा वा तया लाभः तेनैव नितरां तुष्टः अलं-इति बुद्धिमान् ॥ शीतोष्णसुखदुःखलाभालाभजयापजयादिद्वंद्वैरभिभवे कथं यदृच्छालाभमात्रेण संतुष्टः स्यात् इति चेत् द्वंद्वातीतः द्वंद्वचिन्तारहितः ॥ प्रयत्नाकरणे कदाचित् किमपि नोपलभ्येत ॥ तदा मनःखेदः स्यात् ॥ येन यतचित्तात्मता हीयेत ॥ तेन कामादिभिरभिभवः स्यात् ॥ तेन च कामादिसाहित्येन कर्म बंधकमेव स्यात् ॥ इति चेत् प्राप्तौ अप्राप्तौ च समः हर्षविषादरहितः ॥ यत्नवैफल्येन नेदं मम वशे किंकरणीयं इति मनःखेदसंभवे कथं समस्स्यात् इति चेत् विमत्सरः स्वानधीनत्वप्रयुक्तमनःखेदरहितः ॥ असोढ्वा परोत्कर्षं तद्वत्

---

१. ३. ६. ७.

तदुपरि च मया भवितव्यमिति यदि प्रयतेत तर्हि सर्वमिदं विहन्येत इति चेत् विमत्सरः परोत्कर्षासहनरहितः ॥ एतानि यतचित्तात्मनो लक्षणानि ॥ एतैर्युक्तः यः कर्म करोति सः कर्म कृत्वाऽपि तेन न निबध्यते ॥ पूर्वोक्तरीत्या तस्य ज्ञानकोटावनुप्रवेशात् ॥ दार्ढ्यार्थं 'नाऽऽप्नोतिकिल्बिषमित्युक्तस्य पुनरत्र प्रपंचनं ॥ एवमेवंभूतेन कर्म कर्तव्यं ॥ २२ ॥

अ ॥ अर्जुनः ॥ प्रारब्धकर्मशेषवान् लोकसंग्रहार्थं 'कर्मण्यभिप्रवृत्तोऽपि नैव किंचित्करोती'त्युक्तम् ॥ अस्तुनाम तस्य तत्तथा ॥ लोकसंग्रहार्थं प्रवृत्त्या परोपकारकारित्वात् ॥ यस्तु प्रारब्धकर्मशेषरहितः शरीरयात्रानिर्वाहमात्रार्थानि-चेष्टारूपाणि भिक्षाटनादीनि वा कर्माणि करोति ॥ स तैः कर्मभिः किल्बिषं प्राप्नुयादेव ॥ लोकसंग्रहादेः प्रयोजनस्याभावात् ॥ केवलं स्वार्थत्वाच्च ॥ अतस्तस्य 'यस्य सर्वे समारंभा' इत्युक्ता स्तुतिः कथं युज्येत ॥ ब्रूहि ॥

कृष्णः ॥ निष्कामः चित्तं मनः आत्मा देहः वशीकृतमनाः वशीकृतदेहश्च यतं स्थापितं चित्तं आत्मन्येव यस्य तादृश इति वा ॥ त्यक्तसर्वभोगोपकरणः सन् यः शरीरयात्रानिर्वाहाय चेष्टारूपाणि भिक्षाटनादीनि वा कर्माणि करोति कर्तृत्वाभिमानरहितः ॥ सः तेन केवलेन अहंकरोमीतिकर्तृत्वाभिमानरहितेन शरीरयात्रानिर्वाहमात्रार्थेन कर्मणा किल्बिषं पापं अनिष्टत्वेन पापतुल्यं पुण्यं च तदुभयमूलकं संसारबन्धं च न प्राप्नोति ॥ अभिमानादिराहित्येन तस्य कर्मणः कर्मत्वेऽप्यकर्मत्वात् ॥ वक्ष्यते च ॥ १'नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित्' ॥ इति ॥ २'कुर्वन्नपि न लिप्यते' ॥ इति ॥ अत्यंतविक्षेपहेतोरपि लोकसंग्रहार्थस्य वैदिकस्य कर्मण सम्यग्दर्शनवशात् अभिमानराहित्याच्च यदा न बंधकत्वं तदा शरीरयात्रामात्रार्थस्य अविक्षेपकस्य चेष्टादेः भिक्षाटनादेर्वा कर्मणः उक्तहेतोः बंधकत्वं सुतरां नास्ति ॥ ३'एतं वै तमात्मानं विदित्वा ब्राह्मणा व्युत्थायाथ भिक्षाचर्यं चरन्तीति विहितत्वाच्च ॥ एतादृशस्य

---

१. ५. ८. २. ५. ७. ३. बृह. ५. ५. १.

कर्मणः किल्बिषाऽऽपादकत्वाप्रसक्तेः किल्बिषं नाऽऽप्नोति इत्यप्रसक्तप्रतिषेधः ॥ इति चेत् अज्ञानेन कृतायाः निषिद्धचेष्टायाः अयोग्येभ्यो भिक्षाग्रहणादेर्वा किल्बिषाऽऽपादकत्वप्रसक्त्या उक्तहेतोः किल्बिषं नाऽऽप्नोतीति निषेधोऽयं ॥ [३] उक्तविशेषणविशिष्टो यतिः शारीरो जीवः तत्स्वरूपप्रापकं श्रवणादि कर्म शारीरं तत्केवलं तदेव कुर्वन् किल्बिषं न प्राप्नोति ॥ श्रवणादिकं विहाय अन्यत् स्तोत्रमंत्रजपादिकं कुर्वन् किल्बिषं प्राप्नोति ॥ स्मरंति हि ॥ 'यमानभीक्ष्णं सेवेत नियमान्मत्परस्त्यजेत् ॥ जिज्ञासायां संप्रवृत्तो नाऽऽद्रियेत्कर्मचोदनां ॥ संन्यस्य श्रवणं कुर्यात् नान्यत्कुर्याद्यतिः क्वचि'दिति ॥ एतत्सूचनाय 'शारीरं केवलं [१] कर्म कुर्वन्नाऽऽप्नोति किल्बिष'मित्युक्तं ॥ २१ ॥

अर्जुनः ॥ शरीरयात्रामात्रार्थस्य कर्मणोऽभ्यनुज्ञानेन याच्ञादिना धनं संपाद्य अधिकाऽऽहारादिसेवनेऽपि प्रवर्तेरन् ॥ तथाऽपि प्रवर्तनमुचितं वा ॥ वद ॥

कृष्णः ॥ अप्रयत्नेन यो लाभः तेन अन्यत्रालंबुद्धिमान् प्रयत्नाकरणे अधिकलाभाभावेन शीतोष्णादिद्वंद्वैः पीडितः स्यात् इति चेत् द्वंद्वातीतः द्वंद्वान्यतीतः तैरपीडितः ॥ समाधिकाले तेषां स्फुरणमेव न ॥ व्युत्थानकाले स्फुरणेऽपि परमानन्दाद्वितीयाकर्त्रभोक्तात्मस्वरूपज्ञानेन बाधात् तैरुपहन्यमानस्यापि क्षोभो न ॥ परोत्कर्षासहने यदृच्छालाभसंतुष्टः द्वंद्वातीतश्च न स्यात् इति चेत् विमत्सरः परोत्कर्षासहनपूर्विका स्वोत्कर्षवांछा मत्सरः तद्रहितः ॥ अद्वितीयाऽऽत्मदर्शनेन स्वपरभेदबुद्धेर्बाधात् ॥ अप्रयत्नादप्राप्तौ मनः खेदवान् स्यात् इति चेत् समसिद्धौ असिद्धौ च यदृच्छालाभस्य अधिकस्य वा प्राप्तौ न हृष्टः अप्राप्तौ न विषण्णः अद्वितीयब्रह्मात्मैक्यानुभवानन्देन तृप्तवात् ॥ एतादृशः सन् यः शरीरयात्रामात्रार्थानि [२]कर्माणि करोति सः कृत्वाऽपि न निबध्यते न बंधं प्राप्नोति ॥ पतितेऽस्मिन् देहे विदेहमुक्तिं प्राप्नोत्येव ॥ 'नाऽऽप्नोति किल्बिष'मित्यस्यैवानुवादोऽयम् ॥ २२ ॥

१. आरुरुक्षुपक्षे द्वैतिव्याख्यानवत् ॥ २. आरुरुक्षुपक्षे विहितं कर्म आरूढपक्षे शरीरयात्रानिर्वाहार्थं कर्म ॥

अर्जुनः ॥ ज्ञानिन. कर्मकरणमंगीकृत्य करणमप्यकरणसममिति किमर्थं परिहारः क्रियते ॥ मुख्यत्वादकरणमेव वरं ॥ अतस्तदेवास्तु ॥ किं ब्रवीषि ॥

कृष्णः ॥ प्राप्तसम्यक्दर्शनः यतिः गृहस्थश्चेति द्विविधः ॥ तत्र त्यक्तभार्यादिसर्वपरिग्रहो यतिश्चेत् स शरीरयात्रामात्रार्थं केवलं कर्म कुर्वन्नपि अन्यत् वैदिकं कर्म अकुर्वन्नपि विहिताकरणजन्यं पापं न प्राप्नोति ॥ तस्य कर्मसंन्यासेऽधिकारात् ॥ यस्तु, अत्यक्तेति छेदः ॥ अत्यक्तसर्वपरिग्रहः गृही स चेत् निराशीरपि यतचित्तात्माऽपि ॥ शरीरयात्रामात्रार्थं केवलं कर्म कुर्वन् अन्यत् वैदिकं कर्म परित्यजन् विहिताकरणजन्यं पापं प्राप्नोत्येव ॥ कुर्वन् आप्नोतीति छेदः ॥ प्राप्तसम्यग्दर्शनो यतिश्चेत् तस्य सर्वकर्मसंन्यासः ॥ गृही चेत् तेन लोकसंग्रहाय कर्म कर्तव्यमेव ॥ 'यावज्जीवमग्निहोत्रं जुहोती'त्यादिना तस्य यावज्जीवं कर्मकरणविधानात् ॥ न हि वसिष्ठागस्त्यात्रिप्रभृतयो, ज्ञानिनो वयमिति विहितं कर्मात्यजन् ॥ यतिस्तु शरीरयात्रानिर्वाहार्थेतरकर्माणि न कुर्यादेव ॥ न हि यतिः लोकसंग्रहाय कर्म कुर्यादिति युज्यते ॥ विहितसर्ववैदिककर्मसंन्यासी हि यतिर्भवति ॥ अतोऽत्र ज्ञानी वैदिकं सर्वं कर्म संन्यस्य शारीरं केवलं कर्म कुर्यात् इत्युक्तिः ज्ञानियतिविषया ॥ ज्ञानी लोकसंग्रहार्थं वैदिकं कर्म कुर्यात् इत्युक्तिः ज्ञानिगृहस्थादिविषया ॥ एवमन्यत्रापीयमेव व्यवस्था ऊह्या ॥ २१ ॥

अर्जुनः ॥ अत्यक्तपरिग्रहो गृही यावज्जीवं कर्म कुर्यात् अकुर्वन् किल्बिषमाप्नोतीत्युक्तं ॥ कुटुंबभरणव्यग्रस्य तस्य कथं वित्तव्ययाऽऽयाससाध्यानामग्निहोत्रादीनां अनुष्ठानं घटते ॥ वद ॥

कृष्णः ॥ अप्रार्थितोपनतलाभेन संतुष्टः 'ऋतामृताभ्यां जीवे'दिति विधानात् ॥ 'ऋतमुंछशिलं प्रोक्तं अमृतं स्यादयाचितं' ॥ इत्युक्ताभ्यां ऋतामृताभ्यां जीवन् ॥ यदृच्छालाभेन वैदिककर्माणि कथं सम्यक् सिध्येयुरिति चेत् सिद्धौ असिद्धौ च समः ॥ यदृच्छालाभेन वैदिकस्य कर्मणः सम्यक् सिद्धौ सम्यगसिद्धौ च निर्विकारः ॥ न्यायाऽऽगतधनेन यावत् सिध्यति तावतैव तृप्तः ॥ एतादृशो गृही कृत्वाऽपि तत्फलेन स्वर्गादिना न निबध्यते ॥ यत्किंचिदंगवैकल्येऽपि प्रत्यवायेन न निबध्यते ॥ स्मरन्ति हि ॥ 'न्यायाऽऽगतधनस्तत्वज्ञाननिष्ठोऽतिथि-

प्रियः ॥ श्रा[illegible]दादी च गृहस्थोऽपि विमुच्यते ॥ इति ॥ अतो गृहस्थेन ज्ञानिनाऽपि कर्म कर्तव्यमेव ॥ किमुताज्ञानिना ॥ अतस्त्वया कर्म कर्तव्यमेव ॥ २२ ॥

वि ॥ अर्जुनः ॥ कर्मणो ज्ञानाकारता उक्ता ॥ विवृता च सा ॥ यद्येवं कर्म ज्ञानाकारं तर्हि कर्मणैव ज्ञाननिष्ठाव्यवधानमन्तरेण आत्मावलोकनादिसिद्ध्या भाव्यं ॥ किं कर्मणा आत्मावलोकनादि सिद्ध्यति ॥ वद ॥

कृष्णः ॥ फलेच्छारहितः आत्मा मनः चित्तं चिन्तायुक्तं मनः निगृहीतचित्तमनाः विषयान्तरचिन्तारहितमना इति यावत् ॥ अध्यवसाययुक्तं मनः बुद्धिः ॥ अभिमानयुक्तं मनः अहंकारः ॥ चिन्तायुक्तं मनः चित्तं ॥ १ इति विवेकः ॥ परिग्रहः स्वीयत्वाभिमानः सर्वेषु आत्मव्यतिरिक्तेषु प्रकृतिप्राकृतवस्तुषु स्वीयत्वाभिमानरूपममतारहितः एतादृशः कर्मयोगी शारीरं कर्म केवलं कुर्वन् न किल्बिषं प्राप्नोति ॥ शरीरसंबंधि शारीरं शरीरपातपर्यन्तं यावज्जीवमिति यावत्॥ शरीरव्यापारमात्रसहितं बुद्धिव्यापारभूतफलसंगादिरहितमिति वा॥ मनोव्यापारसापेक्षज्ञानयोगसाधनप्रयत्नरहितं इति वा ॥ कर्मैव कुर्वन् ॥ नतु ज्ञानयोगं ॥ किल्बिषं तन्मूलकं संसारं नाऽऽप्नोति ॥ यथावदनुष्ठितेन कर्मयोगेनैव विनैव ज्ञानयोगनिष्ठाव्यवधानं मोक्षसाधनमात्मावलोकनं सिद्ध्यति ॥ अतो यथावदनुष्ठितं कर्म ज्ञानाकारमेव ॥ २१ ॥

अर्जुनः ॥ कर्मणैवाऽऽत्मावलोकनसिद्धिं लभते इत्युक्तं ॥ तत्कथं ॥ शारीरमित्युक्त्या शरीररक्षणार्थं द्रव्याऽऽर्जनादिप्रवृत्तिः स्यात् ॥ तत्र चार्जनीयाः शस्त्रपातशीतोष्णमृदुपरुषस्पर्शाः स्युः ॥ प्रवृत्तिविघातिषु क्रोधश्च स्यात् ॥ अलाभे संतापो लाभे हर्षश्च स्यातां ॥ अतः कर्मयोग एव आत्मदर्शनविरोधिनां सर्ववैरिणां उत्थापकः ॥ सति चैवं कर्मयोगेनैव आत्मावलोकनसिद्ध्युक्तिः कथं संगच्छते ॥ ब्रूहि ॥

कृष्णः ॥ यदृच्छोपनतलाभेनैव शरीरधारणसंभवात् अधिकद्रव्यार्जनादावप्रवृत्तः साधनानुष्ठानदशायां २ 'मात्रास्पर्शास्तु' ३ 'यं हि न व्यथयन्त्येते'

---

१. स्पष्टमिदं श्रीभाष्ये ॥ २—४—५. २. २. १४. ३. २. १५.

इत्यत्रोक्तरीत्या शीतोष्णमृदुपरुषस्पर्शादिसहनशीलः प्रवृत्तिविघातेऽपि अनिष्टोपनिपातहेतुना मदीयेन कर्मणा एवमभूदिति निरूपणेन प्रवृत्तिविघातिष्वपि परेषु मत्सररहितः ॥ न हि आतपेन स्वप्रवृत्तिविघातके रवौ क्रोध उत्पद्यते ॥ किंतु छत्रादिभिरातपनिवारणमात्रं क्रियते ॥ तथा परेषु मात्सर्यमुत्सृज्य स्वकार्यमात्रसाधनपरः ॥ १ सुखदुःखे समे कृत्वा' २ 'असत्यासन्यो[1]स्समो भूत्वा' इत्याद्युक्तरीत्या युद्धादिकर्मसु सुखलाभजयादिप्राप्तावप्राप्तौ च हर्षशोकरहितत्वेन समः एतादृशस्सन् यः कर्म करोति सः कृत्वाऽपि न निबध्यते॥ कर्मणाऽपि मुच्यते। अपिशब्दात् कर्मयोगानुष्ठानपूर्वकस्वतंत्रज्ञानयोगेनापि मुच्यते॥ ज्ञाननिष्ठाफलस्य आत्मावलोकनस्य ज्ञानयोगनिष्ठाव्यवधानमन्तरेण आत्मयाथात्म्यज्ञानगर्भेण यथावदनुष्ठितेन निवृत्तिकर्मणैव सिद्धिसंभवात् ज्ञानयोगाधिकारिणोऽपि ज्ञानयोगात्कर्मयोगो वरं ॥ उक्तं हि मया॥ ३ 'कर्म ज्यायो ह्यकर्मणः ॥' इति॥ ४ श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्' ॥ इति च ॥ अतो यथावदनुष्ठितं कर्म ज्ञानसाध्यफलसाधकत्वात् ज्ञानाकारमेव ॥ इति पूर्वोक्तायाः कर्मणो ज्ञानाकारतायाः प्रपंचनमिह कृतं वेदितव्यम् ॥ २२ ॥

द्वै ॥ अ ॥ वि ॥ अर्जुनः ॥ मुमुक्षुभिः अकाम्यमेव कर्म कार्यं ॥ काम्यं कर्म तु सर्वथा त्याज्यं ॥ इति ५ 'कर्मण्येवाधिकारस्ते' इत्यादिभिरसकृदुक्तं ॥ काम्यकर्मणां सर्वथा वर्जने शरीरयात्रानिर्वाहो न स्यात् ॥ शरीररक्षणरूपफलकामनया क्रियमाणत्वेन काम्यरूपैः कर्मभिरेव शरीररक्षणस्य करणीयत्वात् ॥ काम्यकर्मभिः शरीररक्षणाकरणे कथं निवृत्तिकर्मकरणं ॥ अतः कथमिदं ॥ वद ॥

कृष्णः ॥ शरीरयात्रानिर्वाहमात्राय काम्यान्यपि कर्माणि कुर्यात् ॥ निवृत्तिकर्मद्वारा ज्ञानसंपादनाय शरीररक्षणस्याऽवश्यकत्वात् ॥ ६ 'कृपणाः फलहेतवः' ॥ इत्यादौ निषिद्धस्य काम्यकर्मणः करणे तज्जन्यं पापं स्यादिति चेत् निराशीः यतचित्ताऽऽत्मा त्यक्तसर्वपरिग्रहः शरीरयात्रानिर्वाहमात्रफलकं कामसंकल्पादिरहितं काम्यं कर्म कुर्वन्नपि किल्बिषं नाऽऽप्नोति ॥ २१ ॥

---

१. २. ३८. २. २. ४८. ३. ३. ८. ४. ३. ३५. ५. २. ४७. ६. १, ४९.

अर्जुनः ॥ शरीररक्षणार्थं काम्यकर्मकरणाभ्यनुज्ञाने यथेच्छमशनवसनादिसंपादने प्रवर्तेत ॥ तथापि प्रवर्तनमभ्यनुज्ञायते वा ॥ वद ॥

कृष्णः ॥ अप्रयत्नोपनतलाभमात्रेण संतुष्टः यथेच्छमप्रवर्तमानः द्वंद्वातीतः विमत्सरः यदृच्छालाभस्य प्राप्तावप्राप्तौ च समः सन् यः शरीररक्षणार्थं काम्यं कर्म करोति सः तत् कृत्वाऽपि तेन न निबध्यते ॥ अतः शरीररक्षणार्थं काम्यं कर्म कुर्वन् शरीरनिर्वर्त्यं केवलं अकाम्यं कर्म कुर्वन् ज्ञानद्वारा मुच्यते ॥ अतस्तादृशं कर्म कर्तव्यं ॥ २२

अर्जुनः ॥ "कर्मण्यकर्मे"त्यादिनोक्तं पिंडीकृत्य ब्रूहि ॥

कृष्णः ॥ गतसंगस्य मुक्तस्य ज्ञानावस्थितचेतसः ॥
यज्ञायाऽऽचरतः कर्म समग्रं प्रविलीयते ॥ २३ ॥

गतेति ॥ गतः संगः यस्मात् सः गतसंगः तस्य गतसंगस्य मुक्तस्य मुक्ताभिमानस्य ज्ञाने अवस्थितं चेतः मनः यस्य सः ज्ञानावस्थितचेताः तस्य ज्ञानावस्थितचेतसः यज्ञः विष्णुः तदाराधनं वा तस्मै आचरतः कर्म कुर्वतः पुंसः कर्म समग्रं यथातथा प्रविलीयते नश्यति ॥ २३ ॥

संगशब्दितफलाऽऽसक्तिरहितः देहादावहंममेत्यभिमानान्मुक्तः महताऽपि प्रयत्नेन ज्ञानं संपादनीयमिति ब्रह्मज्ञान एव अभिनिविष्टचित्तः भगवत्स्वातंत्र्यादिज्ञानविषये अचंचलचित्त इति वा सन् यः यज्ञशब्दितभगवत्प्रीत्यर्थमेव कर्म करोति तस्य सकलं तत्कर्म प्रविलीयते अविद्यमानवद्भवति ॥ बन्धकं न भवतीत्ते यावत् ॥ एवं कर्म कुर्वाणस्य ज्ञानप्रतिबन्धकं प्राचीनं पापकर्म निश्शेषं नश्यतीति वा ॥ 'गतसंगस्ये'त्यनेन 'कामसंकल्पवर्जिताः' 'त्यक्त्वा कर्मफलाऽऽसंगं' इत्यादिनोक्तं, 'मुक्तस्ये'त्यनेन 'त्यक्तसर्वपरिग्रह' इत्येतत्, 'ज्ञानावस्थितचेतस' इत्यनेन 'कर्मण्यकर्म यः पश्येत्' 'नित्यतृप्तः' इत्यादिनोक्तं, 'समग्रं प्रविलीयते' इत्यनेन 'नैव किंचित्करोति सः' ॥ 'कुर्वन्नाऽऽप्नोतिकिल्बिषं' ॥

'कृत्वाऽपि न निबध्यते' इत्युक्तं च पिंडीकृत्य प्रदर्शितं ॥ सम्यगवधाय विधाय च धैर्यं कर्तव्यं कर्म यथावदनुतिष्ठ ॥ २३ ॥

अ ॥ अर्जुनः ॥ शरीरयात्रानिर्वाहमात्रार्थानि कर्माणि कुर्वन् किल्बिषं न प्राप्नोति ॥ तैर्न बध्यते इति विदुषाक्रियमाणस्य शरीरयात्रामात्रार्थस्य कर्मणोऽबन्धकत्वमुक्तं ॥ अस्तुनाम तत्तथा ॥ यस्तु लोकसंग्रहार्थं कर्म करोति प्रारब्ध कर्मशेषेण तस्य तत्कर्म कथमबन्धकं स्यात् ॥ प्रारब्धकर्मशेषेणानुष्ठानात् स्वपरभेदबुद्धया परान् प्रकल्प्य तत्संग्रहोद्देशेनानुष्ठानाच्च ॥ वद ॥

कृष्णः ॥ 'त्यक्त्वा कर्मफलाऽऽसंगं'मित्युक्तमत्र प्रपंच्यते ॥ प्रारब्धकर्मशेषेण वा लोकसंग्रहोद्देशेन वा यावज्जीवं कर्मकरणनिर्बन्धेन वा क्रियमाणमपि कर्म न बन्धकं भवति ॥ किंतु सबासनं सहफलं च स्वयं नश्यति ॥ १ ब्रह्मैवाहमित्यात्मैकत्वज्ञान एव निश्चलतया स्थितमनसः अतएव मुक्तस्य अहंममाभिनिवेशरागद्वेषादिभिर्मुक्तस्य अतएव गतसंगस्य फलसंगरहितस्य संगः कामः तद्रहितस्य निष्कामस्य वा ॥ एतादृशश्चेत् किमर्थं कर्म करोति इति चेत् यज्ञः कर्म तस्मै स्वानुष्ठानेन इतरैः तत्तद्विहितकर्म २निर्वर्तनाय ॥ उक्तं हि मया॥ ३ 'यद्यदाचरति श्रेष्ठः तत्तदेवेतरो जनः' ॥ इति ॥ कर्म कुर्वतः ज्ञानिनः यत्कर्म तत् समग्रं अग्रेण फलेन सहितं अग्रेण वासनया सहितं वा प्र निरवशेषं विलीयते नश्यति ॥ एवं क्रियमाणं कर्म गतसंगत्वादिवैशिष्ट्यमहिम्ना अबन्धकमेव भवति ॥ विद्यमानमेव फलाऽनाधायकत्वात् बन्धकं न भवतीति न मन्तव्यं॥ किंतु सफलं सवासनं च ४ नश्यत्येव ॥ अतः लोकसंग्रहार्थं विहितं वैदिकं कर्म ज्ञानिभिरपि कर्मसंन्यासानधिकारिभिर्निर्विशंकं करणीयमिति स्थितम् ॥ २३ ॥

१. आरुरुक्षुपक्षे ज्ञानसंपादनैकनिरतस्य ॥ २. आरुरुक्षुपक्षे यज्ञशब्दितभगवत्प्रीत्यर्थं ॥ यजन्तीति यज्ञाः कर्मभिर्देवानाराधयन्तः तेभ्यः जातावेकवचनं ॥ कर्मयोगिभ्यः कर्माणि प्रदर्शयितुं ॥ ३. ३. २१. ४. न नश्यति ॥ किंतु विद्यमानमेव बन्धकं न भवति ॥ तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्यां इति विदुषो धनस्येव कर्मणामप्यन्यत्र गमनश्रवणात् ॥ इति केचित् ॥

वि ॥ अर्जुनः ॥ 'त्यक्त्वा कर्मफलासंगं' 'त्यक्तसर्वपरिग्रहः' 'यतचित्तात्मा' इत्यादिभिः प्रयत्नात्फलसंगादिनिवर्तननियम उक्तः ॥ तथा तन्निवर्तनेऽपि यज्ञादिकर्मनिर्वृत्त्यर्थं धनार्जनादौ प्रवर्तमानस्य फलसंगादिकं पुनरुन्मिषेदेव ॥ तत्साहित्येन क्रियमाणं कर्म बन्धकं स्यादेव ॥ तत्प्रतिबन्धात् ज्ञानादिविरोधिकुकर्मनिवृत्तिरपि न स्यादेव ॥ अतः कथमिदं ॥ ब्रूहि ॥

कृष्णः ॥ संगत्यागादिभिमर्नः आत्मज्ञान एवावस्थितं भवति ॥ नपुनरवस्थापयितव्यं ॥ अतः संगोऽपि निरतिशयभोग्यस्याऽऽत्मनोऽनुसन्धानात् सह वासनया स्वयमेव गतः ॥ नपुनस्तत्त्यागे प्रयतितव्यं ॥ अतः सर्वोऽपि परिग्रह एनं त्यजति ॥ तेनायं विमुक्तः ॥ न तु स्वयं स त्याज्यः ॥ पूर्वानुष्ठितकर्मजनितान्तःकरणशुद्ध्या यज्ञादिकर्मनिर्वर्तनाय द्रव्यार्जनादिकं कुर्वतोपि न पुनः फलसंगादेरुन्मेषः ॥ किंतु पूर्वकृतनियमसिद्धस्वारसिकफलसंगत्यागादिमहिम्ना बन्धहेतुभूतं ज्ञानादिप्रतिबन्धकं प्राचीनं सफलमपि कर्म निश्शेषं नश्यति ॥ अतो महता यत्नेन फलसंगादिकं निरस्य उक्तरूपः कर्मयोगोऽनुष्ठेय इति स्थितं ॥ २३ ॥

अर्जुनः ॥ 'कर्मण्यकर्म यः पश्ये'दित्यादिना निवृत्तिकर्मानुष्ठानप्रकारोऽभिहितः ॥ प्रकारेणानेन यथावदनुष्ठानमशक्यं ॥ अत उक्तेष्वंगेषु कस्यापि शैथिल्येन प्रत्यवायो जायेतैव ॥ ततश्च अनुष्ठितेन कर्मणा ज्ञानद्वारा ब्रह्मप्राप्तिर्न स्यादेव ॥ का मे गतिः ॥ किं कर्तव्यं वद ॥

कृष्णः ॥ ब्रह्मार्पणं ब्रह्म हविः ब्रह्माग्नौ ब्रह्मणा हुतं ॥
ब्रह्मैव तेन गंतव्यं ब्रह्म कर्म समाधिना ॥ २४ ॥

ब्रह्मेति ॥ अर्प्यते अनेनेत्यर्पणं पात्रं ब्रह्म [1] ब्रह्माधीनं [2] ब्रह्माभिन्नं [3] ब्रह्मकार्यं हविः ब्रह्म ब्रह्मैव अग्निः ब्रह्माग्निः तस्मिन् ब्रह्माग्नौ ब्रह्मणा हुतं इति ब्रह्म इति कर्मणि समाधिः ज्ञानं यस्य सः ब्रह्मकर्मसमाधिः तेन ब्रह्मकर्मसमाधिना पुंसा ब्रह्मैव गन्तव्यं प्राप्यं ॥ तेन गन्तव्यं प्राप्यं फलं च ब्रह्मैव इति वा ॥ २४ ॥

१. द्वै ॥ २. अ ॥ ३. वि ॥

१कर्मानुष्ठानकाले कर्मांगानां अंगिनः कर्मणश्च कर्मकर्तुश्च ब्रह्मत्वानुसंधाने विगुणमपि कर्म सगुणं भवति ॥ ततश्च तेन कर्मणा ब्रह्मप्राप्तिरूपमोक्षो भवेदेव ॥ अतः सर्वस्य ब्रह्मत्वानुसंधानेन क्रियमाणस्य कर्मणो विशोधनं कार्यं सद्गुण्याय ॥ कथं ब्रह्मत्वानुसंधानमिति चेत् ॥ ब्रह्मार्पणमित्यादि समस्तं व्यस्तं वा ॥ अर्प्यते अनेनेत्यर्पणं स्रुक्स्रुवादिकं दर्वीपिठरादिकं वा ॥ भगवति क्रियमाणं समर्पणं वा ॥ ब्रह्म च तत् अर्पणं च ब्रह्मार्पणमिति वा अर्पणं ब्रह्म इति वा ब्रह्मत्वानुसंधानं ॥ तथा ब्रह्म च तत् हविश्च इति वा हविः ब्रह्म इति वा ॥ ब्रह्म चासौ अग्निश्च ब्रह्माग्निः तस्मिन् हुतं होमः स च ब्रह्मणा ब्रह्म ॥ विभक्तिव्यत्ययः ॥ अभेदप्रायपाठात् ॥ ब्रह्मणा ब्रह्माभिन्नेन यजमानेन हुतं होमः क्रियते इति वा ॥ तथा समाधिशब्दितध्यानयोगेन सह २ब्रह्म च तत् कर्म च इति वा ३कर्म ब्रह्म इति वा ॥ एवं योऽभिजानाति तेन कर्मकर्त्रा ब्रह्म गंतव्यमेव ॥ ब्रह्मैव गंतव्यं नान्यत् ॥ तेनैव ब्रह्म गंतव्यं ॥ विगुणमपि कर्म उक्तरूपब्रह्मत्वानुसंधानौषधेन विशोधितं सांगं सगुणं ४समग्रं सत् ज्ञानद्वारा मोक्षं प्रापयेदेव ॥ अतो मा भैषीः ॥ वर्तते चायमुपायः सुकरः ॥ अतस्त्वमेवं ब्रह्मत्वमनुसंदधानः कर्म कुरु ॥ चेतनाचेतनात्मकस्य सर्वस्य वस्तुनः भगवतो भिन्नत्वात् कथं सर्वस्य ब्रह्मत्वानुसंधानं युज्यत इति चेत् 'यदधीना यस्य सत्ता तत्तदित्येव भण्यते' ॥ इति, 'त्वदधीनं यतः सर्वं अतः सर्वो मतो भवान्' ॥ इति, 'त्वदधीनं यतः सर्वं अतः सर्वं भवानिति ॥ वदंति मुनयस्सर्वं न तु सर्वस्वरूपतः' ॥ इति चोक्तरीत्या सर्वस्य ब्रह्माधीनत्वानुसंधानमेव ब्रह्मत्वानुसंधानं ॥ अतो युज्यते ॥ वक्ष्यते च ॥ सर्वस्य ब्रह्मत्वं ॥ ५'अहं क्रतुरहं यज्ञः स्वधाऽहमहमौषधं ॥ मन्त्रोऽहमहमेवाज्यं अहमग्निरहं हुत'मिति ॥ ब्रह्मणा हुतमिति भेदनिर्देशसाहचर्यात् ब्रह्मार्पणमित्यादावपि भेद एव विवक्षितः ॥ ब्रह्मणः अर्पणं ब्रह्मणि वा अर्पणं ब्रह्मणो हविः ब्रह्मणोऽग्नौ ब्रह्माधीनेन यजमानेन कर्त्रा हुतं होमः क्रियते समाधिना

१. ब्रह्मकर्मसमाधिना इत्येकं पदं ॥ २. ब्रह्म कर्मसमाधिना इति द्वे पदे ॥ ३. ब्रह्म कर्म समाधिना इति त्रीणि पदानि ॥ किं बहुना ॥ यत्तस्य शयनाऽऽसनादिकं कर्म तदपि ब्रह्मैव ॥ ४. अतः श्राद्धादिषु साग्दुण्याय अयं श्लोकः पठ्यते ॥ ५. ९. १६.

सह १ ब्रह्मणः कर्म इति सर्वं स्वस्वामिभावसंबंधेन योऽभिजाति तेन ब्रह्म गतव्य-मेवेत्यादि ॥ इति वा ॥ समाधिना मनःसमाधानेन य एवं जानाति ॥ इति वा ॥ २४ ॥

अ ॥ अर्जुनः ॥ प्रारब्धकर्मशेषवता लोकसंग्रहार्थं क्रियमाणं कर्म अबंधकत्वादकर्मैव भवतीति 'समग्रं प्रविलीयते' इत्यनेनोक्तं ॥ क्रियमाणस्य विद्यमानस्य कर्मणः कथमकर्मत्वं वक्तुं शक्यं ॥ ब्रूहि ॥

कृष्णः ॥ सम्यग्दर्शनवता ब्रह्मविदा आरूढेन लोकसंग्रहार्थं क्रियमाणं कर्म अकर्मैव भवति ॥ अतस्तेन ब्रह्मैव गंतव्यं ननु बंधकेन तेन कर्मणा फलांतरं ॥ कर्मणोऽकर्मत्वं केन कारणेनेति चेत् सर्वं कर्म शब्दसमर्पितदेवताविशेषसंप्रदानादिकारकबुद्धिमत् कर्त्राभिमानफलाभिसंधिमच्च दृष्टं ॥ केनचित्कर्त्रा केनचित्करणेन कस्मिंश्चिदधिकरणे कस्यैचन देवतायै केनचिन्मंत्रेण किंचित्फलमुद्दिश्य किमपि कर्म अहंकरोमीत्यभिमानेन फलापेक्षया च क्रियते ॥ तत्किल कर्मेत्युच्यते ॥ ब्रह्मवेदा सम्यग्दर्शनवता क्रियमाणं कर्म तु क्रियाकारकादिरहितं कर्त्रभिमानफलाभिसंधिरहितं च ॥ तेषां सर्वत्र ब्रह्मबुद्ध्या उपमर्दात् ॥ यथा शुक्तिज्ञानवान् यत् रजतं तत् शुक्तिरेवेति पश्यति तथा ब्रह्मज्ञानवान् यत् अर्पणादि तत्सर्वं ब्रह्मैवेति पश्यति ॥ तत्र शुक्तिज्ञानेन रजतज्ञानस्य बाधात्यथा रजतस्याभावः फलितः ॥ तथाऽत्र ब्रह्मज्ञानेन कल्पितप्रपंचज्ञानस्य बाधात् अर्पणादीनामभावः फलितः ॥ कारकादिरहितं कर्म लोकदृष्ट्या कर्मतया भासमानमपि विद्वद्दृष्ट्या अकर्मैव भवति ॥ अत उक्तं 'समग्रं प्रविलीयते' इति ॥ अर्प्यते अनेनेति अर्पणं स्रुक्स्रुवादि दर्वीपिठरादि मंत्रादि च ॥ अर्प्यते अस्मै इति अर्पणं देवतादि ॥ अर्प्यते अस्मिन्निति अर्पणं देशकालादि तत्सर्वं ब्रह्मैव ॥ हविः चरुपुरोडाशपयोदध्याज्यादिकं ब्रह्मैव ॥ ब्रह्मरूपे अग्नौ ब्रह्मरूपेण कर्त्रा हुतं होमाख्या क्रिया या सा ब्रह्मैव ॥ हुतं तर्पितं देवब्राह्मणादि ब्रह्मैव ॥ अग्निरपि ब्रह्मैव ॥ कर्ताऽपि ब्रह्मैव ॥ क्रियाऽपि ब्रह्मैव तेन तर्पितं देवब्राह्मणादिकमपि ब्रह्मैव ॥ तेन गंतव्यं प्राप्तव्यं फलं यत् तदपि ब्रह्मैव ॥ 'ब्रह्मैव तेन गंतव्य'मित्यस्याऽऽवृत्तिः ॥ ब्रह्मैवेत्युभयत्र संबध्यते ॥ एवकारः सर्वत्र संबध्यते ॥ अर्पणशब्देन फलाविवक्षायामिदं ॥ तेन फलविवक्षायां तु नाऽऽवृत्त्यपेक्षा ॥ 'ब्रह्म-

---

१. द्वे पदे ॥

कर्मसमाधिना' इत्यस्य एकपदत्वे, हुतं यत् तत् ब्रह्मैवेति बोधनाय ब्रह्मैवेत्यस्य केवलमावृत्तिः ॥ 'ब्रह्मकर्मसमाधिना' इत्यस्य द्विपदत्वे साऽपि न ॥ हुतं ब्रह्मैव तेन गंतव्यं ब्रह्म कर्मसमाधिना इत्येव पूर्तेः ॥ आद्ये ब्रह्मैव कर्म ब्रह्मकर्म तस्मिन् समाधिः सम्यग्ज्ञानं यस्य तेन ब्रह्मणः कर्म कार्यं ब्रह्मविषयं कार्यं सर्वस्य ब्रह्मत्वानुसंधानरूपं तस्मिन् समाधिः चित्तस्य स्थापनं यस्य वा तेन ॥ द्वितीये कर्मणि उक्तरीत्या समाधिः ब्रह्मज्ञानं यस्य तेन तेन कर्मकर्त्रा गंतव्यं ब्रह्मैव ॥ उक्तरीत्या सर्वस्य ब्रह्मत्वानुसंधानाद्ब्रह्मविदः कर्म १ अकर्मैव भवति ॥ इदमेवोक्तं ॥ 'कर्मण्यकर्म यः पश्येत्' 'कर्मण्यभिप्रवृत्तोऽपि नैव किंचित्करोति सः' ॥ २ 'गुणा गुणेषु वर्तंते इति मत्वा न सज्जते' ॥ इति ॥ वक्ष्यते च ॥ ३ 'नैव किंचित्करोमीति युक्तो मन्येत तत्ववि'दित्यादि ॥ ब्रह्माग्नौ ब्रह्मणा हुतमित्यत्र कथं ब्रह्मत्वविधिरिति चेत् ब्रह्म अग्नौ इति द्वे पदे ॥ यस्मिन्नग्नौ हुतं होमः क्रियते सोऽग्निर्ब्रह्मैव ॥ हुतं यत्तद्ब्रह्मणैव ॥ येन हुतं स यजमानोऽध्वर्युश्च ब्रह्मैवेति यावत् ॥ इति ब्रह्मत्वविधिः ॥ एवं लोकसंग्रहार्थं कर्म कुर्वता ब्रह्मविदाऽपि ब्रह्मैव गंतव्यं ॥ किंपुनः प्रारब्धकर्मशेषरहितेन अतएव निवृत्तसर्वकर्मणा कर्मसंन्यासिना ब्रह्मविदा ब्रह्मैव गंतव्यमिति ॥ आद्यस्य कर्मसद्भावात् तेन कर्मयज्ञेन भगवानाराध्यते ॥ द्वितीयस्य तदभावात् केन यज्ञेन भगवानाराध्यते इति चेत् ज्ञानमेव तस्य यज्ञः तेन भगवानाराध्यते ॥ श्रेयान् हि ज्ञानयज्ञः सर्वेभ्यः कर्मयज्ञेभ्यः ॥ वक्ष्यते च॥ ४'श्रेयान् द्रव्यमयाद्यज्ञात् ज्ञानयज्ञः परंतप' ॥ इति ॥ ज्ञानस्य यज्ञत्वे तत्र अधियज्ञे प्रसिद्धानि अर्पणादीनि वाच्यानि इति चेत् परमार्थदर्शिनो ज्ञानरूपे यज्ञे ब्रह्मैव अधियज्ञे प्रसिद्धं अर्पणादिकं सर्वं संपद्यते ॥ केनात्र ज्ञानस्य यज्ञत्वं विवक्षितं ज्ञायते इति चेत् अर्पणादीनां विशिष्य ब्रह्मत्वाभिधानेन ॥ अन्यथा सर्वस्यब्रह्मत्वादर्पणादीनां विशिष्य ब्रह्मत्वाभिधानमनर्थकं स्यात् ॥ तदेवं कर्म कुर्वतः त्यक्तकर्मणश्च ब्रह्मविदः ब्रह्मप्राप्तिरप्रतिहता ॥ आद्य य कर्म सदपि अकर्मतामापद्यते ॥ द्वितीयस्य तु कर्मैव नास्ति ॥ किंतु ज्ञानमेव यज्ञः संपद्यते ॥ अहो महिमा सम्यग्दर्शनवतो ब्रह्मविदः ॥

१. यस्मात् समाधिजेनात्मसाक्षात्कारेण अर्पणादिकं फलं कर्म च इत्येतत् सर्वं ब्रह्म तस्मात् स्तय कर्म प्रविलीयते इति पूर्वेणान्वयः ॥ इति केचित् ॥ २. ३. २८. ३. ५. ८. ४. ४. ३३.

आरुरुक्षुपक्षे, एवं १ 'कर्मणि ब्रह्मत्वानुसंधानपूर्वकं कर्म कुर्वता ब्रह्मैव गंतव्यं ॥ अतएवमनुसंदधता कर्म कर्तव्यं ॥ एवमनुसंधाने विगुणमपि कर्म सगुणं समग्रमेव भवति ॥ तच्च कर्म अबन्धकत्वादकर्मैव ॥ इदमेवोक्तं ॥ 'नैव किंचित्करोति सः' ॥ 'समग्रं प्रविलीयते' ॥ इत्यादि ॥ अतस्त्वमेवमनुसंदधानः कर्म कुरु ॥ २४ ॥

वि ॥ अर्जुनः ॥ 'कर्मण्यकर्मे'त्यादिना प्रकृतिवियुक्तशुद्धात्मस्वरूपानुसंधानयुक्ततया कर्मणो ज्ञानाकारत्वमुक्तं ॥ तेन च कर्मणा ज्ञाननिष्ठाव्यवधानमंतरा साक्षादात्मावलोकनसिद्धिश्चोक्ता ॥ 'कामसंकल्पवर्जिता' इत्यादिभिरुक्तांगकलापे कस्यापि लोपे ज्ञानाकारता न संपद्येत ॥ ततश्च तेन साक्षादात्मावलोकनसिद्धिश्च न जायेत ॥ का गतिः ॥ वद ॥

कृष्णः ॥ कर्मणः तत्परिकरस्य च परब्रह्मशब्दितपरमपुरुषात्मकत्वानुसंधाने तन्महिम्ना विगुणमपि सगुणं ज्ञानाकारमेव भवति ॥ ततश्च तेन साक्षादात्मावलोकनसिद्धिरपि संपद्यते ॥ कथं ब्रह्मत्वानुसंधानमिति चेत् ब्रह्मात्मकत्वाद्ब्रह्मेत्युच्यते ॥ ब्रह्मात्मकत्वं नाम ब्रह्मांतर्यामिकत्वं ब्रह्मशरीरत्वमिति यावत् ॥ ब्रह्मस्वरूपत्वं ब्रह्मणः कारणत्वात् कार्यकारणयोरभेदोपचारात् ॥ ब्रह्मकार्यत्वमिति यावत् ॥ इति वा ॥ 'ब्रह्मार्पण'मित्येकं पदं ॥ बहुव्रीहिसमासः ॥ ब्रह्मकार्यत्वात् ब्रह्मात्मकं अर्पणं अर्पणसाधनं स्रुक्स्रुवादिकं यस्य तादृशं हविः आज्यादिकं ब्रह्मैव ब्रह्मात्मकमेव सत् ब्रह्मात्मके अग्नौ ब्रह्मात्मकेन यजमानेन हुतं भवति ॥ ब्रह्म अर्पणं इति भेदे वाक्यभेदः स्यात् ॥ अतः एकपदत्वेन हविषो विशेषणं कृतं ॥ इति ब्रह्मकर्मसमाधिना ब्रह्म इति कर्म यः समाधत्ते अनुसंधत्ते इति वा ब्रह्मात्मके कर्मणि समाधिः अनुसंधानं यस्य इति वा ब्रह्मकर्मसमाधिः तेन कर्मकर्त्रा प्राप्तव्यं ब्रह्मैव ॥ नतु ज्ञानं ज्ञाननिष्ठाव्यवधानमंतरा साक्षादात्मावलोकनं सिद्ध्यतीति यावत् ॥ यत्किंचिदंगवैकल्येऽपि उक्तरूपब्रह्मत्वानुसंधानात्साङ्गमेव सत् कर्म साक्षादात्मावलोकसाधनं भवतीति स्थितं ॥ २४ ॥

१. ब्रह्मात्मके कर्मणि समाधिः यस्य तेन ॥ ब्रह्मण्यर्पितं कर्म ब्रह्मकर्म तस्मिन् समाधिर्यस्य तेन ॥ समाधिः चित्तैकाग्र्यम् ॥

अर्जुन ॥ १ 'कर्मण्येवाधिकारस्ते' इत्यादिना एतावता प्रबंधेन कर्मयोगोऽभिहितः ॥ तत्र सर्वेषामेकमेव कर्म उत तत्र अवांतरभेदाः संति ॥ आद्ये न सर्वेषामेकमेव कर्म संभवति ॥ वर्णाश्रमभेदेन कर्मभेदावश्यंभावात् ॥ देशकालव्यक्तिभेदमूलकादसांकर्याच्च ॥ द्वितीये के ते भेदाः ॥ कति ॥ ब्रूहि ॥

कृष्णः ॥ दैवमेवापरे यज्ञं योगिनः पर्युपासते ॥
ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति ॥ २५ ॥

दैवमिति ॥ अपरे योगाः एषामस्तीति योगिनः दैवमेव यज्ञं पर्युपासते ॥ अपरे ब्रह्मैव अग्निः ब्रह्माग्निः तस्मिन् ब्रह्माग्नौ यज्ञं यज्ञेनैव उपजुह्वति ॥ २५ ॥

कर्मयोगभेदान् ब्रवीमि ॥ शृणु ॥ ज्ञानयोगिनां यतीनां भगवदुपासनमेव यज्ञः अपरे ज्ञानयोगिनो यतयः दैवशब्दितं भगवंतमेव यज्ञं यथातथा उपासते ॥ उपासनमेव यज्ञः ॥ भगवंतं यज्ञं उपासते ॥ यज्ञतयोपासते ॥ २'यज्ञो वै विष्णुः'इति श्रुतिः ॥ तथोपासनमेव यज्ञः ॥ कर्मयोगिनां वानप्रस्थगृहस्थानां अग्नौ अग्निहोत्रादिषु हविषः प्रक्षेपो यज्ञः ॥ अपरे कर्मयोगिनः वनस्थाः गृहस्थाश्च ॥ 'ब्रह्मार्पणं ब्रह्म हविः'इत्याद्युक्तरीत्या ब्रह्माधानेऽग्नौ यज्ञशब्दितभगवत्प्रेरणया अग्निहोत्रादिरूपं यज्ञमेव कुर्वंति ॥ कृतस्य कर्मणः ब्रह्मणि समर्पणं वा यज्ञः ॥ ब्रह्मण्येवाग्नौ यज्ञेन पंचमहायज्ञादिना कर्मणा यज्ञशब्दितं भगवंतं प्रति जुह्वति ॥ यथा दध्नाजुहोतीत्यत्र अग्नौ दध्नः समर्पणं होमः ॥ तथाऽत्र तृतीयांतयज्ञशब्दितपंचमहायज्ञादिकर्मणो भगवति समर्पणं होमः ॥ अत्र पूर्वार्धं ज्ञानयोगिविषयं ॥ उत्तरार्धं कर्मयोगिविषयं ॥ २'० ॥

अ ॥ पूर्वार्धं कर्मयोगिविषयं ॥ उत्तरार्धं तु ज्ञानयोगिविषयं ॥ अपरे कर्मयोगिनः देवानां इमं देवं इंद्रादिदेवतोद्देश्यकमेव ॥ इंद्रादिषु ब्रह्मबुद्धिरहितं यज्ञं दर्शपौर्णमासादिकं सम्यगुपासते ॥ न तु ज्ञानयज्ञं ॥ अपरे ज्ञानयोगिनः ब्रह्मण्येवाग्नौ यज्ञं पामरैरहंभोक्तेति विषयोपभोगैराराध्यमानत्वाद्यज्ञ आत्मा

१: २. ४७. २. तै. ब्रा. ३. १. ६. ५.

आत्मानं सोपाधिकं आहुतिरूपं यज्ञेन निरुपाधिक[1]परमात्मत्वेनैव उपजुह्वति ॥ जीवब्रह्माभेददर्शनमेव तेषां यज्ञः ॥ यथा आहुतेः प्रक्षेपे तदनंतरमाहुतिः स्वरूपेण न दृश्यते ॥ तथा ब्रह्मैवाहमिति ब्रह्माभेददर्शने आत्मा भेदेन न दृश्यते ॥ अयं ज्ञानयज्ञः ॥ यज्ञं यज्ञादिसर्वकर्माणि यज्ञेन 'ब्रह्मार्पणं ब्रह्म हविर्'रित्युक्तलक्षणेन ज्ञानयज्ञेन ब्रह्मण्येवाग्नौ उपजुह्वति ॥ प्रविलापयंति ॥ इति वा ॥ यज्ञं सोपाधिकं जीवं यज्ञेन 'यज्ञो वै विष्णु'रिति श्रवणात्सोपाधिकेनेश्वरेण सह ब्रह्मण्येवाग्नौ उपजुह्वति ॥ सोपाधिकौ जीवेश्वरौ तत्तदुपाधिमपोह्य उभयोरधिष्ठानभूतेन तुरीयेण निर्विशेषब्रह्मणा अभिन्नौ पश्यंति ॥ यथा तरंगबुद्बुदौ तन्नामरूपापोहेन तदाधारभूतसमुद्रेणाभिन्नौ पश्यंति तद्वत् ॥ नायं ज्ञानयज्ञः कर्मयज्ञादियज्ञेष्वन्यतमः ॥ तथापि 'श्रेयान् द्रव्यमयाद्यज्ञात् ज्ञानयज्ञः परंतपे'ति उत्कृष्टत्वेन स्तोतुं उत्कर्षावधिभूततत्साधनयज्ञमध्ये पठ्यते ॥ यथा कश्चित् ब्राह्मणः ब्रह्मवित्वेन स्तोतुं उत्कर्षावधिभूतेषु ब्राह्मणेषु ब्राह्मणत्वेन पठ्यते तद्वत् ॥ २९ ॥

वि ॥ पूर्वार्धमुत्तरार्धं चेत्युभयं कर्मयोगिविषयं ॥ अपरे कर्मयोगिनः केचित् देवतोद्देश्यकं देवार्चनरूपं यज्ञं सम्यगुपासते ॥ केचित् तत्तद्देवताविग्रहाराधनरूपं यज्ञमनुतिष्ठंति ॥ सर्वेषां यज्ञभेदानां देवतोद्देश्यकत्वेन देवसंबंधित्वाद्दैवत्वसत्वेपि विग्रहसपर्यारूपार्चनस्य विवक्षणादितरेभ्योऽस्यव्यावृत्तिः ॥ कर्मयोगिनां देवतार्चनं नित्यकर्मतया स्मर्यते ॥ तथाच मनुः ॥ 'देवताभ्यर्चनं चैव समिदाधानमेव च' ॥ इति ॥ सातिचैवं केषांचित्कर्मयोगिनां देवतार्चनरूपो यज्ञ इति कथमुच्यते इति चेत् दैवमेव यज्ञमुपासते तत्रैव निष्ठां कुर्वन्ति ॥ नान्यत्र ॥ इति विवक्षणात् कर्मयोगिषु केषांचिदयं केषांचिदन्य इति विकल्पो युज्यते ॥ अपरे केचित्कर्मयोगिनः 'ब्रह्मार्पण'मित्युक्तन्यायेन ब्रह्मकार्ये अग्नौ यज्ञं चरुपुरोडाशादिकं हविरेव यज्ञेन स्रुक्स्रुवादिना साधनेन उपजुह्वति ॥ अग्नौ हविःप्रक्षेपरूपयज्ञ एव निष्ठां कुर्वति ॥ इति विवक्षणात् अयं यज्ञः केषांचिदिति विकल्पो युज्यते ॥ २९ ॥

१. त्वंपदार्थाभेदेनैव ॥

कृष्णः ॥ श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति ॥
शब्दादीन् विषयानन्ये इंद्रियाग्निषु जुह्वति ॥ २६ ॥

श्रोत्रादीनीति ॥ अन्ये श्रोत्रं आदिः येषां तानि श्रोत्रादीनि इन्द्रियाणि संयमाः इन्द्रियनिग्रहा एव अग्नयः संयमाग्नयः तेषु संयमाग्निषु जुह्वति ॥ अन्ये इन्द्रियाण्येव अग्नयः इन्द्रियाग्नयः तेषु इन्द्रियाग्निषु शब्दः आदिः येषां ते शब्दादयः तान् शब्दादीन् विषयान् जुह्वति ॥ २६ ॥

अपरे नैष्ठिकब्रह्मचारिणः श्रोत्रचक्षुस्त्वक्जिह्वाघ्राणाख्यानि इंद्रियाणि तत्तदिंद्रियनियमनरूपाग्निषु जुह्वति ॥ इंद्रियस्य संयमो नाम विषयेभ्यः प्रत्याहृत्य स्वस्थाने स्थापनं ॥ भगवत्पूजात्मकयज्ञभावनया इंद्रियनियमनं कुर्वति ॥ भगवदाज्ञारूपविध्यनुसारेण स्वस्वकर्तव्यकर्मकरणं भगवदाराधनं भवति ॥ अपरे गृहस्थाः श्रोत्रादींद्रियरूपाग्निषु अनिषिद्धान् शब्दादीन् विषयान् जुह्वति ॥ विषयोपभोगकालेऽप्यनासक्ताः अग्नित्वेन भावितेषु इंद्रियेषु हविष्ट्वेन भावितान् विषयान् प्रक्षिपंति ॥ इंद्रियाण्यग्नित्वेन विषयान् हविष्ट्वेन च ध्यात्वा भगवदाराधनत्वबुध्या अनिषिद्धविषयभोगं कुर्वन्ति ॥

अ ॥ केचिन् ॥ समाधिर्द्विविधः ॥ संप्रज्ञातसमाधिः असंप्रज्ञातसमाधिश्चेति ॥ तत्र संप्रज्ञातसमाधियोगनिष्ठाः श्रोत्रादीनि इंद्रियाणि संयमाग्निषु जुह्वति ॥ तस्मात् समाधियोगात् व्युत्थिताः श्रोत्रादिषु इंद्रियेषु अग्निषु विषयान् जुह्वति ॥ श्रोत्रादिभिरविरुद्धविषयग्रहणं कुर्वन्ति ॥

वि ॥ अपरे योगिनः इंद्रियाणि संयमाग्निषु जुह्वति ॥ इंद्रियसंयमनं कुर्वन्ति ॥ इंद्रियाणां संयमो नाम निर्व्यापारीकरणं ॥ विषयसंनिधानेऽपि दर्शनादिव्यापाररहित्येनावस्थापनं ॥ अयं इंद्रियनियमनाख्यो यज्ञः ॥ अन्ये विषयसंनिधाने इंद्रियाणि निर्व्यापारतया नावतिष्ठेरन् इति विभ्यतः इंद्रियाग्निषु शब्दादीन् विषयान् जुह्वति ॥ विषयनियमनं कुर्वन्ति ॥ विषयाणां नियमनं नाम दूरीकरणं ॥ तत्संनिधिपरिहारः ॥ अयं विषयनियमनाख्यो यज्ञः ॥ यस्य

हविषो होमः तस्य तेन होमेन विनाशो भवति ॥ तद्वदत्र इंद्रियविषयविनाशो विवक्षणीयः ॥ तस्य चासंभवात् इंद्रियसंबंधनाशः विषयसंबंधनाशश्च विवक्षितः ॥ पूर्वार्धे विषयसंनिधिपरिहारः ॥ उत्तरार्धे संनिहितानामपि विषयाणां अकिंचित्करत्वादिंद्रियाणां निर्व्यापारतयाऽवस्थानं च उच्यत इति वा विभागः ॥ २६ ॥

कृष्णः ॥ सर्वाणींद्रियकर्माणि प्राणकर्माणि चापरे ॥
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥ २७ ॥

सर्वाणीति ॥ अपरे सर्वाणि इन्द्रियाणां कर्माणि इन्द्रियकर्माणि प्राणानां वायूनां कर्माणि प्राणकर्माणि च ज्ञानेन दीपितः ज्ञानदीपितः तस्मिन् ज्ञानदीपिते आत्मनः मनसः संयमः निग्रहः स एव योगः उपायः आत्मसंयमयोगः स एव अग्निः तस्मिन् आत्मसंयमयोगाग्नौ जुह्वति ॥ २७ ॥

अपरे ध्यानयोगनिष्ठाः सर्वाणि ज्ञानेंद्रियाणां [1]चक्षुःश्रोत्रत्वक्जिह्वाघ्राणानां कर्माणि दर्शनश्रवणस्पर्शग्रहणरसग्रहणगंधग्रहणानि कर्मेंद्रियाणां वाक्पाणिपादपायूपस्थानां कर्माणि वचनादानगमनविसर्जनानंदनानि ॥ मनोबुध्योः कर्माणि संकल्पाध्यवसायरूपाणि ॥ तथा प्राणानां मुख्यवायूनां [2]प्राणापानव्यानोदानसमानानां कर्माणि क्रमेण बहिर्गमनं अधोगमनं आकुंचनप्रसारणादि ऊर्ध्वगमनं अशितपीतसमनयनं इत्येतानि ॥ उपवायूनां नागकूर्मकृकरदेवदत्तधनंजयानां कर्माणि क्रमेण उद्गारोन्मीलनक्षुतजृंभणव्यापनानि च ध्येयवस्तुविषयकसम्यक्ज्ञानेन प्रज्वलिते आत्मनः मनसः संयमः सम्यक्नियमनं ध्याने एका-

१. श्रोत्रादीनां पूर्वमुक्त्वा कर्मेन्द्रियमात्रपरोऽयं श्लोकः इति केचित् ॥ २. अत्र 'प्राणोऽपानः समानश्चोदानव्यानौ च वायवः ॥ हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः ॥ उदानः कंठदेशस्थः व्यानः सर्वशरीरगः ॥ नागश्च कूर्मः कृकरो देवदत्तो धनंजयः ॥ उद्गारे नाग आख्यातः कूर्म उन्मीलने स्मृतः ॥ कृकराच्च क्षुतं ज्ञेयं देवदत्ताद्विजृंभणम् ॥ न जहाति मृतं वाऽपि सर्वव्यापी धनंजयः ॥' इत्यादिकमनुसंधेयम् ॥

अतो सएव योग उपायः तद्रूपे अग्नौ मनःसंयमरूपो योगः ध्यानयोगः तद्रूपे अग्नौ इति वा ॥ मनःसंयमस्य योगः प्राप्तिः तद्रूपे अग्नौ इति वा ॥ संयम-एव योगः आत्मविषयकः आत्मनि संयमयोगः मनोनिरोधरूपः समाधियोगः तद्रूपोग्निः तस्मिन् इति वा जुह्वति ॥ ध्येयं वस्तु सम्यक् ज्ञात्वा तस्मिन् मनः संयम्य सर्वाणि प्राणेंद्रियकर्माण्युपरमय्य ध्यानयोगसुखमनुभवंति ॥ 'यथायथा सदाभ्यासात् मनसः स्थिरता भवेत् ॥ वायुवाक्कायदृष्टीनां स्थिरता च तथा-तथा' ॥ इति हि स्मरंति ॥ अयं मनोनियमनाख्यो यज्ञः ॥ १ 'इंद्रियेभ्यः परा ह्यर्थाः अर्थेभ्यश्च परं मनः' ॥ इति श्रुत्यनुसारेण त्रयाणामेषां यज्ञानां क्रमो ज्ञेयः ॥

अ ॥ केचित् ॥ अपरे असंप्रज्ञातसमाधियोगनिष्ठाः सर्वाणि इंद्रियकर्माणि प्राणकर्माणि च ज्ञानं तत्वमस्यादिवेदान्तवाक्यजन्यः ब्रह्मात्मैक्यसाक्षात्कारः तेन उज्वलिते आत्मनि विषये संयमः संप्रज्ञातसमाधिः तस्मिन् सति जातः योगः असंप्रज्ञातसमाधियोगः तद्रूपे अग्नौ जुह्वति ॥ सर्वाणि आत्मसंयमयोगाग्नौ ज्ञानदीपिते इत्युक्त्या पूर्वोक्ता द्वशेषो ज्ञातव्यः २७

कृष्णः ॥ द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे ॥
स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ॥ २८ ॥

द्रव्येति ॥ अपरे द्रव्यस्य यज्ञाः याजकाः द्रव्यं द्रव्येण वा यज्ञः येषां ते इति वा द्रव्ययज्ञाः ॥ अपरे तप एव यज्ञः येषां ते तपोयज्ञाः ॥ तथा अपरे योग एव यज्ञः येषां ते योगयज्ञाः ॥ अपरे स्वाध्यायः वेदः स्वाध्यायश्च ज्ञानं च स्वाध्यायज्ञाने ते एव यज्ञौ येषां ते स्वाध्यायज्ञानयज्ञाश्च एते सर्वे यतयः यत्नशीलाः सं सम्यक् शितं तीक्ष्णं व्रतं संकल्पः येषां ते संशितव्रताः ॥ २८ ॥

अपरे योगिनः द्रव्यस्य घृतादेः यजंतीति यज्ञाः याजकाः तपः कृछ्रचान्द्रा-यणादिकं तस्य याजकाः योगः ध्यानं तस्य याजकाः स्वाध्यायः ऋगादिवेद-

---

१. का. ३. १०.

पाठः ज्ञानं वेदान्तज्ञानं तत्साधनं श्रवणादिकं वा तयोर्याजकाः स्वाध्याययज्ञाः ज्ञानयज्ञाश्च ब्रह्मरूपेऽग्नौ द्रव्यतपआदिकं जुहोमि अर्पयामीति ब्रह्मार्पणं कुर्वतः ॥ अर्पणबुद्धिरेव होमः ॥ न प्रयत्नमंतरेणेमे यज्ञाः साध्याः यतयः प्रयत्नशीलाः 'यती प्रयत्ने' इति धातुः ॥ जितेंद्रिया वा ॥ १ जितेंद्रियग्रामाः यतयो यतिन श्चोच्यंते ॥ ते नितरां शितानि तीक्ष्णानि व्रतानि विधियुक्तनियमाः एषां आवश्यकाः यतयः २ संशितव्रताश्चैव उक्तयज्ञवंतो भवंति ॥ अत्र यज्ञाः पंच ॥ २८ ॥

अ॥ अपरे द्रव्यत्यागएव द्रव्येण धनेन वा यज्ञो येषां ते द्रव्ययज्ञाः द्रव्यव्ययसाध्यवापीकूपतटाकारामदेवालयादिनिर्माणरूपयज्ञवंतः॥ द्रव्यं यज्ञो येषां ते द्रव्ययज्ञाः देशविशेषे कालविशेषे पात्रविशेषे यथाशक्ति द्रव्यविनियोगं कुर्वतः पात्रे द्रव्यविनियोगरूपयज्ञवंतः ॥ इति वा ॥ अपरे कृच्छ्रचांद्रायणादिव्रताचरणरूपयज्ञवंतः ॥ अपरे द्वितीयतृतीयाद्युक्तविहितकर्मानुष्ठानरूपयोगलक्षणयज्ञवंतः ॥ यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधिरूपाष्टांगयोगरूपयज्ञवंतः ॥ इति वा ॥ ३ ऋगादिवेदपाठरूपयज्ञवंतोपरे ॥ ज्ञानसाधनपूर्वोत्तरमीमांसाविचाररूपयज्ञवंतोऽपरे ॥ सर्वेऽप्येते यतयः यत्नशीलाः अतितीक्ष्णव्रताः अतिदृढनियमाः इतीदं द्वयं सर्वेषां विशेषणं ॥ एवमत्र पंच यज्ञाः ॥ अपरे संशितव्रताः अतिदृढाहिंसादिरूपमहाव्रतादिव्रतविशेषरूपयज्ञवंतः ॥ एवमत्र षट् यज्ञाः इति वा ॥ २८ ॥

वि ॥ अपरे द्रव्यसाध्ययज्ञवंतः द्रव्यत्यागात्मकयज्ञवंतो वा ॥ न्यायार्जितेन द्रव्येण देवतार्चनं दानं यागं होमं वा कुर्वतः ॥ अपरे कृच्छ्रचांद्रायणादिरूपव्रतलक्षणयज्ञवंतः ॥ अपरे योगयज्ञाः योगः प्राप्तिः अवश्यंगंतव्यानां दिव्यदेशानां दिव्यतीर्थानां वा प्राप्तिः तद्रूपयज्ञवंतः ॥ यज्ञत्वबुद्ध्या दिव्यदेशयात्रादिकं कुर्वतः ॥ अपरे वेदाभ्यासरूपयज्ञवंतः ॥ अपरे तदर्थज्ञानाभ्यासरूपयज्ञ-

१. ये निर्जितेन्द्रियग्रामा यतिनो यतयश्च ते ॥ इत्यमरः ॥ २. शंसितव्रता इति पाठे विद्वत्कथितप्रथितव्रतवंतः इत्यर्थः ३. स्वाध्यायेन वेदेन यत् ज्ञानं तद्रूपयज्ञवंतः ॥ स्वाध्याययज्ञाः ज्ञनयज्ञाश्च इति वा ॥ आद्ये व्रतरूपो यज्ञः पंचमः ॥ द्वितीये संशितव्रता इति सर्वेषां विशेषणम् ॥

वंतः ॥ सर्वेप्येते यतयः यत्नशीलाः अतिदृढसंकल्पाश्च ॥ प्रयत्नसंकल्पदार्ढ्य-रहितानामिमे यज्ञा न सिध्येयुः ॥ अंतः यत्नेन संकल्पदार्ढ्येन च यज्ञा इमे संपाद्याः ॥ २८ ॥

कृष्णः ॥ अपाने जुह्वति प्राणं प्राणेऽपानं तथा परे ॥
प्राणापानगती रुध्वा प्राणायामपरायणाः ॥ २९ ॥

अपानइति ॥ अपरे प्राणानां आयामः नियमनं परं अयनं येषां ते परायणाः तत्पराः प्राणायामे परायणाः प्राणायामपरायणाः सन्तः प्राणश्च अपानश्च प्राणौ तयोः गती रुध्वा प्राणं अपाने जुह्वति ॥ तथा अपानं प्राणे जुह्वति ॥ २९ ॥

द्वै ॥ अ ॥ अपरे प्राणानां नियमनमेव परमोपायमाश्रयंतः संतः प्राणापानयोः[1] ऊर्ध्वाधोगती निरुध्य अपाने प्राणं जुह्वति ॥ प्राणे च अपानं जुह्वति ॥ प्राणस्य गतेः ऊर्ध्वगमनं अपानस्य गतिः अधोगमनं ते निरुध्य ॥ प्राणस्य अपानेप्रवेशनरूपं पूरकं अपानस्य प्राणे प्रवेशनरूपं रेचकं च कृत्वा उभयगतिनिरोधेन स्तंभनरूपं कुंभकं कुर्वन्तः भगवत्पूजात्वेन प्राणायामयज्ञं कुर्वन्ति ॥ २९ ॥

कृष्णः ॥ [2] अपरे नियताहाराः प्राणान् प्राणेषु जुह्वति ॥ २९॥ ॥

अपर इति ॥ नियतः संकोचितः आहारः येषां ते नियताहाराः अपरे प्राणान् प्राणेषु जुह्वति ॥ २९॥ ॥

अपरे नियमिताहाराः आहारसंकोचाभ्यासवंतः संतः प्राणान् तत्तदिंद्रियवृत्तीः प्राणेषु तत्तदिंद्रियेषु जुह्वति ॥ आहारसंकोचनेन इंद्रियाणां शक्तिह्रासमापाद्य तानितानींद्रियाणि संकुचितवृत्तीनि कुर्वन्ति ॥ प्राणान् अवरेंद्रियदेवान् प्राणेषु उत्तमेंद्रियदेवेषु जुह्वति ॥ तदधीनान् चिंतयंति ॥ इति वा ॥ अस्मिन् व्याख्याने नियताहारा इत्यस्यानुपयोगात् नियताहारत्वं पृथगपरो यज्ञ इति ज्ञेयम् ॥ २९ ॥

---

१. नासिकाभ्यां आन्तरस्य वायोर्निर्गमः श्वासः प्राणगतिः ॥ बहिर्निर्गतस्य तस्य वायोः ताभ्यां अन्तःप्रवेशः प्रश्वासोऽपानगतिः ॥ २. सार्वलौकिके एक एव यज्ञः ॥ द्वे यज्ञाविति अपरे ॥

अ ॥ अपरे पूर्वोक्तप्राणायामपरेषु मध्ये केचित् नियताहाराः संतः प्राणान् अजितान् वायून् जितेषु वायुषु जुह्वति ॥ वायुजयाभ्यासं कृत्वा जिते वायौ अजितं वायुं संयोज्य तमपि जयंति ॥ इंद्रियेषु इंद्रियवृत्तीः जुह्वतीति वा ॥

१अपरे पूर्वोक्तप्राणायामपरेषु मध्ये केचित् नियताहाराः संतः प्राणान् प्राणेषु जुह्वते ॥ वायुस्तंभनाभ्यासनिगृहीतेषु वायुषु प्राणान् ज्ञानेंद्रियकर्मेन्द्रियरूपान् जुह्वति ॥ महाकुंभकाभ्यासेन विलापयंति ॥ २अपरे नियताहाराः आहारः आहरणं विषयभोगः ॥ विरक्ताः संतः प्राणान् समनस्कानींद्रियाणि प्राणेषु मनश्चित्ताहंकारेषु अंतःकरणवृत्तिभेदेषु जुह्वति ॥ इंद्रियाणि संकल्पात्मके मनसि संहृत्य मनोऽपि स्मरणात्मके चित्ते संहृत्य तदपि अहंकारे संहरंति ॥ सचाभिमानोऽहंकारः अभिमंतव्याभावात् स्वयमेव दग्धैंधनानलवद्विलीयते ॥ अयं द्वादशो यज्ञः ॥ इति वा ॥

अपरे प्राणं अपाने जुह्वति ॥ तथा अपानं प्राणे जुह्वति ॥ पूरकरेचकयोरावर्तनान्निष्पद्यमानेन हंसो सोहं इत्यनुलोमतः प्रतिलोमतश्चाभिव्यज्यमानेन अजपामंत्रेण तत्वमसीति महावाक्योक्तं तत्त्वंपदार्थैक्यं प्रतिकलं भावयंति ॥ 'सकारेण बहिर्याति हकारेण विशेत्पुनः ॥ प्राणस्तत्र सएवाहं हंस इत्यनुचिंतयेत्' ॥ इति हि योगशास्त्रज्ञाः स्मरंति ॥ अयमेको यज्ञः ॥ 'प्राणायामगती रुध्वा प्राणायामपरायणाः ॥ अपरे नियताहाराः प्राणान् प्राणेषु जुह्वति ॥' इति प्राणायामयज्ञः ॥ इन्द्रियाणि वायुषु जुह्वतीत्यर्थः ॥ इत्यपि व्याख्यांतरं ॥ २९॥ ॥

वि ॥ प्राणायामपरायणा अपरे अपाने प्राणं जुह्वति ॥ पूरकं कुर्वंति ॥ तथा अपरे प्राणे अपानं जुह्वति ॥ रेचकं कुर्वंति ॥ अपरे प्राणापानयोः ऊर्ध्वाधोगती रुध्वा प्राणान् वायुवृत्तिभेदान् प्राणेषु वायुषु जुह्वति ॥ कुंभकं कुर्वंति ॥ एते त्रयोऽपि नियताहाराः ॥ वक्ष्यते च ॥ ३ 'नात्यश्नतस्तु योगोऽस्ति न चैकांतमनश्नतः' ॥ इति ॥ सार्धश्लोके एको यज्ञः ॥ २९॥ ॥

अर्जुनः ॥ किमेतेषां सर्वेषां भेदानां पापनिरसनद्वारा मोक्षहेतुत्वमस्ति ॥ ब्रूहि॥

१. सार्धश्लोके एको यज्ञः ॥ २. द्वौ यज्ञौ ॥ ३. ६. १६.

कृष्णः ॥ सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ॥ ३० ॥
यज्ञशिष्टामृतभुजो यान्ति ब्रह्मसनातनम् ॥ ३० ॥ ॥

सर्वेऽपीति ॥ एते सर्वेऽपि यज्ञं विदन्तीति यज्ञं विन्दन्तीति वा यज्ञविदः यज्ञेन क्षपितं नाशितं कल्मषं येषां ते यज्ञक्षपितकल्मषाः ॥ यज्ञात् शिष्टं यज्ञशिष्टं यज्ञशिष्टं च तत् अमृतं च यज्ञशिष्टामृतं यज्ञशिष्टामृतं भुञ्जत इति यज्ञशिष्टामृतभुजः तादृशाश्च सन्तः सनातनं अनादि ब्रह्म यांति ॥ ३०॥ ॥

द्वै ॥ अ ॥ यज्ञान् विदंतीति यज्ञविदः यज्ञतत्स्वरूपतत्प्रकारतत्फलज्ञानिनः यज्ञान् विंदंति लभंते इति यज्ञविदः यज्ञलाभवंतः ॥ यज्ञस्वरूपादिकं ज्ञात्वा यज्ञानुष्ठातारः एते सर्वेऽपि १ यज्ञान् कृत्वा अवशिष्टे काले अमृताख्ये भुंजानाः यज्ञानंतरभावित्वादमृतो भवति स कालः ॥ यज्ञशिष्टेन कालेन यज्ञशिष्टे काले वा अमृताख्यमन्नं भुंजाना इति वा ॥ यज्ञान् कृत्वा अवशिष्टममृताख्यं अन्नं भुंजानाः ॥ यज्ञशेषो ह्यमृतमुच्यते ॥ इति वा ॥ यज्ञभेदेन यथासंभवं अयमर्थभेदो बोध्यः ॥ स्वानुष्ठितेन यज्ञेन नाशितमोक्षप्रतिबंधकपापाश्च संतः पुरातनं परं ब्रह्म प्राप्नुवंति ॥ ज्ञानद्वारा मोक्षं प्राप्नुवंति२ ॥

वि ॥ उक्तेषु कर्मयोगभेदेषु स्वसौकर्यानुसारेण स्वेच्छया प्रवृत्ता एते सर्वेऽपि देवयज्ञपितृयज्ञभूतयज्ञमनुष्ययज्ञब्रह्मयज्ञरूपमहायज्ञान् तत्पूर्वकनित्यनैमित्तिककर्मरूपयज्ञांश्च 'सहयज्ञैः प्रजाःसृष्ट्वे'त्यभिहितान् विंदंति लभंते इति यज्ञविदः पंचमहायज्ञनित्यनैमित्तिककर्मकर्तारः संत एव उक्तैर्यज्ञैः कर्मयोगभेदैः अनुष्ठितैः

१. यज्ञानन्तरं शिष्टं विशिष्टं अमृताख्यं अन्नं आत्मसुखं वा भुंजानाः ॥ इति केचित् ॥ यज्ञशिष्टं यज्ञान्ते क्रियमाणं अमृतं 'यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ॥ न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ॥ मंत्रहीनं क्रियाहीनं भक्तिहीनं रमापते ॥ यत्कृतं तु मया देव परिपूर्णं तदस्तुमे' ॥ अनेन मया कृतेन कर्मणा भगवान् श्रीकृष्णः प्रीयतामिति मत्स्मरणपूर्वकं ममार्पणं तद्भुजः तत्कर्तारः ॥ इति परे ॥ सर्वेषामेतेषां अन्यतममप्यनुष्ठातुमशक्ताः पंचमहायज्ञाननुष्ठाय तच्छिष्टममृताख्यमन्नं भुजानाः चित्तशुद्धिज्ञानद्वारा मोक्षमाप्नुवन्ति ॥ सर्वेऽपीत्यर्धं प्रशंसापरम् ॥ इत्यन्ये ॥

महायज्ञादिभिर्वा नाशितप्रतिबंधकपापास्संतः यज्ञशिष्टेन महायज्ञशिष्टेन अमृताख्येन अन्नेन शरीरधारणं कुर्वतः संतः अनादिब्रह्मसमानाकारं प्रकृतिबंधरहितशुद्धात्मानं प्राप्नुवंति ॥ उक्तकर्मयोगभेदेषु निष्ठावतापि पंचमहायज्ञानित्यनैमित्तिककर्मणामनुष्ठानमवश्यं कर्तव्यमिति सिद्धं ॥ ३०॥ ॥

अर्जुनः ॥ उक्तयज्ञभेदानामकरणे किं बाधकं ॥ ब्रूहि ॥

कृष्णः ॥ नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यःकुरुसत्तम ॥ ३१ ॥

नायमिति ॥ कुरुषु सत्तमः श्रेष्ठः कुरुसत्तमः हे कुरुसत्तम पार्थ न विद्यते यज्ञः यस्य सः अयज्ञः तस्य अयज्ञस्य अयं लोकः नास्ति ॥ अन्यः लोकः कुतः॥ ३१॥

उक्तेषु यज्ञभेदेषु एकमपि यो[1]नानुतिष्ठति ॥ तस्य अयं लोकः मनुष्यलोकः नास्ति कुतः पुनः स्वर्गादिः ॥ कुरुश्रेष्ठत्वात् त्वमनुष्ठातुं शक्तोऽसि ॥ अयं लोकः मनुष्यदेह एव नास्ति ॥ कुतो देवदेहः ॥ तिर्यग्योनिषु जायते ॥ इति वा ॥ [2]अयज्ञस्य अयं लोकः प्राकृतलोकसंबंधी धर्मार्थकामाख्यत्रिवर्गः नास्ति ॥ अन्यः अप्राकृतः मोक्षः कुतः ॥ इति वा ॥ ३१ ॥

अर्जुनः ॥ किमिमे विधिविहिताः किंभगवत्प्रीतिद्वारा मोक्षसाधनभूताः किमेभिरहं मोक्षं प्राप्नुयां वद ॥

कृष्णः ॥ एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे ॥
कर्मजान् विद्धि तान् सर्वानेवं ज्ञात्वा विमोक्ष्यसे ॥ ३२ ॥

एवमिति ॥ एवं बह्वयो विधाः प्रकाराः येषां ते बहुविधाः यज्ञाः ब्रह्मणः मुखे विततः विस्तृताः ॥ तान् सर्वान् कर्मणा जायन्ते इति कर्मजाः तान् कर्मजान् विद्धि जानीहि ॥ एवं ज्ञात्वा विमोक्ष्यसे ॥ ३२॥

उक्तप्रकाराः बहुविधाः यज्ञाः हरेः परमात्मनः मुखे वदने विस्तृताः सर्वयज्ञ-

१. पंचमहायज्ञान्वा यो नानुतिष्ठति ॥ २. वि ॥ अयज्ञस्य कर्मयोगभेदनिष्ठत्वाभिमानेन सामान्यधर्मभूतपंचमहायज्ञनित्यनैमित्तिकादिपरित्यागिनः ॥

भोक्ता हि सः ॥ वक्ष्यते च ॥ १'भोक्तारं यज्ञतपसा'मिति ॥ २'अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव चे'ति च ॥ कर्तव्यानां ज्ञानद्वारा मोक्षहेतूनां यज्ञानां अनेकेषां सत्वात् किं कर्मयोगकरणनिर्बंधेन इति चेत् तान् सर्वान् यज्ञान् कर्मजान् जानीहि ॥ उक्ताः ज्ञानकर्मात्मकाः यज्ञाः सर्वेऽपि कायिकवाचिकमानसिककर्मसाध्याः ॥ नहि कायिकादिक्रियासामान्याभावे कोऽपि यज्ञः सिद्धयेत् ॥ अतः सर्वेषु यज्ञेषु कर्मसद्भावात् विहितः कर्मयज्ञएव श्रेयान् ॥ बंधकत्वशंकया क्रियासामान्यपरिजिहीर्षायां सत्यां सर्वेऽपि यज्ञाः त्यक्तव्याः स्युः ॥ ततश्च ज्ञानयज्ञोऽपि त्याज्यः स्यात्॥ तत्रापि मानसक्रियाया विद्यमानत्वात्॥ स्वाध्याययज्ञोऽपि त्याज्यःस्यात् ॥ तत्रापि वाचिकक्रियाया विद्यमानत्वात् ॥ एवमन्यत्राप्यूह्यं ॥ कर्मजान् जानीहि इत्युच्यते ॥ एवं ज्ञाते किं स्यात् इति चेत् एवं ज्ञात्वा सर्वानपि यज्ञान् कर्मजान् ज्ञात्वा एवं कर्मणा ज्ञानं लब्ध्वा बंधं मोक्तुं बंधादात्मानं मोचयितुं च इच्छसि ॥ ज्ञानार्थं युद्धादिकं स्वकर्म कर्तव्यमिति तवैवेच्छा भविष्यति ॥ मुचुल् मोक्षणे इत्यस्य धातोः सन्नंतस्य रूपं ॥ सर्वेषां कर्मजत्वं ज्ञात्वा विहितं कर्मानुष्ठाय ज्ञानद्वारा मोक्ष्यसे मोक्षं प्राप्स्यसि इति वा ॥ अन्यथा कर्मजान् विद्धीत्युक्तिर्व्यर्था स्यात् ॥ अतः उक्तं सर्वं ज्ञात्वा विहितं कर्म त्वया कर्तव्यं ॥ तेन च तवज्ञानद्वारा मोक्षस्स्यात् ॥ एव मुपदिष्टो मया ते कर्मयोगविस्तरः ॥ ३२ ॥

अ ॥ उक्तप्रकाराः बहुविधाः यज्ञाः ब्रह्मणो वेदस्य मुखे ब्रह्मणो मुखे ब्रह्ममुखनिःसृते वेदे इति वा ॥ विस्तृताः वेदद्वारा सर्वैरवगताः ॥ न स्वस्वोत्प्रेक्षामूलकाः ॥ आत्मनोऽक्रियत्वात् कथं तस्य व्यापारात्मका इमे विधीयंते इति चेत् तान् सर्वान् कर्मजान् विद्धि ॥ कायिकवाचिकमानसिकव्यापारजन्यान् जानीहि ॥ इमे यज्ञाः व्यापारसाध्याः ॥ आत्मा तु निर्व्यापार उदासीनः ॥ अतः प्रकृतिप्राकृतव्यापारैरिमे जायंते ॥ नाहमेतेषां कर्ता ॥ किंतूदासीनः ॥ इत्येवं ज्ञात्वा अक्रियात्मज्ञानेन मुक्तो भविष्यसि ॥ 'यान्ति ब्रह्म सनातन' मित्युक्तरीत्या मोक्षहेतुभूतकर्मयज्ञैरेवाले किं ज्ञानयज्ञेन इति चेत् तान् कर्मयज्ञान् अनात्मधर्मवागादिव्यापारजान् अतएव मोक्षेतरालपफलप्रदान् जानीहि ॥ एवं ज्ञात्वा ज्ञानं लब्ध्वा मोक्षं प्राप्स्यसि इति वा ॥ तान् सर्वान् कर्मजान् विद्धि ॥ सर्वेषु कर्मणः

---

१. ५. २९. २. ९. २४.

सद्भावात् कर्मापरिहार्यं जानीहि ॥ एवं कर्म कृत्वा तेन ज्ञात्वा ज्ञानयोगं प्राप्य विमोक्षं प्राप्स्यसि ॥ इति वा ॥ ३२ ॥

वि ॥ ब्रह्मणः प्रकृतिबंधरहितशुद्धात्मस्वरूपस्य मुखे प्राप्त्युपाये कर्मयोगे एवं बहुविधाः यज्ञाः विततताः ॥ आत्मप्राप्त्युपायभूतकर्मयोगस्य बहवोऽवांतरभेदाः एवं विस्तरेणोक्ताः ॥ तान् सर्वान् अहरहरनुष्ठीयमाननित्यनैमित्तिककर्मजन्यान् जानीहि ॥ कर्मयोगावांतरभेदनिघ्नस्य मम किं नित्यनैमित्तिकादिभिः इत्यभिमानेन नित्यनैमित्तिकानि कर्माणि न त्याज्यानि ॥ तदकरणे कर्मयोगावांतरभेदकरणा[1]नर्हो भवति ॥ प्रतिदिवसं पापहरणेन उत्तरोत्तरसत्वोन्मेषहेतुत्वेन च अत्यंतोपयुक्तानि विहितानि संध्यावंदनादीनि नित्यनैमित्तिकानि कर्माणि ॥ एवं ज्ञात्वा एवं अहरहरनुष्ठीयमाननित्यनैमित्तिककर्मानुष्ठानपूर्वकं उक्तकर्मयोगभेदाननुष्ठाय तेन यथावस्थितात्मस्वरूपमवाप्स्यसि ॥ अतः नित्यनैमित्तिककर्मानुष्ठानपूर्वकं कर्तव्यमुचितं विहितं स्वकर्म सर्वैः कर्तव्यमिति स्थितम् ॥ ३२ ॥

अर्जुनः ॥ महता प्रबंधेन महता तात्पर्येण कर्मयज्ञनिरूपणात् सएव श्रेष्ठः न ततोऽन्योस्ति इति भाति ॥ वद ॥ उक्तेषु यज्ञेषु कः श्रेष्ठः वद ॥ इति वा ॥

कृष्णः ॥ श्रेयान् द्रव्यमयाद्यज्ञात् ज्ञानयज्ञः परंतप ॥
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥ ३३ ॥

श्रेयानिति ॥ परान् शत्रून् तपतीति परंतपः हे परंतप अर्जुन द्रव्यप्रचुरो द्रव्यमयः तस्मात् द्रव्यमयात् यज्ञात् ज्ञानमेव यज्ञः ज्ञानयज्ञः श्रेयान् अतिशयेन श्रेष्ठः हे पार्थ सर्वं कर्म खिलं सशेषं न खिलं अखिलं समग्रं यथातथा ज्ञाने परिसमाप्यते परिपूर्यते ॥ ३३ ॥

देवतोद्देशेन घृतादिद्रव्यत्यागरूपाद्यज्ञात् चरुपुरोडाशादिद्रव्यप्रचुरो यज्ञः द्रव्ययज्ञः अन्नमयो यज्ञः अन्नयज्ञः इतिवत्॥ तस्मात् तदुपलक्षितसर्वयज्ञेभ्यः इति वा ज्ञानयज्ञः श्रेष्ठः ॥ श्रद्धाजाड्येन पंचगव्यात् षड्गव्यमाधिकं मन्वान इव कर्मयज्ञमेवाधिकं

१. अत्र, 'किमस्त्यनुपनीतस्य वाजपेयादिभिर्मखैः' ॥ इति श्लोकोऽनुसंधेयः ॥

मामंस्थाः ॥ ज्ञानयज्ञमेवाधिकं जानीहि ॥ कुत इति चेत् सर्वं कर्म खिलं सशेषं अखिलं निश्शेषं कर्मसमृत्यर्थांगयुक्तं ज्ञाने सति परि सम्यक् समाप्यते संपूर्णं सफलं भवति ॥ ज्ञानरूपफलेनैव फलवद्भवति ॥ ज्ञानं फलं कर्म तु साधनं ॥ अतः कर्मणो ज्ञानं श्रेष्ठं ॥ साधनापेक्षया साध्यस्य श्रेष्ठत्वात् ॥ आखिलं आ नितरां खिलं अल्पमपि कर्म ज्ञाने सति परिसमाप्यते संपूर्णं भवति ॥ ज्ञानिकृतं अल्पमपि कर्म संपूर्णं भवति ॥ अल्पस्यापि महत्वापादकत्वात् ज्ञानं श्रेष्ठं ॥ 'अल्पमात्रकृतो धर्मो भवेत् ज्ञानवतो महान् ॥ महानपि कृतो धर्मो ह्यज्ञानां निष्फलो भवे'दित्यभियुक्ताः स्मरन्ति ॥ अन्तःशत्रुजेतृत्वात्त्वं ज्ञानयज्ञार्होऽसि ॥ अतः त्वं कर्मयोगेन ज्ञानी भवितुं यतस्व ॥ ३३ ॥

अ ॥ द्रव्यमयात् द्रव्यरूपसाधनसाध्यात् परंपरया मोक्षसाधनात् उपलक्षणया उक्तेभ्यः तादृशेभ्यः सर्वेभ्यो यज्ञेभ्यः द्रव्यं बाह्यं आभ्यन्तरं च देहेंद्रियादि तद्व्यापारसाध्यात् द्रव्यं मंत्रतंत्रक्रियाऽऽश्रमादि तत्साध्यात् यज्ञात् दैवादियज्ञेभ्यः इति वा ज्ञानयज्ञः ज्ञानात्मको यज्ञः साक्षान्मोक्षसाधनभूतः श्रेयान् प्रशस्ततरः ॥ अंतःशत्रुजेतृत्वात् त्वं ज्ञानयज्ञार्होऽसि ॥ कुतो ज्ञानयज्ञस्य श्रैष्ठ्यं इति चेत् सर्वं कर्म खिलं सशेषं न भवतीत्यखिलं निःशेषं ज्ञाने परिसमाप्यते ॥ ज्ञाने पर्यवस्यति ॥ ज्ञानरूपफलेन फलवद्भवति ॥ ज्ञाने सति परिसमाप्यते समाप्तं भवति ॥ ततः परं कर्म नास्ति ॥ यथा वेलां प्राप्तस्य गंतव्यं नास्ति तथा ज्ञानोत्पत्त्यनंतरं कर्तव्यं कर्म नास्ति ॥ उक्तं हि मया ॥ १'तस्य कार्यं न विद्यत' इति ॥ ज्ञाने सति सर्वं आगामि संचितं च कर्म अखिलं निःशेषं यथातथा परिसमाप्यते निर्मूल्यते ॥ सूर्यप्रभया तम इव निःशेषं नश्यति ॥ वक्ष्यते च ॥ २'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा' ॥ इति ॥ सर्वं कर्म कर्मफलं अखिलं ज्ञाने ज्ञानफले परिसमाप्यते अंतर्भवतीति वा ॥ ज्ञाने जाते तेन ज्ञानिना सर्वैः प्राणिभिः कृतं कर्म सं सम्यक् आप्यते प्राप्यते ॥ सर्वैः प्राणिभिः कृतं कर्म यथावत्तत्वज्ञानिनं प्राप्नुवंति ॥ इति वा ॥ ३'एवमेनꣳसर्वं तदभिसमेति यत्किंच प्रजाः

---

१. ३. १७. २. ४. ३७. ३. छा. ४. १. ४.

साधु कुर्वंति यस्तद्वेद यत्स वेद' ॥ इति श्रुतिः ॥ अतो द्रव्ययज्ञात् ज्ञानयज्ञः १ श्रेष्ठः ॥ ३३ ॥

वि ॥ कर्तव्यतयोच्यमानं कर्म अंतर्गतज्ञानकं ॥ उक्तं च मया ॥ २ 'व्यवसायात्मिका बुद्धिरेके 'ति ॥ अतस्तत्कर्माकारं ज्ञानाकारं चेत्युभयाकारं ॥ उभयाकारे तस्मिन् कों 'शः प्रधान इति चेत् तस्मिन् उभयाकारे कर्मणि द्रव्यमयात् कर्मरूपात् यज्ञांशात् ज्ञानयज्ञः अन्तर्गतज्ञानरूपयज्ञांशः श्रेष्ठः ॥ कुत इति चेत् सर्वं कर्म अखिलं स्वेतरसकलसाधनसहितं ज्ञाने अंतर्गते ज्ञाने पर्यवस्यति ॥ ज्ञानरूपप्राप्यफलेन फलवद्भवति ॥ कर्मांतर्गतस्य ज्ञानस्य कर्मणा प्राप्यत्वं कथं इति चेत् कर्मण्यंतर्गतं ज्ञानं कर्माभ्यासेन पुनःपुनरभ्यस्यमानं साक्षात्काररूपविपाकदशामापद्यते ॥ तादृशविपाकदशापन्नं ज्ञानं प्राप्यं फलं भवति ॥ अतो नानुपपत्तिः ॥ कुतोऽतर्गतस्य ज्ञानस्य प्राधान्यमुच्यते इत्युच्यते ॥ ततः-पृथक्भूतज्ञानयोगस्यैव प्राधान्यमुच्यते इति कुतो न वाच्यमिति चेत् ३ 'कर्म ज्यायो ह्यकर्मणः' ॥ इति कर्मयोगस्य प्राधान्यमुक्तं ॥ वक्ष्यते च तत् ॥ ४ 'तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते' ॥ इति ॥ अतः पूर्वोत्तरयोस्तयोः कर्मयोगप्रधान्यवचनयोर्मध्ये पृथक्भूतज्ञानयोगप्रधान्यवचनमनुचितं ॥ अतः अंतर्गतज्ञानांशप्रशंसामुखेन तत्सहितकर्मयोगस्यैव प्राधान्योक्तिपरमिदमिति युक्तं॥३३॥

अर्जुनः ॥ तद्ज्ञानं केभ्यः केन प्रकारेण लभ्यं ॥ वद ॥

कृष्णः ॥ तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ॥
उपदेक्ष्यंति ते ज्ञानं ज्ञानिनस्तत्वदर्शिनः ॥ ३४ ॥

तदिति ॥ प्र सम्यक् निपातेन पतित्वा नमस्कारकरणेन परि सम्यक् प्रश्नेन सेवया शुश्रूषया तत् ज्ञानं विद्धि जानीहि लभस्व वा ॥ ज्ञानं एषां अस्तीति ज्ञानिनः तत्वं पश्यन्तीति तत्वं दर्शयन्तीति च तत्वदर्शिनः ते तुभ्यं ज्ञानं उपदेक्ष्यंति ॥ ३४ ॥

१. द्रव्यं स्वर्गादिविषयभोगलक्षणं तन्मयः तत्साधकः तस्मात् यज्ञात् ज्ञानयज्ञः श्रेयान् परममोक्षसुखप्रापकः ॥ कर्म द्वेधा ॥ खिलमखिलं चेति खिलं दुष्टं अखिलं सर्वं कर्म ज्ञाने परिसमाप्यते पर्यवस्यति ॥ खिलं तु अज्ञाने पर्यवस्यति ॥ अतः अदुष्टमेव कर्म कर्तव्यम् ॥ २. २. ४१. ३. ३. ८. ४. ५. २.

हे पार्थ तत् तस्मात् ज्ञानस्य सर्वाधिकत्वात् तत् ज्ञानं ज्ञातव्यं त्वं जानीहि ॥ लभस्वेति वा ॥ के उपदेक्ष्यंति इति चेत् ज्ञानिनः तुभ्यं १ज्ञातव्यं उपदेक्ष्यंति ॥ किं सामान्यज्ञानमात्रेण उपदेष्टुं शक्नुवंति इति चेत् तत्वं पश्यंतीति तत्वदर्शिनः किं सामान्यविशेषज्ञानमात्रेण उपदेष्टुं शक्नुवंतीति चेत् तत्वं दर्शयंतीति तत्वदर्शिनः बोधनाशक्तिमहिम्ना स्थांतस्स्थितं ज्ञानं दर्पणमहिम्ना प्रतिरूपकमिवान्यत्रोत्पादयितुं क्षमाः उपदेक्ष्यंति ॥ उपदिशेयुर्वा ते इति चेत् तान् सादरमभिगम्य दंडवत् प्रकर्षेण नीचैः पतनेन नमस्कारः कार्यः ॥ कृते नमस्कारे आशिषं हि दद्युः इति चेत् नाहमाशिषमर्थयमानो भवत्सविधमुपागमं ॥ किंतु ज्ञानसंपादनेनात्मानमुद्धर्तुं इति स्वाशयं निवेद्य सम्यक् प्रश्नः कर्तव्यः ॥ गत्वा नत्वा पृष्टे उपदिशेयुर्वा ॥ चेदेवं सुलभं खलु स्यात् ज्ञानमिति चेत् अस्मै शिष्याय सम्यगुपदेष्टव्यमिति यथा ते मन्येरन् तथा तेषां शुश्रूषा कार्या ॥ एवं कृते अवश्यं ज्ञानमुपदेक्ष्यंति २ते ॥ उपदेक्ष्यंतीत्यनेन एवमुपसन्नाय शिष्याय ज्ञानिभिः ज्ञापनशक्तिमद्भिश्च विद्वद्भिरवश्यमुपदेशः कर्तव्यः इति विधिः प्रतीयते ॥ एवं परमदुर्लभत्वात् ज्ञानस्य तत्संपादने अवश्यं प्रयत्नः कर्तव्यः इति स्थितं ॥ क्व क्व गत्वा केभ्यः केभ्यो मया ज्ञातव्यं ३'नत्वेवाह'मित्यादिना उपादिक्षः उपदिशसि चेदानीं उपदेक्ष्यसि च सतिचैवं कृत एवमुच्यते ॥ विभेम्यहमतीव ॥ इति चेत् ४वयमुपदेक्ष्यामः ॥ तत् अस्मत्तः विद्धि ॥ माभैषीः ॥ उपदेक्ष्याम इति वक्तव्ये उपदेक्ष्यंतीत्युक्त्या कृतो भयोत्पादनं कृतमिति चेत् उपदेक्ष्यामः अस्मत्तस्त्वं विद्धीत्युक्ते परहितचिंतकस्य तव, मह्यमुपदिशति भगवान् उपदेक्ष्यति च ॥ का गतिरितरेषां ॥ इति चिंता समुन्मिषेत् ॥ अत एवमुक्तं ॥ ये ज्ञानिनः तत्वदर्शिनश्च५ ते

---

१. ज्ञायते अनेनेति ज्ञानं ज्ञानजनकं शास्त्रमिति वा ॥ २. अर्जुनः साक्षाद्दिव्यत्वात् नरांशत्वाच्च-इदानामपि ज्ञान्येव तथापि अधिकज्ञानार्थमेवमुक्तं ॥ ३. २. १२. ४. लक्षाख्यलयः ॥ अर्जनः इत्यादाविव परोक्षनिर्देशो वा ॥ उपदेक्ष्यत्येव भगवानुपरिष्टात् ॥ वक्ष्यति च ॥ 'तत्ते पदं संग्रहेण प्रवक्ष्ये'॥ (८. ११.) इत्यादि ॥ न च अवशिष्टविषयज्ञानार्थं उपदेक्ष्यन्तीत्युक्तमिति वाच्यं ॥ ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः ॥ यद्ज्ञात्वा नेहभूयोऽन्यत् ज्ञातव्यमवशिष्यते ॥' (७. २.) इति वक्ष्यमाणत्वात् ॥ ५. तच्छब्दः प्रथमान्तः ॥

प्रणिपातेन सेवयाच प्रसन्नाः संतः परिप्रश्नेन उपदेक्ष्यंति इति यत् तत् त्वं विद्धि ॥ इति वा ॥ ३४ ॥

अ ॥ ज्ञानिनः ज्ञानवंतः तत्वदर्शिनः अपरोक्षानुभववंतश्च आचार्याः प्रणिपातेन परिप्रश्नेन सेवया च तुभ्यं उपदेक्ष्यंति ॥ तेभ्यस्तत् त्वं विद्धि जानीहि लभस्व च ॥ विशिष्टाचार्यैरेवोपदिष्टं ज्ञानं पुरुषार्थसाधनं भवति ॥ अतस्तान् प्रश्रयेणोपसंगम्य नत्वा सेवया तोषयित्वा स्वापेक्षितं पृष्ट्वा च तेभ्यो ज्ञानं संपाद्यं ॥ ज्ञानिन इति बहुवचनमाचार्यविषये कथं ॥ १ 'तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् ॥ समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं' ॥ इत्येकस्यैवाचार्यस्योपसत्तिः श्रूयते ॥ 'उपसीदेदेकमेव सद्गुरुं ब्रह्मवित्तम'मिति च स्मरंति ॥ अतः कथमिदमिहबहुवचनमिति चेत् बहुभ्यः श्रोतव्यं 'सर्वतः सारमादद्या'दिति न्यायात् ॥ इदं सामान्यज्ञानाभ्यनुज्ञानार्थं ॥ नतु निःशेषसंसारमलनिवर्तकब्रह्मात्मैक्यसाक्षात्कारलाभार्थं ॥ एकगुरूपसदनपरवचनानि तु तत्पराणि ॥ अतो नानुपपत्तिः ॥ बहुभ्यः श्रुत्वा अंततः एकस्मात् सद्गुरोरात्मज्ञानं संपादनीयं इति स्थितं ॥ एकस्यैवाचार्यस्य बहुवचनेन निर्देशो गौरवात् ॥ न बहुत्वविवक्षया ॥ बहुवचनेन गौरवाविष्करणं तु प्रणिपातपरिप्रश्नशुश्रूषादिषु स्वारसिकप्रवृत्तिजननार्थेति वा ज्ञातव्यम् ॥ ३४ ॥

वि ॥ तत् आत्मविषयं ज्ञानं तेभ्यो लभस्व ॥ ज्ञानिनः तत्वदर्शिनश्च आचार्याः प्रणिपातपरिप्रश्नसेवाभिस्तुष्टास्तुभ्यमुपदेक्ष्यंति ॥ आत्मज्ञानं तु २ 'अविनाशि तु तद्विद्धि' इत्यादिना उपदिष्टमेव त्वया ॥ किमर्थं तदन्येभ्यो विद्धीत्युच्यते ॥ इति चेत् उपदिष्टमेव मया तत् ॥ अतएव इदमित्यनुक्त्वा तदित्युक्तं ॥ उपदिष्टमेव विशदं मया तुभ्यमात्मज्ञानं ॥ अवधानादिमांश्च भवान् तथापि न तत् अनादिकर्मोपार्जितैरनंतैः पापकपाटैः अंतःकरणरूपस्य तत्वज्ञानप्रसरद्वारस्योपरुद्धत्वात् इदानीं विशदं ३ बुद्धावारोहति ॥ यथावस्थितं विहितं युद्धादिकं कर्म

---

१. मुं. २. १२. २. आत्मज्ञानमेव प्रकृते विवक्षितं ॥ कर्मयोगान्तर्गतज्ञानस्यैव पूर्वश्लोकेऽभिधानात् ॥ आत्मज्ञानस्यैव कर्मयोगांतर्गतत्वात् ॥ उक्तं चैतत् ॥ 'व्यवसायात्मिके 'ति ॥ ३. अत्र, ये तु त्वदङ्घ्रिसरसीरुहभक्तिहीनाः तेषाममीभिरपि नैव यथार्थबोधः ॥ पितघ्नमंजनमनाप्नुषि जातु नेत्रे नैव प्रभाभिरपि शंखसितत्वबुद्धिः । इति श्लोकोऽनुसंधेयः ॥ अमीभिः न्यायादिभिः ॥

कुरु ॥ तेन निरस्तेषु पापेषु विशदं हृदयं संपत्स्यते ॥ तदा पूर्वोपदिष्टस्य सामान्यतो ज्ञातस्यार्थस्य ज्ञातांशसंवादाय अज्ञातांशज्ञानाय १विस्मृतप्रतिबोधनाय च भूयो बहुभ्यो गुरुभ्यः अस्मत्त एव वा २श्रवणं कृत्वा तत् ज्ञानमति विशदं कुरु ॥ ३४ ॥

अर्जुनः ॥ पञ्चमतिम. तां प्रयत्नेन लब्धेन ज्ञानेन किं स्यात् ॥ वद ॥

कृष्णः ॥ यत् ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव ॥
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ॥ ३५ ॥

यदिति ॥ हे पाण्डव यत् ज्ञानं ज्ञात्वा एवं मोहं पुनः न यास्यसि प्राप्स्यसि ॥ येन ज्ञानेन भूतानि अशेषेण शेषस्याभावः अशेषं तेन सर्वाणि भूतानीति यावत् ॥ आत्मनि द्रक्ष्यसि ॥ अथो अथ मयि द्रक्ष्यसि ॥ अथो आत्मनि व्याप्ते मयि द्रक्ष्यसि ॥ इति वा ॥ ३५ ॥

लब्धेनानेन ज्ञानेन प्रथमं मोहो निवर्तते ॥ पश्चात्तत्त्वज्ञानं च भविष्यति ॥ यत् ज्ञातव्यं शास्त्रं वा ज्ञानं वा ज्ञात्वा प्राप्य वा पुनरेतादृशं मोहं न प्राप्स्यसि ॥ इदानीं ज्ञानाभावात् अनात्मनि देहादावात्मत्वाभिमानरूपेण अकर्तरि कर्तृत्वाभिमानरूपेण अनात्मीये आत्मीयत्वाभिमानरूपेण अधर्मे धर्मत्वाभिमानरूपेण धर्मे अधर्मत्वाभिमानरूपेण च मोहशब्दितेन विपरीतज्ञानेन निर्मूलिताशेषविवेकविज्ञानस्त्वं गीताशास्त्रोदिता अशोच्यानशोचसि प्रज्ञावादांश्चाभाषथाः ॥ यद्युक्तविधया ज्ञानं लभेथाः तर्हि पुनरेवं मोहं नाप्नुयाः ॥ इदमेकं फलं ॥ इतोऽप्यन्यदेकं विशिष्टं फलं पश्य ॥ अथो उक्तरीत्या मोहनाशाद्धेतोः अथो मोहनाशानंतरं इति वा उचितविहितकर्मयोगकरणलब्धचित्तशुद्ध्या लब्धेन सम्यग्ज्ञानेन अशेषेण सर्वाणि भूतानि आत्मनि अंतर्यामिणि व्याप्ते वा आदानादिकर्तरि वा मयि वासुदेवे द्रक्ष्यसि ॥ सर्वाणि ब्रह्मादिस्तंबांतानि भूतानि सर्वांतर्यामिणं मामाश्रित्य

---

१. अतएव अनुगीतादेः प्रवृत्तिः ॥ २. अतएव 'नेह भूयोन्यत् ज्ञातव्यमवशिष्यते' ॥ (७. २.) इति वक्ष्यति ॥ नतु श्रोतव्यमवशिष्यत इति ॥

सूत्रमणिन्यायेन लब्धसत्ताकानि द्रक्ष्यसि ॥ एतादृशमोक्षहेतुभूतविशिष्टज्ञानवान् भविष्यसि ॥ तत्तेभ्यो विद्धि ॥ अन्यस्याप्येवं ज्ञानेन मोहनिवृत्तिः सम्यग्ज्ञानेन मोक्षसिद्धिश्च भवति ॥ अतस्सर्वैर्महता यत्नेन ज्ञानं संपाद्यम् ॥

अ ॥ ज्ञानेनानेन अशेषाणि भूतानि ब्रह्मादिस्तंबपर्यन्तानि स्थावरजंगमात्मकानि आत्मनि त्वयि द्रक्ष्यसि ॥ शुक्तौ रजतमिव त्वयि तानि कल्पितानि त्वद्ज्ञानविजृंभितानि ज्ञास्यसि ॥ अथो परमात्मनि मयि कल्पितानि मद्ज्ञानविजृंभितानि ज्ञास्यसि ॥ सर्वस्य जगतः अधिष्ठानयाथात्म्याज्ञानेन तत्र कल्पितत्वं निश्चित्य अधिष्ठानत्वेन प्रतीतस्य क्षेत्रज्ञस्य परब्रह्मणो मम च एकत्वं निश्चित्य तेन ब्रह्मात्मैक्यविज्ञानेन मुक्तो भविष्यसि ॥ भूतानि [1] आत्मनि द्रक्ष्यसि ॥ तमात्मानं मयि मदभिन्नं द्रक्ष्यसीति वा ॥ उपास्योपासकभावेन प्रतीयमानयोः परमात्मजीवात्मनोरैक्यनिश्चयः प्रथमं न जायेतेति आत्मैक्यब्रह्मैक्यदर्शनयोः क्रमेण निर्देशः ॥ मध्ये अथोशब्दप्रयोगश्च ॥ सर्वाणि भूतानि २ 'पितृनथपितामहा'-नित्युक्तान् बंधून् स्वाज्ञानकल्पितानि ज्ञात्वा ततः मद्ज्ञानकल्पितानि ज्ञास्यसि ॥ अतः न पुनरेवं मोहं यास्यसि ॥ अज्ञानकल्पितस्य शुक्तिरजतादेर्नाश इव अधिष्ठानभूताऽऽत्मपरमात्माज्ञानकल्पितानां शुक्तिरजतादिवत् अदृष्टदृष्टनष्टस्वरूपाणां बंधूनां नाशे खेदो न कार्य इति स्वयमेव ज्ञास्यसीति वा ॥

वि ॥ इदं कर्मयोगांतर्गतं आत्मज्ञानं कर्मयोगलब्धातःकरणशुद्ध्या तेभ्यस्तेभ्यो विशदं लब्ध्वा देहात्माभिमानरूपं मोहं एवं पुनर्न प्राप्स्यसि ॥ किंच अनेन ज्ञानेन सर्वाणि भूतानि सर्वान् अचित्संसृष्टानात्मनः स्वात्मनि स्वात्मसादृश्येन द्रक्ष्यसि ॥ समं हि सर्वं प्रकृतिबंधविमुक्तं शुद्धमात्मवस्तु ॥ वक्ष्यते च ३ 'विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि ॥ शुनि चैव श्वपाके च पण्डिताः समदर्शिनः' ॥ इति ॥ ४ 'निर्दोषं हि समं ब्रह्मे'ति च ॥ अथ ज्ञानपरिपाकेन सर्वानात्मनः मयि मत्समान् द्रक्ष्यसि ॥ इतरात्मसाम्येन ईश्वरसाम्येन च स्वात्मानं साक्षात्करिष्यसि ॥ आत्मनां परस्परं साम्यं ईश्वरेण च साम्यं ॥ वैषम्यं तु अचिदंशगतं ॥ इति दृढनिश्चयः साक्षात्काररूपः संपत्स्यते ॥ ईदृशं

१. आत्मनि मयि आत्माभिन्ने मयि इति केचित् ॥ २. १. २६. ३. ५. १८. ४. ५. १९.

इदं ज्ञानं ॥ अतस्तत्तेभ्यो विद्धि ॥ आत्मनि मयि इत्यनयोः आत्मतुल्यानि मत्तुल्यानि इति कथमर्थो लभ्यते इति चेत् स्थालीगतेषु पुलाकेषु कंचिदादाय पक्वमिदमिति तस्मिन् दृष्टे अन्येपि स्थालीगताः पुलाकाः पक्वा इति साम्येन यथा दृष्टप्राया भवंति ॥ यथाच कुसूलादिनिहितेषु तंडुलादिराशिषु मुष्टिमेकमादाय ईदृशोऽयमिति तस्मिन् प्रदर्शिते अवशिष्टः सर्वोपि राशिः दृष्टमुष्टिमिततंडुलादिसाम्येन दृष्टप्रायो भवति ॥ यथाच व्यवहरंति दृष्टाः पुलाकाः दृष्टं तंडुलादिकं इति ॥ तथा आत्मनि निदर्शनभूते साक्षात्कृते ज्ञानाकारतया तत्समाः सर्वेऽपि दृष्टप्राया भवंति ॥ तथा निदर्शनभूते परमात्मनि दृष्टे तत्समास्सर्वेऽप्यात्मानो दृष्टप्राया भवंति ॥ १'तदा विद्वान् पुण्यपापे विधूय निरंजनः परमं साम्यमुपैति' ॥ इति शुद्धात्मनः ईश्वरसाम्यं श्रुतिर्वक्ति वक्ष्यते च ॥ २'इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ॥' इति ॥ ज्ञानाकारतया ईश्वरसमानां जीवानां परस्परसाम्यं न्याय्यमिति तदपि श्रुतिसिद्धम् ॥ ३५ ॥

अर्जुनः ॥ स्यादिदं सर्वं यद्यहं निष्पापः स्यां ॥ न तथा ॥ अहं तु कृतपापः ॥ करोमि चेदानीं पापानि ॥ कुर्यां चेतःपरमपि ॥ एवं प्राप्तव्यपदप्राप्तेः प्रतिबंधके महति वृजिनार्णवे मग्नोऽहं कथं ज्ञानिभ्यो ज्ञातव्यं ज्ञात्वा तेन लब्धेन महता ज्ञानेन परमप्राप्यं मोक्षस्थानं ३'सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदं ॥' इति श्रुत्युक्तरीत्या संसाराध्वनः परपारभूतं प्राप्नुयां ॥ ब्रूहि ॥

कृष्णः ॥ अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः ॥
सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि ॥ ३६ ॥

अपीति ॥ त्वं सर्वेभ्यः पापं एषां अस्तीति पापाः तेभ्यः पापानि करोतीति पापकृत् अतिशयेन पापकृत् पापकृत्तमः असि चेदपि ॥ सर्वं वृजिनं पापं ज्ञानमेव प्लवः उडुपं ज्ञानप्लवः तेन ज्ञानप्लवेनैव सं सम्यक् तरिष्यसि ॥ ३६ ॥

श्रृणु पार्थ ज्ञानस्य माहात्म्यं ॥ ये महापातकोपपातकादिसर्वविधसकल-

१. मुं. ५. १. ३. १४. २. ३. का. ३. ९.

पापकारिणः तेभ्यः सर्वेभ्योऽपि त्वं अतिशयेन पापानि कृतवान् कुर्वन् करिष्यन् असि चेदपि ॥ यद्यपीदं असंभावितं तथाऽपि ज्ञानमाहात्म्यबोधनाय अभ्युपेत्योच्यते ॥ 'चेदपि' इत्येतत् असंभावनाभ्युपगमप्रदर्शनार्थं ॥ सर्वं वृजिनशब्दित. १पापार्णवं २ज्ञानरूपनौकयैव सम्यक् अनायासेन तीर्त्वा परपारप्राप्तिर्यथा स्यात्तथा तरिष्यसि ॥ दृढां नावमाश्रितो यथा प्रतिबंधकं प्रवाहं तीर्त्वा परं पारं प्राप्नोति तथा ज्ञातव्यं ज्ञात्वा लब्धेन महता ज्ञानेन प्रतिबंधकसकलविधपापार्णवं तीर्त्वा परपारभूतं मोक्षस्थानं प्राप्स्यसि ॥ मामैषीः ॥ ज्ञानं लभस्वेत्युच्यते ॥ युद्धं कुर्विति निर्बध्यते ॥ किं तेन ज्ञानेन कृत्यं ॥ यद्यहं त्वद्वचनेन युद्धे प्रवर्तेय तर्हि भीष्मद्रोणादिवधजनितपातकी स्यां ॥ कथं वृजिनस्य तरणमिति चेत् सर्वमपि पापार्णवं ज्ञानप्लवेन संतरिष्यसि ॥ किमुत भीष्मादिवधजानितमल्पं पापं ॥ युद्धस्य धर्मत्वात्पापप्रसक्तिरेव नास्ति ॥ तथाऽपि अभ्युपेत्य वादोयमिति च॥३६॥

अर्जुनः ॥ यथा नावमाश्रितस्य अंतराले विद्यमानः प्रवाहः प्राप्तव्यप्राप्तेरप्रतिबंधकोऽपि स्वयमविनश्यन् विद्येतैव ॥ तथा ज्ञानं प्राप्तस्यापि तन्महिम्ना पापराशिराप्तव्याप्तेरप्रतिबंधकोऽपि स्वयमविनश्यन् विद्येतैव ॥ विद्यतामिति चेत् ३'नाभुक्तं क्षीयते कर्मे'ति न्यायात् अभुक्तस्य अक्षीणस्य पापस्य फलजनत्वावश्यंभावात्, मुक्तस्यापि पापफलानुभवप्रसंगः ॥ अत इदं सम्यक् ब्रूहि ॥

कृष्णः ॥ यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ॥
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥ ३७ ॥

यथेति ॥ सं सम्यक इत्थः दीप्तः अग्निः एधांसि काष्ठानि यथा भस्मसात् भस्म कुरुते ॥ हे अर्जुन तथा ज्ञानमेव अग्निः ज्ञानाग्निः सर्वाणि च तानि कर्माणि च सर्वकर्माणि तानि भस्मसात् कुरुते ॥ ३७ ॥

---

१. मुमुक्षोरनिष्टत्वात्पुण्यमपि पापशब्देनोच्यते ॥ २. अत्र तरणसाधनस्य ज्ञानस्य प्लवत्वरूपणेन तरणकर्मणः पापस्य अर्णवरूपणं गम्यते ॥ ३. 'नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ॥ अवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभं'॥ इति ब्रह्मवैवर्ते प्रकृतिखंडे ॥

न केवलं प्लव इव प्रवाहस्य ज्ञानं पापार्णवस्य तारकमात्र ॥ किंतु नाशकमपि ॥ अतो नानुपपत्तिः ॥ कथं ज्ञानं पापं नाशयतीति चेत् यथा प्रदीप्तोऽग्निः एकोऽपि अनेकानि काष्ठानि बलिष्ठानि निरवशेषं स्वरूपहानेन भस्मीकरोति तथा सद्गुरुमुखाच्छ्रुत्वा मत्वा ध्यात्वा यदपरोक्षज्ञानाख्यं ज्ञानं लभते तदेव काष्ठानामिव पापपुण्यात्मकानां प्रतिबंधकानां कर्मणां नाशकत्वादग्निः ॥ सोऽग्निः सर्वकर्माणि पुण्यपापात्मकानि निरवशेषं भस्मीकरोति ॥ अर्जुनत्वात्त्वं तथाविधज्ञानार्होऽसि ॥ कर्माणि आरब्धफलानि अनारब्धफलानि इति द्वेधा ॥ आद्यानि प्रारब्धानीत्युच्यंते ॥ द्वितीयानि तु अप्रारब्धानीत्युच्यंते ॥ तत्र ज्ञानं अप्रारब्धान्येव भस्मीकरोति ॥ प्रारब्धानि तु ज्ञानिनोऽपि भोगैकनाश्यानि ॥ १'तदधिगमउत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्' ॥ २'इतरस्याप्येवमसंश्लेषः पाते तु' ॥ ३'अनारब्धकार्ये एव तु पूर्वे तदवधेः' ॥ ४'भोगेन त्वितरे क्षपयित्वाऽथ संपत्स्यते ॥' इति सूत्राणि ॥ ५'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्यते ॥' इति श्रुतिः ॥ ज्ञानेन ६ अप्रारब्धानि नश्यंति ॥ आरब्धानि तु यावद्भोगसमाप्ति तिष्ठंति ॥ भोगश्च एकेन अनेकेन वा देहेन ॥ ७'विद्वानमृतमाप्नोति नात्र कार्या विचारणा ॥ अवसन्नं यदारब्धं कर्म तत्रैव गच्छति ॥ न चेद्बहूनि जन्मानि प्राप्यैवांते न संशयः ॥' इत्यभियुक्ताः स्मरंति ॥ ८पूर्वकर्मणां दाहेन नाशः उत्तरकर्मणां तु अश्लेषः ॥ पूर्वाणि संचितानीत्युच्यंते ॥ उत्तराणि तु आगामीनीति ॥ 'नाभुक्तं क्षीयते कर्म'इति तु अकृतप्रायश्चित्तं ज्ञानाग्निना अदग्धं च यत् कर्म तत्परमिति बोध्यम् ॥ ३७ ॥

कर्मनिर्हरणार्थं किं ज्ञानसंपादनायासेन ॥ अनायाससाध्यैः गंगादिदिव्यतीर्थज्ञानादिभिः सत्कर्मभिश्च कर्मनिर्हरणसंभवात् ॥ ब्रूहि

१. ४. १. १३. २. ४. १. १४. ३. ४. १. १५. ४. ४. १. १९. ५. छां ६. १४. २. ६. अप्रारब्धमपि इष्टं पुण्यं न नश्यति ॥ अनिष्टमेव नश्यति ॥ प्रारब्धयोरपि अल्पयोः पुण्यपापयोर्नाशो भवत्येव ॥ इत्यादिकमाकरादवसेयं ॥ ७. नारायणाध्यात्मे ॥ ८. 'तीर्थिनिल् तूशाहुं इति (तिरुप्पावै मायनै) गाथाऽनुसन्धेया ॥ अत्र यद्वक्तव्यं तत् शंकरभाष्ये 'य एनं वेत्ति पुरुषं' इति १३. १४. श्लोकव्याख्यानावसरे विस्तरेणोक्तम् ॥

कृष्णः ॥ न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ॥
तत्स्वयं योगसंसिद्धः कालेनाऽऽत्मनि विंदति ॥ ३८ ॥

नहीति ॥ ज्ञानेन सदृशं पवित्रं वस्तु इह न विद्यते ॥ हि प्रसिद्धं ॥ योगे योगेन वा सं सम्यक् सिद्धः योगसंसिद्धः कालेन आत्मनि तत् विंदति लभते ॥ ३८ ॥

ज्ञानेन सदृशं पवित्रं वस्तु इह लोके, लोके वेदे च इति वा ॥ अस्मिन् लोके परलोके च इति वा ॥ तपोयोगादिषु परिशुद्धिकरेषु मध्ये इति वा ॥ न विद्यते ॥ हि वेदशास्त्रादिषु प्रसिद्धमेतत् ॥ यस्मादिदमेव परमपवित्रं तस्मादेतद्रूपोऽग्निः सर्वकर्माणि भस्मीकरोतीति वा ॥ कुतोऽन्यस्य गंगास्नानादेः ज्ञानतुल्यं नास्ति इति चेत् गंगास्नानादीनि परमपावनानि पुण्यजनकान्येव ॥ 'अश्वमेधसहस्राणि वाजपेयशतानि च ॥ एकस्य गंगास्नानस्य कलां नार्हन्ति षोडशीं' ॥ इति स्मरंति ॥ तथाऽपि तानि पापमात्रनाशकानि ॥ नतु पुण्यनाशकानि ॥ प्रत्युत पुण्यजनकानि ॥ मुमुक्षोस्तु 'तदा विद्वान् पुण्यपापे विधूय निरंजनः परमं साम्यमुपैती'ति श्रुत्युक्तरीत्या पुण्यपापरूपोभयविधप्रतिबंधकनिवृत्तिरावश्यकी ॥ उभयनिवर्तकत्वं तु ज्ञानस्यैव ॥ नतु गंगास्नानादेरन्यस्य ॥ अत उक्तं ज्ञानेन तुल्यं पवित्रं न विद्यत इति ॥ उक्तं च उभयनिवर्तकत्वं ज्ञानस्य मया ॥ १'बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ॥' इति ॥ पापेनेव पुण्येन मोक्षप्रतिबंधोऽपि मुमुक्षोरनिष्ट एव ॥ २'षट्त्रिंशद्वर्षसाहस्रं रक्षिताऽब्या[illegible]दिभिः ॥ ततो गंतासि मत्स्थानं सर्वलोकनमस्कृतं' ॥ इत्याकारकभगवदनुग्रहलब्धाखंडभूमण्डलाव्याहतसाम्राज्यभोगानुभवहेतुभूतपुण्येन भगवता सह परमपदप्राप्तिप्रतिबन्धो ध्रुवस्यानिष्टो दृष्टः ॥ अमंस्त च स तमनुग्रहमनिष्टम् ॥ अशोचच्च ३'भवच्छिदमयाचेऽहं भवं भाग्यविवर्जितः ॥' इति॥ लोके प्रभुप्रकोप इव प्रभुप्रसादातिशयोऽपि विश्रामादानेन अनुबुभूषितकार्यानुभवप्रतिबन्धकः क्लेशावहो हि दृश्यते ॥ अतः

१, २, ५०. २. भाग. ४. ९. ३. भाग. ४. ९.

प्रतिबन्धकसामान्यनिरोधनिरूपणनिश्चितसामर्थ्यं ज्ञानमेवाभ्यर्थ्यं ॥ पापनिर्धूननेन शुद्धिं लब्धुकामो यथा झडिति गंगां गत्वा स्नात्वा विधूय पापानि लब्धशुद्धिरागच्छति ॥ तद्वत् प्रतिबंधकसामान्यं परिजिहीर्षुणा झडिति यत्र कुत्रापि गत्वा ज्ञानं संपाद्यमिति भाति ॥ तत्तु न शक्यं ॥ गंगास्नानादिरेव ज्ञानस्य पुरुषप्रयत्नासाध्यत्वात् ॥ अन्यथा सर्वेऽपि हि ज्ञानिनो भवेयुः ॥ अतः किं कार्यं इति चेत् महता कालेन योगं ज्ञानोपाये कर्मयोगे सम्यक् सिद्धिमान् सुनिष्पन्नकर्मयोग इति यावत् ॥ योगेन कर्मयोगेण समाधियोगेन च संसिद्धः निर्योग्यतामापन्न इति वा ॥ निःशेषविनष्टबाह्यवासनता संसिद्धिः तां प्राप्त इति वा ॥ महता कालेन तत् ज्ञानं आत्मनि स्वात्मनि परमात्मनि वा विषये आत्मनि स्वस्मिन् मनसि वा स्वयमेव तदर्थं स्वप्रयत्नं विनैव लभते ॥ गंगास्नानादिकमिव ज्ञानं झडिति न संपादयितुं शक्यं ॥ अपितु तदर्थं कर्मयोगः कार्यः ॥ तेन चित्तशुद्धिर्जायते ॥ ततः श्रुत्वा मत्वा ध्यात्वा च अपरोक्षज्ञाननिष्ठार्हो भवति ॥ तादृशयोग्यतापरिपाककाले स्वयमेव ज्ञानमुदेति ॥ वक्ष्यते च ॥ १'बहूनां जन्मनामंते ज्ञानवा'निति ॥ अतस्तदुपायभूतकर्मयोगादिसंपादनाय प्रयत्नः कार्यः ॥ महदिदं ज्ञानं कर्मयोगस्य फलं ॥ महांश्चासौ कर्मयोगो ज्ञानयोगस्योपायः ॥ अहो महिमा ज्ञानयोगकर्मयोगयोः ॥ ३८ ॥

अर्जुनः ॥ गत्वा गुरोः सविधं नत्वा तदीयचरणौ कृत्वा तस्य शुश्रूषां कृत्वा च विविधान् प्रश्नान् ज्ञानं संपाद्यमित्युक्तं ॥ नहि श्रवणादिभिरेव ज्ञानं लभ्येत ॥ मायया ऽपि तेषां करणसंभवाद्नैकांतिकानि तानि ॥ मायाविनो हिः कंचिदाचार्यमभिगच्छन्ति ॥ प्रणमन्ति च तं ॥ शुश्रूषन्ते च तमभिनयन्तो भक्तिं ॥ पृच्छन्ति च विविधं ॥ न ते तस्माद्ज्ञानं लभन्ते ॥ तेषां ज्ञानसंपिपादयिषाया अभावात् ॥ वस्तुतस्तमपहसितु मेव तेषां सा प्रवृत्तिः ॥ ज्ञानस्य ३ ऐकांतिकानि साधनानि ब्रूहि ॥

कृष्णः ॥ श्रद्धावान् लभते ज्ञानं तत्परः संयतेंद्रियः ॥
ज्ञानं लब्ध्वा परां शांतिमचिरेणाधिगच्छति ॥ ३९ ॥

श्रद्धावानिति ॥ श्रद्धा अस्यास्तीति श्रद्धावान् तत् परं प्रधानं यस्य सः तत्परः

---

१. ७. १९. २. व्यभिचरितानि ॥ ३. अव्यभिचरितानि ॥

मत्परः इति पाठे अहं परं प्रधानं वस्तु यस्य सः मत्परः सं सम्यक् यतानि निगृहीतानि इन्द्रियाणि यस्य सः संयतेंद्रियः ज्ञानं लभते ॥ ज्ञानं लब्ध्वा प्राप्य परां उत्तमां शांतिं सुखं अचिरेण शीघ्रं अधिगच्छति प्राप्नोति ॥ ३९ ॥

अस्ति गुरूपदिष्टं सर्वमित्यास्तिक्यबुद्धिः श्रद्धा ॥ शास्त्राचार्योपदेशविस्रंभजनितेष्टफलसाधनतानिश्चयहेतुका साधनानुष्ठानत्वरा वा ॥ तद्वान् ज्ञानं लभते ॥ १'अस्तीत्येवोपलब्धस्य तत्त्वभावः प्रसीदती'ति श्रुतिः ॥ अयं त्वव्यभिचरितो हेतुः ॥ श्रद्धावानपि कश्चिदालस्यादिना प्रणिपातशुश्रूषापरिप्रश्नादिकं न करोति ॥ न लभते च ज्ञानं ॥ अतः न श्रद्धामात्रेण कृत्यं ॥ तत्परेण च भवितव्यं ॥ तस्मिन् ज्ञानविवर्धने वा गुरुशुश्रूषादिज्ञानलब्ध्युपाये वा आसक्तः तत्परः ॥ तत्परो ज्ञानं लभते ॥ वक्ष्यते च ॥ ज्ञानसाधनेषु गुरुशुश्रूषादिकं २'आचार्योपासनं'मिति ॥ 'मत्पर' इति पाठे मदेकाचित्तो ज्ञानं लभते ॥ वक्ष्यते च ॥ ज्ञानसाधनेषु ॥ ३'मयि चानन्ययोगेन भक्तिरव्यभिचारिणी'ति ॥ मयि भक्तिरहितस्य मत्प्रसादैकलभ्यं ज्ञानं नोदेति ॥ अहमेव हि ज्ञानादेर्दाता ॥ वक्ष्यते च ॥ ४'ददामि बुद्धियोगं त'मिति ॥ ५'बुद्धिर्ज्ञानमसंमोह' इति ॥ ६'मत्तः स्मृतिर्ज्ञानमपोहनं चे'ति च ॥ ७'नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन ॥ यमेवैष वृणुते तेन लभ्यः तस्यैष आत्मा विवृणुते तनूं स्वां' ॥ इति श्रुतिः ॥ श्रद्धावानपि तत्परोऽपि मत्परोऽपि इंद्रियसंगतैर्विषयैराकर्षाद्विक्षिप्तचेताश्चेत् ज्ञानं न लभते ॥ अतः सम्यक् निगृहीतेंद्रियेण भवितव्यं ॥ संयतेंद्रियो ज्ञानं लभते ॥ वक्ष्यते च ॥ ज्ञानसाधनेषु ८'आत्मविनिग्रहः ॥ इंद्रियार्थेषु वैराग्य'मिति ॥ एतानि अव्यभिचरितानि साधनानि ॥ एतैरवश्यं ज्ञानं लभते ॥ एवं महता प्रयत्नेन लब्धस्य ज्ञानस्य फलं किमिति चेत् ज्ञानं लब्ध्वा परां उत्कृष्टां शांतिं मोक्षसुखं अचिरेणैव शीघ्रमेव अधिगच्छति ॥ प्रारब्धकर्माभावे देहांतरव्यवधानं विनैव ॥ प्रारब्धकर्मसत्वे तद्भोगाव्यवहितकाल एव प्राप्नोति ॥ परां लिंगदेहभंगोत्तरभाविनीं वा ॥ शांतिं निःशेषाविद्यातत्कार्य-

---

१. का ६. १३. अत्र, 'कहनुवारिकि' इति गाथाऽनुसन्धेया ॥ २. १३. ८. ३. १३. ११. ४. १०. १०. ५. १०. ४. ६. १५. १५. ७. का. २. २३. ८. १३. ८. ९.

निवृत्तिरूपां उपरतिं मुक्तिं वा ॥ शांतिं नित्यनिरतिशयसुखात्मिकां ब्रह्मात्मनाऽवस्थानलक्षणां विदेहमुक्तिं वा ॥ १ प्रकृतिबंधरहितशुद्धात्मस्वरूपानुभवसुखं वा ॥ ईदृशं ज्ञानं उक्तोपायैः संपाद्यम् ॥ ३९ ॥

अर्जुनः ॥ ज्ञानं संपाद्यमित्युक्तं ॥ श्रद्धावानित्यत्र साधनानुष्ठानत्वराघवक्षायां तेन तस्यावश्यकत्वमुक्तं ॥ तत्परइत्यनेन वा ॥ आस्तिक्यबुद्धिविवक्षायां अस्तिवा नवा एवंवा एवंवा इति संशयाभावस्यावश्यकत्वमुक्तं ॥ एषां त्रयाणां संपादनं नाऽनायाससाध्यं ॥ अतो नैव संत्वेतानि ॥ का तेन हानिः ॥ वद ॥

कृष्णः ॥ अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति ॥
नायं लोकोऽस्ति न परो न सुखं संशयात्मनः ॥ ४० ॥

अज्ञ इति॥ अज्ञः ज्ञानहीनः स च श्रद्धत्ते इति श्रद्दधानः श्रद्धावान् न श्रद्दधानः अश्रद्दधानः स च संशयः आत्मा स्वभावः यस्य संशयः आत्मनि मनसि यस्य वा संशयात्मा वि अधिकं नश्यति नाशं प्राप्नोति ॥ संशयात्मा यः तस्य संशयात्मनः अयं लोकः नास्ति ॥ परलोकः नास्ति ॥ सुखं नास्ति ॥ ४० ॥

अज्ञः वेदांतादिशास्त्रज्ञानरहितः मत्तो विरुद्धार्थकत्वात्तत्र विपरीतज्ञानवांश्च ॥ स च, जातेऽपि कथंचिद्ज्ञाने श्रद्धाशब्दिताऽऽस्तिक्यबुद्धिरहितः ॥ इदमेवं न भवतीति विपर्ययरूपनास्तिक्यबुद्धिलक्षणाश्रद्धासहितश्च साधनानुष्ठानत्वरारहितो वा ॥ स च, जातायामपि कथंचिच्छ्रद्धायां संशयसमुक्तमनाः ॥ स च, विनश्यति ॥ पुरुषार्थशून्यो भवति ॥ नरकाद्यनर्थं प्रतिपद्यते च ॥ त्रयोऽप्येते विनश्यंति ॥

---

१. वि. अचिरेणेत्यस्य लभते इत्यनेनाप्यन्वयः ॥ ज्ञानं कर्मयोगान्तर्गतं विपाकदशापन्नं साक्षात्कारऽऽत्मावलोकनशब्दितं अचिरेण लभते ॥ पूर्वं कालेनेत्युक्तिः द्वित्रादिदिनमाससाध्यत्वव्युदासाय ॥ अत्र अचिरेणेत्युक्तिः पृथग्भूतज्ञानयोगदेहांतरादिविलंबव्युदासाय ॥ उपदेशात् ज्ञानं लब्ध्वा तत्र श्रद्धावान् तद्विवृद्धिकामः कर्माणि कृत्वा तेन समेधितं विपाकदशापन्नं ज्ञानं लभते ॥ तल्लब्ध्वा अचिरेण आत्मानुभवसुखमश्नुते ॥ २. संशयः आत्मनि यस्येति वा ॥ वि ॥ संशय्यते अनेनेति संशयः संशयकारणभूत आत्मा मनो यस्येति वा संशये आत्मा मनो यस्येति वा विग्रहः ॥

तत्रापि संशयात्मा अधिकं विनश्यति ॥ यथा संशयालुर्विनश्यति न तथा अज्ञश्च अश्रद्दधानश्च ॥ संशयो हि पापीयान् ॥ एतत्सूचनायै संशयात्मा विनश्यति ॥ अज्ञश्च अश्रद्दधानश्च इति तयोः १ चशब्दसाहित्येन निर्देशः॥ कुत इति चेत् संशयात्मनः अयं मनुष्यलोकः नास्ति ॥ संशयालुत्वेन धनविद्याद्यार्जनदेहगेहाद्यभिमानशून्यत्वेन ऐहिकसुखं नास्ति ॥ परलोकः स्वर्गादिलोकः मोक्षश्च नास्ति ॥ सद्भावहेतुहेतुमद्भावादौ संशयेन धर्मज्ञानसंपादनाभावात् ॥ किंबहुना तस्य किमपि सुखं नास्ति ॥ सर्वत्र संशयालुत्वेन अशनशयनवपनादावप्यप्रवृत्तेः ॥ अज्ञस्य अश्रद्दधानस्य च परलोको नास्ति ॥ मनुष्यलोकः अशनशयनादिसुखं च वर्तते ॥ संशयात्मातु त्रितयहीनः सर्वभ्रष्टो भवतीति पापीयसी संशयात्मता ॥ भाविन्यन्यस्मिन् जन्मनि संशयात्मनो मानुषलोको नास्ति ॥ स्वर्गादिलोकश्च नास्ति ॥ अस्मिन् जन्मनि भोजनादिसुखं च नास्तीति वा ॥ अयं लोकः प्राकृतः धर्मार्थकामरूपत्रिवर्गपुरुषार्थः नास्ति ॥ परः अप्राकृतः मोक्षपुरुषार्थश्च नास्ति ॥ सर्वत्र संशयवत्त्वेन सुखलवोऽपि तस्य नास्तीति वा ॥ अतो ज्ञानं संपाद्यं ॥ अत्यधा च कर्तव्या ॥ संशयश्च दूरतः परिहरणीयः ॥ ४० ॥

अर्जुनः ॥ संशयादिदोषप्रहाणेन कर्मयोगादिकं कुर्वतः किं स्यात् ॥ वद ॥

योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयम् ॥
आत्मवन्तं न कर्माणि निबध्नन्ति धनंजय ॥ ४१ ॥

योगेति ॥ हे धनञ्जय पार्थ योगेन योगे वा सं सम्यक् न्यस्तानि कर्माणि येन सः योगसंन्यस्तकर्मा तं योगसंन्यस्तकर्माणं ज्ञानेन सम्यक् छिन्नः संशयः यस्य सं ज्ञानसंछिन्नसंशयः तं ज्ञानसंछिन्नसंशयं आत्मा परमात्मा मनः अप्रमादो वा अस्यास्तीति आत्मवान् तं आत्मवन्तं कर्माणि न निबध्नन्ति ॥ ४१ ॥

विवेकज्ञानेन संशयादिदोषान् दूरीकृत्य आत्मशब्दितः परमात्मा ऐहिकामुष्मिकसकलयोगक्षेमनिर्वाहकोऽस्तीति निश्चयेन तदेकाश्रयः योगेन भगवति मनोयोगे-

---

१. अत्र, अन्वाचये चशब्दः ॥ अन्यतरस्य आनुषंगिकत्वे अन्वाचयः ॥

फलसंगत्यागादिरूपोपायेन वा कर्माणि कृत्वा यो भगवति तेषां संन्यासशब्दितमर्पणं करोति तं योगसंन्यस्तकर्माणं योगाय ज्ञानयोगाय भगवति समर्पितकर्माणमिति वा ॥ योगे सित्थोपाये भगवति समर्पितसाध्योपायभूतकर्मवंतमिति वा ॥ 'योगो योगविदां नेता' इति सहस्रनामसु योगशब्दो भगवत्परः पठ्यते ॥ तेन ज्ञानयोगं प्राप्य तेन १'भिद्यते हृदयग्रंथिः छिद्यंते सर्वसंशयाः ॥ क्षीयंते चास्य कर्माणि तस्मिन् दृष्टे परावरे॥ इति श्रुत्युक्तरीत्या संछिन्नसर्वसंशयं निस्संशयतत्वज्ञानेन लब्धभगवद्भक्तियोगातिशयं प्रतिबंधकानि पुण्यपापात्मकानि कर्माणि न निबध्नंति ॥ कर्मणा जातेन ज्ञानेन मुक्तो भवति ॥ पार्थेदमवधारय ॥ ४१ ॥

अ ॥ २आत्मवंतं प्रमादरहितं उचितप्रयत्नवंतं अतएव ब्रह्मात्मैकत्वज्ञानेन छिन्नसर्वसंशयं अतएव तेन निःसंशयज्ञानयोगेन जगतः सर्वस्य स्वस्य च ब्रह्ममात्रत्वागाहिना सर्वस्य मिथ्यात्वनिश्चयात् निश्शेषत्यक्तपुण्यपापात्मककर्माणं कर्मसंन्यासं कृतवंतं ॥ ज्ञानाग्निनाशितसंचितागामिरूपपुण्यपापात्मकसर्वकर्माणं सं सम्यक् नि नितरां अस्तानि कर्माणि येन सः संन्यस्तकर्मा तं इति विग्रहः ॥ योगेन समत्वबुद्धियोगेन भगवदाराधनरूपयोगेन वा तस्मिन् समर्पितकृतविहितसर्वकर्माणमिति वा ॥ कृतानि लोकसंग्रहार्थानि विहितकर्माणि शरीरयात्रामात्रार्थानि चेष्टारूपाणि वा कर्माणि न निबध्नंति ॥ फलारंभं न कुर्वंति ॥ 'समग्रं प्रविलीयते' इत्युक्तरीत्या अकर्मतामापद्यंते ॥ तैरप्रतिबद्धो मुक्तो भवतीति यावत् ॥ तादृशज्ञानधनसंपादनार्होऽसि त्वम् ॥ ४१ ॥

वि ॥ योगः 'कर्मण्यकर्म यः पश्ये'दित्यादिनोक्तकर्मकरणप्रकारविषयकबुद्धियोगः तेन संन्यस्तकर्माणं कर्मसंन्यासं कृतवंतं नात्र संन्यासः स्वरूपत्यागः ॥ पूर्वापरविरोधात् ॥ किंतु ज्ञानाकारतापादनेन कर्माकारत्वतिरस्कारः ॥ यथावत्करणेन ज्ञानाकारतापन्नकर्माणमिति यावत् ॥ कर्मयोगांतर्गतात्मयाथात्म्यज्ञानेन पुनःपुनरभ्यस्तेन सम्यक्छिन्नात्मविषयकसर्वसंशयं गुरूपदिष्टतत्वार्थे दृढनिविष्टमनसं प्रतिबंधकप्राचीनानंतकर्माणि न निबध्नन्ति ॥ मुक्तो भवतीति परमप्रयोजनोपसंहारः ॥ ईदृशमिदं अंतर्गतज्ञानकं कर्म ॥ धनंजयेदमवधेहि ॥ ४१ ॥

१. का. ४. ९. २. आत्मैवास्ति अस्य नान्यदित्यात्मवान् सदा ब्रह्मनिष्ठावान् तं इति परे ॥

अर्जुनः ॥ अस्त्वेवं ज्ञानयोगकर्मयोगयोर्माहात्म्यं ॥ मया किं करणीयमिदानीं ॥ वद ॥

कृष्णः ॥ तस्मादज्ञानसंभूतं हृत्स्थं ज्ञानासिनाऽऽत्मनः ॥
छित्वैनं संशयं योगं आतिष्ठोत्तिष्ठभारत ॥ ४२ ॥

तस्मादिति ॥ हे भारत अर्जुन तस्मात् अज्ञानेन संभूतं जातं आत्मनः अज्ञानसंभूतं हृदि तिष्ठतीति हृत्स्थं एनं संशयं ज्ञानमेव असिः खड्गः ज्ञानासिः तेन ज्ञानासिना छित्वा योगः कर्मयोगः तं आतिष्ठ अनुतिष्ठ ॥ उत्तिष्ठ ॥ ४२ ॥

संशयस्य ऐहिकामुष्मिकपुरुषार्थभ्रंशहेतुत्वात् सर्वसुखविरोधित्वाच्च कर्मयोगानुष्ठानप्रवृत्तिप्रतिबंधकत्वाच्चं आत्मपरमात्मविषयकाज्ञानेन संजातं आत्मनः मनोगतं आत्मपरमात्मविषयकं एनं 'संशयात्मा विनश्यती'त्युक्तमहिमानं संशयं आत्मपरमात्मविषयकज्ञानरूपखड्गेन छित्वा निस्संशयस्त्वं ज्ञानयोगोपायभूतं १आत्मनः स्वस्य विहितं कर्मयोगं अनुतिष्ठ ॥ तदर्थं इदानीं उत्तिष्ठ ॥ युद्धाय सन्नद्धो भव ॥ संशयं छित्वा उत्तिष्ठ ॥ उत्थाय च कर्मयोगमातिष्ठ इति वा ॥ भाशब्दितब्रह्मविद्यारतत्वात् ज्ञानार्थं कर्म कर्तुं अर्होऽसि ॥ तत्रापि भरतकुलोत्पन्नत्वात् ॥ युद्धाख्यमेव तव विहितं कर्म त्वया कर्तव्यं ॥ अत उत्थाय तदेव युद्धाख्यं कर्म कर्तुमर्हसि ॥ तेन तव स्यादतिशयितं श्रेयः ॥ ४२ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
कृष्णार्जुनसंवादे ज्ञानकर्मयोगो नाम चतुर्थोऽध्यायः ॥ ४ ॥

इतीत्यादि पूर्ववत् ॥ ज्ञानकर्मणोः योगः प्रतिपाद्यत्वेन संबन्धः यस्मिन् सः ज्ञानकर्मयोगः इति नाम प्रसिद्धः चतुर्थोऽध्यायः इति संपूर्णः ॥

इति श्रीमल्लक्ष्मणाचार्यविरचिते भगवद्गीतोपन्यासदर्पणे चतुर्थाध्यायार्थ
प्रदर्शकः चतुर्थः प्रतिबिंबः ॥ ४ ॥

१. आत्मन इत्यस्य सर्वत्रान्वयः ॥

श्रीः

अथ पञ्चमोऽध्यायः

संजयः

एवं भगवतोक्तौ संन्यासकर्मयोगौ श्रुतवानर्जुनः महानुभावगुरुभीष्मद्रोणादि प्रतिद्वंद्वीभवनविमुखत्वाद्युद्धाख्यं नियतं कर्म [illegible]छुः उक्तयोः संन्यासकर्मयोगयोर्मध्ये अन्यतरस्य श्रेष्ठत्वे जिज्ञासिते संन्यासमेव श्रेष्ठं ब्रूयात् ॥ ततः तमेव श्रेष्ठमहमुररीकरोमि नावरं कर्मयोगमिति वक्तुं शक्यं ॥ इति मन्वानो गूढाभिसंधिर्भगवंतं पृच्छति ॥

अर्जुन उवाच ॥

संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि ॥ ॥
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥ १ ॥

संन्यासमिति ॥ हे कृष्ण कर्मणां संबन्धिनं कामादिवर्जनरूपं संन्यासं कर्मणां संन्यासं त्यागं कर्मणां संन्यासं ज्ञानयोगं पुनः कर्मणां योगं अनुष्ठानं च शंससि वदसि ॥ एतयोर्मध्ये यत् श्रेयः श्रेष्ठं सुनिश्चितं तत् मे ब्रूहि ॥ १ ॥

द्वे ॥ हे कृष्ण संन्यासं १ च २ कर्मणां योगं च वदसि ॥ इदानीमेवोक्तत्वेन सामीप्याद्वर्तमाननिर्देशः ॥ एतयोर्मध्ये यत् श्रेष्ठं तदेकं मम यथा निश्चयो जायेत तथा ब्रूहि ॥ अनेन किमुक्तंभवतीति चेत् एतावता प्रबंधेन त्वयोक्ते कर्मयोगे द्वावंशौ ॥ ईश्वरार्पणबुद्धया कर्मानुष्ठानरूपो विशेष्यांश एकः ॥ तदंगभूतः फल[illegible]कामादिवर्जनरूपः [illegible]ते विशेषणांशोऽपरः ॥ उभौ समुदितौ कर्मयोगः ॥

---

१. पुनःशब्दश्चार्थे ॥ २. कर्मणां संबंधिनं संन्यासं कर्मणां योगं इति पूर्वोत्तराभ्यामन्वयः ॥

तत्र विशेष्यांशः, १'योगस्थः कुरु कर्माणि' ॥ २'नियतं कुरु कर्म त्वं' ॥ ३'कार्यं कर्म समाचर' ॥ ४'तदर्थं कर्म कौन्तेय मुक्तसंगः समाचर' ॥ ५'कुरु कर्मैव तस्मात्त्वं' ॥ ६'आतिष्ठोत्तिष्ठ भारते'त्युक्तः ॥ विशेषणांशस्तु ७'संगं त्यक्त्वा धनंजय' ॥ ८'मुक्तस्संगस्समाचर' ॥ ९'तस्मादसक्तः सततं' ॥ १०'निराशोर्निर्ममो भूत्वा' ॥ ११'[illegible]' ॥ १२'कामसंकल्पवर्जिताः' ॥ १३'त्यक्त्वा कर्मफलासंगं' ॥ १४'गतसंगस्य' ॥ १५'यदृच्छालाभसंतुष्टः' इत्युक्तः ॥ तत्र किमुभयांशसंयोगेन [illegible] ॥ उतान्यतरानुष्ठानमप्यलं ॥ अलमिति चेत् अन्यतरः क उपादेयः ॥ योंऽशः श्रेयान् स उपादेय इति चेत् कोंशः श्रेयान् ॥ तमेकं सुनिश्चितं ब्रूहि ॥ मंदस्य मम यथा निश्चयज्ञानं उदियात् तथा वक्तव्यं ॥ बंधुत्वात् [illegible] माकुथाः परिहासं ॥ संदिग्धं विपरीतं च मावद ॥ पुण्यं पापं च कारयित्वा तत्फलानुभवार्थं पुण्यवतः पापिनश्च कर्षसि ॥ अतः कृष्णोसि ॥ यथा पुण्यं मे स्यात् पापं च न स्यात् तथा ब्रूहि ॥ १ ॥

अ ॥ हेकृष्ण कर्मणां संन्यासशब्दितं त्यागं शंससि ॥ पुनः कर्मणां १६'योगशब्दितमनुष्ठानं च कथयसि ॥ एतयोर्मध्ये यत् श्रेष्ठं तदेकं मे सुनिश्चितं यथातथा वद ॥ भवता यत् श्रेष्ठत्वेन सुनिश्चितं तन्मे ब्रूहि इति वा ॥ 'हे पार्थ १७'कर्मण्यकर्मयः पश्येत्' ॥ १८'ज्ञानाग्निदग्धकर्माणं' १९'शारीरं केवलं कर्म' ॥ २०'योगसंन्यस्तकर्माणं' ॥ २१'ज्ञानाग्निःसर्वकर्माणि' ॥ २२'सर्वं कर्माखिलं पार्थ' ॥ इत्यादिभिः विदुषः कर्मत्यागोऽभिहितः ॥ २३'योगस्थः कुरु कर्माणि' इत्यादिभिः २४आतिष्ठोत्तिष्ठ भारते'त्यनेन च अविदुषः कर्मयोगोऽभिहितः ॥ विद्वान् कर्माणि संन्यस्यतु ॥ अविद्वाननुतिष्ठतु ॥ को विरोधः ॥ किमर्थमेतयोरन्यतरस्य श्रैष्ठ्यं पृच्छसि ॥ यद्येकस्मै द्वावपि विहितौ स्यातां तर्हि परस्परविरोधादुभयोरनुष्ठानायोगेन श्रैष्ठ्यमन्यतरस्य ज्ञात्वा तदनुष्ठानाय प्रश्नोऽयं घटेत ॥ न च तथा॥ कुत इति

---

१. २. ४८. २. ३. ८. ३. ३. १९. ४. ३. ९. ५. ४. १५. ६. ४. ४२. ७. २. ४८. ८. ३. ९. ९. ३. १९. १०. ३. ३०. ११. ४. २१. १२. ४. १९. १३. ४. २०. १४. ४. २३. १५. ४. २२. १६. कर्मणामित्यस्य संन्यासयोगाभ्यामन्वयः ॥ १७. ४. १८. १८. ४. १९. १९. ४. २१. २०. ४. ४१. २१. ४. ३७. २२. ४. ३३. २३. २. ४८. २४. ४. ४२.

चेत् आत्मविदं प्रति उभयोरुपदेशो न घटते ॥ तस्य कर्मयोगासंभवात् ॥ अनात्मविदं प्रति उभयोरुपदेशो न घटते ॥ तस्य कर्मसंन्यासासंभवात् ॥ अतः विदुषः कर्मसंन्यासः अविदुषः कर्मयोगः इति व्यवस्थितावेमौ कर्मसंन्यासकर्मयोगौ ॥ अतः अन्यतरश्रैष्ठ्यप्रश्नोऽनुपपन्नः ॥ [illegible] कः श्रेयानिति वस्तुतत्वपरिज्ञानाय ममायं प्रश्नः ॥ नान्यतरपरित्यागेन अन्यतरस्यानुष्ठानाय ॥ एकस्मिन्नधिकारिणि उभयोरनयोर्युगपत्संभवायोगात् ॥ इति चेत् अविद्वदधिकारिककर्मयोगापेक्षया विद्वदधिकारिकः कर्मसंन्यासः श्रेयानिति विद्वदविद्वद्योग्यताभेदादेव ज्ञायते ॥ किमर्थं तद्ज्ञानाय प्रश्नः ॥ नहि ज्ञानाज्ञानयोर्मध्ये किं श्रेय इति प्रष्टव्यं ॥ अतः अन्यतरपरित्यागेन अन्यतरानुष्ठानायैव तवायं प्रश्नः इत्येव वाच्यं ॥ अधिकारिभेदेन व्यवस्थितयोरनयोः कर्मयोगसंन्यासयोर्युगपदेकत्र प्रसक्तेरेवाभावात् तवायं प्रश्नोऽनुपपन्न एव ॥ त्वंतु अनात्मविदसि ॥ अतस्त्वया कर्मयोग एवानुष्ठेयः ॥ किमनयोस्तारतम्यविचारेण इति चेत् निवेदयामि ममाशयं ॥ श्रोतव्यं कृपया ॥ विदुषः कर्मयोगो नास्त्येव ॥ तथा अविदुषः कर्मसंन्यासो नास्तीति न वक्तुं शक्यं ॥ अविदुषोऽपि कर्मसंन्याससंभवात् ॥ विदुषः कर्मसंन्यासवचनैः विदुषः कर्मसंन्यासो विधीयते ॥ नतु अविदुषः कर्मसंन्यासो नास्तीति निषिध्यते ॥ किंच १ 'एतमेव प्रव्राजिनो लोकमिच्छंतः प्रव्रजंति' ॥ २ 'शांतो दांत उपरतस्तितिक्षुः समाहितो भूत्वा आत्मन्येवाऽऽत्मानं पश्येत्' ॥ 'त्यजतैव हि तद्ज्ञेयं त्यक्तुः प्रत्यक् परं पदं' ॥ 'सत्यानृते सुखदुःखे वेदानिमं लोकममुं च परित्यज्याऽऽत्मानमन्विच्छे'दित्यादिभिरविदुषः कर्मसंन्यासो ज्ञानार्थः श्रूयते ॥ अतः कर्मयोग इव कर्मसंन्यासेऽपि अविदुषः कर्तृत्वमस्ति ॥ अतः कर्मयोगकर्मसंन्यासयोर्द्वयोरपि एकस्मिन्नविदुषि संभवेन तेन तयोर्युगपदनुष्ठानस्याशक्यत्वेन अन्यतरपरित्यागेन अन्यतरस्यैवानुष्ठातव्यत्वात् यच्छ्रेष्ठं तस्यैवानुष्ठेयत्वात् अवरस्य परित्यागेन श्रेष्ठस्यानुष्ठानार्थमन्यतरश्रैष्ठ्यजिज्ञासया मयायं प्रश्न उपपन्नः ॥ अनात्मज्ञं प्रति उभयोर्विधानादुभयोरप्यावश्यकत्वेन च क्रमादुभावप्यनुष्ठातव्यौ ॥ प्रथममेकमनुष्ठाय पश्चादन्योऽनुष्ठीयतां इति चेत् कः प्रथममनुष्ठेयः कः पश्चात् ॥

---

१. बृह. ६. ४. २२. २. बृह. ६. ४. २३.

यः श्रेयान् स हि प्रथममुपादेयः इति चेत् अतएव कः श्रेयानिति मम प्रश्नः ॥ अङ्गस्य मम कर्मसंन्यासकर्मयोगौ द्वावप्यनुष्ठेयतया प्रसक्तौ ॥ युगपदनुष्ठातुमशक्यौ ॥ क्रमादनुष्ठेयौ ॥ तयोरिदानीं मया कोऽनुष्ठेयः ॥ इति पृच्छामि ॥ दयया ब्रूहि ॥ १ ॥

वि ॥ हे कृष्ण कर्मणां संन्यासं १ ज्ञानयोगं प्रशंससि ॥ पुनः कर्मणां २ योगं अनुष्ठानं च प्रशंससि ॥ एतयोः ज्ञानयोगकर्मयोगयोर्मध्ये यत् श्रेष्ठं सुनिश्चितं श्रेष्ठत्वेन सम्यक् निर्णीतं तन्मे ब्रूहि ॥ कोऽर्थः प्रश्नस्यास्य इति चेत् द्वितीये प्रथमं कर्मयोगः तेन शुद्धांतःकरणस्य ज्ञानयोगः तेन चात्मावलोकनं इति ज्ञानयोगस्य साक्षादात्मावलोकनसाधनत्वेन प्रशंसा कृता ॥ ३ 'कर्मजं बुद्धियुक्ता हि' ॥ ४ 'यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ॥ तदा गंतासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥ श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ॥ समाधावचला बुद्धिस्तदा योगमवाप्स्यसि' ॥ इत्यादिना ॥ पुनः तृतीयचतुर्थयोः ज्ञानयोगयोग्येनापि कर्मयोग एव कर्तव्यः ॥ स एव ज्ञानयोगनिष्ठाव्यवधानं विनैव आत्मावलोकनं साधयति ॥ इति कर्मयोगस्य प्रशंसा कृता ॥ ५ 'कर्म ज्यायो ह्यकर्मणः' ॥ इत्यनेन ॥ ६ 'सदृशं चेष्टते इत्यारभ्य ७ 'कामरूपं दुरासदं' ॥ इत्यन्तेन ॥ ८ 'कृत्वाऽपि न निबध्यते ॥' इत्यनेनच ॥ तेन मे संशयः ॥ ज्ञानयोगकर्मयोगयोरुभयोरपि आत्मावलोकनहेतुत्वमुक्तं ॥ आत्मावलोकनार्थं किं ज्ञानयोगः कर्तव्यः उत कर्मयोगः इति ॥ यः श्रेष्टः स कर्तव्य इति चेत् आत्मावलोकनरूपफलैक्यादन्यतरस्य श्रैष्ठ्यासंभवात् ॥ तर्हि 'यच्छ्रेय एतयो'रिति अन्यतरश्रैष्ठ्यं कथं पृच्छसीति चेत् न फलतः श्रैष्ठ्यं पृच्छामि ॥ किंतु आत्मावलोकनसाधनयोः ज्ञानयोगकर्मयोगयोर्मध्ये कस्यानुष्ठानं सुकरं ॥ कः शीघ्रमात्मावलोकनं साधयेदिति सौकर्यात् शैघ्र्याच्च श्रैष्ठ्यमन्यतरस्य पृच्छामि ॥ पूर्णानंदघन भक्तजनमनःसंकटकर्षणशील कृष्ण कृपया मे वद ॥ १ ॥

१. कर्मणां सम्यक् न्यासः समाप्तिर्यस्मिन् सः कर्मसंन्यासः ज्ञानयोगः ॥ 'सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते' ॥ इति ह्युक्तम् ॥ २. कर्मणामित्यस्य संन्यासयोगाभ्यामन्वयः ॥ ३. २. ५१. ४. २. ५२. ५३. ५. ३. ८, ६. ३. ३३. ७. ३. ४३. ८. ४. १२.

संजयः ॥ एवं पार्थेन पृष्टो भगवान् सम्यगवगततदभिगूढाशयः तस्य प्रश्नस्योत्तरमाह ॥

श्रीभगवानुवाच

संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ ॥
तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते ॥ २ ॥

संन्यास इति ॥ संन्यासः कर्मणां योगः कर्मयोगश्च इत्युभौ निःश्रेयसं कुरुत इति निःश्रेयसकरौ मोक्षहेतू ॥ तयोः मध्ये कर्मणां सन्यासः कर्मसन्यासः तस्मात् कर्मयोगः तु एव विशिष्यते ॥ २ ॥

कामादिवर्जनरूपः संन्यासशब्दितो विशेषणांशः कर्मानुष्ठानरूपो विशेष्यांशश्चेत्येतौ द्वावपि मोक्षहेतू ॥ उभावीति किमर्थमिति चेत् ॥ उभौ निःश्रेयहेतू उभौ समुदितौ निःश्रेयसहेतू ॥ युगपदनुष्ठातुं शक्यौ च ॥ अतः अन्यतरश्रैष्ठ्यप्रश्नोऽनुपपन्नः ॥ अश्रेष्ठं विहाय श्रेष्ठस्य परिग्रहार्थं हि अन्यतरस्य श्रैष्ठ्यं प्रष्टव्यं ॥ नचात्र अन्यतरपरित्यागः शक्यते कर्तुं ॥ उभयोरप्यावश्यकत्वात् ॥ युगपदनुष्ठातुं शक्यत्वाच्च ॥ अन्यतरप्रहाणाय नायं श्रैष्ठ्यप्रश्नः ॥ युगपदनुष्ठातुं शक्यत्वात् ॥ किंतु वस्तुतत्वपरिज्ञानाय इति चेत् तयोः कामादिवर्जनरूपकर्मसंन्यासकर्मयोगयोर्मध्ये कर्मणां उपयोगो संन्यासशब्दितकामादिपरित्यागरूपो विशेषणांशः यः तस्मात्कर्मानुष्ठानरूपो विशेष्यांश एव [१] श्रेष्ठो भवति ॥ वस्तुतत्वपरिज्ञानाय प्रश्ने क्रियमाणे अभ्युदयहेतुकर्मकरणापेक्षया नरकाद्यनर्थप्राप्तिहेतुकामक्रोधादिवर्जनरूपं संन्यासमेव श्रेष्ठं ब्रूयात् ॥ उभयोर्युगपदनुष्ठातुं शक्यत्वेऽपि युगपदुभयानुष्ठाने श्रमापत्त्या श्रेष्ठं संन्यासमनुतिष्ठामि नावरं कर्मयोगमिति युद्धरूपं कर्म त्यक्तुं शक्यते इति तवाऽऽशयः ॥ नानेन पथा युद्धरूपकर्मयोगाच्चलितुं शक्यं ॥ कर्मयोग-

१. अतएव संन्यासशब्दो न संन्यासाश्रमपरः ॥ तथात्वे संन्यासात्कर्मयोगस्य श्रैष्ठ्यवचनानुपपत्तेः ॥

स्यैव [1]श्रेष्ठत्वात् ॥ अतः स एवत्वयाऽनुष्ठेयः ॥ तस्मादनुष्ठेयमेव स्वीयं कर्म सर्वैः ॥ २ ॥

अ ॥ कर्मसंन्यासः कर्मयोगश्च इत्येतावुभावपि ज्ञानोत्पत्तिद्वारा मोक्षहेतू ॥ अविद्वत्कर्तृकौ कर्मसंन्यासकर्मयोगौ द्वावपि ज्ञानद्वारा मोक्षहेतुभूतावेव ॥ अत उभावप्यावश्यकौ ॥ सति चैवं किमर्थमन्यतरस्य श्रैष्ठ्यं पृच्छसि ॥ न ह्यावश्यकयोरन्यतरस्य परित्यागो युक्तः ॥ कथं विरुद्धयोरेकदानुष्ठानं संभवतीति चेत् ॥ क्रमादनुष्ठीयेतामुभावपि ॥ तयोर्मध्ये इदानीं मयाऽनुष्ठेयः क इति चेत् तयोः कर्मसंन्यासकर्मयोगयोर्मध्ये कर्मसंन्यासापेक्षया कर्मयोग एव अशुद्धचित्तस्य तवेदानीं श्रेष्ठः ॥ अत इदानीं त्वया कर्मयोग एवानुष्ठेयः ॥ कर्मसंन्यासेऽनधिकारात् ॥ अनधिकारिणा अविदुषा साधनशून्येन सहसा विविदिषया हठात्संन्यासो न कर्तव्यः॥ अविदुषः समकाले कर्तव्यत्वेन प्राप्तयोः कर्मयोगकर्मसंन्यासयोस्तारतम्ये विचार्यमाणे सदसद्विवेकजन्यतीव्रवैराग्यतीव्रमोक्षेच्छायमनियमशमदमाद्यन्तरङ्गसाधनपौष्कल्यरहितात् केवलप्रैषमात्रोच्चारणरूपात् केवलात्संन्यासात् कर्मयोग एव श्रेष्ठः ॥ कर्मयोगः श्रद्धयाऽनुष्ठितः सदसद्विवेकादिसाधनोत्पादनद्वारा संन्यासेऽधिकारमुत्पादयति ॥ अतः संन्यासस्य स्वरूपलाभः कर्मणेति संन्यासात्कर्मयोगस्य श्रैष्ठ्यं ॥ कर्मणा हि ऋणत्रयनिवृत्तिः तज्जन्यः इंद्रादिदेवताप्रसादः ईश्वरप्रसादः इंद्रियप्रसादः चित्तशुद्धिः इत्येवमादीनां ज्ञानसाधनानां संपत्तिः संभवति ॥ अतो निष्प्रमादः कर्मयोगः ॥ सप्रमादः कर्मसंन्यासः ॥ सदसद्विवेकादिसाधनसामग्रीविरहादवशीकृतैरिंद्रियैर्मनसः आकर्षणसंभवात् ॥ उक्तं हि मया ॥ २'इंद्रियाणि प्रमाथीनि हरंति प्रसभं मनः' ॥ इति ॥ कर्मयोगः साक्षाद्वा संन्यासद्वारा वा चित्तशुद्धिद्वारा श्रवणादिभिर्ज्ञानसाधनं भवति ॥ अतः स विशिष्यते ॥ विविदिषया संन्यासस्वीकारेच्छायां सत्यामपि कर्मयोगमनुष्ठाय तेन चित्तशुद्धिवैराग्यादिसाधनवान् भूत्वा संन्यासं कुर्यात् ॥ अतः अशुद्धचित्तस्वभिदानीं कर्मयोगमेवानु-

---

१. संन्यासादित्यनुक्त्वा कर्मसंन्यासादित्युक्त्या नाथं कामादिवर्जनरूपः संन्यासः स्वतंत्रः ॥ किंतु कर्माङ्गभूतः कर्मस्वरूपनिष्पत्त्यर्थः ॥ अंगांगिनोर्मध्ये अंगापेक्षया अंगिनः श्रेष्ठत्वात् कर्मयोगस्य उक्तरूपसंन्यासाच्छ्रेष्ठत्वं युक्तमिति सूच्यते ॥ २. २. ६०.

तिष्ठ ॥ मा ते संन्यासे मतिर्भूयात् ॥ संन्यासो द्विविधः ॥ अविद्वत्संन्यासः विद्वत्संन्यासश्चेति ॥ विद्वत्संन्यासस्तु नात्र प्रश्नोत्तरयोर्विषयः ॥ कर्मयोगाधिकृतेऽविदुषि तस्य अप्रसक्तेः ॥ अविद्वत्संन्यासोपि द्विविधः ॥ विविदिषाख्यज्ञानेच्छासहितः तद्रहितश्चेति ॥ ज्ञानेच्छासहितः संन्यासो विविदिषासंन्यास इत्युच्यते ॥ स च विविदिषासंन्यासाख्यः संन्यासः अनयोः प्रश्नोत्तरयोर्विषयः ॥ निश्रेयसहेतुत्ववचनात् ॥ ज्ञानेच्छारहितस्तु संन्यासः रागद्वेषादिभिः औत्सुक्येन च क्रियमाणः पातित्यहेतुर्भवति ॥ उक्तं हि मया ॥ १'न च संन्यसनादेव सिद्धिं समधिगच्छति'॥ इति २'मिथ्याचारः स उच्यते'॥ इति च॥ सोऽपि नानयोः प्रश्नोत्तरयोर्विषयः ॥ निश्रेयसहेतुत्ववचनानुपपत्तेः ॥ तस्मात् विविदिषासंन्यासस्य कर्मयोगाच्छ्रैष्ठ्यं मत्वा पृच्छसि ॥ सत्यं ॥ विविदिषासंन्यासः कर्मयोगाच्छ्रेष्ठ एव ॥ तथाऽपि कर्मयोगाकरणे विविदिषासंन्यासस्वीकारानधिकारात् कर्मयोगेन चित्तशुद्धिप्राप्त्यनंतरमेव तत्र अधिकारोदयात् अविरक्तादशायामस्यां संन्यासापेक्षया कर्मयोग एव तव श्रेयान् ॥ अतः 'कर्मयोगो विशिष्यते' ॥ इत्युच्यते ॥ अस्तु ॥ अविदुषोऽपि विरक्तादशायां संन्यास एव हि श्रेयान् ॥ अतः कथमुच्यते 'संन्यासात्कर्मयोगो विशिष्यते ॥' इति सामान्येन ॥ इति चेत् अविरक्तादशायां अविदुषः संन्यासेऽनधिकारात् संन्यासात्कर्मयोगः स्वाधिकारानुगुणः श्रेयानिति युक्तं ॥ विरक्तादशायां तु अविदुषः कर्मयोगात् संन्यास एव स्वाधिकारानुगुणः श्रेयान् ॥ यस्य यदा यः स्वाधिकारानुगुणः तस्य तदानीं सएव हि श्रेयान् ॥ 'संन्यासात्कर्मयोगो विशिष्यते' ॥ इत्युक्तिस्तु 'नहिनिंदान्यायेन कर्मयोगस्तुत्यर्था ॥ इति ज्ञातव्यं ॥ ३ संन्यासकर्मयोगयोर्मध्ये श्रेष्ठं ब्रूहीत्यापाततः प्रश्नस्तव ॥ यद्येकं प्रतिकर्मयोगकर्मसंन्यासावुक्तौ स्यातां तर्हि युगपदनुष्ठानासंभवेन अन्यतरपरित्यागार्थं अन्यतरश्रैष्ठ्यप्रश्नो युज्येत न तथा ॥ किंतु आत्मविदं प्रति संन्यास उक्तः अनात्मविदं भवंतं प्रति कर्मयोग उक्तः ॥ अधिकारिभेदेन तावुभावपि साक्षात् परंपरया वा मोक्षहेतू ॥ अतः उभावपि श्रेष्ठौ ॥ अतः अन्यतरश्रैष्ठ्यप्रश्नोऽनुपपन्नः ॥ न हि राजगृहस्वगृहयोरन्यतरश्रैष्ठ्यप्रश्नो युज्यते ॥

१. ३. ४. २. ३. ६. ३. केचित् ॥

स्वगृहपरित्यागेन राजगृहस्वीकारयोग्यताऽभावात्॥ एकस्यैव अज्ञानदशायां कर्मयोगः ज्ञानदशायां कर्मसंन्यासः इति क्रमसमुच्चितयोः कर्मयोगकर्मसंन्यासयोर्मध्ये तवेदानीं संन्यासापेक्षया कर्मयोगः श्रेयान् ॥ अतस्त्वमिदानीं कर्मयोगमातिष्ठ ॥ २ ॥

वि ॥ संन्यासशब्दितो ज्ञानयोगः कर्मयोगश्च इत्युभावपि साक्षात् आत्मावलोकनसाधनभूतौ ॥ तर्हि द्वयोः साम्येन द्वावप्यनियमेन यथेच्छमुपादेयौ स्यातां इति चेत् तयोः ज्ञानयोगकर्मयोगयोर्मध्ये कर्मसंन्यासशब्दितज्ञानयोगापेक्षया कर्मयोग एव विशिष्यते ॥ साक्षादेकफलसाधनयोर्द्वयोरन्यतरस्य श्रैष्ठ्यं कथमिति चेत् सौकर्यात् शैघ्र्यात् अप्रमादत्वाच्च कर्मयोगस्य श्रैष्ठ्यं ॥ अतः तव ज्ञानयोगशक्तत्वेऽपि कर्मयोग एव आत्मावलोकनसाधने श्रेयानुपायः ॥ अतस्त्वया कर्मयोग एवानुष्ठेयः ॥ २ ॥

द्वै ॥ अर्जुनः ॥ यदि कामादिवर्जनरूपसंन्यासापेक्षया कर्मयोग एव श्रेयान् तर्हि स एकएवोपदिश्यतां ॥ किमर्थं कर्मयोगादवरः संन्यासोऽप्युपदिश्यते ॥ अनावश्यकः संन्यासः ॥ कर्मयोगमात्रेण मोक्षसिद्धेः ॥ वद ॥

कृष्ण ॥ ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न कांक्षति ॥
निर्द्वंद्वो हि महाबाहो सुखं बंधात्प्रमुच्यते ॥ ३ ॥

ज्ञेय इति ॥ यः न द्वेष्टि न कांक्षति सः कर्मयोगी नित्यं सन्यासी संन्यासः अस्यास्तीति संन्यासी संन्यासवानेव ज्ञेयः ॥ हे महाबाहो द्वंद्वेभ्यः निर्गतः निर्द्वंद्वः सः सुखं अनायासेन बंधात् प्रमुच्यते ॥ हि प्रसिद्धमिदं ॥ हि यस्मात् तस्मात् इति वा ॥ ३ ॥

यस्य द्वेषः कामश्च नास्ति यश्च शीतोष्णसुखदुःखादिद्वंद्वनिमित्तकहर्षशोकादिरहितः सः नित्यसंन्यासी नित्यं नियमेन संन्यासी संन्यासवान् ज्ञेयः ॥ रागद्वेषशीतोष्णसुखदुःखादिवर्जनमेव संन्यासशब्दार्थः प्रकृते न यत्याश्रमादिः ॥ उक्तरूपसंन्यासवान् यः कर्मयोगी सः प्रकृतिबन्धात् अनायासेन शीघ्रं मुच्यते ॥ संन्यासो न यत्याश्रमः ॥ तथात्वे संन्यासात्कर्मयोगस्य श्रैष्ठ्यवचनमनुपपन्नं ॥ अतः

अत्र संन्यासः कामादिवर्जनमेव ॥ स च कर्माङ्गभूतः ॥ अङ्गभूतात्संन्यासात्कर्मयोगः श्रेयानिति श्रैष्ठ्यवचनमुपपद्यते ॥ इति वक्तुं संन्यासशब्दार्थस्य स्पष्टीकरणं कृतं ॥ यदि अकृत्वा संन्यासं कर्मयोगमात्रं क्रियेत तर्हि तन्मात्रेणैव मोक्षस्स्यात् ॥ तथाऽपि कामादिभिः कर्मणां वीर्यं ह्रसेत ॥ वीर्यह्रासे च शीघ्रमनायासेन मोक्षो न सित्ध्येत् ॥ यदि संन्यासस्सहितः कर्मयोगः क्रियेत तर्हि प्रतिबंधकाभावात् कर्म वीर्यवत्तरं भवति ॥ तेन च शीघ्रमनायासेन च मोक्षः सित्ध्येत् ॥ अत आवश्यक एव विशेषणभूतः कामादिवर्जनरूपः संन्यासः ॥ महाबाहुत्वेन धीरस्त्वं बाह्यशत्रूनिव शमदमादीनंतःशत्रूनपि निग्रहीतुं समर्थोऽसि ॥ औषधसेवनं पथ्यसेवनं चेत्युभयमपि रोगशांतेस्साधनं ॥ अत उभयमप्यावश्यकं ॥ उभयानुष्ठानमसाध्यं इति चेत् अपथ्यवर्जनापेक्षया औषधसेवनमेव विशिष्यते ॥ न केवलापथ्यवर्जनाद्रोगनिवृत्तिः ॥ किंतु औषधसेवनादेव ॥ तर्हि औषधसेवनमात्रेणालमिति चेत् अलमेव तथाऽपि शीघ्रमनयासेन रोगनिवृत्तिर्न स्यात् ॥ अपथ्यसेवनादौषधे वीर्यह्रासे निर्वीर्येण औषधसेवनेन विलंबेन बहुकालमौषधसेवनतदर्थद्रव्यव्ययाद्यायासेन च रोगनिवृत्तिः स्यात् ॥ अतः अपथ्यवर्जनपथ्यसेवनसहितमेव औषधसेवनं आरोग्यकामैः कार्यमिति प्रसिद्धं लोके ॥ तद्वत् प्रकृतिबंधरूपरोगस्य शीघ्रमनायासेन निवृत्तये अपथ्यवर्जनसदृशकामक्रोधादिवर्जनरूपसंन्याससहितं औषधसेवनसदृशं कर्मयोगानुष्ठानमासेव्यतामखिलैः मोक्षकामैरकामैः ॥ ३ ॥

अ ॥ अर्जुनः ॥ 'संन्यासः कर्मयोगश्च निःश्रेयसकरावुभा'विति संन्यासस्येव कर्मयोगस्यापि निःश्रेयसहेतुत्वमुक्तं अयुक्तं ॥ 'कर्मणा बध्यते जंतु'रिति कर्मणो बंधकत्वस्मरणात् । अतः कथमिदं ।। वद ॥ अस्तुवा साम्यं ॥ 'कर्मयोगो विशिष्यते' इति तु कथं ॥ एकफलयोरुपाययोरन्यतरस्य श्रैष्ठ्यासंभवात् ॥

कृष्णः ॥ रागद्वेषादिहीनः १ द्वंद्वातीतश्च भूत्वा यः कर्म करोति सः २ कर्म-

१. द्वंद्वं स्त्रीपुंसयोर्मिथुनं तद्रहितः स्त्र्यादिपरित्यागी सुखं बन्धात्प्रमुच्यते ॥ इति केचित् ॥ द्वंद्वं सत्यानृतयोरात्मानात्मनोः मिथुनं परस्पराध्यासः तद्रहितः ॥ इत्यन्ये ॥ २. कर्मयोगीति कथं लभ्यते इति चेत् प्रकरणात् ॥ सनित्यसंन्यासी इत्येकं पदं ॥ नित्यैः कर्मभिः सहितः सनित्यः स चासौ संन्यासी चेति विवक्षणाद्वा ॥

योगी कर्म्यपि नियमेन १संन्यास्येव विज्ञेयः ॥ कथं कर्मी संन्यासी स्यादिति चेत् संन्यासीत्यस्य संन्यासितुल्य इत्यर्थः ॥ सादृश्यादभेदोपचारः ॥ मुखं चंद्र इति वत् ॥ उक्तरूपः कर्मयोगी संन्यासितुल्य इत्युक्त्या यथावदनुष्ठितः कर्मयोगः संन्यास-सदृशः इति लभ्यते ॥ केन सादृश्यमिति चेत् बंधात्प्रमुच्यते ॥ मोक्षहेतुत्वेन उभयोः सादृश्यं ॥ अतः संन्यासस्येव कर्मयोगस्यापि मोक्षहेतुत्वादुक्तं युक्तं ॥ 'कर्मणा बध्यते जंतु'रिति तु काम्यनिषिद्धकर्मविषयं ॥ अस्तूभयोः साम्यं कथं कर्मयोगो विशिष्यते इति कर्मयोगस्य श्रैष्ठ्यमुक्तमिति चेत् सुखं प्रमुच्यते ॥ सुकरत्वाद-प्रमादत्वाच्च कर्मयोगस्य तेन शीघ्रमनायासेन मोक्षः सिध्येत् ॥ न तथा अवि-द्वत्कृतसंन्यासेन ॥ दुष्करत्वात् सप्रमादत्वाच्च विलंबेन आयासेन च मोक्षः सिध्येत् ॥ अतः संन्यासात्कर्मयोगो विशिष्यते इत्युक्तं युक्तम् ॥ ३ ॥

वि ॥ अर्जुनः ॥ संन्यासशब्दितज्ञानयोगस्य निःश्रेयसहेतुत्वमुक्तं युक्तं ॥ कर्मयोगस्य तत्कथं ॥ ज्ञानयोगादवरत्वात् ॥ अस्तु वा साम्यं ॥ कर्मयोगो विशि-ष्यते इति कथं ॥ साक्षादेकफलसाधनयोरुपाययोरन्यतरस्य श्रैष्ठ्यासंभवात् ॥ ब्रूहि ॥

कृष्णः ॥ आरब्धेन कर्मणा रागद्वेषरहितः द्वंद्वातीतश्च सन् यः यथोक्तं कर्म करोति सः कर्मयोगी नियमेन संन्यासशब्दितज्ञानवानेव ज्ञेयः ॥ कुत इति चेत् यथावत्कर्मयोगकृत् तेन कर्मणैव ज्ञानयोगनिरपेक्षेण साक्षात् ज्ञानयोगनिष्ठाव्यव-धानं तत्संपादनायासं च विनैव शीघ्रमनायासेनबंधान्मुच्यते ॥ ज्ञानादवरस्यापि कर्मयोगस्य यथावदतिसम्यगनुष्ठितस्य साक्षादात्मावलोकनसाधनत्वेन साक्षा-दात्मावलोकनसाधनज्ञानयोगतुल्यत्वात् कर्मिणो ज्ञानिना सादृश्याभिप्रायेण ज्ञानी-त्युच्यते ॥ अतो 'निःश्रेयसकरावुभा'विति साक्षादात्मावलोकनसाधनत्वेन ज्ञान-कर्मणोस्साम्यमुक्तं ॥ अस्तु साम्यं कर्मयोगस्य श्रैष्ठ्यं कथमिति चेत् सुखं बंधात्प्रमुच्यते ॥ शैघ्र्यात् सौकर्याच्च कर्मयोगस्य श्रैष्ठ्यं ॥ अतः 'कर्मयोगो विशि-ष्यते' इति युक्तमुक्तम् ॥ ३ ॥

---

१. अत्र योगस्य विद्वत्संन्याससाम्यमुच्यते स्तुत्यर्थं ॥ यथावत्कर्मयोगमनुतिष्ठन् तेन विद्वत्सं-न्यासेनेव सुखं बंधात्प्रमुच्यते॥ योगस्य अविद्वत्कृतविविदिषासंन्याससाम्यमुच्यते॥ बंधात्प्रमुच्यते इति॥ सुखं प्रमुच्यते इति ततो विशेषः ॥ इति बहवः ॥

अ ॥ अर्जुनः ॥ कर्मयोगी बंधात्प्रमुच्यते इति 'संन्यासः कर्मयोगश्च निःश्रेयसकरावुभा'विति च कर्मयोगस्य मोक्षसाधनत्वमुक्तं ॥ तत्कथं ॥ १'नान्यः पंथा अयनाय विद्यते ॥ २'विद्यैवतुनिर्धारणा'दिति ज्ञानस्यैवमोक्षहेतुत्वप्रतिपादक श्रुतिसूत्रविरोधात् ॥ ज्ञानद्वारेति चेत् ३'अग्निमुग्धो ह वै धूमतांतः ॥ स्वं लोकं न प्रति प्रजानाती'ति कर्मणो ज्ञानहेतुत्वाभावप्रतिपादकश्रुत्या विरोधात् ॥ अतः कथं मोक्षसाधनं कर्मेत्युच्यते ॥ किंच ४ कामादिवर्जनरूपसंन्यासस्यैव मोक्षहेतुज्ञानसाधनत्वमुच्यते तत्रतत्र ॥ अतः ज्ञानाहेतुकर्मयोगापेक्षया ज्ञानहेतुभूतसंन्यासस्य श्रेष्ठत्वे वाच्ये तस्मादवरत्वं कथमुच्यते ॥ ब्रूहि ॥

कृष्णः ॥ सांख्ययोगौ पृथग्बालाः प्रवदंति न पण्डिताः ॥
एकमप्यास्थितः सम्यगुभयोर्विंदते फलं ॥ ४ ॥
यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ॥
एकं सांख्यं च योगं च यः पश्यति स पश्यति ॥ ५ ॥

सांख्येति ॥ सांख्यं च योगश्च सांख्ययोगौ ज्ञानयोगकर्मयोगौ पृथक् साध्यसाधनभावहीनौ भिन्नफलकौ वा बालाः प्रवदंति ॥ पण्डिताः न प्रवदंति ॥ उभयोर्मध्ये एकमपि सम्यक् आस्थितः अनुतिष्ठन् उभयोः फलं विंदते प्राप्नोति ॥ सांख्यं एषामस्तीति सांख्याः ज्ञानिनः तैः यत् स्थानं प्राप्यते तत् मोक्षस्थानं योगः एषामस्तीति योगाः कर्मयोगिनः तैरपि गम्यते प्राप्यते ॥ सांख्यं च योगं च यः एकं एकफलकं पश्यति सः पश्यति ज्ञानीत्यर्थः ॥ ४ ॥ ५ ॥

कर्मणः साक्षान्मोक्षहेतुत्वं नास्ति ॥ ज्ञानद्वारा मोक्षसाधनत्वमस्ति ॥ अतः निश्रेयससाधनत्वमुक्तं युक्तं ॥ उक्तश्रुत्या ज्ञानयोगकर्मयोगयोः साध्यसाधनभावो

---

१. तै. आ ३. १२. अत्र 'मावः पदव्यः पितरस्मदास्थिताः या यज्ञशालाऽऽसनधूमवर्त्मनां' ॥ (भाग. ४. ४.) इति श्लोकोऽनुसन्धेयः ॥ २. ३. ३. ४८. ३. तै. का. १. ११. ४. अत्र, 'न तस्य तत्वग्रहणाय साक्षात् वरीयसीरपि वाचः समासन् ॥ स्वप्ने निरुक्तया गृहमेधसौख्यं न यस्य हेयानुमितं स्वयं स्यात्' ॥ (भाग. ५. ११.) इति श्लोकोऽनुसन्धेयः ॥

नेति केचिद्वदंति इति चेत् सांख्ययोगौ ज्ञानयोगकर्मयोगौ पृथक् साध्यसाधनभावहीनौ इति बाला वदंति ॥ पण्डिता न वदन्ति ॥ अतः कर्म ज्ञानं प्रति साधनमेव ॥ कुत इति चेत् उभयोर्मध्ये एकं सम्यगास्थितोऽपि फलं विंदते ॥ एकं सम्यगाश्रितः उभयोरपि फलं विंदते ॥ किमुभयोः फलमिति चेत् मोक्षः ॥ यत् मोक्षस्थानं १ सांख्यशब्दितज्ञानयोगवद्भिः प्राप्यते तन्मोक्षस्थानं २ योगशब्दितकर्मयोगवद्भिरपि गम्यते ॥ अतः ज्ञानयोगः कर्मयोगश्च मोक्षैकफलकौ ॥ उभयमेकफलकं यः पश्यति स एव पश्यति ॥ अन्यस्तु न पश्यति ॥ अज्ञानी बालः॥ एतावताऽपि ज्ञानकर्मणोः कथं साध्यसाधनभाव उक्तो भवति इति चेत् अत्र ज्ञानकर्मणोरुभयोरपि मोक्षहेतुत्वमुच्यते ॥ तत्र ३ 'अपामसोममम्रता अभूम' इति श्रुत्यनुरोधात् कर्मणो मोक्षहेतुत्वं यदुच्यते तत् त्वदुक्तश्रुतिसूत्रविरुद्धम् ॥ अतः ४ 'भाक्तंवाऽनात्मवित्वात् तथाहि दर्शयति'॥ इति सूत्रानुसारेण मोक्षहेतुज्ञानजननद्वारा मोक्षहेतुत्वं वाच्यं ॥ तादृशमोक्षहेतुत्वमेव 'कर्मणा ज्ञानमातनोति ज्ञानेनामृतीभवति अथामृतानि कर्माणि' इति श्रुत्या कर्मण उच्यते ॥ अतः ज्ञानयोगकर्मयोगौ साध्यसाधनभावापन्नावेव ॥ अतः तौ साध्यसाधनभावहीनौ वदंतो बालाः न पण्डिताः ॥ अतस्तद्वचनमकिंचित्करम् ॥ अतः ज्ञानं साक्षान्मोक्षसाधनं ॥ कर्म तु ज्ञानद्वारा मोक्षसाधनं ॥ अतः साक्षान्मोक्षसाधनज्ञानवत् परंपरया तत्साधनभूतकर्मणोऽपि मोक्षसाधनत्वानपायात् 'निश्रेयसकरावुभा'-विति मोक्षसाधनत्वमुक्तं ॥ 'अग्निमुग्धो ह वै धूमतांत'इत्यादिकं तु काम्यकर्मविषयम् ॥ अतो न विरोधः ॥ बाला वदंतीत्युक्त्यैव पण्डिता न वदन्तीति लाभे पंडिता न वदन्तीति पुनरुक्तिः दार्ढ्याय ॥ संन्यासस्येव कर्मणोऽपि उक्तरीत्या ज्ञानसाधनत्वात् तयोर्मध्ये कर्मयोगस्य अङ्गित्वात् संन्यासस्य तदंगत्वात् अंगस्य संन्यासस्य अंगिभूतकर्मयोगापेक्षया अवरत्वोक्तिः संन्यासादंगादंगिनः कर्मयोगस्य श्रैष्ठ्योक्तिश्च युक्ता॥ अतो न कोऽपि विरोधः ॥

संन्यासयोगशब्दौ यत्याश्रमगृहस्थाश्रमपरौ मत्वा उभयोरेकत्रसमावेशायोगात्

---

१. साङ्ख्यं एषामस्तीति सांख्याः ॥ २. योगः एषामस्तीति योगाः अच्प्रत्ययः ॥ ३. तै. सं. ३. ५. ४. ३. १. ७.

अन्यतरश्रैष्ठ्यं ब्रूहि इति मयाचोदिते न मदुक्तौ संन्यासयोगौ यत्याश्रमगृहस्थाश्रमौ किंतु कामादिवर्जनकर्मयोगौ ॥ अतएव संन्यासात्कर्मयोगस्य श्रैष्ठ्यवचनमुपपद्यते इति समाहितं त्वया ॥ अधुना संन्यासयोगशब्दौ यत्याश्रमप्रतिनियतज्ञानयोग-गृहस्थाश्रमप्रतिनियतकर्मयोगपरौ॥ तयोरेकत्रसमावेशायोगादन्यतरस्य श्रैष्ठ्यं ब्रूहीति मया पुनश्चोद्यते इति चेत् ज्ञानयोगकर्मयोगयोरेकस्मिन्नधिकारिणि न्यूनाधिकभावेन समावेशसंभवादुभयोरावश्यकत्वेन अन्यतरश्रैष्ठ्यप्रश्नो न घटेत इति ब्रवीमि ॥ ज्ञानकर्मयोगौ पृथक् ॥ यतिगृहिरूपाधिकारिभेदप्रतिनियतत्वेन भिन्नाधिकारिकौ इति बाला वदंति न पंडिताः ॥ उभयोर्मध्ये एकमपि ज्ञानं कर्म वा सम्यक् आश्रित एव फलं विंदते ॥ नासम्यगास्थितः ॥ ज्ञानस्य सम्यक्त्वं कर्मयोग-साहित्यम् ॥ कर्मयोगस्य सम्यक्त्वं ज्ञानयोगसाहित्यम् ॥ अतः एकस्मिन्नधिकारिणि ज्ञानकर्मणोर्द्वयोरपि न्यूनाधिकभावेन समावेशो युक्तः ॥ अतएव ज्ञानवद्भिः यत् स्थानं प्राप्यते तदेव योगवद्भिरपि प्राप्यते ॥ गृहस्थाश्रमप्रतिनियतकर्मयोगस्य ज्ञानयोगसमावेशाभावे ज्ञानिप्राप्यस्थानप्राप्तिः कर्मिणो न घटेत ॥ अतः ज्ञानं कर्म च एकस्मिन्नधिकारिणि समाविष्टं यः पश्यति स एव पण्डितः ॥ यद्युभयत्र उभयं स्यात् तर्हि ज्ञानी कर्मी इति व्यवस्था कथमिति चेत् न्यूनाधिकभावात् क्षीरनीरन्यायेन कर्मविस्तारवान् गृही ज्ञानविस्तारवान् यतिः इति व्यवस्थोपपत्तिः ॥ उक्तं चेदं मया ॥ १'ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनां' ॥ इत्यनेन ॥ अतोपि संन्यासयोगौ कामादिवर्जनकर्मयोगावेव ॥ ताधुभावप्यावश्यकौ ॥ तयोर्मध्ये कर्मयोग एव श्रेयान् ॥ तस्य संन्याससाहित्ये वीर्यमधिकं भवति ॥ अतः संन्यासेनांगेन सह अंगी कर्मयोगोऽनुष्ठेयः ॥ ४ ॥ ५ ॥

अ ॥ 'संन्यासः कर्मयोगश्च निश्रेयसकरावुभा'विति 'कर्मयोगी सुखं बन्धात्प्रमुच्यते' इति च यदुक्तं कर्मयोगस्य मोक्षसाधनत्वं तदनुपपन्नम् ॥ न हि संन्यासस्येव कर्मणोमोक्षहेतुत्वं संभवति ॥ कुत इति चेत् यथा कर्मतत्संन्यासयोः भिन्नपुरुषप्रतिनियतयोः भिन्नावस्थाप्रतिनियतयोर्वा स्वरूपे विरोधः तथा फलेऽपि विरोध उचितः ॥ अतः फलैक्यासंभवात् कर्मणोऽपि

---

१. ३. ३.

मोक्षसाधनत्वं मत्वा 'निश्रेयसकरावुभा' विति 'कर्मी बंधात्प्रमुच्यते इति च वचनमयुक्त ॥ क ब्रवीषि ॥

कृष्णः ॥ संन्यासकर्मयोगौ द्वावपि मोक्षरूपैकफलकावेव ॥ अतः उक्तं युक्तं ॥ फलभेदं केचिद्वदंतीति चेत् सांख्यं संन्यासः १ सांख्यशब्दो ज्ञानवाची लक्षणया तदंगक २ संन्यासपरः ॥ संख्या ज्ञानं तां वहति अन्तरंगसाधनतया इति सांख्यः संन्यासः ॥ सम्यक् ख्यायते प्रतिपाद्यते इति सांख्यं परं ब्रह्म तत्प्रापकत्वात्सांख्यः संन्यासः सांख्यं ज्ञानं तत्सहितः सांख्यः संन्यासः योगः समत्वबुद्धियोगः तत्सहितः योगः कर्मयोगः उभयत्र अस्यास्तीत्यर्थकोऽच्प्रत्ययः ॥ संन्यास कर्मयोगयोरेव उक्तविशेषणसंयोजनेन सांख्ययोगशब्दाभ्यां निर्देशः ॥ तौ पृथक् फलेन भिन्नौ भिन्नफलकौ इति बाला वदंति ॥ न पंडिताः ॥ कुत इति चेत् उभयोरनयोर्मध्ये एकं ३ वा सम्यगास्थितः अनुतिष्ठन् उभयोर्यत्फलं साक्षाद्ज्ञानस्य तदङ्गकसंन्यासस्य परंपरया च कर्मयोगस्य मोक्षरूपं तत्प्राप्नोति ॥ तदेव सम्यगुच्यते शृणु ॥ यत् स्थानं तिष्ठत्यस्मिन् न कदापि च्यवते इति व्युत्पत्या मोक्षाख्यं स्थानं ॥ तिष्ठति सदा एकरूपेण न कदाऽपि क्वचिदपि किंचिदपि विकरोतीति व्युत्पत्त्या अविक्रियमखंडैकरसं स्वात्मस्वरूपं वा ४ सांख्यैः सन्यासवद्भिः प्राप्यते तदेव स्थानं योगैः कर्मयोगवद्भिरपि ज्ञानद्वारा आप्यते ॥ अस्यास्तीत्यर्थे अच्प्रत्ययः॥ सांख्यैः प्राप्यते योगैः आप्यते इत्युक्त्या सांख्यानां साक्षात् योगानां परंपरयेति सूच्यते ॥ संन्यासं कर्मयोगं च उक्तरीत्या मोक्षैकफलकं यः पश्यति स एव ज्ञानी ॥ फलभेदं पश्यन् मूढः ॥ अत एव पृथक् प्रवदन्तो बालाः न पंडिता इत्युक्तं ॥

---

१. सं एकीभावेन जीवपरमात्मानौ ब्रह्मैवाहमिति ख्याप्येते प्रकाश्येते अनया इति संख्या ज्ञानं ॥ २. अत्र, संन्यासो विद्वत्संन्यासः नित्यसंन्यासीत्यत्र प्रस्तुतः ॥ इति केचित् ॥ विविदिषासंन्यासाख्यः अंगसंन्यासः ॥ वहति प्रापयति ॥ उभयोः फलं ज्ञानद्वारा ॥ विंदते ज्ञानद्वारा ॥ प्राप्यते गम्यते ज्ञानद्वारा ॥ एकं ज्ञानद्वारा मोक्षरूपैकफलकं ॥ इति केचित् ॥ सर्वमप्येवं नेयं ॥ इति बहवः ॥ ३. अपिशब्दार्थः ॥ ४. 'ज्ञानयोगेन सांख्याना 'मित्यत्रैव सांख्यं निर्विशेषं ब्रह्म तद्विदंतीति सांख्याः ज्ञानिनः संन्यासिनः तैः ॥ (३. ३.)

अतः संन्यासकर्मयोगयोः साक्षात् ज्ञानद्वारा च मोक्षहेतुत्वात् निःश्रेयसकरावुभावित्याद्युक्तं युक्तम् ॥ ४ ॥ ५ ॥

वि ॥ अर्जुनः ॥ 'संन्यासः कर्मयोगश्च निश्रेयसकरावुभा'विति ज्ञानयोगकर्मयोगयोः साक्षान्निश्रेयसशब्दिताऽऽत्मावलोकनसाधनत्वमुक्तं ॥ कर्मयोगी बंधात्प्रमुच्यत इति कर्मयोगस्य साक्षान्मोक्षशब्दितात्मावलोकनसाधनत्वमुक्तं ॥ तत्कथं ज्ञानयोगः साक्षादात्मावलोकनं साधयति ॥ कर्मयोगस्तु ज्ञानद्वारा इति हि वदंति ॥ द्वितीये त्वयाऽपि तथाह्युक्तं ॥ सतिचैवं कर्मयोगस्य साक्षादात्मावलोकनसाधनत्वं कथमुच्यते ॥ वद ॥

कृष्णः ॥ सांख्यं ज्ञानयोगः संख्या बुद्धिः तयाऽवधारणीयं आत्मतत्वं सांख्यं तद्विषयकं ज्ञानं सांख्यमिति व्युत्पत्तिः ॥ योगः कर्मयोगः तौ पृथक् फलतो भिन्नौ ये प्रवदंति कर्मयोगस्य फलं ज्ञानयोगः तस्य फलं आत्मावलोकनमिति फलभेदं ये वदंति ते बालाः न पंडिताः ॥ बालाः प्रवदंति पंडिता न प्रवदंति ॥ कुत इति चेत् उभयोरनयोर्मध्ये एकं आस्थितोपि उभयोरनयोः फलं आत्मावलोकनरूपं प्राप्नोति ॥ यत् स्थानं आत्मावलोकनरूपं फलं सांख्यैः ज्ञानिभिः सांख्यं आत्मज्ञानशास्त्रं तद्विद्वंतीति वा संख्या बुद्धिः तस्या इमे तन्निष्ठा इति वा सांख्यं आत्मतत्वं विदंतीति वा व्युत्पत्तिः ॥ प्राप्यते तदेव आत्मावलोकनरूपं फलं योगैः कर्मयोगवद्भिरपि प्राप्यते ॥ योगशब्दात् अस्यास्तीत्यर्थे अच्प्रत्ययः॥ अतः सांख्यं ज्ञानयोगं च कर्मयोगं च एकं एकफलकं यो जानाति स एव ज्ञानी ॥ अन्यस्तु मूढः ॥ अत एव ये वदंति ते बाला इत्युक्तं ॥ अतो 'निःश्रेयसकरावुभा'विति, कर्मयोगस्य साक्षादात्मावलोकनसाधनत्वमुक्तं युक्तं ॥ आत्मावलोकनरूपं परोक्षज्ञानफलं परोक्षज्ञानं विनैव सम्यगनुष्ठितेन कर्मयोगेनैव लभ्यते ॥ अतः समानफलः सुकरः शीघ्रश्च कर्मयोग एव आत्मावलोकनार्थं ज्ञानयोगाधिकृतेनापि कर्तव्यः ॥ ज्ञानयोगिभिर्ज्ञानयोगेन लभ्यं यत्फलं तत् ज्ञानयोगरहितैः कर्मयोगिभिः कर्मणैव कथं लभ्येत इति चेत् ज्ञानं कर्म वा स्वयं फलं दातुं नालं जडत्वात् ॥ किंतु स्वविषयकज्ञानेन स्वविषयककर्मणा वा सन्तुष्टः फलदाता

प्रभुरीश्वरः ज्ञानागुणं कर्मानुगुणं वा फलं ददाति ॥ वक्ष्यते च ॥ १'यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततं ॥ स्वकर्मणा तमभ्यर्च्य सिद्धिं विंदति मानवः' इति ॥ यदि प्रभोरीश्वरस्य ज्ञानेनैव विनैव ज्ञानं सम्यक्कृतेन कर्मणैव सन्तोषः स्यात् तदा तेन कर्मणैव विनैव ज्ञानयोगव्यवधानं विनैव तत्संपादनाऽऽयासं ज्ञानफलं ददाति ॥ तदा कर्मैव ज्ञानाकारं भवति ॥ इदमेवोक्तं मया ॥ 'ज्ञेयः स नित्यसंयासी'ति ॥ ज्ञानैकलभ्यं फलं विनैव ज्ञानव्यवधानं तत्संपादनाऽऽयासं च कर्मिणे कथं दीयते इति चेत् मैवं दातव्यमिति फलदातारमीश्वरं को निवारयितुमीष्टे॥ कस्यांचिदास्थान्यां कश्चित् कस्याश्चित् परीक्षायाः फलभूत उद्योगो वर्तते जाततत्परीक्षपुरुषैकलभ्यः ॥ कश्चिदवरोऽधिकृतः असंजाततत्परीक्षः अहर्निशं यथावत् स्वविहितकर्मकृत् तेनैव कर्मणा लब्धवरिष्ठाधिकृतप्रभुप्रसादः तमुद्योगं तां परीक्षां तद्व्यवधानं तत्संपादनायासं च विनैव तेनैव कर्मयोगेन सन्तोषितस्य वरिष्ठस्य फलदातुः प्रभोः प्रसादेन लभते ॥ तस्य यथावदनुष्ठितं कर्मैव परीक्षाकारतामापद्यते ॥ तथा कर्मणो वीर्यवत्त्वे तदेव कर्म साक्षात् ज्ञानफलसाधनायालं ॥ कर्मणोवीर्यवत्त्वाभावे तस्य ज्ञानयोगप्राप्यफलसाधनसामर्थ्याभावात् महताऽऽयासेन ज्ञानं लब्ध्वा विलंबेन तत्फलं प्राप्तव्यं ॥ द्वितीये कर्मणा ज्ञानं तेन चाऽऽत्मावलोकनं इत्युक्तिः साधारणकर्मविषया ॥ तृतीयचतुर्थयोः विनैवज्ञाननिष्ठाव्यवधानं कर्मणैव साक्षादात्मावलोकनामित्युक्तिस्तु सांगोपांगतया यथावदनुष्ठितवीर्यवत्तरकर्मविषया ॥ कथं ज्ञानविधुरेण कर्मणा ज्ञानफलं प्राप्येत इति चेत् २'व्यवसायात्मिका बुद्धिरेका' ॥ ३'कर्मण्यकर्म यः पश्येत्' इत्याद्युक्तरीत्या निवृत्तिकर्मणोऽन्तर्गतज्ञानकत्वादंतर्गतं अगभूतं यत् ज्ञानं तदेवांगिभूतकर्मयोगमहिमभूम्ना अमहदपि महदिव महत्फलं साधयितुं शक्नोति ॥ करोति हि तिमिरनिरसनं अमहान्नूरुरङ्गभूतः अङ्गिभूतमहामहिमामिहिर महिम्ना ॥ अतः अन्तर्गतज्ञानकं निवृत्तिकर्मैव यथावदनुष्ठितं साक्षादेवाऽऽत्मावलोकनसाधनं ॥ अत उक्तं युक्तं ॥ कर्मयोगे प्रवृत्तस्य तस्मिन्नेव अङ्गतया ज्ञानयोगस्य सत्वात् न पृथक् ज्ञानयोगापेक्षा ॥ ज्ञानयोगे प्रवृत्तस्य तु तदर्थं हेतुतया कर्मकरणम् ॥ ४तदानीमपि

१. १८. ४६. २. २. ४१. ३. ४. १८. ४. ज्ञानयोगदशायामपि ॥

विहितकर्मानुष्ठानमित्युभयथा कर्मापेक्षा ॥ अतः कर्मयोग एव ज्यायान् ॥ इदमेवोक्तं मया ॥ 'कर्म ज्यायो ह्यकर्मण' इति ॥ तस्मात्त्वं कर्मैव कुरु ॥ ४ ॥ ५ ॥

अर्जुनः ॥ कर्मयोगस्येव संन्यासस्यापि ज्ञानसाधनत्ववदनादुभयोर्ज्ञानद्वारा मोक्षसाधनत्वेन 'निश्रेयसकरावुभा'वित्युक्तं युक्तं ॥ संन्यासस्य कर्मयोगादवरत्वं कथं ॥ अंगत्वादवरत्वमिति चेत् साक्षात् एकफलसाधनयोर्द्वयोः अङ्गाङ्गिभावो वा कथं ॥ ब्रूहि ॥

कृष्णः ॥ संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः ॥
योगयुक्तो मुनिर्ब्रह्म न चिरेणाधिगच्छति ॥ ६ ॥

संन्यासस्त्विति ॥ महांतौ बाहू यस्य सः महाबाहुः हे महाबाहो पार्थ न योगः अयोगः तस्मिन् अयोगतः योगस्य अभावे सन्यासः आप्तुं दुःखमेव ॥ दुःखं आप्तुमेव ॥ योगेन कर्मयोगेन युक्तः मुनिस्सन् न चिरेण शीघ्रं ब्रह्म अधिगच्छतिं ॥ ६ ॥

अयोगतः कर्मयोगाभावे केवलसंन्यासस्तु दुःखं प्राप्तुमेव साधनं भवति ॥ नतु ज्ञानद्वारा मोक्षाय ॥ [1]मुनिः कर्मयोगयुक्तः अङ्गतया कामादिवर्जनरूपसंन्यासवांश्चेत् तेनसांगेन संन्याससहितस्वकर्मणा नचिरेण शीघ्रं परमात्मानं सम्यक् जानाति प्राप्नोति च ॥ सति कर्मणि संन्यासस्य ज्ञानद्वारा मोक्षसाधनता ॥ असति कर्मणि दुःखमात्रहेतुता ॥ इति संन्यासस्य योग्यतासिध्यर्थं कर्ममुखनिरीक्षणापेक्षत्वेन कर्मयोगादवरत्वं संन्यासस्य तस्मात्कर्मयोगस्य वरत्वं च युक्तम् ॥

'यं संन्यासमिति प्राहुर्योगं तं विद्धि पांडवे'ति वक्ष्यमाणयोगांगत्वरूपयोगत्वाभावे ॥ भावप्रधानोनिर्देशः ॥ संन्यासस्तु दुःखं प्राप्तुमेव ॥ योगयुक्तो मुनिः ब्रह्म न चिरेणाधिगच्छति ॥ अंगेन संन्यासेन अंगिना कर्मयोगेन च

---

१. 'स हि लोके मुनिर्नाम यः कामक्रोधवर्जितः' ॥ इति प्रमाणवचनम् ॥

युक्तः शीघ्रं परमात्मानं प्राप्नोति ॥ अंगस्य अंगिनं विना साधनत्वमेव नास्ति ॥ अङ्गिनः अङ्गं विना वीर्यवत्वं नास्ति ॥ अतः अंगांगिभूतौ संन्यासकर्मयोगावुभौ समुदितावेव मोक्षहेतुः ॥ अतः संन्याससहितमेव कर्मैव त्वया कर्तव्यं ॥ सुख-हेतुकर्मकरणासमर्थेन कामक्रोधौ वर्जयित्वा दुःखं सहमानेन परैःपरिभूयमानेन स्थातव्यं ॥ त्वं समर्थोऽसि ॥ अतः सुखहेतुभूतं कर्म कर्तव्यमेव त्वया ॥ ६ ॥

अ ॥ अर्जुनः ॥ ज्ञानिभिः प्राप्यं यत् तदेव कर्मिभिरपि ज्ञानतत्पूर्वकसंन्यासद्वारा प्राप्यत इत्युक्तं ॥ तर्हि संन्यासस्य साक्षात्साधनत्वेन परंपरासाधनात्कर्मयोगाच्छ्रैष्ठ्यमुचितं ॥ कथं संन्यासात्कर्मयोगो विशिष्यत इत्युच्यते ॥ वद ॥

कृष्णः ॥ हे पार्थ कर्मिणा परमार्थसंन्यासद्वारैव मोक्षस्य प्राप्तव्यतया कर्मयोगापेक्षया परमार्थसंन्यासशब्दितमोक्षसाधनविद्वत्संन्यास एव श्रेयान् ॥ कथं तर्हि संन्यासात्कर्मयोगस्य श्रैष्ठ्योक्तिरिति चेत् अविद्वत्कर्तृकयोः कर्मसंन्यासकर्मयोगयोर्मध्ये कः श्रेष्ठ इति त्वदीयप्रश्नस्य अविद्वत्कर्तृकसंन्यासापेक्षया कर्मयोगः श्रेयानिति प्रतिवचनमुक्तं मया ॥ न परमार्थसंन्यासात्कर्मयोगस्य श्रैष्ठ्यमुक्तं ॥ परमार्थसंन्यासस्तु मोक्षं प्रति साक्षादुपायत्वात् कर्मयोगापेक्षया श्रेष्ठ एव ॥ स एव मोक्षोपायत्वाद्योगः स्यात् इति चेत् स एव मुख्यो योगः ॥ तर्हि कथं कर्मयोगे योगशब्द इति चेत् योगार्थत्वाद्योगशब्दः ॥ योगशब्दितपरमार्थसंन्यासहेतुत्वं कर्मयोगस्य कथमिति चेत् अयोगतः कर्मयोगाभावे संन्यासः परमार्थसंन्यासः दुःखमाप्तुं आप्तुं दुःखं आप्तुं अशक्य एव ॥ कर्मयोगयुक्तः मुनिः मननशीलस्सन् ब्रह्म उत्तमत्वेन परब्रह्मसदृशं अतएव ब्रह्मशब्देनोच्यमानं परमार्थसंन्यासं शीघ्रं प्राप्नोति ॥ परत्वेन चतुर्मुखब्रह्मसादृश्यात् संन्यासं तद्वाचकपुंलिंगब्रह्मशब्देन श्रुतिरप्याह ॥ अतः ब्रह्म संन्यास एव ॥ अतः योगशब्दितपरमार्थसंन्यासार्थत्वाद्योगः कर्मयोगः ॥ मुख्योपायस्तु परमार्थसंन्यास एव ॥ अतः कर्मयोगाच्छ्रेष्ठ एव सः ॥ इति न कोऽपि विरोधः ॥ संन्यासात्कर्मयोगस्य श्रैष्ठ्योक्तेरविद्वत्संन्यासविषयत्वादुक्तं युक्तम् ॥

१ अर्जुनः ॥ कर्मयोगिभिः ज्ञानांगसंन्यासद्वारा ज्ञानमूलकपरमार्थसंन्या-

---

१. केचित् ॥

सद्वारा वा मोक्षस्थानं प्राप्यत इत्युक्तं ॥ कर्मिभिरपि अंततः संन्यासस्यैव शरणीकरणीयत्वे स एव कुतः प्रथमं नाश्रयणीयः ॥ किमर्थमुभयानुसरणप्रयाससेवनं ॥ ब्रूहि ॥

कृष्णः ॥ हे पार्थ अयोगतः कर्मानुष्ठानाभावे संन्यासः अंगभूतः अंगिभूतो वा आप्तुं दुःखं प्राप्तुमशक्य एव ॥ कर्मयोगलब्धशुद्धिनैव पुंसा प्राप्तुं शक्यः ॥ कर्मयोगयुक्तः मुनिः संन्यासी भूत्वा परब्रह्म शीघ्रं जानाति प्राप्नोति च ॥ अंततः शरणीकरणीयं संन्यासं आदावेव शरणीकुर्मः इति अकृत्वा कर्मयोगं हठात्संन्यासे क्रियमाणे तेन संन्यासेन उभयभ्रष्टतामापद्यते ॥ एतदेवोक्तं मया ॥ १'न च संन्यासनादेव सिद्धिं समधिगच्छति' ॥ २'मिथ्याचारस्स उच्यते' ॥ इत्यत्र ॥ अतः कर्मयोगं कृत्वा तेन लब्धचित्तशुद्धिनैव पुंसा ज्ञानार्थं ज्ञानपूर्वकं वा संन्यासः कार्यः ॥ अतः कर्मयोगी संन्यासद्वारा मुक्तिमाप्नोतीति निर्बाधः पन्थाः ॥

३ अर्जुनः ॥ अकृत्वा कर्मयोगं कुतो न संन्यास आश्रयणीयः ॥ वद ॥

कृष्णः ॥ योगः चित्तशुद्धिः तदभावे संन्यासः आप्तुं दुःखं प्राप्तुमशक्यः ॥ मुनिः मननवान् इदानीं मया कर्मैव कर्तव्यं इत्यालोचनवान् गृही कर्माधिकृतः कर्म कृत्वा कर्ममूलकयोगशब्दितचित्तप्रसादयुक्तः ब्रह्म परमार्थसंन्यासं प्राप्नोति ॥ मुनिः संन्यासी भूत्वा ब्रह्म परब्रह्म अधिगच्छति ॥ आत्मत्वेन अहंब्रह्मेत्यनुसन्दधाति ॥ तेन ब्रह्म प्राप्नोति ॥ ब्रह्मैव भवति ॥

वि ॥ अर्जुनः ॥ 'एकं सांख्यं च योगं च यः पश्यति स पश्यति' ॥ इति ज्ञानकर्मणोरुभयोरपि साक्षादात्मावलोकनसाधनत्वं समर्थ्य 'संन्यासः कर्मयोगश्च निःश्रेयसकरावुभा'विति यदुक्तं तद्युक्तं इति समाहितं ॥ अस्तु एतावता साम्यमायातं ॥ 'तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते' ॥ इति कर्मयोगस्य श्रैष्ठ्यवचनं कथं ॥ को विशेषः ॥ वद ॥

कृष्णः ॥ हे पार्थ कर्मयोगाभावे ज्ञानयोगः प्राप्तुं दुःखं प्राप्तु-

---

१. ३. ४. २. ३. ६. ३. अन्ये ॥

मशक्यः ॥ तुशब्दः कर्मयोगस्य ज्ञानयोगाद्विशेषं सूचयति ॥ स क इति चेत् कर्मयोगयुक्तः तेन आत्ममननशीलः सुखेन कर्मयोगं साधयित्वा अल्पेन कालेन ब्रह्म परिशुद्धात्मस्वरूपं अधिगच्छति साक्षात्करोति ॥ आत्मावलोकनरूपं फलमाप्नोति ॥ ज्ञानयोगयुक्तस्तु महता दुःखेन ज्ञानयोगं साधयित्वा तेन विलंबेन आत्मानं साक्षात्करोति ॥ कर्मयोगे प्रवृत्तस्य ज्ञानयोगापेक्षा नास्ति ॥ अंतर्गतं ज्ञानमेवालं ॥ ज्ञानयोगे प्रवृत्तस्य ज्ञानयोगस्वरूपनिष्पत्त्यर्थं कर्मयोगापेक्षा ॥ कर्मयोगाभावे ज्ञानयोगस्वरूपस्यैवासिद्धेः ॥ कर्मयोगः सुसाधः ॥ अविलंबेन फलप्रदश्च ॥ ज्ञानयोगः दुःसाधः विलंबेन फलप्रदश्च ॥ अयमेवविशेषः ॥ विशेषोऽयं 'ज्ञेयस्स नित्यसंन्यासी'त्यत्र सूचितः ॥ अत्र स्पष्टं विवृतः ॥ विशेषस्यास्य सत्वात् साम्येऽपि 'कर्मयोगो विशिष्यत' इत्युक्तं युक्तं ॥ ६ ॥

द्वै ॥ अर्जुनः ॥ संन्यासेन सह कर्म कुर्वन् सुखं बंधात्प्रमुच्यते इत्युक्तं ॥ स संन्यासः कथं सिध्यति ॥ कर्मणा कथं मुक्तिर्भवति ॥ कर्म बंधकं न भवति वा॥ आकस्मिकोपनतदुष्कर्मभिः मोक्षो न प्रतिबध्यते वा ॥ वद ॥

कृष्णः ॥ योगयुक्तो विशुद्धात्मा विजितात्मा जितेंद्रियः ॥
सर्वभूताऽऽत्मभूताऽऽत्मा कुर्वन्नपि न लिप्यते ॥ ७ ॥

योगेति ॥ योगेन कर्मयोगेन युक्तः जीवः विशुद्धः आत्मा अंतःकरणं यस्य स विशुद्धात्मा वि अधिकं जितः वशीकृतः आत्मा मनः देहश्च यस्य सः विजितात्मा जितानि इंद्रियाणि यस्य सः जितेन्द्रियः सर्वाणि च तानि भूतानि च सर्वभूतानि सर्वभूतानां आत्मभूतः आत्मा यस्य सः सर्वभूतात्मभूतात्मा तादृशस्सन् तादृशज्ञानवान् सन् कुर्वन्नपि न लिप्यते न बध्यते ॥ ७ ॥

१. 'मेघोदरविनिर्मुक्ताः कल्हारसुखशीतलाः ॥ शक्यमञ्जलिभिः पातुं वाताः केतकिगंधिनः' ॥ (रा. कि. २८. ८.) 'शक्यमरविंदसुरभिः कणवाही मालिनीतरंगाणां ॥ अंगैरनंगतप्तैरविरलमालिंगितुं पवनः' ॥ (शाकुं. ३.) इत्यादाविव नपुंसकत्वम् ॥

कर्मयोगं कर्तुं[1] प्रवृत्तः तेन आरब्धेन कर्मणा विशुद्धाऽऽत्मा शुद्धस्वभावः विशुद्धमनाः वा भवति ॥ तेन विजितमना भवति ॥ स्वभावमनसोः शुद्धौ सत्यां मनो 'निग्रहो भवति ॥ निगृहीते मनसि इंद्रियनिग्रहो भवति ॥ जितेंद्रियस्य कामादिदोषाणां संन्यासो भवति ॥ तेन संन्यासेन सह सम्यक् कर्म करोति ॥ तेन कर्मयोगेन युक्तः ज्ञानी भवति ॥ तत् ज्ञानं कीदृशमिति चेत् सर्वभूतात्मभूतात्मा सर्वेषां भूतानां ब्रह्मादिस्थावरांतानां आत्मा स्वामी तथाभूतः ईश्वरः परमात्मा विष्णुरेव आत्मा स्वस्य स्वामी इति ज्ञानवान् भवति ॥ तेन कुर्वन्नपि न लिप्यते ॥ एवं क्रियमाणं कर्म फलदानेन बंधकं न भवति ॥ तस्य निवृत्तिकर्मत्वेन २'सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते' ॥ इत्युक्तरीत्या ज्ञाने पर्यवसनात् ॥ आकस्मिकोपनतदुष्कर्मणा न तस्य मोक्षः प्रतिबध्यते ॥ वक्ष्यते च ॥ ३'सर्वथा वर्तमानोऽपि स योगी मयि वर्तते' ॥ इति ॥ ४'सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते' ॥ इति च ॥ तेन विधिनिषेधातीतो भवति ॥ मुक्तो भवति ॥ अहो कर्मयोगस्य महिमा ॥

अ ॥ अर्जुनः ॥ कर्मयोगो ज्ञानतत्पूर्वकसंन्यासद्वारा मोक्षं प्राप्नोति ॥ इत्युक्तं ॥ ज्ञानिनोऽपि लोकसंग्रहार्थं कर्मानुष्ठानसत्वात्तेन मोक्षप्रतिबंधः स्यात् ॥ अतः कथमिदं ॥ वद ॥

कृष्णः ॥ कर्मयोगयुक्तः तेन विशुद्धमनाः सन् तेन वशीकृतदेहः सन् तेन जितेंद्रियः सन् सर्वभूताऽऽत्मभूताऽऽत्मा भवति ॥ सर्वेषां भूतानां ब्रह्मादिस्तंबपर्यंतानां आत्मभूतः स्वात्मा यस्य स तादृशो भवति ॥ सर्वत्र आत्मैकत्वदर्शी भवति ॥ सर्वभूतः जडभूतः आत्मभूतः चेतनभूतः आत्मा यस्य स तादृशः ॥ जडाजडात्मकं सर्वं आत्ममात्रं पश्यन् सर्वस्य आत्ममात्रत्वदर्शी भवति ॥ सः ज्ञानी लोकसंग्रहार्थं कर्म कुर्वन्नपि तेन कर्मणा न लिप्यते मोक्षं प्रति न प्रतिबध्यते ॥ उक्तं चेदं मया ॥ ५'कर्मण्यभिप्रवृत्तोपि नैव किंचित्करोति सः' ॥ इत्यादौ

१. योगयुक्त इत्यस्याऽऽवृत्तिः ॥ आदिकर्मणि वर्तमाने च क्तः ॥ २. ३. ३३. ३. ६. ३१. ४. १३. २४. ५. ४. २०.

चतुर्थे ॥ ज्ञानानंतरं लोकसंग्रहार्थं क्रियमाणस्य कर्मणोऽप्रतिबंधकत्वात् कर्मी-ज्ञानद्वारा मोक्षं प्राप्नोतीति युक्तमुक्तं ॥

केचित् ॥ योगेन कर्मयोगेन समाधियोगलक्षणसंन्यासेन वा युक्तः तेन विशेषेण शुद्धमनाः जितेंद्रियश्च तेन विजितात्मा निश्शेषनिर्यापितबाह्यवासना-लक्षणस्वभावः ॥ समाधिनिर्मूलितानात्मवासनः सर्वभूतानां आत्मभूत आत्मा यस्य सः तादृशो भवति ॥ तादृशो ज्ञानी शरीरयात्रानिर्वाहार्थं कर्म कुर्वन्नपि तेन कर्मणा न लिप्यते ॥ उक्तं चेदं मया ॥ १'शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिष'मित्यादौ चतुर्थे ॥ अत्र कुर्वन्नपीति शारीरं कर्मैव ॥ ननु लोकसंग्रहार्थं कर्म ॥ ब्रह्मविदो जीवन्मुक्तस्य कयाऽपि विधया वैधस्य कर्मणोऽसंभवात् ॥ सविस्तरमुक्तमिदं ॥ २'तस्य कार्यं न विद्यते' ॥ इत्यत्र मया तृतीये ॥ अतो ब्रह्मात्मैकत्वदर्शिनो जीवन्मुक्तस्य मोक्षप्राप्तिर्निर्बाधा ॥ अत उक्तं युक्तम् ॥

वि ॥ अर्जुनः ॥ कर्मयोगः सुखसाध्यः शीघ्रफलप्रदश्च इत्युक्तं ॥ तत्केन हेतुना ब्रूहि ॥

कृष्णः ॥ कर्मयोगयुक्तः तेन विशुद्धमनाः अतः विजितमनाः विशुद्धं हि मनो वशीकृतं भवति ॥ सर्वेन्द्रियकूटस्थे मनसि वशीकृते स्वत एवेंद्रियाणि वशतां यांति तदा जितेंद्रियश्च भवति ॥ कर्मकरणलब्धशुद्धिना मनसा आत्मयाथात्म्य-मनुसंदधानो भवति ॥ आत्मयाथात्म्यमनुसंदधानस्य देवादिसकलदेहेषु विद्य-मानानामात्मनां स्वात्मनश्च ज्ञानैकाकारतया साम्यदर्शनं संपद्यते ॥ तदाऽयं कुर्वन्नपि कर्मयोग्यपि आत्मावलोकनप्रतिबंधकेन अनात्मन्यात्माभिमानेन न संब-ध्यते ॥ ज्ञानयोगव्यवधानं तत्संपादनाऽऽयासं च विनैव आत्मावलोकनं लभते ॥ पूर्वाभ्यस्तत्वात्कर्मणः तस्मिन्नेव शास्त्रीये मनसः प्रवर्तनं सुकरं ॥ उपपादितं चेदं ॥ ३'असक्तः स विशिष्यते' ॥ ४'नियतं कुरु कर्म त्वं' ॥ इत्यत्र ॥ कर्मणा इंद्रिय-मनोनिग्रहस्य सुखेन लाभात् शीघ्रं फलप्राप्तिश्च भवति ॥ अतो हेतोः सुखसाध्यः शीघ्रफलप्रदः अप्रमादश्च कर्मयोगः ॥ उक्ता हि कर्मयोगस्य अप्रमादता ज्ञानयो-

१. ४. २१. २. ३. १७. ३. ३. ७. ४. ३. ८.

गस्य सप्रमादता च १'सदृशं चेष्टते' इत्यादिना तृतीये ॥ सर्वशरीरेषु आत्मनां समानत्वं प्रत्यक्षविरुद्धं ॥ देवनरतिर्यक्ब्राह्मणक्षत्रियब्रह्मचारिगृहस्थपंडितापंडित-शक्ताशक्तधनिकदरिद्रस्थविरतरुणादिनिरवधिकवैषम्यनिर्भरत्वादात्मनां ॥ वैष-म्यस्य सत्वादेव, २'वसंते ब्राह्मणो यजेत ॥ ग्रीष्मे राजन्यः ॥ शरदि वैश्यः' ॥ इति, 'वसंता ब्राह्मणोऽग्नि मादधीत ॥ वसन्तो वै ब्राह्मणस्यर्तुः ॥ स्व एवैनमृता-वाधाय ॥ ब्रह्मवर्चसी भवति ॥ मुखं वा एतदृतूनां ॥ यद्वसन्तः ॥ यो वसन्ताऽग्नि-माधत्ते ॥ मुख्य एव भवति ॥ अथो योनिमन्तमेवैनं प्रजातमाधत्ते ॥ ग्रीष्मे राजन्य आदधीत ॥ ग्रीष्मो वै राजन्यस्यर्तुः ॥ स्व एवैन मृतावाधाय ॥ इन्द्रियावी भवति॥ शरदि वैश्य आदधीत ॥ शरद्वै वैश्यस्यर्तुः ॥ स्व एवैनमृतावाधाय ॥ पशुमान् भवति' ॥ इति च ब्राह्मणत्वादिवैषम्यनिबंधनो विधिभेदो दृश्यते ॥ अतः कथं सर्वभूताऽऽत्मभूताऽऽत्मा इत्युच्यते इति चेत् अस्त्येवेदं वैषम्यं ॥ तथाऽपि तन्ना-ऽऽत्मस्वरूपगतं ॥ किंतु कर्मोपाधिकप्रकृतिपरिणामदेहभेदनिबंधनं ॥ शुद्धाकार-विवक्षया तु समानत्वमिहोच्यते ॥ वक्ष्यते च ॥ ज्ञानाकारतया साम्यं ३'निर्दोषं हि समं ब्रह्मे'ति ॥ अतो न किंचिद्बाधकं ॥ सर्वभूतेषु सर्वभूतानां वा आत्म-भूतः स्वाऽऽत्मा इत्युक्ते अभेदो ह्युक्तो भवति ॥ कथं साम्यमुक्तं भवेदिति चेत् स्वरूपैक्यस्य सर्वप्रमाणविरुद्धत्वात् अभेदोक्तिः साम्ये पर्यवस्यति ॥ बाधितस्य ऐक्यस्य साम्ये पर्यवसानं हि मुखं चंद्र इत्यादौ लोके दृश्यते ॥ सर्वेषु गृहेषु वर्तमानः व्रीहिरयमेव गृहे वर्तमानः सर्वोपि व्रीहिरयमेव इत्यादौ ऐक्यस्योच्य-मानस्य साम्ये पर्यवसानं स्पष्टं हि दृश्यते ॥ अतः कर्मयोगस्य ईदृशमहामहि-मवत्वात् ज्ञानयोगशक्तेनापि त्वया कर्मयोग एव कार्यः ॥ इति निरवद्यमतिहृद्यं॥७॥

अर्जुनः ॥ कर्मयोगस्य वीर्यवत्वाऽऽपादनाय किं कामक्रोधादिपरित्यागरूप-संन्यास एवालं ॥ उत अन्यत् किंचिदप्यावश्यकं वद ॥

कृष्णः ॥ नैव किंचित्करोमीति युक्तो मन्येत तत्ववित् ॥
पश्यन् शृण्वन् स्पृशन् जिघ्रन्नश्नन् गच्छन् स्वपन् श्वसन् ॥ ८ ॥

---

१. ३. ३३. २. शतपथब्रा. ५. कां. १. अध्या. ५. ब्रा. २. वा. २. तै. ब्रा. १. १. २. ३. ५. १९.

प्रलपन् विसृजन् गृण्हन् उन्मिषन् निमिषन्नपि ॥
इंद्रियाणींद्रियार्थेषु वर्तंत इति धारयन् ॥ ९ ॥

नैवेति ॥ तत्वं वेत्तीति तत्ववित् युक्तः कर्मयोगं कुर्वन् इंद्रियाणि इंद्रियाणां अर्थाः विषयाः तेषु प्रवर्तंते इति धारयन् निश्चिन्वन् सन् पश्यन् श्रण्वन् स्पृशन् जिघ्रन् अश्नन् गच्छन् स्वपन् श्वसन् प्रलपन् भाषमाणः मलमूत्रे विसृजन् गृण्हन् उन्मिषन् नेत्रोन्मीलनं कुर्वन् निमिषन् नेत्रनिमीलनं कुर्वन् सन्नपि अहं किंचिदपि नैव करोमि इति मन्येत ॥ ८ ॥ ९ ॥

युक्तः कर्मयोगी तत्ववित् १ कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः' इत्याद्युक्तरीत्या स्वस्य अस्वातंत्र्यादकर्तृत्वं परमात्मनश्च स्वातंत्र्यात्कर्तृत्वं इत्येतत्तत्वं जानन् सन् एकैकस्मिन्नपि स्वेन क्रियमाणे कर्मणि अहं किंचिदपि नैव करोमि ॥ किंतु ईश्वर एव तत्रतत्र स्थित्वा तत्तत्कर्म करोति कारयति च ॥ इति मन्येत अनुसंदधीत ॥ कथं स्वेनैव क्रियमाणे कर्मणि अहं न करोमीति युक्तमनुसंधातुं ॥ भ्रांतिर्हि सा स्यात् ॥ किंच यत्रकुत्रापि स्वीये कर्मणि स्वस्य अस्वातंत्र्यादकर्तृत्वनिश्चये सति हि कर्तव्ये प्रकृते वैधे वैदिके कर्मणि अस्वातंत्र्यादकर्तृत्वानुसंधानं स्यात् ॥ कुत्रान्यत्र तथा इति चेत् दर्शनादिषु त्रयोदशसु कर्मसु ॥ पश्यन् दर्शनं कुर्वन् शृण्वन् श्रवणं कुर्वन् स्पृशन् स्पर्शं कुर्वन् जिघ्रन् आघ्राणं कुर्वन् अश्नन् अशनं कुर्वन् गच्छन् गमनं कुर्वन् स्वपन् निद्रां कुर्वन् श्वसन् उच्छ्वासं निश्वासं च कुर्वन् ॥ प्रलपन् भाषणं कुर्वन् विसृजन् मलमूत्रयोर्विसर्गं कुर्वन् गृण्हन् ग्रहणं कुर्वन् उन्मिषन् निमिषन्नपि नेत्रोन्मीलनं नेत्रनिमीलनं च कुर्वन् एतेषु त्रयोदशसु कर्मसु अहरहरकामेनापि क्रियमाणेषु इंद्रियाणि ज्ञानेंद्रियाणि कर्मेंद्रियाणि प्राणापानादिवायवः नागकूर्मादिवायवश्च इंद्रियार्थेषु इंद्रियाणां वायूनां च विषयभूतेषु व्यापारेषु दर्शनादिषु प्रवर्तंते ॥ तेषामस्वातंत्र्यात् जडत्वाच्च न स्वतः प्रवर्तेरन् ॥ अतः स्वतंत्रेण परमचेतनेन मुख्यक्षेत्रज्ञेन परमात्मना अधिष्ठितानि तेन प्रेरितानि

---

१. ४. १८.

तेनैव तत्तत्कार्यकरणशक्तिमत्तां प्रापितानि संति तदिच्छया प्रवर्तंते ॥ नाहं तत्र स्वतंत्रः न मया किंचित्क्रियते ॥ यद्यहं स्वतंत्रः स्यां तर्हि मदिच्छानुरोधेन क्रियेरन्निमाः क्रियाः ॥ न तथा ॥ कदाचित् दर्शनश्रवणस्पर्शनादिकं मलमूत्रविसर्जनादिकं च सुखमनायासेन भवति ॥ कदाचित् अतिमहता प्रयत्नेनापि भिषजां शतेनापि न भवति ॥ अतो न मम कर्तृत्वं ॥ ईश्वर एव तत्रतत्र स्थित्वा करोति इति निश्चिन्वन् सन् तदभ्यासमहिम्ना विहितकर्तव्यवैधकर्मानुष्ठानदशायामपि अहं किंचिदपि नैव करोमीत्येवं मन्येत ॥ अयमेव संकल्पत्यागः ॥ अयमपि संन्यासांतर्गतः ॥ एतादृशसंन्यासपूर्वकं कर्मयोगस्त्वयाऽनुष्ठेयः ॥ अत्र दर्शनश्रवणस्पर्शनाघ्राणाशनानि पंच चक्षुःश्रोत्रत्वग्घ्राणरसनाना ज्ञानाद्रयाणा व्यापाराः ॥ प्रलपनग्रहणगमनमलविसर्जनमूत्रविसर्जनानि पंच वाक्पाणिपादपायूपस्थानां कर्मेंद्रियाणां व्यापाराः ॥ स्वापः बुद्धेर्व्यापारः ॥ श्वसनं प्राणाख्यवायोर्व्यापारः ॥ इदं १ प्राणापानसमानोदानव्यानाख्यवायुपंचकव्यापारोपलक्षणं ॥ उन्मेषनिमेषौ कूर्माख्यवायोर्व्यापारः ॥ इदं नागकूर्मकृकरदेवदत्तधनंजयाख्यवायुपंचकव्यापारोपलक्षणं ॥ इत्यनुसंधेयं ॥ एवं कर्म कुर्वन्नपि न लिप्यते ॥ तेन कर्मणा सुखं बंधात्प्रमुच्यते च ॥ अतस्त्वमेवं कर्म कुरु ॥ ८ ॥ ९ ॥

अ ॥ अर्जुनः ॥ ज्ञानी लोकसंग्रहार्थं कृतेन कर्मणा शरीरयात्रानिर्वाहार्थं कृतेन कर्मणा च न लिप्यते इत्युक्तं ॥ तत्कुतः ॥ कृतेन कर्मणा कथं न लिप्येत ॥ वद ॥

कृष्णः ॥ कुर्वन्नपि न लिप्यते ॥ कुत इति चेत् परमार्थदर्शी युक्तः समाहितांतःकरणः सन् लोकसंग्रहाय कर्म कुर्वन्नपि नैव किंचिदहंकरोमीति मन्यते ॥ अतो न लिप्यते ॥ कर्माणि कुर्वतः नाहंकरोमीति बुद्धिः कथमुदेतीति चेत् दर्शनादिव्यापारान् कुर्वन् एषु व्यापारेषु इंद्रियाण्येव प्रवर्तते ॥ न मम कर्तृत्वं ॥ अविक्रियत्वान्नैव किंचित्करोमि ॥ किंतु तत्तत्क्रियासाक्षित्वेन निष्क्रियाऽऽत्मना तूष्णीमासे इत्येवं निश्चिन्वन् सन् प्रकृते कर्मणि तथा मन्यते ॥ युक्तः प्रथमं कर्मयोगयुक्तः क्रमेण तत्ववित् भूत्वा नैव किंचित्करोमीति मन्यते इति वा ॥ शरीर-

१. अत्र, प्राणोऽपानः समानश्च इत्यादिकं (४०५ पुटे) पूर्वोक्त मनुसन्धेयं ॥

धारणार्थं आहारादि कुर्वन्नपि न लिप्यते ॥ अलेपार्थं ज्ञानी समाहितः सन् इंद्रियव्यापारेषु इंद्रियाण्येव प्रवर्तंते इति निश्चित्य शरीरधारणार्थं क्रियमाणे दर्शनादौ आहारादौ च अहं न करोमीति मन्येत ॥ एवं दर्शनादिकं कुर्वन्नपि न लिप्यते इति वा ॥ अतः कर्म कृत्वा यो ज्ञानी भवति स निर्बाधमेव मोक्षमाप्नोति ॥ ८ ॥ ९ ॥

वि ॥ अर्जुनः ॥ सौकर्यात् शैघ्र्याच्च कर्मयोग एव श्रेयानिति उक्तं ॥ तस्य कर्मणो यदपेक्षितं तद्ब्रूहि ॥

कृष्णः ॥ तत्ववित् अंतर्गताऽऽत्मयाथात्म्यज्ञानवान् कर्मयोगयुक्तः कर्म कुर्वन् अहं किंचिदपि नैव करोमीति मन्येत ॥ एकैकस्मिन्नपि कर्मणि अकर्तृत्वानुसंधानमावश्यकं ॥ कथं स्वेन क्रियमाणे कर्मणि स्वस्य अकर्तृत्वमनुसंधातुं युक्तमिति चेत् दर्शनादिकं कुर्वन्नपि आत्मयाथात्म्यानुसंधानेन एतेषु ज्ञानेंद्रियकर्मेंद्रियमनोबुद्धिप्राणव्यापारेषु अहरहः क्रियमाणेषु ज्ञानैकस्वभावस्य मम न स्वरूपतः कर्तृत्वं संभवति ॥ किंतु कर्ममूलेंद्रियप्राणसंबंधकृतमौपाधिकमीदृशं कर्तृत्वं इति निश्चिन्वन् तद्दृष्टांतेन तादृशानुसंधानाभ्यासेन प्रकृते कर्तव्ये शास्त्रीये कर्मणि अकर्तृत्वमात्मनो मन्येत ॥ एवं कृतं कर्म साक्षादात्मावलोकनं साधयति ॥ अतस्त्वमेवं कर्मैव कुरु ॥ ८ ॥ ९ ॥

द्वै ॥ अर्जुनः ॥ 'कुर्वन्नपि न लिप्यते' ॥ इत्युक्तं ॥ तत्किं उपचारमात्रं ॥ आहोस्वित् सत्यं ॥ ब्रूहि ॥

ब्रह्मण्याधाय कर्माणि संगं त्यक्त्वा करोति यः ॥
लिप्यते न स पापेन पद्मपत्रमिवांभसा ॥ १० ॥

ब्रह्मणीति ॥ कर्माणि ब्रह्मणि ईश्वरे प्रकृतौ वा आधाय समर्प्य संगं फलेच्छां त्यक्त्वा यः करोति सः अंभसा जलेन पद्मस्य पत्रं पद्मपत्रं इव पापेन न लिप्यते॥ १०॥

फलकामनां त्यक्त्वा कर्म ब्रह्मणि सर्वेश्वरे परमात्मनि आधाय ईश्वर एव स्वपूजात्मकानि कर्माणि अंतः स्थित्वा मदनुग्रहाय परमया कृपया कारयतीति

मत्वा यः कर्म करोति सः ज्ञानी भूत्वा मुच्यते ॥ आकस्मिकोपनतेन पापेन न लिप्यते ॥ पापं कुर्वन् तेन न लिप्येत वा इति चेत् पद्मपत्रं जले विद्यमानमपि तेन न लिप्यते ॥ जलादुद्धरणे जललेशोऽपि तस्मिन्न दृश्यते ॥ तद्वत् पापेन न लिप्यते ॥ कुत इति चेत् कर्मयोगसंजातज्ञानमहिम्ना पापस्याश्लेषः ॥ १'तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशा' दितिसूत्रं॥ २'तद्यथेषीकातूलमग्नौ ३ प्रोतं प्रदूयेत एवं हैवास्य सर्वे पाप्मानः प्रदूयंते' ॥ इति श्रुतिश्च ॥ पूर्वोक्तमपीदं, नेदमुपचारमात्रं किंतु तथ्यं इति वक्तुं पुनरत्रोक्तं विश्वासातिशयजननाय ॥ अतो मा शङ्किष्ठाः ॥ श्रद्धत्स्व च ॥ कुरु चैवं ब्रह्मण्याधाय कर्म ॥ ४'मयि सर्वाणि कर्माणी'त्यत्र कर्माणि त्वयि संन्यस्य कर्तव्यानीत्युक्तं ॥ अत्र तु ब्रह्मणि संन्यस्येत्युच्यते ॥ तत्कुत इति चेत् मयि इत्युक्त्वा मम ब्रह्मतां ५'अजोऽपि स'न्नित्यादिना ६'चातुर्वर्ण्यं मया सृष्टं' इत्यादिना च प्रतिपाद्य ब्रह्मणीत्युक्त्या कथमयं सारथिर्मम कृष्णः मयि संन्यस्य कर्म कुरु इति वक्ति ॥ तादृशो वाऽयं इति मा ते शङ्का भूत् ॥ परं ब्रह्म किलाहं ॥ अतो मयि संन्यस्येत्युक्तमिति सूच्यते ॥ तव ईश्वरे मयि भक्तिजननाय परोक्षतोऽपरोक्षतश्च अहं मां मया मयि सः तं तेन तस्मिन् इत्यादिरीत्या उपदेशः क्रियते ॥ १० ॥

अ ॥ अर्जुनः ॥ ज्ञानी कुर्वन्नपि न लिप्यत इत्युक्त्वा 'नैव किंचित्करोमीति युक्तो मन्येत तत्ववित्' ॥ इत्यनेन अकर्तृत्वानुसंधानान्न लिप्यते इति तदुपपादितं ॥ यद्यकर्तृत्वानुसंधानुरेव कर्मलेपाभावः स्यात् तर्हि अहङ्करोमीति कर्माणि स्वस्य कर्तृत्वमनुसंदधानस्य ज्ञानार्थं कर्मयोगमनुतिष्ठतोऽविदुषः तेन कर्मणा लेपः स्यात् ॥ लेपाभावहेतोरकर्तृत्वानुसंधानस्याभावात् ॥ सतिचैवं अज्ञः कर्मणा ज्ञानद्वारा कथं मुच्येत ॥ ब्रूहि ॥

कृष्णः ॥ अज्ञानदशायां अकर्तृत्वानुसंधानाभावेऽपि फलानभिसंधिमात्रेण ब्रह्मणि संन्यस्य ७'मयि सर्वाणि कर्माणी'त्युक्तरीत्या करणमात्रेण च कर्मलेपाभावः ॥ यः फले संगं त्यक्त्वा ब्रह्मणि कर्माणि आधाय कर्तृत्वं कारयि-

---

१. ४. १. १३. २. छा ५. २४. ३. ३. 'तीयिनिल् तूशाकुं' इति गाधाऽनुसंधेया ॥ ४. ३. ३०. ५. ४. ६. ६. ४. १३. ७. ३. ३०.

तृत्वं भोक्तृत्वं भोजयितृत्वं च स्थापयित्वा कर्तव्यं कर्म करोति सः कर्म कुर्वन् तेन क्रियमाणेन ज्ञानार्थेन वैदिकेन कर्मणा न लिप्यते ॥ जलेन संबद्धमपि पद्मपत्रं यथा स्वच्छतया तेन जलेन न संबध्यते ॥ तथा कर्मणा संबन्धोऽपि तत्फलेन न संबध्यते ॥ कथं क्रियमाणं वैदिकं कर्म पापमित्युच्यते इति चेत् यथा पापं जन्मादिबंधकारणं तथा पुण्यमपि जन्मादिबंधकारणं भवति ॥ उक्तं हि मया ॥ १'जन्मकर्मफलप्रदा'मिति ॥ अतः क्रियमाणं वैदिकं कर्म पापमित्युच्यते ॥ तत्कुर्वन्नपि तेन न लिप्यते ॥ लेपाभावकारणस्य ब्रह्मण्याधानस्य फलाभिसंधित्यागस्य च सत्वात् ॥ ज्ञानार्थं क्रियमाणं कर्म फलाभिसंधित्यागेन जन्मादिबंधकारणं न भवति ॥ कथं तत्पापशब्देनोच्यते इति चेत् फलापेक्षया करणे ब्रह्मण्यनर्पणे च यत् पापतुल्यं जन्मादिबंधकारणं तेन ब्रह्मार्पणफलाभिसंधित्यागाभ्यां विशोधितेन न लिप्यते इत्याशयः ॥ १० ॥

वि ॥ अर्जुनः ॥ यथावत्कर्म कुर्वन् 'नैव किंचित्करोमी'त्यकर्तृत्वानुसंधानात् देहात्माभिमानेन न लिप्यते इत्युक्तं ॥ यदि एतादृशानुसंधानेन देहात्माभिमानलेपो निवर्तेत ॥ तर्हि काम्येऽपि कर्मणि एतादृशानुसंधानसत्वे देहात्माभिमानलेपो निवर्तेत ॥ सतिचैवं काम्यादकाम्यस्य को विशेषः ॥ किंच किं स्वीयस्य कर्तृत्वस्य 'नैव किंचित्करोमी'ति 'इंद्रियाणि प्रवर्तंते' इत्यौपाधिकत्वानुसंधाने प्रयोजनं ॥ किंच ईदृशानुसंधानसत्वेऽपि प्रकृतिसंसृष्टस्य तत्र आत्मत्वाभिमानलेपः कथं निवर्तेत ॥ ब्रूहि ॥

कृष्णः ॥ ब्रह्म प्रकृतिः वक्ष्यते च ॥ २'मम योनिर्महद्ब्रह्मे'ति ॥ इंद्रियाणि प्रवर्तंते इत्युक्तरीत्या इंद्रियाकारेणावस्थितायां प्रकृतौ कर्माणि दर्शनादीनि आधाय तदृष्टांतेन प्रकृतं वैदिकं कर्मापि तस्मिन् ब्रह्मण्याधाय फले संगं त्यक्त्वा यः करोति सः पापिष्ठेन आत्मावलोकनरूपफलविरोधिना अनात्मन्यात्माभिमानेन न लिप्यते॥ पद्मपत्रं अंभसा यथा न लिप्यते तथा न लिप्यते ॥ ईदृशानुसंधानेन फलाभिसंधिरहितकर्मकरण एव स्वीयकर्तृत्वस्य उक्तरीत्या औपाधिकत्वानुसंधान एव अनात्मन्यात्माभिमानदोषलेपनिवृत्तिः ॥ जलाधीनजन्मस्थित्यादिमतोऽपि पद्म-

१. २. ४३. २. १४. ३.

पत्रस्य यथा न तत्कार्यं क्लेदादि तथा प्रकृत्यधीनजन्मस्थित्यादिमतोऽप्यस्याऽऽत्मनः न प्रकृतिकार्यदेहात्माभिमानः स्यात् ॥ अतः ईदृशानुसंधानपुरःसरं अकाम्यमेव कर्म त्वया यथावत्कर्तव्यम् ॥ १० ॥

अर्जुनः ॥ न लिप्यते इति बंधकत्वाभाव उक्तः ॥ तेन क्रियमाणेन कर्मणा बंधो न भवति चेत् किंवा भवति ॥ वद ॥ उक्तरीत्या केऽपि कर्म कुर्वंति वा ॥ चेत् तमाचारं ब्रूहि ॥ १ 'कर्मणैव हि संसिद्धिमास्थिता जनकादयः' ॥ इति, २ 'कृतं कर्म पूर्वैरपि मुमुक्षुभिः ॥ कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृत'मिति च शिष्टानामाचारः स्पष्टमुक्त एवेति चेत् तत्र आस्थिताः इति कृतं इति च भूतकालनिर्देशेन पूर्वं तथा स्यात् इदानीं केऽपि तथा आचरंति वा इति संशयो मे जायते ॥ वद ॥

कृष्णः ॥ कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि ॥
योगिनः कर्म कुर्वन्ति संगं त्यक्त्वाऽऽत्मशुद्धये ॥ ११ ॥

कायेनेति ॥ योगः कर्मयोगः एषां अस्तीति योगिनः कायेन देहेन मनसा बुद्ध्या केवलैः रागद्वेषादिरहितैः इंद्रियैरपि संगं फलेच्छां त्यक्त्वा आत्मनः मनसः जीवात्मनो वा शुद्धिः आत्मशुद्धिः तस्यै तदर्थं कर्म कुर्वंति ॥ ११ ॥

केवलैरिति पदं विपरिणामेन सर्वत्रान्वेति ॥ केवलेन देहेन केवलेन मनसा केवलया बुद्ध्या केवलैरिंद्रियैरपि कर्मयोगिनः फलापेक्षां त्यक्त्वा मनसः शुद्धये तेन आत्मनः जीवात्मनः प्रतिबंधकदोषनिर्हरणाय कर्तव्यं कर्म कुर्वंति ॥ कायादिभिः समुदितैः कर्तव्यं कर्म कुर्वन्ति ॥ कायेन स्नानोपवासादि, मनसा ध्यानादि, बुद्ध्या तत्वनिश्चयादि, इंद्रियैः श्रवणदर्शनकीर्तनपूजनतीर्थाटनादि कुर्वन्ति ॥ मनसा संकल्प्य बुद्ध्या निश्चित्य कायेन इंद्रियैश्च कुर्वन्ति इत्यादिकं यथासंभवमूह्यं ॥ केवलशब्दस्य कोऽर्थः इति चेत् केवलः असहायः कर्तृत्वाभिमानममतारूपसहायरहितैः ममताबुद्धिविषयत्वरहितैर्वा एतैः कायादिभिः नैव किंचित्करोमि ब्रह्मण्याधाय कर्माणि इत्युक्तरीत्या कुर्वन्ति ॥ न केवलं पूर्वैः कृतं इदानीमपि कुर्वन्ति ॥

---

१. ३. २०. २. ४. १५.

अतस्त्वया कर्तव्यमेव कर्म ॥ कुर्वाणाश्चेदानीं, अत्र कर्म येन प्रकारेण कर्तव्य मित्युच्यते तथैव कुर्वन्ति ॥ न केवलं बंधाभावमात्रं किंतु तेन कर्मणा चित्तशुद्धि-रपि भवति ॥ अतस्त्वं चित्तशुद्धये आत्मनो दोषनिर्हरणाय च उक्तेन प्रकारेण कर्म कुरु ॥ ११ ॥

अर्जुनः ॥ अहो कर्मणो वैषम्यं ॥ यदनुष्ठितं, एकस्य फलं स्वर्गः अन्यस्य फलमपवर्गः ॥ इति भेदेन फलमुत्पादयति ॥ किमनेन फलभेदाद्विषमेण कर्मणा ॥ अन्यत् किमपि साधनमन्विच्छामि ॥ किं कर्मैव कुर्विति निर्बध्नासि ॥ वद ॥

कृष्णः ॥ युक्तः कर्मफलं त्यक्त्वा शांतिमाप्नोति नैष्ठिकीं ॥
अयुक्तः कामकारेण फले सक्तो निबध्यते ॥ १२ ॥

युक्त इति ॥ कर्मणः फलं कर्मफलं त्यक्त्वा युक्तः योगं कुर्वन् नैष्ठिकीं निष्ठायां भवां शांतिं मुक्तिरूपां निर्वृतिं आप्नोति ॥ कामस्य कारः प्रेरणं कामकारः तेन फले सक्तः अतः अयुक्तः उक्तरूपं कर्मयोगं अकुर्वन् निबध्यते नितरां बध्यते ॥ १२॥

कर्मफलं त्यक्त्वा युक्तः स्वाम्यर्थं भृत्य इव ईश्वरार्थं कर्मयोगं कुर्वन्, युक्तः मनःसमाधानवान् सन् कर्मफलं त्यक्त्वा कर्माणि कुर्वन् इति वा ॥ निष्ठा स्वभावः नैष्ठिकीं स्वाभाविकीं शांतिं स्वरूपानंदं स्वरूपानंदाविर्भावलक्षणां मुक्तिं निष्ठा कर्मनिष्ठा ज्ञाननिष्ठा वा तज्जन्यां शांतिं कर्मनिष्ठाजन्यां चित्तशुद्धिरूपामुप-शांतिं ज्ञाननिष्ठाजन्यां आत्यंतिकसंसारोपरतिरूपां मुक्तिं वा ॥ निष्ठा स्थैर्यं तद्वतीं नैष्ठिकीं स्थिरां आत्यंतिकीं शांतिं उपरतिं मुक्तिमाप्नोति ॥ १ स्थिरां आत्मानु-भवरूपां निर्वृतिं आप्नोति ॥ कामस्य कारेण प्रेरणया फलेच्छावान् सन् अयुक्तः उक्तरूपं कर्म अकुर्वन् अयुक्तः असमाहितांतःकरणस्सन् कामकारेण कर्म कुर्वन् यः फले सक्तो भवति इति वा ॥ सः तेन कर्मणा नितरां बध्यते ॥ इदमेवोक्तं मया ॥ २'यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः ॥ तदर्थं कर्म कौन्तेय मुक्तसंगः समाचर' ॥ इति ३'तस्मादसक्तः सततं कार्यं कर्म समाचर' ॥

---

१. वि ॥ . २. ३. ९. ३. ३. १९.

इति च ॥ वैषम्येण फलदानरूपो दोषो न कर्मणः ॥ किंतु [१] कर्मकर्तुरभिप्रायानुगुणं फलं कर्म तत्फलप्रद ईश्वरश्च ददाति ॥ उक्तरूपं कर्मयोगमकुर्वतो नितरां बंधो भवति ॥ नेतरा गतिरस्य ॥ अतः उक्तरूपं कर्मैव शरणम् ॥ १२ ॥

अर्जुनः ॥ अहं करोमीति कर्तृत्वानुसंधानं विवेकेन त्यक्तव्यमित्युक्तं ॥ कारयामीति कारयितृत्वानुसंधानं न दोषायेति भाति ब्रूहि ॥

कृष्णः ॥ सर्वकर्माणि मनसा संन्यस्याऽऽस्ते सुखं वशी ॥
नवद्वारे पुरे देही नैव कुर्वन्न कारयन् ॥ १३ ॥

सर्वेति ॥ देहः अस्तीति देही जीवः वशानि स्वाधीनानि देहेन्द्रियादीनि अस्य संतीति वशी सन् मनसा सर्वाणि च तानि कर्माणि च सर्वकर्माणि संन्यस्य नव द्वाराणि यस्मिन् तत् नवद्वारं तस्मिन् नवद्वारे पुरे शरीरे सुखं यथा तथा नैव कुर्वन् न कारयन् कर्तृत्वकारयितृत्वरहितः सन् आस्ते ॥ पुरे संन्यस्य सुखं आस्त इति वा ॥ १३ ॥

नैव कुर्वन् कर्तृत्वाभिमानं निःशेषं परित्यजन् न कारयत् कारयामीति कारयितृत्वानुसंधानं निःशेषं परित्यजन् वशी जितेंद्रियस्सन् कर्माणि कृत्वा तानि क्रियमाणानि कर्माणि मनसा संन्यस्य 'मयि सर्वाणि कर्माणि' 'ब्रह्मण्याधाय कर्माणि' इत्युक्तरीत्या भगवति संन्यस्य भगवानेव स्वपूजात्मकानि कर्माणि मदनुग्रहाय मया कारयति मम कर्तृताशक्तिरपि भगवदधीनैवेत्यनुसंधाय कर्माणि कृत्वा चक्षुःश्रोत्रघ्राणानां षट् द्वाराणि आस्यमेकं द्वारं पायूपस्थे द्वे द्वारे इत्येवं नवद्वारवति पुरे शरीरे सुखं यथातथा आस्ते ॥ शरीरस्य पुरत्वोक्त्या तस्य नवद्वारत्वोक्त्या च, राजा बहुद्वारगोपुरे पत्तने स्वायत्तप्रवृत्तिकैः स्वसुखसाधनभूतैः पौरैः सह यथा सुखेन वर्तते ॥ तथा स्वेच्छानुसारिप्रवृत्तिकैः स्वसुखसाधनभूतैरिंद्रियैः सह सुखेन वर्तते इति प्रतीयते ॥ उक्तं च मया ॥ २ 'रागद्वेषवियुक्तैस्तु

---

१. कर्तृत्वाभिमानसाम्येऽपि फलेच्छानिच्छाभेदाद्वैषम्यं इति केचित् ॥ अत्र, 'अभिसंधिभेदमात्रात् मोक्षापायेन बध्यते' इतीदमनुसंधेयं ॥ २. २. ६४.

विषयानिन्द्रियैश्चरन् ॥ आत्मवश्यैर्विधेयाऽऽत्मा प्रसादमधिगच्छति' ॥ इति ॥ कर्तृत्वानुसंधानत्याग इव कारयितृत्वानुसंधानत्यागोऽप्यावश्यकः ॥ सोऽपि संन्यासांतर्गतः ॥ 'ज्ञेयः स नित्यसंन्यासी'ति संन्यासैकदेशः कामक्रोधादिपरित्याग उक्तः ॥ 'नैव किंचित्करोमी'ति कर्तृत्वाभिमानत्याग उक्तः ॥ अत्रतु, कारयितृत्वाभिमानत्याग उक्तः ॥ इमे त्रयः समुदिताः संन्यासः ॥ तेन संन्यासेन सह फलसंगं त्यक्त्वा ब्रह्मण्याधाय कर्माणि कर्तव्यानि ॥ रागद्वेषादिभिः फलमभिसंधाय कर्मकरणे अहंकारोत्थाभ्यां सुमहान् क्लेशः ॥ कामादेः सर्वस्य परित्यागे राज्ञ इव सुमहत्सुखं ॥ अत उक्तरूपसंन्यासपूर्वकं कर्मयोगस्त्वया कार्यः ॥ १३ ॥

अ ॥ 'तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते' ॥ इत्युक्त्वा 'ज्ञेय' इत्यादिना तदुपपाद्य 'युक्तः कर्मफलं त्यक्त्वा शांतिमाप्नोति नैष्ठिकीं'॥ इत्युपसंहारः कृतः ॥ यद्येवं संन्यासात्कर्मयोगस्य श्रैष्ठ्यात् सर्वैरकामनया कर्मैव कर्तव्यं स्यात् तर्हि कर्मसंन्यासविधेः का गतिः ॥ ब्रूहि ॥

कृष्णः ॥ अविदुषोऽशुद्धचित्तस्य कर्मयोग उक्तः समर्थितश्च ॥ विदुषः परमार्थदर्शिनस्तु सर्वकर्मसंन्यासः ॥ यः पुनः परमार्थदर्शी सः सर्वाणि नित्यानि नैमित्तिकानि काम्यानि प्रतिषिद्धानि च कर्माणि अधिष्ठानयाथात्म्यसंदर्शनसंजातारोपितसर्वदृश्यवस्तुमिथ्यात्वज्ञानवता मनसा कर्म कर्ता तत्साधनं तत्फलं च असदेवेति विज्ञानेन संत्यज्य ज्ञानेंद्रियकर्मेंद्रियाधिष्ठानभूतनवद्वारके ज्ञानेंद्रियाणि पंच प्राण एकः तेन कर्मेन्द्रियाणां ग्रहणं ॥ बुध्यहंकारचित्तानि त्रीणि एतानि नव द्वाराणि भोगार्थं विषयप्रवेशस्थानानि यस्मिन् तादृशे वा शरीराख्ये पुरे वशीकृतसर्वेन्द्रियः सन् त्यक्तकायवाङ्मनश्चेष्टस्सन् सुखं यथातथा सुखरूपेण निष्क्रियात्मना आस्ते ॥ कायकरणकर्माणि अविद्यया आत्मनि आरोपितानि संन्यस्यतु ॥ तथाऽपि सुखेनावस्थातुं न शक्यते ॥ आत्मन्यारोपितानां अन्यकर्तृककर्मणां विज्ञानेन त्यागेऽपि स्वाश्रयक्रियाणां संभवात् ॥ गजमारुह्य गच्छन्नविवेकी अहं गच्छामीति गजकर्तृकगमनक्रियां आत्मन्यारोप्य आत्मानं तया क्रियया क्रियावंतं मन्यते ॥ विवेकी तु गजो गच्छति नाहं गच्छामि इति तया क्रियया आत्मानं क्रियावंतं न मन्यते ॥ किंतु निष्क्रियमेव मन्यते ॥ तथाऽपि न स निष्क्रियः ॥ अविवेकिन इव

आरोपितक्रियाऽभावेऽपि स्वाश्रयचलनगजप्रेरणादिक्रियाणां भावात् ॥ इति प्रसिद्धं हि लोके ॥ इति चेत् नैव कुर्वन् न कारयन् ॥ स्वव्यापारेण कर्तृत्वं देहादिव्यापारैः कारयितृत्वं च वक्तव्यं ॥ अहंकाराभावान्न कर्तृत्वं ॥ ममकाराभावान्न कारयितृत्वं ॥ नहि परिपूर्णे निर्विकारे वस्तुनि अहंकारममकारौ संभवतः ॥ विज्ञानेन निःशेषनिरस्ताऽऽरोपिताशेषक्रियः स्वयं च निष्क्रियः ॥ अतः कर्तृत्वकारयितृत्वादिहेतुकक्लेशरहितः परमार्थदर्शी सूर्याद्यधिदैवतरक्षितनवद्वारके प्रत्यगात्मैकराजके बुद्धिप्रधानके मनःप्रभृतिसर्वकरणपरिचारकके प्राणादिदशवायुग्रामपालकके ब्रह्मविष्ण्वादिसर्वदेवतायतने पुरे राजेव स्वयमविक्रियब्रह्माऽऽत्मना सुखेनाऽऽस्ते ॥ १'शरीरे पाप्मनो हित्वा ॥ सर्वान् कामान् समश्नुते' इति २'यत्र सुहार्दः सुकृतो मदंते विहाय रोगं तन्वा स्वायां' ॥ इति च श्रुतिः ॥ श्रूयते च आत्मनोऽविक्रियत्वं ३'ध्यायतीव लेलायतीव'त्यादिश्रुतिषु ॥ वक्ष्यते च ॥ ४'शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते' ॥ इति ॥ न केवलं समाधिदशायामेव नैव कुर्वन्न कारयन्नितीदं ॥ किंतु व्युत्थानेऽपि ॥ देही सन् देहाभिमानवान् सन्नपि समाधेर्व्युत्थानेऽपीत्यर्थः ॥ नैव कुर्वन्न कारयन् ॥ समाधौ क्षेत्रेण सहाऽऽत्मनः संबंधाभावदर्शनात् ॥ 'सर्वाधिपत्यं कुरुते महात्मा' ॥ 'एष ह्येव साधु कर्म कारयति' ॥ 'एष ह्येवासाधु कर्म कारयति' ॥ इत्यादावात्मनः कर्तृत्वकारयितृत्वप्रतिपादनं तु ५'निष्कलं निष्क्रियं शांत'मित्यादिश्रुत्याद्यानुकूल्याय स्वसंनिधिमात्रेण चेष्टकत्वपरं ॥ वक्ष्यते च ॥ ६'मयाऽध्यक्षेण प्रकृतिः सूयते सचराचर'मिति ॥ परमार्थदर्शी शरीरे आस्ते इत्युक्त्या अविद्वान् शरीरे न तिष्ठतीति प्रतीयते ॥ तत्कथं ॥ शरीर एव हि तिष्ठंति सर्वे विद्वांसोऽविद्वांसश्च ॥ इति चेत् विद्वान् शरीरेतिष्ठामीतिप्रत्ययवानास्ते ॥ यद्यपि विद्वानिव अविद्वानपि शरीर एवाऽऽस्ते ॥ तथाऽपि अविद्वान् शरीरमेवाऽऽत्मानं मत्वा शरीराधिकरणमेवाऽऽत्मनोऽधिकरणं मत्वा गेहे भूमौ आसने देहल्यां आसे इत्येवं मन्यते ॥ विद्वांस्तु आत्मानं देहभिन्नं मत्वा देहस्य गेहादिकमिव आत्मनः स्वभिन्नं देहमधिकरणं मत्वा देहभिन्नोऽहं देहे तिष्ठामीत्येवं मन्यते ॥ एवमनुसंधानभेदमभिसंधाय पुरे आस्ते

---

१. तै. २.५.२. तै. आ. २.६. ३. बृ. ६.३.७. ४. १३. ३२.५. श्वे. ६.१९. ६.९.१०

इत्युक्तं ॥ सर्वाणि विहितानि प्रतिषिद्धानि उभयविलक्षणानि चेष्टारूपाणि च कर्माणि नवद्वारे पुरे देहे तदुपलक्षितप्राकृतरूपेण परिणतायां प्रकृतौ संन्यस्य कर्तृत्व-भोक्तृत्वादिकं प्रकृतेरेव न ममेति निश्चित्य अनात्मतादात्म्याध्यासं परित्यज्य नित्यशुद्धबुद्धनिष्कलनिष्क्रियनिरंतरानंदैकरसाद्वितीयब्रह्मात्मनासुखमास्ते इति वा ऽन्वयः ॥ उक्तरूपस्य विदुषः कर्मसंन्यासे अधिकारः ॥ अविदुषस्तु कर्मण्येवाधिकारः ॥ इति व्यवस्थितमेतत् ॥ अतो न काऽप्यनुपपत्तिः ॥ १३ ॥

वि ॥ ज्ञानयोगापेक्षया कर्मयोगस्य श्रैष्ठ्यमुक्त्वा तदुपपाद्य 'नैव किंचि'-दित्यादिना 'निबध्यते' इत्यंतेन तदपेक्षितमकर्तृत्वानुसंधानं कर्तृत्वस्य कर्ममूलेंद्रियप्राणादिसंबंधप्रयुक्तत्वरूपौपाधिकत्वानुसंधानं च उक्तं ॥ किं देहनिरपेक्षाण्येवेंद्रियाणि इंद्रियार्थेषु वर्तंते ॥ उत देहाश्रितानि ॥ वद ॥

कृष्णः ॥ कर्म कुर्वन् सर्वाणि दर्शनादीनि तदृष्टांतेन क्रियमाणं वैदिकं कर्म च नवद्वारे पुरे देहे संन्यस्य प्राचीनकर्ममूलदेहसंबंधप्रयुक्तं कर्तृत्वं न स्वरूपप्रयुक्तं इत्यनुसंधाय स्वयं वशी इंद्रियनिग्रहादिमान् अतः देहाधिष्ठानप्रयत्नमकुर्वन् स्वकर्मणा देहांतरं च नैव कारयन् देहांतरारंभककर्माण्यकुर्वन् कर्तृत्वाभिमानप्रयुक्तक्लेशरहितः सन् सुखमास्ते सुस्थस्तिष्ठति ॥ पुरमिव शरीरं पौरानिवेंद्रियाणि सार्वभौममिवपरमात्मानं भृत्यमिव स्वात्मानं पश्यन् सुस्थो वर्तते ॥ शरीराश्रितेंद्रियप्राणेषु कर्तृत्वसंन्यासः पूर्वमुक्तः ॥ अत्र तदाश्रये शरीरे कर्तृत्वसंन्यास उच्यते ॥ शरीरतदाश्रितेंद्रियप्राणादिसंबंधप्रयुक्तं कर्तृत्वमौपाधिकमात्मनोऽनुसंधाय स्वरूपतोऽकर्तृत्वं चानुसंधाय फलसंगादिकं त्यक्त्वा कर्म कर्तव्यं ॥ एतावता प्रबंधेन ज्ञानयोगशक्तेनापि आत्मावलोकनाय उक्तरूपं कर्मैव कर्तव्यमित्युक्तं भवति ॥ अतः कर्मैव कुरु ॥ १३ ॥

द्वै ॥ अर्जुनः ॥ कर्म कुर्वन् 'नैव किंचित्करोमीति मन्येत' इत्युक्तं॥ 'नैव कुर्वन् न कारयन् सुखमास्ते' इति चोक्तं ॥ यो न करोति तस्य न करोमीति मननं युक्तं ॥ कर्म कुर्वतस्तथा मननं भ्रान्तिः खलु स्यात् ॥ यो न करोति न कारयति च तद्विषये न कुर्वन् न कारयन् सुखमास्ते इति वक्तुं युक्तं ॥ कुर्वतः कारयतश्च विषये न कुर्वन् न कारयन्नास्ते इति वचनमयुक्तं हि स्यात् ॥ अतः कथमिदं ब्रूहि ॥

कृष्णः ॥ न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः ॥
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥ १४ ॥

नेति ॥ प्रभुः जीवः लोकस्य जनस्य कर्तृत्वं न सृजति न करोति ॥ न कारयतीत्यर्थः ॥ कर्माणि स्वयं न सृजति ॥ कर्मणः फलं कर्मफलं तेन संयोगः तं स्वस्य परस्य च न सृजति॥ किंतु स्वं जीवं भावयति उत्पत्यादिमंतं करोतीति स्वभावः परमात्मा प्रकृतिः प्रकृतिवासना वा स एव प्रवर्तते ॥ १४ ॥

जीवः स्वान्यस्य जनस्य कर्तृत्वं न सृजति ॥ स्वयं कारयिता सन् अन्यस्य कर्तृत्वं न करोति ॥ अन्यं कर्तारं न कुरुते ॥ अन्येन न कारयति ॥ स्वयं कर्माणि न करोति ॥ कारयिता कर्ता च न भवति ॥ अतः कर्मफलेन संयोगं अन्यस्य स्वस्य वा स्वयं न करोति ॥ फलप्राप्तौ फलप्रापणे वा न स्वातंत्र्यं ॥ स्वातंत्र्येण कर्तृत्वं कारयितृत्वं फलभोक्तृत्वं भोजयितृत्वं च जीवस्य नास्ति ॥ अतः अस्वातंत्र्येण कर्ता कारयिता भोक्ता भोजयिता च जीवः ॥ न करोमीति कर्तृत्वाद्यभावोक्तिस्तु तस्य स्वतंत्रकर्तृत्वाद्यभावपरा ॥ अतस्तथामननं न भ्रांतिः ॥ यो न करोति तेन तथा मंतव्यमिति वक्तुं न युक्तं ॥ तस्य अतथामननप्रसक्तेरेवाभावात् ॥ अतः यः करोति तस्य आत्मनः कर्तृत्वं अस्वातंत्र्यं च ज्ञात्वा अस्वातंत्र्याभिप्रायेण नाहं स्वतंत्रः करोमि कारयामि इत्यादिरीत्या मननं युक्तं ॥ आत्मानं अस्वातंत्र्येण कर्तारं कारयितारं च स्वातंत्र्येण कर्तृत्वाद्यभावाभिप्रायेण अकर्तारं अकारयितारं च मन्तुं युक्तं ॥ अत उक्तं युक्तं ॥ कथं जीवस्य जडवदसामर्थ्यमुच्यते ॥ समर्थः खलु जडापेक्षया अयमिति चेत् प्रभुः जडापेक्षयाऽयं समर्थ एव ॥ अतएव 'कुरु' 'समाचर' इत्यादौ कर्तृत्वेनोच्यते ॥ तथाऽपि अस्वातन्त्र्यापेक्षया 'न करोमीति मन्येत' 'नैव कुर्वन्न कारयन्नित्याद्युच्यते ॥ भृत्यः चेतनत्वेन कर्मकरणशक्तत्वात्करोति ॥ अस्वातन्त्र्यात् स्वातन्त्र्येण कर्तुमशक्तोऽस्वतन्त्रः करोति ॥ तथाऽयं जीवः चेतनत्वात्करोति ॥ अस्वातन्त्र्यात् न स्वतंत्रः करोति ॥ एवमभिप्रायकत्वादुक्तं युक्तं ॥ जीवस्य स्वतंत्रकर्तृत्वाभावात्

उक्तरीत्या ध्याने प्रवर्तितव्यं ॥ तेन च साक्षात्कारद्वारा स्यात् तेषां मोक्षरूपं श्रेयः ॥ २९ ॥

अ ॥ अर्जुनः ॥ य एवं मुनिः स मुक्त एवेत्युक्तं ॥ न तावन्मात्रेण मुक्तिरस्यात्॥ किंतु ज्ञानादेव मुक्तिः ॥ अतः कथमिदं ॥ वद ॥

कृष्णः ॥ यज्ञानां तपसां च कर्तृरूपेण देवतारूपेण च भोगकर्तारं पालकं वा सर्वेषामपि ईश्वराणां अधीश्वरत्वात् सर्वलोकानां महेश्वरं लोक्यन्ते दृश्यन्ते इति लोकाः अव्यक्तादिस्थूलान्ताः तेभ्यो महान् स्वसंनिधिमात्रेण सर्वचेष्टकत्वादीश्वरश्च तं इति वा ॥ ब्रह्मादिस्तंबांतानां सर्वेषांभूतानां आत्मत्वेन प्रेष्ठतमं ॥ आत्मा हि सर्वेषां भूतानां प्रियतमः ॥ प्रत्युपकारनिरपेक्षतयोपकारिणं॥ वक्ष्यते च ॥ १'निवासः शरणं सुहृ'दिति ॥ मां ज्ञात्वा उक्तरूपेण ध्यानेन साक्षात्कृत्य शान्तिं सर्वोपरतिरूपां मुक्तिं प्राप्नोति ॥ सर्वेषां भूतानां सुशोभनं निर्दोषं हृत् हृदयं उपलब्धिस्थानं यस्य तमिति वा ॥ वक्ष्यते च ॥ २'हृदि सर्वस्य विष्ठितं' ॥ इति ॥ यज्ञतपसां भोक्तारं सोपाधिकं सर्वलोकमहेश्वरं सर्वभूतानां सुहृदं च निरुपाधिकं मां ज्ञात्वा सोपाधिकनिरुपाधिकंब्रह्माभिन्नं मां ब्रह्मैवाहमित्यात्माभेदेन ज्ञात्वा शान्तिमृच्छति ॥ नेंद्रियसंयमादिमात्रेण मुक्तिः ॥ किंतु उक्तरूपब्रह्मात्मैक्यसाक्षात्कारद्वारा ॥ अतः मोक्षाय ज्ञेयं ब्रह्म ॥ तद्ज्ञानाय च कर्मणा शुद्धान्तःकरणैरेवन्ध्यानयोगः कार्यः ॥ स्यात् तेन ज्ञानद्वारा मुक्तिरूपं श्रेयः ॥ २९ ॥

वि ॥ संजयः ॥ कर्मयोगमुक्त्वा तत्फलभूतात्मसाक्षात्काराय आत्मध्यानमुक्त्वा द्वितीयादिभिरध्यायैरुक्तं कर्मयोगमुपसंहरिष्यन्, महता प्रबन्धेनाहं कर्मयोगे नियोजितः ॥ शपसि च तव प्रियं कर्मयोगमकुर्वन्तं ॥ का गतिः किं कर्तव्यं ॥ ईश्वरोऽसि ॥ कर्तुमकर्तुमन्यथा कर्तुं च शक्तोऽसि ॥ अतः त्वत्तोऽहमतिमात्रं भीतः कर्तुमनिच्छन्नपि कर्मयोगं अनुतिष्ठामि त्वदर्थमिति पार्थेनाभिहितः पार्थमाह भगवान् वासुदेवः ॥

कृष्णः ॥ मां ईश्वरं ज्ञात्वा भयात् कर्म माकुरु ॥ किंतु सर्वभूतानां सुहृदं ज्ञात्वा सुहृद् आराधनमिव मम आराधनरूपं कर्म सन्तोषेण कुरु ॥ कर्म कुर्वाण

१. ९. १८. २. १३. १८.

एव शान्तिशब्दितं सुखमृच्छति ॥ ना कुर्वाणः ॥ कर्तव्यमेव कर्म ॥ वैमनस्येन कृतं कर्म न मम तोषाय भवति ॥ किंतु सुहृदः कर्तव्य उपचारो यथा सतोषेण सुख-रूपेण क्रियते ॥ तथा मां सुहृदं ज्ञात्वा सुहृदर्थं कर्म करोमीति मत्वा संतोषेण सुखरूपेण मदर्थं कर्म कर्तव्यं ॥ तथाकृतमेव कर्म मम तोषाय कल्पते ॥ लोके अवराधिकृताः अकरणे अनर्थापादकं वरिष्ठाधिकारिणं आराधयन्तोऽपि दुःखरूपे-णाराधयन्ति ॥ सुहृदस्त्वाराधनं सुखरूपेण कुर्वन्ति ॥ निर्धनं सुहृदमाराधयन्ति के ॥ न कोऽपि ॥ इति चेत् नाहं निर्धनः सखा किंतु सर्वलोकमहेश्वरः आढ्यतमः सुहृत् ॥ आढ्यतमस्यापि सुहृदः आराधकान्तराभावे नोपचारं कुर्वते ॥ इति चेत् नाहं तथा ॥ किंतु यज्ञतपसां भोक्ता ॥ यज्ञैस्तपोभिश्चाराधयन्तो मम बहवो वर्तन्ते॥ अनेकैः परमेणादरेण परमोपचारैराराध्यमानं महैश्वर्यवंतं सर्वभूतानां सुहृदं आरा-धकेषु बहुषु सत्सु सौहार्दात् स्वगेहमुपागतं स्वस्य सुहृदमिव मां यज्ञतपसां भोक्तारं सर्वलोकमहेश्वरं सर्वभूतानां सुहृदं ज्ञात्वा सुखरूपेण परमेण सन्तोषेण मदर्थं कर्म कुर्वाणो मामाराधयन्नेव सुखं प्राप्नोति ॥ अतः त्वं मां सुहृदं मत्वा परमया प्रीत्या सुखबुद्ध्या कर्मभिराराधय ॥ स्यात्तेन ते परमं मंगलम् ॥ २९ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे कृष्णार्जुनसंवादे
संन्यासयोगो नाम पंचमोऽध्यायः ॥ ५ ॥

इतीत्यादि ॥ पूर्ववत् ॥ संन्यासस्य कामक्रोधादिवर्जनस्य कर्मसंन्यासस्य ज्ञानयोगस्य च योगः कर्मयोगाद्वरत्वेन प्रतिपाद्यत्वरूपः संबंधो यस्मिन्सः संन्यास-योगः इति नाम प्रसिद्धः पंचमोऽध्यायः इति पूर्णः ॥

इति श्रीमद्भगवद्गीतोपन्यासदर्पणे श्रीलक्ष्मणाचार्यविरचिते संन्यास-
योगाध्यायार्थप्रदर्शकः पंचमः प्रतिबिंबः ॥ ५ ॥

श्रीगुरुभ्योनमः

अथ षष्ठोऽध्यायः ॥

संजयः ॥ द्वितीयतृतीयचतुर्थपंचमैरध्यायैः कर्मयोगः सांगोपांगमभिहितः ॥ पंचमांते कर्मयोगफलभूतः ध्यानयोगः सूत्रभूताभ्यां द्वाभ्यां श्लोकाभ्यामभिहितः ॥ कथं कर्मयोगी ध्यानयोगी भवितुमर्हति ॥ संन्यासिनो योगिनश्च हि ध्यानयोगे अधिकुर्वंति ॥ ध्यानयोगः कर्मयोगस्य फलमस्तु नाम ॥ कथं तं ध्यानयोगं सूचनेन ज्ञातुं शक्नुयां ॥ विस्तरेण तं ध्यानयोगं ब्रूहीति पार्थेन पृष्टो भगवान् तं ध्यानयोगं १'उद्धरेदात्मनाऽऽत्मान'मित्यादिना विस्तरेणाभिधास्यन् कर्मयोगप्रशंसामुखेन कर्मयोगी ध्यानयोगाधिकारीत्याह ॥

श्रीभगवानुवाच—

कृष्णः ॥ अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ॥
स संन्यासी च योगी च न निरग्निर्न चाक्रियः ॥ १ ॥

अनाश्रित इति ॥ यः कर्मणः फलं कर्मफलं न आश्रितः अनाश्रितः सन् कर्तुं योग्यं कार्यं कर्म करोति ॥ सः संन्यासः अस्यास्तीति संन्यासी च ॥ योगः अस्यास्तीति योगी च ॥ निर्गताः अग्नयः यस्मात् सः निरग्निः न ॥ न विद्यन्ते क्रियाः यस्य सः अक्रियः स च न ॥ १ ॥

यः क्रियमाणस्य कर्मणः फलं फलत्वेन श्रुतं स्वर्गपशुपुत्रादिकं कर्मकरणनिमित्ततया अनाश्रित्य स्ववर्णाश्रमानुरोधेन कर्तव्यं कर्म करोति सः यथावदनुष्ठितस्वकर्मा २'यदृच्छालाभसंतुष्टो द्वंद्वातीतो विमत्सरः' ॥ इत्यादौ कर्मांगत्वेनोक्तकामादिवर्जनरूपसंन्यासवत्वात्संन्यासी ३'नियतं कुरु कर्म त्वं ४'तदर्थं कर्म कौंतेय मुक्तसंगः समाचर' ॥ ५'तस्मादसक्तः सततं कार्यं कर्म समाचर' ॥ इत्यादौ

---

१. ६. ५. २. ४. २२. ३. ३. ८. ४. ३. ९. ५. ३. १९.

कर्तव्यत्वेनोक्तकर्मयोगरूपयोगवत्वाद्योगी च ॥ स एव ध्यानाधिकारी ॥ पूर्वाध्यायांते सूचितस्य ध्यानयोगस्य विवरिष्यमाणत्वात् ध्यानयोगाधिकारीति लभ्यते ॥ कर्मयोगिन एव ध्यानयोगाधिकारित्वात्संन्यासकर्मयोगौ विशेषणविशेष्यभूतौ ध्यानयोगाधिकारिविशेषणभूतौ ॥ तदुक्त्या तद्वान् ध्यानयोगाधिकारी लभ्यते ॥ संन्यासी योगी च ध्यानयोगाधिकारीति ध्यानयोगाधिकारिविशेषणभूतौ संन्यासयोगौ तत्र तत्रोच्येते ॥ तौ निरग्नित्वाक्रियत्वरूपाविति केचिन्मन्यंते ॥ न तथा किंतु कामादिवर्जनकर्मयोगरूपा१वेव ॥ निरग्निः अग्निरहितः संन्यासी योगी च न ॥ अक्रियः क्रियारहितः संन्यासी योगी च २न ॥ ध्यानाधिकारिविशेषणभूतसंन्यासयोगवान् न किंतु उक्तरूपकर्मानुष्ठातैव संन्यासी योगी च ॥ कामादिवर्जनकर्मानुष्ठानरूपसंन्यासयोगवत्वात् ॥ निरग्निः अक्रियश्च यः संन्यासाश्रमी स हि संन्यासी योगी च ॥ तत्कथं यः कर्म करोति सः संन्यासी योगी चेति इति चेत् निरग्निः संन्यासी योगी च न ॥ अक्रियः संन्यासी योगी च न ॥ निरग्निः अक्रियश्च संन्यासी न भवति ॥ संन्यासिनोऽपि अग्नेः क्रियायाश्च सत्वात् ॥ साग्निः सक्रिय एव संन्यासी ॥ उक्तौ हि मया ॥ संन्यासिनो ब्रह्मरूपाऽग्निः तत्पूजारूपा क्रिया च ॥ ३'दैवमेवापरेयज्ञं'मित्यत्र ॥ अतः साग्निः सक्रियश्च यथोक्तकर्मकारी संन्यासी योगी चेत्युक्तं ४युक्तं ॥ पूर्वाश्रमस्वीकृतस्याग्नेः संन्यासाश्रमस्वीकारकाले आत्मनि समारोपणाच्च साग्निः संन्यासी ॥ १ ॥

अर्जुनः ॥ यः कर्म करोति स संन्यासी योगी चेत्युक्तं ॥ तत्कथं ॥ कर्मकरणस्य योगत्वात् सः योगी स्यात् ॥ कथं संन्यासी स्यात् ॥ कर्मकरणस्य संन्यासत्वाभावात् ॥ संन्यासवान् हि संन्यासी स्यात् ॥ अतः कथं ॥

१. 'स संन्यासी च योगी चे'ति न कर्मयोगिनः स्तुतिः ॥ किंतु ध्यानाधिकारिविशेषणभूतकामादिवर्जनकर्मयोगयोरुक्तिः ॥ २. नञ्द्वयं प्रतिषेधदार्ढ्याय ॥ ३. ४. २५. ४. निरग्निः अग्न्युपास्तिसहायत्वेन 'योषा वाव गौतमाग्नि'रिति श्रुत्या वा अग्निशब्दोदितभार्यापरित्यागी न संन्यासी ॥ अक्रियः विहितकर्मपरित्यागी न योगी ॥ भार्यापरित्यागमात्रेण न संन्यासी ॥ क्रियापरित्यागमात्रेण न योगी ॥ किंतु सभार्योऽपि सक्रियोऽपि उक्तरूपकर्मकृत् संन्यासी योगी च इत्यपि केचित् ॥

कृष्णः ॥ यं संन्यासमिति प्राहुर्योगं तं विद्धि पांडव ॥
न ह्यसंन्यस्तसंकल्पो योगी भवति कश्चन ॥ २ ॥

यमिति ॥ हे पांडव यं संन्यासं इति प्राहुः ॥ तं योगं योगैकदेशं विद्धि ॥ योगं तं तत्सदृशं विद्धि ॥ तं योगं योगान्तर्गतं विद्धि ॥ सम्यक् न्यस्तः त्यक्तः संकल्पः येन सः संन्यस्तसंकल्पः सः न भवतीत्यसंन्यस्तसंकल्पः कश्चन कोऽपि योगः अस्यास्तीति योगी न भवति ॥ हि प्रसिद्धम् ॥ २ ॥

'ज्ञेयः स नित्यसंन्यासी' इति पूर्वोक्तरीत्या यं कामादिवर्जनरूपं संन्यासं प्राहुः ॥ सः संन्यासः योगशब्दितकर्मयोगविशेषणतया योगांतर्गतत्वाद्योगशब्दितः ॥ संन्यासं योगांतर्गतत्वाद्योगशब्दितं जानीहि ॥ योगे संन्यासो वर्तते इति कुत इति चेत् संकल्पतदुपलक्षितकामादिवर्जनरूपसंन्यासरहितः कोपि कर्मयोगी न भवति ॥ उक्तरूपसंन्यासवानेव कर्मयोगी भवति ॥ उक्तरूपसंन्यासविशिष्टकर्मयोग एव कर्मयोगः ॥ विशेषणाभावे कर्मयोग एव न भवति ॥ 'अनाश्रितः कर्मफलं इत्युक्तविधया संन्याससहितं कर्म यः करोति सः कर्मयोगी ॥ तेन क्रियमाणे कर्मणि संन्यासस्य विद्यमानत्वात् तादृशकर्मयोगवान् संन्यासवानपि स्यात् ॥ न हि विशिष्टवान् विशेषणवान् न भवति ॥ अतः योगः संन्यासः योगी संन्यासी इति विद्धि ॥ अतः कर्म कुर्वाणो योगी संन्यासी चेत्युक्तः ॥ अत उक्तं युक्तं ॥ पांडवस्त्वमुक्तविधकर्मयोगवान् भूत्वा ध्यानयोगाधिकारी भवितुमर्हसि ॥ २ ॥

अ ॥ कृष्णः ॥ अनाश्रितः कर्मफलं कार्यं कर्म यः करोति सः संन्यासी च योगी च ज्ञानपूर्वकसर्वकर्मसंन्यासरूपमुख्यसंन्यासवांश्च ॥ चित्तवृत्तिनिरोधरूपयोगवांश्च भवति ॥ कर्मयोगिनः स्तुतिरियं ॥ यः अग्निशब्दवाच्यगार्हपत्याहवनीयदक्षिणाग्निरहितः तेन अग्निशब्दलक्षिताग्निसाध्याग्निहोत्रादिक्रियारहितः अनग्निसाध्यतपोदानादिक्रियारहितः देहेंद्रियादिचेष्टारूपक्रियारहितश्च स एव संन्यासी योगी च ॥ कथं कर्म कुर्वन् संन्यासी योगी च स्यात् इति चेत्

१न निरग्निः 'न च अक्रियः' 'सर्वं वाक्यं सावधारण'मिति न्यायेन निरग्निरेव अक्रिय एव इति लभ्यते ॥ निरग्निरेव संन्यासी योगी च न ॥ अक्रिय एव संन्यासी योगी च न ॥ किंतु साग्निः सक्रियः गृहस्थादिरपि संन्यासी योगी च ॥ अहो महिमा कर्मयोगस्य ॥ स संन्यासी योगी च ॥ निरग्निः अक्रियश्च यः सहि संन्यासी योगी च ॥ कथं कर्म कुर्वन् संन्यासी योगी च भवति इति चेत् कर्म कुर्वन् यद्यपि न निरग्निः नच अक्रियः तथाऽपि संन्यासी योगी च स्तुतिरियं ॥ अथवा निरग्निः न संन्यासी योगी च ॥ अक्रियः न संन्यासी योगी च ॥ किंतु साग्निः सक्रियश्च उक्तरूपं कर्म कुर्वन् संन्यासी योगी च ॥ स्तुतिरियं ॥ 'नहि निंदा'न्यायेन 'अपशवो वा अन्ये गो अश्वेभ्य' इत्यत्र गवाश्वेतरपशूनां पशुत्वनिषेधो यथा गोरश्वस्य च प्रशंसायां पर्यवस्यति तथा निरग्नेरक्रियस्य च संन्यासित्वयोगित्वप्रतिषेधः तदन्यस्य साग्नेः सक्रियस्य कर्मिणः प्रशंसायां पर्यवस्यति ॥ १निरग्निः अग्निशब्दलक्षिततत्साध्यक्रियोपलक्षितसर्वकर्मपरित्यागी संन्यासी न ॥ अक्रियः निरुद्धचित्तवृत्तिः योगी न ॥ इति क्रमात्प्रतिषेधः ॥ एवं सति नञ्द्वयमुपपन्नम् ॥ १ ॥

अर्जुनः ॥ कथं कर्म योगिनः संन्यासित्वं योगित्वं च ॥ निरग्निरक्रियो हि संन्यासी योगी च ॥ अयंतु साग्निः सक्रियश्च ॥ अतः कथमिदं ॥ साग्निरपि सक्रियोऽपि कर्मयोगी संन्यासी योगीचेति स्तूयत इत्युक्तमिति चेत् स्तूयतां ॥ असंन्यासिनि अयोगिनि कथं संन्यासियोगिशब्दयोः प्रवृत्तिः संन्यासित्वयोगित्वयोः प्रवृत्तिनिमित्तयो रभावात् ॥ ब्रूहि ॥

कृष्णः ॥ हे पांडव यं संन्यासं अङ्गिसंन्यासपरमार्थसंन्यासविद्वत्संन्यासशब्दितं इति संन्यासत्वेन हेतुना प्राहुः प्रकृष्टं वदंति २ 'तस्मान्न्यासमेषां तपसामतिरिक्तमाहुः' ॥ 'न्यास एवात्यरेचयत्' ॥ इति च श्रुतिः ॥ योगं तं ज्ञानपूर्वकसर्वकर्मसंन्यासं जानीहि ॥ कर्मयोगं संन्यासं जानीहि ॥ अतः कर्मयोगी संन्यासी

१. निरग्निः अग्निहोत्रादिपरित्यागी अक्रियः करचरणचेष्टारहितः संन्यासी योगी च न ॥ किंतु मिथ्याचारो भ्रष्टः ॥ उक्तं हि मया ॥ 'मिथ्याचारस्सउच्यते ॥ (३. ६.) इति ॥ २. ना. ७९. ७८.

योगी च भवति ॥ कथं कर्मयोगः संन्यासः स्यात् तयोर्भेदादिति चेत् न तयोः साक्षादभेद उच्यते ॥ किंतु सादृश्यादभेदव्यपदेशः ॥ मुखचंद्रयोर्भेदेऽपि सादृश्यात् मुखं चंद्र इत्यभेदव्यपदेशवत् ॥ कर्मयोगस्य संन्याससादृश्यात्संन्यासत्वेन कर्मयोगिनि संन्यासिशब्दः स्तुत्यर्थं प्रयुज्यते ॥ मुखे स्तुत्यर्थं चंद्रशब्दप्रयोगवत् ॥ यः संन्यासी सः चित्तवृत्तिनिरोधरूपयोगवान् भवति अतो योगी ॥ कर्मिणः सादृश्यात् संन्यासित्वं योगित्वं च संपद्यते ॥ अतः कर्मिणि योगिशब्दोऽपि स्तुत्यर्थं प्रयुज्यते ॥ कर्मयोगवतः प्रधानसंन्यासवतश्च केन साम्यमिति चेत् कर्मफलसंकल्पमूलकचित्तविक्षेपाभावेन साम्यम् ॥ उभयोरपि उक्तचित्तविक्षेपाभावात् ॥ संन्यासिनः संकल्पमूलकचित्तविक्षेपाभावोऽस्ति ॥ स कथमसंन्यासिनः कर्मिण इति चेत् तस्यापि सोऽस्त्येव ॥ तदभावे कर्मयोगित्वमेव नास्ति ॥ अत्यक्तसंकल्पः कोऽपि कर्मयोगी न भवति ॥ प्रसिद्धमिदम् ॥ अतः कर्मयोगी संन्यासी योगी चेति 'स संन्यासी च योगी चे'ति स्तुत्यर्थमुक्तं युक्तम् ॥ असंन्यस्तसंकल्पः कश्चिदपि कर्मी योगी विक्षेपाभावरूपमनःसमाधानवान् न भवति ॥ किंतु संन्यस्तसंकल्प एव कर्मी उक्तसमाधानवान् भवति ॥ अतः केवलकर्मयोगी संन्यासी योगी च न भवति ॥ फलसंकल्पत्यागपूर्वककर्मानुष्ठानवानेव फलसंकल्पत्यागसाम्यात्संन्यासी चित्तविक्षेपाभावसाम्याद्योगी च भवति ॥ अत उक्तं युक्तं ॥ असंन्यस्तसंकल्पः कश्चिदपि कर्मी ज्ञानी वा योगी न भवति ॥ कर्मी ज्ञानी वा संन्यस्तसंकल्पश्चेदेव[१] योगी भवति ॥ अतः कर्मिणः संन्यासिनश्च विक्षेपाभावेन साम्यं संपद्यते ॥ यं धर्मं कर्मित्वादर्शनरूपं सर्वत्र ब्रह्मदृष्ट्या बाह्यपदार्थभावनापरिवर्जनरूपं संन्यासमिति प्राहुः ॥ योगं तं जानीहि ॥ अंगांगिभावेन एकफलकत्वात् ॥ एकफलकयोः फलैक्यादेकत्वमुक्तं प्राक् ॥ २'व्यवसायात्मिका बुद्धिरेके'ति ॥ ३'एकं सांख्यं च योगं चे'ति च ॥ साम्याद्वा ऐक्यव्यपदेशः ॥ असंन्यस्तसंकल्पः कश्चिदपि योगी समाधानवान्न भवति ॥ अथवा योगी मोक्षयोगार्हो न भवति ॥ किंतु [४]जन्मादि दुःखयोगी भवति ॥ [५]'कामान्

१. योगी कर्मयोगी ज्ञानयोगी वा मनःसमाधानवान्वा ॥ २. १. ४१. ३. ५. ५. ४. कश्च न इति छेदः ॥ न भवतीति नहि इत्यन्वयः ॥ ५. मु. ६. २.

यः कामयते मन्यमानः स कामभिर्जायते तत्र तत्र' ॥ इति श्रुतिप्रसिद्धमिदं ॥ अतः 'स संन्यासी च योगी चे'ति युक्तम् ॥ २ ॥

वि ॥ कृष्णः ॥ यः कर्मफलं अनाश्रितः कार्यं कर्म करोति सः संन्यासी-ज्ञानयोगी च योगी कर्मयोगी च इति मंतव्यः ॥ १ 'एकं सांख्यं च योगं च यः पश्यति स पश्यति' ॥ इति २ 'कृत्वाऽपि न निबध्यते' ॥ इति कर्मिणः ज्ञान-निष्ठाव्यवधानमंतरेणैव आत्मावलोकनसिद्धेरुक्तत्वात् पृथक्साधनभूतकर्मयोग-ज्ञानयोगरूपोभयसाधनसाध्यफलवत्त्वेन ज्ञानकर्मोभयनिष्ठत्वमुपचारादस्योच्यते ॥ कर्मयोगांतर्गतज्ञानवत्त्वेन ज्ञानयोगित्वं कर्मयोगवत्त्वात्कर्मयोगित्वं चेति वा ॥ उक्तं च मया ॥ कर्मयोगस्य अंतर्गतज्ञानयोगकत्वं 'व्यवसायात्मिका बुद्धिरेकेहे'ति ॥ ३ 'कर्मण्यकर्म यः पश्ये'दिति च ॥ ४ निरग्निः अग्निशब्दलक्षिताग्निसाध्य-क्रियोपलक्षितसर्वक्रियारहितः कर्मयोगाभावेन नोभययोगयोगी अक्रियः कर्म-भिन्नतत्प्रतिनिर्देश्यज्ञानयोगमात्रनिष्ठश्च न संन्यासी योगी च ॥ ५ निरग्निः श्रौत-क्रियारहितः अक्रियः स्मार्तक्रियारहितः केवलज्ञाननिष्ठः नोभययोगयोगी इति वा ॥ कर्मयोगनिष्ठस्तु उक्तविधया उभययोगयोगी ॥ अतः केवलपरोक्षज्ञानयो-ग्यपेक्षया उक्तरूपकर्मयोगी विशिष्यते ॥ स एव आत्मावलोकनरूपध्यानयोगा-धिकारी ज्ञेयः ॥ १ ॥

अर्जुनः ॥ कथं कर्मयोगिन उभययोगयोगित्वं कर्मयोगानुष्ठानेन कर्मयोगित्व-सत्वेऽपि ज्ञानयोगाभावेन ज्ञानयोगित्वाभावात् ॥ अतः 'स संन्यासी च योगी चे'त्युक्तमयुक्तं इति भाति ॥ ब्रूहि ॥

कृष्णः ॥ हे पांडव यं संन्यासं ज्ञानयोगं इति प्राहुः तं ज्ञानयोगं योगं कर्म-योगमेव जानीहि ॥ कर्मयोगान्तर्गतत्वेन कर्मयोगैकदेशमेव जानीहि ॥ अतः कर्म-योगवान् तदेकदेशज्ञानयोगवानपि भवति ॥ नहि विशिष्टवान् विशेषणवान्न भवति ॥ कुतः कर्मयोगे ज्ञानमस्तीत्यभ्युपगंतव्यं इति चेत् उक्तनानाविधकर्म-

१. ५. ५. २. ४. २२. ३. ४. १८. ४. अत्र नञ्द्वयमुपपन्नम् ॥ ५. अत्र उभाभ्यां केवल-ज्ञानयोगिलाभः ॥ नञ्द्वयं दार्ढ्याय ॥

योगिषु मध्ये कोऽपि योगी असंन्यस्तसंकल्पः नहि भवति ॥ सं एकीकृत्य कल्पः संकल्पः अनात्मना देहेन एकीकृत्य आत्मनः कल्पनं ॥ देहात्मैक्यज्ञानमिति यावत् ॥ तत् येन न त्यक्तं सः असंन्यस्तसंकल्पः ॥ देहात्मैक्यज्ञानवानिति यावत् ॥ एवंविधो न भवति ॥ अकाम्यकर्मयोगी वा काम्यकर्मयोगी वा देहात्मैक्यज्ञानवान् न भवति ॥ किंतु देहातिरिक्तात्मास्तित्वज्ञानवानेव भवति ॥ तत्र काम्यकर्मयोगी देहातिरिक्तात्मास्तित्वज्ञानवान् ॥ अकाम्यकर्मयोगी तु देहातिरिक्तात्मस्वरूपयाथात्म्यज्ञानवान् ॥ देहातिरिक्तात्मास्तित्वज्ञानाभावे स्वर्गाद्यर्थं काम्यं कर्म वा मोक्षार्थं अकाम्यं कर्म वा कोऽपि न कुर्यात् ॥ अतः आत्मज्ञानंविना कस्यापि कर्मयोगस्याभावात् कर्मयोगी ज्ञानयोगी भवति ॥ अतः कर्मयोगी कर्मानुष्ठानात् कर्मयोगी ॥ उक्तरीत्या तत्र ज्ञानसत्वात् ज्ञानयोगी च भवति ॥ अतः 'स संन्यासी च योगी चे'त्युक्तं युक्तं ॥ काम्यकर्मयोगवानेव उभययोगयोगी ॥ किमुत अकाम्यकर्मयोगवान् ॥ अतः तादृशः अकाम्यकर्मयोगः ॥ उक्तं च मया [1]'यस्य सर्वे समारंभाः कामसंकल्पवर्जिताः' ॥ इति ॥ २ ॥

अर्जुनः ॥ ध्यानाधिकारत्वेनोक्तो यथोक्तः कर्मयोगः कियत्पर्यंतमनुष्ठेयः किं सकृत् ॥ उत फलप्राप्तिपर्यंतं ॥ ब्रूहि ॥

कृष्णः ॥ आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ॥
योगारूढस्य तस्यैव शमः कारणमुच्यते ॥ ३ ॥

आरुरुक्षोरिति ॥ योगं आरोढुं इच्छुः आरुरुक्षुः तस्य मुनेः कर्म कारणं उच्यते ॥ योगं आरूढः योगारूढः तस्य शम एव कारणं उच्यते ॥ ३ ॥

कर्मलब्धांतःकरणशुद्धिद्वारा मुनेः परोक्षज्ञानिनः योगशब्दितं अपरोक्षज्ञानयोगं प्राप्तुमिच्छोः योगशब्दितापरोक्षज्ञानलाभस्य कर्मयोगः कारणमुच्यते ॥ अपरोक्षज्ञानसिद्धिपर्यंतं कर्मयोगोनुष्ठेयः ॥ योगं अपरोक्षज्ञानं प्राप्तस्य तस्य शम एव सार्वकालिकभगवद्ध्यानमेव कारणमुच्यते ॥ शमः कस्य कारणमिति चेत्

१. ४. १९.

मुक्तावतिशयस्येति बोध्यं ॥ १'यदा ते मोहकलिल'मित्यत्र परोक्षज्ञानोदयपर्यंतं कर्मयोगः कर्तव्य इत्युक्तं ॥ अत्र तु अपरोक्षज्ञानोदयपर्यंतं कर्तव्य इत्युच्यते ॥ इति भेदः ॥ तस्यैवानुवादो वा ॥ अपरोक्षज्ञानोदयपर्यंतं नानाजनशुश्रूषारूपं कर्म कर्तव्यं ॥ अपरोक्षज्ञानानंतरं भगवदेकनिष्ठतया नानाजनशुश्रूषारूपकर्मतो निवर्तनीयं ॥ इदमेवोक्तं मया ॥ ३'न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः' ॥ इति ॥ 'कर्मकारणमुच्यते' ॥ 'शमः कारणमुच्यते' ॥ इत्युच्यतेपदावृत्त्या द्वयमपीदं श्रुत्यादिप्रमाणप्रमितमिति सूच्यते ॥ प्राप्तेः आरुरुक्षोः आरूढस्येत्यारोहपदेनोक्त्या योगस्य आरोढव्योपरिभागबत्साधनपरंपराप्राप्यत्वं सूच्यते ॥ ३ ॥

अ ॥ योगं ज्ञानयोगं प्राप्तुमिच्छोः मुनेः भाविनीं वृत्तिमाश्रित्य निर्देशः ॥ 'गृहस्थः स्त्रियमुद्वहे'दिति वत् ॥ मुनीभविष्यतः ज्ञानप्राप्तेः कर्मयोगः कारणमुच्यते॥ ज्ञानयोगं प्राप्तस्य तस्य शमः सर्वकर्मोपरम एव कारणमुच्यते॥ कस्य कारणमिति चेत् ज्ञानयोगपरिपाकस्य कारणं विदेहमुक्तेर्वा कारणं ॥ इदमेवोक्तं मया ॥ ३'तस्य कार्यं न विद्यते' ॥ इति ॥ ध्यानयोगं प्राप्तुमिच्छोः मुनेः कर्मफलत्यागिनः कर्म ध्यानयोगनिष्पत्तौ कारणं ध्यानयोगं प्राप्तस्य सर्वकर्मनिवृत्तिरेव ध्यानपरिपाके कारणं॥ यावत् यावत् कर्मोपरमः तावत्तावत् चित्तसमाधानेन ध्यानयोगपरिपाकः ॥ 'नैतादृशं ब्राह्मणस्यास्ति वित्तं यथैकता समता सत्यता च ॥ शीलं स्थितिर्दंडनिधानमार्जवं ततस्ततश्चोपरमः क्रियाभ्यः' ॥ इति ह्युक्तमभियुक्तैः ॥ योगं चित्तशुद्धिं प्राप्तुकामस्य भविष्यन्मुनेः कर्म चित्तशुद्धेः कारणं ॥ तं योगमारूढस्य तस्य शमः सर्वकर्मसंन्यास एव ज्ञानपरिपाके कारणं ॥ आवद्योगारोहणं कर्मयोगः ॥ योगारूढस्य ४ कर्मनिवृत्तिरिति तत्वं ॥ ३ ॥

वि ॥ अर्जुनः ॥ पृथक्साधनभूतज्ञानकर्मोभयसाध्यात्मावलोकनरूपफलवत्वात् कर्मयोगी संन्यासी योगी चेत्युच्यते ॥ इत्युक्तं ॥ किं कर्मयोगिनः कर्मणा

---

१. २. ५२. २. ३. १८. ३. ३. १७. ४. शमः विक्षेपोपरमः स्वत एव कर्मोपरमः ॥ अत्र, सम्यक् न्यासः समाप्तिर्विमलतरधियः कर्मणां संविदाप्तौ संन्यासो यद्वदध्वा स्वयमुपरमति ग्रामवत्कं प्रवेश्य ॥ रंभा तावद्विवृद्धिं भजाते फलभरं यावदुच्चैः प्रसूते ह्रासं पश्चात्तथैवामृतमभिलषतो ज्ञानमुत्पाद्यकर्म' ॥ इति अध्यात्ममीमांसावचनमनुसंधेयम् ॥

ज्ञानयोगव्यवधानमंतरेण साक्षादात्मावलोकनं सिध्यति ॥ किं कर्मणः आत्मावलोकनं प्रति ज्ञानयोगनैरपेक्ष्येण कारणत्वमस्ति ॥ इति शंकते मे मानसं ॥ ब्रूहि ॥

कृष्णः ॥ योगशब्दितं आत्मावलोकनं प्राप्तुमिच्छोः मुनेः कर्मयोगस्य अंतर्गतोऽऽत्मयाथात्म्यज्ञानकत्वेन यथावदात्मस्वरूपमनुसंदधतः कर्मयोगिनः कर्म आत्मावलोकनप्राप्तेः कारणं भवतीत्युच्यते ॥ आत्मावलोकनसिद्धिं प्राप्तस्य तस्य शमः कर्मनिवृत्तिरेव आत्मावलोकनात्मकयोगपरिपाकस्य कारणं उच्यते ॥ आत्मावलोकनस्य कर्म कारणमिति विशेषविधिः शेषनिषेधपरः ॥ शेषश्च परोक्षज्ञानरूपः ॥ ततश्च यथावदनुष्ठितः कर्मयोग एव ज्ञानयोगनिरपेक्षः आत्मावलोकनसाधनं भवतीति सिद्धं ॥ उत्तरार्धे योगारूढस्य कर्मनिषेधः योगमनारूढस्य तत्प्राप्तीच्छोः कर्मकरणं[1]विधिपरः ॥ ततश्च योगमनारूढेन तत्प्राप्तीच्छुना तत्प्राप्तिपर्यंतमवश्यं कर्मानुष्ठेयमिति सिद्धं ॥ उक्तरीत्या यथावदनुष्ठितकर्मयोगस्य स्वसाध्यज्ञानयोगस्येव साक्षादात्मावलोकनहेतुत्वात्पृथगुभययोगसाध्यफलसाधनत्वेन संन्यासी च योगी चेति उभययोगयोगित्वोक्तिर्युक्तेत्यवगंतव्यं ॥ आत्मावलोकने मोक्षत्वोपचारेण कर्मयोगो मोक्षहेतुरित्युक्तिः ॥ उक्तं च तथा मया ॥ 'कृत्वाऽपि न निबध्यते' ॥ इति ॥ 'निःश्रेयसकरावुभा'विति ॥ 'निर्द्वंद्वो हि महाबाहो सुखं बंधात्प्रमुच्यते' ॥ इति च ॥ कर्मयोगस्य आत्मावलोकनं फलमुक्तं मया ॥ 'तदा योगमवाप्स्यसी'ति॥ ज्ञानयोगफलमात्मावलोकनं कर्मयोगेनापि साक्षात्पृथक् लभ्यते ॥ अतः उभययोगसाध्यफलसाधकत्वात् कर्मयोगस्य उभयात्मकत्वोक्तिः ॥ उक्तं च मया 'यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते' ॥ इति ॥ पूर्वमसकृदुक्तस्यैवास्यार्थस्य दार्ढ्यार्थं मत्र विशेषविधिना अन्यनिषेधेन प्रतिपादनं इति बोध्यम् ॥ ३ ॥

अर्जुनः ॥ योगारोहणशब्दितयोगप्राप्तिपर्यंतं कर्मयोगः कर्तव्य इत्युक्तं ॥ कदा योगारूढ इत्युच्येत ॥ योगारूढलक्षणमस्य कदा भवति ॥ ब्रूहि ॥

---

१. विशेषविधेः शेषनिषेधे पर्यवसानं अन्यनिषेधस्य अन्यविधिपर्यवसानं च 'रेणुर्द्वयोः स्त्रियां धूलिः पांसुर्नी न द्वयोरजः ॥' इत्यादौ व्यक्तम् ॥

उद्धरेदिति ॥ आत्मना आत्मानं उद्धरेत् ॥ आत्मानं नावसादयेत् ॥ आत्मनः आत्मैव बंधुः ॥ आत्मैव आत्मनः रिपुः शत्रुः ॥ हि प्रसिद्धम् ॥ ५ ॥

ईप्सिते आत्मवस्तुनि परमात्मवस्तुनि च आत्मशब्दितस्य मनसो योजनं हि ध्यानं ॥ तच्च शोधितस्यैव मनसः संभवति ॥ नाऽशोधितस्य ॥ मनसः शुद्धिश्च कर्मणैव नान्येन ॥ अतः कर्मयोग्येव ध्यानाधिकारी भवति ॥ कर्मणा शोधितेन मनसा स्वं योगारूढतामापाद्य संसारापाराकूपारादुत्धरेत् ॥ आत्मानं नावसादयेत् न नाशयेत् ॥ न स्वं तस्मिन्निमज्जयेत् ॥ बंधुरुत्धरति रिपुरवसादयति ॥ अतः कथं मनसा उत्धरेत् नावसादयेदित्युच्यते इति चेत् आत्मनः स्वस्य आत्मैव मन एव बंधुः नान्यः ॥ आत्मनः स्वस्य आत्मैव मन एव शत्रुः नान्यः ॥ बंधवो रिपवश्च बाह्यप्रयोजनानुकूल्यप्रातिकूल्याभ्यां देहबंधवः देहशत्रवश्च ॥ मनस्तु पुरुषार्थानुकूल्यप्रातिकूल्याभ्यां आत्मबंधुः आत्मशत्रुश्च ॥ ये बंधवः ये च रिपवः तेऽपि आत्मप्रयुक्ता एवेति युक्तं आत्मन एव बंधुत्वं शत्रुत्वं च ॥ प्रसिद्धमिदं ॥ आत्मशब्दाऽऽवृत्तिरुक्तार्थे तात्पर्यद्योतनाय ॥ यो नोत्धरति अवसादयति चात्मानं स [१] आत्मद्रोही भवति ॥ आत्मद्रोहिणस्तु अधोगतिर्नियता ॥ २ 'असुर्या नाम ते लोका अंधेन तमसावृताः ॥ तांस्ते प्रेत्याभिगच्छंति येके चात्महनो जनाः' ॥ इति श्रुतिः ॥ आत्मना स्वेनैव स्वमुत्धरेत् ॥ स्वेनैव स्वं नावसादयेत् ॥ स्वस्य स्वयमेव बंधुः ॥ स्वस्य स्वयमेव रिपुश्च ॥ यथा रोगी महाज्वरादिप्रचंडरोगनिमग्नं आत्मानं अपथ्यसेवनमपास्य दिव्यौषधपथ्यसेवननिरतो भूत्वा स्वेनैव रोगादुत्धरति ॥ तथा पुत्रमित्रकलत्रादिगोचरमहामोहावर्तशताकुले कामक्रोधलोभाहंकारममकारादिचित्तविकारमहाग्राहसमुज्जृंभिते नानाविधमहारोगतिमितिमिङ्गिलकोटिविराजिते अशनायापिपासादिमहाकल्लोलोद्वेल्लिते तापत्रयनिबिडबडबानलज्वालामालासंवीते स्वेष्टजननष्टिप्रयुक्तप्रलापमहाध्वनिविधूर्णिते नित्यनिरंतरदुर्वासनाशैवालपटलसंकीर्णे विषयविषपरिपूर्णे संसारार्णवे निमग्नं स्वं श्रद्धाभक्तिसमाराधितपरमेश्वरप्रसादवता सदसद्विवेकवैराग्यशमदमादिसाधनवता श्र-

१. अत, लब्ध्वा कथं चिन्नरजन्म दुर्लभं तत्रापि पुंस्त्वं श्रुतिपारदर्शनं ॥ यस्त्वात्ममुक्तौ न यतेत मूढधीः स ह्यात्महा स्वं विनिहंत्यसद्ग्रहात्' इति विवेकचूडामणिश्लोकोऽनुसंधेयः ॥ २. ई. ३.

[illegible] मानवता स्वेनैव तस्मात्संसारसागरादुत्थरेत् ॥ अविद्यातत्कार्यसंबंधलेशरहितेन सच्चिदानंदैकस्वरूपेणावस्थापयेत् ॥ स्वस्वरूपेणावस्थानं मोक्षः तं प्रापयेत् ॥ यथा रोगी जिह्वाचापल्यदोषवेगवशगो भूत्वा स्वाऽऽरोग्यप्राप्तिकुलमपथ्यं भुक्त्वा स्वं स्वेन नाशयति तथा बाह्यविषयप्रावण्यरूपापथ्यसेवनेन स्वं स्वेन न नाशयेत् ॥ स्वस्य स्वयमेव बंधुः ॥ स्वस्य स्वयमेव शत्रुश्च ॥ अतः उक्तरीत्या आत्मोत्धरणपरेण भवितव्यं ॥ तादृशी योग्यता तु कर्मयोगादेव भवतीति कर्मयोगवानेव ध्यानयोगाधिकारी भवतीति युक्तम् ॥ ५ ॥

अर्जुनः ॥ कस्यात्मनः आत्मा बंधुः शत्रुश्च भवति ॥ कीदृश आत्मा बंधुः शत्रुश्च भवति ॥ ब्रूहि ॥

कृष्णः ॥ बंधुरात्माऽऽत्मनस्तस्य येनाऽऽत्मैवाऽऽत्मना जितः ॥
अनात्मनस्तु शत्रुत्वे वर्तेताऽऽत्मैव शत्रुवत् ॥ ६ ॥

बंधुरिति ॥ येन आत्मना आत्मा जित एव तस्य आत्मनः आत्मा बंधुः ॥ न विद्यते आत्मा यस्य सः अनात्मा तस्य तु आत्मा शत्रुणा तुल्यं शत्रुवत् शत्रोर्भावः शत्रुत्वं तस्मिन् शत्रुत्वएव वर्तेत ॥ ६ ॥

तस्य आत्मनः आत्मा बंधुः ॥ कस्येति चेत् येन आत्मना येन जीवेन आत्मना मनसा बुत्ध्या स्वेनैव वा आत्मा मनः कार्यकारणसंघातो वा वशीकृतः ॥ तस्य आत्मनः मनः स्वरूपं वा बंधुः ॥ तस्य तादृशं जितं मनो बंधुः तादृशः जितेन्द्रिय आत्मा तस्याऽऽत्मनो बंधुः ॥ अनात्मनः येन मनो न वशीकृतं तस्य येन कार्यकरणसंघातः न वशीकृतः तस्य अजितात्मनः आत्मा मन एव स्वरूपमेव वा प्रसिद्धशत्रुवत् शत्रुत्वे शत्रुभावे शत्रुकार्ये वर्तेत ॥ तुशब्दः अजितात्मनो महांतमनर्थं सूचयति ॥ अनात्मनः आत्मभिन्नस्य देहेंद्रियादेः शत्रुत्वे सति आत्मैवस्वयमेव स्वस्य शत्रुवत् वर्तेत ॥ अनात्मन इति कथमुच्यत इति चेत् सन्नप्यात्मा अवशीकृतत्वेन यस्य नोपकरोति सः अनात्मेत्युच्यते ॥ सदपि धनं यस्य नोपभोगाय भवति सोऽधन इत्येवोच्यते ॥ बुंधुरेवेति वा तस्यैवेति वा येनैवेति वा

जित एवेति वाऽन्वयः ॥ शत्रुवदेवेति वा शत्रुत्व एवेति वा वर्तेतैवेति वाऽन्वयः ॥ आत्मनो विषयसंगतदसंगाभ्यां शत्रुत्वं मित्रत्वं च भवति ॥ अत एव वदंति ॥ 'मन एव मनुष्याणां कारणं बंधमोक्षयोः ॥ बंधायविषयासक्तं मुक्त्यैनिर्विषयं स्मृतं' ॥ इति ॥ अत आत्मानं कर्मयोगेन शोधितं कृत्वा तेन स्वयमात्मानमुत्धरेत् ॥ ६ ॥

अर्जुनः ॥ अजितात्मनः आत्मनाऽनर्थो भवतीत्युक्तं ॥ जितात्मनः आत्मना किं भवति ॥ ब्रूहि ॥

कृष्णः ॥ जितात्मनः प्रशांतस्य परमात्मा समाहितः ॥ ६॥ ॥

जितेति ॥ जितः आत्मा येन सः जिताऽऽत्मा तस्य प्रशांतस्य परमश्चासौ आत्मा च परमात्मा सम्यक् आहितः स्थापितः समाहितः भवति ॥ ६॥ ॥

जितमनसः अतएव स्वतएव विषयेष्वप्रवृत्तिरूपां प्रशांतिं प्राप्तस्य परमात्मा सम्यक् आहितो भवति ॥ ध्यानयोग विषयीभूय अपरोक्षज्ञानविषयी भवति ॥ तदा योगारूढ उच्यते ॥ ६॥ ॥

अर्जुनः ॥ योगारूढस्य लक्षणं 'यदाहीति संग्रहेणोक्तम् ॥ तद्विस्तरेण स्पष्टं ब्रूहि ॥

कृष्णः ॥ शीतोष्णसुखदुःखेषु तथा मानापमानयोः ॥ ७ ॥

ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः ॥
युक्त इत्युच्यते योगी समलोष्टाश्मकांचनः ॥ ८ ॥

सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबंधुषु ॥
साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥ ९ ॥

शीतेति ॥ शीतं च उष्णं च सुखं च दुःखं च शीतोष्णसुखदुःखानि तेषु तथा मानश्च अपमानश्च मानोपमानौ तयोः सम इति शेषः ॥ ७ ॥

ज्ञानेति ॥ ज्ञानं च विज्ञानं च ज्ञानविज्ञाने ताभ्यां तृप्तः आत्मा यस्य सः ज्ञान-

श्रीरस्तु

श्रीभगवत् प्रणीता

मोक्षसौदसोपानभूता

श्रीमद्भगवद्गीता

विचित्रमत'बधानी" "विद्वन्मणि" "सल्लक्षणवर्णक्रम धनपाठि" "महाभागवत'
"मतत्रय भगवद्गीतोपन्यास विद्वान्" इत्याद्यनेक बिरुदालंकृत बालगडे
पण्डित टि. लक्ष्मणाचार्य प्रणीतया. मतत्रय भाष्यार्थ प्रकाशिकया

श्रीभगवद्गीतोपन्यासदर्पणाख्यया

व्याख्यया संबलिता

तत् पौत्रेण

बालेगड्डे. लि. ना. रघूत्तमाचार्येण

प्रकाशीकृत'

चेन्नपुर्यां डिक्सन् मुद्राक्षरशालायां मुद्रिताविजयतेतमाम्

द्वितीयभागः

श्रीशके १८४६ रक्ताक्षिनामसंवत्सरे

मूल्यं रूप्यकत्रयं] *All Right Reserved.* [प्रेषणव्ययः पथक्

अस्य पुस्तकस्य सर्वोप्यधिकाराः राजकीयनियमानुरोधेन प्रकटयिता स्वायत्तीकृताः ॥

एषाप्रकटनपत्रिका यथानुकूलं सर्वेभ्योयुष्मन्मित्रेभ्यो बन्धुभ्यश्च मयि कृपया प्रदर्शयितव्या । किंच ये इदं पुस्तकमपेक्षेरन् तादृशानां नामादिकं मह्यं निर्दिष्टंचेत्, तेभ्योऽहमिमांप्रेषयेयम्

अचिरादेव प्रकाशयिष्यते ॥ ॥ श्रीः ॥ अचिरादेव प्रकाशयिष्यते ॥

अनितरसाधारणया द्वैताद्वैतविशिष्टाद्वैतरूपमतत्रयसाधारण्या सुललितपदविन्यासावि त्रितया, आत्मार्थमवबुभुत्सूनां गीतोपन्यासकानां चात्यन्तमुपकारिण्या, अतिसमीचीनदेवनागर मुद्राक्षरमुद्रितया **गीतोपन्यास दर्पण** अभिख्यायाव्याख्यया विभूषिता ॥

इयंच व्याख्या विचित्रशतावधानी विद्वन्मणि, महाभागवत, सलक्षणवर्णक्रमघनपाठं मतत्रयगीतोपन्यासविद्वत्प्रमुख विविध विरुदविभूषितैः **पण्डित टि. लक्ष्मणाचार्यै** वि चिता तत्पौत्रेणच टि. एन्. रघूत्तमाचार्येण प्रथम भागे पण्डितमहाशयानां भूमिकयास संपुटत्रयेण प्रकाश्यमानाच विजयतेतमां ॥

प्रथम संपुटः	(१ to ६ अध्यायाः (यन्त्रस्थः कश्चिद्भागः)	रू
	१९२५ ऐप्रेल् मासि (प्रकाश्येत ॥	५
द्वितीय संपुटः	(७ to १२) १९२५ आगस्ट् मासि ॥	२
तृतीय संपुटः	(१३ to १८) इदानीं सज्जोऽस्ति ॥	३

पुस्तकसंख्यायाः परिमितत्वात् नैराश्यपरिहाराय अचिरादेव अपेक्षापत्र प्रतीक्ष्यते ॥

१९२५ ऐप्रेल् मासादर्वागेव स्वापेक्षां निवेदयतां भागत्रयस्यापि देयत्वेन कल्पितं मूल्य रूप्यकाष्टकं ॥

१९२५ ऐप्रेल् नासादर्वागेवस्वापेक्षा निवेदितवद्भ्यो निवेदनानन्तरमेव तृतीयस्संपुष्टो वि. पी. द्वारा रूप्यकत्रयस्य प्रेष्येत ॥

१९२५ ऐप्रेल् मासादनन्तरं प्रथमस्संपुटो रूप्यकत्रयस्य आगस्ट् मासादनन्तरं द्वितीय-संपुटो रूप्यकद्वयस्य च प्रेष्येत ॥

बन्धनं विना यथायथमेव जिघृक्षतां कालानुरोधेन मूल्यं किंचिन्मनयूनीक्रियेत ॥

सर्वत्रापि प्रेषणव्ययः पृथगेव ॥

एतत्पुस्तकप्रचारकाणां प्रत्येकं कमिषन् दीयेत ॥

अतिदुर्लभमिदं ग्रन्थं प्रकाशयितुमुद्यक्तं पण्डितमहाशयानां पौत्रं मां सर्वोपिसंस्कृतभाषाभिमानिनः आस्तिकवर्याः पुस्तकग्रहणादिभिः अनुगृह्णीयुरिति सप्रश्रयमभ्यर्थये ॥

इत्थं विद्वज्जनकृपाकांक्षी

T. N. रघूत्तमाचार्यः

प्रकाशकः गीतोपन्यास दर्पण आपीस तिरुवादी, तञ्जावूर्—Dt.

अर्जुनः ॥ यद्येवं देवतांतरभजनं सफलं तर्हि कथं सुदुष्करनियमानास्थाय देवतांतराणि भजंते मूढा इत्यभिहितं त्वया ॥

कृष्णः ॥ अंतवत्तु फलं तेषां तद्भवत्यल्पमेधसां ॥ २२॥ ॥

अंतवदिति ॥ अल्पा मेधा बुद्धिः येषां ते **अल्पमेधसः** तेषां तत् फलं अंतः नाशः अस्यास्तीति अंतवत् तु एव भवति ॥ १२॥ ॥

न देवतांतरभजनं विष्फलमिति निंदामि ॥ अपि तु देवतांतराणि भजमानानां फलं यत् स्वर्गपशुपुत्रादिकं तत् नाशयुक्तमेव ॥ तादृशं फलं तेषां भवति ॥ अधिकं श्राम्यंति ॥ प्राप्नुवंति च नश्वरं फलं ॥ इत्यनुशयादिदमुक्तं ॥ कुतस्तथा कुर्वन्तीति चेत् अविवेकात् अल्पा बुद्धिस्तेषां ॥ देवतांतरभजनजन्ये अल्पे फले हि तेषां बुद्धिः प्रवृत्ता ॥ अतोऽल्पबुद्धयस्ते ॥ निरतिशयमहाफलानुभवप्रतिबंधकपापवशात् क्षुद्रफलके कर्मणि प्रवृत्तास्ते ॥ उक्तं हि ॥ १'कांक्षन्तः कर्मणां सिद्धिं यजंत इह देवताः' ॥ इति ॥ वक्ष्यते च ॥ २'यच्चैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते' ॥ इति ॥

अर्जुनः ॥ कुतस्तेषामल्पं फलं भवति ॥ आराधितदेवानामल्पत्वादिति चेत् संतु नाम ते अल्पाः ॥ ते हि न ददति फलं ॥ त्वं हि ददासि ॥ महान् खलु त्वं ॥ त्वन्महिमानुगुणं हि फलं तैर्लभ्यम् ॥

कृष्णः ॥ देवान् देवयजो यांति मद्भक्ता यांति मामपि॥ १३ ॥

देवानिति ॥ देवान् यजन्तीति देवयजः देवान् यांति ॥ मम भक्ताः मद्भक्ताः मामपि यांति ॥ १३ ॥

यद्यपि फलं मयैव दीयते ॥ तथापि मन्महिमानुगुणं फलं न ददामि ॥ अपितु आराध्यमानमच्छरीरभूतेंद्रादिदेवतामहिमानुगुणं फलं ददामि ॥ शरीरभूततदाराधनादेव हि मम प्रीतिः ॥ लोके हि शेषभूतावराधिकारिभजनजनित-

१. ४. १२. २. ९. १०.

तदीयप्रीत्या प्रसन्नाः शेषिणो महाधिकारिणः आराधितावराधिकारियोग्यतानुगुणं फलं ददति ॥ न स्वाधिकारवैभवानुगुणं ॥ तच्च फलं आराधिततत्तदवराधिकारिणां निकटेषु कस्यचिदुद्योगस्य प्रापणं ॥ तेच आराधिताधिकारिनिकटे स्वयोग्यतानुगुणं तद्योग्यतानुगुणं च सुखमनुभवन्तो वर्तन्ते ॥ तथा देवानाराधयन्तो देवान् यांति ॥ तेषां लोकान् गत्वा तत्प्रसादात्तन्निकटे सुखेन वर्तते ॥ तच्च सुखं अल्पं नश्वरं च ॥ आराधितदेवतापदानां तल्लोकानां च नश्वरत्वात् ॥ तत्तत्तारतम्यानुगुणं फललाभः ॥ आराधितावयवतारतम्यानुगुणा हि अवयवेनः प्रीतिर्लोके दृश्यते ॥ साक्षात् त्वामेव भजमानानां कीदृशं फलं ॥ इति चेत् मामेव ये सकामा भजंते ते मत्प्रसादात् मां प्राप्नुवन्ति ॥ मत्प्रसादादिष्टान् कामांश्च प्राप्नुवन्ति ॥ इष्टान् कामान् प्राप्य अनुभूय अंततो मामपि प्राप्नुवन्ति ॥ इंद्रायाराधकास्तान् केवलं प्राप्नुवन्ति ॥ नतु तेभ्यः परं मां ॥ मदाराधकास्तु तान् प्राप्य अंततो मामपि प्राप्नुवन्ति ॥ निष्कामास्तु मामाराध्य मत्प्रसादात् मल्लोकमेत्य मां प्राप्य मन्निकटे सुखेन वर्तन्ते ॥ न पुनर्निवर्तन्ते ॥ मम मल्लोकस्य च कदाऽपि नाशाभावात् ॥ सत्यामिच्छायां सद्य एव अवरान् इंद्रादीनपि प्राप्नुवन्ति ॥ अत एव श्रूयते ॥ [1]स यदि गंधर्वलोककामो भवति संकल्पादेवास्य गंधर्वाप्सरसः समुपतिष्ठन्ते' ॥ इत्यादि ॥ सूत्रं च तथा ॥ [2]संकल्पादेव च तच्छ्रुतेः इति ॥ [3]'पुरुषार्थोतः शब्दादेति बादरायणः' ॥ इति च ॥ 'ज्ञानादेव स्वर्गो ज्ञानादेवापवर्गो ज्ञानादेव सर्वे कामास्संपद्यन्ते' ॥ [4]'यंयं लोकं मनसा संविभाति विशुद्धसत्वः कामयते यांश्च कामान् ॥ तंतं लोकं जयते तांश्च कामान् तस्मादात्मज्ञं ह्यर्चयेद्भूतिकामः' ॥ इत्याद्याः श्रुतयश्च अनेन मत्प्राप्तेस्तादृशं महिमानं ब्रुवते ॥ अवरतमप्राङ्विवाकाऽऽस्थानेषु केवलं व्यवहरणयोग्याः न तदुत्तमप्राङ्विवाकाऽऽस्थानेषु व्यवहर्तुं शक्नुवन्ति ॥ महताऽऽयासेन परमोत्तमधानतमप्राङ्विवेकाऽऽस्थानेषु व्यवहर्तुं योग्यतामासादयंतस्तु सत्यामिच्छायामवरतमप्राङ्विवाकाऽऽस्थानेष्वपि व्यवहरन्तो लोके दृश्यन्ते ॥ उक्तं चेदं ॥ [5]'यावानर्थ उदपान' इत्यत्र ॥ अतस्सकामो मामाराध्य मत्प्रसादेन इंद्रादीनां लोकेष्वनुभाव्यान् कामान्

---

१. छां. ८. २. ६. २. ४. ४. ८. ३. ३. ४. १. ४. मुं. ३. १. १०. ५. २. ४६.

प्राप्य अंततो मामपि प्राप्तुमर्हो दुर्लभः ॥ निष्कामस्तु मामाराध्य मत्प्रसादेन ज्ञानवान् भूत्वा मामेव प्राप्तुमर्हो महात्मा सुदुर्लभः ॥ इति युक्तम् ॥ २३ ॥

अर्जुनः ॥ यदि उक्तरीत्या इंद्रादीन् भजतां अल्पं फलं त्वामेव भजतां महत्फलं तर्हि किमिति सर्वे सकामास्त्वामेवाऽऽराध्य उक्तरूपं इष्टकामावाप्तिपूर्वकत्वत्प्राप्तिरूपं फलं, निष्कामा भूत्वा त्वामाराध्य त्वत्प्रसादेन संकल्पमात्रात्सर्वप्राप्तिशक्तिजनकत्वत्प्राप्तिरूपं फलं च न प्राप्तुं प्रयतन्ते ॥ पापं प्रतिबध्नाति मद्भजनबुद्धिं इत्युक्तमिति चेत् तर्हि पापं कथं प्रतिबध्नाति ॥ किं वा करोति ॥ पापेन कीदृशा भूत्वा त्वां न भजन्ते ॥

कृष्णः ॥ अव्यक्तं व्यक्तिमापन्नं मन्यते मामबुद्धयः ।
परं भावमजानन्तो ममाव्ययमनुत्तमम् ॥ २३ ॥

अव्यक्तमिति ॥ न विद्यते बुद्धिः येषां ते अबुद्धयः जनाः मम परं भावं स्वभावं महिमानं वा न जानंतः अजानंतः संतः न विद्यते व्ययः नाशः विकारो वा यस्य सः अव्ययः तं न विद्यते उत्तमं यस्मात् सः अनुत्तमः तं अनुत्तमं न विद्यते व्यक्तं प्राकृतशरीरं यस्य सः अव्यक्तः तं अव्यक्तं मां व्यक्तिं प्राकृतशरीरं आपन्नं प्राप्तं मन्यन्ते ॥ न व्यक्तः प्रकाशः अव्यक्तः अप्रकाशः तं मां व्यक्तिं प्रकाशं आपन्नं जीवं मन्यते ॥ अनुत्तमं अव्यक्तं भावं इति वा ॥ २४ ॥

पापं ज्ञानं प्रतिबध्नाति ॥ पापादविवेकिनो भूत्वा अनितरसाधारणनिरतिशयमहामाहात्म्यसागरं मां इंद्रादिदेवतासाधारणमहिमवंतं मन्यन्ते ॥ ब्रह्मादयः[1] प्रकृतिविकारशरीरवंतः ॥ अहं तु न तथा ॥ किंतु अप्राकृतदिव्यमङ्गलविग्रहः ॥ सतिचैवं तानिव मामपि प्राकृतशरीरवंतं मन्यन्ते ॥ यदि ते मम महिमानं जानीयुः तर्हि न मामेवं मन्येरन् ॥ न विजानन्ति महिमानं मम ते ॥ मम स्वरूपं तु उत्तमं स्वापेक्षया उत्तमरहितं केनापि विकारेण रहितं नाशरहितं ॥ २[2]न जानन्तु

---

१. द्वै ॥ २. अ ॥ वि ॥

नच भजन्तु ॥ परमे व्योमनि स्थितं मुक्तैरुपास्यमानं शेषपर्यङ्के शयानं लक्ष्मीपतिं परमपुरुषं त्वां ॥ १'परित्राणाय साधूनां' इत्युक्तरीत्या दुष्टनिग्रहशिष्टपरिपालनधर्मसंस्थापनादिभिर्लोकोद्धाराय दयादाक्षिण्यादिशुभगुणगणप्रख्यापनाय च कृतावतारं लीलामानुषविग्रहं पूतनाप्राणापहारशकटासुरभंजनतृणावर्तवत्सबकाघव्योमारिष्टकेशिमुखबहुमुखनिहीनभ्रष्टदुष्टजनसंहरणगोवर्धनोद्धरणदावाग्निपानकालियफणिफणामण्डलनर्तनयमलार्जुनपाटननिजोदरगसकललोकप्रदर्शनादिभिरसकृत्प्रकटितपरब्रह्मभावं त्वां किमिति न जानन्ति कुतोऽवमन्यन्ते कुतो न भजन्ति इति चेत् पापं तत् अस्मिन्नपि विषये ज्ञानं प्रतिबध्नाति ॥ पापादविवेकिनो भूत्वा सदा प्रकाशमानं लोकहितायावतीर्णं मां परमपुरुषं न जानंति ॥ स्थूलशरीरग्रहणात्पूर्वं अप्रकाशं स्थूलशरीरग्रहणात्प्रकाशं कंचन जीवं मन्यन्ते ॥ मम निरतिशयपरत्वसौलभ्यरूपं स्वभावं न जानन्ति ॥ अतोऽवमन्यन्ते ॥ न भजन्ति च ॥ वक्ष्यते च ॥ २'अवजानन्ति मां मूढाः' ॥ इति ॥ उक्तं च ॥ ३'न मां दुष्कृतिनो मूढाः' ॥ इति ॥ २४ ॥

अर्जुनः ॥ कुतः पापिभिरविवेकान्न ज्ञायसे ॥ अज्ञानात् तत्र स्थितं अत्रावतीर्णं च त्वां न भजन्ते हि ते ॥ यदि तेऽपि भजेयुः तर्हि तदतीव गौरवावहं खलु ते ॥ पापिनः खल्वनेके लोके ॥ त्वां भजन्तः पुण्यवन्तस्तु कतिपये ॥ मामनेके न भजन्तीति मनःखेदो नास्ति वा तव ॥

कृष्णः ॥ नाहं प्रकाशस्सर्वस्य योगमायासमावृतः ॥
मूढोऽयं नाभिजानाति लोको मामजमव्ययम् ॥ २५ ॥

नेति ॥ अहं योगयुक्ता माया योगरूपा माया इति वा योगमाया तया समावृतः आच्छादितः योगमायासमावृतः सन् सर्वस्य लोकस्य प्रकाशः न ॥ अतः अयं लोकः मूढः सन् न जायत इत्यजः तं अव्ययं मां न अभि सम्यक् जानाति ॥२५ ॥

---

१. ४. ८. २. ९. ११. ३. ७. १५.

यदि तत्र स्थितस्य अत्रावतीर्णस्य च मम स्वरूपस्वभावाज्ञानं तेषां स्वतंत्रं स्यात् मदधीनं न स्यात् तर्हि मनःखेदो मम स्यात् ॥ इमे मामज्ञानान्न भजंतीति ॥ न तथा ॥ किंतु तेषां अज्ञानं मदायत्तं ॥ नाहं मम स्वरूपं सर्वस्मै दर्शयामि ॥ अपि तु मदीय[1]सामर्थ्यसहकृतप्रकृत्या तिरस्करण्या आच्छादितस्वरूपो वर्ते ॥ सा हि [2]मत्संकल्पानुविधायिनी त्रिगुणात्मिका मां मत्संकल्पेनाच्छादयति ॥ पापिभ्यो मदीयं स्वरूपं स्वभावं च दर्शयितुं नाहमर्हे ॥ अतस्तेभ्यो मत्स्वरूपाच्छादनादज्ञानं मया दत्तं ॥ अतो मदायत्तं तदज्ञानं । तेनाज्ञानेन मत्स्वरूपमजानात्वा जननमरणरहितं विकाररहितं च मामवमन्यन्ते ॥ न भजन्ति ॥ अवतीर्णं लोकहिताय मां [3]विविधविचित्रकार्यकरमनुष्यशरीरसंस्थानयोगात् कर्मवशात् मानुषतां प्राप्तं कमपि जीवं मन्यन्ते ॥ अतो न भजन्ते ॥ तेषां मत्स्वरूपाज्ञानस्य तन्मूलकमदवज्ञानादेश्च मदायत्तत्वात् न मम मनःखेदः ॥ न हि लोके स्वेच्छयास्वकार्यसौकर्याय व्यत्यासं प्रापितस्य घटिकायंत्रस्य नवमघंटावादनावसरे दशमघंटावादने मनःखेदो भवति ॥ कुतो मायया स्वरूपमाच्छादयसि इति चेत् शृणु ॥ लोके हि शताधिकभृतिग्राही लब्धाधिकारः पुरुषः स्वशरीरकार्याद्याच्छादनाय कामपि तिरस्करणीं स्वस्य स्वविधेयानां च मध्ये प्रसारयति ॥ अविवेकिनोऽतिपरिचयादवजानीयुरिति स्वदर्शनादेर्दौर्घट्यप्रदर्शनाय ॥ तद्वदहमपि पापादविवेकिनामदर्शनाय मायाख्ययवनिकाऽऽवृतो वर्ते ॥ यथाऽधिकारं दर्शयितुं ॥ उक्तं चेदं ॥ ४ 'त्रिभिर्गुणमयैर्भावै'रित्यत्र ॥ २५ ॥

अर्जुनः ॥ मायायवनिकया यदि त्वमाच्छादितोऽसि तर्हि सा यवनिका तेषामिव तवापि ज्ञानं प्रतिबध्नीयात् ॥ ते त्वामिव त्वमपि तान् न विजानीयाः ॥ मध्ये प्रसारितायास्तिरस्करण्या उभयेषां परस्परज्ञानप्रतिबंधकत्वं हि लोके दृश्यते ॥

१. द्वै ॥ योगः सामर्थ्यं तत्सहितप्रकृत्या ॥ २. अ ॥ योगो गुणानां घटना सैव माया योगः संकपः तदधीना माया प्रकृतिः तया वा ॥ ३. वि ॥ 'योगः मनुष्यशरीरसंस्थानसंबंधः तदाख्या माया विचित्रकार्यकरं वस्तु तया ॥ ४. ७. १३.

कृष्णः ॥ वेदाहं समतीतानि वर्तमानानि चार्जुन ॥
भविष्याणि च भूतानि मां तु वेद न कश्चन ॥ २६॥

वेदेति ॥ हे अर्जुन अहं समतीतानि वर्तमानानि च भविष्याणि च भूतानि वेद जानामि ॥ कश्चन कोऽपि मां नैव वेद जानाति ॥ तुः एवार्थे ॥ २६ ॥

अर्जुन मायायवनिकेयं न मद्ज्ञानं प्रतिबध्नाति ॥ मायाया मदधीनत्वान्न मां सा बाधितुमीष्टे ॥ विचित्रा हि शक्तिस्तस्याः ॥ लोके हि काश्चन यवनिकास्ता-दृश्यो दृश्यन्ते ॥ तादृशयवनिकाच्छादितान् राजदारान् न बहिस्स्थितः कोऽपि पश्य-ति ॥ पश्यन्ति च राजदारा बहिः स्थितान् यवनिकयाऽऽच्छादिता अपि॥ लौकिकी यव-निकाऽपि तथाविधा दृश्यते ॥ किमुत मदधीना मया प्रसारिता दुरत्यया माया-यवनिका ॥ अतः तस्याः मद्ज्ञानाप्रतिबंधकत्वात् अहं भूतानि वर्तमानानि भवि-ष्यन्ति च वस्तूनि जानामि ॥ मां तु न कोऽपि जानाति ॥ २६ ॥

अर्जुनः ॥ पापिनो मां न भजंतीत्युक्तं त्वया ॥ कथं तत् ॥ यस्मिन् जन्मनि पापं कृतं तस्मिन्नेव जन्मनि शरीरनाशात्तन्नष्टं कथं तत्पापमुत्तरस्मिन् जन्मनि भवद्भजनं प्रतिबध्नीयात् ॥ नहि जननांतरभवं वस्तु परस्मिन् जन्मनि उपभोगाय भवति ॥

कृष्णः ॥ इच्छाद्वेषसमुत्थेन द्वंद्वमोहेन भारत ॥
सर्वभूतानि संमोहं सर्गे यांति परंतप ॥ २७ ॥

इच्छेति ॥ हे भारत परंतप अर्जुन इच्छा च द्वेषश्च इच्छाद्वेषौ ताभ्यां समुत्तिष्ठतीति इच्छाद्वेषसमुत्थः तेन द्वंद्वे मोहः द्वंद्वमोहः तेन द्वंद्वमोहेन सर्वाणि च तानि भूतानि च सर्वभूतानि सर्गे जननकाल एव संमोहं विपरीतज्ञानं यांति ॥ २७ ॥

पूर्वस्मिन् जन्मनि रागद्वेषाभ्यां शीतोष्णसुखदुःखलाभालाभजयापजयमाना-पमानादिद्वंद्वेषु इदमिष्टं इदमनिष्टमित्यभिनिवेशो जायते ॥ तेन अभोग्ये भोग्यता-

बुद्धिः अद्वेष्ये द्वेष्यताबुद्धिः अस्वतन्त्रे स्वातन्त्र्यबुद्धिः इत्यादिरूपो मोहो जायते ॥ तेन तत्प्राप्तिनिवृत्त्यर्थं पापकर्माणि कुर्वन्ति ॥ तेन च पापं जायते ॥ तेन च परमात्मजीवात्मगतसर्वज्ञत्वाल्पज्ञत्वस्वातन्त्र्यपारतन्त्र्यसर्वशक्तित्वाल्पशक्तित्वसुखित्वदुःखित्वमुक्तत्वबद्धत्वरूपद्वंद्वधर्मज्ञानं प्रतिबध्यते ॥ ततश्च विपरीतज्ञानं जायते ॥ तन्निबन्धनवासनावासिता एव जननांतरे जायंते सर्वे प्राणिनः प्रायशः ॥ अतो जननकाल एव मोहवन्तो भवन्ति ॥ स च मोहो बहुलीभूतः क्रमेण पापकर्मसु प्रवर्तयति ॥ तेन पापिनः ते न मां भजन्तीत्येवं क्रमः ॥ इम एव ॥ न मां दुष्कृतिन' इत्यत्रोक्ताः ॥ रागद्वेषाभ्यां कोऽप्यनर्थो भविष्यति मम इति मा शङ्किष्ठाः ॥ भारतः परंतपः खलु त्वं ॥ वंशमहिम्ना कामाद्यंतःशत्रुजयशक्तिमत्त्वेन च तव न कोऽप्यनर्थो भविष्यति ॥ २७ ॥

अर्जुनः ॥ यद्येवं पूर्वपूर्ववासनया सर्वे जननकाल एव मोहवन्तो भूत्वा क्रमाद्बहुलीभूतेन तेन त्वां न भजन्ति ॥ तर्हि कस्यापि त्वद्भजनप्रवृत्तेरभावात् 'चतुर्विधा भजन्ते मा'मिति 'मामेव ये प्रपद्यन्ते' इति चोक्तं विरुध्येत ॥ त्वद्भजनतत्प्राप्यज्ञानतत्प्राप्यमोक्षाणां प्रतिपादकं शास्त्रमनर्थकं संपद्येत ॥ मुक्तिमार्गश्च लुप्येत ॥ कथं ॥ ब्रूहि ॥

कृष्णः ॥ येषां त्वंतगतं पापं जनानां पुण्यकर्मणाम् ॥
ते द्वंद्वमोहनिर्मुक्ताः भजन्ते मां दृढव्रताः ॥ २८ ॥

येषामिति ॥ पुण्यानि कर्माणि येषां ते पुण्यकर्मणः तेषां पुण्यकर्मणां येषां जनानां तु पापं अंतं नाशं गतं अन्तगतं नष्टं ते जनाः द्वंद्वमोहेन निर्मुक्ताः सम्यक् मुक्ताः द्वंद्वमोहनिर्मुक्ताः दृढं व्रतं येषां ते दृढव्रताश्च संतः मां भजन्ते ॥ तु शब्दोविशेषे ॥ २८ ॥

यद्यप्येवं तथाऽपीदं प्रायशः ॥ केचित् अनेकजन्मसमाचीर्णपुण्यविशेषैः क्षीणपापा भवंति ॥ ते भगवद्भजनप्रतिबन्धकपापस्य विनष्टत्वात् अंततः पुण्यवासनावन्तस्तथैव जायन्ते ॥ केचित् पापवासनया पापवंत एव जनित्वा वासनारूपेणानुगतस्य पापस्य अनुभवेन यादृच्छिकनिर्हेतुकभगवत्कटाक्षलब्धादिव्यदेश-

पुण्यतीर्थदर्शनसेवनसत्संगतदाराधनतदुपदेशादिभिश्च नाशे तैरेव पुण्यकर्मभिर्भगवद्भजनोन्मुखतां प्रतिपद्यन्ते ॥ उभयेऽप्येते द्वंद्वमोहो यः पूर्वश्लोकोक्तः तेन निरवशेषं हीनाः भगवदाराधनेन दुर्लभमिदं जन्म सफलं कर्तव्यं इति दृढसंकल्पाः भगवानेव सर्वदा सर्वथा सेव्यः इति दृढज्ञानाः भगवत्प्रसादजनकव्रतानुष्ठानपराश्च सन्तो भगवंतं मां भजन्ते ॥ इम एव 'चतुर्विधा भजन्ते मा'मित्यत्रोक्ताः ॥ अत एव 'मामेव ये प्रपद्यन्ते' इत्युक्तं ॥ शास्त्रं च सार्थकं ॥ नापि मुक्तेः पंथा लुप्यते ॥ पापिनः पापवासनया पापवंत एव जनित्वा न भजन्ते ॥ तुल्यन्यायेन पुण्यवन्तः पुण्यवासनया पुण्यवंत एव जनित्वा भजंते ॥ पापिनां पापं नष्टं चेत् पुण्यवन्तो भवन्ति ॥ पुण्यवतां पुण्यं नष्टं चेत् पापिनो भवन्ति ॥ [1]कृतं पुण्यं उत्तरस्मिन् जन्मनि अनुगतं तद्विवृत्तये भवतीति २ 'अयतिः श्रत्धयोपेतः' इत्यारभ्य आध्याय समाप्ति षष्ठेऽध्याये सविस्तरं प्रश्नोत्तराभ्यामुपपादनाद्विदितमेव हि ते ॥ स एव न्यायः पापेऽपि ॥ अतो न कोऽपि विरोधः ॥ २८ ॥

अर्जुनः ॥ एवं त्वां भजमानानां किं फलं भवति ॥ मायातरणेन ज्ञानं तेन च मोक्ष इति फलमभिहितं हि मया 'मायामेतां तरन्ति ते' ॥ इति 'ज्ञानवान् मां प्रपद्यते' ॥ इति चाभिहितवता ॥ इति चेत् तच्च ज्ञानं किंविषयकं किंप्रकारकं ॥ तेन च मोक्षः कथं ॥ तद्विविच्य ब्रूहि ॥

कृष्णः ॥ जरामरणमोक्षाय मामाश्रित्य यतंति ये ॥
ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलम् ॥ २९ ॥

साधिभूताधिदैवं मां साधियज्ञं च ये विदुः ॥
प्रयाणकालेऽपि च मां ते विदुर्युक्तचेतसः ॥ ३० ॥

जरेति ॥ ये जनाः जरा च मरणं च जरामरणे तयोः मोक्षः अभावः तस्मै जरामरणमोक्षाय मां आश्रित्य यतंति यत्नं कुर्वंति ते कृत्स्नं पूर्णं तत् ब्रह्म अध्यात्मं

---

१. वि ॥ द्वै ॥ अ ॥ प्रकरणं तत् ध्यानयोगमात्रविषयं ॥ २. ६. ३७.

अखिलं कर्म च अधिभूतं च अधिदैवं च अधिभूताधिदैवे ताभ्यां सहितं साधिभूताधिदैवं अधियज्ञेन सहितः साधियज्ञः तं साधियज्ञं च मां विदुः जानंति ॥ अपि च ये एवं विदुः ते प्रयाणस्य मरणस्य कालः प्रयाणकालः तस्मिन् युक्तं चेतः येषां ते युक्तचेतसः संतः मां विदुः स्मरंति ॥ २९ ॥ ३० ॥

जरामरणादिसकलदुरितपरिहाराय मदाराधनरूपमुपायमनुतिष्ठतां [1] पूर्णं ब्रह्मज्ञानं सकलजीवज्ञानं सकलविधकर्मज्ञानं च सम्यक् जायते ॥ अधिभूताधिदैवाधियज्ञसहितं मां च ते जानंति ॥ येषां मज्जनेन ज्ञानमीदृशं जायते तेषां मनःसमाधानादन्तकाले मदनुस्मरणंजायते ॥ अन्तकाले मां स्मरतां मत्प्राप्तिर्भवतीति वक्ष्यते ॥ २९ ॥ ३० ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
कृष्णार्जुनसंवादे विज्ञानयोगो नाम सप्तमोऽध्यायः ॥ ७ ॥

इतीत्यादि पूर्ववत् ॥ 'ज्ञानं तेऽहं सविज्ञानं' इत्युक्तरीत्या विज्ञानरूपो योगः प्रतिपाद्यतया यस्मिन् सः विज्ञानयोगः इति नाम प्रसिद्धः सप्तमोऽध्यायः इति संपूर्णः ॥

इति श्रीमद्भगवद्गीतोपन्यासदर्पणे लक्ष्मणाचार्यविरचिते विज्ञानयोगाध्यायार्थ-
प्रदर्शकः सप्तमः प्रतिबिंबः ॥

---

१. ब्रह्मादिपदानामर्थः प्रश्नोत्तराभ्यां उत्तराध्याये स्पष्टः ॥

श्रीः ॥

अष्टमोऽध्यायः ॥

संजयः ॥ ब्रह्मादिपदानामभिधेयं विविच्य ब्रूहि इति पृच्छति भगवंतं पार्थः॥

अर्जुन उवाच ॥

किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम ॥

अधिभूतं च किं प्रोक्तं अधिदैवं किमुच्यते ॥ १ ॥

अधियज्ञः कथं कोऽत्र देहेऽस्मिन् मधुसूदन ॥

प्रयाणकाले च कथं ज्ञेयोऽसि नियताऽऽत्मभिः ॥ २ ॥

किमिति ॥ हे पुरुषोत्तम मधुसूदन कृष्ण तत् ब्रह्म किं ॥ तत् अध्यात्मं किं ॥ तत् अधिभूतं च किं प्रोक्तं ॥ तत् अधिदैवं किं उच्यते ॥ अत्र देहे अधियज्ञः कः ॥ अस्मिन् देहे अधियज्ञः कथम् ॥ प्रयाणस्य मरणस्य कालः प्रयाणकालः तस्मिन् प्रयाणकाले नियतः नियमितः आत्मा मनः येषां ते नियताऽऽत्मानः तैः नियतात्मभिः कथं ज्ञेयः स्मर्तव्यश्चासि ॥ १ ॥ २ ॥

हे पुरुषोत्तम तत् पूर्वाध्यायांते ब्रह्माध्यात्मकर्माधिभूताधिदैवाधियज्ञज्ञानं जायते इत्यभिहितं ब्रह्म किं॥ अध्यात्मं किं॥ कर्म किं॥ अधिभूतं च किं प्रोक्तं॥अधिदैवं किं उच्यते ॥ अत्र देहे अधियज्ञः कथं ॥ अस्मिन् देहे अधियज्ञः कः ॥ अधियज्ञशब्देन यज्ञशब्दितविहितकर्मसमाराध्यः कश्चित्प्रतीयते स कः त्वं वा त्वदन्यो

---

१. द्वे ॥ आत्माधिकाराख्यग्रंथे प्रतिपाद्यं वस्तु किं आत्मानं जीवमधिकृत्य वर्तमानं वस्तु किं इति द्वेधा प्रश्नः ॥ अ ॥ वि ॥ आत्मानमधिकृत्य वर्तमानं किमित्येकधा प्रश्नः ॥

वा ॥ आद्ये अधियज्ञसहितं मामिति कथं तव त्वत्साहित्यं ॥ द्वितीये अधियज्ञत्वं कीदृशं ॥ अंते मत्स्मरणं जायते इत्युक्तं ॥ तादृशविषमसमये मनःसमाधानपूर्वकं त्वत्स्मरणं कथं जायेत ॥ तच्च किमर्थं ॥ तच्च केनोपायेन स्यात् ॥ केन प्रकारेण त्वं स्मर्तव्यः ॥ पुरुषोत्तम मधुसूदन ब्रूहीदमखिलं ॥ पुरुषोत्तमत्वात्सर्वज्ञोऽसि ॥ सर्वज्ञत्वात् सर्वं वक्तुं समर्थोऽसि ॥ मधुसूदनः खलु त्वं ॥ आयाससाध्यं दैत्यहननादिकं लोकोद्धारार्थं करोषि ॥ मदीयसंदेहापाकरणं तु अनायाससाध्यं ॥ अतो १ ब्रूहि ॥ १ ॥ २ ॥

श्रीभगवानुवाच ॥

अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते ॥
भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः ॥ ३ ॥

अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतं ॥
अधियज्ञोऽहमेवात्र देहे देहभृतां वर ॥ ४ ॥

अक्षरमिति ॥ देहं बिभ्रतीति देहभृतः तेषां देहभृतां प्राणिनां वर श्रेष्ठ हे अर्जुन परमं न क्षरं अक्षरं वस्तु ब्रह्म उच्यते ॥ स्वभावः अध्यात्मं उच्यते ॥ २ भूतानि जीवाः भावाः जडानि भूतानि च भावाश्च भूतभावाः तेषां उद्भवं उत्पत्तिं करोतीति भूतभावोद्भवकरः ३ भूतान्येव भावाः वस्तूनि तेषां उद्भवकरः भूतानां भावः सद्भावः वस्तुभावः तस्य उद्भवकरः भावः उत्पत्तिः उद्भवः वृद्धिः भावश्च उद्भवश्च भावोद्भवौ भूतानां भावोद्भवौ भूतभावोद्भवौ करोतीति भूतभावोद्भवकरः भावः सात्विकादिस्वभावः उद्भवः उत्पत्तिश्च तयोः करः ४ भूतभावः मनुष्यादिभावः तदुद्भवकरः विसर्गः ५ परमात्मनो जगत्सर्जनादिव्यापारः ६ देवतोद्देशेन द्रव्यत्यागः ७ रेतस्सेकः कर्म इति

---

१. अत्र सप्त प्रश्नाः ॥ तत्र षष्ठो द्विरूपः सप्तमस्त्रिरूपः ततश्च दश प्रश्नाः संपद्यंते ॥
२. द्वै ॥ ३. अ ॥ ४. वि ॥ ५. द्वै ॥ ६. अ ॥ ७. वि ॥

संज्ञा अस्य संजाता कर्मसंज्ञितः उत्क्रूरूपो विसर्गः कर्म ॥ क्षरो भावः अधिभूतं॥ पुरुषश्च अधिदैवतम् ॥ अहमेव अत्र देहे अधियज्ञः ॥३॥४॥

द्वे ॥ अक्षरशब्दितानि नित्यानि वस्तूनि अनेकानि ॥ प्रकृतिः जीवाः चेतन-प्रकृतिशब्दिता लक्ष्मीः भगवान्नारायणः इति ॥ तेषु रमादिसर्वनियामकत्वेन सर्वोत्कृष्टं नारायणाख्यं वस्तु 'तद्विजिज्ञासस्व ॥ तद्ब्रह्म'॥ इति श्रुत्या 'अथातो ब्रह्मजिज्ञासा' ॥ इति सूत्रेण च जिज्ञास्यत्वेनोक्तं ब्रह्म ॥ बिंबभूतस्य तस्य प्रतिबिंबभूतः तदधीनः तत्सदृशः सदैकरूपेण भवनात् भावशब्दितः स्वशब्दितः जीवः आत्माधिकाराख्यग्रंथे प्रतिपाद्यमानत्वादध्यात्मं ॥ तस्य जीवस्य उपकारकत्वेन वर्तमानं देहेंद्रियमनोबुद्ध्यादिकं वा आत्मानमुद्दिश्य वर्तमानत्वादध्यात्मं ॥ भूतभावशब्दितानां जीवजडात्मकानां वस्तूनां उत्पत्तिकारणं यद्विष्णोस्तस्य सानेकविशेषं सर्जनाख्यं कर्म तदिह कर्मेत्युच्यते ॥ सदेहानां जीवानां देहभरणौपयिकगृहकृत्यनिर्वहणोपयोगिनः नाशशीलाः दारापत्यादयो घटपटादयश्च पदार्थाः अधिभूतं ॥ पुरुषः प्रधानो जीवः ॥ निरुपपदशब्देनाभिधानात् ॥ प्रधानं हि वस्तु निरुपपदशब्देनाभिधीयते ॥ प्रधानं ब्रह्मसूत्रं सूत्रमिति ॥ तद्भाष्यं सूत्रभाष्यमिति च निरुपपदशब्देनाभिधीयते ॥ लोकेऽपि प्रधानाः पुरुषास्तथाऽभिधीयंते ॥ तादृशो जीवश्चतुर्मुखः ॥ सः सर्वदेवतापेक्षया उत्तमत्वात् अधिदैवतं ॥ एषु सर्वेषु [1] प्राणिनां देहेषु अंतर्यामितया स्थित्वा तैस्तैः क्रियमाणयज्ञशब्दितमदाराधनभूतसकलसत्कर्मभिराराध्यमानत्वादहमेवाधियज्ञः ॥ न मत्तोऽन्यः ॥ शरीरांतस्थं मद्रूपं अधियज्ञः ॥ तत्सहितश्चाहं ॥ तत्तदाराधनमपि मदाराधनमेव भवति ॥ अतएव ह्युच्यते ॥ 'सर्वदेवनमस्कारः केशवं प्रतिगच्छती'ति ॥ अर्जुन त्वमेव प्राणिनामुत्तमोऽसि ॥ न त्वत्तोऽन्यः ॥ अहो ते महाभाग्यं ॥ पृच्छसि त्वं स्वैरं विगताऽऽशंकं शंकापनोदाय ॥ न मनागप्युदेति ममामर्षः ॥ जायते च मम परमाऽऽमोदः ॥ समादधे च परमया प्रीत्या ॥ भागधेयमिदमसाधारणं ॥ अतोऽहं ब्रवीमि 'देहभृतांवरे'ति ॥ ये पुण्यवंतो मां भजंते ते तेन मदाराधनरूपकर्मणा शोधितांतः-

१. देह भृतामितिपदं देहलीदीपन्यायेन देहे इत्यनेन वर इत्यनेन च संबध्यते ॥

करणाः मामेव सर्वकर्मसमाराध्यं ज्ञात्वा विगतान्यभावास्समाराधयंति मां ॥ तेन च आब्रह्मस्तम्बपर्यंततारतम्यज्ञानं जायते श्रवणादिना ॥ ततश्च दारापत्यादीनां नश्वरत्वानुसंधानेन वैराग्यं जायते ॥ ततश्च जगज्जन्मादिकारणत्वादिमहामाहात्म्यज्ञानपूर्वकसुदृढस्नेहरूपा भक्तिरुत्पद्यते ॥ ततश्च तादृशभक्तिपूर्वकं मां भजंते ॥ ततश्च स्वभावब्रह्मशब्दितयोर्जीवपरमात्मनोः प्रकृतिबंधतन्मूलकप्राकृतदेहेंद्रियानुबंधतदभावरूपभेदकविरुद्धधर्मभूतद्वंद्वविषये विधूतमोहगंधं सम्यक्ज्ञानं जायते ॥ वक्ष्यते च ॥ १'एतां विभूतिं'त्यादिना २'ज्ञानदीपेन भास्वते'त्यं तेन ॥ तेन च यथावत् ब्रह्मज्ञानं जायते ॥ ततश्च तेषामंतिमप्रत्ययशब्दितमंतिमस्मरणं जायते ॥ तेन च मत्प्राप्तिर्भवतीति पूर्वाध्यायांते समासेनाभिहितं ॥ मया विवृतमिदानीं विस्तरेण ॥ वक्ष्यते च ३ 'बुद्ध्या विशुद्धया युक्त' इत्यादिना ४ 'विशते तदनंतर'मित्यन्तेन ॥

अ ॥ ब्रह्मेतरस्य सर्वस्य मिथ्यात्वान्नश्वरत्वाच्च अक्षरशब्दितं नाशरहितं सत्यं ब्रह्मैव ॥ तच्च द्विविधं ॥ सगुणं निर्गुणं चेति ॥ तत्र सगुणं गुणसंबंधादपरं ॥ निर्गुणं तु गुणराहित्यात्परमं ॥ तच्च परमं अक्षरं निर्गुणं यत् ब्रह्म तदेव ब्रह्म ॥ तस्य ब्रह्मणः शरीरावच्छेदेन यः क्षेत्रज्ञशब्दितजीवभावः सः देहे विद्यमानत्वादध्यात्मं ॥ वक्ष्यते च ॥ ५'क्षेत्रज्ञं चापि मां विद्धी'ति ॥ सर्वेषां वस्तूनां उत्पत्तेर्वृद्धेश्च कारणभूतः विसर्गशब्दितः देवतोद्देशेन द्रव्यत्यागो दानहोमात्मकः कर्म ॥ उक्तं चेदं ॥ ६'अन्नाद्भवन्ति भूतानी'त्यत्र ॥ प्राणिनामुपकाराय यत् भवति तत् देहेंद्रियादिकं विनाशि वस्तु जातं अधिभूतं ॥ देहेषु तत्तदिंद्रियनियामकानादित्यादीनधिष्ठाय चक्षुरादींद्रियाणां तत्तच्छक्तिप्रदः परमात्मा अधिदैवं ॥ देहनिर्वर्त्ययज्ञशब्दितसर्वसत्कर्मणां भोक्ता प्रवर्तकः फलदाता प्रभुश्च परमात्मा तेन रूपेणाधियज्ञः ॥ स चाहमेव ॥ साक्षान्मम सकाशादुपदेशग्रहणादेहिनां उत्तमोऽसि त्वं ॥ यज्ञशब्दितसर्वसत्कर्मानुष्ठानरूपकर्मयोगेन शुद्धिरंतःकरणस्य जायते ॥ तया च चक्षुरादींद्रियाणि प्रमथनशीलान्यपि स्वाधीनानि भवंति ॥ ततश्च देहादीना-

---

१. १०. ७. २. १०. ११. ३. १८. ५१. ४. १८. ५५. ५. १३. २. ६. ३. १४.

मुक्तत्वात् नश्वरत्वानुसंधानेन वैराग्यं जायते ॥ ततश्च कायक्लेशबहुव्ययसाध्यहोमदानात्मककर्मानुष्ठानं संपद्यते ॥ ततश्च स्वभावब्रह्मशब्दितयोः जीवपरमात्मरूपयोः सगुणनिर्गुणब्रह्मणोः १'तत्त्वम'स्यादिमहावाक्यार्थज्ञानजन्यं ऐक्यज्ञानं जायते ॥ विरुद्धधर्मप्रहाणेन जहदजहल्लक्षणया जीवब्रह्मणोरैक्यानुसंधानमहिमजनिताभेदभावनादंतिमस्मरणं संपद्यते ॥ तेन च मत्प्राप्तिर्भवतीति पूर्वाध्यायांते अभिहितं मया ॥ विवृतमिदानीं विस्तरेण ॥ वक्ष्यते च ॥ 'बुध्या विशुध्यया युक्त' इत्यादिना 'विशते तदनंतर'मित्यंतेन ॥

वि ॥ नाशरहितं प्रकृतिविनिर्मुक्तत्वादुत्कृष्टं ब्रह्मशब्दाभिधेयपरमात्मसाम्यं ब्रह्मशब्देनोच्यमानं प्रकृतिसंबंधरहितं कैवल्यार्थिभिरनुसंधेयं तैः प्राप्यं च शुध्यात्मस्वरूपं ब्रह्म ॥ तस्मिन्नात्मनि संबध्यमाना तस्य जननमरणाद्यनर्थाऽऽपादिनी प्रकृतिरध्यात्मं ॥ मनुष्यत्वादिसंस्थानोत्पत्तिहेतुभूतः २'पंचम्यामाहुतावापः पुरुषवचसो भवंती'ति श्रुतिसिद्धः योषित्सु पुरुषैः क्रियमाणो रेतस्सेकः कर्म ॥ आकाशादिषु भूतेषु वर्तमानाः ऐश्वर्यार्थिभिरनुसंधेयास्तैः प्राप्याश्च नश्वराः शब्दादयः अधिभूतं ॥ ब्रह्मेंद्रादिभोगापेक्षया विलक्षणभोगभोक्ता ऐश्वर्यार्थी प्राप्तैश्वर्यः पुरुषः भोगविषये ब्रह्मेंद्रादिसकलदेवतोपरि वर्तमानोऽधिदैवतं ॥ आराध्यंते चेंद्रादयस्तत्रतत्र तैस्तैः ॥ ते चेंद्रादयो मम तनवः ॥ शरीरभूतानां तेषामाराधनं शरीरिणो ममाऽऽराधनं भवति ॥ इष्टमतस्तेषां आराधनं मम ॥ उक्तं च मया ॥ ३'देवान् भावयते'ति ॥ ४'यो यो यां यां तनुं भक्त' इति च ॥ अतः शरीरभूतेष्विंद्रादिषु स्थित्वा शरीरवाचकैश्चैत्रादिशब्दैः शरीरिवत् तत्तद्वाचकेंद्रादिशब्दैः उच्यमानो यज्ञशब्दिततत्तत्कर्मभिराराध्यमानस्सर्वकर्मणां उद्देश्यभूतोऽधियज्ञः भोक्ता प्रभुश्चाहमेव ॥ नेंद्रादिरन्यः ॥ उक्तं च मया ॥ ५'भोक्तारं यज्ञतपसा'मिति ॥ वक्ष्यते च ॥ ६'अहं हि सर्वयज्ञाना'मिति ॥ कथं मम स्यात् ज्ञानरूपमंतिमस्मरणरूपं चेदं फलमिति माशंकिष्ठाः ॥ सर्वोत्कृष्टतरशुद्धदिव्यदेहवान् किल त्वं ॥ अतस्तवेदं फलं सुलभं ॥ आत्मा स्वरूपतः शुध्यः ॥ तस्य प्रकृति-

---

१. छां. ६. ८. ७. २. छां ५. १. १. ३. ३. ११. ४. ७. २१. ५. ५. २९. ६. १. १४.

बंधोऽनादिः ॥ तेन तत्तद्गुणसंबंधादुत्तममध्यमाधमयोनिषु योषित्पुरुषसंयोग-जन्यरेतस्सैकमूलकशुक्रशोणितमेलनजन्यदेहलाभात्मकं जन्म ॥ तेन च नश्वरेषु देहेंद्रियादिषु दारापत्यादिषु च अहंममेत्यभिमानादनर्थपरंपरा ॥ ततो विलक्षणैश्वर्यकामनया भगवदुपासनाद्विलक्षणभोगप्राप्तिः ॥ तस्यापि नश्वरत्वानुभवान्निर्विण्णस्य कैवल्यकामनया भगवदुपासनात् प्रकृतिबंधरहितशुद्धात्मस्वरूपानुभव-रूपकैवल्यप्राप्तिः ॥ ततस्तदनुभवजनितया परया भक्त्या भगवल्लाभः ॥ इति ज्ञानं जायते ॥ प्रकृतितद्बद्धतद्विमुक्तजीवपरमात्मज्ञानवतोऽतिमस्मरणं ॥ तेन च मत्प्राप्तिर्भवतीति पूर्वाध्यायांतेऽभिहितं मया ॥ विवृतमिदानीं विस्तरेण ॥ वक्ष्यते च ॥ 'बुध्या विशुद्धया युक्तः' इत्यादिना 'विशते तदनंतरमित्यं तेन ॥ ३ ॥ ४ ॥

अर्जुनः ॥ अंतिमस्मरणं किमर्थमिति प्रश्नस्य किमुत्तरं ॥ ब्रूहि ॥

कृष्णः ॥ अंतकाले च मामेव स्मरन् मुक्त्वा कलेवरं ॥

यः प्रयाति समद्भावं याति नास्त्यत्र संशयः ॥ ९ ॥

अंतकाल इति ॥ यः अंतस्य कालः अंतकालः तस्मिन् च तु मामेव स्मरन् सन् कलेवरं शरीरं मुक्त्वा प्रयाति सः मद्भावं याति ॥ अत्र संशयः नास्ति ॥ ९ ॥

अंतकाले चाहं स्मर्तव्यः ॥ तस्मिन् काले वा मां स्मरतु ॥ ततः प्राक् दारापत्यधनभवनाद्यनुभवजनितसुखलालसतया तत्स्मरणनैरंतर्येण मां स्मर्तुमवकाशानुपलंभात् ॥ अंतकाले च दारापत्यादिभिस्तृणवदुपेक्षितो गेहबाह्यांगणं प्रापितस्तत्र शयानः शोचति ॥ कृतघ्नानिमान् दारापत्यादीनाराध्य पापीयानस्मि संवृत्तः[1] परित्यक्तश्चाहमिदानीं तैः अगतिकश्चास्मीति ॥ गतिश्चास्यामापदि मम

१. अत्र, 'यामारात्थ न गणितमिदं जीवितं वा धनं वा यस्याः प्रीतिर्मनसि कलिता ज्यायसी मोक्षतोऽपि ॥ सैवेदानीं वयसि गलिते संप्रहीणे च वित्ते तूलायापि त्रिपुरहर मां मन्यते नैव भार्या

आपद्बन्धुर्भगवानेवेति निश्चित्यतस्मिन् काले मामेव यः स्मरन् देहं त्यजति ॥ तस्य तेनांतिमस्मरणेन १ मद्भावशब्दितमोक्षप्राप्तिर्भवति ॥ २एतदर्थमंतिमस्मरणं ॥ अत्रार्थे संशयो मास्तु ॥ सत्यं चेदम् ॥ ५ ॥

अर्जुनः ॥ अन्ते त्वां स्मरतां त्वद्भावप्राप्तेः को हेतुः ॥

'दाराः पुत्राः परममुहृदो बांधवाः किंकरा वा स्वप्नावस्थास्वपि च विरहं ये मया न क्षमंते ॥ अद्याऽऽसन्ने तपननतनयस्याऽऽज्ञया दूतवर्गे तेष्वेकोऽपि स्मरहर न मे गन्तुरन्वास्ति जंतुः' ॥ 'कृत्वा पापान्यपि खलु मया पोषिताः शैशवे ये निद्राऽऽहारावपि विजहता शिक्षिता ये कलासु ॥ प्रादुर्भूताः स्वयमिव हि ते प्राक्तनादृष्टलब्धप्रज्ञोन्मेषा इव च तनया न स्मरंत्यात्मनोऽपि'॥ 'गात्रं संकुचितं गतिर्विगलिता भग्ना च दंतावलिः दृष्टिर्नश्यति वर्धते बधिरता वक्त्रं च लालायते ॥ वाक्यं नाऽऽद्रियते च बांधवजनो भार्या न शुश्रूषते हा कष्टं पुरुषस्य जीर्णवयसः पुत्रोऽप्यमित्रायते'॥ 'छाया तोयं वसतिरशनं वाहनं दीपिका वा क्रेतुं यस्मिन् किल न सुलभं किंचिदप्येषु मर्त्यैः ॥ तस्मिन् दूरे पथि तनुभृतां सर्वथाभिगम्ये प्रस्थानार्हं कमपितु विधिं घस्मरा न स्मरामः' ॥ गंतव्योऽध्वा सकलदुरवस्थानसंपातभूमिः गत्वा दृश्यस्त्रिभुवनजनाऽऽयुष्कलांतः कृतांतः ॥ दृष्ट्वा लभ्या निरयजनिता यातनाऽनेकभेदा विस्मृत्येदं निखिलमपितु व्यर्थमायुर्नयामः' ॥ 'क्षुत्तृट्परीतोऽर्कदवानलाग्निैः संतप्यमानः पथि तप्तवालुके ॥ कृच्छ्रेण पृष्ठ कशया च ताडितः चलत्यशक्तोऽपि निराश्रयोदके'॥ 'पुत्रादयः कथममी मयि संस्थिते स्युः इत्यप्रतिक्रियनिरर्थकचिन्तनेन ॥ दूये नतु स्वयमहं भवितास्मि-र्कादृक् इत्यस्ति हस्तिगिरिनाथ विमर्शलेशः'॥ 'वृद्धस्य मृतभार्यस्य पुत्राधीनधनस्य च ॥ स्नुषावचनदग्धस्य जीवितान्मरणं वरं' ॥ इत्यादयः श्लोकाः॥ 'ताये तंदै येन्नुं तारमे किलै मक्वलेन्नुं नोयेपटोषिदेन्' इत्यादिगाथाश्च ॥ इत्यादिकमुदाहर्तव्यम् ॥ १. द्वि ॥ मयि भावः स्थितिः मल्लोके मत्सर्मीपे चावस्थानं ॥ अ ॥ मम ब्रह्मणो भावः ब्रह्मत्वम् ॥ वि ॥ ममैव भावः स्वभावः मया परमं साम्यम् ॥ २. वि ॥ मोक्षप्राप्तये अंतिमस्मरणापेक्षा भक्तस्यैव नतु प्रपन्नस्य ॥ प्रपत्तिशब्दिता शरणागतिरन्तिमस्मृतिनिरपेक्षा ॥ इति दाक्षिणाः ॥ प्रपन्नस्यापि अन्तिमस्मरणमावश्यकम् ॥ अपितु तस्य तदयत्नसिद्धमित्यौत्तराः ॥ अ ॥ अंतिमस्मरणं सगुणोपासकानां न निर्गुणोपासकानां इत्याद्वैतमतप्रक्रियाविशेषा 'अग्निर्ज्योति'रिति (८.२४.) श्लोके सविस्तरमुपपादयिष्यन्ते ॥ तत्र द्रष्टव्याः ॥

कृष्णः॥ यं यं वाऽपि स्मरन् भावं त्यजत्यंते कलेबरं॥
तं तमेवैति कौंतेय सदा तद्भावभावितः॥ ६ ॥

यमिति ॥ हे कौन्तेय अर्जुन अंते यंयं वाऽपि भावं स्मरन् सन् कलेबरं त्यजति ॥ सः सदा तस्मिन् भावः भावना तद्भावः तेन भावितः संस्कृतः तद्भावः भावितः अभ्यस्तः येन सः तद्भावभावितः सन् तंतमेव भावं एति प्राप्नोति ॥ ६ ॥

लोके अंतकाले जीवः यं यं पदार्थं स्मरन् शरीरं त्यजति सः तत्तद्रूपतां वा तत्तदनुभवौपयिकं जन्म वा तत्तत्समानाऽऽकारतां वा प्राप्नोति॥ इति सामान्यतो न्यायः ॥ आथर्वणोपनिषदि चायमर्थः श्रूयते ॥ १ 'कामान् यः कामयते मन्यमानः स कामभिर्जायते तत्र तत्र ॥ पर्याप्तकामस्य कृतात्मनश्च इहैव सर्वे प्रविलीयंति कामाः' ॥ इति ॥ जडभरतापरनामा आदिभरतो राजा हरिणशाबमंतकाले स्मृत्वा तत्समानाकारतां प्राप्तः इति भागवते पंचमस्कंधे प्रसिद्धं ॥ अंतिमस्मरणस्य स्मर्यमाणपदार्थसजातीयाऽऽकारतापादकत्वादिकं कथमिति चेत् कस्यचित् पदार्थस्य स्मरणेन मनसि वासनापरनामा कश्चित्संस्कारो जायते ॥ तत्संस्कारसंस्कृतेन मनसा पुरुषरेतोद्वारा योषिद्गर्भं प्रविशतो जीवस्य संस्कारजनकस्मृतिविषयपदार्थाकारसजातीयाकारानुगुणसंनिवेशवान् देह उत्पद्यते ॥ एव मन्यदप्यूह्यं ॥ इदं च नैकस्यामवस्थायां ॥ नैकस्मिन् देहे वा ॥ अपितु अवस्थांतरस्य देहांतरस्य वा प्राप्तावेव ॥ अतएव जाग्रति दृष्टश्रुतयोः स्मरणेन स्वप्ने तत्तदापत्तिः ॥ उक्तं च भागवते दशमस्कंधे प्रथमाध्याये ॥ 'स्वप्ने यथा पश्यति देहमीदृशं दृष्टश्रुताभ्यां मनसाऽनुचिंतयन्' ॥ इति ॥ स्मरणस्य स्मर्यमाणसजातीयोत्पादकत्वं लोके प्रसिद्धं ॥ बडबायां गर्दभात् स्मर्यमाणतदात्वप्रदर्शितदिव्याश्वसदृशशावकोत्पत्तिः ॥ ऋतुस्नातायां वनितायां पत्युः तदात्वदृष्टस्मर्यमाण ऋषांतरसदृशपुत्रोत्पत्तिश्च दृश्यते ॥ एवं अंतकाले २ देवतांतरस्मरणे तत्तत्प्राप्तिः सयुक्तिकमूह्या ॥

१. मुं. ६. २. २. अ ॥ भाव देवताविशेषं ॥

एतादृशमंतिमस्मरणं केनोपायेन स्यात् इति चेत् सदा तद्भावभावितः तस्मिन् अंते स्मरणीये पदार्थे भावना शब्दितेन निरंतरस्मरणेन वासनाशब्दितः संस्कार उत्पद्यते ॥ तेन तदभ्यासेन च अंते स्मरणं भवति ॥ निरंतरस्मरणमंतिम-स्मरणोपायः ॥ ६ ॥

अर्जुनः ॥ सति चैवं किं मया कर्तव्यं ॥

कृष्णः ॥ तस्मात्सर्वेषु कालेषु मामनुस्मर युध्य च ॥
मय्यर्पितमनोबुद्धिः मामेवैष्यस्यसंशयः ॥ ७ ॥

तस्मादिति ॥ तस्मात् सर्वेषु कालेषु मां अनुस्मर ॥ मयि मनश्च बुद्धिश्च मनोबुद्धी अर्पिते मनोबुद्धी येन सः अर्पितमनोबुद्धिः सन् युध्य युद्धं कुरु ॥ मामेव एष्यसि ॥ न संशयः असंशयः ॥ ७ ॥

अंतिमस्मरणार्थं निरंतरं स्मरणस्य कर्तव्यत्वात् सर्वेषु कालेषु त्वयाऽहं स्मर्तव्यः ॥ अन्यथा अंतिमस्मरणं न स्यात् ॥ दर्शनश्रवणादिसकलकर्मकरणकाले तत्तत्कर्मकरणे आत्मनोऽस्वातंत्र्यानुसंधानेन सर्वकर्मणां कारयितारं मां कृष्ण एव सर्वं कारयतीति तत्तत्कर्मकरणानुकूलं स्मर ॥ यथावन्मां ज्ञात्वा ज्ञानी सन् जननमरणादिप्रदः मोक्षप्रदश्चायमिति सततं असंशयो मां स्मर ॥ शरीरेंद्रिय-

१. अत्र, 'एतावान् सांख्ययोगाभ्यां स्वधर्मपरिनिष्ठया ॥ जन्मलाभः परः पुंसां अंते नारायणस्मृतिः'॥ इति श्लोकः, 'वर्षागरिसविधेषु व्याजतो वासभाजां दुरितकलुषितानां दूयमाना दये त्वं ॥ करणविलयकाले कांदिशीकस्मृतीनां स्मरयसि बहुलीलं माधवं सावधाना' ॥ इति श्लोकः; 'स्थिते मनसि सुस्वस्थे शरीरे सति यो नरः ॥ धातुसाम्ये स्थिते स्मर्ता विश्वरूपं च मामजम् ॥ ततस्तं म्रियमाणं तु काष्ठपाषाणसंनिभम् ॥ अहं स्मरामि मद्भक्तं नयामि परमां गतिं' ॥ इति श्लोकः, 'कृष्ण त्वदीयपदपंकजपंजरान्तं अद्यैव मे विशतु मानसराजहंसः ॥ प्राणप्रयाणसमये खपवातपित्तैः कंठावरोधनविधौ स्मरणं कुतस्ते' ॥ इति श्लोकश्च ॥ 'अप्पोदैक्किप्पोदे शोल्लैवैत्तेन्' इति गाथा च अनुसन्धेया: ॥ (१. ४. १०. १.)

मनसां सुस्थतादशायां मां स्मरतः शरीरविमोक्षणावसरे निवेदितवानयं सुस्थतादशायां अंतकाले त्वां स्मारयेति इति स्मृत्वा स्मारयाम्यहं ॥ उक्तं च मया ॥ वराहपुराणे ॥ 'स्थिते मनसी'ति ॥ यद्यपि अंतिमस्मरणमेव कार्यापादकं न निरंतरस्मरणं ॥ तथाऽपि विना निरंतरस्मरणमंतिमस्मरणमुदयात् तदर्थं निरंतरमहं स्मर्तव्यः ॥ लोके हि तत्तत्परीक्षावसरेषु यथावदुत्तरलेखनमेव कार्यसाधकं ॥ तथाऽपि तदानीं यथावल्लेखनशक्तिसंपादनाय निरंतरं पठनपाठनचिंतनलेखनाभ्यासः क्रियमाणो दृश्यते ॥ अंतिमस्मरणपर्यन्तं वेदांततत्वं उपदिश्य मां वेदांतिनमकृतायं कृष्णः नेतःपरं मां युद्धं कुर्विति निर्बध्नीयात् इति हि मन्यसे सर्वज्ञत्वात् सर्वसाक्षित्वात् हृषीकेशत्वेन तत्तर्दिद्रियनियामकतया तत्रतत्र स्थितत्वाच्च ज्ञात्वाऽयमेवं मनुत इति पार्थ तत्रैव युत्धे त्वं नियोज्यसे ॥ अतो युध्य च अर्जुन एतादृशांतिमस्मरणजनकज्ञानलाभाय चित्तशुत्ध्यापादकं कर्मैव त्वया कर्तव्यं ॥ तच्च क्षत्रियस्य तव युत्धरूपं ॥ तदेव त्वया कर्तव्यं ॥ न कर्मयोगं विना चित्तशुत्धिः ॥ विना चित्तशुत्धिं न ज्ञानं ॥ अंतरेण ज्ञानं नांतिमस्मरणं ॥ अतस्तत्कर्मासंशयं कुरु ॥ उक्तं च मया ॥ १'उत्तिष्ठ कौंतेय युत्धाय कृतनिश्चयः' ॥ इति ॥ यद्यपि युत्धं तव स्वधर्मः अनुष्ठेयमतः त्वया इति महता प्रबंधेन सयुक्तिकं सप्रमाणकं अभिहितं त्वया ॥ तथाऽपि नाहं युत्धं कुर्यां तस्य हिंसात्मकत्वात् ॥ इति चेत् मय्यर्पितमनोबुत्धिः ॥ मनसा बुत्ध्या च मयि संन्यस्य तत्कर्म कुरु ॥ न तथाकृतेन तेन तव दोषो भवेत् ॥ अभिहितं च मया ॥ २'मयि सर्वाणि कर्माणी'ति ॥ ३'ब्रह्मण्याधाय कर्माणी'ति च ॥ उक्तश्चायमर्थः, ४'त्यक्त्वोत्तिष्ठ परंतपे'त्यत्र संबोधनपदे परं मां तप स्मरेत्यर्थविशेषमुक्तवता मया ॥ कृते युत्धे स्याद्वा ममेदं चित्तशुत्ध्यादंतिमस्मरणांतं इति चेत् असंशयः युत्धे कृते तेन सत्कर्मानुष्ठानेन चित्तशुत्धिः ॥ तया च मयि मनोबुत्ध्योरर्पणरूपं निरंतरं मदनुस्मरणं ॥ तेन च अंते तद्रूपमंतिमस्मरणं ॥ तेन च मत्प्राप्तिः तव नियतं भविष्यति ॥ नास्मिन्नर्थे

---

१. २. ३७. २. ३. ३०. ३. ५. १०. ४. २. ३. ५. 'मय्यर्पितमनोबुद्धि'रित्यस्य देहलीदीपन्यायेन पूर्वोत्तरयोस्संबंधः ॥

१संशयः ॥ २असंशयस्त्वं मां प्राप्स्यसि ॥ सत्यमिदं ॥ अत्र ते संशयो माभूत् ॥ ७ ॥

अर्जुनः ॥ किमन्यदप्यस्त्यंतिमस्मरणसाधनस्य निरंतरस्मरणस्य साधनम् ॥

कृष्णः ॥ अभ्यासयोगयुक्तेन चेतसा ३नान्यगामिना ॥
परमं पुरुषं दिव्यं याति पार्थानुचिंतयन् ॥ ८ ॥

अभ्यासेति ॥ हे पार्थ अभ्यास एव योगः उपायः तेन अभ्यासश्च योगश्च अभ्यासयोगौ ताभ्यां वा युक्तं तेन अन्यत् गच्छतीति अन्यगामि न अन्यगामि नान्यगामि अनन्यगामि वा तेन चेतसा अनुचिंतयन् दिवि भवं दिव्यं परमं पुरुषं याति ॥ ८ ॥

विषयान् प्रति ४ धावमानस्य मनसः पुनःपुनराकृष्य स्मरणीये वस्तुनि स्थापनमभ्यासः ५स एव उपायः, तेन यत् ध्यानं, तेन सहितं मनस्तत्रैव दृढलग्नं भवति ॥ नान्यत्र गच्छति ॥ तेन मनसा परमाकाशशब्दिते वैकुण्ठे सूर्यमण्डले विद्यमानं जगत्सृष्ट्यादिभिः क्रीडमानं भगवंतं अनवरतमनुस्मरति स्वयोग्यतानुसारेण ॥ तेन चांतिमस्मरणद्वारा तं परमपुरुषं याति ॥ ८ ॥

अर्जुनः ॥ कथं त्वं स्मर्तव्य इत्यत्र केन प्रकारेण स्मर्तव्य इति कृतस्य प्रश्नस्य किमुत्तरम् ॥

१. 'असंशय 'इत्यस्याऽऽवृत्तिः ॥ न संशयः असंशयः॥ अ इति नेत्यर्थकं पृथक्पदं वा ॥ २. बहुव्रीहिः अर्जुनविशेषणं असंशयस्त्वमिति ॥ असंशयो युध्य ॥ असंशयस्स्मर असंशयो मामेष्यसीत्यन्वयः ॥ ३. द्वै अनन्यगामिना ॥ ४. अत्र, 'चेतः का तेचिकीर्षा मुरमथनपदांभोजराजन्मरंदेष्वाकृष्याऽऽकृष्य भूयोऽप्यहितविषयतः सम्यगावेशितं च ॥ धावं धावं परेषं धनभवनतटिल्लोचनास्वेव सक्तं तच्चाप्राप्याऽऽतुरं त्वं किमिति विदधसे मां वृथा पापपात्रम्' ॥ इति श्लोकोऽनुसन्धेयः॥ ५. द्वै॥ अ ॥ अभ्यास एव योगः तेन ॥ वि ॥ अभ्यासयोगाभ्यां युक्तं सहितं तत्र दृढलग्नं वा तेन ॥

कृष्णः ॥ कविं पुराणमनुशासितारं अणोरणीयांसमनुस्मरेद्यः ॥
सर्वस्य धातारमचिन्त्यरूपं आदित्यवर्णं तमसः परस्तात् ॥९॥

कविमिति ॥ कविं सर्वज्ञं पुराणि शरीराणि अणति गच्छतीति पुराणः तं अनुशासितारं नियामकं अणोः अणीयांसं अणुतरं आदित्यस्य वर्ण इव वर्णः यस्य सः आदित्यवर्णः तं तमसः प्रकृतेः अज्ञानात् मृत्योश्च परस्तात् परतः वर्तमानं सर्वस्य जगतः धातारं फलदातारं न चिंत्यं अचिन्त्यं रूपं यस्य सः अचिन्त्यरूपः तं मां यः अनुस्मरेत् सः पुरुषं याति ॥ उपैति वा ॥ ९ ॥

**कविः ज्ञानी सर्वज्ञः अतो निवेदितमर्थं अविस्मरन् स्मरंश्च मां ज्ञात्वा अंतिमदशां स्मारयेदात्मानमिति विश्वासो मयि कार्यः ॥ कथं तत्तदंतिमदशापरिज्ञानादिकं तवेति चेत् अहं सर्वशरीरिशरीरस्थः अतो जानामि तत्तद्दशाभेदान् ॥ यदि जीव इव त्वं शरीरेषु स्थितः स्याः तर्हि दुर्दशा ते महती ॥ एकस्मिन् शरीरे स्थितस्यैव जीवस्य संततदुःखानुभवो दृश्यते ॥ किमुवाच्यं तत्तत्कर्मनिर्मितविविधविचित्रतत्तद्देहेषु स्थितस्य तव इति चेत् अहं तु नियमनाय तत्रतत्र स्थितः ॥ नतु कर्मफलानुभवाय ॥ अतो दुःखापादकदेशे स्थितस्यापि न मे दुःखं ॥ अत एव नरकेषु तत्तत्कर्मफलान्यनुभवतां जीवानामेव दुःखं ॥ न नियामकतया तदंतस्स्थस्य मम ॥ उक्तं च ॥ 'नरकेऽपि वसन्नीशो नासौ दुःखभुगुच्यते' ॥ इति ॥ लोके तत्तत्कर्मानुगुणं स्वकृतकुकर्मफलानुभवाय कारागृहं प्रवेशितस्य तेन तत्र खिद्यमानस्य तेन च रोरुद्यमानस्य कृतचौर्यादेर्जीवस्यैव तत्र दुःखानुभवः ॥ न तन्नियमनाय तत्राधिकृतानां ॥ नापि तन्नियामकस्य तदातदा तं देशं गत्वा तत्रैवोपविश्य तत्र स्थितीर्विचारयतो महतः प्रभोः ॥ न तान् तं च कारागृहवासादधिक्षिपंति जनाः ॥ एवमहं ॥ अतो न मे दुःखं ॥ सर्वत्र व्याप्तिमतो महतस्तव गजादिशरीरेषु स्थितस्य मशकपिपीलिकादिशरीरांतस्स्थितिः कथमिति चेत् अहं अणोरस्सकाशान्नितरामणुः ॥ अतः सर्वत्र स्थितिः मम घटते ॥ नियामकतयाऽवस्थानान्न मे दुःखमित्युक्तं ॥ तथाऽपि किमर्थं तत्रा-

वस्थानं तवेति चेत् सर्वस्य चराचरस्य धारणपोषणकर्ता ह्यहं तदर्थं तत्रावस्थानं मम ॥ यदि देहे स्थितः स्याः तर्हि त्वां देही जानीयात् ॥ नच जानाति ॥ तत्कथं ॥ अहं मदधीनया मायया समावृतोऽस्मि ॥ अतो मां न जानाति ॥ अयमीदृशो वर्तते इति सुतरां [1]अचिंतनीयोऽहं ॥ उक्तं च मया ॥ [2]'योगमायासमावृत' इति ॥ [3]'मोहितं नाभिजानाती'ति च ॥ [4]स्वरूपं च मम अवाङ्मनसगोचरं ॥ श्रूयते च [5]'यद्वाचाऽनभ्युदित'मित्यादि ॥ 'न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मनः' ॥ इति च ॥ तच्च रूपं कीदृशमिति चेत् आदित्यस्य रूपमिव मम रूपं ॥ प्रकृतेः अज्ञानात् मृत्योश्च परतोऽहं वर्ते ॥ प्रकृतिबंधतन्मूलकाज्ञानमरणादिरहितोऽहं ॥ मामेवं निरंतरं स्मरतोऽतिमस्मरणं भवति ॥ तेन च मत्प्राप्तिर्भवति ॥ अतोऽहमेवं स्मर्तव्यः ॥ ९ ॥

अर्जुनः ॥ किं सर्वेषामयमेक एवक्रमः उत केषां चिदन्योऽपि ॥

कृष्णः ॥ प्रयाणकाले मनसाऽचलेन भक्त्या युक्तो योगबलेन चैव ॥
भ्रुवोर्मध्ये प्राणमावेश्य सम्यक् स तं परं पुरुषमुपैति दिव्यम् ॥ १० ॥

प्रयाणेति ॥ प्रयाणस्यकालः प्रयाणकालः तस्मिन् न चलं अचलं तेन मनसा भक्त्या युक्तः योगस्य बलं योगबलं तेन चैव प्राणं भ्रुवोः मध्ये सम्यक् आवेश्य स्थितः सः तं दिव्यं परं पुरुषं उपैति ॥ १० ॥

योगो द्विविधः ॥ राजयोगो हठयोगश्चेति ॥ कर्मतज्जन्यचित्तशुद्धिद्वाराः श्रवणमननध्यानज्ञानादिरूपो राजयोगः ॥ हठयोगस्तु तदशक्तस्य मोक्षेच्छावतः ईषच्छ्रवणादिसहकृतः रेचकपूरककुंभकाख्यैः उपायैः निरुध्य वायुं तस्य मूला-

१. अत्यन्तं अचिन्त्यं अचिन्त्यरूपम् ॥ रूपप्रत्ययः ॥ २. ७. २५. ३. ७. १३. ४. अचिंत्यं रूपं यस्य तत् अचिन्त्यरूपं ॥ द्वि ॥ वि ॥ ब्रह्मणो दिव्यं रूपमप्राकृतमस्ति ॥ अ ॥ निर्गुणमरूपं सगुणं ब्रह्म रूपवत् ॥ ५. के. १. ४.

धाराब्रह्मरंध्रपर्यंतं १ तत्तच्चक्रप्रापणक्रमेण सुषुम्नानाडीपथेन नयनपूर्वकं ब्रह्मरंध्राद्विनिष्क्रमणरूपः ॥ तत्र राजयोगवतां २ 'बहूनां जन्मनामंते' इत्युक्तरीत्या कालविलंबेन ब्रह्मप्राप्तिः ॥ तज्जन्यं सुखं च परमं महत् ॥ हठयोगवतां तु वायुजयवत्त्वेन स्वच्छंदोत्क्रमणसिद्धयर्हतया शीघ्रं ब्रह्मप्राप्तिः ॥ परंतु तज्जन्यं सुखमल्पं ॥ लोके हि भगवद्गुणवर्णनादिभिरुंछवृत्तिं चरन् तत्रतत्र विलंब्य लभतेऽधिकं फलं ॥ बीभत्सं कर्म कुर्वन्नुंछवृत्तिं चरंस्तु बीभत्सदर्शनचकितैस्तैस्तैः सद्य एव किमपि दत्वा निष्कास्यमानो दृश्यते ॥ राजयोगांगभूतो हठयोगस्त्वन्यः ॥ तत्फलेनैव फलवान् तत्समानयोगक्षेमः ॥ तत्र मोक्षार्थं ये राजयोगमुक्तरूपमनुतिष्ठंति तेषामंतिमस्मरणेन मोक्षप्राप्तिक्रम उक्तः ॥ येतु हठयोगमनुतिष्ठंति तेषामंतिमस्मरणेन मोक्षप्राप्तिक्रमं शृणु ॥ ये हठयोगिनः ते अंतकाले अचंचलेन मनसा भक्त्या च युक्ताः योगबलेन वायुं मूलाधारक्रमेण भ्रूमध्यगचक्रं नीत्वा तत्र निश्चलतया प्रतिष्ठाप्य ३ स्मरंतो ब्रह्म प्रकाशमानं वैकुंठे सूर्यमंडले च वर्तमानं परमपुरुषं यांति ॥ अयं हठयोगिनां क्रमः ॥ हठयोगप्रकारस्तु योगशास्त्रे द्रष्टव्यः ॥ १० ॥

अर्जुनः ॥ उभयेषामपि योगिनां अंतिमस्मरणविषयीभूतं ब्रह्म मह्यं प्रब्रूहि ॥

कृष्णः ॥ यदक्षरं वेदविदो वदंति विशंति यद्यतयो वीतरागाः ॥
यदिच्छंतो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण प्रवक्ष्ये॥ ११ ॥

यदिति ॥ वेदान् विदन्तीति वेदविदः यत् अक्षरं इति वदंति ॥ वीतः गतः रागः येषां ते वीतरागाः यतयः यत्नशीलाः यत् विशंति ॥ यत् इच्छन्तः ब्रह्मणे वेदाय चर्यां

१. मूलाधारस्वाधिष्ठानमणिपूरकाऽनाहतविशुद्धाऽऽज्ञासहस्राराऽऽख्यानि सप्त चक्राणि क्रमात् मूलाधारतदुपरिभागनाभिवक्षःकंठभ्रूमध्यब्रह्मरंध्रेषु स्थितानि इत्यादिकं योगशास्त्रात् ज्ञेयम् ॥ २. ७. १९.
३. यः अनुस्मरेत् स तं पुरुषं उपैतीत्यन्वयः ॥

गुरुकुलवासः ब्रह्माणि चर्या मनोयोजनं वा ब्रह्मचर्यं चरन्ति अनुतिष्ठंति ॥ पद्यते ज्ञायते इति पदं पद्यते प्राप्यते इति च पदं ज्ञेयं प्राप्यं च तत् ब्रह्म संग्रहेण ते तुभ्यं प्र सम्यक् वक्ष्ये ॥ ११ ॥

वेदवेदार्थतत्वज्ञाः यत् ब्रह्म अक्षरमिति वदंति ॥ वक्ष्यते च ॥ १ 'अव्यक्तोऽक्षर इत्युक्त' इति ॥ वेदज्ञा एव तथा वदेयुः ॥ वेदज्ञैरेव वेद्यं तत् ॥ वक्ष्यते च ॥ २ 'वेदैश्च सर्वैरहमेव वेद्य' इति ॥ अत एव ३ 'अथातो ब्रह्मजिज्ञासा' इत्यत्र ब्रह्मणो ब्रह्मणा वेदेन जिज्ञासाशब्दितो विचारः कर्तव्यः इति काचन वृत्तिः ॥ यत्प्राप्तीच्छवः महता प्रयत्नेन रागद्वेषादीन् तत्प्राप्तिप्रतिबंधकान् दोषान् विधूय प्राप्नुवंति ॥ यच्च ज्ञातुं द्रष्टुमिच्छंतो नियमेन ४ गुरुकुलवासं चरंतो ब्रह्मचर्यशब्दितां ५ ब्रह्मज्ञानोपयोगिनीं कांचन ६ चर्यां अनुतिष्ठंति ॥ तादृशं ज्ञेयं ज्ञानप्राप्यं च यत् ब्रह्म तत् तुभ्यं संग्रहेण सम्यग्वक्ष्यामि ॥ कथमहं तत् ब्रह्म ज्ञास्यामीति मा व्यथिष्ठाः ॥ वक्ष्यते चोपरिष्टात् तत्रतत्र तद्ब्रह्म नातिविस्तरेण ॥ ११ ॥

अर्जुनः ॥ तत्र तत्रोच्यमानं श्रुत्वा ब्रह्म ज्ञास्यामि ॥ वायुजयाद्युपायवतं हठयोगिनां अंतिमस्मरणोत्क्रमणब्रह्मप्राप्तिक्रमं ब्रूहि ॥

कृष्णः ॥ सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च ॥
मूर्ध्न्याधायाऽऽत्मनः प्राणं आस्थितो योगधारणां ॥ १२ ॥

ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन् ॥
यः प्रयाति त्यजन् देहं स याति परमां गतिं ॥ १३ ॥

---

१. ८. २१. २.-१५. १५. ३. १. १. १. ४. अ ॥ ५. वि ॥ ६. द्वै ॥ मन आदीन ब्रह्मणि चर्याशब्दितं योजनं च ॥

सर्वेति ॥ यः सर्वाणि च तानि द्वाराणि च सर्वद्वाराणि तानि संयम्य मनश्च हृदि निरुध्य आत्मनः प्राणं मूर्ध्नि आधाय योगस्य ध्यानयोगस्य धारणां आस्थितः आश्रितः ओम् इति एकं च तत् अक्षरं च एकाक्षरं ब्रह्म प्रणवात्मकं वेद ब्रह्मप्रतिपादकं ओमित्येकमक्षरं वा व्याहरन् उच्चरन् मां अनुस्मरन् ओमिति एकमक्षरं यस्य सः एकाक्षरः तं ब्रह्म मां व्याहरन् अनुस्मरंश्च इति वा तादृशः सन् देहं त्यजन् प्रयाति सः परमां गतिं याति ॥ १२ ॥ १३ ॥

मनः यैश्चक्षुरादिभिर्द्वारैर्बहिर्याति तानि सर्वाणि इंद्रियरूपद्वाराणि संयम्य इंद्रियाणि विषयेभ्यः प्रत्याहृत्य इंद्रियैर्विषयान् अस्वीकृत्य इंद्रियेभ्यो विषयान्-प्रदर्श्य शरीरांतस्थवायुसंचरणमार्गभूतसुषुम्नेतरनाडीरूपद्वाराणि निरुध्य द्वासप्ततिसहस्रसंख्याकेषु नाडीभेदेषु वायुमसंचारयन् मनः स्वस्थाने हृदि हृदय-पुंडरीके तदंतस्थे संहारकर्तरि नारायणे यथा नान्यत्र गच्छेत्तथा निरुध्य स्वस्य प्राणशब्दितं वायुं सुषुम्नामार्गेण भ्रुवोर्मध्यं नीत्वा ब्रह्म ध्यात्वा वायुं तदुपरि ब्रह्मरंध्रशब्दिते मूर्धभागे सहस्रारचक्रं नीत्वा ब्रह्मणि योगशब्दितं अखंडस्मृति-रूपं मनसोऽवस्थानमाश्रितः सन् ब्रह्मणो वाचकं ओं इति एकमक्षरं उच्चरन् सन् तद्वाच्यं ओं इति एकेन प्रणवाख्येन अक्षरेण वाच्यं यत् ब्रह्म तद्रूपं मां अनुस्मरन् सन् देहं त्यजन् यः प्रयाति सः परमगतिशब्दितं परमप्राप्यं [1]ब्रह्म याति ॥ तच्च ब्रह्माहमेव अतो मां याति ॥ वक्ष्यते च ॥ 'तमाहुः परमां गति'मिति ॥ १२ ॥ १३ ॥

अर्जुनः ॥ राजयोगिनां अंतिमस्मरणेन ब्रह्मप्राप्तिरुक्ता ॥ कथं सा मम भविष्यति ॥ असाध्यत्वात् ॥ अतो बिभेमि शोचामि चाहमसाध्यत्वबुद्ध्या ॥

कृष्णः ॥ अनन्यचेतास्सततं यो मां स्मरति नित्यशः ॥
तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ॥ १४ ॥

१. **वि** ॥ अत्र वक्ष्यमाणे च परमा गतिः प्रकृतिसंबंधरहितः शुद्ध आत्मा ॥ तस्यैव कैवल्या-र्हिभिः प्राप्यत्वात् ॥

अनन्येति ॥ हे पार्थ यः न विद्यते अन्यस्मिन् चेतः मनः यस्य सः अनन्यचेताः सन् नित्यशः सततं सदा मां स्मरति नित्यं युक्तः नित्ययुक्तः तस्य नित्ययुक्तस्य योगः अस्यास्तीति योगी तस्य योगिनः तस्य अहं सुलभः ॥ १४ ॥

यो मां अनिवेशयन् मत्तोऽन्यत्र मनः स्मरति यावज्जीवं निरंतरं अनन्यभावेन, तस्य नित्यं मयि मनोयोगवतस्तेन योगेन ज्ञानयोगं प्राप्तस्य अहं अनायासेन अंतिमस्मृतिविषयीभवामि ॥ दययाऽहमंतिमस्मरणमनायासेन तस्योत्पादयामि ॥ उक्तं चेदं मया ॥ तस्मात्सर्वेषु कालेष्वित्यत्र ॥ दत्वा अंतिमस्मरणं परमां गतिं प्रापयामि ॥ अतो माभूत्तव भयं ॥ मा च व्यथा ॥ १४ ॥

वि ॥ ऐश्वर्यं कैवल्यं भगवल्लाभः इति त्रीणि फलानि ॥ तत्र इहामुत्र च विलक्षणविनश्वरमहैश्वर्यानुभव ऐश्वर्यं ॥ प्रकृतिबंधरहितशुद्धात्मस्वरूपानुभवः कैवल्यं ॥ परमे पदे नित्यसूरिभिः मुक्तैश्च सह परब्रह्मणो नारायणस्यानुभवो भगवल्लाभः ॥ तत्र ऐश्वर्यार्थिनां भगवदुपासनाप्रकारस्तत्फलं चोच्यते ॥ 'अभ्यासयोगयुक्तेने'ति 'कविं पुराण'मिति 'प्रयाणकाले मनसे'ति च श्लोकैः ॥ ऐश्वर्यकामनया भगवंतं कवित्वपुराणत्वादिकल्याणगुणविशिष्टत्वेन निरंतरं योऽनुस्मरेत् स तदभ्यासजनितांतिमस्मरणेन तत्समानैश्वर्यो भवति ॥ 'परमं पुरुषं याति' ॥ दिव्यं पुरुषमुपैति' इत्यनयोः परमपुरुषैश्वर्यसमानमैश्वर्यं प्राप्नोतीत्यर्थः ॥ ८ ॥ ९ ॥ १० ॥

कैवल्यार्थिनां भगवदुपासनाप्रकारस्तत्फलं चोच्यते ॥ 'यदक्षरं वेदविद' इति 'सर्वद्वाराणी'ति 'ओमित्येकाक्षर'मिति च श्लोकैः ॥ इंद्रियसंयमादिनिरोधादिभिर्वशीकृताऽऽत्मा यः कैवल्यकामनया प्रणवमुच्चरन् तद्वाच्यं भगवंतं निरंतरं अनुस्मरति सः तदभ्यासजनितांतिमस्मरणेन भगवत्समानाकारमपुनरावृत्तिं शुद्धं आत्मानं प्राप्नोति ॥ 'पदं प्रवक्ष्ये' इत्यस्य, पदशब्दितस्य वेदांतवेद्यस्य भगवतः उपासनाप्रकारं प्रवक्ष्ये इति, 'परमां गतिं याती'त्यस्य परमप्राप्यतया परमगतिशब्दितं भगवत्समानाकारं शुद्धमात्मानं प्राप्नोतीति चार्थः ॥

वक्ष्यते च 'शुद्धस्यात्मनः परगतित्वं' तमाहुः परमां गति'मिति ॥ ११ ॥ १२ ॥ १३ ॥

भगवल्लाभार्थिनां मोक्षार्थज्ञानिशब्दितानां उपासनाप्रकारस्तत्फलं चोच्यते ॥ 'अनन्यचेताः सतत'मिति श्लोकेन ॥ ऐश्वर्ये कैवल्ये च भगवल्लाभादन्यस्मिन् फले मनःप्रवेशरहितो यः नित्ययोगकांक्षया निरंतरं मां स्मरति स योगी तदभ्यासजनितांतिमस्मरणेन भगवंतं मां प्राप्नोति ॥ मत्प्राप्त्युपायान् ज्ञानभक्तिवैराग्यांतिमस्मरणादीनहं ददामि ॥ अतोऽहं तस्य सुलभः ॥ वक्ष्यते च ॥ १ 'तेषां सततयुक्तानां ददामिबुद्धियोगं' इति ॥ २ 'अहमज्ञानजं तमो नाशयाम्यात्मभावस्थ' इति च ॥ ३ 'विवृणुते तनूं स्वा'मिति श्रुतिः ॥ एवमत्र त्रयाणामधिकारिणां उपासनाभेदा उपादेयभेदाः फलभेदाश्च * बोद्धव्याः ॥ १४ ॥

अर्जुनः ॥ एवमंतिमस्मरणेन भगवंतं भवंतं प्राप्ताः किं कंचित्कालं स्थित्वा निवर्तंते उत त्वन्निकट एव पुनरावृत्तिरहितास्सुखेन वर्तंते ॥ यद्यपि ५ 'मद्भक्ता यांति मामपी'ति त्वां प्राप्तानां विशेष उक्तः ॥ तथापि तत्र तव त्वल्लोकस्य च नाशाभावात् त्वां प्राप्ता न पुनर्निवर्तंते इत्युक्तं ॥ तव त्वल्लोकस्य च नाशाभावेऽपि त्वां प्राप्तानां तथा स्थातुमनर्हत्वे निवर्तैरन्नपि ते ॥ महांतं प्रभुं प्राप्ता अपि तस्य निरतिशयनिरवधिकप्रभुत्वसत्वेऽपि स्वदोषेण निवर्त्यमाना दृश्यंते लोके ॥ अतो ममेयमुदेति शंका ॥

कृष्णः ॥ मामुपेत्य पुनर्जन्म दुःखाऽऽलयमशाश्वतम् ॥
नाऽऽप्नुवंति महात्मानः संसिद्धिं परमां गताः ॥ १५ ॥

मामिति ॥ महान् आत्मा येषां ते महात्मानः परमां सिद्धिं परमं फलं मोक्षं

१. १०. १५. २. १०. ११. ३. मुं. ६. ३. ४. अत्र, 'ऐश्वर्याक्षरयाथात्म्यभगवच्चरणार्थिनां ॥ वेद्योपादेयभावानामष्टमे भेद उच्यते' ॥ इति यामुनाचार्यकृतगीतार्थसंग्रहश्लोकोऽनुसंधेयः ॥
५. ७. २३.

गताः मामुपेत्य स्थिताः दुःखानां आलयः स्थानं दुःखालयः तं न शाश्वतं अशाश्वतं पुनर्जन्म नाऽऽप्नुवंति ॥ १५ ॥

ये महतो ज्ञानयोगादेवमंतिमस्मरणेन मां प्राप्ताः १ महानुभावा महांतः खलु ते ॥ अतो निरतिशयं २ सिद्धिशब्दितं मोक्षरूपं फलं प्राप्ताः ॥ नान्यथा ते तत्फलं प्राप्नुयुः ॥ तेषां न पुनरावृत्तिः ॥ हेत्वभावात् ॥ तादृशः प्रभुरहं ॥ तेऽपि तादृशा निर्दोषाः ॥ अतस्ते नश्वरं दुःखानामालयं जन्मशब्दितं देहयोगं ३ पुनः-पुनर्जन्मनां दुःखानां चालयं स्थानं च न प्राप्नुवंति ॥ अन्यान् प्राप्तास्तु पुनर्जन्म-दुःखाऽऽलयमशाश्वतं प्राप्नुवंति ॥

अ ॥ ये शुद्धांतःकरणाः प्राप्तसुदृढब्रह्मात्मैकत्वविज्ञानाः अत एव मया पर-ब्रह्मणा एकीभावमुपेत्य उत्तमां विदेहमुक्तिलक्षणां सिद्धिं प्राप्ताः न तेषां पुनर्जन्म ॥ जननमरणादिहेत्वविद्यानिवृत्त्या बीजाभावात् ॥ अत्र मामुपेत्य महौके भोगाननु-भूय मोक्षलक्षणां सिद्धिं गता इत्युक्त्या क्रममुक्तिविषयमिदमिति जानीहि॥ अंति-मस्मरणमप्येतद्विषयमिति स्पष्टीभविष्यति ॥ इति परे ॥

वि ॥ भगवल्लाभार्थिनां कैवल्यार्थिनां च न पुनरावृत्तिः ॥ ऐश्वर्यार्थिनां पुन-रावृत्तिः ॥ इत्येतत्प्रतिपादनायाध्यायशेषः ॥ तत्र 'मामुपेत्य पुनर्जन्म' इत्यादिना 'परस्तस्मात्तु' इत्यतः प्राक्तनेन ग्रंथेन भगवंतं प्राप्तानां न पुनरावृत्तिरिति, 'परस्तस्मात्तु' इत्यादिना तद्धाम परमं मेमे'त्यंतेन कैवल्यं प्राप्तानां न पुनरा-वृत्तिरिति, 'पुनरावर्त्तिनोऽर्जुनेति योगी प्राप्य निवर्तते इति अन्वयाऽऽवर्तते पुनरिति च तत्रतत्र ऐश्वर्यं प्राप्तानां पुनरावृत्तिरिति च प्रतिपाद्यते ॥ सर्वमन्य-देतत्त्रितयोपपादकमिति विवेकः ॥ १५ ॥

अर्जुनः ॥ किं ब्रह्मादीन् महत् पदमधितिष्ठतो महतो देवान् प्राप्ता अपि

१. महान् आत्मा अनुभावो येषां ते ॥ महान् आत्मा मनो येषां ते ॥ महान् आत्मा बुद्धि-र्ज्ञानं येषां ते महांतश्च ते आत्मानश्च ते महात्मानः ॥ २. वि ॥ संसिद्धिरूपं मां ॥ ३. अ ॥ पुन र्जन्मदुःखाऽऽलयमित्येकं पदम् ॥

वर्तन्ते ॥ देवान् प्राप्ताः पुनरावर्तन्ते इ 'त्यंतवत्तु फलं तेषा 'मित्यत्र यद्यप्युक्तं ॥ तथाऽपि तत्र देवानिति स[illegible] सामान्यदेवान् प्राप्तानां पुनरावर्त्तिसत्वेऽपि विशिष्टान् ब्रह्मादीन् जगत्स्रष्टृत्वादिमहामहिमवतो महतो देवान् प्राप्तानां पुनरावृत्तिर्न स्यात् इति भाति ॥ अतो 'मामुपेत्ये 'ति कथं विशिष्योच्यते ॥ परिहरेमां मे शंकाम् ॥

कृष्णः ॥ आब्रह्म१भुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ॥
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ॥ १६ ॥

आब्रह्मेति॥ हे अर्जुन ब्रह्मणः भवनं गृहं ब्रह्मभवनं तस्मात् आ ब्रह्मभवनात् ब्रह्मसदनपर्यंतं विद्यमानाः लोकाः भुवनानि जना वा पुनः आवर्तयंति आवर्तंते वा इति पुनरावर्तिनः ॥ हे कौन्तेय मां उपेत्य तु एव पुनर्जन्म न विद्यते ॥ १६ ॥

हे अर्जुन ब्रह्मलोकपर्यंतं स्थिताः २जनाः पुनरावर्तंते ॥ ब्रह्मलोकपर्यंतं स्थिताः लोकाः आगतान् पुनरावर्तयंति ॥ ब्रह्मादीनां तल्लोकानां च महामहिमवत्त्वेऽपि बद्धत्वात् प्रकृतिविकारत्वाच्च नाशसत्वेन तान् प्राप्तानामपि ३ पुनरावृत्तेर्वुक्तत्वात् ॥ अहंतु तदपेक्षया विशेषवान् ॥ सच तु शब्देन सूचितः ॥ 'परस्तस्मात्तु भावोऽन्य' इत्यादिना 'तद्धाम परमं ममे 'त्यंतेन वक्ष्यते ॥ तादृशं मां प्राप्तस्यैव पुनर्जन्म न विद्यते ॥ ४ 'नच पुनरावर्तते नच पुनरावर्तते' इत्यादिश्रुतेः ॥ वक्ष्यते च ॥ 'यं प्राप्य न निवर्तंते' इति ॥ 'यद्गत्वा न निवर्तंते' इति 'सर्गेऽपि नोपजायंते प्रलये न व्यथंति चे 'ति च वक्ष्यते ॥ स एव पुनर्जन्म न ५ प्राप्नोति नान्यान् ६ प्राप्तः ॥ स्वतो वंशताश्च शुद्धस्त्वं मामेव प्राप्य पुनर्जन्म नाप्स्यसि ॥ किंवा स्वं

१. भवनादिति पाठान्तरं ॥ २. लोकाः जनाः लोकाश्च ॥ पुनरावर्तंते पुनरावर्तयंति चेति पुनरावर्त्तिनः ॥ ३. अत्र 'राज्यं सुराणामपि चाधिपत्य'(२. ८.)मिति ॥ 'सद्यस्त्यजंति वरदे'(३३. पुटे)ति ॥ अन्ये चैवंप्रकाराः श्लोकाः अनुसंधेयाः ॥ ४. छां. ८. १५. १. ५. विदधातुः प्राप्त्यर्थकः सकर्मकोऽपि ॥ ६. द्रष्टृ ॥ भाष्यतात्पर्यटीकाविवृत्यादिषु विशेषोऽत्र द्रष्टव्यः ॥ सच, यद्यपि अनंतपरमव्योमवैकुंठेषु स्थितानां न पुनरावृत्तिः ॥ तथाऽपि जनादिषु त्रिषु स्थितानां अंशेन पुनर्जनिसत्वात् अंशेनापि पुनर्जन्माभावाभिप्रायेण 'मामुपेत्य पुनर्जन्म न विद्यते' इति विशिष्योक्तं ॥ वैकुंठं

प्राप्तान् पुनरनावर्त्य स्वांतिक एव स्वेनावस्थापनपूर्वकतद्रक्षणसमर्थं तव प्रभुत्वं ॥ कथं त्वामीदृशं महामहिमवंतं प्राप्नोति मादृशो लोकः इति चेत् १ लक्ष्म्याः पतिरहं ब्रह्मादयस्तत्कटाक्षेणैव स्वं २ स्वं पदं प्राप्ताः ॥ ३ 'यं कामये तंतमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधा 'मिति श्रुतेः ॥ साच निखिलस्य जगतो मातृत्वान्मत्प्रेयसीत्वेनाऽऽराधिता मां प्रापयेत् ॥ अतोऽहमीदृशस्सर्वथा सर्वदा सेव्यः अंतिमस्मरणेन प्राप्यश्च ॥ १६ ॥

अर्जुनः ॥ कुतो ब्रह्माणमपि प्राप्तानां पुनरावृत्तिः त्वां प्राप्तानां केवलं न सा ॥ कस्तव ब्रह्मणश्च विशेषः ॥ संतुनाम इंद्रादयोऽवराः ॥ ब्रह्मणो विषये ब्रूहि ॥

कृष्णः ॥ सहस्रयुगपर्यन्तं अहर्यद्ब्रह्मणो विदुः ॥
रात्रिं युगसहस्रांतां तेऽहोरात्रविदो जनाः ॥ १७ ॥

सहस्रेति ॥ अहश्च रात्रिश्च अनयोः समाहारः अहोरात्रः तं विदन्ति जानंति इति अहोरात्रविदः ते जनाः ब्रह्मणः अहः यत् तत् सहस्रं च तानि युगानि च सहस्रयुगानि

गतस्य मुक्तत्वान्नांशेनापि पुनर्जनिः ॥ जनादिषु त्रिषु स्थितस्य अमुक्तत्वादंशेन पुनर्जनिरस्ति इत्यादिरूपः ॥ १. मां इत्यस्य, मा लक्ष्मीः तया सहितं अशब्दवाच्यपरब्रह्मभूतमित्यर्थः ॥ 'अ इति ब्रह्मे'ति श्रुतिः ॥ विश्वपाशब्दवदाकारांतोऽयं माशब्दः ॥ २. अत्र, 'यस्याःकटाक्षमात्रेण ब्रह्मरुद्रेन्द्रपूर्वकाः ॥ सुराः स्वीयपदान्यापुः सालक्ष्मीर्मे प्रसीदतु '॥ इति, 'ब्रह्मादयो बहुतिथं यदपांगमोक्षकामास्तपस्समचरन् भगवत्प्रपन्नाः ॥ सा श्रीः स्ववासमरविन्दवनं विहाय यत्पादसौभगमलं भजतेऽनुरक्ता ' ॥ (भाग. १. १६.) इति, 'योमृग्यते हस्तगृहीतपद्मया श्रियेतरैरंग विमृग्यमाणया ' ॥ (भाग. ४. ८) इति, विश्वस्थितिप्रलयसर्गमहाविभूतिवृत्तिप्रकाशनियमाऽऽवृतिबंधमोक्षाः ॥ यस्या अपांगलवमात्रतः ' (द्वा. ७.) इति च श्लोकाः श्रीगुणरत्नकोशश्रीस्तवश्रीस्तुतिस्थाश्च लोकाः अनुसंधेयाः ॥ 'इवलूतायाय् ' (मुमुक्षुप्पडि) 'सर्वस्वामिनियाय् ' (रहस्यरत्नावली) इत्यादिवाक्यानि च अनुसंधेयानि ॥ ३. ऋ. १०. १२५. ५.

सहस्रयुगैः पर्यंतः पर्यवसानं यस्य तत् सहस्रयुगपर्यंतं विदुः जानन्ति ॥ युगानां सहस्राणि युगसहस्राणि युगसहस्रैः अंतः पर्यवसानं यस्याः सा युगसहस्रांता तां रात्रिं च विदुः ॥ १७ ॥

मनुष्याणां यद्वर्षं तद्देवानां अहोरात्रः तादृशैः अहोरात्रैः पक्षमासादिकल्पनया वर्षाणां द्वादशभिः सहस्रैश्चतुर्युगं भवति ॥ तादृशानां चतुर्युगानां सहस्रं ब्रह्मणोऽहः ॥ तावती रात्रिः ॥ ब्रह्मणोऽहर्यत् तस्य [१] चतुर्युगसहस्रैः पर्यवसानं ॥ तथा [२] तस्य रात्रिर्या तस्या अपि चतुर्युगसहस्रैः पर्यवसानं ॥ ईदृशोऽहोरात्रस्तस्य ॥ ईदृशैः त्रिंशता अहोरात्रैः मासः ॥ तादृशैर्द्वादशभिः मासैरेकं वर्षं ॥ तादृशानां वर्षाणां शतं ब्रह्मणः [३] चतुर्मुखस्याऽऽयुः ॥ तस्य परमिति नाम ॥ तस्य च प्रथमद्वितीये द्वे अर्धे ॥ तस्य चेदानीं द्वितीयमर्धं ॥ अत एव द्वितीयपरार्धे इति संकल्पयंति ॥ 'चतुर्युगसहस्राणि ब्रह्मणो दिनमुच्यते' ॥ इति, 'वैदिकानां युगानां च सहस्रपरिसंख्यया ॥ ब्राह्ममेकमहर्ज्ञेयं तावती रात्रिरेवचे'ति, निजेन तस्य मानेन आयुर्वर्षशतं स्मृतमिति च स्मृतयः ॥ इमां ब्रह्मणोऽहोरात्रव्यवस्थां न सर्वे जानंति ॥ किंतु ये मनुष्यादिचतुर्मुखांतानां अहोरात्रव्यवस्थाविदो महांतः त एव जानंति वदंति च ॥ अतो ब्रह्मण ईदृशवर्षशतरूपजीवितकालव्यवस्थावत्त्वेन नश्वरत्वात्तस्य लोकोऽपि तथा ॥ किमु वाच्यमन्ये देवास्तल्लोकाश्च नश्वरा इति ॥ मम मल्लोकस्य च परं कालव्यवस्थानियमितत्वाभावेन न नाशप्रसक्तिः ॥ उक्तं च महाभारते मोक्षधर्मे ॥ 'नित्यं हि नास्ति जगति भूतं स्थावरजंगमं ॥ ऋते तमेकं पुरुषं वासुदेवं सनातन'मिति ॥ अतो मामुपेत्येति विशिष्योक्तं युक्तं ॥ अत्र ब्रह्मण एव हि कालव्यवस्थावत्त्वेन विनाशित्वमुक्तं ॥ तेन तल्लोकस्य विनाशित्वं कथं सेत्स्यति इति चेत् 'आब्रह्मभुवनाल्लोकाः पुनरावर्तिन' इति पूर्वमुक्तत्वात् ॥

१. युगशब्दश्चतुर्युगपरः ॥ प्रमाणांतरात् ॥ २. यदित्यस्य यथेत्यर्थात् ॥ ३. ब्रह्मशब्दश्चतुर्मुखब्रह्मपरः ॥

ब्रह्मलोकपर्यंतं लोकाः पुनरावर्तिनः ब्रह्मलोकस्तु अपुनरावर्ती इत्यर्थः कुतो न स्यादिति चेत् अत्र, 'आ' इति न 'आमुक्ति संसार' इति वत् तेन विनेति-रूपा मर्यादा ॥ किंतु आबालं हरिभक्तिरितिवत् तेन सहेतिरूपोऽभिविधिः ॥ तेन ब्रह्मलोकसहितानां लोकानां नश्वरत्वमुक्तं भवति ॥ मां प्राप्तानां 'यं प्राप्य न निवर्तंते' इत्यादिना वक्ष्यमाणेन 'मामुपेत्य पुनर्जन्मेत्यादिना' उक्तेन च अपुनरा-वृत्त्युक्त्या मल्लोकं प्राप्तानां [१] 'शाश्वतं पदमव्यय'मित्यादिना वक्ष्यमाणेन 'अना-वृत्तिः शब्दादिति सूत्रेण 'नच पुनरावर्तंते' इत्यादिकया च श्रुत्या अपुनरावृत्त्युक्त्या च मम मल्लोकस्य च अविनाशित्वमुक्तं भवति ॥ अत्र ब्रह्मादीनां तल्लोकानां च परब्रह्मणो भगवतास्तल्लोकस्य च विनाशित्वाविनाशित्वयोः प्रमाणानि तत्रतत्रो-क्तानि परःशतान्यनुसंधेयानि ॥ १७ ॥

अर्जुनः ॥ यद्येवं ब्रह्मणोऽहो रात्रिश्च स्यात् तर्हि सोऽप्यहि सव्यापारो रात्रौ निर्व्यापारश्च स्यात् ॥ किं तथा ॥ ब्रूहि ॥

कृष्णः ॥ अव्यक्ताद्व्यक्तयस्सर्वाः प्रभवंत्यहरागमे ॥
रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके ॥ १८ ॥

अव्यक्तादिति ॥ सर्वाः व्यक्तयः सर्वे पदार्थाः अन्हः आगमः अहरागमः तस्मिन् अहरागमे अव्यक्तात् प्रभवंति उत्पद्यन्ते ॥ रात्रेः आगमः रात्र्यागमः तस्मिन् अव्यक्तं इति संज्ञा यस्य तत् अव्यक्तसंज्ञं तदेव अव्यक्तसंज्ञकं तस्मिन् तत्रैव प्रली-यंते ॥ १८ ॥

ब्रह्मणश्चतुर्मुखस्य यदहः पूर्वोक्तलक्षणं तस्य प्रारंभे सृष्टिव्यापाररहित्यरूप-स्वापावस्थावत्त्वेन अव्यक्तशब्दितात् सुप्तोत्थितात् [२] चतुर्मुखात् सर्वे नाम-रूपाभ्यां प्रकाशमानत्वात् व्यक्तिशब्दिताः पदार्थाः स्थावरजंगमात्मकाः चेत-नाचेतनात्मकाः उत्पद्यंते ॥ तस्य ब्रह्मणो रात्र्याः पूर्वोक्तलक्षणायाः दिनप्रलय-शब्दितायाः प्रारंभे यत उत्पन्नास्तस्मिन्नेव सृष्टिव्यापारोपरमावस्थ [illegible]शब्दिते च-

---

१. १८. ५६. २. अ ॥

दुर्मुखे लयं याति ॥ १ चतुर्मुखशरीरकल्पाभाः प्रकृतेरुत्पद्यंते ॥ तस्यामेव लीयंते ॥ एवं चतुर्मुखशतायुषामहनि वर्तते ॥ १८॥

अर्जुनः ॥ यद्येवं सर्वेषां ब्राह्मदिनारंभे सृष्टिर्ब्राह्मदिनावसाने लयश्च स्यात् ॥ तर्हि सर्वेषां चतुर्मुखानामहरिति प्रतीयेत ॥ तच्चानुभवविरुद्धं ॥ अत्यहं प्राणिनां उत्पत्तिविनाशयोर्दर्शनात् ॥ केषांचिदुत्पत्तिः केषांचित् मृतिश्च प्रत्यहं दृश्यते ॥ आयुषो बितरां द्राघीयस्त्वनिश्चयेन वैराग्यं च नोदियात् ॥ यदि अहरागमे सृष्टानां सर्वेषां लयः स्यात् तर्हि कृतस्य कर्मणः फलाभावरूपनाशप्रसंगः ॥ परस्मिन् दिने सृष्टिमुपागतानामन्यत्वेन तैरनुभूयमानसुखदुःखहेतुभूतपुण्यपापानां पूर्वस्मिन् दिने स्थितैरकृतत्वादकृताभ्यागमप्रसंगश्च ॥ अतः कथमिदं ॥ ब्रूहि ॥

कृष्णः ॥ भूतग्रामस्स एवायं भूत्वा भूत्वा प्रलीयते ॥
रात्र्यागमेऽवशः पार्थ प्रभवत्यहरागमे ॥ १९ ॥

भूतेति ॥ हे पार्थ न वशः अवशः स एवायं भूतानां ग्रामः भूतग्रामः भूत्वा भूत्वा रात्रेः आगमः रात्र्यागमः तस्मिन् प्रलीयते ॥ अहः आगमः अहरागमः तस्मिन् प्रभवति ॥ १९ ॥

यः पूर्वस्मिन् दिवसे रात्र्यागमे प्रलीनः स एव भूतानां समुदायः परस्मिन् दिवसे अहरागमे प्रभवति॥ अतो न कृतनाशाकृताभ्यागमयोः प्रसंगः॥ यः अहरागमे सृष्टिमुपागतः तस्य रात्र्यागमे यो लयः तस्मात् प्राक् पुनःपुनर्जन्म पुनर्जन्मनो मरणानंतरभावित्वात् पुनःपुनर्मरणं च॥एवं बहूनि जन्मानि बहूनि मरणानि चैकस्मिन् ब्रह्मणोऽहन्यनुभूय रात्र्यागमे प्रलीयते॥ अतो नानुभवविरोधः॥नापि वैराग्यानुदयप्रसंगः॥इदानीं[२] विद्यमानो भूतग्रामः इतःपरमपि भूत्वा भूत्वा अस्य ब्रह्मदिनस्यावसाने प्रलयं यास्यति ॥ श्वः प्रातरुद्भविष्यति ॥ सृष्टुं[१] सिसृक्षा स्यान्नाम सृज्यमानः कथं पुनः-

१. वि ॥ अयं श्लोकः चतुर्मुखशरीरात् जडानामुत्पत्तिपरः ॥ उत्तरश्लोकस्तु चतुर्मुखाचेतनानामुत्पत्तिपरः ॥ २. एतदर्थमेव अयमिति पदं ॥

पुनस्सर्जनमनुमन्येतेति चेत् अवशः खलु सः ॥ सतु सृज्यमानो न स्वतंत्रः ॥ किंतु तत्तत्कर्मानुगुणं तासुतासु योनिषु तांस्तान् सृजतः अशब्दवाच्यस्य भगवतो वशः ॥ अतः स पुनःपुनस्सृज्यते संह्रियते च ॥ अत उक्तं युक्तम् ॥ १९ ॥

द्वे ॥ वि ॥ चतुर्मुखस्याहोरात्र ईदृशः ॥ तदन्हि सर्वेषां जन्मनाशौ ॥ तदहरवसाने सृष्टस्य सर्वस्य जगतो लयः ॥ इत्युक्तं ॥ तेन चतुर्मुखस्य सृष्टिलयौ नेति भाति ॥ ततश्च तस्य नित्यत्वात् 'आब्रह्मभवनाल्लोका' इत्युक्तमयुक्तं इति चेत् एवं ॥ १ अनेकेषां चतुर्युगानामनेकै२स्सहस्रैश्चतुर्मुखायुरात्मकैः पर्यवसानं ३ परब्रह्मणो भगवतो नारायणस्य यदहस्तस्य ॥ तथा तस्य या रात्रिस्तस्याश्च ॥ परब्रह्मण ईदृशमहः ईदृशी रात्रिः ॥ तस्य परमनित्यत्वेन कालकृत्यभावेऽपि सव्यापारनिर्व्यापारावस्थयोः प्रसिद्धाहोरात्रसाम्यात् तत्त्वेन व्यपदेशः ॥ 'अनेकयुगपर्यंतं अहर्विष्णोस्तथा निशा ॥ राज्यादौ लीयते सर्वमहरादौ च जायते ॥ नित्यस्यापि हरेः कालो द्विपरार्धात्मकः स्वयं ॥ अहश्चासौनिमेषश्च यत्प्रवृत्त्योपचर्यते' ॥ इत्यादिप्रमाणप्रमितभगवदहोरात्रविद एवं जानंति वदंति च ॥ १७ ॥

तस्य परब्रह्मणोऽहरागमे ४सृष्ट्यादिकाले यथावत्सर्वप्रमाणागोचरत्वादव्यक्तशब्दवाच्यात् परब्रह्मणो नारायणात् गुणत्रयमहदहंकारभूतदेहेंद्रियमनोबुद्ध्यादीनि जडानि ब्रह्मरुद्रेंद्रादयो जीवाश्चोत्पद्यंते ॥ तानि ते च स्वस्वकारणे लयमापद्यांततोऽव्यक्तशब्दिते भगवति लीयंते रात्रिशब्दितमहाप्रलयारंभे ॥ १८ ॥

यद्येवं ब्रह्मादीनां सर्वेषां परब्रह्मणोऽहरागमे सृष्टिः तस्य रात्र्यागमे प्रलयश्च ॥ तर्हि परस्मिन्नहनि प्रारब्धफलानुभवाय सृज्यमानानां अवराणां विषये पूर्वोक्तदोषत्रयस्य तादृशानामुत्तमानां विषये प्रथमद्वितीययोरप्रसक्त्या तृतीयस्य दोषस्य च प्रसक्तिरिति चेत् ५ब्रह्मादिर्भूतग्रामः अहरागमे प्रभवति ॥ भूत्वाभूत्वा रात्र्यागमे प्रलीयते ॥ पुनरहरागमे प्रभवति ॥ पुनः प्रलीयते रात्र्यागमे ॥ ततो न तेषां दोषाणां प्रसक्तिः ॥ परस्मिन् दिने मुक्तिं गमिष्यतो ब्रह्मणो विषये तृतीयदोषस्य तेन सह मुक्तिं गमिष्यतां अवराणां विषये

१. युगशब्दोऽनेकचतुर्युगपरः ॥ २. सहस्रशब्दोऽनेकसहस्रपरः ॥ ३. ब्रह्मशब्दः परब्रह्मपरः ॥ ४. अहोरात्रिशब्दौ परब्रह्माहोरात्रवाचकौ ॥ अहः ब्रह्मकल्पः रात्रिर्महाप्रलयः ॥ ५. अतद्गुणसंविज्ञानः ॥ ब्रह्मान्यः भूतग्रामः इत्यर्थः ॥

दोषत्रयस्य उत्तमानां विषये तृतीयदोषस्य च प्रसंग इति चेत् यो ब्रह्मा स भूत्वा प्रलये प्रलीयते ॥ यश्च परस्मिन् दिने मुच्यमानो जीवसमुदायः स भूत्वा भूत्वा प्रलये प्रलीयते ॥ परदिनारंभे प्रभवति प्रकर्षेण प्रकृतिबंधविनिर्मुक्तत्वरूपेण भवति॥ मुक्तासाधारणसकलप्राभवचांश्च भवति ॥ पूर्वब्रह्मकल्पस्थितस्यैव ब्रह्मणस्तदन्यजीवसमुदायस्य च मुक्तत्वात् न तेषां दोषाणां प्रसंगस्तद्विषये ॥ मुक्तानामपुनरावृत्त्या ब्रह्मरुद्रेंद्रादीनां प्रतिब्रह्मकल्पमवस्थानं कथं ॥ अन्य एवेमे इति चेत् तर्हि तान्येव नामानि कथमिति चेत् अन्य एवेमे नामरूपादिकं तु समानं ॥ तथाच सूत्रं ॥ १ 'समाननामरूपत्वाच्चाऽऽवृत्तावप्यविरोधः' ॥ इति ततश्च चतुर्मुखस्यापि सृष्टिप्रलयवत्वात् 'आब्रह्मभवनाल्लोकाः पुनरावर्तिन' इति युक्तमुक्तं ॥ अत एव २' अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथे 'ति सर्वसृष्टृत्वं सर्वसंहर्तृत्वं चोक्तं मम मयाऽ ॥ १९ ॥

अर्जुनः ॥ ब्रह्मणः परब्रह्मणा तदन्येषां च तेन प्रभवप्रलयवत्वादनित्यत्वेन युक्तमुक्त 'माब्रह्मभवनाल्लोका' इतीति सम्यगुपपादितं ॥ त्वां त्वल्लोकं च प्राप्तानां याऽसावपुनरावृत्तिरुक्ता, तुशब्दसूचितविशेषरूपहेतूक्त्या तामुपपादय ॥

कृष्णः ॥ परस्तस्मात्तु भावोऽन्योऽव्यक्तोऽव्यक्तात्सनातनः ॥
यस्स सर्वेषु भूतेषु नश्यत्सु न विनश्यति ॥ १० ॥

पर इति ॥ न व्यक्तः अव्यक्तः सनातनः अनादिः तस्मात् अव्यक्तात् व्यक्ताद्वा परः अन्यः भावः सः तु ॥ यः सर्वेषु भूतेषु नश्यत्सु न विनश्यति ॥ १० ॥

चक्षुरादींद्रियागोचरत्वादव्यक्तशाब्दितः ४' न सदृशे तिष्ठति रूपमस्य' ॥ ५' न तत्र चक्षुर्गच्छति' ॥ इत्यादेः ॥ सदैकरूपोऽनादिः' ६ व्यक्तशब्दितादुक्तरूपादनित्याच्चतुर्मुखादेः सर्वस्मात् प्रपंचात् चेतनाचेतनात्मकात् तद्धेतुभूतायाः प्रकृतेश्च

१. १. ३. ३०, २. ७. ६. ३. श्लोकत्रये द्वैतविशिष्टाद्वैतमतप्राक्रिययोरवांतरविशेषाः तत्तन्मतग्रन्थतोऽवसेयाः ॥ ४. ना. १. ५. के. १. ३. ६. द्वै ॥ व्यक्तात् ॥ अ ॥ वि ॥ अव्यक्तात् ॥

भिन्नः अतो विलक्षणः तुशब्दसूचितोक्तरूपविशेषवान् । जगत्सृष्ट्यादिकर्ता यः परमात्मा स सर्वेषु भूतेषु चेत[illegible]केषु उक्तरीत्या दिनप्रलये महाप्रलये च नाशं प्राप्तेष्वपि ब्रह्मादीनामायुर्वर्ष[illegible] कालस्यापि नित्यात्मकतत्त्वः कालकृत्स्यभावेन नित्यत्वात् न नाशं प्राप्नोति ॥ उक्तं च भागवते ॥ २ 'भवानेकः शिष्यते शेषसंज्ञः' ॥ इति ॥ अधिष्ठानभूतप्रपंचनाशे तदंतर्गतस्य ममवतो नाशः स्यादिति चेत् भगवान् सर्वत्र व्यापः ॥ तस्य तस्य वस्तुनो नाशे तदवच्छिन्नरूपस्य व्याप्तरूपे अनुप्रवेशः ॥ उपाधिनाशे घटाकाशस्य महाकाशे यथा ॥ तेन रूपेण दर्शनं प्राप्नोति ॥ ३ आत्यंतिकं नाशं न प्राप्नोति ॥ अतएव विशेषात् 'मामुपेत्य पुनर्जन्म ने'त्युक्तं ॥ यदि परमात्मा अव्यक्तः स्यात् तर्हि कस्यापि तदपरोक्षसाक्षात्कारैकहेतुकमोक्षासंभवेन तत्फलकशास्त्रपुराणादीनामानर्थक्यप्रसंगःइति चेत् न सर्वात्मना अव्यक्तः परमात्मा ॥ किंतु तत्प्रसादेन व्यक्तो भवति ॥ विना तदनुग्रहं स्तेत्वापि प्रयत्नवां न दृश्येत ॥ अतएव ४ 'मोहितं नाभिजानाति मां' ५ 'योगमायासमावृतः' इत्यव्यक्तत्वमुक्त्वा ६ 'मायामेतां तरंति ते' इति प्रसादेन व्यक्तत्वमुक्तं ॥ भगवान् व्यासोऽपि ७ 'तदव्यक्तमाह ही'त्यव्यक्तत्वमुक्त्वा ८ 'अतोऽनंतेन तथाहि लिंग'मिति प्रसादेन व्यक्तत्वमाह ॥ ९ 'यमेवैष वृणुते तेन लभ्यः' इति श्रुतिरप्येवमाह ॥ २० ॥

कृष्णः ॥ अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिं ॥
यं प्राप्य न निवर्तन्ते तद्धाम परमं मम ॥ २१ ॥

अव्यक्त इति ॥ सः न व्यक्तः अव्यक्तः न क्षरः अक्षरः इत्युक्तः ॥ यं प्राप्य न निवर्तन्ते ॥ तं परमां गतिं आहुः ॥ तत् मम परमं धाम ॥ २१ ॥

१. द्वै ॥ अयं च भावशब्दार्थः ॥ 'सृष्टिः स्थितिश्च संहारो भावनं समुदाहृतम् ॥ तत्त्वः करोति पुरुषः स भाव इति कीर्तितः ॥' इति वचनात् ॥ भावयतीति भाव इति व्युत्पत्तिः ॥ अ ॥ वि ॥ भावः पदार्थः ॥ २. भाग. १०. १. ३. न विनश्यति विशेषेण न नश्यति इत्यर्थः ॥ इति. बाल ॥ ४. ७. १३. ५. ७. २५. ६. ७. १४. ७. ३. २. २३. ८. ३. २. २७. ९. का. २. २३.

अव्यक्तत्वं नाशाभावाच्च अव्यक्तः अक्षरः इति श्रुतिपुराणादिकृतः अतः 'स एव परमप्राप्यः ॥ तं परमात्मानं प्राप्य स्थिता न निवर्तते ॥ यं प्राप्य न निवर्तन्ते १ तं हि परमां गतिं वदंति ॥ तादृशं च सर्वोत्तमं वस्तु मम [illegible] ॥ २ अहमेव स इति बुध्वा मामाश्रय ॥ मां प्राप्तानां तु न पुनरावृत्तिः ॥ उक्तादेव विशेषात् ॥ २१ ॥

वि ॥ अर्जुनः ॥ भगवंतं त्वां प्राप्तानां पुनरावृत्तिर्नेत्यभिहितं ॥ 'यदक्षरं वेदविद्' [illegible] श्लोकत्रयेण निरूपितं शुद्धात्मप्राप्तिरूपं कैवल्यं प्राप्तानां पुनरावृत्तिरस्ति वा न वा ॥ तच्च शुद्धात्मरूपं कीदृशं ॥ तत् किं स्वतंत्रं ॥ उत तव शेषभूतम् ॥

कृष्णः ॥ श्लोकत्रयं शुद्धाऽऽत्मविषयं ॥ तत्तत्कार्यसहितेषु आकाशादिभूतेषु भौतिकेषु शरीरेषु च नश्यत्स्वपि तेषु स्थित आत्मा न नाशं प्राप्नोति ॥ आत्मनो नित्यत्वात् ॥ उक्तं च ॥ ३ 'न हन्यते हन्यमाने शरीरे' ॥ इति ॥ २० ॥

स एव शुद्धाऽऽत्मा अव्यक्तः अक्षर इति तत्रतत्रोक्तः ॥ वक्ष्यते चात्रापि ॥ ४ 'ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते' ॥ इति, 'कूटस्थोऽक्षर उच्यते' इति च ॥ स एव परमप्राप्यः ॥ स एव 'स याति परमां गतिं' इत्यत्र परमगतेरुद्देश्यः ॥ तमात्मानं प्राप्य न निवर्तते ॥ यं भावं प्राप्य न निवर्तते स एव हि परमा गतिः ॥ उक्तश्चायमात्मा ५ 'गच्छंत्यपुनरावृत्तिं' इत्यत्र पुनरावृत्तिरहितत्वेन ॥ यद्ययमात्मा [illegible] स्यात् तर्हि स्वतंत्रोऽपि स्यात् ॥ ततश्च तव सर्वनियामकत्वं न स्यात् ॥ इति चेत् ईदृशं यत् शुद्धात्मरूपं तत् मम परमं नियमनस्थानं ॥ [illegible] ॥ तत्संसृष्टो बद्धाऽऽत्मा अपरं नियमनस्थानं ॥ प्रकृतिबंधविनिर्मुक्तो मुक्ताऽऽत्मा परं नियमनस्थानं ॥ तेषु त्रिषु नियम्येषु प्रकृतितत्संसृष्टजीवापेक्षया मुक्त उत्तमो नियम्यः ॥ प्रकृतिसंज्ञानरहिता तत्संसृष्टो

---

१. ब्रे ॥ तानिति पाठः ॥ २. अ ॥ राहोः शिर इतिवत्सम्बंधे षष्ठी ॥ ३. २. २०. भ. १२. ३. ५. ५; १७. ४. धामेत्यस्य स्थानमित्यर्थः ॥ ७. इदं नित्यसूरीणामप्युपलक्षणं ॥ स्वसंकल्पानुविधायी ता. चं. अवतरणिकास्थवाक्यं) त्यादिना तेषामपि नियम्यत्वोक्तेः ॥

बद्धाऽऽत्मा परिच्छिन्नज्ञानरूपः ॥ मुक्तस्तु अपरिच्छिन्न[1]ज्ञानरूपः ॥ तादृशः स मुक्ताऽऽत्मा मम शेषभूतः ॥ अतोऽहं सर्वनियामकः ॥ २ 'भूमिरापः' ३ 'अपरेयं' इति द्वाभ्यां प्रकृतितत्संसृष्टाऽऽत्मनोर्नियम्यत्वमुक्तं ॥ अत्र तु मुक्तस्यापीति भेदः ॥ २१ ॥

संजयः ॥ भक्तियोगजननाय भगवता स्वमाहात्म्ये प्रतिपादिते कथमीदृशमहामहिमवान् प्रभुः परमात्मा मया प्राप्तुं शक्यः ॥ कथं तमहं प्राप्नुयां ॥ इति चिंतादंतुरितांतरोऽभूदर्जुनः ॥ तदा सर्वांतर्यामित्वेन सर्वसाक्षित्वाद्विदित्वा तदीयां चिंतां परिहर्तुं तां उक्तं वक्ष्यमाणं च माहात्म्यं प्रसिद्धत्वादनूद्य तथाऽपि स नितरां सुलभः भक्तिरेव तल्लाभोपायः इत्याह ॥

कृष्णः ॥ पुरुषस्स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ॥
यस्यांतस्स्थानि भूतानि येन सर्वमिदं ततं ॥२२॥

पुरुष इति ॥ हे पार्थ भूतानि यस्य अंतः तिष्ठंतीति अन्तस्स्थानि ॥ येन इदं सर्वं ततं व्याप्तम् ॥ परः सः पुरुषः न विद्यते अन्यत् यस्यां सा अनन्या तया अनन्यया भक्त्या तु एव लब्धुं योग्यः लभ्यः ॥ २२ ॥

४ पुरि शयनात्पुरुषो जीवः ॥ ५ पूर्णषड्गुणत्वात् ६ निरतिशयमोक्षफलप्रदत्वाच्च पुरुषः परमात्मा ॥ पुरुषशब्दवाच्ययोस्तयोर्मध्ये परमः परमात्मा ॥ स प्राप्तुं शक्य ७ एव ॥ केनोपायेनेति चेत् पार्थ अविच्छिन्नस्नेहधाराप्रवाह[8]रूपया माहात्म्यज्ञानपूर्वकसुदृढस्नेहात्मिकया भक्त्या लभ्यः ॥ कीदृशी भक्तिः कार्येति चेत् यस्यां भक्तौ भगवल्लाभादितरत्प्रयोजनं नापेक्षितं सा अनन्या भक्तिः तया

१. धाम तेजः तच्चेह ज्ञानरूपः प्रकाशः ॥ परमं धाम अपरिच्छिन्नज्ञानरूपो मुक्ताऽऽत्मेत्यर्थः ॥ इति भावः ॥ २. ७. ४. ३. ७. ५. ४. पुरि शेते इति पुरुषः ॥ ५. पुरूणि पूर्णानि षट् यस्य सः पुरुषः ॥ ६. पुरु उत्तमं फलं सनोति इति पुरुषः ॥ ७. तुः एवार्थः ॥ तस्य लभ्यस्तु भक्त्या तु इत्युभयत्रान्वयः ॥ ८. अ ॥ ज्ञानरूपया ॥ वि ॥ प्रेमरूपया ॥

लभ्यः ॥ किं भक्त्यैव साधनांतरेणापि लभ्येतेति चेत् भक्त्यैव लभ्यः ॥ स कीदृशः येन सर्वमिदं ततं ॥ सर्वं जगत्तेन व्याप्तं ॥ वक्ष्यते च ॥ १'मया ततमिदं सर्वं'मिति ॥ सर्वाणि भूतानि तदुदरस्थानि प्रलये ॥ २'यत्प्रयंत्यभिसंविशंती'ति श्रुतेः ॥ वक्ष्यते च ॥ ३'यदा भूतपृथग्भावं एकस्थमनुपश्यती'ति ॥ ४ कारणं परमात्मा कार्याणि भूतानि कार्याणि कारणांतर्वर्त्तीनि ॥ अतो भूतानि तदंतस्स्थानि ॥ महामहिमवत्त्वेपि परमात्मनो भक्त्या लभ्यत्वात् कथमहं तं प्राप्नुयामिति चिंतां मा कार्षीः ॥ २२ ॥

अर्जुनः ॥ अन्यान् प्राप्ता निवर्तंते ॥ मां प्राप्तास्तु न निवर्तंते इत्युक्तं ॥ ये निवर्तंते ये न निवर्तंते किमुभयेषामेक एव पंथाः उत तत्तत्प्राप्यफलतारतम्येन मार्गभेदोऽस्ति ॥ दृश्यते हि लोके महतीषु सभासु तत्तदुपवशाद्दोत्तममध्यमाधमाऽऽसनतारतम्यानुरोधेन मार्गभेदः ॥ सौधाऽऽरोहणाय सोपानभेदश्च ॥

कृष्णः ॥ यत्र काले त्वनावृत्तिं आवृत्तिं चैव योगिनः ॥
प्रयाता यांति तं कालं वक्ष्यामि भरतर्षभ ॥ २३ ॥

यत्रेति ॥ भरतानां ऋषभः भरतर्षभः हे भरतर्षभ पार्थ योगः एषां अस्तीति योगिनः तु यत्र काले प्रयाताः संतः न आवृत्तिः अनावृत्तिः तां आवृत्तिं चैव यांति तं कालं वक्ष्यामि तु शब्दो विशेषे ॥ २३ ॥

फलतारतम्येन मार्गभेदोऽस्ति ॥ तत्र ५कर्मिणः एकस्मिन् पथि गत्वा निवर्तंते ॥ ज्ञानिनः अन्यस्मिन् पथि गत्वा न निवर्तंते ॥ उभयोरपि मार्गयोः कालाभिमानिन्यो देवता वर्तंते ॥ अत उभावपि मार्गौ कालशब्देनोच्येते ॥ ज्ञानिनां कर्मिणां च मार्गं ते वक्ष्यामि ॥ शृणु ॥ द्वयोर्मार्गयोरितरेतरं महान् ६विशेषे वर्तंते ॥ पुरुषश्रेष्ठत्वादुत्तममार्गार्हस्त्वम् ॥ २३ ॥

अर्जुनः ॥ ये न निवर्तंते तेषां मार्गं ब्रूहि ॥

१. ९. ४. २. तै. ३. १. ३. १३. ३१. ४. अ ॥ ५. योगिनः ज्ञानयोगिनः कर्मयोगिनश्च ॥ ६. तुशब्दो विशेषसूचकः ॥

कृष्णः ॥ अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणं ॥

तत्र प्रयाता गच्छंति ब्रह्म ब्रह्मविदो जनाः ॥ २४ ॥

अग्निरिति ॥ अग्निः ज्योतिः अहः शुक्लः उत्तरं च तत् अयनं च उत्तरायणं षट् मासाः यत्र वर्तन्ते ॥ ब्रह्म विदन्तीति ब्रह्मविदः जनाः तत्र प्रयाताः संतः ब्रह्म गच्छन्ति ॥ २४ ॥

१ अग्निः ज्योतिः देवता अहरभिमानिनी देवता शुक्लपक्षाभिमानिनी देवता उत्तरायण षण्मासषट्काभिमानिनी देवता एता देवताः यस्मिन् मार्गे वर्तते तस्मिन् गत्वा ब्रह्म प्राप्नुवंति ॥ ब्रह्मज्ञानिनः २ चतुर्मुखं प्राप्य तत्र स्थित्वा तेन सह परं ब्रह्म प्राप्नुवंति ॥ 'ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे ॥ परस्यांते परात्मानः प्रविशंति परं पदं' ॥ इत्युक्तेः ॥ ३ 'तेऽर्चिषमभिसंभवंति अर्चिषोऽहरन्ह आपूर्यमाणपक्षं आपूर्यमाणपक्षाद्यान्षडुदङ्डेतिमासान्' इति श्रुतिरप्येवोक्ता ॥ न सर्वेषां ब्रह्मज्ञानिनां अयं मार्गः किंतु केषांचिदुत्तमानामेवेति भ्रमपरिहाराय जना इति सामान्यशब्दनिर्देशः ॥ २४ ॥

अर्जुनः ॥ ये पुनर्निवर्तते तेषां मार्गं मे ब्रूहि ॥

कृष्णः ॥ धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनं ॥

तत्र चांद्रमसं ज्योतिः योगी प्राप्य निवर्तते ॥ २५ ॥

धूम इति ॥ धूमः रात्रिः तथा कृष्णः दक्षिणं च तत् अयनं च दक्षिणायनं

१. द्वै ॥ अग्निदेवता ज्योतिर्देवता ॥ अह्नः पुत्राविमौ ॥ धूमाभिमानिनी देवता ॥ एतासां कालानभिमानित्वेऽपि छत्रिन्यायेन काले इत्युक्तिः ॥ ज्ञ ॥ अग्निः ज्योतिः धूमः कालाभिमानिन्यो देवताः ॥ यद्वा अन्या एव देवताः ॥ छत्रिन्यायेन काले इत्युक्तिः ॥ वि अग्निरूपज्योतिर्देवता ॥ वैश्वानिदेवता ॥ अत एव 'अर्चिषमभिसंभवती'ति श्रुत्यनुगतिः ॥ २. ब्रह्मशब्देन उभयोर्ग्रहणं ॥ ३. छां ५. १०. १.

षट् मासाः यत्र वर्तते ॥ योगी तत्र प्रयातः सन् चंद्रमसः इदं चांद्रमसं ज्योतिः प्राप्य निवर्तते ॥२९॥

धूमाभिमानिदेवता रात्र्यभिमानिदेवता कृष्णपक्षाभिमानिदेवता दक्षिणायनरूपेमासषट्काभिमानिदेवता एताः यस्मिन्मार्गे वर्तते तस्मिन् मार्गे [1]गत्वा चंद्रलोके चंद्रज्योतिरनुभूय सुखं कंचित्कालमनुभूय निवर्तते कर्मयोगिनः ॥ [2]'ते धूममभिसंभवंति धूमाद्रात्रिं रात्रेरपरपक्षं अपरपक्षाद्यान् षड् दक्षिणैति मासां'निति श्रुतेः ॥ २५ ॥

अ ॥ येषां कस्मिंश्चित्स्थाने नित्यसुखानुभवो मोक्ष इति मतं तेषां तत्र गमनाय मार्गः कश्चित् स्यात् ॥ सच वक्तव्यः तत्साधने रुच्युत्पादनाय ॥ येषां प्रतिबंधकप्रकृतिबंधनाशे सद्य एव स्वस्थान एव एकीभावरूपो मोक्षः इति मतं तेषां गंतव्यस्थलाभावात् मार्गो न स्यात् ॥ अतो मार्गोपदेशस्तन्मते कथं युज्यते ॥ इति चेत् मुक्तिर्द्विविधा ॥ अक्रममुक्तिः क्रममुक्तिश्चेति ॥ ब्रह्मज्ञानाद्घनिवृत्तौ सद्यआकाशस्य महाकाशेनेव स्वस्य परब्रह्मणैकीभावः सद्योमुक्तिशब्दिता अक्रममुक्तिः ॥ सगुणब्रह्मोपासकानां क्रमेण तंतं लोकं प्राप्य तत्तद्भोगाननुभूय तद्भोगावसाने सम्यग्दर्शनशब्दितं ब्रह्मज्ञानं प्राप्य चतुर्मुखेन सह परब्रह्मणैकीभावः क्रममुक्तिः ॥ तत्र अक्रममुक्तिभाजां नांतिमस्मरणापेक्षा ॥ अविद्यानिवृत्त्या अन्यस्मरणप्रसंगाभावात् ॥ नच पुनरावृत्तिः ॥ अविद्यायाः निवृत्तत्वात् ॥ हेत्वंतरस्य चाभावात् ॥ नापि मार्गोपयोगः ॥ स्वस्थान एव मुक्तिप्राप्तेः ॥ क्रममुक्तिभाजां तु अस्ति अंतिमस्मरणापेक्षा ॥ तत्तल्लोकभोगानुभवात्प्रागनुत्पन्नसम्यग्ज्ञानत्वेन तेषामन्यस्मरणप्रसक्तेः सत्वात् ॥ ब्रह्मलोकपर्यंतं गमनाय मार्गापेक्षाऽपि तेषां ॥ अक्रममुक्तिभाजामिव तेषामपि न पुनरावृत्तिः ॥ मुक्तिप्रकारभेदेऽपि मुक्तेस्तुल्यत्वात् ॥ यद्येवं तर्हि 'आब्रह्मभुवनाल्लोकाः' इति ब्रह्मलोकं गतानां पुनरावृत्त्युक्तिरयुक्ता स्यादिति चेत् न तत्रनिवृत्तिकर्मसहिताभिर्दहरविद्याद्युपासनाभिः क्रममुक्तिहेतुभूताभिर्ब्रह्मलोकं प्राप्तानां पुनरावृत्त्युक्तिः ॥ किंतु काम्यकर्मसहिताभिः पंचाग्निविद्याद्युपासनाभिः कर्मफलानुभवाय ब्रह्मलोकं प्राप्तानां ॥ एतदभिप्रायेणैव 'योगी प्राप्य निवर्तते

---

१. प्रयाता इति पदस्याध्याहृतस्य प्रयात इति विपरिणामः ॥ २. छां. ५. १०. ३.

इत्युक्तिः ॥ ब्रह्मविदः सगुणब्रह्मोपासकाः ब्रह्म चतुर्मुखाख्यं गच्छंति ॥ तत्र स्थित्वा ब्रह्मविदः ब्रह्मज्ञानिनस्संतः ब्रह्म परं ब्रह्म प्राप्नुवंतीत्यर्थः ॥ चांद्रमसं ज्योतिः प्राप्ये त्युपलक्षणं ॥ ब्रह्मलोकं प्राप्येत्यपि बोध्यं ॥ अकाम्यकर्मणा क्रममुक्तानां ज्ञानेन सद्योमुक्तानां च न पुनरावृत्तिः ॥ काम्यकर्मणा ब्रह्मलोकपर्यंतं गतानां तद्भोगानंतरं पुनरावृत्तिः ॥ निषिद्धकर्मणा नरकान् प्राप्तानां तद्भोगानंतरं पुनरावृत्तिः ॥ क्षुद्रकर्मणातु न स्वर्गादिः नापि नरकः अपितु पुनःपुनर्जन्मेति विवेकः ॥ २४ ॥ २५ ॥

वि ॥ कैवल्यं मोक्षं च प्राप्स्यतां साधारणोऽयमर्चिरादिमार्गः ॥ अनेन मार्गेण गत्वा कैवल्यं मोक्षं च प्राप्तानां न पुनरावृत्तिः ॥ कैवल्यानुभवस्थानं सत्यलोकात्परं मुक्तिस्थानादवांचानं ॥ यद्यपि कैवल्ये मोक्षे च प्रकृतिबंधरहितशुद्धात्मानुभवोऽस्ति ॥ तथाऽपि मोक्षे प्राधान्येन परमात्मानुभवः ॥ कैवल्ये तु प्राधान्येनाऽऽत्मानुभव इति भेदः ॥ कैवल्यार्थिनः परमात्मशरीरभूततया परमात्मोपसर्जनकस्वात्मोपसकाः ॥ मोक्षार्थिनस्तु स्वात्मशरीरकतया स्वात्मोपसर्जनकपरमात्मोपासकाः ॥ मोक्षार्थिनां ज्ञानिनां मोक्षे स्वविशिष्टो भगवान् भोग्यः ॥ कैवल्यार्थिनां कैवल्ये स्वात्मस्वरूपमेव भोग्यं ॥ ततो मोक्षफलकोपासनाभिरंततो मोक्षे ब्रह्मानुभवः ॥ ऐश्वर्यार्थिनां पुनरावृत्तिमतां धूमादिमार्गः ॥ ब्रह्मविदः ब्रह्मतुल्यशुद्धात्मोपासकाः ब्रह्म शुद्धात्मानं गच्छंति ॥ ब्रह्मविदः परब्रह्मोपासकाः ब्रह्म परब्रह्म गच्छंति ॥ योगी ऐश्वर्यफलकप्रवृत्तिकर्मयोगवान् इत्यर्थः ॥ २४ ॥ २५ ॥

उत्तरायणे मृताः ब्रह्म प्राप्नुवंति ॥ दक्षिणायने मृताः स्वर्गं प्राप्नुवंति इत्यर्थः प्रतीयते ॥ 'दक्षिणे मरणाद्याति स्वर्गं ब्रह्मोत्तरायणे' ॥ इत्युक्तेः ॥ अत एव प्रतीक्षितवान् उत्तरायणं भगवान् भीष्मः ॥ इति भाति ॥ न तथा ॥ अत्र उत्तरायणदक्षिणायनदेवताधिष्ठितमार्गगतेर्विवक्षितत्वात् ॥ 'दक्षिणे मरणा'दिति वचनस्य न यथाश्रुतोऽर्थः ॥ ज्ञानिनां दक्षिणायने मरणसंभवात् ॥ नच तेन ते स्वर्गं प्राप्नुवंतीति युक्तं ॥ अज्ञानामुत्तरायणे मरणसंभवात् ॥ नच तेन ते ब्रह्म प्राप्नुवंतीति युक्तं ॥ किंतु कर्मणा स्वर्गः ज्ञानेन मोक्षः इत्येव स्थितिः ॥ देहसंबद्धदक्षिणायनसूर्यरश्मिभिरुत्क्रमणात्स्वर्गं याति ॥ तादृशोत्तरायणसूर्यरश्मिभिरुत्क्रमणात् ब्रह्म याति इति वचनार्थः ॥ अतो दक्षिणायनोत्तरायणशब्दयोस्तत्सूर्यरश्मि-

परत्वात् ज्ञानिनां दक्षिणायनेऽपि मरणं युज्यते ॥ सूत्रं च तथा १ ॥ 'रश्म्यनुसारी' इति ॥ १ 'अतश्चायनेऽपि हि दक्षिणे ॥ इति च ॥ ३ 'शतं पंचैव सूर्यस्य दक्षिणायनरश्मयः ॥ तावंत एव निर्दिष्टा उत्तरायणरश्मयः ॥ ते सर्वे देहसंबन्धास्सर्वदा सर्वदेहिनां ॥ उत्तरं दक्षिणमिति त एव तु निगद्यते' ॥ इति स्मृतिश्च ॥ उत्तरायणस्य शुक्लपक्षस्य अह्नश्च प्राशस्त्याद्भीष्मस्योत्तरयाणमरणप्रतीक्षा ॥ दक्षिणायनकृष्णपक्षरात्रिमरणेषु प्रायश्चित्तकरणमप्यप्राशस्त्याभिप्रायकं ॥ अतो युक्तं सर्वमुक्तम् ॥ २४ ॥ २५ ॥

अर्जुनः ॥ न केवलमकाम्यं कर्म कुर्वतो मोक्षरूपमतिशयितं फलं॥किंतु प्रकाशभूयिष्ठो नितरांसुखप्रदो मार्गोऽपि ॥ अतो गंतव्यस्य मार्गस्य तत्र गत्वा प्राप्यस्य च उत्तमत्वात्कर्तव्यमेवाकाम्यं नियतं कर्मेति मम रुच्युत्पादनाय किमिमौ मार्गौ त्वयैवोच्येते ॥ उत श्रुतिपुराणादिषु प्रसिद्धावनादी इमौ ॥

कृष्णः ॥ शुक्लकृष्णे गती ह्येते जगतश्शाश्वते मते ॥
एकया यात्यनावृत्तिं अन्ययाऽऽवर्तते पुनः ॥ २६ ॥

शुक्लेति ॥ शुक्ला च कृष्णा च शुक्लकृष्णे एते गती मार्गौ जगतः शाश्वते मते ॥ हि प्रसिद्धं ॥ एकया गत्या प्रयातः अनावृत्तिं याति ॥ अन्यया गत्या प्रयातः पुनः आवर्तते ॥२६॥

सर्वस्मिन् जगति विद्यमानानां ज्ञानिनां कर्मिणां च एतौ प्रकाशाप्रकाशभूयिष्ठत्वात् ज्ञानकर्मप्राप्यत्वाच्च शुक्लकृष्णशब्दितौ गतिशब्दितौ मार्गौ प्रवाहतोऽनादी श्रुतिपुराणादिषु प्रसिद्धौ सर्वस्य जगतः संमतौ न केवलं मम ॥ अनयोः प्रथमया शुक्लया ४ प्रयातोऽनावृत्तिं याति ॥ द्वितीयया कृष्णया प्रयातः पुनरावर्तते ॥ एते आवृत्त्यनावृत्ती सर्वस्य जगतः संमते श्रुत्यादिषु प्रसिद्धे ॥ निवृत्तिकर्मणा ज्ञानयोगं प्राप्य शुक्लया गत्या गच्छन् तत्र स्थिताभिर्देवताभिराराध्यमानो ब्रह्म प्राप्नोति ॥ नच निवर्तते ॥ अतः कर्तव्यमकाम्यं कर्म ॥ २६ ॥

१. ४. २. १८. २. ४. २. २१. ३. नारायणाध्यात्मे ॥ ४. 'प्रयाता' इति पदं विपरिणामेनानुवर्तते ॥

अर्जुनः ॥ स्तांनाम मार्गावितौ श्रुत्यादिषु प्रसिद्धौ किमर्थं तौ मह्यमुपदिशसि॥ किं भविष्यति मम तद्ज्ञानेन ॥

कृष्णः ॥ नैते सृती पार्थ जानन् योगी मुह्यति कश्चन ॥
तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन ॥ २७ ॥

नेति ॥ हे पार्थ एते सृती एतौ मार्गौ जानन् कश्चन कोपि योगी न मुह्यति॥ हे अर्जुन तस्मात् सर्वेषु कालेषु योगेन युक्तः योगयुक्तः भव ॥ २७ ॥

कर्मयोगादिषु प्रवृत्तः यदि सुखासुखदाविमौ मार्गौ जानाति तर्हि सः संशय-विपर्ययादिरहितो निवृत्तिकर्मैव कर्तव्यमिति कृतनिश्चयस्तत्रैव प्रवर्तेत ॥ न काम्य-कर्मादौ ॥ अत इमौ तुभ्यमुपदिष्टौ ॥ अतः तत्तदनुष्ठानसमयेषु उक्तगतिद्वय[1]स्मर-णवान् भव ॥ तेन च शुक्लगतिप्राप्तिहेतुभूतनिवृत्तिकर्मतत्साध्यज्ञानरूपोपायवान् भव ॥ तेन च तव पुनरावृत्तिरहितं मोक्षरूपमतिशयितं फलं नियतं भविष्यति ॥ [2]स्वतो वंशतश्च शुद्धस्य तव सेत्स्यत्यर्चिरादिमार्गस्तदुपायश्च ॥ नात्र संशयः॥२७॥

संजयः ॥ श्रद्धावानप्यर्जुनः किमेतावताऽपि नावसित उपदेशः ॥ अलमे-तावता ॥ इत्यमन्यत मनसि जामितां प्राप्तः ॥ सद्य एव सर्वसाक्षी हृषीकेशो भगवान् विदित्वा तत् भूयः शुश्रूषोत्पादनाय गीताश्रवणवेदनादिफलमाह ॥

कृष्णः ॥ वेदेषु यज्ञेषु तपस्सु चैव दानेषु यत्पुण्यफलं प्रदिष्टं ॥
अत्येति तत्सर्वमिदं विदित्वा योगी परं स्थानमुपैति चाद्यं ॥२८॥

वेदेष्विति ॥ वेदेषु यज्ञेषु तपस्सु दानेषु चैव यत् पुण्यरूपं च तत् फलं च पुण्यफलं प्रदिष्टं उपदिष्टं ॥ इदं विदित्वा तत् सर्वं अत्येति ॥ योगी सन् परं आद्यं स्थानं च उपैति ॥ ८ ॥

वेदेषु यज्ञेषु तपस्सु दानेषु च प्रत्येकं तत्रतत्र 'य एवं वेद' 'यो यजते' 'यस्तप्यते' 'यो ददाती'त्येवं यद्यत्फलं व्यष्ट्या उपदिष्टं ॥ एवं सर्वेषु वेदेषु

१. योगीत्यस्य गीतस्मरणवान् कर्मज्ञानयोगवानित्यर्थः ॥ २. संबोधनद्वयतात्पर्यमिदं ॥

तन्मूलकपुराणादिषु च अधीतेषु विचारितेषु अर्थतो ज्ञातेषु सर्वेषु यज्ञेषु वाजपेयादिषु कृतेषु सर्वेषु तपस्सु तप्तेषु सर्वेषु दानेषु दत्तेषु च यत्फलं समष्टया उपदिष्टं तत्रतत्र ॥ इदं गीताशास्त्रं विदित्वा उक्त्वा श्रुत्वा वा तत्सर्वं फलमतिक्रामति ॥ ततोऽप्यतिशयितं फलं प्राप्नोति ॥ न केवलं तावन्मात्रं ॥ किंतु गीताश्रवणादिना लब्धविवेकः निवृत्तिकर्मयोगादिमान् सन् परमं आद्यं मोक्षस्थानं प्राप्नोति ॥ तिष्ठत्यस्मिन्नशेषमिति व्युत्पत्त्या स्थानशब्दितं १ सर्वजगदाधारभूतं ब्रह्म प्राप्नोति ॥ तादृशमहाफलकमिदं गीताशास्त्रं ॥ अयं ते परमो लाभः ॥ स्यादनेन निरवधिकमिहामुत्र च परमं मङ्गलम् ॥ २८ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
कृष्णार्जुनसंवादे अक्षरब्रह्मयोगो नाम अष्टमोऽध्यायः ॥ ८ ॥

इतीत्यादि पूर्ववत् ॥ अक्षरब्रह्मणः प्रतिपाद्यतया योगः यस्मिन् सः अक्षरब्रह्मयोगः इति नाम प्रसिद्धः अष्टमोऽध्यायः इति संपूर्णः ॥

इति श्रीमद्भगवद्गीतोपन्यासदर्पणे लक्ष्मणाचार्यविरचिते अक्षरब्रह्मयोगाध्यायार्थ
प्रदर्शकः अष्टमः प्रतिबिंबः ॥

———

श्रीगुरुभ्यो नमः ॥

अथ नवमोऽध्यायः

अर्जुनः ॥ यदि गीताश्रवणादिकमीदृशमहाफलकं स्यात् हंत तर्हि गीतायामितोऽन्यत् किमप्यस्ति चेत् ब्रूहि तन्मे केशव ॥ उक्तगीतामाहात्म्यश्रवणेन समुपजातसादरशुश्रुषातिशयोऽहमस्मि ॥

कृष्णः ॥ इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ॥
ज्ञानं विज्ञानसहितं यद्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ १ ॥

इदमिति ॥ यत् ज्ञात्वा अशुभात् मोक्ष्यसे तत् अतिशयेन गुह्यं गुह्यतमं इदं तु न असूयुः अनसूयुः तस्मै अनसूयवे ते तुभ्यं प्रवक्ष्यामि ॥ १ ॥

चेत्तव शुश्रूषा तर्हि प्रियतमाय ते सम्यक् वक्ष्यामि ॥ शृणुसादरं॥ यद्वक्ष्यामि तदितोऽपि विशेषवत् परमं रहस्यं ॥ १ विशेषमाहात्म्यसहितं सामान्यमाहात्म्यमहं वक्ष्यामि ॥ इदं ज्ञात्वा ज्ञानद्वारा मोक्षप्रतिबंधक२शुभाशुभोभयबंधमोक्षो भवेत् उक्तं च मया ॥ ३'बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ॥' इति ॥ वक्ष्यते च ॥ ४'शुभाशुभफलैरेवं मोक्ष्यसे कर्मबंधनैः' ॥ इति ॥ किमहमितोऽपि वरीयसो गीतार्थस्य श्रवणमर्हामि ॥ किं मां तथाविधं मन्यते भवान् इति चेत् शृणु ॥ नेदानीं आकांक्षणीयसकलशुभगुणगणपूर्णोऽसि ॥ श्रुत्वेमां गीतां अनुष्ठाय च एतदुक्तं विहितं कर्म तेन प्रतिपद्य चित्तशुद्धिं तया च लब्ध्वा ज्ञानयोगं तन्महिम्ना खलु तादृशो भविष्यसि ॥ किंतु सर्वथा वर्जनीयस्य महत एकस्य दोषस्य वर्जनात्

१. १. अ ॥ अपरोक्षज्ञानसहितं परोक्षज्ञानं ॥ वि ॥ उपासनास्थभक्तिरूपं ज्ञानं तद्गतविशेषज्ञानं विज्ञानं ॥ २. शुभात् अशुभात् इति च्छेदः ॥ ३. २. ५०. ४. ९. २८.

तत्वोपदेशयोग्यतामभ्युपगम्य तत्वमुपदेष्टुमारब्धवानहं ॥ सच गुणेषु दोषारोपरूपोऽसूयाख्यो दोषः ॥ सच सर्वगुणनाशकत्वात् सर्वथा वर्जनीयः ॥ उक्तं च ॥ 'असूयैका गुणान् हंति सर्वेषामशुभा शुभान् ॥ स्याद्वपुस्सुंदरमपि श्वित्रेणैकेन दुर्भगं' इति ॥ त्वयेव सर्वैरयं दोषः सर्वथा त्याज्यः ॥ नचेदनर्थकं स्यात् गीताश्रवणादिकं तेषामिति मे मतिः ॥ १ ॥

अर्जुनः ॥ अहो वक्ष्यमाणस्य ज्ञानस्य माहात्म्यमन्यादृशं भाति ॥ तत्पुनः कीदृशम् ॥

कृष्णः ॥ राजविद्या राजगुह्यं पवित्रमिदमुत्तमं ॥
प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययं ॥ २ ॥

राजेति ॥ इदं विद्यानां राजा राजविद्या गुह्यानां राजा राजगुह्यं पवित्रं उत्तमं प्रत्यक्षस्य भगवतः अवगमः येन, प्रत्यक्षेण अवगमः यस्य, प्रत्यक्षः अवगम्यते इति अवगमः ज्ञेयः भगवान् येन वा प्रत्यक्षावगमं धर्मादनपेतं धर्म्यं न विद्यते व्ययो यस्य तत् अव्ययं कर्तुं सु अत्यंतं सुखं सुकरं ॥ २ ॥

इदं वक्ष्यमाणं परोक्षज्ञानं १ विद्यानां राजा विद्यासु राजेव प्रधानं ॥ गुह्यानां राजा गुह्येषु राजेव प्रधानं ॥ २ विद्येयं राज्ञी ॥ गुह्यमिदं राजभूतं ॥ ३ विस्तीर्णागाधमनसां गोपनीयगोपनकुशलानां राज्ञां तत्तुल्यानां च विद्येयं ॥ इदं पापविवर्तकं ॥ पापपरिहारकप्रायश्चित्तकोटितोप्युत्तमं ४ प्रतींद्रियं नियामकतयाऽवस्थितस्य परमात्मनः साक्षात्कारोऽनेन जायते ॥ इदं ज्ञानं केन प्रमाणेन ज्ञायत इति चेत् ५ मानसप्रत्यक्षाख्यसाक्षिप्रत्यक्षेण ज्ञानमिदं, अहं सुखी अहं दुःखीति सुखादिकमिव ज्ञायते अहं ज्ञानीति ॥ ६ फलं चास्य साक्षिप्रत्यक्षेण ज्ञायतेऽज्ञाननि-

१. विद्यानां राजा गुह्यानां राजा ॥ २. राज्ञी च सा विद्या च ॥ राजभूतं गुह्यं ॥ ३. राज्ञां विद्या राज्ञां गुह्यं ॥ ४. द्वे ॥ अवगम्यतेऽनेनेत्यवगमं प्रत्यक्षस्य हरेरवगमं ॥ वि ॥ प्रत्यक्षः अवगम्यते इत्यवगमो विषयः स परमात्मा येन तत् ॥ अ ॥ ५. प्रत्यक्षेणावगमो यस्य, प्रत्यक्षं अवगम्यतेऽनेनेत्यवगमो मानं यस्य वा तत् ॥ ६. 'प्रत्यक्षः अवगम्यत इत्यवगमः फलं यस्य तत्॥

वृत्त्यादिकं ममाज्ञानं नष्टमनेन ज्ञानेनेति ॥ इदं धर्मादनपेतं अयमेव परमो धर्मः धर्मशब्दवाच्यस्य परमात्मनोऽत्यंतप्रियं तद्विषयं ॥ महाफलस्य मोक्षस्य नित्यत्वात् फलतो नाशरहितं ॥ एतादृशमिदं कथं मया प्राप्तुं शक्यमिति मा व्यथिष्ठाः ॥ संपादयितुं सुलभं ॥ गुरूपदेशेन सुप्रापं ॥ उक्तं च १'उपदेक्ष्यंति ते ज्ञानं ज्ञानिन' इति ॥ एतादृशमिदं ॥ अतः श्रद्धया शृणु ॥ २ ॥

अर्जुनः ॥ यदि भगवद्विषयं ज्ञानमीदृशमहामहिमोपेतं महाफलकं सुकरं च स्यात् तर्हि सर्वेऽपि तत्र प्रवृत्य तदवाप्य तेन मुच्येरन् ॥ न कोऽपि संसरेत् ॥ दृश्यंते च प्रायः संसारिण एव लोके ॥ परमसुकरेऽपि ईदृशे ज्ञाने यदि श्रद्धावंतो न स्युः तर्हि किमनिष्टं तेन तेषां स्यात् ॥

कृष्णः ॥ अश्रद्दधानाः पुरुषाः धर्मस्यास्य परन्तप ॥
अप्राप्य मां निवर्तंते मृत्युसंसारवर्त्मनि ॥ ३ ॥

अश्रद्दधाना इति ॥ परान् तपतीति परन्तपः हे परन्तप अर्जुन धर्मादनपेतं धर्म्यं तस्य अस्य ज्ञानस्य विषये अश्रद्दधानाः श्रद्धां अकुर्वंतः पुरुषाः मां अप्राप्य मृत्युयुक्तः मृत्युरूपो वा संसारः मृत्युसंसारः तस्य वर्त्मनि मार्गे निवर्तंते ॥ ३ ॥

२ धर्मशब्दवाच्यभगवद्विषयस्य ३ निरपायस्थितिहेतुतया धर्मशब्दितस्य अस्य ज्ञानस्य विषये श्रद्धारहिता ये जनाः ते न मां प्राप्नुवंति ॥ न मोक्षस्तेषां ॥ मृत्युरूपे मृत्युयुक्ते च संसारमार्गे नितरां निश्चयेन वर्तंते ॥ पुनःपुनः संसारचक्रे परिभ्रमंति ॥ ज्ञानमार्गे श्रद्धाराहित्यात्संसारिणो दृश्यंते ॥ यदि नास्मिन्मार्गे श्रद्धा स्यात् तर्हि तेन तेषां संसारचक्रे परिभ्रमणं स्यात् ॥ अतोऽत्र श्रद्धा कार्या ॥ ३ ॥

अर्जुनः ॥ एवमर्थानर्थयोः श्रवणात् श्रद्धातिशयवानहमस्मि संवृत्तः ॥ अतो यद्वक्तव्यं तत्प्रब्रूहि ॥

सं ॥ एवमर्जुनस्य श्रद्धातिशयमुत्पाद्य सप्तमादौ सृष्टिसंहारादिकर्तृत्वमिव नवमादावत्र सर्वत्र यावन्मित्त्वरूपं माहात्म्यमाह भगवान् ॥

१. ४. ३४. २. धर्म्यस्येति पाठे इदं ॥ ३. धर्मस्येति पाठे इदं ॥ धियते अनेनेति धर्मः ॥

कृष्णः ॥ मया ततमिदं सर्वं जगदव्यक्तमूर्तिना ॥
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ॥ ४ ॥

मयेति ॥ न व्यक्ता अव्यक्ता मूर्तिः शरीरं यस्य सः अव्यक्तमूर्तिः तेन अव्यक्तमूर्तिना मया सर्वं इदं जगत् ततं व्याप्तं ॥ सर्वाणि च तानि भूतानि च सर्वभूतानि मयि तिष्ठंतीति मत्स्थानि ॥ अहं तेषु न च नैव अवस्थितः ॥ ४ ॥

सर्वमिदं चेतनाचेतनात्मकं जगत् अंतर्बहिश्च व्याप्य स्थितोऽहं ॥ १ 'अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः' ॥ इति श्रुतिः ॥ यदि सर्वत्र स्थितः स्याः तर्हि कुतः क्वापि न दृश्यसे इति चेत् २ 'मोहितं नाभिजानाति मां' ॥ ३ 'योगमायासमावृत' इत्युक्तरीत्या विचित्रशक्त्या स्वरूपं निगूह्य तिरोहितोऽहं तत्रतत्र तत्तद्व्याप्य वर्ते ॥ किं तत्तत्स्वरूपसत्ताप्रवृत्त्यर्थं तत्रतत्र तिरोहितास्तिष्ठन्ति॥ उत त्वत्स्वरूपसत्ताप्रवृत्त्यर्थमिति चेत् सर्वाणि भूतानि ४ मत्स्थानि मदायत्तस्थितिप्रवृत्तीनि ॥ यथा चोलनृपे नेपालनृपे तिष्ठामि इत्युक्ते तदायत्तस्थितिप्रवृत्तिरहं तेन पोष्यमाणो वर्ते इति प्रतीयते तथा ॥ न चाहं तेषु अवस्थितः नैवाहं तदायत्तस्थितिप्रवृत्तिः ॥ स्वतंत्रत्वात् ॥ महानयं मे महिमा ॥ ४ ॥

अर्जुनः ॥ यदि भूतानि त्वयि स्थितानि स्युः तर्हि वह्निजलौष्ण्यशैत्याभ्यां भूतलस्यौष्ण्यशैत्यवत् भूतलौष्ण्यशैत्याभ्यां तन्निहितवस्त्वादेरौष्ण्यशैत्यवत् अन्योन्यधर्मसंक्रमणं स्यात् ॥ ततश्च तत्तद्दोषलेपस्तव स्यात् ॥ महते उत्कर्षाय आधारतामुररीकृत्य आधेयस्य जगतो दोषै र्लिप्यसे ॥ क्लिश्यति हि लोके स्वमहिमप्रदर्शनाय विविधकार्यभरं वहन् शिरसि जनः ॥ वद ॥

कृष्णः ॥ न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम् ॥
भूतभृन्न च भूतस्थो ममाऽऽत्मा भूतभावनः ॥ ५ ॥

१. ना. १३. २. ७. १३. ३. ७. २५. ४. अ ॥ शुक्त्यादिष्विव रजतादीनि कल्पितानि मिथ्याभूतानि अधिष्ठानभूते मयि स्थितानि ॥ ५. अ ॥ रजतादिष्विव शुक्त्यादीनि नाहमारोपितेषु भूतेषु स्थितः ॥

नचेति ॥ भूतानि मत्स्थानि नच नैव ॥ ईश्वरस्य अयं एश्वरः तं मे योगं सामर्थ्यं पश्य ॥ मम आत्मा भूतानि बिभर्ति इति भूतभृत् ॥ भूतेषु तिष्ठतीति भूतस्थः नच ॥ भूतानि भावयतीति भूतभावनः ॥ ९ ॥

भूतलघटजलादीनामिव न मम भूतानां चाऽऽधाराधेयभावः ॥ किंतु असंगत्वान्मम असंश्लेषेणैव भूतानि मत्स्थानि ॥ तानि चाहं असंश्लेषेणैव धारयामि ॥ परस्परमसंश्लिष्टानां कथमाधाराधेयभाव इति चेत् मदीयं परमात्मासाधारणं ईश्वरत्वप्रदर्शकं सामर्थ्यं पश्य ॥ किं तत् इति चेत् ममाऽऽत्मा १ देहः २ स्वरूपं वा ३ संकल्पो वा असंश्लेषेणैव भूतानि बिभर्त्ति धारयति पोषयति ॥ तथा भूतानि सृजति ॥ नियमयति सर्वमिदं तत्स्वरूपसत्ताप्रवृत्त्यर्थं ॥ नतु मदर्थं ॥ ४असंश्लेषेण धारणं उत्पादनपोषणनियमनादिकं मदसाधारणसामर्थ्यहेतुकं जानीहि ॥ अतो न मम दोषलेपः ॥ नापि क्लेशः ॥ यद्यपि स्थितिकर्तृत्वं ५'मयि सर्वमिदं प्रोत'मित्युक्तं ॥ तथाऽपि तत्र तत्केवलं ॥ अत्र तु उक्तविशेषविशेषितमिति भेदः ॥ ५ ॥

अर्जुनः ॥ तवभूतानां चाधाराधेयभावोऽसंश्लेषेणैवेत्युक्तं ॥ तत्कथं लोके संश्लिष्टयोर्हि वस्तुनोराधाराधेयभावो दृश्यते॥ यद्यसंश्लेषेणाधाराधेयभावे दृष्टांतः प्रदर्श्येत तर्हि तमिममाधाराधेयभावमहं श्रद्दध्याम् ॥

कृष्णः ॥ यथाऽऽकाशस्थितो नित्यं वायुस्सर्वत्रगो महान् ॥
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ॥ ६ ॥

यथेति ॥ सर्वत्र गच्छतीति सर्वत्रगः महान् वायुः यथा नित्यं आकाशे स्थितः आकाशस्थितः ॥ तथा सर्वाणि भूतानि मयि तिष्ठंतीति मत्स्थानि इति उपधारय ॥ ६ ॥

१. द्वै ॥ २. अ ॥ वक्तुरात्मन आत्मांतराभावाल्लोकव्यवहारानुकारोऽयं ॥ राहोः शिर इतिवदभेदे षष्ठी ॥ आत्मभूतोऽहमित्यर्थ इत्यन्य ॥ ३. वि ॥ ४ ॥ 'पश्य मे योगमैश्वर'मित्यस्य योजनांतरमिदं ॥ ५. ७. ७.

सदा सर्वत्र गमनस्वभाववान् सदागतिशब्दितो महान् वायुः अवकाशरूपे १ आकाशे तिष्ठति ॥ अवकाशं विना स्थित्यसंभवात् ॥ स चाऽऽधाराधेयभावोऽसंश्लेषेणैव ॥ तथा सर्वाणि भूतानि मयि तिष्ठंति ॥ आकाशवाय्वोरिव मम भूतानां चासंश्लेषेणैवाऽऽधाराधेयभावो विद्यते ॥ अत एव नान्योन्यधर्मसंक्रांतिः ॥ दृष्टांतादस्मादुक्तं युक्तमित्यवधारय ॥ नित्यं स्थितः महान् २ आकाशः सर्वत्रगो महान् वायुश्च यथा असंश्लिष्टावेवाऽऽधाराधेयभावेन वर्तेते ॥ तथाऽहं भूतानि च विना संश्लेषमाधाराधेयभावेन वर्तामहे ॥ दृष्टांतमनुभवधारय ॥ सर्वेषु शरीरेषु संचरन् मुख्यवायुः ३ आकाश इव सर्वत्र स्थितः ॥ तथाऽपि आकाश इव नान्यधर्मसंक्रांतिमान् तथाऽहं सर्वेष्वाधारतया सूत्रमिव मणिषु स्थितो न तद्धर्मैर्लिप्तो भवामि ॥ ४ 'असंगो ह्ययं पुरुष' इति श्रुतिः ॥ अन्यधर्माऽलेपे दृष्टांतमनुभवधारय ॥ ५ 'मत्स्थानि सर्वभूतानी'ति सर्वभूतानां त्वदायत्तस्वरूपस्थितिप्रवृत्तिमत्त्व मुक्तं ॥ तत्कथं ॥ त्वंतु न दृश्यसे कुतस्त्वामनुपलभ्यमानमाश्रित्य वर्तते सर्वाणि भूतानीत्यभ्युपेयमिति चेत् सर्वत्रगो महान् वायुः नित्यं निरालंबे ६ आकाशे स्थितोऽनुभूयते ॥ नच निरालंबे वस्तुनि किमपि स्थातुमर्हति ॥ अतोऽन्यथाऽनुपपत्त्या वायुर्मामाकाशस्थितमाकाशशब्दितमाश्रित्य ७ मच्छासने वर्तते इत्यभ्युपेयं ॥ तया सर्वाणि भूतानि विविधविचित्रशक्तिं मामाश्रित्य मदायत्तस्वरूपस्थितिप्रवृत्तीनि वर्तते ॥ 'मेघोदयः सागरसंनिवृत्तिः इंदोर्विभागः स्फुरितानि वायोः ॥ विद्युद्विभंगो गतिरुष्णरश्मेः विष्णोर्विचित्राः प्रभवंति मायाः' ॥ इति ॥ ८ 'भीषाऽस्माद्वातः पवते ॥ भीषोदेति सूर्यः' ॥ इति 'एतस्य वा ९ अक्षरस्य प्रशासने गार्गि सूर्याचंद्रमसौ विधृतौ तिष्ठतः ॥ इति च श्रुतिः ॥ अतोऽसंश्लेषेणैवाऽऽधाराधेयभावान्नान्योन्यधर्मसंक्रांतिः ॥ अन्यथाऽनुपपत्त्या तत्तद्भूतस्वरूपस्थितिप्रवृत्तिनियामकत्वं चेत्युक्तं युक्तम् ॥ ६ ॥

१. आकाशे स्थितः आकाशस्थितः ॥ २. आकाशः स्थितः इति छेदः ॥ स्थितो नित्यं महान् इत्युभयोर्विशेषणं ॥ ३. द्वै ॥ आकाश इव स्थितः आकाशस्थितः ४. बृ. ६. ३. १५. ५. वि ॥ ६. आकाशे स्थितः आकाशस्थितः ॥ ७. आकाशशब्दिते परमात्मनि स्थितः आकाशस्थितः ॥ ८. तै २. ८. ९. बृ. ५. ८. १.

अर्जुनः ॥ सिद्धे सत्यारंभो नियमायेति न्यायः ॥ तेन पूर्वमुक्तस्य स्थिति-कर्तृत्वस्य पुनरुक्त्वा जगतोऽखिलस्य स्थितेरहमेव कर्ता मान्य इत्युक्तं भवति ॥ तेन च संहारकर्तृत्वमन्यस्याप्यस्तीति शंकोन्मिषति तां परिहर ॥

कृष्णः ॥ सर्वभूतानि कौन्तेय प्रकृतिं यांति मामिकां ॥
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥ ७ ॥

सर्वेति ॥ हे कौंतेय अर्जुन सर्वाणि च तानि भूतानि च सर्वभूतानि कल्पस्य क्षयः कल्पक्षयः तस्मिन् मम इयं मामिका तां प्रकृतिं यान्ति ॥ तानि कल्पस्य आदिः कल्पादिः तस्मिन् अहं वि विविधं सृजामि ॥ ७ ॥

चतुर्मुखस्य यदहः स कल्पः तदवसाने सर्वाणि भूतानि स्वस्वकारणद्वारा प्रकृतिं यांति प्रकृतौ लीयंते ॥ तर्हि संहारकर्तृत्वं तव कथमिति चेत् ॥ यां प्रकृतिं यांति सा प्रकृतिः मद्वशा ॥ उक्तं च मया ॥ १'मे भिन्ना प्रकृतिरष्टधे'ति ॥ प्रकृतावहं प्रविलापयामि ॥ प्रकृतिर्लयाधिकरणं अहं तत्कर्ता ॥ परस्य कल्पस्यादौ तानि भूतानि पुनरहं विविधं सृजामि ॥ चतुर्मुखस्य यदायुर्वर्षशतपरिमितं परशब्दितं स कल्पः ॥ तदवसाने चतुर्मुखादेरखिलस्य लोकस्य प्रकृतौ लयः ॥ कल्पांतरारंभे २तानि तत्सजातीयानि च भूतानि यथासंभवं पुनरहं सृजामि ॥७॥

अर्जुनः ॥ 'मामिकां प्रकृतिं यांती'ति लये प्रकृतेरुपयोग उक्तः ॥ न तथा सृष्टौ ॥ अहंसृजामीत्युक्तं ॥ यद्येवं तर्हि सृष्टेः सृष्टानां च प्राकृतत्वं कथं ॥ ३'प्रकृतिं स्वामवष्टभ्ये'तिसप्तमे सृष्टौ प्रकृतेरुपयोगोक्तिश्च विरुध्येत ॥ तत्कथम् ॥

कृष्णः ॥ प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः ॥
भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥ ८ ॥

प्रकृतमिति ॥ न वशः अवशः तं इमं कृत्स्नं सर्वं भूतानां ग्रामः भूतग्रामः तं प्रकृतेः वशात् स्वां प्रकृतिं अवष्टभ्य आश्रित्य पुनः पुनः विसृजामि ॥ ८ ॥

१. ७. ४. २. तानि तत्सजातीयानि च ॥ मुष्टिपरिमितं व्रीहिं प्रदर्श्य अस्मात्तंडुलभावः क्रमोऽपि व्रीहिरयमेवेति साजात्यादभेदं व्यपदिशंति हि लोके ॥ ३. ७, ६.

न तथा किंतु स्ववशां प्रकृतिं १ वशीकृत्य 'भूमिरापोऽनलो वायु 'रित्युक्तरीत्या २ अष्टधा परिणमय्य३ तामुपादनीकृत्य जननमरणवत्तयाऽनुभूयमानं सकलमपि भूदसमुदायं पुनःपुनः विविधं सृजामि ॥ उक्तं च मया ॥ ४ 'भूत्वा भूत्वा प्रलीयते '॥ इति ॥ किं सृज्यमानास्तथासर्जनमनुमन्येरन् इति चेत् तेतु न स्वतंत्राः ॥ अपितु प्रकृतेरधीनाः ॥ प्रकृतिप्राकृतसकलप्रेरकस्य अशब्दवाच्यस्य परमात्मनो वश्याः ॥ तस्मात्तानहं विविधं सृजामि ॥ प्रकृतिः सृष्टेः करणं ॥ अहं तु कर्ता ॥ इदमेवोक्तं मया॥ 'एतद्योनीनि भूतानि '॥ ५ 'अहं कृत्स्नस्य जगतः प्रभव ' इति॥ प्रकृत्या सृष्टिः प्रकृतौ लयः ॥ उक्तं चेदं मया॥ ६ ' अव्यक्तादीनि भूतानि ' ' अव्यक्तनिधनान्येवे'ति ॥ अतो न कोऽपि विरोधः ॥ सप्तमोक्तस्य सृष्टिसंहारकर्तृत्वस्य पुनरत्रोक्त्या ममैव तत्कर्तृत्वं नान्यस्य॥ प्रकृतिस्तु करणं ॥ इतीदं तत्वं सम्यगवधारय ॥ ७ कस्मादिदमेवं निश्चितव्यमिति चेत् कौंतेयस्त्वं ॥ न च कुन्तीशरीरात्तवोत्पत्तिस्त्वयोपलब्धा ॥ तथाऽप्याप्तवाक्यात् त्वया यथा निश्चिता तथा मत्तो जगतो जन्मलयौ मम वाक्यान्निश्चेतव्यौ ॥ यद्यपि ८ 'प्रभवः प्रलयस्तथे'ति सृष्टिसंहारकर्तृत्वमुक्तं ॥ तथाऽपि तत्र तत्केवलं ॥ अत्रतु उक्तानेकविशेषविशेषितमिति भेदः ॥ ८॥

अर्जुन ॥ यदि सर्वस्यापि जगतः सृष्टिसंहारादिकर्ता त्वमेवं स्याः कुतस्तर्हि विविधं विषमं सृजसि रक्षसि संहरसि ॥ तथासर्जनादिना विषमोऽसि ॥ यदि घृणाशब्दिता कृपा तव स्यात् तर्हि तथा न कुर्याः ॥ कुर्याश्च तथा ॥ अतो निर्घृणस्त्वं ॥ तादृशस्य तव तेन कर्मणा पुण्यपापलेपश्च स्यात् ॥

कृष्णः ॥ न च मां तानि कर्माणि निबध्नंति धनंजय ॥
उदासीनवदासीनं असक्तं तेषु कर्मसु ॥ ९ ॥

नचेति ॥ हे धनंजय अर्जुन तानि कर्माणि उदासीनेन तुल्यं उदासीनवत् आसीनं तेषु कर्मसु न सक्तः असक्तः तं मां न च निबध्नन्ति ॥ ९ ॥

१. अ ॥ अवष्टभ्य वशीकृत्य ॥ २. वि ॥ अष्टधा विपरिणमय्य ॥ ३. द्वै ॥ उपादानीकृत्य ॥ ४, ८. १९. ५. ७, ६. ६. २, २८. ७. वि॥ ८. ७. ६.

१प्रकृतेर्वशात् तथा जातानि तानि विषमसृष्ट्यादीनि कर्माणि मां नैव निबध्नंति वैषम्यनैर्घृण्यवंतमाधाय तेन पुण्यपापाभ्यां न लिंपंति ॥ उक्तं च मया ॥ २'न मां कर्माणि लिंपंती'ति ॥ कुत इति चेत् तेषु कर्मसु उदासीनवदहं वर्ते ॥ यः प्रेक्षकः द्वयोर्विवदमानयोरन्यतरस्य जयं पराजयं वाऽनाकांक्षमाणः तत्कृतहर्षविषादाभ्यामसंसृष्टः स उदासीनः ॥ तेषु कर्मसु फलासंगेन अहंकारममकाराभ्यां च विरहितोऽहं ॥ यः फलेच्छया अहंतया ममतया च युक्त कर्म करोति तं हि तत्कर्म निबध्नीयात् ॥ नाहं तथा तानि करोमि ॥ अतो न तानि मां निबध्नंति ॥ उक्तं च मया ॥ 'न मे कर्मफले स्पृहे'ति ॥ औदासीन्यान्न मम वैषम्यं नैर्घृण्यं वा ॥ नापि पुण्यपापलेपः ॥ ३तादृशं च मदीयमन्यादृशं सामर्थ्यं ॥ तथा च सूत्रं ॥ ४'वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथाहि दर्शयति' ॥ इति ॥ ९ ॥

अर्जुनः ॥ 'अहं विसृजामी'ति सृष्टिकर्तृत्वमुक्त्वा उदासीनोऽहं वर्ते इति कथमुच्यते ॥ कर्तृत्वमुदासीनत्वं चेत्युभयं विरुद्धं ॥ कर्तृत्वे कथमुदासीनत्वं ॥ उदासीनत्वे कथं कर्तृत्वं ॥ किंच ॥ प्रकृतेर्वशात् सृजामीति, प्रकृतिं यांतीति च, प्रकृत्या सृष्टिलयावुक्त्वा उदासीनोऽहमित्युक्त्या प्रकृतिरेव स्वतंत्रा सृष्ट्यादिकं करोतीति प्रतीयते ॥ तथा च सृष्टिसंहारादिकर्तृत्वं तस्या एवेति कथं 'प्रभवः प्रलयस्तथा' इत्यादिकं ॥ वद ॥

कृष्णः ॥ मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरं ॥
हेतुनाऽनेन कौन्तेय जगद्विपरिवर्तते ॥ १० ॥

मयेति ॥ प्रकृतिः अध्यक्षेण मया हेतुना चरं च अचरं च चराचरे ताभ्यां सहितं सचराचरं जगत् सूयते सृजति ॥ हे कौंतेय अनेन हेतुना जगत् विपरिवर्तते ॥ १० ॥

प्रकृत्या क्रियमाणानां सर्वेषां कर्मणां साक्षात् कर्त्री तस्याः प्रभुणा मया-

१. प्रकृतेर्वशादित्यस्योभयत्रान्वयः ॥ २. ४. १४. ३. वि ॥ 'पश्य मे योगमैश्वर'मित्यस्यैव विवरणमिदमिति भावः ॥ ४. २. १. ३५.

प्रेरिता सा प्रकृतिः चराचरात्मकवस्तुनिचितं जगत्सृजति ॥ तत्तत्कर्मानुगुणं विविधं सृजति ॥ १ प्रयोज्यकर्त्री प्रकृतिः ॥ प्रयोजककर्ता चाहं ॥ इत्युभयरूप-हेतुनाऽनेन २ तत्तत्कर्मानुगुणमदीक्षणरूपहेतुना जगत् विशेषेण विविधं परिवर्तते पुनःपुनः सृष्टिलयपरंपरां प्राप्नोति ॥ वेदशास्त्रपुराणादौ ३ प्रसिद्धोयमर्थः ॥ यद्यह-मुदासीनः स्यां तर्हि कर्ता न स्यां अतोऽहं सृष्ट्यादेः कर्ता ॥ अतो नाहमुदा-सीनः ॥ किंतु उदासीनसदृशः ॥ तत्र यथा हर्षविषादौ न स्तः तथा मम न तौ स्तः ॥ अत एव उदासीनतयाऽऽसीनमित्यनुक्त्वा 'उदासीनवदासीन'मि-त्युक्तं ॥ अतो न विरोधः ॥ उदासीनवदित्युक्त्या, हर्षविषादराहित्येन कर्तृत्वाभ्यु-पगमात् न प्रकृतेः स्वातंत्र्यं शंक्यं ॥ अतः 'प्रभवः प्रलयस्तथे'ति युक्तमुक्तम्॥१०॥

अ ॥ अर्जुनः ॥ 'प्रभवः प्रलयस्तथे'ति सृष्टिसंहारकर्तृत्वमुक्तं ॥ तदेव पुनरन्योक्त्या दृढीकृतं॥ ततश्च स्रष्टृत्वं संहर्तृत्वं चेश्वरस्य प्रतीयते ॥ न चेश्वरः स्रष्टा संहर्ता च भवितुमर्हति ॥ निर्गुणत्वेन निष्क्रियत्वेन सर्वधर्मविधुरत्वात् ॥ नच सर्वधर्मविधुरस्य स्रष्टृत्वादिकं संभवति ॥ अतः कथमिदं ॥ अस्तुवा स्रष्टृत्वं ॥ सा सृष्टिः किमर्था ॥ न तावद्भोगार्था ॥ भोक्तृत्वाभावात् ॥ नापि भोक्तुर्जीवस्य भोगार्था ॥ परमात्मनोऽन्यस्य जीवस्याभावात् ॥ नापि मोक्षार्था सृष्टिः ॥ नित्य-मुक्तत्वाद्बंधाभावेन मोक्षाभावात्॥ अतः 'प्रभव' इति 'विसृजामी'ति त्वोच्य-माना सृष्टिरनर्थेति भाति॥ न च निरर्था प्रवृत्तिस्सर्वज्ञस्य युज्यते ॥

कृष्णः ॥ स्वां स्वीयां स्वस्मिन् कल्पितां प्रकृतिशब्दितां मायां वशीकृत्य तस्याः विक्षेपावरणात्मकशक्तिप्रभावात् मायावीव गजतुरगभुजगादिकं भूतसमु-दायं विविधं सृजामि शुक्तिरजतादिकमिव दर्शयामि ॥ ८ ॥

यतो मायामयो सृष्टिः मायिकश्च भूतसमुदायः अतो मायाविनेव मया प्रद-र्श्यमानानि सृष्टिस्थितिप्रलयाख्यानि कर्माणि विषमाण्यपि न मां निबध्नंति ॥ नहि मायाविनः कर्माणि मायाविनं निबध्नंति ॥ मिथ्यात्वादेव तेषु कर्मस्वहमसक्त उदासीनश्च ॥ मायामयत्वात् सृष्टेर्न परमात्मनो निर्गुणत्वव्याघातः ॥ नापि प्रयो-जनाऽवश्यंभावः ॥ ९ ॥

१. द्वै॥ २. वि ॥ ३. वि ॥ 'द्धि परिवर्तते' इति पाठः ॥ प्रसिद्ध्यर्थो हि शब्दः ॥

कथमचेतनाया मायायाः सृष्टिशक्तिः इति चेत् ॥ साक्षिभूतेन मया संनिधिमात्रादेवेष्टकेन सृष्टिशक्तिं प्रापिता प्रकृतिरचेतनाऽपि मायाविनाऽधिष्ठिता माया गजतुरगभुजगादिकमिव जगदखिलं सृजति ॥ दृश्यते ह्यन्यस्य संनिधानादन्यत्र चेष्टा ॥ अनुभूयते चायस्कांतसंनिधानादयोधातौ चेष्टा ॥ मत्संनिधानेन निमित्तेन प्रकृत्या जगदिदं विविधं परिवर्तते पुनःपुनर्जायते ॥ मायायाः शक्तिस्तादृशी ॥ अतो न काऽप्यनुपपत्तिः ॥ १० ॥

अर्जुनः ॥ यदि भवानीदृशविविधविचित्रविलक्षणमहामहिमाऽऽश्रयः ॥ तर्हि कुतो जारश्चोरः प्राकृतो मानुष इति भवंतं अवजानंति ॥

कृष्णः ॥ अवजानंति मां मूढा मानुषीं तनुमाश्रितं ॥
परं भावमजानंतो मम भूतमहेश्वरं ॥ ११ ॥

अवजानंतीति ॥ मम परं भावं न जानंतः अजानंतः मूढाः मनुष्याणामियं मानुषी तां तनुं शरीरं आश्रितं महांश्चासावीश्वरश्च महेश्वरः भूतानां महेश्वरः भूतमहेश्वरः तं मां अवजानंति ॥ ११ ॥

यद्यपि १ भूतमहेश्वरोऽहं भूतानां ईश्वरा ब्रह्मरुद्रेंद्रादयः तेषामपीश्वरोऽहं ॥ तथाऽपि तादृशं मां केचिदवजानंति ॥ कुत इति चेत् मूढाः ॥ अविवेकिनस्ते ॥ कोऽसावविवेकस्तेषां इति चेत् परमः पुमानयं 'परित्राणाय साधूना'मित्युक्तरीत्या दुष्टनिग्रहशिष्टपरिपालनार्थं धर्मस्थापनार्थं चावतीर्ण इति, मम परमं याथात्म्यं न जानंति ते ॥ २ सदासद्भावादहं भूतः सर्वोत्तमत्वादहं महान् सर्वैश्वरत्वादहं ईश्वरश्च ॥ यदवजानंति न स तेषामपराधः ॥ अपितु ममापराधः ॥ यद्यहं स्वेन रूपेण लोकादमुष्मादिमं लोकमागतस्स्यां तर्हि न कोऽपि मामवजानीयात्॥ आराधयेयुश्च सर्वे परमादरेण ॥ निगूह्य रूपं मनुष्यशरीरसदृशं शरीरमाश्रितो यदहमागंतः ततः किल मामजानंतोऽवजानंति ॥ लोकेहि कमप्यधिकृतं पुमांसं स्वरूपेण न जानंतो जानंतश्च लिंगमात्रेण लिंगविहीनं स्वरूपेणावस्थितं निजिघृ-

१. महांश्चासौ ईश्वरश्च महेश्वरः भूतानां महेश्वरः तं ॥ २. भूतश्चासौ महांश्चासौ ईश्वरश्च भूतमहेश्वरः तं ॥

क्षुमवजानंति कस्त्वं किमिदं कुत इदमिति ॥ त्वं वा कुतस्त्योऽवतीर्णः स्वरूपेणैव कुतो नागतोऽसि इति चेत् यदि स्वरूपेणैवाहमागतः स्यां तर्हि मामवज्ञादर्शिकया केऽपि नोपसीदेयुः ॥ अतः सर्वजनसमाश्रयणीयत्वाय सौलभ्यदर्शनाद्दाक्षिण्यसंदेः प्रदर्शनाय च मानुषीं तनुमाश्रितोऽहं ॥ १मम परभावः स्वस्वयं यदहं भूतमहेश्वरोऽपि भूत्वा लोकानुग्रहाय मानुषरूपेणावतीर्णः ॥ लोके महामहिमवंतः प्रभवंतो महान्तोऽधिकृता लोकानुग्रहाय सौलभ्यादीन् गुणान् प्रदर्शयंतस्तत्र तत्र साधारणमनुजसमं पर्यटंति ॥ संलपंति च दयनीयविहीनमनुजैस्समं ॥ शृण्वंति च परमेणाऽऽदरेण तदीयां विज्ञप्तिं ॥ परिहरंति च तदीयां दुर्गतिं ॥ अयमेष तेषां परभावः ॥ परत्वानुप्रविष्टं हि साधारणमनुजसमतया वर्तनं ॥ मनुष्यत्वाऽऽश्रयणरूपं परभावं न जानंति ॥ अतो न बहुमन्यंते ॥ प्रत्युत अवजानंति ॥ ते किल दैवोपहता बराकाः ॥ न तेषां वचनं प्रमाणीकुरु ॥ ११ ॥

अर्जुनः ॥ एवं त्वां अवजानतां किं फलम् ॥

कृष्णः ॥ मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः ॥
राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः ॥ १२ ॥

मोघाशा इति ॥ रक्षसां इयं राक्षसी तां असुराणां इयं आसुरी तां चैव मोहयतीति मोहिनी तां प्रकृतिं स्वभावं श्रिताः विगतं चेतः येषां ते विचेतसः ते मोघा व्यर्था आशा येषां ते मोघाशाः मोघं कर्म येषां ते मोघकर्माणः मोघं ज्ञानं येषां ते मोघज्ञानाश्च भवंति ॥ १२ ॥

ये मामवजानंति तेषामाशा मोघा भवति ॥ वांछितं किमपि न लभ्यते ॥ लब्धमपि नश्यति ॥ तैः क्रियमाणानि कर्माणि भगवद्भक्तिविरहान्निष्फलानि ॥ जातमपि तेषां शास्त्राभ्यासवशाद्ज्ञानं नापरोक्षज्ञानाय प्रभवति ॥ २'मयि चानन्ययोगेन भक्तिरव्यभिचारिणी' इति वक्ष्यमाणसाधनविरहात् ॥ ईदृशा ३ म-

१. वि ॥ मानुषीं तनुमाश्रितं मां एतद्रूपं परं भावमजानंतः प्रत्युतावजानंतीत्यन्वयः ॥
२. १३. ११. ३. भवंतीति शेषः ॥

वंति ते ॥ कुत इति चेत् यतो १ विरुद्धमनस्काः २ विगतविवेकाश्च ॥ राक्षसीं हिंसाहेतुद्वेषप्रधानां तामसीं आसुरीं विषयभोगहेतुरागप्रधानां राजसीं च प्रकृतिमाश्रिताः ॥ अयं रक्षसां असुराणां च स्वभावः ॥ एतन्नियताश्च बहवो दोषाः ३ वक्ष्यंते 'दंभो दर्प' इत्यादिना ॥ सचायं मोहं जनयति ॥ तेन च मदवज्ञानं ॥ तेन चोक्तानर्थप्राप्तिस्तेषां ॥ अतः परिहर दूरतस्तानप्रशस्तान् ॥ १२ ॥

अर्जुनः ॥ अवज्ञानं द्वेधा संभवति ॥ अवजानतामविवेकेन अवज्ञायमाने वस्तुनि दोषसद्भावेन च ॥ त्वदवज्ञाने त्वामवजानतामविवेको हेतुतयोक्तः ॥ 'अवजानंति मां मूढा' इति ॥ अवज्ञायमाने त्वयि दोषसद्भाव एव कुतो हेतुर्न स्यात् ॥

कृष्णः ॥ महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः ॥
भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ॥ १३ ॥

महात्मान इति ॥ हे पार्थ देवानां इयं दैवी तां प्रकृतिं आश्रिताः महान् आत्मा येषां ते महात्मानस्तु मां भूतानां आदिः भूतादिः तं न विद्यते व्ययः यस्य सः अव्ययः तं ज्ञात्वा न विद्यते अन्यस्मिन् मनः येषां ते अनन्यमनसः संतः मां भजंति ॥ १३ ॥

यदि मदवज्ञाने मयि दोषसद्भाव एव हेतुस्स्यात् तर्हि सर्वैरहमवज्ञेय ॥ न च तथा ॥ किंतु केचिदेवावजानंति मां ॥ आराधयंति च केचित् ॥ यद्याराधका अविवेकिनः, अवजानंतश्च विवेकिनः, तर्हि विवेकिभिरवज्ञायमानत्वात् दोषसद्भाव एवावज्ञाने हेतुस्स्यात् ॥ नच तथा ॥ आराधयंति मां विवेकिनः ॥ अवजानंति चा विवेकिनः ॥ अतोऽवजानतां अविवेक एव मदवज्ञाने हेतुः ॥ के आराधयंतीति चेत् ४ महात्मानः आराधयंति ॥ कुत इति चेत् यतो दैवीं ज्ञानभक्तिवैराग्यादि-साधनसाधनहेतुभूतविवेकप्रधानां सात्विकीं प्रकृतिमाश्रिताः ॥ सोयं देवानां

१. द्वे ॥ २. अ ॥ वि ॥ ३. १६. ४. ४. महान् आत्मा अनुभावो येषां ते महात्मानः ॥

स्वभावः ॥ तन्नियताश्च षड्विंशतिर्गुणाः वक्ष्यंते १'अभयं सत्वसंशुद्धिः' इत्यादिना ॥ तेन च मां भूतानां सर्वेषां कर्तारं निर्विकारं अविनाशिनं च यथावज्जानंति ॥ तेन चांतः २करणं रागद्वेषादिविरहितं शुद्धं संपद्यते ॥ तादृशं चांतःकरणं मयि रक्तं अन्यत्र विरक्तं च भवति ॥ तादृशाश्च मामाराधयंति ॥ न साधारणा इमे ॥ अपि तु महांतः ॥ ३ विशेषश्च महानेषां ॥ एषां वचनमेव प्रमाणीकुरु ॥ त इव त्वमपि मामाराधय ॥ १३ ॥

अर्जुनः ॥ 'भजंत्यनन्यमनस' इति त्वदाराधनमभिहितं ॥ तच्च किं तत्प्रकारश्च कः ॥

कृष्णः ॥ सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः ॥
नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते ॥ १४ ॥

सततमिति ॥ नित्यं युक्ताः योगवंतः सततं सदा कीर्तयंतः यतंतः यत्नं कुर्वंतश्च दृढं व्रतं येषां ते दृढव्रताः नमस्यंतः नमस्कारं कुर्वंतश्च संतः मां भक्त्या उपासते ॥ ततं वाद्यं तेन सहितं इति वा ॥ १४ ॥

ते उपासनशब्दितां सेवां कुर्वन्ति ॥ सेवा च निरतिशयप्रीतिजनककर्मविशेषः ॥ सेवया हि प्रीतिर्जायते ॥ सैव भजनशब्दितमाराधनं ॥ तत्प्रकारश्चायं ॥ निरतिशयप्रेमप्रवाहरूप४भक्तिपूर्वकं मन्नाम५कीर्तनं, मद्विषयस्तोत्र ६ मंत्रोच्चारणं, मदर्चनादिकर्मसु तदनुकूलव्यापारेषु च प्रयत्नः, मत्प्रीतिजनकनानानियम७व्रतोपवासादिकरणं, शतेन प्रयत्नानां भगवतः प्रसादः संपादनीय इति सुदृढः ८संकल्पः मध्ये संभवतां दोषाणां परिहरणाय नमस्कारैः प्रसादनं, मनःशुद्ध्याधायक ९कर्मयोगाद्यनुष्ठानं, एकैकस्मिन्नपि मयि १० मनोयोजनरूपं मच्चिंतनं, इत्येवंप्रकारेण

१. १६. १. २. महान् शुद्धिमत्तया महनीयः आत्मा मनः येषां ते महात्मानः ॥ ३. तु शब्दार्थोऽयं ॥ ४. अस्य सर्वत्रान्वयः ॥ ५. ६. कीर्तयंत इत्यस्यार्थः ॥ ७. ८. व्रतशब्दार्थः ॥ ९. १०. 'नित्ययुक्ता' इत्यस्यार्थः ॥

मदाराधनरूपमद्भजनं कुर्वंति महात्मानः ॥ १ कांक्षंते च मुक्तौ नित्ययोगं ॥ २ वेदांतवाक्यार्थविचाररूपं कीर्तनं कुर्वतः संशयविपर्ययपरिहाराय श्रुतस्यार्थस्य युक्तिभिरनुचिंतनरूपे मनने वर्तमानाः शमदमादिसाधनसंपन्नाः ॥ ३ 'श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनं ॥ अर्चनं वंदनं दास्यं सख्यमात्मनिवेदनं' ॥ इत्युक्तभक्तिभेदानाचरंतः मद्विषयकपरमप्रेमरूपया ४ भक्त्या सर्वदा संयुक्ताः महानुभावाः श्रवणमननोत्तरमविना ध्यानयोगेन मां चिंतयंति ॥ इदमेव निदिध्यासनं ॥ फलं चास्य मोक्षप्रतिबंधकशुभाशुभमोक्षफलकं ज्ञानं प्रथमश्लोकोक्तं ॥ त्वमेवं मामुपास्व ॥ तेन च ज्ञानवान् भव ॥ १४ ॥

अर्जुनः ॥ 'भजंत्यनन्यमनस' इत्याराधनमुक्त्वा तत्स्वरूपं तत्प्रकारश्चेत्युभयमभिहितं ॥ त्वदाराधकत्वेन त्वया गृहीताः केचन नैवंविधा दृश्यंते ॥ नचेमे कीर्तनं प्रयत्नं व्रतं नमस्कारान् वा कुर्वंति ॥ अपितु तूष्णीमासते ॥ कथं ते त्वदाराधकाः ॥ किंवा तैः क्रियमाणमाराधनं तत्प्रकारश्च कः ॥

कृष्णः ॥ ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते ॥
एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ॥ १५ ॥

ज्ञानेति ॥ अन्येऽपि अन्ये तु ज्ञानमेव यज्ञः ज्ञानयज्ञः तेन च तेनैव यजंतः आराधनं कुर्वतः संतः विश्वतः सर्वत्र मुखं तदुपलक्षितं रूपं यस्य सः विश्वतोमुखः तं मां एकस्य भावः एकत्वं तेन पृथक् भावः पृथक्त्वं तेन बहुधा बहुभिः प्रकारैः उपासते ॥ १५ ॥

उक्तेभ्य आराधकेभ्यो ५विशिष्टाः ॥ ६ ज्ञानेन तदाराध्यार्थकचिंतनादिना च मत्प्रसादजनकोपायेन मामाराधयंति ॥ चिंतनं तेषां कीदृशमिति चेत् सर्वत्र

१. च ॥ २. मधु ॥ भवेयुरंतं ॥ ३. नमस्यंतश्चेति चकारेण भेदांतरग्रहणं ॥ ४. अत्र नित्ययुक्ता इत्यनेनान्वयः ॥ ५. अन्ये इत्यस्यार्थः ॥ ६. ज्ञानशब्दो ज्ञानतत्साधनोभयपरः ॥

स्थितं मां एकत्वेन चिंतयंति ॥ सर्वत्र [१]स्थितोऽहमेकः ॥ न स्थानभेदान्मम भेदः ॥ इति मां चिंतयंति ॥ तथाच सूत्रं ॥ [२]'न स्थानतोऽपि परस्योभयलिंगं सर्वत्र ही'ति॥ उक्तं च मया ॥ [३]'सर्वभूतस्थितं यो मां भजत्येकत्वमास्थित' इति ॥ वक्ष्यते च ॥ [४]'अविभक्तं विभक्तेषु विभक्तमिव च स्थित'मिति॥ [५]'अविभक्तं विभक्तेषु'इति च॥ जगतो भिन्नत्वेन शुक्लनीलपीतादि[६]बहुरूपत्वेन उपासते ॥ तथोपासकाश्च 'दैवमेवापरेयज्ञ'मित्याद्युक्तप्रकारेण यज्ञभेदमनुष्ठितवंतो [७]बहवः ॥ 'नारायणरूपैकमूर्तित्वेन वासुदेवादिचतुर्मूर्तित्वेन दशचतुर्विंशत्यादिमूर्तित्वेन शतसहस्रादिमूर्तित्वेन चोपासते॥ कीर्तनप्रयत्नव्रतनमनादिभिर्वैशिष्ट्यं प्राप्ता इमे॥ एषामुपासनमेवं ॥ उपासते इत्यस्य प्रत्येकमन्वयः ॥

अ ॥ [८]उपास्यं ब्रह्म उपासकोऽहं चेत्युभयमेकं तत्वं ॥ नानयोर्भेदः ॥ ब्रह्मैवाहं शिवोऽहमित्यादिरूपेण जीवपरमात्मनोरेकत्वमनुसंदधाना उत्तमाधिकारिणो महात्मान एकत्वेन चिंतयंति ॥ एकमेव ब्रह्म पृथगग्न्यादित्यादिरूपेण भासते इति ब्रह्मैव मध्यमाधिकारिणः पृथक्त्वेनोपासते ॥ सर्वत्र व्याप्तं विश्वरूपं ब्रह्म ब्रह्मरुद्रेंद्रवरुणाग्न्यादित्यरूपैर्बहुभिः प्रकारैरुपासते ॥ तत्तत्फलकामनया तत्तद्देवतांतरोपासका अधमाधिकारिण [९]इमे ॥ उक्तं च मया ॥ [१०]'कांक्षंतः कर्मणां सिद्धिं यजंत इह देवताः॥' इति ॥ [११]'कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यंतेऽन्यदेवताः ॥' इति च ॥ मध्यमाः ब्रह्मैव अग्न्यादिरूपेण वर्तते इति अग्न्यादीन् ब्रह्मत्वेनाऽऽराधयंति ॥ अधमास्तु अग्न्यादीन् अग्न्यादित्वेनाराधयंति नतु ब्रह्मत्वेन ॥ वस्तुतो भगवतस्सर्वात्मकत्वात्तदाराधनं संपद्यते ॥ अत एवोच्यते ॥ 'आकाशात्पतितं तोयं यथा गच्छति सागरं ॥ सर्वदेवनमस्कारः केशवं प्रति गच्छति ॥' इति ॥ वक्ष्यते चात्र ॥ 'मां सोमपाः पूतपापाः यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयंते ॥' इति ॥ 'तेऽपि मामेव कौंतेय यजंतीं'ति च ॥ नतु तत्तेषां

१. सर्वतः सर्वत्र मुखं तदुपलक्षितसर्वावयवोपेतदिव्यमंगलविग्रहः यस्य तं ॥ सर्वत्र स्थितमिति यावत् ॥ २. ३. १. ११. ३. ६. ३१. ४. १३. १७. ५. १८. २०. ६. बहुभिः प्रकारैः ॥ ७. बहुप्रकारा अधिकारिणः ॥ ८. एकत्वेनेत्यादेर्व्याख्यानान्तरम् ॥ ९. भाष्यतात्पर्यबोधिनीसुबोधिन्यानुरोधेन ॥ १०. ४. १२. ११. ७. २०.

जानंति.अतोऽधमा इमे ॥ फलं चैवामंतव॰ ॥ उक्तं च मया ॥ १' अंतवत्तु फलं तेषा'मिति ॥ वक्ष्यते च ॥ २' क्षीणे पुण्ये मर्त्यलोकं विशंती'ति ॥ ३' नतु मामभिजानंति तत्वेनातश्च्यवंति ते ॥' इति च ॥ यद्येव मेषां भजनं तर्हि महात्मानस्तु मां [illegible] कानां महात्मनां कोटावनुप्रवेशः कथमेषां ॥ तत्रोक्तभजनस्य हि प्रकारवर्जनं [illegible] ॥ इति चेत् वेदप्रामाण्यं परलोकसद्भावं चानभ्युपगच्छद्भ्यो नास्तिकेभ्यो नितरां विशिष्टाः खल्विमे तदुभयमभ्युपगच्छंतः परमास्तिकाः ॥ अतो महात्मान एवैते ॥ जानंतीमे परमात्मानं सर्वोत्तमं समर्पयंति च देवतांतराराधनमंततो भगवानेव प्रीयतामिति ॥ ४' नान्यदस्तीति वादिन' इत्युक्तास्तु' परमाधमाः ॥ ५ यदीमे त्रयोऽपि कीर्तनादिकारिभ्योविशिष्टाः ॥ तर्हि कीर्तनादिकारिणामधमत्वमापद्यते ॥ तत्र नारदादीनामत्र तेषां अधमाधिकारिककीर्तनादिकरणप्रवृत्तिरयुक्ता स्यादिति चेत् उत्तमाधिकारिणः कीर्तनादिभिरुपासते ॥ तथोपासितुमसमर्थास्त्रिविधाः उत्तमा मध्यमा अधमाश्चेति ॥ तत्रोत्तमाः एकत्वेनोपासते ॥ मध्यमाः पृथक्त्वेन ॥ अधमास्तु बहुधा ॥ अर्थस्तु पूर्वोक्तः ॥ ततश्च नारदादीनां कीर्तनादिकरणप्रवृत्तिर्युक्ततमेति निरवद्योयं पंथाः ॥

वि ॥ कीर्तनादिभिरनंतरंगैरुपासमानाः अपूर्णोपासकाः ॥ पूर्णोपासकास्तु कीर्तनादिभिः ज्ञानयज्ञेन च मामुपासते ॥ देवनरतिर्यगादिभेदेन बहुप्रकारोपेतसकलप्रपंचशरीरकं मां एकत्वेनोपासते ॥ भगवान् वासुदेवः एक एव सूक्ष्मचिदचिद्वस्तुशरीरस्सन् स्थूलचिदचिद्वस्तु शरीरः स्यामिति संकल्प्य तादृशानेकवस्त्वात्मकप्रपंचशरीरकोऽवतिष्ठते इति मामुपासते ॥ उत्तमा इमे ॥ उपासते चैवमिमे भगवंतं मां ॥ १५ ॥

अर्जुनः ॥ ६ सृष्टिस्थितिसंहारकर्तृत्वरूपमाहात्म्यमुक्तं ॥ इतोऽप्यतिशयितं माहात्म्यं ब्रूहि ॥ ७ पृथक्त्वेन बहुधा विश्वतोमुखमित्युक्तं ॥ तत्कथं ॥ केन प्रकारेण सकलप्रपंच शरीरकोऽसि ॥ मां भजंतो महात्मानः मामवजानंतो मूढाः इत्युक्तं ॥ तत्कथं ॥ कथं त्वद्भजनत्वदवज्ञानाभ्यां महात्मानः मूढाश्च भवेयुः ॥ ब्रूहि तत् ॥

१. ७. २३. २. ९. २१. ३. ९. २४. ४. २. ४२. ५. मधुसूदनसरस्वतीकृतगूढार्थदीपिकानुरोधेन ॥ ६. द्वै ॥ अ ॥ ७. वि ॥

कृष्णः ॥ अहं क्रतुरहं यज्ञः स्वधाऽहमहमौषधं ॥
मंत्रोऽहमहमेवाऽऽज्यं अहमग्निरहं हुतम् ॥ १६ ॥

अहमिति ॥ स्पष्टोऽर्थः ॥ १६ ॥

क्रत्वाद्यचेतनपदार्थानां स्वरूपसत्तानियामकः अग्न्यादित्यादिचेतनपदार्थानां स्वरूपसत्ताप्रवृत्तिनियामकश्चाहं ॥ अत एवोक्तच्छब्दवाच्योऽहं ॥ 'यदधीना यस्य सत्ता तत्तदित्येव भण्यते' ॥ इत्युक्तेः ॥ १ क्रतुः दीक्षादिरवभृथांतः कर्मकलापः ॥ यज्ञः देवतोद्देशेन हविषः प्रक्षेपः ॥ २ क्रतुः श्रुतिचोदितः ॥ यज्ञः स्मृतिचोदितः ॥ ३ क्रतुः अग्निष्टोमवाजपेयादिः ॥ यज्ञः अहरहरनुष्ठीयमानो देवयज्ञपितृयज्ञभूतयज्ञमनुष्ययज्ञब्रह्मयज्ञरूपः ॥ क्रतुर्यज्ञश्चाहं ॥ स्वाहेत्युक्त्वा देवेभ्यो दीयमानचरुपुरोडाशादिरूपमन्नमहं ॥ स्वधेत्युच्चार्य पितृभ्यो दीयमानं स्वधाशब्दितमन्नमप्यहमेव ॥ रोगशमनाय रोगिभिः सेव्यमानं औषधशब्दितमन्नमहं ॥ ५ आर्बिधनधनंजयशब्दितजाठराग्नौ हूयमानं सर्वप्राणिनामन्नसामान्यं चाहं ॥ ओषधिप्रभवमन्नं चाहं ॥ न केवलमन्नादिरूपहविर्मात्रमहं ॥ किंतु सोमलताद्योषधिभवं हविश्चाहं ॥ येन देवेभ्यः पितृभ्यश्च दीयते स मंत्रोऽहं ॥ स्वात्मातिपाद्यः तन्नियामकश्चाहं ॥ आज्यरूपं हविश्चाहं ॥ यस्मिन् हूयते सोऽग्निरहं ॥ होमक्रिया चाहम् ॥ क्रत्वादीनां नियामकत्वात् क्रत्वादिरूपोऽहं ॥ १६ ॥

कृष्णः ॥ पिताऽहमस्य जगतो माता धाता पितामहः ॥
वेद्यं पवित्रमोंकारः ऋक् साम यजुरेव च ॥ १७ ॥

पितेति ॥ धाता पोषणकर्ता वेदितुं योग्यं वेद्यं ज्ञेयम् ॥ स्पष्टमन्यत् ॥ १७ ॥

---

१. ब्रै ॥ २. अ ॥ ३. वि ॥ ४. एवशब्दस्य पूर्वत्र परत्र च संबंधः ॥ ५: वि ॥ औषे दाहके जाठराग्नौ धीयते प्रक्षिप्यते इति औषधमिति निरुक्तिरिति भावः ॥ ६. एकैकज्ञानमपि भगवदुपासनमिति सूचयितुं प्रत्येकमहंशब्दः ॥

अस्य जगतः पिता माता पितामहः मातामहश्चाहं ॥ पितृभ्रातृपितामह[1]मातामहभ्रातृपुत्ररूपेण सर्वविधबंधुत्ववानहं ॥ २ तत्रतत्र स्थित्वा तत्तच्छक्त्यवाच्यस्तत्तद्बंधुकार्याणि करोमि ॥ तेन तत्तद्बंधुरूपेण ३ पोषणकर्ताऽहं ॥ उपलक्षणमिदं ॥ राजगुरुदेवतादिरूपेण तत्तत्कर्मकर्ता चाहं ॥ समयविशेषे पित्रादिरूपं धृत्वा रक्षामि ॥ यथा त्रिशिरःपुरे ४ शंकरो मातृरूपो भूत्वाऽरक्षत्कामपि योषां ॥ अत एव मातृभूत इति प्रथा तस्य ॥ तत्तत्कर्मफलविधाता चाहं ॥ ज्ञेयं वस्त्वहं ॥ वक्ष्यते च ॥ ५ 'ज्ञेयं यत्तत्प्रवक्ष्यामि यद्ज्ञात्वाऽमृतमश्नुते ॥ अनादिमत्परं ब्रह्मे'ति ॥ ६ 'वेदैश्च सर्वैरहमेव वेद्य' इति च ॥ ७ पावनं वस्त्वहं ॥ किंच ॥ ज्ञेयस्य वस्तुनः ज्ञेयत्वरूपयोग्यताप्रदः ॥ पवित्रस्य वस्तुनः पवित्रत्वरूपयोग्यताप्रदः ॥ ८ परमं पवित्रं हि ज्ञानं ॥ उक्तं च मया ॥ ९ 'नहि ज्ञानेन सदृशं पवित्रमिह विद्यते' ॥ इति ॥ तस्य तादृशयोग्यताप्रदश्चाहं ॥ ओंपदवाच्योऽहं ॥ उक्तं च मया ॥ १० 'ओमित्येकाक्षरं ब्रह्मे'ति ॥ ११ 'ओंतत्सदिति निर्देश' इति च वक्ष्यते ॥ किंच ॥ प्रणवो वेदानामुत्कर्षाऽऽधायकः ॥ उक्तं च मया ॥ १२ 'प्रणवः सर्ववेदे'ष्विति ॥ तस्य तादृशयोग्यताप्रदश्चाहं ॥ ऋगादि[13]वेदचतुष्टय [14]प्रतिपाद्योऽहं ॥ 'वेदैश्च सर्वैरहमेव वेद्य' इति वक्ष्यते ॥ ऋगादीनां तत्तद्योग्यताप्रदश्चाहमेव ॥ १७ ॥

१. पितामहशब्द उपलक्षणार्थः । अत्र, 'पितृमातृसुतभ्रातृबंधुमित्रादयोऽपि वा ॥ एकैकफललाभाय सर्वलाभाय केशवः' इति वचनमनुसंधेयं ॥ 'ताये तंदै येन्नु' इति गाथा चानुसन्धेया ॥ २. अत्र, तत्रतत्र स्थितो विष्णुः तत्तच्छक्तीः प्रबोधयन् ॥ एक एव महाशक्तिः कुरुते सर्वमंजसे'ति वचनमनुसन्धेयं ॥ ३. धातृशब्दार्थः ॥ ४. त्रिशिरःपुरेश्वरः ओरयूरग्रामवासिनीं कामपि अन्तर्वत्नीं मात्रा केवलं रक्ष्यमाणां अनन्यगतिकां वनितां तन्मातरि लालुगुडिग्रामं गतायां प्रसवसमये तया प्रार्थितो मातृरूपेणाऽऽगत्य ररक्षेति कथाऽनुसन्धेया ॥ ५. १३. १३. ६. १५. १५. ७. अत्र, पवित्राणां पवित्रं यो मंगलानां च मंगलं ॥ इति भारतोक्तिरनुसंधेया ॥ ८. पवित्रमित्यस्य व्याख्यानांतरं ॥ ९. ४. ३८. १०. ८. १३. ११. १७. २३. १२. ७. ८. १३. च शब्देनाथर्वांगिरसां ग्रहणं ॥ १४. वाच्यवाचकयोरभेदविवक्षया ॥

नश्वरफलाश्चार्थनान्मध्यमाः ॥ स्तुत्याश्च भागवतत्वात् ॥ उत्तमास्तु स्वधा स्तुत्याः ॥ मत्तोषहेतुरनन्यभाव एव ॥ न पुनः २ कुलशीलादिकं ॥ अत एव 'ये जना' इति सामान्यशब्दप्रयोगः कृतः ॥ २२ ॥

अर्जुनः ॥ अग्न्यादित्यादिसर्वदेवताशरीरकोऽहं ॥ तास्तु देवताः मम शरीरभूता इति ३ 'योयो यांयां तनुंभक्त' इत्यत्राभिहितं त्वया ॥ अत्र पुनः 'अहमग्निः' 'तपाम्यह'मित्यग्न्यादित्यरूपोऽहमित्यभिहितं ॥ ततश्च तदाराधनं त्वदाराधनमेव हि संपद्यते ॥ सतिचैवं 'अंतवत्तु फलं तेषां' 'मद्भक्ता यांति मामपी'ति सप्तमे 'गतागतं कामकामा लभंते' ॥ 'योगक्षेमं वहाम्यह'मित्यत्र च फलभेदोक्तिः कथं॥ देवतान्तरभजनस्य त्वदाराधनत्वेन 'मद्भक्तायांतिमामपी'ति 'योगक्षेमं वहाम्यह'मिति चोक्तेन महता त्वदाराधनफलेनैव हि भाव्यमुभयेषां ॥ विरुद्धं हि स एवाह-मित्युक्त्वा मद्भजनं महाफलकं अतो मां भजत ॥ तद्भजनमल्पास्थिरफलकं अतो मा भजत तं ॥ इति वचनं ॥ अतो विरुद्धभाषी भवान् ॥

कृष्णः ॥ येऽप्यन्यदेवताभक्ताः यजन्ते श्रद्धयाऽन्विताः ॥
तेऽपि मामेव कौन्तेय यजंत्यविधिपूर्वकम् ॥ २३ ॥

येऽपीति ॥ येऽपि येतु भक्ताः संतः श्रद्धया अन्विताः युताश्च संतः अन्याश्च ताः देवताश्च अन्यदेवताः भजन्ते ॥ हे कौंतेय तेऽपि विधिः पूर्वः यस्य तत् विधिपूर्वकं न विधिपूर्वकं अविधिपूर्वकं मामेव यजन्ति ॥ २३ ॥

सत्यं ॥ साधु पृष्टं ॥ वक्ष्मि ते तत्वं ॥ शृणु ॥ अन्यदेवताः मां वा ये अभक्त्या अश्रद्धया भजंते न तान् प्रति प्रहृष्यं वक्तव्यं वा ॥ निष्फलं हि तेषां कर्म ॥ ये

१. अ ॥ न विद्यते अन्यः भेददृष्टिविषयः येषां ते अनन्याः ॥ अनन्यत्वशब्दितं जीवब्रह्मा-भेदं ब्रह्मैवाहमित्यनुसंदधाना इति यावत् ॥ २. अत 'व्याधस्याऽऽचरणं ध्रुवस्य च वयो विद्या गजेन्द्रस्य का का जातिर्विदुरस्य यादवपतेरुग्रस्य किं पौरुषं ॥ कुब्जायाः कमनीयरूपमधिकं किं तत्सुदाम्नो धनं भक्त्या तुष्यति केवलं न च गुणैः भक्तिप्रियो माधवः' ॥ इति श्लोकोऽनुसंधेयः ॥

श्रद्धया भक्त्या भजंते तान् प्रत्येवेदानीं वक्तव्यं ॥ वदामि ॥ शृणु ॥ अन्यदेवता भक्ता १अपि ये भक्ताः श्रद्धयाऽन्विताश्च संतोऽन्यदेवताः२ भजंते ॥ तेऽपि मामेव भजंते ॥ तत्कृतदेवतांतराऽऽराधनं मदाराधनमेव ॥ तच्च ममेष्टं ॥ अत एव तां श्रद्धामहं वर्धयामि ॥ उक्तं च मया ॥ 'यो यो यां यां तनुं भक्त' इति ॥ 'श्रद्धां तामेव विदधाम्यह'मिति च ॥ हंत तर्हि कुतः फलभेदः ॥ मदुक्तमेवानुवदसि ॥ फलभेदे हेतुं ब्रूहि ॥ इति चेत् यद्यपि मदाराधनमेव तत् ॥ तथापि अहं यथा ज्ञात्वाऽऽराधनीयः न ते तथा ३ज्ञात्वा मामाराधयंति ॥ न मद्भजनविध्युक्तरीत्या-ऽऽराधयंति ॥ किंतु अविधिपूर्वकं तदाराधनं ॥ अतः फलभेदः ॥ २३ ॥

अर्जुनः ॥ कोऽसौ विधिः यत्पूर्वकं कृतं त्वदाराधनं महाफलकं स्यात् ॥ यद्राहित्येन त्वदाराधनमपि भूत्वा फलतो निहीनमन्याराधनम् ॥

कृष्णः ॥ अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च ॥
नतु मामभिजानन्ति तत्त्वेनातश्च्यवन्तिते ॥ २४ ॥

अहमिति ॥ अहं सर्वे च ते यज्ञाश्च सर्वयज्ञाः तेषां भोक्ता प्रभुश्चैव ॥ हि प्रसिद्धं ॥ ते मां तस्य भावः तत्त्वं तेन नतु नैव अभिजानंति ॥ अतः च्यवन्ति च्यवन्ते ॥ २४ ॥

ये देवानाराधयंति ते सर्वेश्वरं मां विहाय हि तानाराधयंति मां कुतो विजहति ॥ मदीययाथात्म्यानवगमात् ॥ ये मां यथावत् नैव सम्यक् जानंति अतोऽवज्ञाय मामन्यान् भजंते कथं ते महत्फलं प्राप्नुयुः ॥ अतः फलभूतात् स्वर्गात् भ्रष्टा भवंति ॥ किं ते तद्याथात्म्यं यदज्ञात्वा त्वमाराधनीयः इति चेत् अहमेव सर्वेषां इंद्रवरुणरुद्रवस्वादित्यवैश्वानरादि४सर्वदेवतोद्देश्यकतत्तद्यज्ञानां तत्तद्देयता-रूपेण भोक्ता स्वेन अधियज्ञरूपेण नियामकः फलदाता च ॥ प्रसिद्धमिदं वेदशास्त्र-

१. वि ॥ येत्विति पाठः ॥ तुः श्रद्धावदश्रद्धावतोर्विशेषसूचकः ॥ २. अन्यदेवताभक्ताः अन्यदेवताः भक्ताः इति समस्तं व्यस्तं च ॥ ३. विधिर्ज्ञानं शास्त्रविधिश्च ॥ ४. सर्वे च ते यज्ञाश्च-सर्वयज्ञाः तेषां ॥ सर्वेषां देवानां यज्ञाः सर्वयज्ञाः तेषां ॥

पुराणादौ ॥ इदं मदीयं याथात्म्यं ॥ १ अनेन रूपेण मदज्ञानाच्च्यवन्ते ॥ यदि मां, अयं सर्वदेवताशरीरकः सर्वांतर्यामी सर्वोद्देश्यकतत्तद्यागभोक्ता नियामकः फलदाता च ॥ देवाश्च सर्वे एतस्य शरीरभूताः परिवाराश्च ॥ देवानामन्येषां आराधनमेतस्य शरीराऽऽराधनं शरीरिण इव परितोषकरमिति ज्ञात्वा भक्त्याऽऽराधयेयुः तर्हि तदाराधनं मदाराधनं संपद्येत ॥ नैवं ज्ञात्वाऽऽराधयंति तान् ॥ किंतु मामिव स्वातंत्र्येण फलप्रदान् ज्ञात्वा आराधयंति ॥ अतः कृतं कर्म तेष्वर्पयंति न मयि ॥ अतो नश्वरं फलं तेषां ॥ मां यथावत् ज्ञात्वा मामेव साक्षादाराधयंति ये तेषां महत्फलं ॥ अतः फलभेदः ॥ राजभृत्याऽऽराधनं वस्तुतो राजाऽऽराधनरूपमपि न महते फलाय भवति ॥ किंत्वल्पाय फलाय ॥ साक्षाद्राजसेवनं तु महते फलायेति साक्षादसाक्षात्त्वभेदात्फलभेदोऽनुभूयते लोके ॥ २ येतु सकामा अपि मामेवाऽऽराध्य स्वर्गादिकमर्थयंते मध्यमा इत्युक्ताः ते मां पुमर्थशिरोरत्नमोक्षदाताऽयं नाक्षात् क्षुद्रं फलमर्थनीयं निष्कामकर्मलभ्यज्ञानयोगादिमं प्राप्तानां तत् संकल्पमात्रलभ्यं इत्यज्ञात्वा क्षुद्रफलस्यैव दातारं मत्वा आराधयंति ॥ अत उक्तरीत्या च्यवंते ते ॥ अहमेवाऽऽराधनीयः ॥ अन्ययाजिनां सकामनया मद्याजिनां च पुनरावृत्तिः ॥ निष्कामनया मद्याजिनस्तु न पुनरावर्तते ॥ अतो निष्कामो मामुपास्व ॥ २४ ॥

अर्जुनः ॥ तत्तद्देवतायाजिनां 'देवान् देवयजो यांति' 'अंतवत्तु फलं तेषां' मिति तत्तद्देवतालोकप्राप्त्या अंतवत्फलमुक्तं ॥ स्वर्गलोकं प्राप्तानां अंतवत्फलं प्रपंचितं ॥ 'ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशंती'ति ॥ नान्ययाजिनः सर्वेऽपि देवतायाजिनः किंतु केचिद्रुद्रवरुणवसुरुद्रादित्यमुखदेवतायाजिनः ॥ केचित्पितृदेवतायाजिनः ॥ केचित् भूतप्रेतादियाजिनः ॥ वक्ष्यते च ॥ ३ 'यजंते सात्विका देवान् यक्षरक्षांसि राजसाः ॥ प्रेतान् भूतगणांश्चान्ये

१. तस्य भोक्तुः प्रभोश्च भावस्तत्त्वं तेन ॥ २. 'त्रैविद्या' इत्यादिश्लोकद्वयस्य द्वितीययोजनानुसारेणेदं ॥ ३. १७. ४.

यजन्ते तामसा जनाः' ॥ इति ॥ तत्र देवताया॰जिनो देवान् यांतीत्युक्तं ॥ पितृया॰जिनां भूतादियाजिनां च का गतिः ॥ वद ॥

कृष्णः ॥ यान्ति देवव्रता देवान् पितॄन् यान्ति पितृव्रताः ॥
भूतानि यान्ति भूतेज्याः यान्ति मद्याजिनोऽपि मां ॥ २५ ॥

यांतीति ॥ देवेषु व्रतं येषां ते देवव्रताः देवान् यांति ॥ पितृषु व्रतं येषां ते पितृव्रताः पितॄन् यांति ॥ भूतेषु इज्या आराधनं येषां ते भूतेज्याः भूतेज्याः भूतानि यांति ॥ मां यजंतीति मद्याजिनः मामपि यांति ॥ २५ ॥

देवेषु विषये व्रतं नियमः आराधनं देवान् यजामह इति संकल्पश्च येषां ते तान् इष्ट्वा तान् प्राप्य तल्लोकेषु सुखमनुभूय पुनरावर्तंते ॥ एवं पितृव्रताः पितॄनिष्ट्वा तान् प्राप्य पुनरावर्तंते ॥ भूतेषु भूतप्रेतपिशाचप्रमथगणेषु विषये इज्याशब्दितमाराधनं येषां ते भूतानि प्राप्य पुनरावर्तंते ॥ अंतवत्त्वेषां फलं ॥ 'देवान् देवयजो यांति' 'भुक्त्वा स्वर्गलोकं' 'मर्त्यलोकं विशंती'त्युपलक्षणं ॥ तत्त्वैव प्रपंचोऽयं ॥ सकामा मद्याजिनस्तत्तत्फलानुभवाय तं तं लोकं प्राप्य अंते मामपि यांति ॥ निष्कामा मद्याजिनस्तु मामेवाऽऽप्नुवन्ति ॥ सत्यामिच्छायां संकल्पमात्रादेवान् पितॄन् भूतानि च प्राप्नुवंति ॥ यद्यपीदं चतुर्थपादोदितं 'मद्भक्ता यांति मामपी'त्युक्तमेव ॥ तथाऽपि न केवलं भक्तिशब्दिता प्रीतिरेव भगवत्प्रापिका ॥ अपितु भगवत्प्रीतिहेतुकर्मकरणसहितैवेति वक्तुं 'मद्याजिन' इति तत् प्रपंचितं ॥ वक्ष्यते च तदुभयावश्यकत्वं ॥ १ 'मन्मना भव मद्भक्तो मद्याजी'ति ॥ तदेवं त्रैविद्या' इति श्लोकद्वयस्य 'अनन्या' इति श्लोकस्य च प्रपंचनं कृतं ॥ 'येऽपी'त्यादि श्लोकत्रयेण ॥ २५ ॥

अर्जुनः ॥ अन्येषामल्पत्वादल्पफलप्रदत्वाच्च तद्भजनं सुकरं स्यात् ॥ तव महत्त्वात् महाफलप्रदत्वाच्च त्वद्भजनं दुष्करं स्यात् ॥ अतः कथं त्वद्भजने प्रवर्तेरन्॥

---

१. ९. ३४. १८. ६५.

अतो बिभेमि भवदीयमनन्यसाधारणं माहात्म्यं श्रुत्वा कथमहमेतादृशमहामहिमवंतं भगवंतं तमाराधयितुं शक्नोमीति ॥

कृष्णः ॥ पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ॥

तदहं भक्त्युपहृतं अश्नामि प्रयतात्मनः ॥ २१ ॥

पत्रमिति ॥ यः पत्रं पुष्पं फलं तोयं जलं मे भक्त्या प्रयच्छति ददाति ॥ प्रयतः शुद्धः आत्मा मनः यस्य सः प्रयतात्मा तस्य भक्त्या उपहृतं दत्तं भक्त्युपहृतं तत् अहं अश्नामि ॥ २१ ॥

न मद्भजनं दुष्करं ॥ किंतु परमसुकरं ॥ यतोऽहं सुलभः ॥ यो भक्त्या पत्रं पुष्पं फलं तोयं वा मे समर्पयति निष्कामतया शुद्धमनसस्तस्य भक्त्या समर्पितं तत्पत्रादिकमहं दृष्ट्वा स्वीकृत्य तृप्यामि ॥ श्रीदामसुदामापरपर्यायकुचेलब्राह्मणोपहृतपृथुकतंडुलकणवत्पत्रं फलं च भक्षयामि ॥ तोयं पिबामि ॥ पुष्पं स्वीकरोमि ॥ भक्तिमेवाहं पश्यामि नतु तत्तत्पदार्थगौरवलाघवादिकं ॥ प्रकटितं च मया मदीयमिदं सौलभ्यं दुर्वासःपरीक्षावसरे द्रौपद्या दत्तं भक्षयस्थालीकंठलग्नं पत्रशाकं श्रीरामावतारे शबर्या तापस्या दत्तं फलं च अशितवता नक्राक्रांतेन मय्यर्पितस्वांतेन गजराजेन समर्पितं पुष्पं गृहीतवता चंद्रवंश्येन रंतिदेवेन राज्ञा दत्तं स्वल्पं जलं पीतवता ॥ प्रदर्शनार्थमिदं ॥ भक्त्या यद्यत्कैर्दीयते तदखिलमश्नामि ॥ भक्षिताश्च मया कुचेलेन दत्ताः पृथुकतण्डुलाः ॥ अन्ये देवा नाहमिव सुलभाः ॥ किंतु दुर्लभाः ॥ तेषां भजनं दुष्करं ॥ न ते पत्रादिभिरल्पैस्तृप्येयुः ॥ अमितमपेक्षेरन् ॥ आराधकैर्दत्तेन फलपुष्पादिनैव हि तृप्तिस्तेषां ॥ न तथा मम ॥ अहं तु नित्यतृप्तः ॥ भक्तैर्भक्त्या दत्तं नाऽऽत्मतृप्तये स्वीकरोमि ॥ किंतु करुणया तदुद्धारायैव ॥ ये स्वयं तृप्तास्ते प्रीत्या दत्तं फलपुष्पजलादिकं [१] दातृजनानुग्रहा-

---

१. अत्र, नैवाऽऽत्मनः प्रभुरयं निजलाभपूर्णो मानं जनादविदुषः करुणो वृणीते ॥ यद्यज्जनो भगवते विदधीत मानं तत्स्वात्मने प्रतिमुखस्य यथामुखश्री'रिति ॥ 'स्वल्वमप्याहृतं भक्तैः प्रेम्णा भूर्येव मे भवेत् ॥ भूर्यप्यभक्तोपहृतं न मे तोषाय कल्पते ॥' इति 'याः क्रियाः संप्रयुक्ताः स्युरेकांतगतबुद्धिभिः ॥ ताः सर्वाः विदुषा देवः प्रतिगृह्णाति वै स्वयं 'मिति च श्लोका अनुसंधेयाः ॥

यैव स्वीकुर्वंति ॥ नाऽऽत्मतृप्तये ॥ ये अन्यदत्तेनाऽऽत्मनस्तृप्तिं कामयंते ॥ तेतु तदात्मतृप्तय एव स्वीकुर्वंति ॥ ते हि स्वीक्रियमाणे लाघवं गौरवं च पश्येयुः ॥ तुलसीबिल्वादिरूपेण भक्त्याऽर्पितेनैकेन पत्रेणाहं तृप्यामि ॥ 'तुलसीदलमात्रेण जलस्य चुलकेन च ॥ विक्रीणीते स्वमात्मानं भक्तेभ्यो भक्तवत्सलः' ॥ इत्युक्तेः ॥ एकमपि पत्रं पुष्पं फलं वा स्वल्पं तोयं वा मम तृप्तयेऽलं ॥ अत एव पत्रमित्याद्येकवचननिर्देशः ॥ सुकरत्वाच्च मद्भजनं कार्यं ॥ अतो विहाय भीतिं परमसुलभं मां आराधय ॥ २६ ॥

अर्जुनः ॥ पत्रं पुष्पं फलं तोयं वा संपाद्य हि त्वादाराधनं कार्यमिति भाति ॥ तत्संपादनाऽशक्तस्य त्वदाराधनं कथं संपद्यते ॥

कृष्णः ॥ यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ॥
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥ २७ ॥

यदिति ॥ हे कौंतेय यत् करोषि यत् अश्नासि यत् जुहोषि यत् ददासि यत् तपस्यसि तत् अर्प्यत इत्यर्पणं मयि अर्पणं मदर्पणं कुरुष्व ॥ २७ ॥

यत्कर्म त्वमात्मार्थं देवतांतरोद्देशेन वा करोषि ॥ यच्च भक्ष्यभोज्यादिकमश्नासि ॥ यत् घृतदध्यादिकं देवतांतरोद्देशेन जुहोषि ॥ यत् गोभूतिलहिरण्यादिकं इष्टप्राप्तये अनिष्टनिवृत्तये महते यशसे च ददासि ॥ यत् कृच्छ्रचांद्रायणादिकं तपस्तप्यसे ॥ तत्सर्वं अंते [1] मय्यर्पितं कुरुष्व ॥ मदर्थं पत्रपुष्पादिसंपादनप्रयासो मास्तु ॥ आत्मार्थं अन्योद्देशेन च यत्क्रियते यद्यते यद्भूयते यद्दीयते तत्तप्यते तस्य तस्य अंते मय्यर्पणे अनेन मया कृतेन भगवान् कृष्णः प्रीयतामिति कृते तत्तन्मदाराधनं संपद्यते ॥ ते नाहं तृप्यामि ॥ किमुत मदर्थमेव कृत्वा मय्यर्पणे कृते ॥ मध्यमैः क्रियमाणं मदाराधनं द्विविधं ॥ कामनया अकामनया वा देवतांतरमिष्ट्वा अंते तस्य कर्मणो मयि समर्पणं ॥ कामनया साक्षान्मदुद्देशेनैव कर्म करणं चेति ॥ उभयमपीदं मदाराधनं ॥ कुर्वाणाश्चैवं क्रमेण मुच्यन्ते ॥ अतो

१. अर्प्यत इत्यर्पणं मयि अर्पणं मदर्पणं ॥ मयि अर्पणं यस्य तन्मदर्पणमिति वा ॥

महदिदं मदीयं सौलभ्यं ॥ 'सुखदुःखे समे कृत्वा युद्धाय युज्यस्वे'ति ॥ 'मयि सर्वाणि कर्माणि संन्यस्य युध्यस्वे'ति ॥ 'ब्रह्मण्याधाय कर्माणि संगं त्यक्त्वा करोति य' इति च समर्प्य करणमुक्तं ॥ अत्र तु कृत्वा कृतस्य समर्पणमुच्यते ॥ तत्कथमिदमिति चेत् तत्र समर्पणं भगवति कर्तृत्वस्वातंत्र्यादेरनुसंधानं ॥ अत्रतु कृत्वा कृतस्य अनेन भगवान् प्रीयतामिति निवेदनरूपमिति भेदः ॥

वि ॥ कर्तुर्भोक्तुश्च तव आराध्यस्य देवतांतरस्य च मत्संकल्पायत्तस्वरूपस्थितिप्रवृत्तितया मदधीनत्वात्कर्तारं भोक्तारं च त्वां त्वदीयं कर्तृत्वं भोक्तृत्वं च आराध्यं देवतांतरं तदीयं आराध्यत्वादिकं च कृतं च तत्तत्कर्म इत्येतत्सर्वं मय्यर्पय मदधीनत्वेनानुसंधत्स्व ॥ अयमेव मदाराधनप्रकारः ॥ प्रकारेणानेन मामाराधय ॥ शक्यश्चाहमाराधयितुं ॥ उक्तं च मया मदीयं सौलभ्यं 'पत्रं पुष्प'मिति ॥ ॥ २७ ॥

अर्जुनः ॥ त्वमुक्तरीत्या परमसुलभोऽसि ॥ त्वदाराधनमुक्तरीत्या परमसुकरतमं ॥ अतस्त्वदाराधनेन फलमुत्पद्यमानमल्पमेव स्यात्॥अनायाससाध्यत्वात्॥ आयासानुगुणमेव हि फलमुत्पद्यते लोके ॥

कृष्णः ॥ शुभाशुभफलैरेवं मोक्ष्यसे कर्मबंधनैः ॥
संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि ॥ २८ ॥

शुभेति ॥ एवं संन्यासेन मदर्पणेन सहितः योगः कर्मयोगः तेन युक्तः शोधितः आत्मा मनः यस्य सः संन्यासयोगयुक्तात्मा त्वं शुभं च अशुभं च शुभाशुभे शुभाशुभे फले येषां तानि शुभाशुभफलानि तैः कर्माण्येव बन्धनानि तैः मोक्ष्यसे मुक्तो भविष्यसि ॥ विमुक्तः सन् मां उपेष्यसि ॥ २८ ॥

अनायाससाध्यमपि मदाराधनमतिमहते फलाय कल्पते ॥ तादृशं हि मदीयमौदार्यं ॥ [१] संन्यासयोगयुक्तात्मा भव ॥ मदर्थं कर्म कृत्वा तस्य अंते मयि

१. संन्याससहितो योगः तेन, सन्यासयोगाभ्यां वा युक्तः आत्मा यस्य सः ॥

समर्पणं संन्यासः तद्युक्तः योगः कर्मयोगः ॥ संन्यासः कामादित्यागः तद्युक्तः योगः कर्मयोगः तेन १ शोधितांतःकरणो भूत्वा तया चांतःकरणशुद्ध्या ध्यानयोगे मयि योजितांतःकरणो भूत्वा शुभाशुभफलोत्पादकैः बंधकैः कर्मभिः पुण्यपापरूपैः मुक्तो भविष्यसि ॥ कर्मरूपबंधनैर्विमुक्तो भूत्वा मां २ प्राप्स्यसि ॥ विमुक्ता हि प्रकृतिबंधात् मामाप्नुवंति ॥ न केवलं कर्मबंधमोक्षः किंतु प्रकृतिबंधमोक्षोऽपि ॥ सच्च नातिचिरेण कालेन ॥ लोके महोदारस्य महतः प्रभोः अनायाससाध्येनाप्याराधनेन महतः फलस्य प्राप्तिर्दृश्यते ॥ अतोऽहमाराध्यः ॥ २८ ॥

अर्जुनः ॥ किं त्वमेवं सर्वेषां सुलभः मोक्षप्रदश्च ॥ उत केषांचित् ॥ 'यो मे भक्त्या प्रयच्छति ॥ भक्त्युपहृतमश्नामि' ॥ 'तत्कुरुष्व मदर्पणं' ॥ 'एवं संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि' ॥ इत्युक्त्या भक्तिमतां कृतं कर्म त्वय्यर्पितवतां निर्धूतकामादिदोषाणां शुद्धान्तःकरणानां केषांचिदेव त्वं सुलभो मोक्षदश्चेति भाति ॥ तथाचेत् तव वैषम्यमापद्यते ॥ केषुचिद्रागः केषुचिद्द्वेषः इति रागद्वेषवान् स्याः ॥ रागद्वेषवत्त्वे च कथमुपास्यः स्याः ॥ प्रत्युत तादृशोऽन्य इव त्याज्यः स्याः ॥ रागद्वेषवान् उपास्यश्चेति विरुद्धं ॥ कथमिदमुभयं त्वयि घटते ॥

कृष्णः ॥ समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः ॥
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥ २९ ॥

सम इति ॥ अहं सर्वाणि च तानि भूतानि च सर्वभूतानि तेषु सर्वभूतेषु विषये समः ॥ मे मम द्वेष्टुं योग्यः द्वेष्यः नास्ति ॥ प्रियः नास्ति ॥ येतु भक्ताः मां भजंति ते मयि ॥ तेषु च अहमपि ॥ २९ ॥

१. युक्तः शोधितः योजितश्च ॥ २. अ ॥ मामुपैष्यसि ॥ अहं ब्रह्मास्मीति साक्षात्करिष्यसि ॥ जीवन्नेव मुक्तो भविष्यसि ॥ सेयं जीवन्मुक्तिः ॥ पतिते चास्मिन् शरीरे एकीभवनरूपं विदेहकैवल्यं प्राप्स्यसि ॥

मा मित्यत्र भजनप्रकार उक्तः ॥ महात्मानस्तु मां पार्थेत्युक्तानां महात्मनां भजनप्रकारः खलु सः ॥ मद्योग्यताऽनुगुणं भजनप्रकारं ब्रूहि ॥

कृष्णः ॥ मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ॥
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ॥ ३४ ॥

मन्मना इति॥ त्वं अहं परं अयनं आश्रयः यस्य सः मत्परायणः सन् मयि मनः यस्य सः मन्मनाः भव॥ मम भक्तः मद्भक्तः भव॥ मां यजतीति मद्याजी भव॥ मां नमस्कुरु ॥ एवं आत्मानं युक्त्वा योजयित्वा स्थितः सन् मामेव एष्यसि प्राप्स्यसि ॥ मां एष्यस्येव ॥ ३४ ॥

चंचलं मनो[१] मयि योजय ॥ तेन मद्याजी भविष्यसि ॥ मदर्थं कर्तव्यानि कर्माणि कुरु ॥ तेन च शुद्धं मनो मयि सक्तं भवति ॥ मयि सक्तमना भव ॥ तेन च माहात्म्यज्ञानपूर्वकसुदृढस्नेहरूपभक्तिमान् भव ॥ मय्ये संभावितसकलदोषनिर्हरणाय मां नमस्कुरु ॥ मामेव परममाश्रयं मत्वा मयि मनो योजयित्वा स्थितस्त्वं मामेवैष्यसि ॥ मत्प्राप्तिरूपां मुक्तिं प्राप्स्यसि ॥ मामेष्यस्येव ॥ नात्र संशयः कार्यः ॥ वक्ष्यते च ॥ २ 'मय्येव मन आधत्स्व मयि बुद्धिं निवेशय॥ निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः' ॥ इति ॥ तस्मादनाद्यनवधिकालप्रवृत्तविपरीतज्ञानजनितानादिस्वप्रकारविपरीतविषयप्रवणमनोवाक्कायव्यापारोऽहं परमं पुमांसं मामनन्यया भक्त्याऽऽराध्य कर्मयोगादिभिस्त्वं परां गतिं प्राप्नुहीत्युपदिष्टमात्रेण मया ॥ अवधारय ॥ धारयमनसीदम् ॥ ३४ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
कृष्णार्जुनसंवादे राजविद्याराजगुह्ययोगो नाम नवमोऽध्यायः ॥ ९ ॥

इतीत्यादि पूर्ववत् ॥ राजविद्याराजगुह्यरूपस्यार्थस्य योगः संबंधो यस्मिन् सः राजविद्याराजगुह्ययोगः इति नाम प्रसिद्धः नवमोऽध्यायः इति संपूर्णः ॥

इति श्रीमद्भगवद्गीतोपन्यासदर्शने लक्ष्मणाचार्यविरचिते राजविद्या
राजगुह्ययोगाध्यायार्थ प्रदर्शको नवमः प्रतिबिंबः ॥

१. अत्र मयीत्यस्य रामानुजभाष्योक्तानि सप्तदश विशेषणान्यनुसंधेयानि ॥ २. १२. ८.

॥ श्रीगुरुभ्योनमः ॥

अथ दशमोऽध्यायः ॥

संजयः ॥ पार्थमनःसंगतस्य मोहस्य सावशेषतां मत्वा तच्छेषनिरसनार्थं मपृष्टोऽपि पार्थव्याजेन मंदानुजिघृक्षया सप्तमे 'रसोऽहमप्सित्यादिना नव मे च 'अहं क्रतु'रित्यादिना संग्रहेणोक्ता भगवतो विभूतीर्विस्तरेण वक्ष्यन् भगवान् पार्थसारथिरर्जुनस्य वक्ष्यमाणार्थशुश्रूषोत्पादनाय स्ववचनप्रशंसापूर्वकं तं प्रोत्साहयन्नभिमुखीकरोति ॥

श्रीभगवानुवाच—

कृष्णः ॥ भूय एव महाबाहो शृणु मे परमं वचः ॥
यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया ॥

भूय इति ॥ महांतौ बाहू यस्य सः महाबाहुः हे महाबाहो पार्थ अहं प्रीयमाणाय प्रीतिं कुर्वते ते तुभ्यं हिये काम्या हितकाम्या तया यत् वक्ष्यामि तत् परमं मे वचः भूयएव पुनरपि शृणु ॥ १ ॥

हे महाबाहो पार्थ भूयोऽपि किंचिद्वक्ष्यामि ॥ भक्तिज्ञानोत्पत्तितद्बुद्धिरूपहितकरणेच्छया वक्ष्यामि ॥ नतु प्रयोजनेच्छया ॥ न ते ज्ञातितादोषः ॥ श्रुत्वा श्रुत्वा परमानंदं खल्वनुभवसि त्वं ॥ तादृशाय तुभ्यमहं वक्ष्यामि ॥ यदि मनागरुचिस्सूचिता स्यात् तर्हि पूर्वमेव समापितस्स्यादुपदेशः यच्च वक्ष्यामि तद्वक्ष्यज्ञातव्यध्यातव्यमदीयविभूतिरूपप्रतिपादनपरत्वात्प्रकृष्टं १ संपत्प्रदं च ॥ तादृशं मे तद्वचनं

---

१. परा मा संपत् येन तत् परमं ॥

शृणु १ परमेणादरेण ॥ महाबाहुत्वात्कर्तुमकर्तुमन्यथा कर्तुमपि इतरस्य तव रक्षकः रक्षकतमोहापनोदनमस्याध्यभूत् ॥ मया खलु महता प्रयत्नेन तदपनोदाय प्रदर्श्यते महानयं पंथाः ॥ किमहो ॥ आश्चर्यमेतत् ॥ सर्वथानुग्राह्योऽसि ॥ १ ॥

अर्जुनः ॥ उपदिष्टास्त्वयाऽनेकेऽर्थाः परमया कृपया ॥ विदिताश्च मया ॥ यदि किंचिदवशिष्यते ॥ तर्हि तदप्यतः श्रोष्यामि ॥ कुतस्त्वयैव वाच्यं ॥

कृष्णः ॥ न मे विदुरसुरगणाः प्रभवं न महर्षयः ॥
अहमादिर्हि देवानां महर्षीणां च सर्वशः ॥ २ ॥

नेति ॥ सुराणां गणाः सुरगणा मे मम प्रभवं प्रभवं न विदुः जानंति ॥ महांतश्च ते ऋषयश्च महर्षयः न विदुः ॥ अहं सर्वशः सर्वेषां देवानां महर्षीणां च आदिः ॥ हि प्रसिद्धम् ॥ २ ॥

मे मम महिमानं मे मम सकाशाज्जगदुत्पत्तिं मदधिष्ठानकृष्णादिरूपेणोत्पत्तिमितरविलक्षणां प्रकर्षेण विविधरूपेण भवनं नानाविभूतिमिस्तत्र तत्राऽऽविर्भावं न जानंति सुरगणाः महर्षयश्च सर्वे सर्वैः प्रकारैः ॥ जानंतोऽपि केचित्कैश्चिदेव प्रकारैर्जानंति ॥ न सर्वैः प्रकारैः कोऽपि जानाति ॥ अतो मयैव वाच्यो मन्महिमा॥ देवाः महर्षयश्च ज्ञानाधिका जानीयुरेव हि ते प्रभवं ॥ अतो न विदुरिति कथमुच्यते इति चेत् सर्वेषां देवानां महर्षीणां च उत्पादकत्वबुद्धिज्ञानशक्त्यादिप्रवर्तकत्वादिभिस्सर्वैः प्रकारैरहमादिभूदः कारणभूतो वर्ते ॥ अतो न विदुस्ते ॥ मत्त उत्पन्ना मद्दत्तमदधीनपरिमितज्ञानास्ते कथमनादेर्ममोत्पत्तिं अवाङ्मनसगोचरापरिमितज्ञानशक्त्यादिमहामहिमवतो मम महिमानं च जानंतु ॥ अतो २ न विदुः ॥ अतो अहमेव वक्ष्यामि ॥ शृणु तदवधानेन ॥ २ ॥

अर्जुनः ॥ कोऽसौ देवदेवर्षिभिरविदितो महिमा तव ॥ कुतस्त्वां सर्वेऽपि न

---

१. अत्र, शिष्यहितकरणेच्छया गुरुणा भूयोभूयो वक्तव्यं ॥ सत्यां शुश्रूषायां तां बुध्वा वक्तव्यं ॥ शिष्येण स्वसन्तोषः सूचनीयः॥ इति गुरुशिष्यधर्मस्सूच्यते॥ २. अत्र, 'यतो वाचो निवर्तन्ते॥ अप्राप्य मनसा सह' ॥ इति श्रु (तै. २. ४.) तिः॥ 'ब्रह्मादयः सुरगणा मुखयोऽथ सिद्धाः सत्त्वैकतानमतयो वचसां प्रवाहैः ॥ नान्तं परस्य परतोऽप्यधुनाऽपि यान्ति किं तोष्टुमर्हति स मे हरिरुग्रजातेः' ॥ इत्यादयो भागवत(७. ९.) श्लोकाश्चानुसंधेयाः ॥

जानंति । वृत्तरावद्विषयकज्ञानस्य दौर्लभ्यं ॥ न विदुरित्वां सुरगणा महर्षयश्च ॥ त्वमेव त्वां वेत्थ । अतस्तादृश एव तत्तत्प्रकारवदीयः प्रभावः ॥ अतो मास्तु भूयोऽप्युपदेशः ॥ अलमेतावतः परिज्ञानेन ॥ किं फलं देवाद्यचिंत्यमहामहिमवतो महतो देवस्य तव माहात्म्यपरिज्ञानेन ॥

कृष्णः ॥ यो मामजमनादिं च वेत्ति लोकमहेश्वरं ॥

असंमूढस्स मर्त्येषु सर्वपापैः प्रमुच्यते ॥ ३ ॥

य इति ॥ यः मां न जायत इत्यजः तं न विद्यते आदिर्यस्य सः अनादिः तं महांश्चासौ ईश्वरश्च महेश्वरः लोकानां महेश्वरः लोकमहेश्वरः तं च वेत्ति ॥ सः मर्त्येषु मनुष्येषु मध्ये न संमूढः असंमूढः सन् सर्वाणि च तानि पापानि च सर्वपापानि तैः प्र सम्यक् निःशेषं मुच्यते मुक्तो भवति ॥ ३ ॥

यः मां १ अनादि आदिः कारणं तद्रहितं अत एव जन्मरहितं २ सर्वचेष्टकं सर्वेषामादिभूतं ३ सर्वचेष्टकस्य मुख्यवायोरप्यादिकर्तारं अत एव सर्वलोकाना मीश्वरा ये ब्रह्मादयस्तेषामपीश्वरं च उक्तवक्ष्यमाणमहामहिमवंतं च जानाति स क्वचिदपि विषये संशयविपर्ययरहितः सन् मद्विषयव्यवसायात्मकज्ञानेन साक्षात्कारेण च सर्वेभ्यः पापेभ्यो निरवशेषं मुक्तो भवति ॥ स्वज्ञानेन मोक्षप्रदत्वरूपो महानसौ मे महिमा ॥ मद्विषयकज्ञानस्य पापनिवृत्तिरूपमहाफलकत्वेन दौर्लभ्यं ॥ अत एव कश्चिदेव महानुभावो जानाति मां न सर्वे ॥ उक्तं च मया ॥ 'आश्चर्यवत्पश्यति कश्चिदेन'मिति ॥ 'आश्चर्यो ज्ञाता कुशलानुशिष्ट' इति श्रुतिश्च ॥ भक्तिज्ञानोत्पत्तितद्विवृद्धि प्रतिबंधकसकलपापमोचकत्वान्मद्विषयकज्ञानस्य वक्ष्य-

१. न विद्यते आदिर्यस्य तं ॥ २. द्वै ॥ अनश्चासावादिश्च तं ॥ ३. द्वै ॥ अनस्य वायोः आदिं ॥ ४. वि ॥ सजातीयविजातीयैरेकीकृत्य मोहः तद्रहितस्सन् यो मां सजातीयविजातीयस्वेतरसकलवस्तुव्यावृत्तं जानाति ॥ अजमित्यनेन जडात्तत्संसृष्टवत्थचेतनाच्च व्यावृत्तिः ॥ अनादिमजमिति मुक्तात् ॥ अनादित्वमजत्वेऽन्वेति ॥ मुक्तस्य अजत्वमादिमत् ॥ सर्वलोकमहेश्वरमिति नित्यमुक्तात् ॥

माणार्थश्रवणेन संपाद्यं तद्ज्ञानं त्वया ॥ अतो वक्ष्यामि ॥ शृणु तदादरेण १ ॥ ३ ॥

अर्जुनः ॥ सर्वैः प्रकारैर्मद्ज्ञानं मोक्षाय भवतीत्युक्तं ॥ तेच प्रकाराः उत्पादकत्वबुद्धिज्ञानादिप्रवर्तकत्वप्रभृतयः ॥ तत्र उत्पादकत्वं प्रागुक्तं श्रुतं च मया ॥ बुद्ध्यादिप्रवर्तकत्वं ब्रूहि ॥ बुद्ध्यादीनां केषां भावानां प्रवर्तकोऽसि ॥

कृष्णः ॥ बुद्धिर्ज्ञानसंमोहः क्षमा सत्यं दमश्शमः ॥
सुखं दुःखं भवोऽभावो भयं चाभयमेव च ॥ ४ ॥

अहिंसा समता तुष्टिः तपो दानं यशोऽयशः ॥
भवन्ति भावा भूतानां मत्त एव पृथग्विधाः ॥ ५ ॥

बुद्धिरिति ॥ बुध्यिः ज्ञानं न संमोहः असंमोहः क्षमा सत्यं दमः बाह्येन्द्रियनिग्रहः शमः अंतरिंद्रियनिग्रहः सुखं दुःखं भव उत्पत्तिः भावः सत्ता भव जन्मः न भावः अभावः मरणं भवः मनोविकासः अभावः मनसोऽवसादः भयं च न भयं अभयं. चैव न हिंसा अहिंसा तथा समस्य भावः समता तुष्टिः अलं बुद्धिः तयः दानं यश न यशः अयशः पृथक् भिन्नभिन्ना विधा प्रकारः येषां ते पृथग्विधाः एते भावा पदार्थाः भूतानां प्राणिनां मत्त एव मम सकाशादेव भवंति ॥ ४ ॥ ९ ॥

सर्वेषां प्राणिनां बुद्धिज्ञानादयः २ अबुध्यज्ञानादयश्च धर्मा नानाविधा ३ लोकप्रसिद्धाः ॥ ते सर्वेऽपि मत्त एव भवंति नान्यस्मात् ॥ अतोऽहं लोकमहेश्वरः ॥ अयमेव बुध्यादि प्रवर्तकत्वरूपो महिमा ॥ प्रकारेणानेन मां ज्ञात्वा ये भजंति तेषां बुध्यादयो भवंति ॥ न भजंति ये तेषां अबुध्यादयो भवंति ॥ अतोऽहं बुध्यादिलब्धये भजनीयः४ ॥ ४ ॥ ५ ॥

१. द्वै ॥ अत्र श्लोकद्वयेन पार्थस्य शुश्रूषोत्पादनं माहात्म्योक्तिस्तृतीये ॥ अ ॥ घि ॥ श्लोकत्रयेण पार्थस्य शुश्रूषोत्पादनं माहात्म्योक्तिश्चतुर्थे ॥ २. च शब्देन गृहीताः ॥ चकारोन्य उक्तसमुच्चये ॥ ३. एवकारार्थोऽयं ॥ ४. द्वै ॥ भवः जन्म ॥ भावः सत्ता ॥ अ ॥ अभावः मरणं ॥ वि ॥ भवः अनुकूलानुभवहेतुको मनसो हर्षः ॥ अभावः प्रतिकूलानुभवहेतुको मनसोऽवसादः ॥

अर्जुनः ॥ भृगुमरीच्यादय ऋषयः स्वायंभुवादयो मनवश्च प्राणिनामुत्पत्तिस्थित्योः कर्तारोऽभिधीयंते तत्र तत्र पुराणादिषु ॥ ब्रह्मा च सर्वस्रष्टा प्रथितः ॥ उक्तं च त्वया ॥ १ ' अव्यक्ताद्व्यक्तयस्सर्वाः प्रभवन्त्यहरागमे ॥ राज्यागमे प्रलीयंते तत्रैवाव्यक्तसंज्ञके ॥ भूतग्रामस्स एवायं भूत्वा भूत्वा प्रलीयते ॥ रात्र्यागमेऽवशः पार्थ प्रभवत्यहरागमे ' ॥ इति ॥ सातिचैवं कथं भूतानां भवो जन्म भावः सत्ता च मत्त एवेत्युच्यते ॥

कृष्णः ॥ महर्षयस्सप्त पूर्वे चत्वारो मनवस्तथा ॥
मद्भावा मानसा जाताः येषां लोक इमाः प्रजाः ॥ ६ ॥

महर्षय इति ॥ लोके इमाः प्रजाः येषां ते मनस इमे मानसाः जाताः पूर्वे सप्त महान्तश्च ते ऋषयश्च महर्षयः तथा चत्वारः मनवः मत् मत्तः भावः जन्म येषां मम भावः ध्यानं येषां मम भाव इव भावः संकल्पः येषां वा मद्भावः ॥ ६ ॥

मरीच्यादयः पूर्वमन्वंतरस्थाः सप्त महर्षयः ॥ ' मरीचिरत्र्यंगिरसौ पुलस्त्यः पुलहः क्रतुः ॥ वसिष्ठश्च महातेजाः पूर्वे सप्तर्षयः स्मृताः ' ॥ इत्युक्तेः ॥ भृग्वादयस्सर्गादिकालोत्पन्नाः सप्त महर्षयः ॥ भृगुं मरीचिमत्रिं च पुलस्त्यं पुलहं क्रतुं ॥ वसिष्ठं च महातेजास्सोऽसृजन्मनसा सुतान् ॥ सप्त ब्रह्माण इत्येते पुराणे निश्चयं गताः ' ॥ इत्युक्तेः ॥ इति वा ॥ तथा चत्वारो मनवः स्वायंभुवस्वारोचिषरैवतोत्तममनामानः ॥ ब्रह्मसावर्णिरुद्रसावर्णिधर्मसावर्णिदक्षसावर्णिनामानो वा ॥ सप्त महर्षयः तेभ्यः पूर्वे चत्वारः सनकसनंदनसनातनसनत्कुमाराः ॥ तथा स्वायंभुवाद्याश्चतुर्दश मनवः ॥ इति वा ॥ पूर्वे सप्त महर्षयः ॥ तथा चत्वारः ब्राह्मणक्षत्रियवैश्यशूद्रभेदेन चतुर्विधाः मनवः ज्ञानाधिका देवाः ॥ इति वा ॥ ' मनवो बोधवैशेष्यात् देवा ब्रह्मादयः स्मृताः ॥ विप्रादिवर्णभेदेन चत्वारो बहवोऽपि ते ' ॥ इत्युक्तेः ॥ ' विष्णोर्ब्राह्मणजातिस्सन् जज्ञे ब्रह्मा चतुर्मुखः ॥ वायुः सदाशिवोऽनंतो गरुडः शक्र एव च ॥ कामश्च वरुणश्चैव सूर्यसोमौ यमस्तथा ॥ एवमाद्याः क्षत्रिया स्तु देवा ब्रह्मविनिर्मिताः ॥ विवस्वदिंद्रवरुणविष्णुभ्योऽन्येऽदितेः सुताः ॥

---

१. ८. १८. १९.

रुद्रादन्ये तथा रुद्रा वायोरन्ये च वायवः ॥ अग्नेरन्ये च वसवो वैश्या इत्येव कीर्तिताः ॥ अश्विनौ पृथिवी चैव कालो मृत्यव एव च ॥ शूद्रदेवास्समुद्दिष्टाः देववर्ण इति स्मृतः' ॥ इत्युक्तेश्च ॥ एते मानसाः ब्रह्मणो मनसस्सकाशादुत्पन्ना मानसपुत्रत्वेन जाताः मानसेन आ प्रथमं जाता इत्येकं पदं वा ॥ तथापि मद्भावाः मत्तः भावो जन्म येषां ते तादृशाः ॥ ब्रह्मांतर्यामिणो ब्रह्मतान्मो मत एवोत्पन्नाः ॥ ब्रह्मा तु [1] निमित्तमात्रं ॥ स्रष्टृत्वेन पालकत्वेन च प्रथितानां ऋष्यादीनां ब्रह्मणश्च मत्त उत्पन्नत्वेन मम मूलकारणत्वात् मत्तो जन्म सत्तेति च युज्यते ॥ मयि [2] भावो भावना येषां ते मद्भावाः मदध्यानलब्धविभवाः ॥ मत्तो लब्धविभवैरतैः कृतं मत्कृतमेव ॥ अत उक्तं युक्तं ॥ मम [3] भावः संकल्पः स एव येषां ते मद्भावाः मत्संकल्पानुविधायिनः ॥ मत्संकल्पानुसारेण कृतं मत्कृतमेव ॥ अत उक्तं युक्तं ॥ लोके दृश्यमानाः इमाः सर्वाः प्रजाः एषां संतानभूताः पुत्रपौत्रादिरूपाः शिष्यप्रशिष्यादिरूपाः ॥ द्विविधो हि वंशः ॥ विद्यया जन्मना च ॥ तैस्तैः सृष्टानां पालितानां च सृष्टिपालनमूलकारणभूतत्वान्मम मत्त एव भावा भवंतीति युक्तमेव ॥ ६ ॥

अर्जुनः ॥ स्वज्ञानेन मोक्षप्रदत्वप्रभृतिमाहात्म्यान्युक्तानि किं तद्ज्ञानेन प्रयोजनं माहात्म्यज्ञानस्य पापनिवृत्तिः फलमित्युक्तमिति चेत् तया किं भवति

कृष्णः ॥ एतां विभूतिं योगं च मम यो वेत्ति तत्वतः ॥
सोऽविकंपेन योगेन युज्यते नात्र संशयः ॥ ७ ॥

एतामिति ॥ मम एतां विभूतिं विविधभवनं ऐश्वर्यं वा योगं सामर्थ्यं च यः तत्वतः वेत्ति सः न विद्यते विकंपः यस्य स अविकंपः तेन योगेन युज्यते ॥ अत्र संशयः न विद्यते ॥ ७ ॥

मम एतां विभूतिं उक्तवक्ष्यमाणरूपेण विविधभवनं प्रभावं वा सर्वस्य

१. द्वे ॥ अत्र, निमित्तमात्रमीशस्व विश्वसर्गनिरोधयोः ॥ हिरण्यगर्भः सर्वेश काजलक्षणेभ्यस्ते' मान १०. ७१. ८. त्यादिकं अनुसंधेयं ॥ २. आ ॥ ३. वि ॥

मदायत्तस्वरूपोत्पत्तिस्थितिप्रवृत्तित्वरूपमहैश्वर्यं वा योगं सामर्थ्यातिशयं कल्याणगुणसंबंधं वा एतदुभयं यः यथावज्जानाति तस्य तेन ज्ञानेन १ अचंचलः २ ध्यानयोगः ३ अपरोक्षज्ञानयोगः ४ भक्तियोगो वा भवति ॥ अत्र संशयं मा कुरु ॥ माहात्म्यज्ञानफलं योगसिद्धिः ॥ माहात्म्यज्ञानेन पापनिवृत्तिस्तया योगसिद्धिः ॥ अतो ज्ञातव्यं माहात्म्यं मम ॥ ७ ॥

अर्जुनः ॥ माहात्म्यज्ञानेन योगसिद्धिरित्युक्तं ॥ तत्कथम् ॥

कृष्णः ॥ अहं सर्वस्य प्रभवः मत्तः सर्वं प्रवर्तते ॥
इति मत्वा भजन्ते मां बुधा भावसमन्विताः ॥ ८ ॥

अहमिति ॥ अहं सर्वस्य प्रभवस्यस्मादिति प्रभवः सर्वं जगत् मतः प्रवर्तते इति मत्वा ज्ञात्वा बुधाः मदीयमाहात्म्यज्ञानवन्तः संतः भावेन भक्त्या समन्विताः सहिताः संतः मां भजंते ॥ ८ ॥

सर्वस्य जगतः अहमुत्पादकः ॥ मत्तः स्थितिनाशादि बुद्धिज्ञानादि वा सर्वं जायते ॥ सर्वं जगत् चेष्टते वा इति मदीयैश्वर्ये ज्ञाते तादृशज्ञानवतां मयि भक्तिर्भवति ॥ तत्पूर्वकं मां ध्यायंति ॥ मदीयैश्वर्ये ज्ञाते मदीयाथात्म्यज्ञानाभिनिवेशो भवति ॥ तद्पूर्वकाश्च मां सेवंते ॥ तेन च मत्प्रसादादपरोक्षज्ञानलाभो भवति ॥ मदीयैश्वर्यज्ञाने मत्प्राप्तीच्छा भवति ॥ तया च प्रेरिता मां प्राप्तुं प्रीत्या मामाराधयंति ॥ ८ ॥

अर्जुनः ॥ माहात्म्यज्ञानजन्यप्रीतिपूर्वकभजनप्रकारं ब्रूहि ॥ उक्तप्रकारेण भजमानाः कीदृशाः स्युः ॥

कृष्णः ॥ मच्चित्ता मद्गतप्राणाः बोधयन्तः परस्परं ॥
कथयन्तश्च मां नित्यं तुष्यंति च रमंति च ॥ ९ ॥

१. अविकंप्येनेति पाठे चलयितुमशक्य ॥ २. द्वै ॥ ३. अ ॥ ४. वि ॥

एषाप्रकटनपत्रिका यथानुकूलं सर्वेभ्योयुष्मन्मित्रेभ्यो बन्धुभ्यश्च मयि कृपया प्रदर्शयितव्या ।
किंच ये इदं पुस्तकमपेक्षेरन् तादृशानां नामादिकं मह्यं निर्दिष्टंचेत्, तेभ्योऽहमिमांप्रेषयेयम् .

अचिरादेव प्रकाशयिष्यते ॥ ॥ श्रीः ॥ अचिरादेव प्रकाशयिष्यते ॥

अनितरसाधारणया द्वैताद्वैतविशिष्टाद्वैतरूपमतत्रयसाधारण्या सुललितपदविन्यासावीचित्र्यया, आत्मार्थमबुभुत्सूनां गीतोपन्यासकानां चात्यन्तमुपकारिण्या, अतिसमीचीनदेवनागरीमुद्राक्षरमुद्रितया **गीतोपन्यास दर्पण** अभिख्यायाव्याख्यया विभूषिता ॥

इयंच व्याख्या विचित्रशतावधानी विद्वन्मणि, महाभागवत, सलक्षणवर्णक्रमघनपाटी, मतत्रयगीतोपन्यासविद्वत्प्रमुख विविध विरुदविभूषितैः **पण्डित टि. लक्ष्मणाचार्यै** विरचिता तत्पौत्रेणच टि. एन्. रघूत्तमाचार्येण प्रथम भागे पण्डितमहाशयानां भूमिकयासह संपुटत्रयेण प्रकाश्यमानाच विजयतेतमां ॥

प्रथम संपुटः	(१ to ६ अध्यायाः (यन्त्रस्थः कश्चिद्भागः)	रू.
	१९२५ ऐप्रेल् मासि (प्रकाश्येत ॥	५
द्वितीय संपुटः	(७ to १२) १९२५ आगस्ट् मासि ॥	२
तृतीय संपुटः	(१३ to १८) इदानीं सज्जोऽस्ति ॥	३

पुस्तकसंख्यायाः परिमितत्वात् नैराश्यपरिहाराय अचिरादेव अपेक्षापत्र प्रतीक्ष्यते ॥

१९२५ ऐप्रेल् मासादर्वागेव स्वापेक्षां निवेदयतां भागत्रयस्यापि देयत्वेन कल्पितं मूल्य रूप्यकाष्टकं ॥

१९२५ ऐप्रेल् नासादर्वागेवस्वापेक्षा निवेदितवद्भ्यो निवेदनानन्तरमेव तृतीयस्संपुष्टो वि. पी. द्वारा रूप्यकत्रयस्य प्रेष्येत ॥

१९२५ ऐप्रेल् मासादनन्तरं प्रथमस्संपुटो रूप्यकत्रयस्य आगस्ट् मासादनन्तरं द्वितीयसंपुटो रूप्यकद्वयस्य च प्रेष्येत ॥

बन्धनं विना यथायथमेव जिघृक्षतां कालानुरोधेन मूल्यं किंचिन्मनयूनीक्रियेत ॥

सर्वत्रापि प्रेषणव्ययः पृथगेव ॥

एतत्पुस्तकप्रचारकाणां प्रत्येकं कमिषन् दीयेत ॥

[redacted]पितं तदर्थं प्रकाशयितुमुद्यक्तं पण्डितमहाशयानां पौत्रं मां सर्वोपिसंस्कृतभाषाभिमानिनः आस्तिकवर्याः पुस्तकग्रहणादिभिः अनुगृह्णीयुरिति सप्रश्रयमभ्यर्थये ॥

इत्थं विद्वज्जनकृपाकांक्षी

T. N. **रघूत्तमाचार्यः**

प्रकाशकः गीतोपन्यास दर्पण आफीस विडवारी, बंगलोर D.